The Râjatarangini of Kalhaṇa / edited by Durgâprasâda, son of Vrajalâla.

Contributors

Kalhaṇa, active 12th century.
Durgā-Prasāda, son of Vraja-lāla.
Peterson, Peter, 1847-1899.
Jona-Rāja.
Śrīvara, disciple of Jona-Rāja.
Prājya Bhaṭṭa.

Publication/Creation

Bombay : Govt. central book depôt, 1892-1896.

Persistent URL

https://wellcomecollection.org/works/gpyxvytz

License and attribution

This work has been identified as being free of known restrictions under copyright law, including all related and neighbouring rights and is being made available under the Creative Commons, Public Domain Mark.

You can copy, modify, distribute and perform the work, even for commercial purposes, without asking permission.

wellcome collection

Wellcome Collection
183 Euston Road
London NW1 2BE UK
T +44 (0)20 7611 8722
E library@wellcomecollection.org
https://wellcomecollection.org

P.B. SANSKRIT 142

WELLCOME
LIBRARY

KALHANA

335254

PREFACE.

The present number of the *Bombay Sanskrit Series* contains the first seven tarangas of the Râjataraṅgiṇî of Kalhaṇa. So much was printed off at the sudden and lamentable death of the editor, Pandit Durgâprasâda of Jeypore. A second volume will contain the eighth and last taranga of Kalhaṇa's work. The Pandit had completed the preparation of his text of this part of the book, and his manuscript is in the printers' hands. I shall discharge the pious office of seeing this part of my friend's book through the press, and of writing, as I had already at his request undertaken to do, an Introduction and Notes. It must be matter for future consideration whether an attempt should be made to complete this edition of the Râjataraṅgiṇî by a third number, to contain the various supplements which were added by later writers.

I make no doubt that an edition of the Râjataraṅgiṇî, prepared from manuscripts by so learned and capable a scholar as Pandit Durgâprasâda had proved himself to be, will be most welcome. A reliable edition of a work so important has long been one of our greatest *desiderata*. It was at my suggestion that the Pandit undertook the work; and I know how steadily he had, since he took it in hand, pressed it forward, in the midst of many other laborious and important tasks.

He has put his whole strength into this book. It is even yet hard to realize that this edition of the Râjataraṅgiṇî is the last gift of the kind we shall get from a hand and brain that have already given us so much. But there is some little satisfaction in the thought that he was permitted to finish this task also, and that by it, and other enduring memorials, he had won for himself before his death that which he most eagerly sought after, a name among scholars that will not be forgotten.

ELPHINSTONE COLLEGE,
BOMBAY.
10th August, 1892.

P. P.

राजतरङ्गिणी ।

प्रथमस्तरङ्गः ।

भूषाभोगिफणारत्नरोचिःसिचयचारवे ।
नमः प्रलीनमुक्ताय हरकल्पमहीरुहे ॥ १ ॥
भालं वह्निशिखाङ्कितं दधदधिश्रोत्रं वहन्संभृत-
क्रीडत्कुण्डलिजृम्भितं जलधिजच्छायाच्छकण्ठच्छविः ।
वक्षो बिभ्रदहीनकञ्चुकचितं बद्धाङ्गनार्धस्य वो
भागः पुंगवलक्ष्मणोस्तु यशसे वामोथवा दक्षिणः ॥ २ ॥
वन्द्यः कोपि सुधास्यन्दास्कन्दी स सुकवेर्गुणः ।
येनायाति यशःकायः स्थैर्यं स्वस्य परस्य च ॥ ३ ॥
कोन्यः कालमतिक्रान्तं नेतुं प्रत्यक्षतां क्षमः ।
कविप्रजापतींस्त्यक्त्वा रम्यनिर्माणशालिनः ॥ ४ ॥
न पश्येत्सर्वसंवेद्यान्भावान्प्रतिभया यदि ।
तदन्यद्दिव्यदृष्टित्वे किमिव ज्ञापकं कवेः ॥ ५ ॥
कथादैर्घ्यानुरोधेन वैचित्र्येप्यप्रपञ्चिते ।
तदत्र किंचिदस्त्येव वस्तु यत्प्रीतये सताम् ॥ ६ ॥
श्लाघ्यः स एव गुणवान्रागद्वेषबहिष्कृता ।
भूतार्थकथने यस्य स्थेयस्येव सरस्वती ॥ ७ ॥

पूर्वैर्बद्धं कथावस्तु मयि भूयो निबध्नति ।
प्रयोजनमनाकर्ण्य वैमुख्यं नोचितं सताम् ॥ ८ ॥
दृष्टं दृष्टं नृपोदन्तं बद्ध्वा प्रमयमीयुषाम् ।
अर्वाक्कालभवैर्वार्ता यत्प्रबन्धेषु पूर्यते ॥ ९ ॥
दाक्ष्यं कियदिदं तस्मादस्मिन्भूतार्थवर्णने ।
सर्वप्रकारं स्खलिते योजनाय ममोद्यमः ॥ १० ॥

युगलकम् ॥

विस्तीर्णाः प्रथमे ग्रन्थाः स्मृत्यै संक्षिपतो वचः ।
सुव्रतस्य प्रबन्धेन च्छिन्ना राजकथाश्रयाः ॥ ११ ॥
या प्रथामगमन्नैति सापि वाच्यप्रकाशने ।
पाटवं दुष्टवैदुष्यतीव्रा सुव्रतभारती ॥ १२ ॥
केनाप्यनवधानेन कविकर्मणि सत्यपि ।
अंशोपि नास्ति निर्दोषः क्षेमेन्द्रस्य नृपावलौ ॥ १३ ॥
दृग्गोचरं पूर्वसूरिग्रन्था राजकथाश्रयाः ।
मम त्वेकादश गता मतं नीलमुनेरपि ॥ १४ ॥
दृष्टैश्च पूर्वभूभर्तृप्रतिष्ठावस्तुशासनैः ।
प्रशस्तिपट्टैः शास्त्रैश्च शान्तोशेषभ्रमक्रमः ॥ १५ ॥
द्वापञ्चाशतमाम्नायभ्रंशाद्यान्नास्मरन्नृपान् ।
तेभ्यो नीलमताद्दृष्टं गोनन्दादिचतुष्टयम् ॥ १६ ॥
बद्ध्वा द्वादशभिर्ग्रन्थसहस्रैः पार्थिवावलिः ।
प्राङ्महाव्रतिना येन हेलाराजद्विजन्मना ॥ १७ ॥
तन्मतं पद्ममिहरो दृष्ट्वाशोकादिपूर्वगान् ।
अष्टौ लवादीन्नृपतीन्स्वस्मिन्ग्रन्थे न्यदर्शयत् ॥ १८ ॥

युगलकम् ॥

येष्यशोकादयः पञ्च श्रीछविल्लाकरोब्रवीत् ।
तान्द्वापञ्चाशतो मध्याच्छ्लोकस्तस्य तथा ह्ययम् ॥ १९ ॥
आशोकादभिमन्योर्ये प्रोक्ताः पञ्च महीभुजः ।
ते द्वापञ्चाशतो मध्यादेव लब्धाः पुरातनैः ॥ २० ॥
इयं नृपाणामुल्लासे ह्रासे वा देशकालयोः ।
भैषज्यभूतसंवादिकथायुक्तोपयुज्यते ॥ २१ ॥
संक्रान्तप्राक्तनानन्तव्यवहारः सचेतसः ।
कस्येदृशो न संदर्भो यदि वा हृदयंगमः ॥ २२ ॥
क्षणभङ्गिनि जन्तूनां स्फुरिते परिचिन्तिते ।
मूर्धाभिषेकः शान्तस्य रसस्यात्र विचार्यताम् ॥ २३ ॥
तदमन्दरसस्यन्दसुन्दरेयं निपीयताम् ।
श्रोत्रशुक्तिपुटैः स्पष्टमङ्ग राजतरङ्गिणी ॥ २४ ॥
पुरा सतीसरः कल्पारम्भात्प्रभृति भूरभूत् ।
कुक्षौ हिमाद्रेरर्णोभिः पूर्णा मन्वन्तराणि षट् ॥ २५ ॥
अथ वैवस्वतीयेस्मिन्प्राप्ते मन्वन्तरे सुरान् ।
द्रुहिणोपेन्द्ररुद्रादीनवतार्य प्रजासृजा ॥ २६ ॥
कश्यपेन तदन्तःस्थं घातयित्वा जलोद्भवम् ।
निर्ममे तत्सरोभूमौ कश्मीरा इति मण्डलम् ॥ २७ ॥

युगलकम् ॥

उद्यद्धैतस्तनिःष्यन्ददण्डकुण्डातपत्रिणा ।
यत्सर्वनागाधीशेन नीलेन परिपाल्यते ॥ २८ ॥
गुहोन्मुखी नागमुखापीतभूरिपया रुचिम् ।
गौरी यत्र वितस्तात्वं याताप्युज्झति नोचिताम् ॥ २९ ॥
शङ्खपद्ममुखैर्नागैर्नानारत्नावभासिभिः ।
नगरं धनदस्येव निधिभिर्यन्निषेव्यते ॥ ३० ॥

यत्तार्क्ष्यभीत्या प्राप्तानां नागानां गुप्तये ध्रुवम् ।
प्रसारितभुजं पृष्ठे शैलप्राकारलीलया ॥ ३१ ॥
भुक्तिमुक्तिफलप्राप्तिः काष्ठरूपमुमापतिम् ।
पापसूदनतीर्थान्तर्यत्र संस्पृशतां भवेत् ॥ ३२ ॥
संध्यादेवीजलं यस्मिन्दत्ते निःसलिले गिरौ ।
दर्शनं पुण्यपापानामन्वयव्यतिरेकयोः ॥ ३३ ॥
स्वयंभूर्यत्र हुतभुग्भुवो गर्भात्समुन्मिषन् ।
जुह्वतां प्रतिगृह्णाति ज्वालाभुजवनैर्हविः ॥ ३४ ॥
देवी भेडगिरेः शृङ्गे गङ्गोद्भेदशुचौ स्वयम् ।
सरोन्तर्दृश्यते यत्र हंसरूपा सरस्वती ॥ ३५ ॥
नन्दिक्षेत्रे हरावासप्रासादे द्युचरार्पिताः ।
अद्यापि यत्र व्यज्यन्ते पूजाचन्दनबिन्दवः ॥ ३६ ॥
आलोक्य शारदां देवीं यत्र संप्राप्यते क्षणात् ।
तरङ्गिणी मधुमती वाणी च कविसेविता ॥ ३७ ॥
चक्रभृद्विजयेशादिकेशवेशानभूषिते ।
तिलांशोपि न यत्रास्ति पृथ्व्यास्तीर्थैर्बहिष्कृतः ॥ ३८ ॥
विजीयते पुण्यबलैर्बलैर्यत्तु न शस्त्रिणाम् ।
परलोकात्ततो भीतिर्यस्मिन्निवसतां परम् ॥ ३९ ॥
सोष्मस्नानगृहाः शीते सुस्थतीरास्पदा रये ।
यादोविरहिता यत्र निम्नगा निरुपद्रवाः ॥ ४० ॥
असंतापहतां[1] जानन्यत्र पित्रा विनिर्मिते ।
गौरवादिव तिग्मांशुर्धत्ते ग्रीष्मेप्यतीव्रताम् ॥ ४१ ॥
विद्या वेश्मानि तुङ्गानि कुङ्कुमं सहिमं पयः ।
द्राक्षेति यत्र सामान्यमस्ति त्रिदिवदुर्लभम् ॥ ४२ ॥

---

१ संतापासहतां इत्युचितः पाठः ।

त्रिलोक्यां रत्नसूः श्लाघ्या तस्यां धनपतेर्हरित् ।
तत्र गौरीगुरुः शैलो यत्तस्मिन्नपि मण्डलम् ॥ ४३ ॥
तत्र कौरवकौन्तेयसमकालभवात्कलौ ।
आ गोनन्दात्स्मरन्ति स्म न द्वापञ्चाशतं नृपान् ॥ ४४ ॥
तस्मिन्काले ध्रुवं तेषां कुकृत्यैः काश्यपीभुजाम् ।
कर्तारः कीर्तिकायस्य नाभूवन्कविवेधसः ॥ ४५ ॥
भुजवनतरुच्छायां येषां निषेव्य महौजसां
जलधिरशना मेदिन्यासीदसावकुतोभया ।
स्मृतिमपि न ते यान्ति क्ष्मापा विना यदनुग्रहं
प्रकृतिमहते कुर्मस्तस्मै नमः कविकर्मणे ॥ ४६ ॥
येप्यासन्निभकुम्भशायितपदा येपि श्रियं लेभिरे
येषामप्यवसन्पुरा युवतयो गेहेष्वहश्चन्द्रिकाः ।
ताँल्लोकोयमवैति लोकतिलकान्स्वप्नेप्यजातानिव
भ्रातः सत्कविकृत्य किं स्तुतिशतैरन्धं जगत्त्वां विना ॥ ४७ ॥
अष्टषष्ट्यधिकामब्दशतद्वाविंशतिं नृपाः ।
अपीपलंस्ते कश्मीरान्गोनन्दाद्याः कलौ युगे ॥ ४८ ॥
भारतं द्वापरान्तेभूद्वार्तयेति विमोहिताः ।
केचिदेतां मृषा तेषां कालसंख्यां प्रचक्रिरे ॥ ४९ ॥

युग्मम् ॥

लब्धाधिपत्यसंख्यानां वर्षान्संख्याय भूभुजाम् ।
भुक्तात्कालात्कलेः शेषो नास्त्येवं तद्विवर्जितात् ॥ ५० ॥
शतेषु षट्सु सार्धेषु त्र्यधिकेषु च भूतले ।
कलेर्गतेषु वर्षाणामभूवन्कुरुपाण्डवाः ॥ ५१ ॥
लौकिकेब्दे चतुर्विंशे शककालस्य सांप्रतम् ।
सप्तत्याभ्यधिकं यातं सहस्रं परिवत्सराः ॥ ५२ ॥

प्रायस्तृतीयगोनन्दादारभ्य शरदा तदा ।
द्वे सहस्रे गते त्रिंशदधिकं च शतत्रयम् ॥ ५३ ॥
वर्षाणां द्वादशशती षष्टिः षड्भिश्च संयुता ।
भूभुजां कालसंख्यायां तद्वापञ्चाशतो मता ॥ ५४ ॥
ऋक्षाद्दक्षं शतेनाब्दैर्यात्सु चित्रशिखण्डिषु ।
तच्चारे संहिताकारैरेवं दत्तोत्र निर्णयः ॥ ५५ ॥
आसन्मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ ।
षड्द्विकपञ्चद्वियुतः शककालस्तस्य राज्यस्य ॥ ५६ ॥
कश्मीरेन्द्रः स गोनन्दो वेल्लद्गङ्गादुगूलया ।
दिशा कैलासहासिन्या प्रतापी पर्युपास्यत ॥ ५७ ॥
विहाय देहं शेषाहेर्विषाश्लेषभयादिव ।
भूर्गारुत्मतरत्नाङ्के भेजे तस्य भुजे स्थितिम् ॥ ५८ ॥
साहायकार्थमाहूतो जरासंधेन बन्धुना ।
स संरुरोध कंसारेर्मथुरां पृथुभिर्बलैः ॥ ५९ ॥
तेनोपकूलं कालिन्द्याः स्कन्धावारं निबध्नता ।
यादवीहसितैः सार्धं योधानां मीलितं यशः ॥ ६० ॥
एकदा सर्वतो भग्नाः स्वसेनास्त्रातुमुद्यतः ।
तं संरुरोध योद्धारं संगरे लाङ्गलध्वजः ॥ ६१ ॥
तयोस्तुल्यौजसोर्युद्धे चिराय करवर्तिनी ।
मम्लौ विजयसंदेहे किं जयस्रग्जयश्रियः ॥ ६२ ॥
अथ शस्त्रक्षतैरङ्गैरालिलिङ्ग रणाङ्गने ।
भुवं काश्मीरिको राजा यादवस्तु जयश्रियम् ॥ ६३ ॥
गतिं प्रवीरसुलभां तस्मिन्सुक्षत्रिये गते ।
श्रीमान्दामोदरो नाम तत्सूनुरभृत क्षितिम् ॥ ६४ ॥

भोगयोगोर्जितं राज्यं प्राप्तवानपि भूपतिः ।
ध्यायन्पितृवधं मानी नोपलेभे स निर्वृतिम् ॥ ६५ ॥
अथोपसिन्धु गान्धारैः सज्जे कन्यास्वयंवरे ।
निमन्त्र्य शुश्रावानीतान्वृष्णीन्दर्पोष्णदोर्द्रुमः ॥ ६६ ॥
ततस्तस्यातिसंरम्भात्तानदूरस्थितान्प्रति ।
यात्राभूद्ध्वजिनीवाजिरेणुग्रस्तनभस्तला ॥ ६७ ॥
तदाहवे विवाहोत्का विघ्नति[1] स्म पतिंवरा ।
आसीत्तु द्युपुरंध्रीणां गान्धारेषु स्वयंवरः ॥ ६८ ॥
तदाक्रान्तासुहृच्चक्रः स चक्रायुधसंगरे ।
चक्रधाराध्वना धीरश्चक्रवर्ती दिवं ययौ ॥ ६९ ॥
अन्तर्वत्नीं तस्य पत्नीं तदा यदुकुलोद्वहः ।
राज्ये यशोवतीं नाम द्विजैः कृष्णोभ्यषेचयत् ॥ ७० ॥
तस्मिन्काले स्वसचिवान्सासूयान्विन्यवीवरत् ।
इमं पौराणिकं श्लोकमुदीर्य मधुसूदनः ॥ ७१ ॥
कश्मीरा पार्वती तत्र राजा ज्ञेयः शिवांशजः ।
नावज्ञेयः स दुष्टोपि विदुषा भूतिमिच्छता ॥ ७२ ॥
पुंसां निर्गौरवा भोज्य इव याः स्त्रीजने दृशः ।
प्रजानां मातरं तास्तामपश्यन्देवतामिव ॥ ७३ ॥
अथ वैजनने मासि सा देवी दिव्यलक्षणम् ।
निर्दग्धस्यान्वयतरोरङ्कुरं सुषुवे सुतम् ॥ ७४ ॥
तस्य राज्याभिषेकादिविधिभिः सह संभृताः ।
द्विजेन्द्रैर्निरवर्त्यन्त जातकर्मादिकाः क्रियाः ॥ ७५ ॥
स नरेन्द्रश्रिया सार्धं लब्धवान्बालभूपतिः ।
नाम गोनन्द इत्येवं नप्ता पैतामहं क्रमात् ॥ ७६ ॥

---

१ विघ्यते इति निघ्यते इति वा कथंचन समाधेयः पाठः स्यात् ।

आस्तां बालस्य संनद्धे द्वे धात्र्यौ तस्य वृद्धये ।
एका पयःप्रस्रविणी सर्वसंपत्प्रसूः परा ॥ ७७ ॥
तस्यावन्ध्यप्रसादत्वं रक्षन्तः पितृमन्त्रिणः ।
पार्श्वगेभ्यो ददुर्वित्तमनिमित्तस्मितेष्वपि ॥ ७८ ॥
अबुद्धाननुतिष्ठन्तस्तस्याव्यक्तं शिशोर्वचः ।
कृतागसमिवात्मानममन्यन्ताधिकारिणः ॥ ७९ ॥
पितुः सिंहासनं तेन क्रामता बालभूभुजा ।
नोत्कण्ठा पादपीठस्य लम्बमानाङ्घ्रिणा हृता ॥ ८० ॥
तं चामरमरुल्लोलकाकपक्षं नृपासने ।
विधाय मन्त्रिणोशृण्वन्प्रजानां धर्मसंशयम् ॥ ८१ ॥
इति काश्मीरिको राजा वर्तमानः स शैशवे ।
साहायकाय समरे न निन्ये कुरुपाण्डवैः ॥ ८२ ॥
आम्नायभङ्गान्निर्नष्टनामकृत्यास्ततः परम् ।
पञ्चत्रिंशन्महीपाला मग्ना विस्मृतिसागरे ॥ ८३ ॥
अथाभवल्लवो नाम भूपालो भूमिभूषणम् ।
वेल्लद्यशोदुगूलायाः प्रीतिपात्रं जयश्रियः ॥ ८४ ॥
यस्य सेनानिनादेन जगदौन्निद्यदायिना ।
निन्यिरे वैरिणश्चित्रं दीर्घनिद्राविधेयताम् ॥ ८५ ॥
तेन षोडशभिर्लक्षैर्विहीनामश्मवेश्मनाम् ।
कोटिं निष्पाद्य नगरं लोलोरं निरमीयत ॥ ८६ ॥
दत्त्वाग्रहारं लेदर्यां लेवारं द्विजपर्षदे ।
स द्यामनिन्द्यशौर्यश्रीरारुरोह महाभुजः ॥ ८७ ॥
कुशेशयाक्षस्तत्पुत्रः प्रतापकुशलः कुशः ।
कुरुहाराग्रहारस्य दाताभूत्तदनन्तरम् ॥ ८८ ॥

ततस्तस्य सुतः प्राप रिपुनागकुलान्तकः ।
धुर्यः शौर्याश्रयः श्रीमान्खगेन्द्रः पार्थिवेन्द्रताम् ॥ ८९ ॥
स खागिखोनमुषयोः कर्ता मुख्याग्रहारयोः ।
हरहाससितैः कृत्यैः क्रीताँल्लोकान्क्रमाद्ययौ ॥ ९० ॥
अनर्घमहिमा दीर्घमघवत्ताबहिष्कृतः ।
अथ साश्चर्यचर्योभूत्सुरेन्द्रस्तत्सुतो नृपः ॥ ९१ ॥
शतमन्युः शान्तमन्योर्गोत्रभिद्गोत्ररक्षिणः ।
लेभे यस्य सुरेन्द्रस्य सुरेन्द्रो नोपमानताम् ॥ ९२ ॥
दरद्देशान्तिके कृत्वा सौरकाख्यं स पत्तनम् ।
श्रीमान्विहारं विदधे नरेन्द्रभवनाभिधम् ॥ ९३ ॥
तेन स्वमण्डलेखण्डयशसा पुण्यकर्मणा ।
विहारः सुकृतोदारो निर्मितः सोरसाभिधः ॥ ९४ ॥
तस्मिन्निःसंततौ राज्ञि प्रशान्तेन्यकुलोद्भवः ।
बभार गोधरो नाम सभूधरवरां धराम् ॥ ९५ ॥
गोधरो हस्तिशालाख्यमग्रहारमुदारधीः ।
स प्रदाय द्विजन्मभ्यः पुण्यकर्मा दिवं ययौ ॥ ९६ ॥
तस्य सूनुः सुवर्णाख्यस्ततोभूत्स्वर्णदोर्थिनाम् ।
सुवर्णमणिकुल्यायाः कराले यः प्रवर्तकः ॥ ९७ ॥
तत्सूनुर्जनको नाम प्रजानां जनकोपमः ।
विहारमग्रहारं च जालोराख्यं च निर्ममे ॥ ९८ ॥
शचीनरस्तस्य सूनुः क्षितिं क्षितिशचीपतिः ।
ततः श्रीमान्क्षमाशीलो ररक्षाक्षतशासनः ॥ ९९ ॥
राजाग्रहारयोः कर्ता शमाङ्गासाशनारयोः ।
सोभूदपुत्रः सुत्रामविष्टरार्धसमाश्रयी ॥ १०० ॥

प्रपौत्रः शकुनेस्तस्य भूपतेः प्रपितृव्यजः ।
अथावहदशोकाख्यः सत्यसंधो वसुंधराम् ॥ १०१ ॥
यः शान्तवृजिनो राजा प्रपन्नो जिनशासनम् ।
शुष्कलेत्रवितस्तात्रौ तस्तार स्तूपमण्डलैः ॥ १०२ ॥
धर्मारण्यविहारान्तर्वितस्तात्रपुरेभवत् ।
यत्कृतं चैत्यमुत्सेधावधिप्राप्त्यक्षमेक्षणम् ॥ १०३ ॥
स षण्णवत्या गेहानां लक्षैर्लक्ष्मीसमुज्ज्वलैः ।
गरीयसीं पुरीं श्रीमांश्चक्रे श्रीनगरीं नृपः ॥ १०४ ॥
जीर्णं श्रीविजयेशस्य विनिवार्य सुधामयम् ।
निष्कलमषेणाश्ममयः प्राकारो येन कारितः ॥ १०५ ॥
सभायां विजयेशस्य समीपे च विनिर्ममे ।
शान्तावसादः प्रासादावशोकेश्वरसंज्ञितौ ॥ १०६ ॥
म्लेच्छैः संछादिते देशे स तदुच्छित्तये नृपः ।
तपःसंतोषिताल्लेभे भूतेशात्सुकृती सुतम् ॥ १०७ ॥
सोथ भूभृज्जलौकोभूद्भूलोकसुरनायकः ।
यो यशःसुधया शुद्धं व्यधाद्ब्रह्माण्डमण्डलम् ॥ १०८ ॥
यस्य दिव्यप्रभावस्य कथाः श्रुतिपथं गताः ।
आश्चर्याचार्यतां यान्ति नियतं द्युसदामपि ॥ १०९ ॥
कोटिवेधिनि सिद्धे हि स रसे हाटकार्पणैः ।
आसीत्सुषिरतां हर्तुं हेमाण्डस्य ध्रुवं क्षमः ॥ ११० ॥
संस्तम्भ्याम्भःप्रविष्टेन तेन नागसरोन्तरम् ।
तारुण्यं फणिकन्यानां निन्ये संभोगभव्यताम् ॥ १११ ॥
तत्कालप्रबलप्रेद्धबौद्धवादिसमूहजित् ।
अवधूतोभवत्सिद्धस्तस्य ज्ञानोपदेशकृत् ॥ ११२ ॥

विजयेश्वरनन्दीशक्षेत्रज्येष्ठेशपूजने ।
तस्य सत्यगिरो राज्ञः प्रतिज्ञा सर्वदाभवत् ॥ ११३ ॥
ग्रामे ग्रामे स्थितैरश्वैर्धावनं प्रतिषिद्धवान् ।
स्वेनावहत्तं सततं नागः कोपि सुहृत्तया ॥ ११४ ॥
स रुद्धवसुधान्म्लेच्छान्निर्वास्याखर्वविक्रमः ।
जिगाय जैत्रयात्राभिर्महीमर्णवमेखलाम् ॥ ११५ ॥
ते यत्रोज्झटितास्तेन म्लेच्छाश्छादितमण्डलाः ।
स्थानमुज्झटडिम्बं तज्जनैरद्यापि गद्यते ॥ ११६ ॥
जित्वोर्वीं कन्यकुब्जादौ तत्रत्यं स न्यवेशयत् ।
चातुर्वर्ण्यं निजे देशे धर्म्यांश्च व्यवहारिणः ॥ ११७ ॥
यथावद्वृद्धिमप्राप्ते व्यवहारधनादिभिः ।
सामान्यदेशवद्राज्यं तावदस्मिन्हि मण्डले ॥ ११८ ॥
धर्माध्यक्षो धनाध्यक्षः कोशाध्यक्षश्चमूपतिः ।
दूतः पुरोधा दैवज्ञः सप्त प्रकृतयोभवन् ॥ ११९ ॥
युगलकम् ॥
कर्मस्थानानि धर्म्याणि तेनाष्टादश कुर्वता ।
ततः प्रभृति भूपेन कृता यौधिष्ठिरी स्थितिः ॥ १२० ॥
स विक्रमप्रभावाभ्यां समुपार्जितया श्रिया ।
विदधे वारबालादीनग्रहारानुदग्रधीः ॥ १२१ ॥
द्वारादिषु प्रदेशेषु प्रभावोग्राण्युदग्रया ।
ईशानदेव्या तत्पत्न्या मातृचक्राणि चक्रिरे ॥ १२२ ॥
श्रुतनन्दिपुराणः स व्यासान्तेवासिनो नृपः ।
सेवनं सोदरादीनां नन्दीशस्पर्धया व्यधात् ॥ १२३ ॥
प्रतिष्ठां ज्येष्ठरुद्रस्य श्रीनगर्यां वितन्वता ।
तेन नन्दीशसंस्पर्धा न मेने सोदरं विना ॥ १२४ ॥

विस्मारितो नित्यकृत्यं कार्यव्यग्रतयैकदा ।
विदूरसोदरजलाप्लावनालाभदुर्मनाः ॥ १२५ ॥
अपश्यन्निर्जलात्स्थानादकस्मादुत्थितं पयः ।
स सोदराविसंवादि वर्णस्वादादिभिर्गुणैः ॥ १२६ ॥

युगलकम् ॥

प्रादुर्भूते ततस्तस्मिंस्तीर्थे कृतनिमज्जनः ।
स नन्दिरुद्रस्पर्धायां मानी पर्याप्तिमासदत् ॥ १२७ ॥
तेन जातु परीक्षार्थं निक्षिप्तः सोदरान्तरे ।
सपिधाननः स्वर्णभृङ्गारः सुषिरोदरः ॥ १२८ ॥
दिनद्वयेन सार्धेन श्रीनगर्युद्भवाम्भसः ।
उन्मग्नः स महीभर्तुस्तस्य चिच्छेद संशयम् ॥ १२९ ॥
नूनं नन्दीश एवासौ भोक्तुं भोगानवातरत् ।
दृष्टादृष्टक्रियासिद्धिर्न भवेत्तादृगन्यथा ॥ १३० ॥
राज्ञस्तस्य कदाचित्तु व्रजतो विजयेश्वरम् ।
ययाचे काचिदबला भोजनं मार्गमध्यगा ॥ १३१ ॥
यथेष्टमशनं दातुं ततोनेन प्रतिश्रुते ।
व्यवृणोद्विकृता भूत्वा सा नृमांसाश्रयां स्पृहाम् ॥ १३२ ॥
स सत्त्वहिंसाविरतस्तस्यै मांसं स्वविग्रहात् ।
अनुज्ञां प्रददौ भोक्तुं यदा सैवं तदाब्रवीत् ॥ १३३ ॥
बोधिसत्त्वोसि भूपाल कोपि सत्त्वोर्जितव्रतः ।
कारुण्यं प्राणिषु दृढं यस्येदृक्ते महात्मनः ॥ १३४ ॥
बौद्धभाषामजानानो माहेश्वरतया नृपः ।
को बोधिसत्त्वो यं भद्रे मां वेत्सीति जगाद ताम् ॥ १३५ ॥
पुनर्बभाषे सा भूपं श्रोतव्यं मत्प्रयोजनम् ।
अहं ह्युत्थापिता बौद्धैः क्रोधाद्विप्रकृतैस्त्वया ॥ १३६ ॥

लोकालोकाद्रिपार्श्वस्थास्तामस्यः कृत्तिका वयम् ।
बोधिसत्त्वैकशरणाः काङ्क्षन्त्यस्तपसः क्षयम् ॥ १३७ ॥
लोके भगवतो लोकनाथादारभ्य केचन ।
ये जन्तवो गतक्लेशा बोधिसत्त्वानवेहि तान् ॥ १३८ ॥
सागसेपि न कुप्यन्ति क्षमया चोपकुर्वते ।
बोधिं स्वस्यैव नेष्यन्ति[2] ते विश्वधरणोद्यताः ॥ १३९ ॥
विहारतूर्यनिर्घोषैरुन्निद्रः प्रेरितः खलैः ।
पुरा भवान्व्यधात्क्रोधाद्विहारोद्दलनं यदा ॥ १४० ॥
महाशाक्यः स नृपतिर्न शक्यो बाधितुं त्वया ।
तस्मिन्दृष्टे तु कल्याणि भविता ते तमःक्षयः[1] ॥ १४१ ॥
अस्मद्गिरा प्रेरणीयो विहारकरणाय सः ।
दत्त्वाम्ब हेमसंभारं त्वया मलिनितः खलैः ॥ १४२ ॥
तस्मिन्कृते न जायेत विहारच्छेदवैशसम् ।
तस्य तत्प्रेरकाणां च प्रायश्चित्तं कृतं भवेत् ॥ १४३ ॥
क्रुद्धैर्बौद्धैरनुध्याता त्वद्वधाय प्रधाविता ।
अनुशिष्टा समाहूय बोधिसत्त्यैस्तदेत्यहम् ॥ १४४ ॥
कुलकम् ॥
तस्मात्सत्त्वातिरेकस्ते मिषादेवं परीक्षितः ।
क्षीणपापाद्य संवृत्ता स्वस्ति ते साधयाम्यहम् ॥ १४५ ॥
कृतप्रतिश्रवे राज्ञि विहारकृतये पुनः ।
प्रहर्षोत्फुल्लनयना कृत्यादेवी तिरोदधे ॥ १४६ ॥
अथ कृत्याश्रमं कृत्वा विहारं वसुधाधिपः ।
तत्रैव क्षीणतमसं कृत्यादेवीमबन्धयत् ॥ १४७ ॥
विधाय सोऽमप्रासादं नन्दिक्षेत्रे क्षमापतिः ।
भूतेशाय क्षमां कोशैः पूजां रत्नमयीं ददौ ॥ १४८ ॥

---

१ तमसः इत्युचितः पाठः । २ नेच्छन्ति इत्युचितः पाठः ।

चीरमोचनतीर्थान्तर्गणरात्रं तपस्यता ।
ब्रह्मासननिविष्टेन ध्याननिःस्पन्दमूर्तिना ॥ १४९ ॥
राज्ञा कनकवाहिन्याः सुचिरात्पुण्यकर्मणा ।
नन्दीशस्पर्शनोत्कण्ठा तेनानीयत कुण्ठताम् ॥ १५० ॥
ह्लादोदयान्नृत्तगीतक्षणे नर्त्तितुमुत्थितम् ।
प्रददौ ज्येष्ठरुद्राय सोवरोधवधूशतम् ॥ १५१ ॥
भुक्त्वैश्वर्यं स पर्यन्ते प्रविष्टश्चीरमोचनम् ।
पत्न्या समं ययौ राजा सायुज्यं गिरिजापतेः ॥ १५२ ॥
अथाशोककुलोत्पन्नो यद्वान्याभिजनोद्भवः ।
भूमिं दामोदरो नाम जुगोप जगतीपतिः ॥ १५३ ॥
ऋद्ध्या जाज्वलितस्योच्चैर्माहेश्वरशिखामणेः ।
अद्यापि श्रूयते यस्य प्रभावो भुवनाद्भुतः ॥ १५४ ॥
हरप्रसादपात्रेण सच्चरित्रानुरागिणा ।
बबन्ध सुखिना सख्यं येन वैश्रवणः स्वयम् ॥ १५५ ॥
कुबेर इव यो राज्ञामग्र्यः स्वाज्ञाविधायिनः ।
आदिश्य गुह्यकान्दीर्घं गुद्दसेतुमबन्धयत् ॥ १५६ ॥
सूदे दामोदरीये यत्तस्यासीत्स्वकृतं पुरम् ।
सेतुना तेन तत्रैच्छत्कर्तुं सोम्भःप्रतारणम् ॥ १५७ ॥
हितं लोकोत्तरं किंचिच्चिकीर्षोरुन्नतात्मनः ।
रोहन्ति हा धिक्प्रत्यूहा मितपुण्यतया नृणाम् ॥ १५८ ॥
स हि कारयितुं यक्षैर्यतते स्म स्वमण्डले ।
दीर्घानश्ममयान्सेतूंस्तोयविप्लवशान्तये ॥ १५९ ॥
तपोविभूतयोचिन्त्या द्विजानामुग्रतेजसाम् ।
तादृशामपि ये कुर्युः प्रभावस्य विपर्ययम् ॥ १६० ॥

दायादादिबलैर्नष्टा दृष्टा भूयः समुत्थिता ।
श्रीर्विप्रावज्ञया राज्ञामपुनःसंभवा पुनः ॥ १६१ ॥
श्राद्धार्थमुत्थितः स्नातुं द्विजैः कैश्चिद्बुभुक्षितैः ।
प्राक्स्नानाद्भोजनं राजा स कदाचिदयाच्यत ॥ १६२ ॥
यियासुना वितस्तान्तर्यदा तेनावधीरितम् ।
तदा प्रभावात्ते तस्य तां धुनीमग्रतो व्यधुः ॥ १६३ ॥
सेयं वितस्ता स्पृष्ट्वैनां भोजयास्मान्स तैरिति ।
उक्तोपि मायाविहितामज्ञासीत्सरिदाहृतिम् ॥ १६४ ॥
भोज्यं ददामि नास्नातो विप्राः सर्पत सांप्रतम् ।
तेनेत्युक्तास्तमशपंस्ततः सर्पो भवेति ते ॥ १६५ ॥
अशेषमेकेनैवाह्ना श्रुत्वा रामायणं तव ।
शापस्य शान्तिर्भवितेत्यूचिरे च प्रसादिताः ॥ १६६ ॥
स दामोदरसूदान्तर्धावन्दूरमुदन्यया ।
शापोष्णश्वासधूमेन जनैरद्यापि लक्ष्यते ॥ १६७ ॥
अथाभवन्स्वनामाङ्कपुरत्रयविधायिनः ।
हुष्कजुष्ककनिष्काख्यास्त्रयस्तत्रैव पार्थिवाः ॥ १६८ ॥
सविहारस्य निर्माता जुष्को जुष्कपुरस्य यः ।
जयस्वामिपुरस्यापि शुद्धधीः संविधायकः ॥ १६९ ॥
ते तुरुष्कान्वयोद्भूता अपि पुण्याश्रया नृपाः ।
शुष्कलेत्रादिदेशेषु मठचैत्यादि चक्रिरे ॥ १७० ॥
प्राज्ये राज्यक्षणे तेषां प्रायः कश्मीरमण्डलम् ।
भोज्यमास्ते स्म बौद्धानां प्रव्रज्योर्जिततेजसाम् ॥ १७१ ॥
तदा भगवतः शाक्यसिंहस्य परिनिर्वृतेः ।
अस्मिन्महीलोकधातौ सार्धं वर्षशतं ह्यगात् ॥ १७२ ॥

बोधिसत्त्वश्च देशेस्मिन्नेको भूमीश्वरोभवत् ।
स च नागार्जुनः श्रीमान्षडर्हद्धनसंश्रयी ॥ १७३ ॥
अथ निष्कण्टको राजा कण्टकोत्साग्रहारदः ।
अभीर्बभूवाभिमन्युः शतमन्युरिवापरः ॥ १७४ ॥
स्वनामाङ्कं शशाङ्काङ्कशेखरं विरचय्य सः ।
परार्ध्यविभवं श्रीमानभिमन्युपुरं व्यधात् ॥ १७५ ॥
चन्द्राचार्यादिभिर्लब्ध्वादेशं तस्मात्तदागमम् ।
प्रवर्तितं महाभाष्यं स्वं च व्याकरणं कृतम् ॥ १७६ ॥
तस्मिन्नवसरे बौद्धा देशे प्रबलतां ययुः ।
नागार्जुनेन सुधिया बोधिसत्त्वेन पालिताः ॥ १७७ ॥
ते वादिनः पराजित्य वादेन निखिलान्बुधान् ।
क्रियां नीलपुराणोक्तामच्छिन्दन्नागमद्विषः ॥ १७८ ॥
मण्डले विप्लुताचारे विच्छिन्नबलिकर्मभिः ।
नागैर्जनक्षयश्चक्रे प्रभूतहिमवर्षिभिः ॥ १७९ ॥
हिमान्यां बौद्धबाधाय पतन्त्यां प्रतिवत्सरम् ।
शीते दार्वाभिसारादौ षण्मासान्पार्थिवोवसत् ॥ १८० ॥
तदा प्रभावः कोप्यासीद्बलिहोमविधायिनाम् ।
नानशन्यद्भशाद्विप्रा बौद्धाश्च निधनं गताः ॥ १८१ ॥
नीलमुद्दिश्य देशस्य रक्षितारमहीश्वरम् ।
काश्यपश्चन्द्रदेवाख्यस्तपस्तेपे ततो द्विजः ॥ १८२ ॥
तस्य प्रत्यक्षतां यातो नीलस्तुहिनविप्लवम् ।
न्यवारयज्जगादापि स्वपुराणविधिं पुनः ॥ १८३ ॥
आद्येन चन्द्रदेवेन शमितो यक्षविप्लवः ।
द्वितीयेन तु देशेस्मिन्दुःसहो भिक्षुविप्लवः ॥ १८४ ॥

राजा तृतीयगोनन्दः प्राप्तराज्यस्तदन्तरे ।
यात्रायागादि नागानां प्रावर्तयत पूर्ववत् ॥ १८५ ॥
राज्ञा प्रवर्तिते तेन पुनर्नीलोदिते विधौ ।
भिक्षवो हिमदोषाश्च सर्वतः प्रशमं ययुः ॥ १८६ ॥
काले काले प्रजापुण्यैः संभवन्ति महीभुजः ।
यैर्मण्डलस्य क्रियते दूरोत्सन्नस्य योजनम् ॥ १८७ ॥
ये प्रजापीडनपरास्ते विनश्यन्ति सान्वयाः ।
नष्टं तु ये योजयेयुस्तेषां वंशानुगाः श्रियः ॥ १८८ ॥
इत्येतत्प्रतिवृत्तान्तं देशेस्मिन्वीक्ष्य लक्षणम् ।
भाविनां भूमिपालानां प्राज्ञैर्ज्ञेयं शुभाशुभम् ॥ १८९ ॥
नवीकृतवतो देशं तस्य वंश्यैरियं मही ।
सिद्धैः प्रवरसेनाद्यैश्चिरं भुक्ता सुकर्मभिः ॥ १९० ॥
गोनन्दान्वयिनामाद्यः स रघूणां रघुर्यथा ।
नृपतिः काश्यपीं वर्षान्पञ्चत्रिंशतिमन्वशात् ॥ १९१ ॥
वर्षषष्टिं सषण्मासैः षड्भिर्वर्षैर्विवर्जिताम् ।
विभीषणाभिधोरक्षत्क्षितिं गोनन्दनन्दनः ॥ १९२ ॥
इन्द्रजिद्रावणावास्तां पितापुत्रौ नृपौ क्रमात् ।
पञ्चत्रिंशत्सहार्धाश्च वर्षाण्त्रिंशद्यथोर्ययुः ॥ १९३ ॥
बिन्दुरेखाछविर्यस्य दृष्टा भाव्यर्थशंसिनी ।
स रावणस्य पूजार्थं लिङ्गं भाति वटेश्वरः ॥ १९४ ॥
चतुःशालामठस्यान्तः कृतायादायि भूभुजा ।
वटेश्वराय निखिलं तेन कश्मीरमण्डलम् ॥ १९५ ॥
पञ्चत्रिंशतमब्दानां क्ष्मां बुभोज महाभुजः ।
रावणक्षोणिभृत्सूनुः सार्धामन्यो विभीषणः ॥ १९६ ॥

किंनरापरनामाथ किंनरैर्गीतविक्रमः ।
विभीषणस्य पुत्रोभून्नरनामा नराधिपः ॥ १९७ ॥
सदाचारोपि स नृपः प्रजाभाग्यविपर्ययैः ।
व्यधाद्विषयदोषेण महानर्थपरम्पराम् ॥ १९८ ॥
विहारे निवसन्नेकः किंनरग्रामवर्तिनि ।
तस्य योगबलात्कोपि श्रमणोपाहरत्प्रियाम् ॥ १९९ ॥
विहाराणां सहस्राणि तत्कोपान्निर्ददाह सः ।
अजिग्रहच्च तद्ग्रामान्द्विजैर्मध्यमठाश्रयैः ॥ २०० ॥
ऋद्धापणं राजपथैर्नीयानोज्ज्वलनिम्नगम् ।
स्फीतपुष्पफलोद्यानं स्वर्गस्येवाभिधान्तरम् ॥ २०१ ॥
दिग्जयोपार्जितैर्वित्तैर्जितवित्तेशपत्तनम् ।
वितस्तापुलिने तेन नगरं निरमीयत ॥ २०२ ॥
युगलकम् ॥
तत्रैकस्मिन्किलोद्याने स्वच्छस्वादुजलाञ्चितम् ।
आसीत्सुश्रवसो नाम्नो नागस्य वसतिः सरः ॥ २०३ ॥
कदाचित्तस्य दूराध्वक्लान्तो मध्यंदिने युवा ।
छायार्थी तत्सरःकच्छं विशाखाख्योविशद्द्विजः ॥ २०४ ॥
सच्छायपादपतले समीरैः शमितक्लमः ।
शनैर्जलमुपस्पृश्य भोक्तुं सक्तून्प्रचक्रमे ॥ २०५ ॥
तान्पाणौ गृह्णतैवाथ तेन तीरविहारिभिः ।
पूर्वमाकर्णितो हंसैः शुश्रुवे नूपुरध्वनिः ॥ २०६ ॥
निर्गते मञ्जरीकुञ्जादपश्यत्पुरतस्ततः ।
कन्ये नीलनिचोलिन्यौ स केचिच्चारुलोचने ॥ २०७ ॥
कर्णिकापद्मरागाङ्गनाललीलायितस्पृशा ।
मनोज्ञधवलापाङ्गे तनीयोञ्जनरेखया ॥ २०८ ॥

---

१ कदाचिदथ इति पाठः स्यात् ।

हारिनेत्राञ्चलैर्मन्दमारुतान्दोलनाकुलैः ।
सनाथांसयुगे रूपपताकापल्लवैरिव ॥ २०९ ॥

तिलकम् ॥

ते शशाङ्कानने दृष्ट्वा शनैरभ्यर्णमागते ।
विररामाशनारम्भान्मुहुर्वीडाजडीकृतः ॥ २१० ॥
भुञ्जाने कच्छगुच्छानां शिम्बीरम्बुजलोचने ।
ते पुनर्दृष्टवानग्रे किंचिद्व्यापारितेक्षणः ॥ २११ ॥
आकृतेर्हा धिगीदृश्या भोज्यमेतदिति द्विजः ।
ध्यायन्कृपार्द्रः संमान्य स ते सक्तूनभोजयत् ॥ २१२ ॥
उपनिन्ये च संगृह्य पुटकैश्चटसीकृतैः ।
तयोः पानाय पानीयं सरसः स्वच्छशीतलम् ॥ २१३ ॥
आचान्ते शुचितां प्राप्ते कृतासनपरिग्रहे ।
ततश्च वीजयन्पर्णतालवृन्तैरभाषत ॥ २१४ ॥
भवत्यौ पूर्वसुकृतैः कैश्चित्संप्राप्तदर्शनः ।
चापलाद्विप्रसुलभात्प्रष्टुमिच्छत्ययं जनः ॥ २१५ ॥
कल्याणिनीभ्यां कतमा पुण्या जातिः परिष्कृता ।
कुत्र वा क्लान्तमेतादृग्विरसं येन भुज्यते ॥ २१६ ॥
एका तमूचे विद्ध्यावामस्य सुश्रवसः सुते ।
स्वादु भोक्तव्यमप्राप्तं किमीदङ्नोपभुज्यते ॥ २१७ ॥
पित्रा विद्याधरेन्द्राय प्रदातुं परिकल्पिता ।
इरावत्यहमेषा च चन्द्रलेखा यवीयसी ॥ २१८ ॥
पुनर्द्विजोभ्यधादेवं नैष्किंचन्यं किमस्ति वः ।
ताभ्यामवादि तातोत्र हेतुं वेत्ति स पृच्छ्यताम् ॥ २१९ ॥
ज्येष्ठेत्र कृष्णद्वादश्यां यात्रायै तक्षकस्य तम् ।
आगतं चूलया तोयस्यन्दिन्या ज्ञास्यसि ध्रुवम् ॥ २२० ॥

द्रक्ष्यस्यावामपि तदा तदभ्यर्णकृतस्थिती ।
इत्युक्त्वा फणिकन्ये ते क्षणादास्तां तिरोहिते ॥ २२१ ॥
क्रमात्प्रववृते सोथ नटचारणसंकुलः ।
प्रेक्षिलोकसमाकीर्णस्तत्र यात्रामहोत्सवः ॥ २२२ ॥
द्विजोपि कौतुकाकृष्टः पर्यटन्रङ्गमञ्जसा ।
कन्योक्तचिह्नज्ञातस्य नागस्यान्तिकमाययौ ॥ २२३ ॥
पार्श्वस्थिताभ्यां कन्याभ्यां पूर्वमावेदितोथ सः ।
द्विजन्मने व्याजहार स्वागतं नागनायकः ॥ २२४ ॥
ततः कथान्तरे क्वापि पृष्टः कारणमापदाम् ।
जगाद तं द्विजन्मानं निःश्वस्य श्वसनाशनः ॥ २२५ ॥
अभिमानवतां ब्रह्मन्युक्तायुक्तविवेकिनाम् ।
युज्यतेवश्यभोग्यानां दुःखानामप्रकाशनम् ॥ २२६ ॥
परदुःखं यदाकर्ण्य स्वभावसुजनो जनः ।
उपकारासमर्थत्वात्प्राप्नोति हृदयव्यथाम् ॥ २२७ ॥
वृत्तिं स्वां बहु मन्यते हृदि शुचं धत्तेनुकम्पोक्तिभि-
र्व्यक्तं निन्दति योग्यतां मितमतिः कुर्वन्स्तुतीरात्मनः ।
गर्ह्योपायनिषेवणं कथयति स्थास्नुं वदन्व्यापदं
श्रुत्वा दुःखमरुंतुदां वितनुते पीडां जनः प्राकृतः ॥ २२८ ॥
अत एव विवेक्तृणां यावदायुः स्वमानसे ।
जीर्णानि सुखदुःखानि दहत्यन्ते चितानलः ॥ २२९ ॥
कः स्वभावगभीराणां लक्षयेद्बहिरापदम् ।
बालापत्येन भृत्येन यदि सा न प्रकाश्यते ॥ २३० ॥
तदस्मिन्नेतयोर्बाल्याद्वस्तुनि व्यक्तिमागते ।
तवाग्रे गोपनं साधो न ममाप्युपपद्यते ॥ २३१ ॥

त्वयाप्यस्मद्धितार्थाय निसर्गसरलात्मना ।
ईषत्प्रयासः कल्याणिन्क्रियतां यदि शक्यते ॥ २३२ ॥
योयं तरुतले मुण्डश्चूडालो दृश्यते व्रती ।
अमुना सस्यपालेन कांदिशीकाः कृता वयम् ॥ २३३ ॥
अभुक्ते मात्रिकैरन्ने नवे नागैर्न भुज्यते ।
अयं नात्ति च तत्तेन समयेन हता वयम् ॥ २३४ ॥
क्षेत्राणि रक्षत्येतस्मिन्दृष्ट्वापि फलसंपदम् ।
भोक्तुं नैव समर्थाः स्मः प्रेता इव सरिज्जलम् ॥ २३५ ॥
तथा कुरु यथा भ्रश्येत्समयादेष नैष्ठिकः ।
योग्यां प्रतिक्रियां विद्मो वयमप्युपकर्तृषु ॥ २३६ ॥
स तथेति ततो नागमुक्त्वा यत्नपरो द्विजः ।
अचिन्तयद्दिवारात्रौ सस्यपालस्य वञ्चनाम् ॥ २३७ ॥
गूढं तस्य बहिःक्षेत्रकुटीगर्भकृतस्थितेः ।
पच्यमानान्नभाण्डान्तर्नवान्नान्यक्षिपत्ततः ॥ २३८ ॥
भुञ्जान एव तत्तस्मिन्क्षणादेव जहार सः ।
अहीन्द्रः करकासारवर्षी स्फीतां फलश्रियम् ॥ २३९ ॥
तं च व्युत्क्रान्तदारिद्र्यः सरसोभ्यर्णमागतम् ।
कृतोपकारमन्येद्युर्निजोर्वीमनयद्द्विजम् ॥ २४० ॥
स तत्र पितुरादेशात्कन्याभ्यां विहितार्हणः ।
अमर्त्यसुलभैर्भोगैरतोष्यत दिने दिने ॥ २४१ ॥
कालेन सर्वानामन्त्र्य स्वां भुवं गन्तुमुद्यतः ।
प्रतिश्रुतवरं नागं चन्द्रलेखामयाचत ॥ २४२ ॥
संबन्धायोग्यमपि तं कृतज्ञत्ववशंवदः ।
संविभेजे स भुजगः कन्यया च धनेन च ॥ २४३ ॥

एवं नागवरावाप्तश्रियस्तस्य द्विजन्मनः ।
महान्नरपुरे कालस्तैस्तैर्नित्योत्सवैर्ययौ ॥ २४४ ॥
भुजगेन्द्रतनूजापि तं पतिं पतिदेवता ।
अतोषयत्पराध्यश्रीः शीलाचारादिभिर्गुणैः ॥ २४५ ॥
तस्यां कदाचित्सौधाग्रस्थितायां प्राङ्गनाद्बहिः ।
आतपायोज्झितं धान्यं बुभुजे विहरन्हयः ॥ २४६ ॥
तं वारयितुमाहूता भृत्या नासन्गृहे यदा ।
शिञ्जानमञ्जुमञ्जीरा सा तदावातरत्स्वयम् ॥ २४७ ॥
एकहस्तधृतावेगस्रस्तशीर्षांशुकान्तया ।
तया पाणिसरोजेन धावित्वा सोथ ताडितः ॥ २४८ ॥
भोज्यमुत्सृज्य यातस्य फणिस्त्रीस्पर्शतस्ततः ।
सौवर्णी पाणिमुद्रांङ्के[1] तुरगस्योदपद्यत ॥ २४९ ॥
तस्मिन्काले नरो राजा चारैस्तां चारुलोचनाम् ।
श्रुत्वा द्विजवधूं तस्थौ प्रागेवाङ्कुरितस्मरः ॥ २५० ॥
तस्य धावन्तमुन्मत्तमन्तःकरणवारणम् ।
वेलान्नियमितुं नासीदपवादभयाङ्कुशः[2] ॥ २५१ ॥
तस्मिन्नुद्वृत्तरागाग्निविप्लवे भूपतेः पुनः ।
उवाह हयवृत्तान्तो दृष्टवातानुकारिताम् ॥ २५२ ॥
चक्रे पर्यस्तमर्यादः सरलाङ्गुलिशोभिना ।
स काञ्चनकराङ्केण शशाङ्केनेव वारिधिः ॥ २५३ ॥
व्रीडानिगडनिर्मुक्तो दूतैराकूतशंसिभिः ।
तामुपच्छन्दयन्सोथ सुन्दरीमुदवेजयत् ॥ २५४ ॥
सर्वोपायैरसाध्यां च विप्रस्तत्पतिरप्यसौ ।
तेनायाच्यत लुब्धेन रागान्धानां कुतस्त्रपा ॥ २५५ ॥

---

१ मुद्राङ्के इत्युचितम् । २ अलं नियमितुं इति स्यात् ।

अथ निर्भर्त्सनां तस्मादपि प्राप्तवतासकृत् ।
हठेन हर्तुं तां राज्ञा समादिश्यन्त सैनिकाः ॥ २५६ ॥
तैर्गृहाग्रे कृतास्कन्दो निर्गत्यान्येन वर्त्मना ।
त्राणार्थी नागभवनं सजानिः प्राविशद्द्विजः ॥ २५७ ॥
ताभ्यामभ्येत्य वृत्तान्ते ततस्तस्मिन्निवेदिते ।
क्रोधान्धः सरसस्तस्मादुज्जगाम फणीश्वरः ॥ २५८ ॥
उद्गर्जज्जिह्मजीमूतजनितध्वान्तसंततिः ।
स घोराशनिवर्षेण ददाह सपुरं नृपम् ॥ २५९ ॥
दग्धप्राण्यङ्गविगलद्वसासृक्स्नेहवाहिनी ।
मयूरचन्द्रकाङ्केव वितस्ता समपद्यत ॥ २६० ॥
शरणाय प्रविष्टानां भयाच्चक्रधरान्तिकम् ।
मुहूर्तान्निरदह्यन्त सहस्राणि शरीरिणाम् ॥ २६१ ॥
मधुकैटभयोर्मेदः प्रागूर्वोरिव चक्रिणम् ।
दग्धानां प्राणिनां तत्तत्तदा सर्वाङ्गमस्पृशत् ॥ २६२ ॥
स्वसा सुश्रवसो नागी रमण्याख्याद्रिगह्वरात् ।
साहायकायाश्मराशीन्समादाय तदाययौ ॥ २६३ ॥
सा योजनाधिके शेषे मार्गस्यारात्सहोदरम् ।
कृतकार्यं निशम्याश्मवर्षं ग्रामेषु तज्जहौ ॥ २६४ ॥
योजनानि ततः पञ्च जाता ग्रामधरा खिला ।
सा रमण्यटवीत्यद्याप्यस्ति स्थूलशिलाविला ॥ २६५ ॥
घोरं जनक्षयं कृत्वा प्रातः सानुशयोप्यहिः ।
लोकापवादनिर्विण्णः स्थानमुत्सृज्य तद्ययौ ॥ २६६ ॥
दुग्धाब्धिधवलं तेन सरो दूरगिरौ कृतम् ।
अमरेश्वरयात्रायां जनैरद्यापि दृश्यते ॥ २६७ ॥

श्वशुरानुग्रहान्नागीभूतस्यापि द्विजन्मनः ।
जामातृसर इत्यन्यत्तत्र च प्रथितं सरः ॥ २६८ ॥
प्रजानां पालनव्याजान्निःशङ्कक्षयकारिणः ।
अकस्मादन्तकाः केचित्संभवन्ति तथाविधाः ॥ २६९ ॥
अद्यापि तत्पुरं दग्धं श्वभ्रीभूतं च तत्सरः ।
उपचक्रधरं दृष्ट्वा कथेयं स्मर्यते जनैः ॥ २७० ॥
राज्ञां रागः कियान्नाम दोषः स्वल्पदृशां मते ।
तत्तस्य तेन संवृत्तं यन्नाभूत्क्वापि कस्यचित् ॥ २७१ ॥
सतीदैवतविप्राणामप्येकस्य प्रकोपतः ।
श्रुतो हि प्रतिवृत्तान्तं त्रैलोक्यस्यापि विप्लवः ॥ २७२ ॥
चत्वारिंशतमब्दान्स मासैश्चोनां त्रिभिः समाम् ।
भुवं भुक्त्वा क्षितिवृषा दुर्नयेन क्षयं ययौ ॥ २७३ ॥
अप्यल्पकालसंदृष्टप्राकाराट्टालमण्डलम् ।
तत्किंनरपुरं लेभे गन्धर्वनगरोपमाम् ॥ २७४ ॥
एकस्तु तनयस्तस्य वैचित्र्यात्कर्मणां गतेः ।
स्वधाऱ्या विजयक्षेत्रं नीतः प्राणैर्न तत्यजे ॥ २७५ ॥
राजा सिद्धाभिधः सोथ तथा निःशेषितं जनम् ।
नवीचकार जलदो दावदग्धमिवाचलम् ॥ २७६ ॥
इतिवृत्तं महाश्चर्यं तस्य पित्र्यं महामतेः ।
संसारासारताज्ञाने प्राप पुण्योपदेशताम् ॥ २७७ ॥
भोगयोगेन मालिन्यं नेतुं मध्यगतोपि सः ।
न शक्यते स्म पङ्केन प्रतिमेन्दुरिवामलः ॥ २७८ ॥
दर्पज्वरोष्णभूपालमध्ये निर्ध्यायतोनिशम् ।
सुधासूतिकलामौलिं तस्यैवोल्लाघतोद्ययौ ॥ २७९ ॥

गणितं गुणिना तेन मणींस्तृणमिवोज्झता ।
खण्डेन्दुमण्डनार्चायां मण्डनत्वमखण्डितम् ॥ २८० ॥
राज्ञस्तस्यैव राजश्रीः परलोकानुगाभवत् ।
यस्तामयोजयद्भूर्तो धर्मेणाव्यभिचारिणा ॥ २८१ ॥
षष्टिमब्दान्प्रशास्योर्वीमासन्नानुचरान्वितः ।
आरुरोह सदेहोसौ लोकाञ्शशिशिखामणेः ॥ २८२ ॥
भृत्या नरं समाश्रित्य प्रययुः शोचनीयताम् ।
तत्सुतं तु समालम्ब्य प्रभुं भुवनवन्द्यताम् ॥ २८३ ॥
यात्याश्रितः किल समाश्रयणीयलभ्यां
निन्द्यां गतिं जगति सर्वजनार्चितां वा ।
गच्छत्यधस्तृणगुणः श्रितकूपयन्त्रः
पुष्पाश्रयी सुरशिरोभुवि रूढिमेति ॥ २८४ ॥
सिद्धः सिद्धः सदेहोयमिति शब्दं सुरा दिवि ।
प्रोद्घोषयंस्ताडयन्तः पटहं सप्त वासरान् ॥ २८५ ॥
उत्पलाक्ष इति ख्यातिं पेशलाक्षतया गतः ।
तत्सूनुस्त्रिंशतं सार्धां वर्षाणामन्वशान्महीम् ॥ २८६ ॥
तस्य सूनुर्हिरण्याक्षः स्वनामाङ्कं पुरं व्यधात् ।
क्ष्मां सप्तत्रिंशतिं वर्षान्सप्त मासांश्च भुक्तवान् ॥ २८७ ॥
हिरण्यकुल इत्यस्य हिरण्योत्सकृदात्मजः ।
षष्टिं षष्टिं वसुकुलस्तत्सूनुरभवत्समाः ॥ २८८ ॥
अथ म्लेच्छगणाकीर्णे मण्डले चण्डचेष्टितः ।
तस्यात्मजोभून्मिहिरकुलः कालोपमो नृपः ॥ २८९ ॥
दक्षिणां सान्तकामाशां स्पर्धया जेतुमुद्यता ।
यन्मिषादुत्तरहरिद्भभारान्यमिवान्तकम् ॥ २९० ॥

---

१ प्राघोषयन् इत्युचितः पाठः ।

सांनिध्यं यस्य सैन्यान्तर्हन्यमानाशनोत्सुकान् ।
अजानन्गृध्रकाकादीन्दृष्ट्वाग्रे धावतो जनाः ॥ २९१ ॥
दिवारात्रं हतप्राणिसहस्रपरिवारितः ।
योभूद्भूपालवेतालो विलासभवनेष्वपि ॥ २९२ ॥
बालेषु करुणा स्त्रीषु घृणा वृद्धेषु गौरवम् ।
न बभूव नृशंसस्य यस्य घोराकृतेर्व्रतः ॥ २९३ ॥
स जातु देवीं संवीतसिंहलांशुककञ्चुकाम् ।
हैमपादाङ्कितकुचां दृष्ट्वा जज्वाल मन्युना ॥ २९४ ॥
सिंहलेषु नरेन्द्राङ्घ्रिमुद्राङ्कः क्रियते पटः ।
इति कञ्चुकिना पृष्टेनोक्तो यात्रामदात्ततः ॥ २९५ ॥
तत्सेनाकुम्भिदानाम्भोनिम्नगाकृतसंगमः ।
यमुनालिङ्गनप्रीतिं प्रपेदे दक्षिणार्णवः ॥ २९६ ॥
स सिंहलेन्द्रेण समं संरम्भादुदपाटयत् ।
चिरेण चरणस्पृष्टप्रियालोकनजां रुषम् ॥ २९७ ॥
दूरात्तत्सैन्यमालोक्य लङ्कासौधैर्निशाचराः ।
भूयोपि राघवोद्योगमाशङ्क्य प्रचकम्पिरे ॥ २९८ ॥
स तत्रान्यं नृपं दत्त्वा तीव्रशक्तिरुपाहरत् ।
पटं यमुषदेवाख्यं मार्ताण्डप्रतिमाङ्कितम् ॥ २९९ ॥
व्यावृत्त्य चोलकर्णाटलाटादींश्च नरेश्वरान् ।
सिन्धुरानिव गन्धेभो गन्धेनैव व्यदारयत् ॥ ३०० ॥
तस्मिन्प्रयाते प्राप्तेभ्यः शशंसुस्तत्पराभवम् ।
नगर्यो नरनाथेभ्यस्त्रुट्यदट्टालमेखलाः ॥ ३०१ ॥
काश्मीरं द्वारमासाद्य श्वभ्रभ्रष्टस्य दन्तिनः ।
श्रुत्वा स त्रासजं घोषं तोषरोमाञ्चितोभवत् ॥ ३०२ ॥

तदाकर्णनसंरम्भे सहर्षोथ विरुद्धधीः ।
शतमन्यद्गजेन्द्राणां हठेन निरलोठयत् ॥ ३०३ ॥
स्पर्शोङ्गानि यथा वाचं कीर्तनं पापिनां तथा ।
संदूषयेदतो नोक्ता तस्यान्यापि नृशंसता ॥ ३०४ ॥
को वेत्त्यद्भुतचेष्टानां कृत्यं प्राकृतचेतसाम् ।
धर्मं सुकृतसंप्राप्तिहेतोः सोपि यदाददे ॥ ३०५ ॥
श्रीनगर्यां हि दुर्बुद्धिर्विदधे मिहिरेश्वरम् ।
होलाडायां स मिहिरपुराख्यं पृथुपत्तनम् ॥ ३०६ ॥
अग्रहाराञ्जगृहिरे गान्धारा ब्राह्मणास्ततः ।
समानशीलास्तस्यैव ध्रुवं तेपि द्विजाधमाः ॥ ३०७ ॥
मेघागमः फणिभुजं प्रथितान्धकारः
प्रीणाति हंसममलो जलदात्ययश्च ।
प्रीतेः समानरुचितैव भवेन्निदानं[1]
दातुः प्रतिग्रहकृतश्च परस्परस्य ॥ ३०८ ॥
स वर्षसप्ततिं भुक्त्वा भुवं भूलोकभैरवः ।
भूरिरोगार्दितवपुः प्राविशज्जातवेदसम् ॥ ३०९ ॥
सोयं त्रिकोटिहा मुक्तो यः स्वात्मन्यपि निर्घृणः ।
देहत्यागेस्य गगनादुच्चचारेति भारती ॥ ३१० ॥
इत्यूचुर्ये मते तेषां स एव परिहारदः ।
खण्डयन्वीतघृणतामग्रहारादिकर्मभिः ॥ ३११ ॥
आक्रान्ते दारदैर्भौट्टैर्म्लेच्छैरशुचिकर्मभिः ।
विनष्टधर्मे देशेस्मिन्पुण्याचारप्रवर्तनम् ॥ ३१२ ॥
आर्यदेश्यान्स संस्थाप्य व्यतनोद्दारुणं तपः ।
संकल्प्य स्ववपुर्दाहं प्रायश्चित्तक्रियां व्यधात् ॥ ३१३ ॥

---

१ निदानं इत्युचितम् ।

अत एवाग्रहाराणां सहस्रं प्रत्यपादयत् ।
गान्धारदेशजातेभ्यो द्विजेभ्यो विजयेश्वरे ॥ ३१४ ॥
क्षुरखड्गासिधेन्वादिपूर्णेयःफलके तदा ।
वह्निप्रदीप्ते सहसा पर्यन्ते स्वां तनुं जहौ ॥ ३१५ ॥
इत्येतस्मिञ्जनाम्नाये केचिदव्यभिचारिणि ।
प्राहुः पुरुषसिंहस्य क्रौर्यं तस्याविगर्हितम् ॥ ३१६ ॥
कुलकम् ॥

ये नागेन रुषा पुष्टे नगरे प्राभवन्खशाः ।
तेषां नाशाय वृत्तान्तं पूर्वोक्तं जगदुः परे ॥ ३१७ ॥
अवतारयतस्तस्य चन्द्रकुल्याभिधां नदीम् ।
अशक्योन्मूलना मध्ये शिलाभूद्विघ्नकारिणी ॥ ३१८ ॥
ततः कृततपाः स्वप्ने देवैरुक्तः स भूपतिः ।
यक्षः शिलायां बलवान्ब्रह्मचार्यत्र तिष्ठति ॥ ३१९ ॥
साध्वी स्पृशति चेदेनां निरोद्धुं न स शक्नुयात् ।
ततोपरेद्युः स्वप्नोक्तं शिलायां तेन कारितम् ॥ ३२० ॥
तासु तासु कुलस्त्रीषु व्यर्थयन्नास्वथाचलत् ।
चन्द्रवत्याख्यया स्पृष्टा कुलाल्या सा महाशिला ॥ ३२१ ॥
कोटित्रयं नरपतिः क्रुद्धस्तेनागसा ततः ।
सपतिभ्रातृपुत्राणामवधीत्कुलयोषिताम् ॥ ३२२ ॥
इयं चान्यमते ख्यातिः प्रथते तथ्यतः पुनः ।
अभव्या सनिमित्तापि प्राणिहिंसा गरीयसी ॥ ३२३ ॥
एवं क्षुद्रोपि यद्राजा संभूय न हतो जनैः ।
तत्कर्म कारयद्भिस्तद्दैवतैरेव रक्षितः ॥ ३२४ ॥
प्रजापुण्योदयैस्तीव्रैश्चिरात्तस्मिन्क्षयं गते ।
एकस्तत्प्रभवः पौरैः सदाचारोभ्यषिच्यत ॥ ३२५ ॥

---

१ बकः इत्युचितम् ।

तत्रापि पूर्वसंस्कारादुक्तत्रासं दधे जनः ।
श्मशानविहिते लीलावेश्मनीव नृपास्पदे ॥ ३२६ ॥
अतिसंतापदाज्जातः स जनाह्लादकोभवत् ।
जलौघो जलदश्यामात्तापात्ययदिनादिव ॥ ३२७ ॥
लोकान्तरादिवायातं मेने धर्मं तदा जनः ।
अभयं च परावृत्तं प्रवासाद्गृहनादिव ॥ ३२८ ॥
स बकेशं बकश्वभ्रे बकवत्यापगां तथा ।
कृत्वा पुरं परार्ध्यश्रीर्लवणोत्साभिधं व्यधात् ॥ ३२९ ॥
तत्र त्रिषष्टिर्वर्षाणां सत्रयोदशवासरा ।
अत्यवाह्यत भूपेन तेन पृथ्वीं प्रशासता ॥ ३३० ॥
अथ योगेश्वरी काचिद्भट्टाख्या रजनीमुखे ।
कृत्वा कान्ताकृतिं काम्यामुपतस्थे विशां पतिम् ॥ ३३१ ॥
तया मनोहरैस्तैस्तैर्वचनैर्ग्लपितस्मृतिः ।
स यागोत्सवमाहात्म्यं द्रष्टुं हृष्टो न्यमन्त्रयत ॥ ३३२ ॥
पुत्रपौत्रशतोपेतः प्रातस्तत्र ततो गतः ।
चक्रवर्ती तया निन्ये देवीचक्रोपहारताम् ॥ ३३३ ॥
कर्मणा तेन सिद्धाया व्योमाक्रमणसूचकम् ।
जानुमुद्राद्वयं तस्या दृषद्यद्यापि दृश्यते ॥ ३३४ ॥
देवः शतकपालेशो मातृचक्रं शिला च सा ।
खेरीमठेषु तद्वार्तास्मृतिमद्यापि यच्छति ॥ ३३५ ॥
देव्या कुलतरोः कन्दः क्षितिनन्दोवशेषितः ।
ततस्तस्य सुतस्त्रिंशद्वत्सरानन्वशान्महीम् ॥ ३३६ ॥
द्वापञ्चाशतमब्दान्क्ष्मां द्वौ च मासौ तदात्मजः ।
अपासीद्वसुनन्दाख्यः प्रख्यातस्मरशास्त्रकृत् ॥ ३३७ ॥

नरः षष्टिं तस्य सूनुस्तावतोक्षश्च तत्सुतः ।
वर्षानभूद्विभुर्ग्रामं योक्षवालमकारयत् ॥ ३३८ ॥
जुगोप गोपादित्योथ क्ष्मां सद्वीपां तदात्मजः ।
वर्णाश्रमप्रत्यवेक्षादर्शितादियुगोदयः ॥ ३३९ ॥
सखोलखागिकाहाडिग्रामस्कन्दपुराभिधान् ।
शमाङ्कासमुखांश्चाग्रहारान्यः प्रत्यपादयत् ॥ ३४० ॥
ज्येष्ठेश्वरं प्रतिष्ठाप्य गोपाद्रावार्यदेशजाः ।
गोपाग्रहारान्कृतिना येन स्वीकारिता द्विजाः ॥ ३४१ ॥
भूक्षीरवाटिकायां यो निर्वास्य लशुनाशिनः ।
खासटायां व्यथान्विप्रान्निजाचारविवर्जितान् ॥ ३४२ ॥
अन्यांश्चानीय देशेभ्यः पुण्येभ्यो वश्चिकादिषु ।
पावनानग्रहारेषु ब्राह्मणान्स न्यरोपयत् ॥ ३४३ ॥
उत्तमो लोकपालोयमिति लक्ष्म प्रशस्तिषु ।
यः प्राप्तवान्विना यज्ञं चक्षमे न पशुक्षयम् ॥ ३४४ ॥
सषड्दिनां वर्षषष्टिं पालयित्वा स मेदिनीम् ।
भोक्तुं पुण्यपरीपाकं लोकान्सुकृतिनामगात् ॥ ३४५ ॥
गोकर्णस्तत्सुतः क्षौणीं गोकर्णेश्वरकृद्दधे ।
अष्टपञ्चाशतं वर्षाण्त्रिंशत्याह्नां विवर्जितान् ॥ ३४६ ॥
सूनुर्नरेन्द्रादित्योस्य खिङ्खिलान्याभिधोभवत् ।
भूतेश्वरप्रतिष्ठानामक्षयिण्याश्च कारकः ॥ ३४७ ॥
दिव्यानुग्रहभागुग्राभिधो यस्य गुरुर्व्यधात् ।
उग्रेशं मातृचक्रं च प्रभावोद्ग्रविग्रहः ॥ ३४८ ॥
भूत्वा षट्त्रिंशतं वर्षाञ्शतं चाह्नां विभुर्भुवः ।
स दीर्घैरनघाँल्लोकानासदत्सुकृतैः कृती ॥ ३४९ ॥

युधिष्ठिराभिधानोभूदथ राजा तदात्मजः ।
यः सूक्ष्माक्षितया लोकैः कथितोन्धयुधिष्ठिरः ॥ ३५० ॥
तेन क्रमागतं राज्यं सावधानेन शासता ।
अनुजग्मे मितं कालं पूर्वभूपालपद्धतिः ॥ ३५१ ॥
काले कियत्यपि ततो यात्यभाग्यवशादसौ ।
सिषेवे श्रीमदक्षीबो यत्किंचनविधायिताम् ॥ ३५२ ॥
नान्वग्रहीदनुग्राह्यान्न संजग्राह धीमतः ।
न प्रवृत्तोपचाराणां प्रागिवासीत्प्रियंकरः ॥ ३५३ ॥
दुर्विद्यपर्षदा साकं निर्विशेषं सभाजितैः ।
परिजह्रे स दुर्जातो जाततेजोवधैर्बुधैः ॥ ३५४ ॥
सर्वत्र समदृष्टित्वं गुणोयं खलु योगिनः ।
अकीर्तिहेतुः स महान्दोषस्तु पृथिवीपतेः ॥ ३५५ ॥
नयद्भिर्गुणतां दोषान्दोषतां च गुणान्विटैः ।
स लुप्तप्रतिभश्चक्रे शनकैस्त्रीजितोपमः ॥ ३५६ ॥
वाङ्मर्मच्छेदिनी दीर्घं नर्म शश्वत्कथा विटैः ।
अनीश्वरोचिता तस्य क्रीडापि भयदाभवत् ॥ ३५७ ॥
पुरो मिथ्यागुणग्राही परोक्षं दोषदर्शकः ।
असुस्थिरादरो भूभृत्सोभूद्वेष्योनुजीविनाम् ॥ ३५८ ॥
मनागनवधानेन स्खलतस्तस्य भूपतेः ।
इत्थं राज्यस्थितिरगादचिरेण विसूत्रताम् ॥ ३५९ ॥
उपेक्षितस्य निर्द्रोहैरयतन्ताजितात्मनः ।
अथ लब्धबलास्तस्य नाशाय द्रोहिमन्त्रिणः ॥ ३६० ॥
प्रभोः संकोचिताञ्चैस्तैश्चरद्भिर्निरवग्रहम् ।
राज्यं जिहीर्षवो भूपाश्चक्रिरे भूम्यनन्तराः ॥ ३६१ ॥

तदनुप्राणिताः सर्वे ते ते नानादिगाश्रयाः ।
आसन्राज्यामिषं प्राप्तुं श्येना इव ससंभ्रमाः ॥ ३६२ ॥
अथोत्पन्नभयो राजा न शशाक निजस्थितिम् ।
व्यवस्थापयितुं यत्रच्युतां कारुः शिलामिव ॥ ३६३ ॥
चिरक्षुण्णे क्षमाभर्तुस्तस्मिन्राज्ये विसंस्थुले ।
उपायोस्य स्थितेर्हेतुर्नैकः कश्चन प्रपथे ॥ ३६४ ॥
दृष्टदोषान्स्थितिं प्राप्तो हन्यादस्मानसंशयम् ।
विचिन्त्येति न सामास्य जगृहुर्निजमन्त्रिणः ॥ ३६५ ॥
अथ निरुरुधुस्ते संनद्धा बलैर्नृपमन्दिरं
व्यवहितजनाक्रन्दं भेरीरवैरतिभैरवैः ।
मदकरिघटाकेतुच्छायानिरुद्धरविप्रभा
भवनवलभीः संतन्वन्तो दिवापि तमोवृताः ॥ ३६६ ॥
तैर्गन्तुं स्वभुवो निवारितरणैर्दत्तेवकाशे तत-
स्त्यक्तश्रीर्नगरान्तरात्स नृपतिस्तात्पर्यतो निर्ययौ ।
आजानेयरजोङ्कराजललनाप्रस्थानसंदर्शन-
क्षुभ्यत्पौरजनाश्रुलाजकणिकाकीर्णेन राजाध्वना ॥ ३६७ ॥
राज्याच्युतस्य बहुशः परिवाररामाः
कोशादि तस्य रिपवो व्रजतोपजह्रुः ।
उर्वीरुहो विचलितस्य नगेन्द्रशृङ्गा-
द्वल्लीफलादि रभसादिव गण्डशैलाः ॥ ३६८ ॥
रम्यैः शैलपथैर्व्रजञ्श्रमवशाच्छायां श्रितः शाखिना-
मासीनप्रचलायितेन सुमहद्दुःखं विसस्मार सः ।
दूरात्पामरपूत्कृतैः श्रुतिपथप्राप्तैः प्रबुद्धस्त्वभू-
द्दृष्टो निर्झरवारिभिः सह महच्छभ्रे निमज्जन्निव ॥ ३६९ ॥

नानावीरुत्तृणपरिमलैरुग्रगन्धा वनोर्वी-
रम्भःक्षोभप्रतिहतशिलाः पिच्छिलाश्चाद्रिकुल्याः ।
क्रान्त्वा श्रान्तैर्बिसकिसलयच्छायमुग्धाङ्गलेखै-
रभ्युत्सङ्गं निहिततनुभिर्मूर्छितं तस्य दारैः ॥ ३७० ॥
पर्यस्ताद्रितटाद्विलोक्य सुचिरं दूरीभवन्मण्डलं
द्रागामन्त्रयितुं जहत्सु नृपतेर्दारेषु पुष्पाञ्जलीन् ।
क्षोणीपृष्ठविकीर्णपक्षति नमत्तुण्डं स्वनीडस्थितैः
सावेगं गिरिकंदरासु पततां वृन्दैरपि क्रन्दितम् ॥ ३७१ ॥
स्तनयुगतलनद्धस्रस्तमूर्धांशुकानां
त्रिकवलनविलोलं वीक्ष्य दूरात्स्वदेशम् ।
अवहत रुदतीनां मौलिविन्यस्तहस्तं
पथि बलमबलानामस्रुभिर्निर्झराम्भः ॥ ३७२ ॥
प्रीतिस्थैर्यैरुचितवचनाक्षिप्तया शोकशान्त्या
निर्व्याजाज्ञाग्रहणगुरुभिस्तैश्च तैश्चोपचारैः ।
तस्य स्नेहादुपगतवतो राज्यविभ्रंशदुःखं
मन्दीचक्रुः स्वभुवि सुजना भूपतेर्भूमिपालाः ॥ ३७३ ॥

इति श्रीकाश्मीरिकमहामात्यचम्पकप्रभुसूनोः कल्हणस्य कृतौ राजतरङ्गिण्यां प्रथमस्तरङ्गः ॥

चतुर्दशाधिकं वर्षसहस्रं नव वासराः ।
मासाश्च विगता ह्यस्मिन्नष्टात्रिंशतिराजसु ॥

द्वितीयस्तरङ्गः ।

विहितमजगोशृङ्गाग्राभ्यां धनुर्घटितं तथा
नरकरटिनोर्देहार्धाभ्यां गणं प्रतिगृह्णतः ।
द्विविधघटनावाल्लभ्यानां निधेरुचिता विभो-
र्जयति लटभापुंभागाभ्यां शरीरविनिर्मितिः ॥ १ ॥
भूयो राज्यार्जनोद्योगस्तेनात्यज्यत भूभुजा ।
जरसा शमिवाण्या च कर्णमूलमवाप्तया ॥ २ ॥
अनयद्विनयोदात्तः समं स्वविषयेण तान् ।
विषयान्वशिनामग्र्यः स तान्पश्चापि विस्मृतिम् ॥ ३ ॥
धावन्राज्येच्छया दुर्गागलिकायां स्वमन्त्रिभिः ।
कालेन स्थापितो बङ्गेत्यभ्यधायि तु कैरपि ॥ ४ ॥
अथ प्रतापादित्याख्यस्तैरानीय दिगन्तरात् ।
विक्रमादित्यभूभर्तुर्ज्ञातिरत्राभ्यषिच्यत ॥ ५ ॥
शकारिर्विक्रमादित्यः स इति भ्रममाश्रितैः ।
अन्यैरत्रान्यथालेखि विसंवादकदर्थितम् ॥ ६ ॥
इदं स्वभेदविधुरं हर्षादीनां धराभुजाम् ।
कंचित्कालमभूद्भोज्यं ततःप्रभृति मण्डलम् ॥ ७ ॥
असपूर्वापि तेनोर्वी सपूर्वेव महीभुजा ।
लालिता हृदयज्ञेन पत्या नववधूरिव ॥ ८ ॥
भुक्त्वा द्वात्रिंशतं वर्षान्भुवं तस्मिन्दिवं गते ।
जलौकास्तत्सुतो भूमेर्भूषणं समपद्यत ॥ ९ ॥
पितुरेव समं कालं वृद्धिहेतोः स दिद्युते ।
विधुवत्पूर्णशीतांशुरिव शीतेतरार्चिषः ॥ १० ॥

---

१ ततान् इति मतान् इति वा स्यात् ।

अथ वाक्पुष्टया सार्धं देव्या दिव्यप्रभावया ।
भुवं तत्प्रभवो भुञ्जंस्तुञ्जीनोरञ्जयत्प्रजाः ॥ ११ ॥
दंपतिभ्यामियं ताभ्यामभूष्यत वसुंधरा ।
गङ्गामृगाङ्कखण्डाभ्यां जटाभूरिव धूर्जटेः ॥ १२ ॥
मण्डलं साध्वधत्तां तौ नानावर्णमनोरमम् ।
शतह्रदापयोवाहौ माहेन्द्रमिव कार्मुकम् ॥ १३ ॥
चक्राते च महाभागौ विभ्रमाभरणं भुवः ।
तुङ्गेश्वरं हरावासं कतिकाख्यं च पत्तनम् ॥ १४ ॥
क्वचिन्मडवराज्यान्तः स्थाने चण्डातपोल्बणे ।
तत्प्रभावेन फलितं वृक्षैस्तत्क्षणरोपितैः ॥ १५ ॥
नाट्यं सर्वजनप्रेक्ष्यं यश्चक्रे स महाकविः ।
द्वैपायनमुनेरंशस्तत्काले चन्दकोभवत् ॥ १६ ॥
तयोः प्रभावमाहात्म्यजिज्ञासार्थमिवोद्यता ।
प्रजासु दुःसहा जातु व्यापद्दैवी व्यजृम्भत ॥ १७ ॥
पाकोन्मुखशरच्छालिच्छन्नकेदारमण्डले ।
मासि भाद्रपदेकस्मात्पपात तुहिनं महत् ॥ १८ ॥
तस्मिन्विश्वक्षयोद्युक्तकालाट्टहासितोपमे ।
न्यमज्जञ्शालयः साकं प्रजानां जीविताशया ॥ १९ ॥
अथासीत्क्षुत्परिक्षामजनप्रेतकुलाकुलः ।
प्रकारो निरयस्येव घोरो दुर्भिक्षविप्लवः ॥ २० ॥
पत्नीप्रीतिं सुतस्नेहं पितृदाक्षिण्यमातुरः ।
कुक्षिंभरिः क्षुदुत्तप्तो विसस्मारखिलो जनः ॥ २१ ॥
क्षुत्तापाद्यस्मरल्लज्जामभिमानं कुलोन्नतिम् ।
अशनाहंक्रियाघातो लोकोलक्ष्मीकटाक्षितः ॥ २२ ॥

क्षामं कण्ठगतप्राणं याचमानं सुतं पिता ।
पुत्रो वा पितरं त्यक्त्वा चकार स्वस्य पोषणम् ॥ २३ ॥
स्नाय्वस्थिशेषे बीभत्से स्वदेहेहंक्रियावताम् ।
अभूद्भोज्यार्थिनां युद्धं प्रेतानामिव देहिनाम् ॥ २४ ॥
रूक्षाभिभाषी क्षुत्क्षामो घोरो दिक्ष्वक्षिणी क्षिपन् ।
एक एको जगज्जीवैरियेष स्वात्मपोषणम् ॥ २५ ॥
तस्मिन्महाभये घोरे प्राणिनामतिदुःसहे ।
ददृशे लोकनाथस्य तस्यैव करुणार्द्रता ॥ २६ ॥
निवारितप्रतीहारः स रत्नौषधिशोभिना ।
दर्शनेनैव दीनानामलक्ष्मीक्रममच्छिनत् ॥ २७ ॥
सपत्नीको निजैः कोशैः संचयैर्मन्त्रिणामपि ।
क्रीतान्नः स दिवारात्रं प्राणिनः समजीवयत् ॥ २८ ॥
अटवीषु श्मशानेषु रथ्यास्ववसथेषु च ।
क्षुत्क्षामः क्ष्माभुजा तेन नहि कश्चिदुपैक्ष्यत ॥ २९ ॥
ततो निःशेषितधनः क्षीणान्नां वीक्ष्य मेदिनीम् ।
क्षपायामेकदा देवीमेवमूचे स दुःखितः ॥ ३० ॥
देव्यस्मदपचारेण ध्रुवं केनापि दुस्तरा ।
जाता निरपराधानां जनानां व्यापदीदृशी ॥ ३१ ॥
धिङ्मामधन्यं यस्याग्रे लोकोयं शोकपीडितः ।
पश्यन्नशरणामुर्वीमनुग्राह्यो विपद्यते ॥ ३२ ॥
प्रजा निःशरणा एता अन्योन्यं बान्धवोज्झिताः ।
अरक्षतो भयेमुष्मिन्किं कार्यं जीवितेन मे ॥ ३३ ॥
यथाकथंचिल्लोकोयं दिनान्येतानि यत्नतः ।
मयातिवाहितः सर्वो न च कोपि व्यपद्यत ॥ ३४ ॥

अतिक्रान्तप्रभावेयं कालदौरात्म्यपीडिता ।
निष्किंचनाद्य संजाता पृथिवी गतगौरवा ॥ ३५ ॥
तदिमाः सर्वतो मग्ना दारुणे व्यसनार्णवे ।
उपायः कतमस्तावत्समुद्धर्तुं क्षमः प्रजाः ॥ ३६ ॥
निरालोको हि लोकोयं दुर्दिनग्रस्तभास्करः ।
कालरात्रिकुलैर्विष्वक्परीत इव वर्तते ॥ ३७ ॥
हिमसंघातदुर्लङ्घ्यक्षितिभृद्रुद्धनिर्गमाः ।
बद्धद्वारकुलायस्थखगवद्विवशा जनाः ॥ ३८ ॥
शूराश्च मतिमन्तश्च विद्यावन्तश्च जन्तवः ।
कालदौरात्म्यतः पश्य जाता निहतयोग्यताः ॥ ३९ ॥
आशाः काञ्चनपुष्पकुड्मलकुलच्छन्ना न काः क्ष्मातल
सौजन्यामृतवर्षिभिस्तिलकितं सेव्यैर्न किं मण्डलम् ।
पन्थानः सुचिरोपचाररुचिरैर्व्याप्ता न कैः संस्तुतै-
स्तेषामत्र वसन्ति निह्नुतगुणाः कालेन ये मोहिताः ॥ ४० ॥
तदेष गलितोपायो जुहोमि ज्वलने तनुम् ।
न तु द्रष्टुं समर्थोस्मि प्रजानां नाशमीदृशम् ॥ ४१ ॥
धन्यास्ते पृथिवीपालाः सुखं ये निशि शेरते ।
पौरान्पुत्रानिव पुरः सर्वतो वीक्ष्य निर्वृतान् ॥ ४२ ॥
इत्युक्त्वा करुणाविष्टो मुखमाच्छाद्य वाससा ।
निपत्य तल्पे निःशब्दं रुरोद पृथिवीपतिः ॥ ४३ ॥
निवातस्तिमितैर्दीपैरुह्रीवैः कौतुकादिव ।
वीक्ष्यमाणाथ तं देवी जगाद जगतीभुजम् ॥ ४४ ॥
राजन्प्रजानां कुकृतैः कोयं मतिविपर्ययः ।
येनेतर इव स्वैरमधीरोचितमीहसे ॥ ४५ ॥

यद्यसाध्यानि दुःखानि च्छेत्तुं न प्रभविष्णुता ।
तन्महीपाल महतां महत्त्वस्य किमङ्कनम् ॥ ४६ ॥
कः शक्रः कतमः स्रष्टा वराकः कतमो यमः ।
सत्यव्रतानां भूपानां कर्तुं शासनलङ्घनम् ॥ ४७ ॥
पत्यौ भक्तिर्व्रतं स्त्रीणामद्रोहो मन्त्रिणां व्रतम् ।
प्रजानुपालनेनन्यकर्मता भूभृतां व्रतम् ॥ ४८ ॥
उत्तिष्ठ व्रतिनामग्र्य क्व विपर्येति मद्वचः ।
प्रजापाल प्रजानां ते नास्त्येव क्षुत्कृतं भयम् ॥ ४९ ॥
इति संरम्भतः प्रोक्ते तयानुध्याय देवताः ।
प्रतिगेहं गतप्राणः कपोतनिवहोपतत् ॥ ५० ॥
प्रातस्तन्नृपतिर्वीक्ष्य व्यरंसीन्मरणोद्यमात् ।
प्रजाश्च प्रत्यहं प्राप्तैः कपोतैर्जीवितं दधुः ॥ ५१ ॥
वस्त्वन्तरं किमपि तत्साध्वी नूनं ससर्ज सा ।
जनताजीवितावास्यै न कपोतास्तु तेभवन् ॥ ५२ ॥
तादृशां नहि निर्व्याजप्राणिकारुण्यशालिनाम् ।
हिंसया धर्मचर्यायाः शक्यं क्वापि कलङ्कनम् ॥ ५३ ॥
अभवन्निर्मलं व्योम देवीकृत्यैः सह क्रमात् ।
साकं भूपालशोकेन दुर्भिक्षं च शमं ययौ ॥ ५४ ॥
सा भूतिविभवोदग्रमग्रहारं द्विजन्मनाम् ।
सती कतीमुषां चक्रे रामुषां चापकल्मषा ॥ ५५ ॥
वर्षैः षट्त्रिंशता शान्ते पत्यौ विरहजो ज्वरः ।
तत्यजे ज्वलनज्वालानलिनप्रच्छदे तया ॥ ५६ ॥
सा यत्र शुचिचारित्रा विपन्नं पतिमन्वगात् ।
स्थानं जनैस्तद्वाक्पुष्टाटवीत्यद्यापि गद्यते ॥ ५७ ॥

चारुचारित्रया तत्र तया सत्रेवतारिते ।
नानापथागतानाथसार्थैरद्यापि भुज्यते ॥ ५८ ॥
आभ्यामभ्यधिकं कर्तुं शक्तिः कस्येति निश्चितम् ।
विचिन्त्यारोचकी धाता नापत्यं निर्ममे तयोः ॥ ५९ ॥
वेधाः परां धुरमुपैति परीक्षकाणा-
मिक्षोः फलप्रजनने न कृतश्रमो यः ।
विस्मारितोद्धुरसुधारसयोग्यतात्तु
तस्मादुदेत्य किमिवाभ्यधिकं विदध्यात् ॥ ६० ॥
दीर्घदुर्दिननष्टार्कं राष्ट्रमात्मापचारतः ।
ज्ञात्वा राज्यग्निसाद्देहं सा चकारेति केचन ॥ ६१ ॥
ततोन्यकुलजो राजा विजयोष्टावभूत्समाः ।
पत्तनेन परीतं यश्चकार विजयेश्वरम् ॥ ६२ ॥
सुतो महीमहेन्द्रस्य जयेन्द्रस्तस्य भूपतेः ।
क्षमाजानुभुजो राजा बुभोजाथ पृथुप्रथः ॥ ६३ ॥
आलोलकीर्तिकल्लोलदुगूलवलनोज्ज्वलाम् ।
बभार यद्भुजस्तम्भो जयश्रीसालभञ्जिकाम् ॥ ६४ ॥
तस्याभूदद्भुतोदात्तो भवभक्तिविभूषितः ।
राज्ञः संधिगतिर्नाम मन्त्री मतिमतां वरः ॥ ६५ ॥
नास्त्युपायः स संसारे कोपि योपोहितुं क्षमः ।
भूपालमत्तकरिणामेषां चपलकर्णताम् ॥ ६६ ॥
अत्यद्भुतमतिः शङ्ख्यः सोयमुक्त्वेति यद्विटैः ।
तस्मिन्धीसचिवे द्वेषस्तेनाग्राह्यत भूभुजा ॥ ६७ ॥
युग्मम् ॥
निवारितप्रवेशोथ स कोपात्तमहेतुकम् ।
निनाय हृतसर्वस्वं यावदायुर्दरिद्रताम् ॥ ६८ ॥

तस्य भूपतिविद्वेषग्रीष्मोष्मपरिशोषिणः ।
आप्यायं राजपुरुषा वार्तयापि न चक्रिरे ॥ ६९ ॥
गिरं गभीरो गृह्णाति क्ष्माभृद्यावत्तदग्रगाः ।
उक्तानुवादिनस्तावद्यक्तं प्रतिरवा इव ॥ ७० ॥
स तु राजविरुद्धत्वदारिद्र्याभ्यां न विव्यथे ।
गतप्रत्यूहया प्रीतः प्राप्तया हरसेवया ॥ ७१ ॥
अथ भाव्यर्थमाहात्म्यात्पप्रथे प्रतिमन्दिरम् ।
राज्यं संधिमतेर्भावीत्यश्रुतापि सरस्वती ॥ ७२ ॥
नाचोदिता वाक्करतीत्याप्तेभ्यः श्रुतवान्नृपः ।
ततः संभूतसंत्रासः कारावेश्मनि तं न्यधात् ॥ ७३ ॥
तत्र तस्योग्रनिगडैः पीडिताङ्गैर्विशुष्यतः ।
पूर्णोभूद्दशमो वर्षो भूपतेश्चायुषोवधिः ॥ ७४ ॥
निष्पुत्रः स महीपालो मुमूर्षुर्दाहमादधे ।
रोगोत्थया पीडया च चिन्तया च तदीयया ॥ ७५ ॥
ऊष्मायमाणो विद्वेषवह्निना ज्वलतानिशम् ।
न विना तद्वधं मेने भवितव्यप्रतिक्रियाम् ॥ ७६ ॥
भाव्यर्थस्याबुधाः कुर्युरुपायं स्वगनाय यम् ।
स एवापावृतं द्वारं ज्ञेयं दैवेन कल्पितम् ॥ ७७ ॥
दग्धाङ्गारकदम्बके विलुठतः स्तोकोन्मिषत्तेजसो
वेधा वह्निकणस्य शक्तिमतुलामाधातुकामो हठात् ।
तन्निर्वापणमिच्छतः प्रतनुते पुंसः समीपस्थितेः
संतापद्रुतभूरिसर्पिषि घटे पानीयकुम्भभ्रमम् ॥ ७८ ॥
अथ राजाज्ञया क्रूरैर्वधकर्माधिकारिभिः ।
निशि संधिमतिः शूले समारोप्य विपादितः ॥ ७९ ॥

प्रोतशूले श्रुते तस्मिञ्शोकशङ्कुर्महीपतेः ।
निरगाद्रोगभग्नस्य पूर्वं पश्चात्तु जीवितम् ॥ ८० ॥
सप्तत्रिंशतिवर्षेषु यातेष्वस्मिन्निरन्वये ।
प्रशान्तभूमिपालाभूत्कतिचिद्दिवसानि भूः ॥ ८१ ॥
अथ संधिमतिं बुद्ध्वा तथा व्यापादितं गुरोः ।
ईशानाख्यस्य हृदयं विवशं वशिनोप्यभूत् ॥ ८२ ॥
शिरीष इव संसारे सुखोच्छेद्ये मनीषिणाम् ।
हन्तानृशंस्यं तद्धन्तमिवैकमवशिष्यते ॥ ८३ ॥
स श्मशानभुवं प्रायादनाथस्येव शुष्यतः ।
कर्तुं विनयिनस्तस्य स्वोचितामन्तसत्क्रियाम् ॥ ८४ ॥
तं चास्थिशेषमद्राक्षीत्कृष्यमाणं बलाद्बृकैः ।
शूलमूलावबद्धास्थिखण्डावष्टम्भनिश्चलम् ॥ ८५ ॥
समीरणसमाकीर्णमुण्डरन्ध्राग्रनिर्गतैः ।
ध्वनितैरनुशोचन्तमिवावस्थां तथाविधाम् ॥ ८६ ॥
हा वत्स द्रष्टुमीदृक्ते जीवाम्यद्येति वादिना ।
तस्याकृष्यत शूलान्तःप्रोतं तेनाथ कीकसम् ॥ ८७ ॥
वेष्टिताङ्घ्रिः शिरःशीर्णैस्तत्कचैर्धूलिधूसरैः ।
अनैषीत्तं स कङ्कालं वारयन्भषतो वृकान् ॥ ८८ ॥
उचितां सत्क्रियां कर्तुं ततस्तस्य समुद्यतः ।
भाले विधातृलिखितं श्लोकमेतमवाचयत् ॥ ८९ ॥
यावज्जीवं दरिद्रत्वं दश वर्षाणि बन्धनम् ।
शूलस्य पृष्ठे मरणं पुना राज्यं भविष्यति ॥ ९० ॥
पादत्रयस्य दृष्टार्थः श्लोकस्यासीत्स योगवित् ।
द्रष्टव्ये तुर्यपादार्थप्रत्यये कौतुकान्वितः ॥ ९१ ॥

अचिन्तयच्च संभ्रान्तः कथमेतद्भविष्यति ।
उवाच च विधेः शक्तिमचिन्त्यां कलयंश्चिरम् ॥ ९२ ॥
तत्तत्कर्मव्यतिकरकृतः पारतन्त्र्यानुरोधा-
त्सज्जाः सर्वे व्यवसितहठोन्मूलनाय प्रयत्नात् ।
चित्रं तत्राप्युदयति विधेः शक्तिरत्यद्भुतेयं
यन्माहात्म्याद्विविधघटनासिद्धयो निर्निरोधाः ॥ ९३ ॥
मणिपूरपुरे पार्थं निहतं समजीवयत् ।
फणिकन्याप्रभावेन सर्वाश्चर्यनिधिर्विधिः ॥ ९४ ॥
द्रोणपुत्रास्त्रनिर्दग्धं मातुर्गर्भे परीक्षितम् ।
जीवयन्कृष्णमाहात्म्याद्धाता धुर्योधिकारिणाम् ॥ ९५ ॥
कचं भस्मीकृतं दैत्यैर्नागांस्तार्क्ष्येण भक्षितान् ।
पुनर्जीवयितुं को वा दैवादन्यः प्रगल्भते ॥ ९६ ॥
इत्युक्त्वा भाविनोर्थस्य द्रष्टुं सिद्धिं समुद्यतः ।
तत्रैव बद्धवसतिः कङ्कालं स ररक्ष तम् ॥ ९७ ॥
अथार्धरात्रे निर्निद्रस्तयैवाद्भुतचिन्तया ।
धूपाधिवासमीशानो घ्रातवान्दिव्यमेकदा ॥ ९८ ॥
उच्चण्डलाडनादण्डोद्भृष्टघण्टौघटांकृतैः ।
चण्डैर्डमरुनिर्घोषैर्घर्घरं श्रुतवान्ध्वनिम् ॥ ९९ ॥
उद्घाटिततमोरिः स ततः पितृवनावनौ ।
ददर्श योगिनीस्तेजःपरिवेषान्तरस्थिताः ॥ १०० ॥
तासां संभ्रममालक्ष्य कङ्कालं चापवाहितम् ।
ईशानस्तां श्मशानोर्वीं धृतासिश्चकितो ययौ ॥ १०१ ॥
अथापश्यत्तरुच्छन्नः शायितं मण्डलान्तरे ।
संधीयमानसर्वाङ्गं कङ्कालं योगिनीगणैः ॥ १०२ ॥

उल्लसद्वरसंभोगवाञ्छा मद्यपदेवताः ।
वीरालाभात्समन्विष्य कङ्कालं तमपाहरन् ॥ १०३ ॥
एकमेकं स्वमङ्गं च विनिधाय क्षणादथ ।
कुतोप्यानीय पुंलक्ष्म पूर्णाङ्गं तं प्रचक्रिरे ॥ १०४ ॥
अथ पुर्यष्टकं भ्राम्यदनाक्रान्तान्यविग्रहम् ।
योगेनाकृष्य योगिन्यस्तत्र संधिमतेर्न्यधुः ॥ १०५ ॥
ततः सुप्तोत्थित इव प्रत्तदिव्यविलेपनः ।
समभुज्यत ताभिः स यथेच्छं चक्रनायकः ॥ १०६ ॥
ईशानस्तस्य देवीनां वितीर्णाङ्गाहृतिं पुनः ।
क्षपायां क्षीयमाणायां चकितः पर्यशङ्कत ॥ १०७ ॥
नदंस्तद्रक्षया धीरः स च तत्स्थानमाययौ ।
तच्च योगेश्वरीचक्रं क्षिप्रमन्तरधीयत ॥ १०८ ॥
अथाश्रूयत वाक्तासां मा भूदीशान भीस्तव ।
नास्त्यङ्गहानिरस्माकं वृते चास्मिन्न वञ्चना ॥ १०९ ॥
अस्मद्वरादिव्यवपुःसंधितः संधिमानसौ ।
आर्यत्वादार्यराजश्च ख्यातो भुवि भविष्यति ॥ ११० ॥
ततो दिव्याम्बरः स्रग्वी दिव्यभूषणभूषितः ।
ववन्दे संधिमान्प्रह्वः प्राप्तपूर्वस्मृतिर्गुरुम् ॥ १११ ॥
ईशानोपि तमालिङ्ग्य स्वप्नेष्वपि सुदुर्लभम् ।
भूमिकामाललम्बे कामिति को वक्तुमर्हति ॥ ११२ ॥
असारं च विचित्रं च संसारं ध्यायतोर्मिथः ।
विवेकविशदा तत्र प्रावर्तत तयोः कथा ॥ ११३ ॥
अथ वार्तां विदित्वेमां कुतोपि नगरौकसः ।
सबालवृद्धाः सामात्यास्तमेवोद्देशमाययुः ॥ ११४ ॥

पूर्वाकृतिविसंवादाद्भ्रमो नायं स इत्यथ ।
तेनाच्छिद्यत संवादि निखिलान्पृच्छता वचः ॥ ११५ ॥
अर्थनां शासितुं राष्ट्रं पौराणामपराजकम् ।
सोन्वमन्यत कृच्छ्रेण निःस्पृहः शासनाद्गुरोः ॥ ११६ ॥
प्रापय्योपवनोपान्तं तं दिव्याकृतिशोभिनम् ।
सतूर्यं स्नापयामासुरभिषेकाम्बुभिर्द्विजाः ॥ ११७ ॥
नवराजोचिताचारे न स शिक्षामपैक्षत ।
दृष्टकर्मा समस्तास्तु निस्तुषाः प्रक्रिया व्यधात् ॥ ११८ ॥
स राजोचितनेपथ्यः पौराशीर्घोषशोभिनीम् ।
सौधोन्मिषल्लाजवर्षां ससैन्यः प्राविशत्पुरीम् ॥ ११९ ॥
तस्मिन्विरजसि प्राज्यमाक्रामति नृपासनम् ।
आचक्राम प्रजा व्यापन्न दैवी न च मानुषी ॥ १२० ॥
अहरन्हृदयं तस्य शृङ्गारहितविभ्रमाः ।
नितम्बिन्यो वनभुवः शमिनो न तु योषितः ॥ १२१ ॥
वनप्रसूनसंपर्कपुण्यगन्धैस्तपस्विनाम् ।
कर्पूरधूपसुरभिः करैः स्पृष्टः स पिप्रिये ॥ १२२ ॥
भूतेशवर्धमानेशविजयेशानपश्यतः ।
नियमो राजकार्येषु तस्याभूत्प्रतिवासरम् ॥ १२३ ॥
हरायतनसोपानक्षालनाम्भःकणाञ्चितैः ।
संस्पृष्टः पवनैः सोभूदानन्दास्पन्दविग्रहः ॥ १२४ ॥
पूर्वपूजापनयने निराडम्बरसुन्दरः ।
तेनैव द्रष्टुमज्ञायि स्नपितो विजयेश्वरः ॥ १२५ ॥
लिङ्गपीठलुठत्स्नानकुम्भाम्भःक्षोभभूर्ध्वनिः ।
शयानस्याप्यभूत्तस्य वल्लभो वल्लकीद्विषः ॥ १२६ ॥

तापसैर्भस्मरुद्राक्षजटाजूटाङ्कितैर्बभौ ।
तस्य माहेश्वरी पर्षदिव भूमिपतेः सभा ॥ १२७ ॥
शिवलिङ्गसहस्रस्य प्रतिष्ठाकर्मणि प्रभोः ।
प्रतिज्ञा प्रत्यहं तस्य नाभूद्विघटिता क्वचित् ॥ १२८ ॥
प्रमादात्तदनिष्पत्तौ शिलामुत्कीर्य कल्पिता ।
सहस्रलिङ्गी तद्भृत्यैः सर्वतोद्यापि दृश्यते ॥ १२९ ॥
तासु तासु स वापीषु लिङ्गव्याजादरोपयत् ।
स्वपुण्यपुण्डरीकाणां जन्मनेक्षपरम्पराम् ॥ १३० ॥
स्थाने स्थाने जलान्तश्च बहुसंख्यैर्निवेशितैः ।
अनयन्नर्मदाभङ्गिं शिवलिङ्गैस्तरङ्गिणीः ॥ १३१ ॥
प्रतिलिङ्गं महाग्रामाः प्रत्यपाद्यन्त तेन ये ।
पर्षदामद्य तद्भोगः कालेनान्तर्धिमागतः ॥ १३२ ॥
अकरोत्स महाहर्म्यैर्महालिङ्गैर्महावृषैः ।
महात्रिशूलैर्महतीं महामाहेश्वरो महीम् ॥ १३३ ॥
कृत्वा संधीश्वरं देहसंधानपितृकानने ।
ईशानस्य गुरोर्नाम्ना व्यधादीशेश्वरं हरम् ॥ १३४ ॥
थेदां च भीमादेवीं च देशांश्चान्यान्पदे पदे ।
स मठप्रतिमालिङ्गैर्हर्म्यैर्निन्ये महार्घताम् ॥ १३५ ॥
स्वयंभूभिश्च तीर्थैश्च पूतं भक्तिविशेषतः ।
स एव भोक्तुमज्ञासीत्प्राज्ञः कश्मीरमण्डलम् ॥ १३६ ॥
स्नातस्य निर्झराम्भोभिः पुष्पलिङ्गार्चनोत्सवैः ।
राज्ञस्तस्य वनोर्वीषु मासः पुष्पाकरो ययौ ॥ १३७ ॥
स चातिरम्यः काश्मीरो ग्रीष्मस्त्रिदिवदुर्लभः ।
हिमलिङ्गार्चनैः प्रायाद्वनान्तेषु कृतार्थताम् ॥ १३८ ॥

फुल्लाब्जषण्डरुद्धाशाः प्राप्य पुष्करिणीतटीः ।
लक्ष्मीसखः स खण्डेन्दुचूडध्यानपरोभवत् ॥ १३९ ॥
नीलोत्पलवतीर्वापीरगस्त्योदयनिर्विषाः ।
अवगाह्य हरार्चाभिः शरदं निर्विवेश सः ॥ १४० ॥
सार्धं तपोधनैस्तैस्तैर्भजतो जागरोत्सवान् ।
तस्याभूवन्भुवो भर्तुरमोघा माघरात्रयः ॥ १४१ ॥
अत्यद्भुतं राज्यलाभमित्थं सफलयन्कृती ।
पञ्चाशतं त्रिवर्षोनामत्यक्रामत्स वत्सरान् ॥ १४२ ॥
शमव्यसनिनस्तस्य राज्यकार्याण्यपश्यतः ।
तस्मिन्काले प्रकृतयो विरागं प्रतिपेदिरे ॥ १४३ ॥
अन्वैष्यत नृपस्ताभिः कश्चिद्राज्याय शुश्रुवे ।
राजपुत्रो जिगीषुश्च श्रीमान्यौधिष्ठिरे कुले ॥ १४४ ॥
जुगोप गोपादित्याख्यं कश्मीरेन्द्रजिगीषया ।
युधिष्ठिरप्रपौत्रं हि गान्धाराधिपतिस्तदा ॥ १४५ ॥
वसन्नपास्तसाम्राज्यः स तत्र तनयं क्रमात् ।
अवाप लक्षणैर्दिव्यैरमोघं मेघवाहनम् ॥ १४६ ॥
स युवा पितुरादेशाद्वैष्णवान्वयजन्मनः ।
राष्ट्रं प्राग्ज्योतिषेन्द्रस्य ययौ कन्यास्वयंवरे ॥ १४७ ॥
तत्र तं वारुणं छत्रं छायया राजसंनिधौ ।
भेजे वरस्रजा राजकन्यका चामृतप्रभा ॥ १४८ ॥
तेन तस्य निमित्तेन वृद्धिमागामिनीं जनाः ।
अजानन्नम्बुवाहस्य पाश्चात्येनेव वायुना ॥ १४९ ॥
राज्ञा हि नरकेणैतद्वरुणादुष्णवारणम् ।
आनीतमकरोच्छायां न विना चक्रवर्तिनम् ॥ १५० ॥

तमन्तिकं पितुः प्राप्तं पद्म्या लक्ष्म्या च संश्रितम् ।
भुवा निमन्त्रयामासुर्मन्त्रिणो वंशयोग्यया ॥ १५१ ॥
अथार्यराजो विज्ञाय स्वराज्यं भेदजर्जरम् ।
प्रतिचक्रे न शक्तोपि तस्थौ तु त्यक्तुमुत्सुकः ॥ १५२ ॥
अचिन्तयच्च सत्यं मे संप्रीतो भूतभावनः ।
सिद्धिविघ्नानमून्दीर्घानपाकर्तुं समुद्यतः ॥ १५३ ॥
कृत्ये बहुनि निष्पाद्ये श्रमात्कौसीद्यमाश्रयन् ।
प्रावृषीवाध्वगो दिष्ट्या मोहितोस्मि न निद्रया ॥ १५४ ॥
स्वकाले त्यजता लक्ष्मीं विरक्तां बन्धकीमिव ।
हठनिर्वासनव्रीडा दिष्ट्या नासादिता मया ॥ १५५ ॥
शैलूषस्येव मे राज्यरङ्गेस्मिन् वल्गतश्चिरम् ।
निर्व्यूढमपि वैरस्यं दिष्ट्या न प्रेक्षका गताः ॥ १५६ ॥
दिष्ट्या सदैव वैमुख्यमुच्चैरुद्घोषयञ्श्रियः ।
त्यागक्षणे न भीतोस्मि विकत्थन इवाहवे ॥ १५७ ॥
इति संचिन्तयन्नन्तः सर्वत्यागोन्मुखो नृपः ।
मनोराज्यानि कुर्वाणो दरिद्र इव पिप्रिये ॥ १५८ ॥
अन्येद्युः प्रकृतीः सर्वाः संनिपत्य सभान्तरे ।
ताभ्यः प्रत्यर्पयन्न्यासमिव राज्यं सुरक्षितम्[1] ॥ १५९ ॥
उज्झितं स्वेच्छया तच्च प्रयत्नेनापि नाशकत् ।
तं स्वीकारयितुं कश्चित्फणीन्द्रमिव कञ्चुकम् ॥ १६० ॥
अर्चालिङ्गमुपादाय सोथ प्रायादुदङ्मुखः ।
धौतवासा निरुष्णीषः पद्भ्यामेव प्रजेश्वरः ॥ १६१ ॥
तस्य पादार्पितदृशो व्रजतो मौनिनः प्रभोः ।
पन्थानं जगृहुः पौरा निःशब्दस्रवदस्रवः ॥ १६२ ॥

---

१ प्रत्यार्पयत् इत्युचितम् ।

स विलङ्घितगव्यूतिरुपविश्य तरोरधः ।
जनमेकैकमुद्बाष्पं न्यवर्तयत सान्त्वयन् ॥ १६३ ॥
पथि शिखरिणां मूले मूले विलम्ब्य जहज्जना-
न्मितपरिकरो गच्छन्नूर्ध्वं क्रमात्समदृश्यत ।
गहनवसुधाः संपूर्योच्चैर्व्रजन्स निजात्पदा-
न्नद इव विनिर्यातः स्तोकैः कृतानुगमो जलैः ॥ १६४ ॥
निःशेषं निकटात्स लोकमटवीमध्ये निरुन्धत्पदं
शोकावेशसबाष्पगद्गदपदं संमान्य चोत्सार्य च ।
भूर्जत्वक्परिरोधमर्मरमरुन्निद्राणसिद्धाध्वग-
श्रेणीमौलिमणिप्रभोज्ज्वलगुहागेहं जगाहे वनम् ॥ १६५ ॥

अथ वनसरसीतटद्रुमाधः
पुटकघटोदरसंभृताम्बुपूराम् ।
वसतिमकृत वासरावसाने
शुचितरुपल्लवकल्पितोच्चतल्पाम् ॥ १६६ ॥

शृङ्गासक्तमितातपाः शबलितच्छायाभुवः शाद्वलै-
रुत्फुल्लामलमल्लिकातलमिलत्सुप्तव्रजस्त्रीजनाः ।
सध्वाना वनपालवेणुरणितोन्मिश्रैः प्रपाताम्बुभिः
श्रान्तं दृक्पथमागतास्तमनयन्निद्रामदूराद्रयः ॥ १६७ ॥

वनकरिरसितैः पदे पदे स
प्रतिभटतां पटहध्वनेर्दधानैः ।
अमनुत रटितैश्च कर्करेटोः
परिगलितां गमनोन्मुखस्त्रियामाम् ॥ १६८ ॥

अन्येद्युर्विधिवदुपास्य पूर्वसंध्या-
मासन्ने नलिनसरस्यपास्तनिद्रः ।

क्ष्मापालः परिचितसोदराम्बु तीर्थे
नन्दीशाध्युषितमवाप भूतभर्तुः ॥ १६९ ॥
नन्दिक्षेत्रे त्रिभुवनगुरोः सोग्रतस्तत्र याव-
त्तस्थौ तावत्स्वयमभिमतावाप्तये जायते स्म ।
भस्मस्मेरः सुघटितजटाजूटबन्धोक्षसूत्री
रुद्राक्षाङ्को जरढमुनिभिः सस्पृहं वीक्ष्यमाणः ॥ १७० ॥
भ्राम्यञ्श्रीकण्ठदत्तव्रतजनितमहासत्क्रियो भैक्षहेतो-
र्भिक्षादानोद्यतासु प्रतिमुनिनिलयं संभ्रमात्तापसीषु ।
वृक्षैर्भिक्षाकपाले शुचिफलकुसुमश्रेणिभिः पूर्यमाणे
मान्यो वैराग्ययोगेप्यनुपनतपरप्रार्थनालाघवोभूत् ॥ १७१ ॥

इति श्रीकाश्मीरिकमहामात्यश्रीचम्पकप्रभुसूनोः कह्लणस्य कृतौ राजतरङ्गिण्यां द्वितीयस्तरङ्गः ॥

शतद्वये वत्सराणामष्टभिः परिवर्जिते ।
अस्मिन्द्वितीये व्याख्याताः षट् प्रख्यातगुणा नृपाः ॥

तृतीयस्तरङ्गः ।

मुञ्चेभाजिनमस्य कुम्भकुहरे मुक्ताः कुचाग्रोचिताः
किं भालज्वलनेन कज्जलमतः स्वीकार्यमक्ष्णोः कृते ।
संधाने वपुरर्धयोः प्रतिवदन्नेवं निषेधेप्यहेः
कर्तव्ये प्रिययोत्तरानुसरणोद्युक्तो हरः पातु वः ॥ १ ॥
अथोल्लसत्पृथुश्लाघमानिन्युर्मेघवाहनम् ।
गान्धारविषयं गत्वा सचिवाधिष्ठिताः प्रजाः ॥ २ ॥

रक्तप्रजस्य भूभर्तुः पश्चाल्लोकानुरञ्जनम् ।
तस्याज्ञायि जनैर्धौतक्षौमक्षालनसंनिभम् ॥ ३ ॥
स पुनर्बोधिसत्त्वानामपि सत्त्वानुकम्पिनाम् ।
चर्यामुदात्तचरितैरत्यशेत महाशयः ॥ ४ ॥
तस्याभिषेक एवाज्ञां धारयन्तोधिकारिणः ।
सर्वतोमारमर्यादापटहानुदघोषयन् ॥ ५ ॥
कल्याणिना प्राणिवधे तेन राष्ट्रान्निवारिते ।
निष्पापां प्रापिता वृत्तिं स्वकोशात्सौनिकादयः ॥ ६ ॥
तस्य राज्ये जिनस्येव मारविद्वेषिणः प्रभोः ।
क्रतौ घृतपशुः पिष्टपशुर्भूतबलावभूत् ॥ ७ ॥
स मेघवननामानमग्रहारं विनिर्ममे ।
मयुष्टग्रामकृत्पुण्यज्येष्ठं मेघमठं तथा ॥ ८ ॥
भोगाय चैष्यभिक्षूणां वल्लभास्यामृतप्रभा ।
विहारमुच्चैरमृतभवनाख्यमकारयत् ॥ ९ ॥
देश्यैकदेशाल्लोर्नाम्नः प्राप्तस्तस्याः पितुर्गुरुः ।
स्तुन्पा तद्भाषया प्रोक्तो लोस्तोन्पास्तूपकार्यकृत् ॥ १० ॥
चक्रे नडवने राज्ञो यूकदेव्यभिधा वधूः ।
विहारमद्भुताकारं सपत्नीस्पर्धयोद्यता ॥ ११ ॥
अर्धं यद्भिक्षवः शिक्षाचारास्तत्रार्पितास्तया ।
अर्धं गार्हस्थ्यगर्ह्याश्च सस्त्रीपुत्रपशुस्त्रियः ॥ १२ ॥
अथेन्द्रदेवीभवनमिन्द्रदेव्यभिधा व्यधात् ।
विहारं सचतुःशालं स्तूपं भूपप्रियापरा ॥ १३ ॥
अन्याभिः खादनामम्माप्रमुखाभिर्निजाख्यया ।
देवीभिस्तस्य महिता विहारा बहवः कृताः ॥ १४ ॥

---

१ लोःस्तुन्पा इति स्यात् । २ शिष्टाचाराः इति स्यात् । ३ पशुश्रियः इति स्यात् ।

अर्वाक्कालोद्भवस्यापि राज्यकालोस्य भूपतेः ।
न्यक्कृतादिनृपोदन्तैर्वृत्तान्तैरद्भुतोभवत् ॥ १५ ॥
स बहिर्विहरञ्जातु भूभृद्भीतैरुदीरितम् ।
चौरश्चौरोयमित्यारादशृणोत्क्रन्दितध्वनिम् ॥ १६ ॥
कः कोत्र बध्यतां चौर इत्युक्ते तेन सक्रुधा ।
शशामाक्रन्दितध्वानो न च चौरो व्यभाव्यत ॥ १७ ॥
पुनर्द्वित्रैर्दिनैस्तस्य निर्गतस्याग्रतस्ततः ।
अभवन्नभयार्थिन्यो द्वित्रा दिव्यप्रभाः स्त्रियः ॥ १८ ॥
ताः संश्रुतेप्सितास्तेन रुद्धाश्वेन कृपालुना ।
अभ्यभाषन्त सीमन्तपुञ्जिताञ्जलयो वचः ॥ १९ ॥
देव दिव्यप्रभावेन भुवने भवता धृते ।
अपरस्माद्भयं जातु कस्य स्यात्करुणानिधे ॥ २० ॥
तदानीं तोयदा भूत्वाच्छादयन्तो नभस्तलम् ।
अकाण्डकरकापातशङ्किभिः कार्षिकैर्मृषा ॥ २१ ॥
पक्वशालिवनस्फीतिरक्षाक्षुभितमानसैः ।
नागास्त्वत्कोपसंरम्भभूमितां गमिताः प्रभो ॥ २२ ॥
तेस्माकं पतयश्चौरश्चौर इत्यार्तभाषितम् ।
श्रुत्वा देवेन बध्यन्तामित्यवादि यदा क्रुधा ॥ २३ ॥
तदा त्वदाज्ञामात्रेण न्यपतन्पाशवेष्टिताः ।
प्रसादः क्रियतां तेषामस्मत्करुणयाधुना ॥ २४ ॥
चक्कलकम् ॥
तदाकर्ण्यावदद्राजा प्रसादविशदाननः ।
सर्वे ते बन्धनान्नागास्त्यज्यन्तामिति सस्मितः ॥ २५ ॥
तया तस्याज्ञया राज्ञो नागा विधुतबन्धनाः ।
प्रणम्य चरणौ तूर्णं प्रययुः सपरिग्रहाः ॥ २६ ॥

अथ ग्राहयितुं भूपानाज्ञां हिंसानिवृत्तये ।
स दिग्जयाय निर्व्याजधर्मचर्यो विनिर्ययौ ॥ २७ ॥
अभूदभीतजनतावेक्षणश्लाघ्यविक्रमः ।
स्पृहणीयो जनस्यापि तदीयविजयोद्यमः ॥ २८ ॥
प्रभावविजितान्कृत्वा सोहिंसादीक्षितान्नृपान् ।
अर्णसां पत्युरभ्यर्णमवापावर्णवर्जितः ॥ २९ ॥
तत्र तालीवनच्छायासुखविश्रान्तसैनिकः ।
युक्तिं द्वीपान्तराक्रान्तौ क्षणमन्तर्व्यचिन्तयत् ॥ ३० ॥
अथ वेलावनोपान्तात्तेनार्ताक्रन्दितध्वनिः ।
मेघवाहनराज्येपि हतोयमिति शुश्रुवे ॥ ३१ ॥
तस्यायःशङ्कुनेवान्तर्व्रणितः स द्रुतं ततः ।
संचारिणातपत्रेण सत्रा तां वसुधामगात् ॥ ३२ ॥
अपश्यदथ केनापि चण्डिकायतनाग्रतः ।
नरं शबरसेनान्या हन्यमानमधोमुखम् ॥ ३३ ॥
अनात्मज्ञ धिगेतत्ते कुकर्मेति महीभुजा ।
तर्जितः स भयादेव शबरस्तं व्यजिज्ञपत् ॥ ३४ ॥
शिशुर्मुमूर्षुर्मे राजन्नयं रोगार्दितः सुतः ।
कर्मैतद्दैवतैरुक्तमस्य श्रेयोलवावहम् ॥ ३५ ॥
उपहारनिरोधेन सद्य एव विपद्यते ।
बन्धुवर्गमशेषं च विद्धेतज्जीवजीवितम् ॥ ३६ ॥
अरण्यगहनालुब्धमनाथं देव रक्षसि ।
बहुलोकाश्रयं बालं कथमेतमुपेक्षसे ॥ ३७ ॥
अथाभ्यधान्महात्मा स वचोभिः शबरस्य तैः ।
वध्यस्य दृष्टिपातैश्च विक्लवैर्विवशीकृतः ॥ ३८ ॥

किरात कातरो मा भूः स्वयं संरक्ष्यते मया ।
बहुबन्धुस्तव सुतो वध्योप्ययमबान्धवः ॥ ३९ ॥
उपहारीकरोम्येष चण्डिकायै स्वविग्रहम् ।
मयि प्रहर निःशङ्कं जीवत्वेतज्जनद्वयम् ॥ ४० ॥
तदद्भुतमहासत्त्वचित्तोदात्तत्वविस्मितः ।
उन्मिषद्रोमहर्षस्तं ततः स शबरोभ्यधात् ॥ ४१ ॥
अतिकारुण्यमिषतस्तवायं पृथिवीपते ।
कश्चिन्मतिविपर्यासप्रकारो हृदि रोहति ॥ ४२ ॥
त्रैलोक्यजीवितेनापि यो रक्ष्यो हेलयैव तम् ।
पृथिवीभोगसुभगं कथं कायमुपेक्षसे ॥ ४३ ॥
न मानं न यशो नार्थान्न दारान्न च बान्धवान् ।
न धर्मं न सुतान्भूपा रक्षन्ति प्राणतृष्णया ॥ ४४ ॥
तत्प्रसीद प्रजानाथ मा वध्येस्मिन्कृपां कृथाः ।
शिशुश्चैष प्रजाश्चैता जीवन्तु त्वयि जीवति ॥ ४५ ॥
उपाजिहीर्षुरात्मानं दन्तद्योतार्घडम्बरैः ।
अर्चयन्निव चामुण्डामथोवाच स पार्थिवः ॥ ४६ ॥
सदाचारसुधास्वादे के भवन्तो वनौकसः ।
जाह्नवीमज्जनप्रीतिं न जानन्ति मरुस्थिताः ॥ ४७ ॥
ध्रुवापायेन कायेन क्रीणतः कीर्तिमव्ययाम् ।
ममाभीष्टं प्रमार्ष्टुं ते मूढ रूढोयमाग्रहः ॥ ४८ ॥
मा वोचः किंचिदपरं प्रहर्तुं चेद्घृणा तव ।
न किं निजः कृपाणो मे शक्तः प्रक्रान्तसिद्धये ॥ ४९ ॥
इत्युक्त्वा स स्वयं देहमुपहर्तुं समुद्यतः ।
खण्डनाय स्वमुण्डस्य विकोशं शस्त्रमादधे ॥ ५० ॥

ततः प्रहर्तुकामस्य तस्य द्युकुसुमैः शिरः ।
करश्च दिव्यवपुषा रुद्धः केनाप्यजायत ॥ ५१ ॥
अथापश्यत्तथाभूतः कंचिद्दिव्याकृतिं पुरः ।
न चण्डिकां न तं वध्यं न किरातं न दारकम् ॥ ५२ ॥
स तं दिव्यस्तदावादीन्मां त्वं सत्त्ववशीकृतम् ।
विद्धि मध्यमलोकेन्दो वरुणं करुणानिधे ॥ ५३ ॥
यदेतत्त्वामुपास्तेद्य च्छत्रं तन्मत्पुरात्पुरा ।
महाबलोहरद्भौमः पुराणश्वशुरस्तव ॥ ५४ ॥
रसातलैकतिलकं माहात्म्यवदिदं विना ।
उपद्रवाः प्राणहराः पौराणां नः पदे पदे ॥ ५५ ॥
तदिदं प्रातुकामेन त्वदौदार्यं परीक्षितुम् ।
कारुण्यमय मायेयं निरमायि मयेदृशी ॥ ५६ ॥
त्वदादिर्यो व्यधाज्जन्तून्व्यसून्वसुकुलात्मजः ।
प्रायश्चित्तममारेण चरसीव तदेनसः ॥ ५७ ॥
भयस्पृहाजनकयोर्धरणीधारणोचिते ।
शेषदेहे विषोद्गारफणारत्नौघयोरिव ॥ ५८ ॥
तमःप्रकाशावहयोस्तेजःक्रान्तदिगन्तरे ।
उषर्बुधे धूमजालज्वालापल्लवयोरिव ॥ ५९ ॥
क्रमाप्यायक्रियाभाजो रुद्धतेजस्विमण्डले ।
प्रावृट्क्षयोदच्छन्नेह्नि संतापासारयोरिव ॥ ६० ॥
द्वयोरालोकितं चित्रं जन्मैकस्मिन्महाकुले ।
तस्य त्रिकोटिहन्तुश्च तवाहिंसस्य च प्रभोः ॥ ६१ ॥

चक्कलकम् ॥

नम्रः सम्राडथैवं स वदतो यादसां प्रभोः ।
चकार पूजां स्तोत्रेण च्छत्रेण च कृताञ्जलिः ॥ ६२ ॥

तं च स प्रतिगृह्णन्तं प्रणयादुष्णवारणम् ।
जगाद गुणिनामग्र्यो वरुणं धरणीधवः ॥ ६३ ॥
कल्पद्रुमाश्च सन्तश्च नार्हन्ति समशीर्षिकाम् ।
अर्थिनां प्रार्थिताः पूर्वं फलन्त्यन्ये स्वयं यतः ॥ ६४ ॥
अवालम्बिष्यत च्छत्रं कथं नः पुण्यपण्यताम् ।
तत्प्रार्थयिष्यत न चेदार्तोपकृतये भवान् ॥ ६५ ॥
वदन्यः संविभागेभ्यः पूर्णं कुर्यादनुग्रहम् ।
छायया प्याययन्द्द्यात्फलान्यपि महीरुहः ॥ ६६ ॥
तदेवं विहितोदात्तसंविभागाभिचोदितः ।
जनोयं भगवन्किंचिद्वरं प्रार्थयतेपरम् ॥ ६७ ॥
वशीकृतेयं पृथिवी कृत्स्ना भवदनुग्रहात् ।
जेतुं द्वीपान्कथ्यतां तु युक्तिः पाथोधिलङ्घने ॥ ६८ ॥
इत्यर्थ्यमानोकथयद्भूमिपालं जलेश्वरः ।
तितीर्षौ भवति स्तम्भं नीयतेम्भो मयाम्बुधेः ॥ ६९ ॥
ततो महान्प्रसादोयमित्युक्ते पृथिवीभुजा ।
तिरो बभूव भगवान्वरुणः सोष्णवारणः ॥ ७० ॥
अन्येद्युर्विस्मयस्मेरैर्बलैः सीमन्तयञ्जलम् ।
प्रभावस्तम्भितक्षोभं प्रोत्ततार स वारिधिम् ॥ ७१ ॥
गुणरत्नाकरः शैलं स रत्नाकरशेखरम् ।
नानारत्नाकरं सैन्यैरारुरोहाथ रोहणम् ॥ ७२ ॥
तत्र तालीतरुवनच्छायाध्यासितसैनिकम् ।
प्रीत्या लङ्काधिराजस्तमुपतस्थे विभीषणः ॥ ७३ ॥
समागमः स शुशुभे नरराक्षसराजयोः ।
वन्दिनादाश्रुतान्योन्यप्रथमालापसंभ्रमः ॥ ७४

अथ रक्षःपतिर्लङ्कां नीत्वालंकरणं क्षितेः ।
अमर्त्यसुलभाभिस्तं विभूतिभिरुपाचरत् ॥ ७५ ॥
यदासीत्पिशिताशा इत्यन्वर्थं नाम रक्षसाम् ।
तदा तदाज्ञाग्रहणे प्रापि[1] तद्रूढिशब्दताम् ॥ ७६ ॥
रक्षःशिरःप्रतिच्छन्दैः स्थिरप्रणतिसूचकैः ।
सनाथशिखरान्प्रादात्तस्मै रक्षःपतिर्ध्वजान् ॥ ७७ ॥
पाराद्वारिनिधेः प्राप्ताः कश्मीरेष्वधुनापि ये ।
राज्ञां यात्रासु निर्यान्ति ख्याताः पारध्वजाः पुरः ॥ ७८ ॥
इत्थमा राक्षसकुलं प्राणिहिंसां निषिध्य सः ।
स्वमण्डलं प्रति कृती न्यवर्तत नराधिपः ॥ ७९ ॥
ततःप्रभृति तस्याज्ञा सार्वभौमस्य भूपतेः ।
हिंसाविरतिरूपा सा न कैश्चिदुदलङ्घयत ॥ ८० ॥
क्षुद्रैरुद्रादिभिर्नाप्सु सिंहाद्यैर्गहने न च ।
न श्येनप्रमुखैर्व्योम्नि तद्राज्ये जन्तवो हताः ॥ ८१ ॥
अतिक्रामति कालेथ कोपि शोकाकुलो द्विजः ।
पुत्रं गदार्तमादाय द्वारि चक्रन्द भूपतेः ॥ ८२ ॥
दुर्गया प्रार्थितं राजन्पश्वाहारं विनैष मे ।
अनन्यसंततेः सूनुर्ज्वरेणाद्य विपद्यते ॥ ८३ ॥
यद्यहिंसाग्रहेणेमं क्षितिपाल न रक्षसि ।
एतद्विपत्तौ तत्कोन्यो निमित्तं प्रतिभाति मे ॥ ८४ ॥
निर्णयो वर्णगुरुणा त्वयैवैष प्रदीयताम् ।
ब्राह्मणस्य पशोर्वा स्यात्प्राणानां कियदन्तरम् ॥ ८५ ॥
तपःस्थानपि ये जघ्नुर्ब्राह्मणप्राणलब्धये ।
हा मातस्तेधुना भूमे प्रजापालास्तिरोहिताः ॥ ८६ ॥

---

१ प्राप इत्युचितम् ।

इति ब्रुवति साक्षेपं शोकरूक्षाक्षरं द्विजे ।
आपन्नार्तिहरो राजा चिरमेवं व्यचिन्तयत् ॥ ८७ ॥
न वध्याः प्राणिन इति प्राज्ञया समयः कृतः ।
विप्रार्थमपि किं कुर्यां स प्रतिज्ञातविप्लवम् ॥ ८८ ॥
निमित्तीकृत्य मामद्य विपद्येत द्विजो यदि ।
तत्राप्यत्यन्तपापीयानर्थः संकल्पविप्लवः ॥ ८९ ॥
नैति मे संशयभ्रान्तमेकपक्षावलम्बनम् ।
संभेदावर्तपतितं प्रसूनमिव मानसम् ॥ ९० ॥
तत्स्वदेहोपहारेण दुर्गां तोषयता मया ।
प्रतिज्ञया समं न्याय्यं रक्षितुं जीवितं द्वयोः ॥ ९१ ॥
इति संचिन्त्य सुचिरं देहदानोद्यतो नृपः ।
श्वः प्रियं तव कर्तास्मीत्युक्त्वा विप्रं व्यसर्जयत् ॥ ९२ ॥
क्षपायां क्षमापतिमथ स्वमुपाहर्तुमुद्यतम् ।
निषिध्य दुर्गा व्यधित प्रकृतिस्थं द्विजन्मजम् ॥ ९३ ॥
इत्याद्यद्यतनस्यापि चरितं तस्य भूपतेः ।
पृथग्जनेष्वसंभाव्यं वर्णयन्तस्त्रपामहे ॥ ९४ ॥
अथवा रचनानिर्विशेषमार्षेण वर्त्मना ।
प्रस्थिता नानुरुन्धन्ति श्रोतृचित्तानुवर्तनम् ॥ ९५ ॥
तस्मिन्नस्तं गते भुक्त्वा क्ष्मां चतुस्त्रिंशतं समाः ।
अनादित्यमिवाशेषं निरालोकमभूज्जगत् ॥ ९६ ॥
अथ क्षमाभृद्रक्ष क्षमां श्रेष्ठसेनस्तदात्मजः ।
प्राहुः प्रवरसेनं यं तुङ्गीनं चाञ्जसा जनाः ॥ ९७ ॥
दोःस्तम्भसंभृतासक्तौ कृपाणमणिदर्पणे ।
संक्रान्तेवोन्मुखी यस्य भुवनश्रीर्व्यभाव्यत ॥ ९८ ॥

समातृचक्रं निर्माय यः पूर्वं प्रवरेश्वरम् ।
पुण्याः पुराणाधिष्ठाने प्रतिष्ठा विविधा व्यधात् ॥ ९९ ॥
गृहाङ्गनमिव क्षोणीं गणयन्वशवर्तिनीम् ।
त्रिगर्तोर्वीं ग्रामसख्ये प्रवरेशाय यो ददौ ॥ १०० ॥
ईशो नृपाणां निःशेषक्ष्माकेदारकुटुम्बिनाम् ।
स समाखिशतं भूभृदनिखिशाशयोभवत् ॥ १०१ ॥
हिरण्यतोरमाणाख्यौ व्यधत्तामथ तत्सुतौ ।
साम्राज्ययुवराजत्वभाजने रञ्जनं क्षितेः ॥ १०२ ॥
बालाहतानां[1] प्राचुर्यं विनिवार्यासमञ्जसम् ।
तोरमाणेन दीन्नाराः स्वाहताः संप्रवर्तिताः ॥ १०३ ॥
मामवज्ञाय राज्ञेव कस्मादेतेन वलिगतम् ।
इति तं पूर्वजो राजा क्रोधनो बन्धने व्यधात् ॥ १०४ ॥
चिरं स्थितित्यक्तशुचस्तत्र तस्याञ्जनाभिधा ।
ऐक्ष्वाकस्यात्मजा राज्ञी वज्रेन्द्रस्यास्त गुर्विणी ॥ १०५ ॥
आसन्नप्रसवा भर्त्रा सा त्रपार्तेन बोधिता ।
सुतं प्रविष्टा प्रासोष्ट कुलालनिलये क्वचित् ॥ १०६ ॥
स कुम्भकारगेहिन्या काक्येव पिकशावकः ।
पुत्रीकृतो राजपुत्रः पर्याप्तं पर्यवर्धत ॥ १०७ ॥
जनयित्र्याः कुलाल्याश्च रक्षित्र्या विदितोभवत् ।
रत्नसूतेर्भुजंग्याश्च प्रच्छन्न इव शेवधिः ॥ १०८ ॥
पौत्रः प्रवरसेनस्य गिरा मातुर्नृपात्मजः ।
पैतामहेन नाम्नैव कुलाल्या ख्यापितोभवत् ॥ १०९ ॥
वर्धमानः स संपर्कं न सेहे सहवासिनाम् ।
तेजस्विमैत्रीरसिकः शिशुः पद्म इवाम्भसाम् ॥ ११० ॥

---

१ भ्रात्राहतानां इति स्यात् ।

तं कुलीनैश्च शूरैश्च विद्याविद्भिश्च दारकैः ।
अन्वीतमेव ददृशुः क्रीडन्तं विस्मयाज्जनाः ॥ १११ ॥
स्ववृन्दस्यात्युदारौजा राजा चक्रे स दारकैः ।
मृगेन्द्रशावः क्रीडद्भिर्वने बालमृगैरिव ॥ ११२ ॥
संविभेजेनुजग्राह वशीचक्रे च सोर्भकान् ।
अराजोचितमाचारं नैव कंचिदसेवत ॥ ११३ ॥
भाण्डादि कर्तुं मृत्पिण्डं कुम्भकारैः समर्पितम् ।
स्वीकृत्य चक्रिरे तेन शिवलिङ्गपरम्पराः ॥ ११४ ॥
तथा साश्चर्यचर्यः स क्रीडञ्जातु व्यलोक्यत ।
मातुलेन जयेन्द्रेण सादरं चाभ्यनन्द्यत ॥ ११५ ॥
आवेद्यमानं शिशुभिस्तं जयेन्द्रोयमित्यसौ ।
भूपालवत्सावहेलं पश्यन्नन्वग्रहीदिव ॥ ११६ ॥
संभाव्य सत्त्वावष्टम्भात्तमसामान्यवंशजम् ।
सादृश्याद्भगिनीभर्तुर्भागिनेयमशङ्कत ॥ ११७ ॥
सत्वरस्तत्त्वजिज्ञासारसेनानुससार तम् ।
प्राप्तस्तद्गृहमौत्सुक्यात्स्वसारं च व्यलोकयत् ॥ ११८ ॥
सा स चान्योन्यमुन्मन्यू पश्यन्तौ भ्रातरौ चिरात् ।
निःश्वासद्विगुणोष्माणि मुहुरश्रूण्यमुञ्चताम् ॥ ११९ ॥
कुलाल्या दारको मातः कावेताविति पृष्टवान् ।
अकथ्यतेत्थं वत्सैषा मातायं मातुलश्च ते ॥ १२० ॥
पितुर्बन्धेन सक्रोधं तं कालापेक्षयाक्षमम् ।
शिक्षयित्वा जयेन्द्रोथ कार्यशेषाय निर्ययौ ॥ १२१ ॥
उत्पिञ्जोत्पादनात् सज्जे तस्मिन्भ्रात्रा यदृच्छया ।
बन्धात्त्यक्तो नृतरणिस्तोरमाणोस्तमाययौ ॥ १२२ ॥

निवार्य मरणोद्योगं मातुर्निर्वेदखेदितः ।
ययौ प्रवरसेनोथ तीर्थौत्सुक्याद्दिगन्तरम् ॥ १२३ ॥
रक्षित्वा दशमासोनाः क्ष्मामेकत्रिंशतिं समाः ।
तस्मिन्क्षणे हिरण्योपि शान्तिं निःसंततिर्ययौ ॥ १२४ ॥
तत्रानेहस्युज्जयिन्यां श्रीमान्हर्षापराभिधः ।
एकच्छत्रश्चक्रवर्ती विक्रमादित्य इत्यभूत् ॥ १२५ ॥
भूपमद्भुतसौभाग्यं श्रीर्बद्धरभसाभजत् ।
विहाय हरिबाहूंश्च चतुरः सागरांश्च यम् ॥ १२६ ॥
लक्ष्मीं कृत्वोपकरणं गुणे येन प्रवर्धिते ।
श्रीमत्सु गुणिनोद्यापि तिष्ठन्त्युद्धुरकंधराः ॥ १२७ ॥
म्लेच्छोच्छेदाय वसुधां हरेरवतरिष्यतः ।
शकान्विनाश्य येनादौ कार्यभारो लघूकृतः ॥ १२८ ॥
नानादिगन्तराख्यातं गुणवत्सुलभं नृपम् ।
तं कविर्मातृगुप्ताख्यः सर्वास्थानस्थमासदत् ॥ १२९ ॥
स गम्भीरस्य भूभर्तुरनुभावं महाद्भुतम् ।
विविधास्थानसंवृद्धस्तस्याभ्यूह्य व्यचिन्तयत् ॥ १३० ॥
सोयमासादितः पुण्यैः क्षोणिपालो गुणिप्रियः ।
परभागोपलम्भाय पूर्वेमुष्य महीभुजः ॥ १३१ ॥
यस्मिन्राजनि तत्त्वज्ञैः सूरिभिः संभृतश्रुतैः ।
नाञ्जलिर्दीयते जातु मानाय च गुणाय च ॥ १३२ ॥
भङ्ग्यामुष्मिन्विदधती स्वाभिप्रायप्रकाशनम् ।
वैदग्ध्यबन्ध्यतां नैति बुद्धिः कुलवधूरिव ॥ १३३ ॥
खिलीकृतखलालापे युक्तायुक्तविवेक्तरि ।
नायाति सेव्यमानेस्मिन्स्वगुणोनर्थकारिताम् ॥ १३४ ॥

अनाप्नुवद्भिः सावद्यदुर्विद्यसमशीर्षिकाम् ।
जीवन्मरणमस्याग्रे गुणिभिर्नानुभूयते ॥ १३५ ॥
संभावनानुसारेण प्रवृत्तोस्माद्विवेकिनः ।
शोच्यते नाञ्चितोच्छ्वासं प्रीतिदायो महाशयैः ॥ १३६ ॥
गृह्णन्यथागुणं स्वान्तमुचितप्रतिपत्तिभिः ।
अन्तरङ्गः समस्तानामयमुत्साहवर्धनः ॥ १३७ ॥
सेवया दृष्टकष्टस्य दाक्षिण्योत्पादने श्रमः ।
अस्य यो न स भृत्यानां हिमाद्रौ हिमविक्रयः ॥ १३८ ॥
मिथ्याख्यातगुणो नाम्नो नामात्यः कलहप्रियः ।
असत्यसंधः स्थेयो वा नास्थानेस्य महीपतेः ॥ १३९ ॥
अश्लीलालापिनोन्योन्यं नर्मोक्त्या मर्मभेदिनः ।
अन्यप्रवेशासहनाः संहता नास्य सेवकाः ॥ १४० ॥
छन्दानुवर्तिनामेष निजविज्ञानबन्दिनाम् ।
सर्वज्ञंमन्यतान्धानां मुखप्रेक्षी न पार्थिवः ॥ १४१ ॥
अनेन सह संजातः संलापो विपुलोदयः ।
लभ्यते नान्तरा छेत्तुं दुर्जातैर्जातु दुर्जनैः ॥ १४२ ॥
सर्वदोषोज्झितं सेव्यं नृपमेवमिमं मम ।
समासादयतः पुण्यैरदूरे स्वार्थसिद्धयः ॥ १४३ ॥
गम्भीरश्च गुणज्ञश्च स्थिरबुद्धिश्च पार्थिवः ।
एष क्लेशभयं त्यक्त्वा निषेव्यः प्रतिभाति मे ॥ १४४ ॥
न चास्माद्धनमादाय रञ्जितादन्यराजवत् ।
भ्राम्यतो भूतलेमुष्मिन्सेव्योन्यः प्रतिभाति मे ॥ १४५ ॥
इति संचिन्त्य सुदृढं स नवामिव तां सभाम् ।
नारञ्जयन्न चास्ते स्म गुणिगोष्ठीषु मध्यगः ॥ १४६ ॥

मृदुपूर्वं गुणानेव दर्शयन्तं विशां पतिः ।
विशिष्टयोग्यताज्ञस्यै विवेदाराधनोन्मुखम् ॥ १४७ ॥
अचिन्तयच्च नायं स्याद्गुणिमात्रं महाशयः ।
उदात्तं सत्क्रियार्हत्वं वदत्यस्य गभीरता ॥ १४८ ॥
इति संचिन्त्य राज्ञापि ज्ञातुं तस्यान्तरं मतेः ।
नाक्रियन्त परीक्षार्थं यथावल्लाभसत्क्रियाः ॥ १४९ ॥
स तेनानुपचारेण तमुदात्ताशयं नृपम् ।
स्वीकर्तारं विदन्धीमान्सिषेवे प्रीतिमाश्रितः ॥ १५० ॥
क्रमोपचीयमानेन सेवाभ्यासेन धीमतः ।
तस्य नोद्वेगमगमत्स्वकाय इव पार्थिवः ॥ १५१ ॥
नातीव स्वल्पया स्थित्या नातीवाप्यथ दीर्घया ।
शरन्निशाक्षणेनेव राजा निन्ये प्रसन्नताम् ॥ १५२ ॥
नर्मभिर्गर्भचेटानां द्वाःस्थानां विक्रियाक्रमैः ।
मिथ्यास्तवैर्विटानां च न स क्षोभमनीयत ॥ १५३ ॥
प्रसन्नालापसंप्राप्तौ छायाग्रह इवाचलः ।
प्रतिस्पर्धीव च क्रुध्यन्नावज्ञायामभूत्प्रभोः ॥ १५४ ॥
वीक्षणं राजदासीनां राजद्विष्टैः सहासनम् ।
राजाग्रे च कथां नीचैः कालविन्नाचचार सः ॥ १५५ ॥
स्वभावाद्राजपुरुषैः सजनै राजनिन्दकैः ।
नास्मात्प्रभोरुपालम्भो लेभे पैशुन्यजीविभिः ॥ १५६ ॥
वदद्भिरादरात्स्थैर्यं वैफल्याद्यन्वहं प्रभोः ।
निन्ये नोत्साहशैथिल्यं सेवोत्साहासहिष्णुभिः ॥ १५७ ॥
अन्योत्कर्षानपि वदन्प्रसङ्गेन निराग्रहः ।
स्वविद्याद्योतकः सोभूत्सभ्यानां हृदयंगमः ॥ १५८ ॥

एवं स सेवमानस्तमुद्योगेन बलीयसा ।
अनिर्विण्णो मातृगुप्तः षड्तूनत्यवाहयत् ॥ १५९ ॥
अथ तं कृशसर्वाङ्गं धूसरं जीर्णवाससम् ।
बहिर्जातु विनिर्यातो राजा वीक्ष्य व्यचिन्तयत् ॥ १६० ॥
वैदेशिको निःशरणो गुणवान्बान्धवोज्झितः ।
दार्ढ्यं जिज्ञासुना कष्टं सोयमायासितो मया ॥ १६१ ॥
कोस्याश्रयः किमशनं कानि प्रावरणानि वा ।
इत्यैश्वर्यविमूढेन मया हन्त न चिन्तितम् ॥ १६२ ॥
वसन्तेनेव न मया शोभयाद्यापि योजितः ।
शीतवातातपैः शुष्यन्सोयं पुरुषपादपः ॥ १६३ ॥
अस्य ग्लानस्य भैषज्यं निर्विण्णस्य विनोदनम् ।
श्रान्तस्य वा क्रमच्छेदं को विदध्यादसंपदः ॥ १६४ ॥
नास्मै चिन्तामणिं दद्यां नामृतं वा निषेवितः ।
मया यदयमेतावद्यामूढेन परीक्ष्यते ॥ १६५ ॥
तदमुष्य गुणित्वस्य तीव्रसेवाश्रमस्य च ।
प्रतिपत्त्या कतमया तावदानृण्यमाप्नुयाम् ॥ १६६ ॥
इति चिन्तयतस्तस्य राज्ञस्तं सेवकं प्रति ।
स्वप्रसादोचिता काचित्प्रत्यभान्नैव सत्क्रिया ॥ १६७ ॥
ततः प्रावर्तत स्फारनीहारलववाहिभिः ।
दहन्निवाङ्गं प्रालेयपवमानैर्हिमागमः ॥ १६८ ॥
संततध्वान्तमिषतस्तीव्रशीतवशीकृताः ।
आशाश्चकाशिरे नीलनिचोलाच्छादिता इव ॥ १६९ ॥
शीतार्त्या द्युमणावौर्वदहनोष्माभिलाषतः ।
द्रुतं यातीव जलधिं दिनानि लघुतां ययुः ॥ १७० ॥

अथ दीपोज्ज्वले धाम्नि लसद्दीप्तहसन्तिके ।
कदाचिन्नृपतिर्दैवादर्धरात्रे व्यबुध्यत ॥ १७१ ॥
स हेमन्तानिलैर्भूरिभांकारपरुषैः पुरः ।
दीपान्प्रकम्पितानीषत्प्रविष्टैर्धाम्नि दृष्टवान् ॥ १७२ ॥
तानुज्ज्वलयितुं भृत्यानन्विष्यन्नभ्यधात्ततः ।
यामिकेषु बहिः सज्जः को वर्तत इति स्फुटम् ॥ १७३ ॥
सुखसुप्तेषु सर्वेषु बाह्यकक्ष्यान्तरात्तलः ।
राजन्नयमहं मातृगुप्त इत्यशृणोद्वचः ॥ १७४ ॥
प्रविशेति स्वयं राज्ञा दत्तानुज्ञस्ततो गृहम् ।
लक्ष्मीसांनिध्यरम्यं तददृष्टोन्यैर्विवेश सः ॥ १७५ ॥
दीपानुज्ज्वलयेत्युक्तो निष्पाद्य चतुरैः पदैः ।
बहिर्यियासुरूचेथ क्षणं तिष्ठेति भूभुजा ॥ १७६ ॥
स भयद्विगुणीभूतशीतकम्पः प्रभोः पुरः ।
किंस्विद्भक्तीति विमृषन्नातिदूरेभ्युपाविशत् ॥ १७७ ॥
अथ पप्रच्छ भूपालः कियत्यस्ति निशेति तम् ।
सोभ्यधाद्देव यामिन्या यामः सार्धोवशिष्यते ॥ १७८ ॥
ततो भूभृदुवाचैनं कथं सम्यङ्निशाक्षणः ।
त्वयावधारितो निद्रा कथं नाभूच्च ते निशि ॥ १७९ ॥
अथ कृत्वा क्षणाच्छ्लोकमेतं तं स व्यजिज्ञपत् ।
अवस्थावेदनादाशां दैन्यं वा त्यक्तुमुद्यतः ॥ १८० ॥
शीतेनोद्धृषितस्य माषशिमिवच्चिन्तार्णवे मज्जतः
शान्ताग्निं स्फुटिताधरस्य धमतः क्षुत्क्षामकण्ठस्य मे ।
निद्रा क्काप्यवमानितेव दयिता संत्यज्य दूरं गता
सत्पात्रप्रतिपादितेव वसुधा न क्षीयते शर्वरी ॥ १८१ ॥

तदाकर्ण्य महीपालः साधुवादैः परिश्रमम् ।
अभिनन्द्य कवीन्द्रं तं पूर्वस्थानं व्यसर्जयत् ॥ १८२ ॥
अचिन्तयच्च धिङ्मां यः सगुणात्खिन्नचेतसः ।
दुःखोत्तप्तं वचः शृण्वन्नेवमेवाधुना स्थितः ॥ १८३ ॥
निरर्थकान्साधुवादानन्यस्येव विदन्मम ।
अयमज्ञातहृदयो दुःखमास्ते ध्रुवं बहिः ॥ १८४ ॥
चिरं चिन्तयतो यत्नात्सदृशीमस्य सत्क्रियाम् ।
देयं महार्हमद्यापि न किंचित्प्रतिभाति मे ॥ १८५ ॥
अथवास्यैव सूक्तेन स्मारितोस्म्यधुना यथा ।
वर्तते राजरहितं काम्यं कश्मीरमण्डलम् ॥ १८६ ॥
पात्रायास्मै मही तस्मात्सा मया प्रतिपाद्यते ।
अवधीर्य महीपालान्महतोप्यर्थनापरान् ॥ १८७ ॥
इति निश्चित्य चतुरं क्षपायामेव पार्थिवः ।
गूढं व्यसर्जयद्दूतान्काश्मीरीः प्रकृतीः प्रति ॥ १८८ ॥
आदिदेश च तान्यो वो दर्शयेच्छासनं मम ।
मातृगुप्ताभिधो राज्ये निःशङ्कं सोभिषिच्यताम् ॥ १८९ ॥
अथ दूतेषु यातेषु लेखयित्वा स्वशासनम् ।
क्षमापतिस्तं क्षपाशेषं कृतकृत्योत्यवाहयत् ॥ १९० ॥
मातृगुप्तस्तु नृपतेः संलापमपि निष्फलम् ।
ध्यायन्गृहीतनैराश्यस्त्यक्तभार इवाभवत् ॥ १९१ ॥
अन्तर्दध्यौ च कर्तव्यं कृतं शान्तोद्य संशयः ।
आशापिशाचिकात्यक्तश्चरिष्याम्यधुना सुखम् ॥ १९२ ॥
गतानुगतिकत्वेन कोयमासीन्मम भ्रमः ।
जनप्रवादात्सेव्यत्वं येनास्य ज्ञातवानहम् ॥ १९३ ॥

भुञ्जानाः पवनं सरीसृपगणाः प्रख्यापिता भोगिनो
गायद्भृङ्गनिवारका निगदिता विस्तीर्णकर्णा गजाः ।
यश्चाभ्यन्तरसंभृतोष्मविकृतिः प्रोक्तः शमी स द्रुमो
लोकेनेति निरर्गलं प्रलपता सर्वं विपर्यासितम् ॥ १९४ ॥
अथवा विद्यतेमुष्य न काप्यनभिगम्यता ।
लक्ष्मीप्रणयिनो येन कृताः प्रणयिनां गृहाः ॥ १९५ ॥
त्यागिनो निष्कलङ्कस्य को दोषोस्य महीपतेः ।
ममापुण्यं तु तन्निन्द्यं यच्छ्रेयःप्रतिबन्धकम् ॥ १९६ ॥
रत्नोज्ज्वलाः प्रविकिरंल्लहरीः समीरै-
रब्धिः क्रियेत यदि रुद्धतटाभिमुख्यः ।
दोषोर्थिनः स खलु भाग्यविपर्ययाणां
दातुर्मनागपि न तस्य तु दातृतायाः ॥ १९७ ॥
उत्तानफललुब्धानां वरं राजोपजीविनः ।
न तु तत्स्वामिनस्तीव्रपरिक्लेशैः फलन्ति ये ॥ १९८ ॥
तिष्ठन्ति ये पशुपतेः किल पादमूले
संप्राप्यते झटिति तैर्नहि भस्मनोन्यत् ।
ये तद्वृषस्य तु समुज्ज्वलजातरूप-
प्राप्त्या न कानि सुदिनानि सदैव तेषाम् ॥ १९९ ॥
चिन्तयन्नपि पश्यामि न कंचिद्दोषमात्मनः ।
यातो विरक्तिं यं ज्ञात्वा सेव्यमानोप्ययं नृपः ॥ २०० ॥
अथवा नादृतोन्येन संप्राप्तोन्तिकमाप्नुयात् ।
कः फलेनाभिसंबन्धं गतानुगतिकात्प्रभोः ॥ २०१ ॥
अन्तर्ये सततं लुठन्त्यगणितास्तानेव पाथोधरै-
रात्तानापततस्तरङ्गवलयैरालिङ्ग्य गृह्णन्नसौ ।

व्यक्तं मौक्तिकरत्नतां जलकणान्संप्रापयत्यम्बुधिः
प्रायोन्येन कृतादरो लघुरपि प्राप्तोर्च्यते स्वामिभिः ॥ २०२ ॥
इदं संचिन्तयन्सोभूत्सेव्ये तस्मिन्निरादरः ।
खिन्नस्य हि विपर्येति तत्त्वज्ञस्यापि शेमुषी ॥ २०३ ॥
प्रभातायां विभावर्यामथास्थानस्थितो नृपः ।
आकार्यतां मातृगुप्त इति क्षत्तारमादिशत् ॥ २०४ ॥
ततः प्रधावितानेकप्रतीहारप्रवेशितः ।
प्रविवेश महीभर्तुस्त्यक्ताश इव सोन्तिकम् ॥ २०५ ॥
तस्मै कृतप्रणामाय मुहूर्तादेव पार्थिवः ।
भ्रूसंज्ञितेन व्यतरल्लेखं लेखाधिकारिणा ॥ २०६ ॥
स्वयं च तमुवाचाङ्ग कश्मीरान्वेत्ति किं भवान् ।
गत्वा तत्राधिकारिभ्य एतच्छासनमर्प्यताम् ॥ २०७ ॥
स शापितोस्मद्देहेन यो लेखं वाचयेत्पथि ।
संविदेषा प्रयत्नेन विस्मर्तव्या न जातुचित् ॥ २०८ ॥
अविज्ञाताशयो राज्ञस्तामाज्ञां क्लेशशङ्कितः ।
सोबुद्ध दहनज्वालां न तु रत्नाङ्कुरद्युतिम् ॥ २०९ ॥
यथादेशस्तथेत्युक्त्वा मातृगुप्ते विनिर्गते ।
निर्गर्वः पूर्ववद्राजा तस्थावाप्तैः सहालपन् ॥ २१० ॥
अथाक्लेशोचितं क्षाममपाथेयमबान्धवम् ।
दृष्ट्वा यान्तं मातृगुप्तं निनिन्देति नृपं जनः ॥ २११ ॥
अहो नरेश्वरस्येयं यत्किंचनविधायिता ।
पृथग्जनोचिते कर्मण्यर्हतो निदधाति यः ॥ २१२ ॥
दुराशया धृतक्लेशं सेवमानमहर्निशम् ।
ध्रुवं क्लेशार्हमेवैनं ज्ञातवानबुधो नृपः ॥ २१३ ॥

उपायं [1]तं पुरस्कृत्य सेवते सेवकः प्रभुम् ।
अनन्तरज्ञस्तत्रैव योग्यं तं किल मन्यते ॥ २१४ ॥
सुखार्थी नागारिप्रतिभयशमात्प्रत्युत सुखं
जहौ शेषस्तल्पीकृततनु निषेव्यासुररिपुम् ।
यतस्तेनामुष्मिन्नधिगतवता क्लेशसहतां
श्रमादायि न्यस्तं निरवधि धराभारवहनम् ॥ २१५ ॥
अयमेतद्गृहीतेषु गुणवत्सु गुणाधिकम् ।
आत्मानं गुणवान्पश्यन्नास्थयैनमशिश्रियत् ॥ २१६ ॥
अनन्तरज्ञः कोन्योस्माद्गुणान्दर्शयतेधिकान् ।
अस्मै गुणवते पूजां यश्चकार किलेदृशीम् ॥ २१७ ॥
यो नानाद्युतिमत्पदार्थरसिकोसारेपि शक्रायुधे
सप्रेमा स विलोक्य बर्हमिह मे किं किं न कुर्यात्प्रियम् ।
इत्याविष्कृतबर्हराजि नटते यो बर्हिणेम्भोलवा-
न्नान्यन्मुञ्चति तं विहाय जलदं कोन्योस्ति शून्याशयः ॥ २१८ ॥
गच्छतो मातृगुप्तस्य निर्दैन्यस्यैव वर्त्मसु ।
नाभूद्भाव्यर्थमाहात्म्याद्विकल्पः कोपि चेतसि ॥ २१९ ॥
अहंपूर्विकयोद्यद्भिर्निमित्तैः शुभशंसिभिः ।
स वितीर्णकरालम्ब इव न श्रममाददे ॥ २२० ॥
अपश्यत्स फणाकोटौ खञ्जरीटमहेः पथि ।
स्वप्ने प्रासादमारुह्य स्वं चोल्लङ्घितसागरम् ॥ २२१ ॥
अचिन्तयच्च शास्त्रज्ञो निमित्तैः शुभशंसिभिः ।
एतैर्भूभर्तुरादेशो ध्रुवं मे स्याच्छुभावहः ॥ २२२ ॥
फलं मम तनीयोपि कश्मीरेषु भवेद्यदि ।
अनर्घदेशमाहात्म्यात्किं किं नातिशयेत तत् ॥ २२३ ॥

---

१ यं इत्युचितम् ।

अकृच्छ्रलङ्घ्याः पन्थानो वल्लभातिथयो गृहाः।
उपानमन्गच्छतोस्य सत्क्रियाश्च पदे पदे ॥ २२४ ॥
इत्थं विलङ्घिताध्वा स लोलानौकहशाद्वलम्।
मङ्गल्यदधिपात्राभं ददर्शाग्रे हिमाचलम् ॥ २२५ ॥
सरलस्यन्दसुभगा गङ्गाशीकरवाहिनः।
प्रत्युद्ययुस्तं मरुतः पाल्यायाः संस्तुता भुवः ॥ २२६ ॥
क्रमवर्ताभिधाने स प्रदेशे प्राप्तवांस्ततः।
ढक्कं काम्बुवनामानं योद्य शूरपुरे स्थितः ॥ २२७ ॥
नानाजनपदाकीर्णे स्थाने तत्राथ शुश्रुवान्।
काश्मीरिकान्महामात्यान्स्थितान्केनापि हेतुना ॥ २२८ ॥
ततोपनीतप्राग्वेषः प्रावृतो धवलांशुकैः।
स जगामान्तिकं तेषां दातुं नृपतिशासनम् ॥ २२९ ॥
तं प्रयान्तं समुद्यद्भिः शकुनैः सूचितोदयम्।
पान्थाः ेप्यन्वयुर्द्रष्टुं निमित्तानां फलोद्गमम् ॥ २३० ॥
श्रुत्वाथ विक्रमादित्यदूतः प्राप्त इति द्रुतम्।
द्वाःस्थाः काश्मीरमन्त्रिभ्यस्तमासन्नं न्यवेदयन् ॥ २३१ ॥
आगच्छत प्रविशतेत्युच्यमानोथ सर्वतः।
स तान्समस्तसामन्तानाससादानिवारितः ॥ २३२ ॥
यथाप्रधानं सचिवैर्विहितोचितसत्क्रियः।
ततः परार्ध्यमध्यास्त तन्निदर्शितमासनम् ॥ २३३ ॥
कृतार्हणैरथामात्यैराज्ञां पृष्टो महीभुजः।
शनैस्तच्छासनं तेभ्यो लज्जमान इवार्पिपत् ॥ २३४ ॥
तेभिवन्द्य प्रभोर्लेखमुपांशु मिलितास्ततः।
उन्मुच्य वाचयित्वैतमवोचन्विनयानताः ॥ २३५ ॥

मातृगुप्त इति श्लाघ्यं भवतामेव नाम किम् ।
एवमेवैतदित्यूचे सोपि तान्विहितस्मितः ॥ २३६ ॥
कः कोत्र संनिधातृणामित्यश्रूयत वाक्ततः ।
राज्याभिषेकसंभारो दृश्यते स्म च संभृतः ॥ २३७ ॥
ततः कलकलोत्तालभूरिलोकसमाकुलः ।
प्रदेशः क्षणमात्रेण सोभूत्क्षुभ्यन्निवार्णवः ॥ २३८ ॥
अथ प्राङ्मुखसौवर्णभद्रपीठप्रतिष्ठितः ।
संनिपत्य प्रकृतिभिर्मातृगुप्तोभ्यषिच्यत ॥ २३९ ॥
तस्य विन्ध्यतटव्यूढवक्षसः परिनिर्लुठत् ।
सशब्दमभिषेकाम्बु रेवास्रोत इवाबभौ ॥ २४० ॥
अथ स्नातानुलिप्ताङ्गं सर्वाङ्गामुक्तभूषणम् ।
व्यजिज्ञपंस्तं राजानं क्रान्तराजासनं प्रजाः ॥ २४१ ॥
अर्थितेन स्वयं त्रातुं विक्रमादित्यभूभुजा ।
निर्दिष्टः स्वसमानस्त्वं शाधि नः पृथिवीमिमाम् ॥ २४२ ॥
मण्डलानि विलभ्यन्ते येनानेन प्रतिक्षणम् ।
मा मंस्था मण्डलं राजन्विलब्धं तदिदं परैः ॥ २४३ ॥
कर्मभिः स्वैरवाप्तस्य जन्मनः पितरौ यथा ।
राज्ञां तथान्ये राज्यस्य प्रवृत्तावेव कारणम् ॥ २४४ ॥
इत्थं स्थिते परं कंचित्त्वदीयोस्मीति शंसता ।
न नेया भवता राजन्वयमात्मा च लाघवम् ॥ २४५ ॥
इति तैस्तथ्यमुक्तोपि संस्मरन्स्वामिसत्क्रियाम् ।
मातृगुप्तो महीपालः क्षणमासीत्कृतस्मितः ॥ २४६ ॥
दानेन सुदिनं कुर्वन्नवराज्योर्जितेन सः ।
तत्रैव मङ्गलोदग्रं तदहो निरवर्तयत् ॥ २४७ ॥

पुरप्रवेशायान्येद्युरर्थ्यमानोथ मन्त्रिभिः।
अद्भुतप्राभृतं दूतं राज्यदातुर्व्यसर्जयत् ॥ २४८ ॥
देशौन्नत्यानुसारेण स्पर्धामिव च तां विदन्।
स्वामिनो मनसि ह्रीतः सागसं स्वममन्यत ॥ २४९ ॥
अथाह्वयापरान्भृत्यान्वक्तुं सेवास्मृतिं प्रभोः।
अल्पार्घाण्यपि सात्म्यानि प्राहिणोत्प्राभृतानि सः ॥ २५० ॥
असामान्यान्गुणांस्तस्य स्मरन्पर्यस्तलोचनः।
स्वयं लिखित्वा श्लोकं च स्वकमेकं व्यसर्जयत् ॥ २५१ ॥
नाकारमुद्वहसि नैव विकत्थसे त्वं
दित्सां न सूचयसि मुञ्चसि सत्फलानि।
निःशब्दवर्षणमिवाम्बुधरस्य राज-
न्संलक्ष्यते फलत एव तव प्रसादः ॥ २५२ ॥
ततः प्रविश्य नगरं सैन्यैः पिहितदिक्तटैः।
क्रमागतामिव महीं यथावत्पर्यपालयत् ॥ २५३ ॥
त्यागे वा पौरुषे वापि तस्यौचित्योन्नतात्मनः।
क्ष्माभुजस्तर्कुकस्येव नाभूत्परिमितेच्छता ॥ २५४ ॥
यष्टुं यज्ञान्धृतोद्योगस्त्यागी विततदक्षिणान्।
पशुबन्धमनुध्याय करुणाकूणितोभवत् ॥ २५५ ॥
अमारमादिदेशाथ यावद्राज्यं स्वमण्डले।
चूर्णीकृत्य सुवर्णादि प्रददौ च करम्भकम् ॥ २५६ ॥
करम्भके कीर्यमाणे मातृगुप्तेन भूभुजा।
वैतृष्ण्यमुन्मिषत्तोषो न को नाम न्यषेवत ॥ २५७ ॥
गुणी च दृष्टकष्टश्च वदान्यश्च स पार्थिवः।
विक्रमादित्यतोप्यासीदभिगम्यः शुभार्थिनाम् ॥ २५८ ॥

विवेचकतया तस्य श्लाघ्यया सुरभीकृताः ।
लक्ष्मीविलासाः क्ष्माभर्तुरशोभन्त मनीषिषु ॥ २५९ ॥
हयग्रीववधं मेण्ठस्तदग्रे दर्शयन्नवम् ।
आसमाप्ति ततो नापत्साध्वसाध्विति वा वचः ॥ २६० ॥
अथ ग्रथयितुं तस्मिन्पुस्तकं प्रस्तुते न्यधात् ।
लावण्यनिर्याणभिया तदधः स्वर्णभाजनम् ॥ २६१ ॥
अन्तरज्ञतया तस्य तादृश्या कृतसत्कृतिः ।
भर्तृमेण्ठः कविर्मेने पुनरुक्तं श्रियोर्पणम् ॥ २६२ ॥
स मातृगुप्तस्वाम्याख्यं निर्ममे मधुसूदनम् ।
कालेनादत्त यद्ग्रामान्मम्मः स्वसुरसद्मने ॥ २६३ ॥
इत्यासादितराज्यस्य शासतः क्ष्मां क्षमापतेः ।
त्रिमासोना ययुस्तस्य सैकाहाः पञ्च वत्सराः ॥ २६४ ॥
कृतार्थतां तीर्थतोयैराज्ञेयो नयन्पितॄन् ।
जातं तादृशमश्रौषीत्स्वस्मिन्देशे पराक्रमम् ॥ २६५ ॥
पितृशोकार्द्रता तस्य क्रोधेनान्तरधीयत ।
तरोरिवार्कतापेन नैशाम्बुलवसिक्तता ॥ २६६ ॥
श्रीपर्वते पाशुपतव्रतिवेषस्तमागतम् ।
आचख्यावश्वपादाख्यः सिद्धः कन्दाशनं ददत् ॥ २६७ ॥
जन्मान्तरे लब्धसिद्धिस्त्वामस्म्युपरिसाधकम् ।
वाञ्छामपृच्छं राज्यार्थमभिलाषस्तु तेभवत् ॥ २६८ ॥
सयत्नं तव कर्तुं तन्मनोरथमनन्यथा ।
अथ मामित्थमादिक्षत्क्षपारमणशेखरः ॥ २६९ ॥
गणोयं मामकः सिद्धो यस्तवोपरिसाधकः ।
जन्मान्तरेस्य राज्येच्छां कुर्यामहमनन्यथा ॥ २७० ॥

भावं भवस्तद्भवतो भगवान्दत्तदर्शनः ।
साफल्यं नेष्यतीत्येवमभिधाय तिरोदधे ॥ २७१ ॥
साम्राज्येच्छोः समामेकां तत्र तस्य तपस्यतः ।
लब्धस्मृतेः सिद्धगिरा प्रददौ दर्शनं शिवः ॥ २७२ ॥
व्रतिवेषं तमादिष्टवाञ्छितार्थसमर्पणम् ।
स जगन्निर्जयोन्निद्रं नरेन्द्रत्वमयाचत ॥ २७३ ॥
उपेक्ष्य मोक्षं किं क्ष्माभृद्भोगानिच्छसि भङ्गुरान् ।
इति जिज्ञासुना भावं शंभुना सोभ्यधीयत ॥ २७४ ॥
स तं बभाषे शंभुं त्वां बुद्ध्वा व्याजतपोधनम् ।
अभ्यधामिदमद्धा त्वं न स देवो जगद्गुरुः ॥ २७५ ॥
महान्तो ह्यर्थिताः स्वल्पं फलन्त्यल्पेतरत्स्वयम् ।
उदन्यया वदन्योदाद्दुग्धाब्धिं स पयोर्थिने ॥ २७६ ॥
अस्य वैकल्यकैवल्यलाभनिश्चलचेतसः ।
नो वेत्स्यभिजनस्याभिभूतिं मर्मव्यथावहाम् ॥ २७७ ॥
जगत्परिवृढः प्रौढप्रीतिस्तं स[1] फलार्थिनम् ।
कृत्वा प्रादुष्कृतवपुस्ततो भूयोभ्यभाषत ॥ २७८ ॥
मज्जतो राज्यसौख्येषु सायुज्यावाप्तिदूतिकाम् ।
मदाज्ञयाश्वपादस्ते संज्ञां काले करिष्यति ॥ २७९ ॥
इत्युक्त्वान्तर्हिते देवे स कृतव्रतपारणः ।
अगच्छदश्वपादं तमापृच्छ्याभिमतां भुवम् ॥ २८० ॥
ततो विदितवृत्तान्तो मातृगुप्ताभिषेणनात् ।
निषिध्य सविधायातानमात्यानब्रवीद्वचः ॥ २८१ ॥
विक्रमादित्यमुत्सिक्तमुच्छेत्तुं यतते मनः ।
मातृगुप्तं प्रति न नो रोषेणारूषितं मनः ॥ २८२ ॥

---

१ सफलार्थनम् इत्युचितम् ।

अप्रियैरपि निष्पिष्टैः किं स्यात्क्लेशासहिष्णुभिः ।
ये तदुन्मूलने शक्ता जिगीषा तेषु शोभते ॥ २८३ ॥
यान्यब्जान्युदयं द्विषन्ति शशिनः कोन्यस्ततोसंमत-
स्तन्निर्माथिकरीन्द्रदन्तदलनं यन्नाम कोयं नयः ।
सामर्थ्यप्रथनाय चित्रमसमैः स्पर्धां विधूयोन्नता
ये तेषु प्रभवन्ति तत्र जहति व्यक्तं प्ररूढा रुषः ॥ २८४ ॥
त्रिगर्तानां भुवं जित्वा स व्रजन्नथ भूपतिः ।
विक्रमादित्यमश्रृणोत्कालधर्ममुपागतम् ॥ २८५ ॥
तस्मिन्नहनि भूभर्त्रा शोकान्निःश्वसतानिशम् ।
नास्नायि नाशि नास्वापि स्थितेनावनताननम् ॥ २८६ ॥
अन्येद्युर्भुवमुत्सृज्य कश्मीरेभ्यो विनिर्गतम् ।
शुश्राव मातृगुप्तं स नातिदूरे कृतस्थितिम् ॥ २८७ ॥
कैश्चिन्निर्वासितो मा स्विन्मदीयैरिति शङ्कितः ।
ययौ प्रवरसेनोस्य पार्श्वे मितपरिच्छदः ॥ २८८ ॥
कृतार्हणं सुखासीनं ततः पप्रच्छ तं शनैः ।
विनयावनतो राजा राज्यत्यागस्य कारणम् ॥ २८९ ॥
बभाषे तं क्षणं स्थित्वा स निःश्वस्य विहस्य च ।
गतः स सुकृती राजन्येन भूमिभुजो वयम् ॥ २९० ॥
यावन्मूर्ध्नि रवेः पादास्तावद्द्योतयते दिशः ।
द्योतयेन्नान्यथा किं न ग्रावैव तपनोपलः ॥ २९१ ॥
अथ राजाभ्यधात्केन राजन्नपकृतं तव ।
यत्प्रत्यपचिकीर्षायै तमीशमनुशोचसि ॥ २९२ ॥
मातृगुप्तस्ततोवादीत्कोपस्मितसिताधरः ।
अस्मानुत्सहते कश्चिन्नापकर्तुं बलाधिकः ॥ २९३ ॥

नयता गण्यतामस्मानन्तरज्ञेन तेन हि ।
न भस्मनि हुतं सर्पिर्नोप्तं वा सस्यमूषरे ॥ २९४ ॥

उपकारं स्मरन्तस्तु कृतज्ञत्ववशंवदाः ।
पदवीमुपकर्तॄणां यान्ति निश्चेतना अपि ॥ २९५ ॥

निर्वाणमनु निर्वाति तपनं तपनोपलः ।
इन्दुमिन्दुमणिः किंच शुष्यन्तमनु शुष्यति ॥ २९६ ॥

पुण्यां वाराणसीं गत्वा तस्माच्छमसुखोन्मुखः ।
इच्छामि सर्वसंन्यासं कर्तुं द्विजजनोचितम् ॥ २९७ ॥

मणिदीपमिवेशं तमन्तरेणान्धकारिताम् ।
बिभेमि द्रष्टुमप्युर्वीं भोगयोगे कथैव का ॥ २९८ ॥

इत्यौचित्यनिधेस्तस्य वाणीमाकर्ण्य विस्मितः ।
धीरः प्रवरसेनोपि व्याजहारोचितं वचः ॥ २९९ ॥

सत्यं विश्वंभरा देवी भूपते रत्नसूरियम् ।
उत्पत्त्या द्योतते[1] धर्म्यैः कृतज्ञैर्या भवादृशैः ॥ ३०० ॥

अन्तरज्ञतया श्लाघ्यः कोन्यस्तस्मान्महीभुजः ।
इत्थं जडे जगत्येकस्त्वां यथावद्विवेद यः ॥ ३०१ ॥

चिरं खलु खिलीभूताः कृतज्ञत्वस्य वीथयः ।
धीर त्वयैव न त्वासु संचारो यदि दर्श्यते ॥ ३०२ ॥

पाकश्चेन्न शुभस्य मेद्य तदसौ प्रागेव नादात्किमु
स्वार्थश्चेन्न मयास्य किं न भजते दीनान्स्वबन्धूनयम् ।
मत्तो रन्ध्रदृशोस्य भीर्यदि न तल्लुब्धः किमेष त्यजे-
दित्यन्तः पुरुषाधमः कलयति प्रायः कृतोपत्क्रियः ॥ ३०३ ॥

अत्युदात्तगुणेष्वेषा कृतपुण्यैः प्ररोपिता ।
शतशाखीभवत्येव यावन्मात्रापि सत्क्रिया ॥ ३०४ ॥

---

१ द्योत्यते इत्युचितम् ।

तत्त्वं गुणवतामग्र्यस्तत्त्वज्ञैश्चाभिनन्दितः ।
परीक्षितो मणिरिव व्यक्तं बहुमतः सताम् ॥ ३०५ ॥
तस्मादनुगृहाणास्मान्मा स्म त्याक्षीर्नरेन्द्रताम् ।
ममापि ख्यातिमायातु गुणवत्पक्षपातिता ॥ ३०६ ॥
पूर्वं तेनाथ चरमं मयापि प्रतिपादिताम् ।
भवान्प्रतिप्रणयिनीं[1] विदधातु पुनर्भुवम् ॥ ३०७ ॥
अव्याजौदार्यचर्यस्य श्रुत्वेति नृपतेर्वचः ।
कृतस्मितो मातृगुप्तः शनैर्वचनमब्रवीत् ॥ ३०८ ॥
यान्यक्षराण्यन्तरेण वाच्यं वक्तुं न पार्यते ।
का गतिस्तदुपादाने मर्यादोल्लङ्घनं विना ॥ ३०९ ॥
अतः परुषमप्यद्य किंचिदेव मयोच्यते ।
अव्याजार्जवमप्येतदार्यत्वमवधीर्य ते ॥ ३१० ॥
सर्वः स्मरति सर्वस्य प्रागवस्थासु लाघवम् ।
आत्मैव वेत्ति माहात्म्यं वर्तमाने क्षणे पुनः ॥ ३११ ॥
पूर्वावस्था मदीया ते त्वदीया या च मे हृदि ।
ताभ्यां विमोहितावावां न विद्वोन्योन्यमाशयम् ॥ ३१२ ॥
राजा भूत्वा कथं मादृक्प्रतिगृह्णातु संपदः ।
कथमेकपदे सर्वमौचित्यं परिमार्जतु ॥ ३१३ ॥
असाधारणमौदार्यमाहात्म्यं तस्य भूपतेः ।
भोगमात्रकृते मादृक्किं साधारणतां नयेत् ॥ ३१४ ॥
अपि च स्पृहयालुः स्यां भोगेभ्यो यदि भूपते ।
म्रियमाणेभिमाने मे केन ते विनिवारिताः ॥ ३१५ ॥
यन्ममोपकृतं तेन तद्विना प्रत्युपक्रियाम् ।
जीर्णमेवाधुनाङ्गेषु प्रभवत्येष निश्चयः ॥ ३१६ ॥

---

१ पाणिप्रणयिनीं इत्युचितम् ।

या गतिर्भूभुजोमुष्य मया तामनुगच्छता ।
पात्रापात्रविवेकृत्वख्यातिर्नेया प्रकाशताम् ॥ ३१७ ॥
एतावत्येव कर्तव्ये यातेस्मिन्कीर्तिशेषताम् ।
भोगमात्रपरित्यागाद्विद्ध्यां सत्यसंधताम् ॥ ३१८ ॥
इत्युक्त्वा विरते तस्मिञ्जगाद जगतीपतिः ।
त्वदीया न मया स्पृश्यास्त्वयि जीवति संपदः ॥ ३१९ ॥
अथ वाराणसीं गत्वा कृतकाषायसंग्रहः ।
सर्वं संन्यस्य सुकृती मातृगुप्तोभवद्यतिः ॥ ३२० ॥
राजा प्रवरसेनोपि कश्मीरोत्पत्तिमञ्जसा ।
निखिलां मातृगुप्ताय प्राहिणोद्दृढनिश्चयः ॥ ३२१ ॥
स हठापतितां लक्ष्मीं भिक्षाभुक्प्रतिपादयन् ।
सर्वार्थिभ्यः कृती वर्षान्दश प्राणानधारयत् ॥ ३२२ ॥
अन्योन्यं साभिमानानामन्योन्यौचित्यशालिनाम् ।
त्रयाणामपि वृत्तान्त एष त्रिपथगापयः ॥ ३२३ ॥
राजा प्रवरसेनोथ नमयन्नवनीधरान्[1] ।
अकृच्छ्रलङ्घ्याः ककुभो वृद्धस्य यशसो व्यधात् ॥ ३२४ ॥
पीताब्धिर्लङ्घितोर्वीभृत्कुम्भयोनिरिवानयत् ।
तस्य प्रतापः प्रभवन्भुवनानि प्रसन्नताम् ॥ ३२५ ॥
शुष्यत्तमालपत्राणि शीर्णताडीदलानि च ।
तत्सेनार्णवतीराणि चक्रेरिस्त्रीमुखानि च ॥ ३२६ ॥
स गङ्गालिङ्गिताङ्गस्य पूर्ववारिनिधेर्व्यधात् ।
सैन्येभमदनिःष्यन्दैः कालिन्दीसंगमश्रियम् ॥ ३२७ ॥
रोधस्यपरपाथोधेः कटकैः स्पृष्टदिक्तटैः ।
चकारोत्पाट्य सौराष्ट्रानसौ राष्ट्रविपाटनम् ॥ ३२८ ॥

---

१ अवनीभृतः इत्युचितम् ।

यशोर्थिनः पार्थिवेषु द्वेषरागबहिष्कृतः ।
ववृधे धर्मविजयस्तस्य क्षितिशतक्रतोः ॥ ३२९ ॥
वैरिनिर्वासितं पित्र्ये विक्रमादित्यजं न्यधात् ।
राज्ये प्रतापशीलं स शीलादित्यापराभिधम् ॥ ३३० ॥
सिंहासनं स्ववंश्यानां तेनाहितहृतं ततः ।
विक्रमादित्यवसतेरानीतं स्वपुरं पुनः ॥ ३३१ ॥
हेतूनुदीर्य विविधानमन्वानं पराजयम् ।
सप्त वारान्स तत्याज जित्वा मुम्मुनिभूभुजम् ॥ ३३२ ॥
धार्ष्ट्यादथाष्टमे वारे हेतुमाख्यातुमुद्यतम् ।
धिक्पशून्वध्यतां सोयमित्यूचे नृपतिः क्रुधा ॥ ३३३ ॥
अवध्योहं पशुत्वेन वीरेत्युक्त्वा भयोत्सुकः ।
मध्येसभं ननर्तास्य सोनुकुर्वन्कलापिनम् ॥ ३३४ ॥
नृत्तं केकां च शिखिनो दृष्ट्वास्मै द्रविणं नृपः ।
अभयेन समं प्रादात्तालार्धचरणोचितम् ॥ ३३५ ॥
वसतोस्य दिशो जित्वा नमुः पैतामहे पुरे ।
कर्तुं पुरं स्वनामाङ्कं प्रथते स्म मनोरथः ॥ ३३६ ॥
रात्रौ क्षेत्रं च लग्नं च दिव्यं ज्ञातुमथैकदा ।
स वीरो वीरचर्यायां निर्ययौ पार्थिवार्यमा ॥ ३३७ ॥
गच्छतः क्ष्मापतेस्तस्य मौलिरत्नाग्रबिम्बितः ।
बभार ताराप्रकरो रक्षासर्षपविभ्रमम् ॥ ३३८ ॥
अथानन्तचितालोकस्पष्टभीमतटद्रुमाम् ।
श्मशानप्रान्ततटिनीं पर्यटन्नाससाद सः ॥ ३३९ ॥
ततस्तस्य सरित्पारे मुक्तसंरावमग्रतः ।
ऊर्ध्वबाहु महद्भूतं प्रादुरासीन्महौजसः ॥ ३४० ॥

नृपतिस्तस्य दृक्पातैर्ज्वलद्भिः कपिशीकृतः ।
उल्काज्योतिःकृताश्लेषः कुलाद्रिरिव दिद्युते ॥ ३४१ ॥
तमथ प्रतिशब्देन घोरेणापूरयन्दिशः ।
अत्रासं विहसन्नुच्चैरुवाच क्षणदाचरः ॥ ३४२ ॥
संत्यज्य विक्रमादित्यं सत्त्वोद्रिक्तं च शूद्रकम् ।
त्वां च भूपाल पर्याप्तं धैर्यमन्यत्र दुर्लभम् ॥ ३४३ ॥
वसुधाधिपते वाञ्छासिद्धिस्तव विधीयते ।
सेतुमेतं समुत्तीर्य पार्श्वमागम्यतां मम ॥ ३४४ ॥
इत्युदीर्य निजं जानुं रक्षः पारात्प्रसारयत् ।
तन्महासरितो वारि सेतुसीमन्तितं व्यधात् ॥ ३४५ ॥
अङ्गेन रक्षःकायस्य ज्ञात्वा सेतुं प्रकल्पितम् ।
वीरः प्रवरसेनोथ विकोशां क्षुरिकां दधे ॥ ३४६ ॥
स तयोत्कृत्य तन्मांसं कृतसोपानपद्धतिः ।
अतरद्यत्र तत्स्थानं क्षुरिकावाल उच्यते ॥ ३४७ ॥
पार्श्वस्थं तं लग्नमुक्त्वा प्रातर्मत्सूत्रपातनम् ।
दृष्ट्वा पुरं विधेहीति वदद्भूतं तिरोदधे ॥ ३४८ ॥
देव्या शारिकयाट्टेन यक्षेणाधिष्ठिते च सः ।
ग्रामे शारीटकेपश्यत्सूत्रं वेतालपातितम् ॥ ३४९ ॥
भक्त्या प्रतिष्ठां प्राक्तस्मिन्निनीषौ प्रवरेश्वरम् ।
जयस्वामी स्वयं पीठे भित्त्वा यन्त्रमुपाविशत् ॥ ३५० ॥
वेतालावेदितं लग्नं जानतो जगतीभुजा ।
स्थपतेः स जयाख्यस्य नाम्ना प्रख्यापितोभवत् ॥ ३५१ ॥
नगराप्रातिलोम्याय भक्त्या तस्य विनायकः ।
प्रत्यङ्मुखः प्राङ्मुखतां भीमस्वामी स्वयं ययौ ॥ ३५२ ॥

सद्भावश्यादिका देव्यस्तेन श्रीशब्दलाञ्छिताः ।
पञ्च पञ्चजनेन्द्रेण पुरे तस्मिन्निवेशिताः ॥ ३५३ ॥
वितस्तायां स भूपालो बृहत्सेतुमकारयत् ।
ख्याता ततः प्रभृत्येव तादृङ्नौसेतुकल्पना ॥ ३५४ ॥
श्रीजयेन्द्रविहारस्य बृहद्बुद्धस्य च व्यधात् ।
मातुलः स नरेन्द्रस्य जयेन्द्रो विनिवेशनम् ॥ ३५५ ॥
बुभोज सिंहलादीन्यो द्वीपान्स सचिवोकरोत् ।
मोराकनामा मोराकभवनं भुवनाद्भुतम् ॥ ३५६ ॥
षट्त्रिंशद्धृहलक्षाणि पुरं तत्पप्रथे पुरा ।
यस्यास्तां वर्धनस्वामी विश्वकर्मा च सीमयोः ॥ ३५७ ॥
दक्षिणस्मिन्नेव पारे वितस्तायाः पुरा किल ।
निर्मितं तेन नगरं विभक्तैर्युक्तमापणैः ॥ ३५८ ॥
ते तत्राभ्रंलिहाः सौधा यानध्यारुह्य दृश्यते ।
वृष्टिस्निग्धं निदाघान्ते चैत्रे चोत्कुसुमं जगत् ॥ ३५९ ॥
तद्विना नगरं कुत्र पवित्राः सुलभा भुवि ।
सुभगाः सिन्धुसंभेदाः क्रीडावसथवीथिषु ॥ ३६० ॥
दृष्टः क्रीडानगोन्यत्र न मध्येनगरं क्वचित् ।
यतः सर्वौकसां लक्ष्मीः संलक्ष्या द्युपथादिव ॥ ३६१ ॥
वैतस्तं वारि वास्तव्यैर्वहत्तुहिनशर्करम् ।
ग्रीष्मोग्रेह्नि स्ववेश्माग्रात्क ततोन्यत्र लभ्यते ॥ ३६२ ॥
प्रतिदेवगृहं कोशास्ते तस्मिन्नर्पिता नृपैः ।
सहस्रशः शक्यते यैः क्रेतुं भूः सागराम्बरा ॥ ३६३ ॥
पुरे निवसतस्तस्मिंस्तस्य राजप्रजासृजः ।
शनैः साम्राज्यलाभस्य षष्टिः संवत्सरा ययुः ॥ ३६४ ॥

ललाटे शूलमुद्राङ्के जराशुक्लाः शिरोरुहाः ।
तस्य शंभुभ्रमासङ्गिगङ्गाम्भोविभ्रमं दधुः ॥ ३६५ ॥
अथाश्वपादेनेशाननिदेशात्तत्क्षणागतः ।
काश्मीरिको जयन्ताख्यो द्विजन्मायोजि पार्श्वगः ॥ ३६६ ॥
श्रान्तोस्यध्वन्य नान्यस्मादेशात्तेभिमतं भवेत् ।
राज्ञे प्रवरसेनाय लेख एष प्रदर्श्यताम् ॥ ३६७ ॥
इत्युक्त्वार्पितलेखोसावसमर्थः पथः पृथून् ।
गन्तुं प्रस्थानखिन्नोस्मि सद्यस्तेनेत्यगद्यत ॥ ३६८ ॥
स्नाह्यद्य तावत्त्वं स्पृष्टो द्विजः कापालिना मया ।
उक्त्वेति तेन क्षिप्तोसावासन्ने दीर्घिकाजले ॥ ३६९ ॥
उन्मीलितेक्षणोद्राक्षीत्स्वं स्वदेशादथोत्थितम् ।
तस्थुषश्चार्चने राज्ञो भृत्यान्व्यग्राञ्जलाहृतौ ॥ ३७० ॥
स्वमावेदयितुं नद्या नीयमाने नृपान्तिकम् ।
अव्याक्षिप्तोक्षिपल्लेखं स स्नानकलशे ततः ॥ ३७१ ॥
प्रवरेशं स्नापयता स्रस्तं तत्कलशात्पुनः ।
राज्ञा लेखं वाचयित्वा जयन्तः प्रापितोन्तिकम् ॥ ३७२ ॥
कृतं कृत्यं महद्दत्तं भोगा भुक्ता वयो गतम् ।
किमन्यत्करणीयं त एहि गच्छ शिवालयम् ॥ ३७३ ॥
ततस्तं वृत्तसंकेतः संतोष्याभिमतार्पणात् ।
भित्त्वा तमश्मप्रासादं जगाहे विमलं नभः ॥ ३७४ ॥
जनैः स ददृशे गच्छन्कैलासतिलकां दिशम् ।
विशदे घटयन्व्योम्नि द्वितीयतपनोदयम् ॥ ३७५ ॥
जयन्तेनाद्भुतोदन्तहेतुनावाप्य संपदः ।
स्वनामाङ्काग्रहारादिकर्मभिर्निर्मलाः कृताः ॥ ३७६ ॥

एवं स भुवनैश्वर्यं भुक्त्वा भूमिभृतां वरः ।
अनेनैव शरीरेण भेजे भूतपतेः सभाम् ॥ ३७७ ॥
प्रासादे प्रवरेशस्य सिद्धिक्षेत्रे क्षमापतेः ।
स्वर्गद्वारप्रतिभटं द्वारमद्यापि लक्ष्यते ॥ ३७८ ॥
तस्य रत्नप्रभादेव्यां जातो राजा युधिष्ठिरः ।
अपासीन्नवमासोनाः क्ष्मां चत्वारिंशतिं समाः ॥ ३७९ ॥
सर्वरत्नजयस्कन्दगुप्तशब्दाङ्किताभिधाः ।
आसन्विहारचैत्यादिकृत्यैस्तत्सचिवा वराः ॥ ३८० ॥
भवच्छेदाभिधं ग्रामं स्तुत्यं चैत्यादिसिद्धिभिः ।
यो व्यधात्सोस्य वज्रेन्द्रोप्यासीन्मन्त्री जयेन्द्रजः ॥ ३८१ ॥
दिक्कामिनीमुखोत्कीर्णकीर्तिचन्दनचित्रकाः ।
आसन्कुमारसेनाद्यास्तस्यान्येप्यग्र्यमन्त्रिणः ॥ ३८२ ॥
पद्मावत्यां सुतस्तस्य नरेन्द्रादित्य इत्यभूत् ।
लःखणापरनामा यो नरेन्द्रस्वामिनं व्यधात् ॥ ३८३ ॥
वज्रेन्द्रतनयौ वज्रकनकौ यस्य मन्त्रिणौ ।
अभूतां सुकृतोदन्तौ राज्ञी च विमलप्रभा ॥ ३८४ ॥
स विधायाधिकरणं लिखितस्थितये निजम् ।
द्यां त्रयोदशभिर्वर्षैरारुरोह महाभुजः ॥ ३८५ ॥
तस्यानुजो धरणिभूद्रणादित्यस्ततोभवत् ।
तुञ्जीनापरनामानं यं जनाः प्राहुरञ्जसा ॥ ३८६ ॥
जगद्विलक्षणं यस्य शङ्खमुद्राङ्कितं शिरः ।
अपूर्वशर्वरीशान्तर्लीनभानुश्रियं दधे ॥ ३८७ ॥
रिपुकण्ठाटवीष्वासीद्यस्य धाराधरः पतन् ।
तद्धूनेत्रकुण्डैस्तु जलाधिक्यमधार्यत ॥ ३८८ ॥

अपूर्वो यत्प्रतापाग्निः प्रविश्योर्वीं द्विषां न्यधात् ।
नारीनेत्रेषु नीरोर्मीन्मन्दिरेषु तृणाङ्कुरान् ॥ ३८९ ॥
यस्य पाणिप्रणयितां कृपाणे समुपागते ।
कबन्धेभ्यः परो नृत्तं न व्यधत्त द्विषद्बले ॥ ३९० ॥
तस्याव्यपोह्यमाहात्म्या देवी दिव्याकृतेः प्रिया ।
विष्णुशक्तिः क्षितिं प्राप्ता रणारम्भाभिधाभवत् ॥ ३९१ ॥
स हि जन्मान्तरे पूर्वं द्यूतकारोभवत्किल ।
कदापि प्राप निर्वेदं सर्वस्वं कितवैर्जितः ॥ ३९२ ॥
देहत्यागोद्यतोप्यासीत्प्राप्यं किंचिद्विचिन्तयन् ।
न पर्यन्तेप्युपेक्षन्ते कितवाः स्वार्थसाधनम् ॥ ३९३ ॥
अवन्ध्यदर्शनां विन्ध्ये देवीं भ्रमरवासिनीम् ।
द्रष्टुमैच्छद्वराकाङ्क्षी निर्व्यपेक्षः स्वजीविते ॥ ३९४ ॥
भ्रमरैः शङ्कुपुच्छाद्यैः खण्ड्यमानस्य देहिनः ।
तदास्पदं हि विशतो दुर्लङ्घ्या पञ्चयोजनी ॥ ३९५ ॥
स वज्रशङ्कुपुच्छानां धीमांस्तेषां प्रतिक्रियाम् ।
देहेवश्यपरित्याज्ये मन्वानोभूददुष्कराम् ॥ ३९६ ॥
प्रागयोवर्मणा देहं ततो महिषचर्मणा ।
तेन च्छादयता दत्तो मृल्लेपोथ सगोमयः ॥ ३९७ ॥
अथ भानुकरोच्छुष्कमृल्लेपाम्रेडिताङ्गकः ।
स लोष्ट इव संचारी प्रतस्थे क्रूरनिश्चयः ॥ ३९८ ॥
सरलां सरणिं त्यक्त्वा जीवितस्पृहया समम् ।
गुहा तेन ततः सान्द्रतमोभीमा व्यगाह्यत ॥ ३९९ ॥
अथोदतिष्ठन्गर्तेभ्यो घोरा भ्रमरमण्डलाः ।
पक्षशब्दैः श्रुतिं घ्नन्तो मृत्युतूर्यरवैरिव ॥ ४०० ॥

ते तमुच्छुष्कमृल्लेपरेणुव्रणितलोचनाः ।
सहसा नाक्रमन्ते स्म प्रहरन्तोपि बाधितुम् ॥ ४०१ ॥
रेणुभिर्येन्धितदृशस्ते न्यवर्तन्त षट्पदाः ।
तेखण्डयंस्तु मृल्लेपं न्यपतन्ये नवा नवाः ॥ ४०२ ॥
तैः खण्ड्यमानमुच्चण्डैर्व्रजतो योजनत्रयीम् ।
क्रमान्मृत्कवचं तस्य पथि संक्षयमाययौ ॥ ४०३ ॥
ततो मुहुः प्रहरतां तेषां महिषचर्मणि ।
घोरश्चटचटाघोषः प्रादुरासीद्भयंकरः ॥ ४०४ ॥
चतुर्थयोजनस्यार्धमतिक्रम्य विवेद सः ।
रणत्कारैर्द्विरेफांस्तानयोवर्मणि पातिनः ॥ ४०५ ॥
धावंस्ततोतिवेगेन खण्ड्यमानेन षट्पदैः ।
स शस्त्रवर्मणामोचि चित्तं धैर्येण नो पुनः[1] ॥ ४०६ ॥
गव्यूतिमात्रमासन्ने देवीधामनि धैर्यवान् ।
धुन्वन्कराभ्यां मधुपान्धावति स्म स धीरधीः ॥ ४०७ ॥
अथ स्नाय्वस्थिशेषाङ्गो लूनमांसः षडङ्घ्रिभिः ।
कराभ्यामक्षिणी रक्षन्देव्यायतनमासदत् ॥ ४०८ ॥
प्रशान्ते भृङ्गसंपाते प्रकाशमवलोकयन् ।
स देव्याः पादयोरग्रे पपातोद्भ्रान्तजीवितः ॥ ४०९ ॥
स्तोकावशेषप्राणं तं देव्याश्वासयितुं ततः ।
अभिरामं वपुः कृत्वा पस्पर्शाङ्गेषु पाणिना ॥ ४१० ॥
दिव्येन पाणिस्पर्शेन तेन पीयूषवर्षिणा ।
स क्षिप्रासादितस्वास्थ्यो दिक्षु चिक्षेप चक्षुषी ॥ ४११ ॥
प्रविष्टमात्रः प्रैक्षिष्ट सिंहविष्टरसीम्नि याम् ।
घोराकारां स तां देवीं तदाद्राक्षीन्न तां पुरः ॥ ४१२ ॥

---

१ पुनः इति स्यात् ।

ददर्श पुनरुद्यानलतावासे विलासिनीम् ।
स्थितां पुष्करिणीतीरे श्यामां पुष्करलोचनाम् ॥ ४१३ ॥
गृहीतहारमुक्ताघ्यौ बद्धापीनस्तनाञ्जलिम् ।
महार्हैः कान्तिकुसुमैर्यौवनेनार्चिताङ्गकाम् ॥ ४१४ ॥
यावकाहारिणौ पादौ दधतीं कृच्छ्रचारिणौ ।
स्तनच्छन्नमुखं द्रष्टुं तपस्यन्ताविवान्वहम् ॥ ४१५ ॥
भास्वद्बिम्बाधरां कृष्णकेशीं सितकराननाम् ।
हरिमध्यां शिवाकारां सर्वदेवमयीमिव ॥ ४१६ ॥
तां विभाव्यानवद्याङ्गीं निर्जने यौवनोर्जिताम् ।
निन्ये वारितवामेन स कामेन विधेयताम् ॥ ४१७ ॥
दधतीं रूपमाधुर्यपूरच्छन्नामधृष्यताम् ।
अप्सराः प्रत्यभात्तस्य सा हि चित्ते न देवता ॥ ४१८ ॥
कृपामृदुरवादीत्तं व्यथितोसि चिरं पथि ।
मुहुः सौम्य समाश्वस्य प्रार्थ्यतामुचितो वरः ॥ ४१९ ॥
स तां बभाषे शान्तो मे भवत्या दर्शनाच्छ्रमः ।
अदेवी किं तु भवती वरं दातुं कथं क्षमा ॥ ४२० ॥
देवी जगाद तं भद्र कोयं ते मनसि भ्रमः ।
देवी वा स्यामदेवी वा वरीतुं त्वां तु शक्नुयाम् ॥ ४२१ ॥
इति सोभीष्टसंप्राप्तौ कारयित्वा प्रतिश्रवम् ।
दूरमुत्क्रान्तमर्यादः संगमं तामयाचत ॥ ४२२ ॥
तमभ्यधात्सा दुर्बुद्धे कोयं तेनुचितो विधिः ।
प्रार्थयस्वेतरद्यस्मात्साहं भ्रमरवासिनी ॥ ४२३ ॥
देवीं तां जानतोप्यस्य नाभूदवहितं मनः ।
निरुद्धा वासनाः केन जन्मान्तरनिबन्धनाः ॥ ४२४ ॥

स तामुवाच सत्यां चेद्देवि स्वां गिरमिच्छसि ।
प्रमाणीकुरु मद्वाणीमहमन्यन्न कामये ॥ ४२५ ॥
पूर्वमेव हि जन्तूनां योधिवासो निलीयते ।
तिलानामिव तेषां स पर्यन्तेपि न शीर्यते ॥ ४२६ ॥
देवी वा भवकान्ता वा भीमा वा शोभनापि वा ।
यादृशीं पूर्वमद्राक्षं तादृश्येवावभासि मे ॥ ४२७ ॥
तमित्थं कथयन्तं सा ज्ञात्वा निश्चलनिश्चयम् ।
एवं जन्मान्तरे भावीत्यभ्यधादनुरोधतः ॥ ४२८ ॥
उत्सहन्ते हि संस्प्रष्टुं न दिव्या मर्त्यधर्मिणः ।
तद्गच्छ क्रूरसंकल्पेत्युक्त्वा सान्तर्दधे ततः ॥ ४२९ ॥
अशून्यजन्मा भूयासं तया देव्येति चिन्तयन् ।
प्रयागवटशाखाग्रादहासीत्स वपुस्ततः ॥ ४३० ॥
सोजायत रणादित्यो रणारम्भा च सा भुवि ।
मर्त्यभावेपि या नैव जहौ जन्मान्तरस्मृतिम् ॥ ४३१ ॥
रतिसेनाभिधश्चोलराजः सज्जोब्धिपूजने ।
तां तरङ्गान्तरालेभे रत्नराजिमिवोज्ज्वलाम् ॥ ४३२ ॥
आ बाल्याद्यक्तदिव्योक्तिं तामलंकृतयौवनाम् ।
दिव्यार्हां पृथिवीशेभ्यो नार्थिभ्योपि ददौ नृपः ॥ ४३३ ॥
रणादित्यनृपामात्ये दूत्यायाते तथैव तम् ।
प्रत्याख्यानेच्छुमाचख्यौ सैव तद्वरणं वरम् ॥ ४३४ ॥
तदर्थमेव कथितस्वोत्पत्तिं तां ततः पिता ।
द्रुतं कुलूतभूभर्तुः सुहृदः प्राहिणोद्गृहान् ॥ ४३५ ॥
प्रहृष्टोविप्रकृष्टं तं देशं गत्वा व्यधत्त ताम् ।
परिणीय रणादित्यः शुद्धान्तस्याधिदेवताम् ॥ ४३६ ॥

मर्त्यसंस्पर्शभीरुः सा महादेवीभवन्त्यपि ।
तं मायया मोहयन्ती न पस्पर्श कदाचन ॥ ४३७ ॥
व्यधान्मायामयीं राज्ञस्तल्पे स्वसदृशीं स्त्रियम् ।
स्वयं सा भ्रमरीरूपा निर्जगाम बहिर्निशि ॥ ४३८ ॥
स नाम्ना स्वस्य देव्याश्च कृत्वा सुरगृहद्वयम् ।
माहेश्वरे शैललिङ्गे कारयामास कारुभिः ॥ ४३९ ॥
श्वः प्रतिष्ठाप्रसङ्गेथ सञ्जे तल्लिङ्गयोर्द्वयम् ।
देशान्तरागतः कश्चिद्दूषयामास दैववित् ॥ ४४० ॥
स दृष्टप्रत्ययः शश्वत्तयोर्घटितलिङ्गयोः ।
अश्मखण्डैः समण्डूकैर्वभाषे गर्भमावृतम् ॥ ४४१ ॥
किंकर्तव्यतया मूढं प्रतिष्ठाविघ्नविह्वलम् ।
दिव्यदृष्टिः स्वयं देवी ततो राजानमब्रवीत् ॥ ४४२ ॥
राजन्गिरिसुतोद्वाहे पौरोहित्यं पुरा भजन् ।
स्वमर्चादेवमादत्त पूजाभाण्डात्प्रजापतिः ॥ ४४३ ॥
तां विष्णोः प्रतिमां वीक्ष्य पूजितां तेन धूर्जटिः ।
शून्यामिव तदा मेने शक्तिरूपां विना शिवम् ॥ ४४४ ॥
निमन्त्रितैर्द्यौकितानि रत्नान्यथ सुरासुरैः ।
पिण्डीकृत्य स्वयं चक्रे लिङ्गं भुवनवन्दितम् ॥ ४४५ ॥
तां विष्णुप्रतिमां तच्च लिङ्गमीशानपूजितम् ।
स्वयं प्रजासृजः पूज्यं कालेनादत्त रावणः ॥ ४४६ ॥
तेनाप्यभ्यर्च्यमानं तल्लङ्कायामभवच्चिरम् ।
देवद्वयं रावणान्ते नीतमासीच्च वानरैः ॥ ४४७ ॥
तिर्यक्तया ते कपयो मुग्धा हिमनगौकसः ।
शान्तौत्सुक्याः शनैर्देवौ न्यधुरुत्तरमानसे ॥ ४४८ ॥

प्रागेव सरसस्तस्मात्कुशलैः शिल्पिभिर्मया ।
तावुद्धृतौ प्रातरत्र प्राप्तौ द्रक्ष्यस्यसंशयम् ॥ ४४९ ॥
तयोः प्रतिष्ठा क्रियतामित्युक्त्वा पृथिवीभुजम् ।
देवी प्रयाता शुद्धान्तं सिद्धान्सस्मार खेचरान् ॥ ४५० ॥
ते ध्यातमात्राः संप्राप्ता देव्यादेशेन पाथसः ।
उद्धृत्य नृपतेर्धाम्नि देवौ हरिहरौ न्यधुः ॥ ४५१ ॥
दिव्यैः प्रसूनैः संवीतौ हरनारायणौ जनः ।
प्रातर्नृपगृहे दृष्ट्वा परं विस्मयमाययौ ॥ ४५२ ॥
सज्जे प्रतिष्ठालग्नेथ माहेश्वरतया नृपः ।
रणेश्वरप्रतिष्ठायां पूर्वं यावत्समुद्यतः ॥ ४५३ ॥
रणारम्भानुभावेन तावदेवाद्भुतावहः ।
स्वयं पीठे रणस्वामी भित्त्वा यत्रमुपाविशत् ॥ ४५४ ॥
कर्तुं प्रभावजिज्ञासां राज्ञा दत्तधनस्ततः ।
स स्वयंभूः स्वयं भक्तैस्तांस्तान्ग्रामानदापयत् ॥ ४५५ ॥
कुम्भदासतया छन्नः सिद्धो ब्रह्माभिधो वसन् ।
परिज्ञाय तयोर्देव्या प्रतिष्ठाकर्म कारितः ॥ ४५६ ॥
स वृत्तप्रत्यभिज्ञः सन्प्रतिष्ठाप्य रणेश्वरम् ।
व्योम्ना व्रजन्रणस्वामिप्रतिष्ठां गूढमादधे ॥ ४५७ ॥
जनास्त्वलक्षयन्यत्स स्वयं पीठमवातरत् ।
इति केषामपि हृदि प्रवचोद्यापि वर्तते ॥ ४५८ ॥
सा ब्रह्मप्रतिमं सिद्धं देवी ब्रह्मविदां वरम् ।
अकारयत्तमुद्दिश्य परार्ध्यं ब्रह्ममण्डपम् ॥ ४५९ ॥
रणारम्भास्वामिदेवौ दंपतिभ्यां व्यधीयत ।
मठः पाशुपतानां च ताभ्यां प्रद्युम्नमूर्धनि ॥ ४६० ॥

आरोग्यशाला निरघाप्युल्लाघत्वाय रोगिणाम् ।
तेन सेनामुखी देवी भयशान्त्यै च कारिता ॥ ४६१ ॥
ख्यातिं रणपुरस्वामिसंज्ञया सर्वतोगतम् ।
स सिंहरोत्सिकाग्रामे मार्ताण्डं प्रत्यपादयत् ॥ ४६२ ॥
अमृतप्रभया तस्य राज्ञः पत्न्यान्यया कृतः ।
दक्षिणेस्मिन्रणेशस्य पार्श्वे देवोमृतेश्वरः ॥ ४६३ ॥
मेघवाहनभूभर्तृपत्न्या भिन्नाख्यया कृते ।
विहारेपि तया बुद्धबिम्बं साधु निवेशितम् ॥ ४६४ ॥
राज्ञे देव्यनुरक्ताय सानुक्रोशाय सैकदा ।
पातालसिद्धिदं मन्त्रं प्रददौ हाटकेश्वरम् ॥ ४६५ ॥
मा भून्मोघास्य मत्प्राप्तिरिति मत्वा तयार्पितम् ।
असाधयत्स तं प्राप्य वशान्तं वत्सरान्बहून् ॥ ४६६ ॥
कृत्वेष्टिकापथे कष्टं ततो नन्दिशिलां गतः ।
भूरिभिर्वत्सरैर्मन्त्रसिद्धेः प्रणयितां ययौ ॥ ४६७ ॥
स्वप्नैश्च सिद्धिलिङ्गैश्च जाताभङ्गुरनिश्चयः ।
चन्द्रभागाजलं भित्त्वा नमुचेः प्राविशद्बिलम् ॥ ४६८ ॥
बिलेपावृततां याते दिवसान्येकविंशतिम् ।
प्रविश्य पौरान्प्राङ्निन्ये दैत्यस्त्रीभोगभागिताम् ॥ ४६९ ॥
स एवं भूपतिर्भुक्त्वा भुवं वर्षशतत्रयम् ।
निर्वाणश्लाघ्यनिर्व्यूढि पातालैश्वर्यमासदत् ॥ ४७० ॥
सानुगे नृपतौ याते दैतेयदयितान्तिकम् ।
देवी सा वैष्णवी शक्तिः श्वेतद्वीपमगाहत ॥ ४७१ ॥
राजवंशेष्वनेकेषु राज्ञोर्वंशद्वये परम् ।
द्वयोरेवात्र निर्व्यूढिं प्रजावात्सल्यमागतम् ॥ ४७२ ॥

रणादित्यस्य गोनन्दवंशे रामस्य राघवे ।
लोकान्तरसुखस्यापि ययोरंशभुजः प्रजाः ॥ ४७३ ॥

विक्रमाक्रान्तविश्वस्य विक्रमेश्वरकृत्सुतः ।
तस्यासीद्विक्रमादित्यस्त्रिविक्रमपराक्रमः ॥ ४७४ ॥

राजा ब्रह्मगलूराभ्यां[1] सचिवाभ्यां समं महीम् ।
सोपासीद्वासवसमो द्वाचत्वारिंशतिं समाः ॥ ४७५ ॥

चक्रे ब्रह्ममठं ब्रह्मा गलूनो लूनदुष्कृतः ।
रत्नावल्याख्यया वध्वा विहारं निरमापयत् ॥ ४७६ ॥

राज्ञोनन्तरजस्तस्य राजाभूत्तदनन्तरम् ।
तापितारातिभूपालो बालादित्यो बलोर्जितः ॥ ४७७ ॥

लवणार्णवपानेन तर्षोत्कर्षमिवोद्वहन् ।
यत्प्रतापो रिपुस्त्रीणां सनेत्राम्भोभजन्मुखम् ॥ ४७८ ॥

आसन्येरिमनोगाधबोधदण्डा इवाहृताः ।
यस्याद्यापि जयस्तम्भाः सन्ति ते पूर्ववारिधौ ॥ ४७९ ॥

प्रभावाङ्केन वङ्गालां जित्वा येन व्यधीयत ।
काश्मीरिकनिवासाय कालम्ब्याख्यो जनाश्रयः ॥ ४८० ॥

कश्मीरेषु धनोदग्रमग्रहारं द्विजन्मनाम् ।
राजा मडवराज्ये यो भेडराख्यमकारयत् ॥ ४८१ ॥

विशां विपाटितारिष्टमरिष्टोत्सादने व्यधात् ।
वल्लभा यस्य बिम्बोष्ठी बिम्बा बिम्बेश्वरं हरम् ॥ ४८२ ॥

भ्रातरो मन्त्रिणस्तस्य त्रयो मठसुरौकसोः ।
सेतोश्च कारका आसन्खङ्गशत्रुघ्नमालवाः ॥ ४८३ ॥

बभूव तस्य भूभर्तुर्भुवनाद्भुतविभ्रमा ।
तनयानङ्गलेखाख्या शृङ्गारोदधिकौमुदी ॥ ४८४ ॥

---

१ ब्रह्मगलूनाभ्यां इत्युचितम् ।

तां वीक्ष्य लक्षणोपेतां मृगाक्षीं पितुरन्तिके ।
अमोघप्रत्ययो व्यक्तं व्याजहारेति दैववित् ॥ ४८५ ॥
भविता तव जामाता जगतीभोगभाजनम् ।
त्वदन्तमेव साम्राज्यं गोनन्दान्वयजन्मनाम् ॥ ४८६ ॥
सुतासंतानसाम्राज्यमनिच्छन्नथ पार्थिवः ।
दैवं पुरुषकारेण जेतुमासीत्कृतोद्यमः ॥ ४८७ ॥
अराजान्वयिने दत्ता नेयं साम्राज्यहारिणी ।
मत्वेति प्रददौ कन्यां न कस्मैचन भूभुजे ॥ ४८८ ॥
हेतुं सरूपतामात्रं कृत्वा जामातरं नृपः ।
अथाश्वघासकायस्थं चक्रे दुर्लभवर्धनम् ॥ ४८९ ॥
मातुः कार्कोटनागेन सुस्नातायाः समीयुषा ।
राज्यायैव हि संजातो राज्ञा नाज्ञायि तेन सः ॥ ४९० ॥
निश्चिन्वते हि क्षमन्या यमेवायोग्यमाग्रहात् ।
जिगीषयेव तत्रैव निदधाति विधिः शुभम् ॥ ४९१ ॥
मात्सर्येण जहन्नहान्विसदृशो धूमध्वजे योग्यतां
ज्ञात्वा स्वां निदधत्त्विषं दिनपतिर्हास्यः प्रशान्त्युन्मुखः ।
दैवं वेत्ति न यः शिखी स परतो नामास्तु तत्संभवाः
स्युर्दीपा अपि यद्वशेन जगतस्तिग्मांशुविस्मारकाः ॥ ४९२ ॥
धिया भाग्यानुगामिन्या चेष्टमानो नयोचितम् ।
अभूत्सर्वस्य चक्षुष्यः स तु दुर्लभवर्धनः ॥ ४९३ ॥
प्रज्ञया द्योतमानं तं प्रज्ञादित्य इति प्रथाम् ।
कौवेरभाग्यसाम्यं च शनकैः श्वशुरोनयत् ॥ ४९४ ॥
पित्रोः प्रेयस्तयोद्वृत्ता तारुण्यादिमदेन च ।
राजपुत्री यथावत्तु गणयामास नैव तम् ॥ ४९५ ॥

स्वैरिणीसंगमो भोगा युवानोग्रे पितुर्गृहम् ।
पत्युर्मृदुत्वमित्यस्याः किं नाभूच्छीलविघ्नकृत् ॥ ४९६ ॥
सा नित्यदर्शनाभ्यासाच्छनकैर्विशता मनः ।
अनङ्गलेखा खड्गेन संप्रयुज्यत मन्त्रिणा ॥ ४९७ ॥
छन्नप्रेमसुखाभ्यासनष्टह्रीभीतिसंभ्रमा ।
धार्ष्ट्यं दिनाद्दिनं यान्ती ततस्तन्मयतां ययौ ॥ ४९८ ॥
स मन्त्री दानमानाभ्यां वशीकृतपरिच्छदः ।
अन्तःपुरे यथाकामं विजहार तया सह ॥ ४९९ ॥
उपलेभे च शनकैस्तस्यास्तं शीलविप्लवम् ।
विरागलिङ्गैरुद्यद्भिर्धीमान्दुर्लभवर्धनः ॥ ५०० ॥
सखीमध्ये रहः स्मेरा विवर्णा भर्तृदर्शने ।
अकाण्ड एव प्रोत्थाय पश्यन्ती सस्मितं पथः ॥ ५०१ ॥
पत्युः कोपे कृतावज्ञा भ्रूनेत्रचिबुकाञ्चनैः ।
तदप्रियं भाषमाणे सस्मितं न्यस्तलोचना ॥ ५०२ ॥
तत्तुल्यगुणनिर्वर्णा तद्विपक्षस्तुतौ रता ।
रिरंसां तस्य संलक्ष्य सखीभिर्बद्धसंकथा ॥ ५०३ ॥
तच्चुम्बने भुग्नकण्ठी तदाश्लेषासहाङ्गका ।
तत्संभोगे त्यक्तहर्षा तत्तल्पे व्याजनिद्रिता ॥ ५०४ ॥
भवेद्धि प्रायशो योषित्प्रेमविक्रीतचेतना ।
निवेदयन्ती दौःशील्यपिशाचावेशवैकृतम् ॥ ५०५ ॥
कुलकम् ॥

निगूढदारदौरात्म्यचिन्ताकृशवपुस्ततः ।
शुद्धान्तमविशज्ज्ञातु निशि दुर्लभवर्धनः ॥ ५०६ ॥
सोपश्यत्सुरतक्लान्तिसुलभस्वापनिःसहाम् ।
दुर्जारभर्तुरङ्केषु प्रत्युप्तामिव वल्लभाम् ॥ ५०७ ॥

श्वासैरगलितावेगैः कम्पयद्भिः कुचाङ्कुरौ ।
निवेदयन्तौ[1] तत्कालमेव निर्वहणं रतेः ॥ ५०८ ॥
अन्यस्यापि क्रोधहेतुं पुनरप्यक्षमावहाम् ।
तां तथावस्थितां वीक्ष्य स प्रजज्वाल मन्युना ॥ ५०९ ॥
प्रजिहीर्षुः स रोषेण विमर्शेन निवारितः ।
प्रहृत्येव प्रहृत्येव निवृत्तं स्वममन्यत ॥ ५१० ॥
ततस्तथाविधः क्षुभ्यन्प्रकोपावेशसागरः ।
विचारवेलया तस्य बलाच्छममनीयत ॥ ५११ ॥
नमस्तस्मै ततः कोन्यो गण्यते वशिनां धुरि ।
जीर्यन्ते येन पर्याप्ता ईर्ष्याविषविषूचिकाः ॥ ५१२ ॥
सोचिन्तयदहो कष्टाश्चेष्टा रागानुगा इमाः ।
विचारवन्ध्याः क्षिप्यन्ते क्षिप्रं याभिरधो नराः ॥ ५१३ ॥
स्त्रीति नामेन्द्रियार्थोयमिन्द्रियार्था यथा परे ।
तथैव सर्वसामान्या वशिनामत्र काः क्रुधः ॥ ५१४ ॥
निसर्गतरला नारीः को नियन्त्रयितुं क्षमः ।
नियन्त्रणेन किं वा स्याद्यत्सतां स्मरणोचितम् ॥ ५१५ ॥
यः शुनोरिव संघर्ष एकार्थाभिनिविष्टयोः ।
रागिणोर्यदि मानः स कोवमानस्ततः परः ॥ ५१६ ॥
ममकारो मृगाक्षीषु क इवायं सचेतसाम् ।
स्वदेहेनुपपन्नोपि यः सोन्यत्र कथं मतः ॥ ५१७ ॥
उद्वेगोत्पादनादेषा वध्या चेत्प्रतिभाति मे ।
रागस्तद्विस्मृतः कस्मान्मूलमुद्वेगशाखिनः ॥ ५१८ ॥
सप्तपातालनिक्षिप्तमूलो रागमहीरुहः ।
भूमिभूतमनुत्पाट्य द्वेषमुन्मूल्यते कथम् ॥ ५१९ ॥

---

१ निवेदयन्तीं इत्युचितम् । २ मुनेः इति स्यात् ।

द्वेषो नामैष दुर्धर्षो जितो येन विवेकिना ।
क्षणार्धेनैव रागस्य तेन नामापि नाशितम् ॥ ५२० ॥
वीक्ष्यैतद्दिव्यया दृष्ट्या रागिणां वाच्यमौषधम् ।
ईर्ष्या जेया ततो रागः स्वयमाशाः पलायते ॥ ५२१ ॥
इति ध्यात्वालिखद्वर्णान्खड्गस्यांशुकपल्लवे ।
वध्योपि न हतो यत्त्वं स्मर्तव्यं तत्तवेत्यसौ ॥ ५२२ ॥
जनैरलक्ष्यमाणेथ याते दुर्लभवर्धने ।
त्यक्तनिद्रः स मन्त्री तदृष्ट्वा वर्णानवाचयत् ॥ ५२३ ॥
दाक्षिण्यात्प्राणदस्यास्य खड्गः स मनसा तदा ।
विसस्मारानङ्गलेखां दध्यौ तु प्रत्युपक्रियाम् ॥ ५२४ ॥
तस्योपकर्तुरुचितं प्रतिकारमिच्छो-
श्चिन्ताविशन्न तु मनः स्मरबाणपङ्क्तिः ।
दृग्गोचरे परिचयप्रणयं प्रपेदे
निर्निद्रता न तु कदाचन राजपुत्री ॥ ५२५ ॥
भूत्वा सप्तत्रिंशतिमब्दान्स चतुर्भि-
र्मासैर्वन्ध्यां मूर्धनि रत्नं नृपतीनाम् ।
तस्मिन्काले लोकमवापोज्ज्वलकृत्यो
बालादित्यो बालशशाङ्काङ्कितमौलेः ॥ ५२६ ॥
पूर्वं विपन्नतनयेभिजनस्य शेषे
गोनन्दसंततिरजायत तत्र शान्ते ।
प्राग्दन्तिभुग्नन्नलिनाथ हठप्रविष्ट-
तोयौघपाटितबिसा नलिनीव दीना ॥ ५२७ ॥
अथ शिथिलितमुख्यामात्यवैमत्यविघ्नः
कनकघटविमुक्तैः पावनं तीर्थतोयैः ।

कथमपि स कृतज्ञो राजजामातुरुच्चै-
र्व्यधित विधिवदिष्टं मूर्ध्नि राज्याभिषेकम् ॥ ५२८ ॥
कार्कोटप्रभवः प्रभुः स मुकुटप्रत्युप्तमुक्ताकण-
द्योतश्रेणिफणाङ्कुराङ्कितबृहद्बाहुर्महीमुद्वहन् ।
ज्ञातिप्रीतिसतोषशेषफणभृत्संफुल्लदृक्पल्लव-
न्यासावर्जकहाटकाञ्जपटलस्रग्दामशोभोभवत् ॥ ५२९ ॥
अथ विगलिता गोनन्दोर्वीभुजोभिजनाच्छुचे-
रतिशुचिनि भूः कार्कोटाहेः कुले व्यधित स्थितिम् ।
चिरपरिचितात्स्वर्गाभोगाध्वनः पतनं श्रिता
त्रिभुवनगुरोः शंभोर्मौलाविवामरनिम्नगा ॥ ५३० ॥

इति श्रीकाश्मीरिकमहामात्यचम्पकप्रभुसूनोः कह्लणस्य कृतौ राजतरङ्गिण्यां तृतीयस्तरङ्गः ॥

चतुर्थस्तरङ्गः ।

तद्गीतव्यतिरेकमद्रितनयादेहेन मिश्रीभव-
न्निष्प्रत्यूहमिह व्यपोहतु वपुः स्थाणोरभद्राणि वः ।
वेण्या भोगिवधूशरीरकुटिलश्यामत्विषा वेष्टिता
जूटाहेरपि यत्र भाति दयितामूर्त्येव पृक्ता तनुः ॥ १ ॥
स महीं राजकन्यां च प्राप्तवानेकतः कुलात् ।
रत्नानां च सुतानां च राजाभूद्भाजनं शनैः ॥ २ ॥
पतिगोपितदौःशील्या तुल्यसौभाग्यगौरवा ।
अनङ्गभवनं चक्रे विहारं नृपतिप्रिया ॥ ३ ॥

शिशुरेवायुषोल्पत्वं दैवज्ञोक्तं विचिन्तयन् ।
राज्ञः सुतो महणाख्यो महणस्वामिनं व्यधात् ॥ ४ ॥
पारेविशोकं कोटाद्रौ प्रदत्तप्रतिपत्तिना ।
अदीयत द्विजेन्द्रेभ्यश्चन्द्रग्रामः क्षमाभुजा ॥ ५ ॥
श्रीनगर्यां प्रतिष्ठाप्य दुर्लभस्वामिनं हरिम् ।
षट्त्रिंशता स वर्षाणां क्षमावृषास्तमुपाययौ ॥ ६ ॥
अनङ्गदेव्यां संभूतस्तस्य दुर्लभकः सुतः ।
शशास वासवसमस्ततो वसुमतीं कृती ॥ ७ ॥
मातामहस्य यो मात्रा दौहित्रस्तनयीकृतः ।
प्रतापादित्य इत्याख्यां तत्कुलानुगुणां दधे ॥ ८ ॥
औडेनैडबिडात्प्राप्तश्रिया यन्मन्त्रिणा कृताः ।
अग्रहारा हनुमता पुण्यानुमतसंपदा ॥ ९ ॥
प्रतापतापितारातिः प्रतापपुरपत्तनम् ।
मघवन्नगरस्पर्धि दीर्घबाहुर्व्यधत्त सः ॥ १० ॥
नानादिगन्तरायाततत्तत्क्रयिकसंकुले ।
नोणाभिधोवसत्तस्य देशे रौहीतको वणिक् ॥ ११ ॥
रौहीतदेशे जातानां निवेशाय द्विजन्मनाम् ।
महागुणो नोणमठं पुण्यज्येष्ठं चकार सः ॥ १२ ॥
स जातु राजभवने राज्ञा प्रीत्या निमन्त्रितः ।
अर्चितोभवदेकाहमुपचारैर्नृपोचितैः ॥ १३ ॥
प्रातः सुखासिकां प्रेम्णा पृष्टोथ पृथिवीभुजा ।
शीर्षव्यथामकथयत्प्रजातां दीपकज्वलैः ॥ १४ ॥
ततः क्रमेण नृपतिस्तेन जातु कृतार्थनः ।
वसंस्तदास्पदेद्राक्षीत्क्षपायां मणिदीपकान् ॥ १५ ॥

विलासित्वेन लक्ष्म्या च तादृश्या तस्य विस्मितः।
अथ द्वित्राण्यहान्यासीत्तत्रैव स कृतार्हणः॥ १६॥
एकदा तेन तत्कान्ता व्यलोकि ललिताकृतिः।
श्रीनरेन्द्रप्रभा नाम हर्म्ये हिमकरानना॥ १७॥
उरोजपूर्णकुम्भाङ्का सदूर्वाहितविभ्रमा।
मूर्तिमन्मङ्गलमिव स्मरस्य च गृहस्य च॥ १८॥
हर्म्यस्य निर्जनतया स निःशङ्कविहारिणीम्।
तां विलोक्यानवद्याङ्गीमभिलाषेण पस्पृशे॥ १९॥
सापि दर्शितमालीभिः किंचित्साचीकृताननना।
अपश्यत्काश्यपीकान्तं श्रोत्राविश्रान्तया दृशा॥ २०॥
प्राग्जन्मप्रेमबन्धाद्वा निदेशाद्वा मनोभुवः।
सपक्षपातं सा तस्य दृष्ट्वैव विदधे मनः॥ २१॥
क्षणादलब्धस्पर्शोपि तां सौभाग्यसुधामयीम्।
मज्ज्ञानमपि संस्पृश्य स्थितामिव विवेद सः॥ २२॥
हर्म्यस्तम्भच्छन्नगात्री क्षणं भूत्वा जगाम सा।
व्यावर्त्य वक्त्रं पश्यन्ती पार्थिवं तं मुहुर्मुहुः॥ २३॥
गृहीतहृदयस्तन्व्यास्तावतैव महीपतिः।
स चिन्ताजिह्मनयनो राजधानीं शनैर्ययौ॥ २४॥
तत्र तस्य तदाकारध्यानावहितचक्षुषः।
सममन्तःपुरप्रीत्या प्रपेदे तानवं तनुः॥ २५॥
अचिन्तयत्स धिक्कष्टं रूढोयमशुभावहः।
अस्मिन्मे मानसोद्याने रागनामा विषद्रुमः॥ २६॥
अहो नु सुभगा रागवृत्तिश्चित्तं विजित्य या।
विवेकादीन्व्यधाद्दूरे सुहृदः परिपन्थकान्॥ २७॥

भाव्यं कौलीनभीतेन येन भूमिभृता सता ।
तस्य मे दुःसहः कोयं सदाचारविपर्ययः ॥ २८ ॥
यत्र दारापहरणं राजैव कुरुते विशाम् ।
परः को नाम तत्रास्तु शासिता नीत्यतिक्रमे ॥ २९ ॥
विमृष्यन्निति भूपालो विस्मर्तुमभवत्क्षमः ।
न पद्धतिं साधुसेव्यां न च तां दीर्घलोचनाम् ॥ ३० ॥
तमथ प्रथितास्वास्थ्यं नेदीयोमरणं वणिक् ।
स जनाज्ज्ञातवृत्तान्तः सुजनो विजनेब्रवीत् ॥ ३१ ॥
इमामवस्थां प्राप्तोसि किं धर्मेण निरुध्यसे ।
न प्राणसंशये जन्तोरकृत्यं नाम किंचन ॥ ३२ ॥
यन्मतानि प्रतीक्ष्यन्ते विबुधैर्धर्मसंशये ।
तेषामपीदृशे कृत्ये श्रूयते संयमव्ययः ॥ ३३ ॥
यशोनुरोधादुचितं नापि देहमुपेक्षितुम् ।
स्वकीर्तिर्न परासूनां कीर्णाकर्णरसायना[1] ॥ ३४ ॥
मा भून्मदनुरोधस्ते त्वत्प्रियार्थे हि पार्थिव ।
प्राणा अपि न मे गण्या इन्द्रियार्थेषु का कथा ॥ ३५ ॥
एवमुक्तोपि नादत्से तां चेत्तत्सा सुरास्पदात् ।
गृह्यतां नर्तकीभूत्वा[2] नृत्यज्ञत्वान्मयार्पिता ॥ ३६ ॥
तेनेति प्रेर्यमाणः स बलिना च मनोभुवा ।
प्राग्लज्जामथ जग्राह कथंचित्तां सुलोचनाम् ॥ ३७ ॥
कृत्यैरुदात्तैः सापास्ततादृक्चारित्रलाघवा ।
नरेन्द्रमहिषी चक्रे श्रीनरेन्द्रेश्वरं हरम् ॥ ३८ ॥
क्रमेण च प्रजापुण्यैश्चन्द्रापीडाभिधं सुतम् ।
प्रासोष्ट पार्थिववधूर्निधानमिव मेदिनी ॥ ३९ ॥

---

१ कीर्णकर्ण इत्युचितम् । २ नर्तकीभूता इत्युचितम् ।

तस्याभिजनमालिन्यं स्वच्छैरच्छेदि तद्गुणैः ।
शाणाश्मकषणैः कार्ष्ण्यमाकरोत्थं मणेरिव ॥ ४० ॥
धूमाद्गाढमलीमसाच्छुचिपयः सूते घनस्योद्गमो
लोहस्यातिशितस्य जातिरचलात्कुण्ठाश्ममालामयात् ।
किं चात्यन्तजडाज्जलाद्द्युतिमतो ज्वालाध्वजस्योद्भवो
जन्मावन्यनुकारिणो न महतां सत्यं स्वभावाः क्वचित् ॥४१॥
तारापीडोपि तनयः क्रमात्तस्यामजायत ।
अविमुक्तापीडनामा मुक्तापीडोपि भूपतेः ॥ ४२ ॥
वज्रादित्योदयादित्यललितादित्यसंज्ञकाः ।
प्रतापादित्यजाः ख्याताश्चन्द्रापीडादयोपि ते ॥ ४३ ॥
वर्षान्पञ्चाशतं भुक्त्वा भुवं दुर्लभभूपतिः ।
पुण्यनिःश्रेणिभिः पुण्यामारुरोह दिवं शनैः ॥ ४४ ॥
राजचूडामणिः श्रीमांश्चन्द्रापीडस्ततोभवत् ।
पीडितेन्दुत्विषा कीर्त्या कलेः पीडां चकार यः ॥ ४५ ॥
एकपादाकृतिर्धर्मः समस्येवोज्झितो नृपैः ।
शुद्धश्लोककृता येन पादैः संयोजितस्त्रिभिः ॥ ४६ ॥
यं क्षमाविक्रममुखाः परस्परविरोधिनः ।
सिषेविरे गुणास्तुल्यं दिव्योद्यानमिवर्तवः ॥ ४७ ॥
स्थाने स्थाने यदीया श्रीस्तुल्यमाप्याययन्त्यभूत् ।
द्रुमानुद्यानकुल्येव निखिलाननुजीविनः ॥ ४८ ॥
दोषांस्त्यक्त्वान्यभूपेषु यं शुद्धा श्रीरशिश्रियत् ।
मार्गाद्रिष्वोघकालुष्यं क्षिप्त्वा सिन्धुरिवार्णवम् ॥ ४९ ॥
कार्यज्ञो यो न तच्चक्रे यत्फलेभूद्विविग्नधीः ।
परं समाचरन्स्तुत्यं स्तूयमानस्त्रपां दधे ॥ ५० ॥

व्यनीयत न योमात्यैर्विनयं तान्स्वशिक्षयत् ।
वज्रं न भिद्यते कैश्चिच्छिनत्त्यन्यान्मणींस्तु तत् ॥ ५१ ॥
यस्याधर्मभयादासीत्संत्याज्यो धर्मसंशये ।
निजोपि पक्षः कुलिशत्रासादिव गरुत्मतः ॥ ५२ ॥
न्याय्यं दर्शयता वर्त्म तेन राज्ञा प्रवर्तिताः ।
स्थितयो वीतसंदेहा भास्वतेव दिनक्रियाः ॥ ५३ ॥
नियन्त्रिता यद्गणितिस्तद्गुणोदीरणादियम् ।
अतिप्रसङ्गभङ्गात्तन्नेयत्तावाप्तितः पुनः ॥ ५४ ॥
तस्य त्रिभुवनस्वामिप्रासादारम्भकर्मणि ।
चर्मकृत्कोपि न प्रादात्कुटीं क्षेत्रोपयोगिनीम् ॥ ५५ ॥
शश्वत्प्रतिश्रुतार्थानां नवकर्माधिकारिणाम् ।
नैसर्गिकाग्रहग्रस्तः सूत्रपातं न चक्षमे ॥ ५६ ॥
विज्ञापितोथ तैरेत्य तमर्थं पृथिवीपतिः ।
तानेव सागसो मेने चर्मकारं न तं पुनः ॥ ५७ ॥
सोभ्यधात्तान्धिगेतेषामप्रेक्षापूर्वकारिताम् ।
प्रागेव यैरपृष्ट्वा तं प्रविष्टं नवकर्मणि ॥ ५८ ॥
नियम्यतां विनिर्माणं यद्वान्यत्र विधीयताम् ।
परभूम्यपहारेण सुकृतं कः कलङ्कयेत् ॥ ५९ ॥
ये द्रष्टारः सदसतां ते धर्मविगुणाः क्रियाः ।
वयमेव विदध्मश्चेद्यातु न्यायेन[1] कोध्वना ॥ ६० ॥
इत्युक्तवति भूपाले प्रेषितो मन्त्रिपर्षदा ।
पार्श्वात्पादूकृतस्तस्य दूतः प्राप्तो व्यजिज्ञपत् ॥ ६१ ॥
इच्छति स्वामिनं द्रष्टुं स च ब्रूते न चेन्मम ।
युक्तः प्रवेश आस्थाने बाह्यालयवसरेस्तु तत् ॥ ६२ ॥

---

१ न्याय्येन इत्युचितम् ।

अन्येद्युरथ भूपेन स बहिर्दत्तदर्शनः ।
पुण्यकर्मणि नो विघ्नः किं त्वमेवेत्यपृच्छ्यत ॥ ६३ ॥
प्रतिभाति गृहं तच्चेद्रम्यं तव ततोधिकम् ।
तदर्थ्यतां धनं वापि भूर्यैवं चाभ्यधीयत ॥ ६४ ॥
तूष्णीं स्थितं ततो भूपं चर्मकारो व्यजिज्ञपत् ।
दन्तांशुसूत्रैस्तत्सत्त्वमानं ज्ञातुमिवोद्यतः ॥ ६५ ॥
राजन्विज्ञाप्यते किंचिद्यदस्माभिर्यथाशयम् ।
न स्थेयमवलिप्तेन तत्र द्रष्ट्रा सता त्वया ॥ ६६ ॥
नाहमूनः शुनो नास्ति काकुस्थात्पार्थिवः पृथुः ।
क्षुभ्यन्तीवाद्य तत्सभ्याः संलापेस्मिन्किमावयोः ॥ ६७ ॥
जातस्य जन्तोः संसारे भङ्गुरः कायकञ्चुकः ।
अहंताममताख्याभ्यां शङ्कुभ्यामेव बध्यते ॥ ६८ ॥
कङ्कणाङ्गदहारादिशोभिनां भवतां यथा ।
निष्किंचनानामस्माकं स्वदेहेहंक्रिया तथा ॥ ६९ ॥
देवस्य राजधान्येषा यादृशी सौधहासिनी ।
कुटी घटमुखानद्धतमोरिस्तादृशी मम ॥ ७० ॥
आ जन्मनः साक्षिणीयं मातेव सुखदुःखयोः ।
मठिका लोठ्यमानाद्य नेक्षितुं क्षम्यते मया ॥ ७१ ॥
नृणां यद्वेश्महरणे दुःखमाख्यातुमीश्वरः ।
तद्विमानच्युतो मर्त्यो राज्यभ्रष्टोथ पार्थिवः ॥ ७२ ॥
एवमप्येत्य मद्वेश्म सा चेद्देवेन याच्यते ।
सदाचारानुरोधेन दातुं तदुचितं मम ॥ ७३ ॥
इति तेनोत्तरे दत्ते भूभृद्गत्वा तदास्पदम् ।
कुटीं जग्राह वित्तेन नाभिमानः शुभार्थिनाम् ॥ ७४ ॥

अवोचच्चर्मकारस्तं तत्र स व्यञ्जिताञ्जलिः ।
राजन्धर्मानुरोधेन परवत्ता तवोचिता ॥ ७५ ॥
श्ववित्रहेण धर्मेण पाण्डुसूनोः पुरा यथा ।
धार्मिकत्वं तथा तेद्य मयास्पृश्येन वीक्षितम् ॥ ७६ ॥
स्वस्ति तुभ्यं चिरं स्थेया धर्म्या वृत्तान्तपद्धतीः ।
दर्शयन्नीदृशीः शुद्धाः श्रद्धेया धर्मचारिणाम् ॥ ७७ ॥
एवं निष्कलमषाचारः स चक्रे पावनीं भुवम् ।
राजा त्रिभुवनस्वामिकेशवस्य प्रतिष्ठया ॥ ७८ ॥
कृत्यैः प्रकाशदेव्याख्या प्रकाशाकाशकान्तिभिः ।
प्रकाशिकाविहारस्य तत्पत्नी कारयिञ्यभूत् ॥ ७९ ॥
गुरुर्मिहिरदत्ताख्यस्तस्योदात्तगुणोभवत् ।
विश्वंभरस्य गम्भीरस्वामिनाम्नो विधायकः ॥ ८० ॥
सर्वाधिकरणस्थैर्योच्छेत्ता छलितकाभिधः ।
नगराधिकृतस्तस्य च्छलितस्वामिनं व्यधात् ॥ ८१ ॥
कदाचन सभासीनं पृष्ट्वा धर्माधिकारिभिः ।
प्रायोपविष्टा राजानं ब्राह्मणी काचिदब्रवीत् ॥ ८२ ॥
त्वयि प्रशासति महीमहो गर्हानिबर्हणे ।
सुखसुप्तस्य मे पत्युर्हृतं केनापि जीवितम् ॥ ८३ ॥
एषैव महती लज्जा सदाचारस्य भूपतेः ।
यदकालभवो मृत्युस्तस्य संस्पृशति प्रजाः ॥ ८४ ॥
कलिकालबलात्तच्चेत्त्वादृशैरपि दृश्यते ।
पापात्पापतरेमुष्मिन्दोषे कथमुदास्यते ॥ ८५ ॥
चिन्तयन्त्यपि नावैमि भर्तुः कंचिद्विरोधिनम् ।
निर्दोषस्य हि तस्यासन्सर्वतः शीतला दिशः ॥ ८६ ॥

अनसूयो निरुत्सेकः प्रियवाग्गुणवत्सलः ।
पूर्वाभिभाषी निर्लोभो न विद्वेष्यो हि कस्यचित् ॥ ८७ ॥
तस्य तुल्यवया बाल्यात्प्रभृत्यध्ययनेधमः ।
माक्षिकस्वामिवास्तव्यो विप्रः शङ्खोभिचारवित् ॥ ८८ ॥
गुणदारिद्र्यनिर्निद्रैः क्षुद्रैः कौशलशालिनाम् ।
प्रसिद्धिस्पर्धया वन्ध्यैर्बाध्यन्तेसूययासवः ॥ ८९ ॥
[1]नापुंश्चलेयो दुःशीलो नाद्रोहो नित्यशङ्कितः ।
नावाचालो मृषाभाषी नाकायस्थः कृतघ्नधीः ॥ ९० ॥
नादातृगृहजो लुब्धो नानीर्ष्यो नित्यदुःखितः ।
नास्त्रीजितः सर्वहास्यो नावृद्धः स्निग्धभाषितः ॥ ९१ ॥
नानन्यजः पितृद्वेषी नारागी निरपत्रपः ।
नाक्षुद्रविद्यः पापीयानिति भूतार्थसंग्रहः ॥ ९२ ॥

तिलकम् ॥

इत्युक्तवत्यां ब्राह्मण्यां तच्छङ्कावसतिं द्विजम् ।
आनीय परिशुध्यस्वेत्यभ्यधाद्वसुधाधिपः ॥ ९३ ॥
भूयो ब्राह्मण्यवादीत्तं ख्यातः खार्खोदविद्यया ।
निःसंभ्रमः स्तम्भयितुं देव दिव्यक्रियामयम् ॥ ९४ ॥
म्लायद्वक्त्र इवावादीत्ततस्तां मेदिनीपतिः ।
अदृष्टदोषे किं कुर्मो वयमत्राधिकारिणः ॥ ९५ ॥
नान्यस्मिन्नपि दण्डस्य प्रसङ्गोनिश्चितागसि ।
किं पुनर्ब्राह्मणो[2] दण्ड्यो यो दोषेपि वधं विना ॥ ९६ ॥
उक्त्वेति विरते तस्मिन्द्विजजायाब्रवीत्पुनः ।
चतस्रः क्षणदाः क्षीणा राजन्नपि न शस्यते ॥ ९७ ॥
नान्वगां परिणेतारं हन्तुः प्रतिचिकीर्षया ।
तत्राविहितदण्डेस्मिंस्त्यजाम्यनशनैरसून् ॥ ९८ ॥

---

१ नापौंश्चलेयो इत्युचितम् । २ ब्राह्मणे इत्युचितम् ।

तथा स्थितायां ब्राह्मण्यां कृतप्रायोपवेशनः ।
स्वयं त्रिभुवनस्वामिपादानुद्दिश्य सोऽभवत् ॥ ९९ ॥
त्रिरात्रोपोषितं तत्र राजानं रजनीक्षये ।
स्वप्ने स्वप्नोत्तमोवोचत्सत्योक्तिं सत्यवाहनः ॥ १०० ॥
ईदृङ् युज्यते राजन्सत्यस्यान्वेषणं कलौ ।
निशीथे कस्य सामर्थ्यं कर्तुं दिवि विकर्तनम् ॥ १०१ ॥
भवच्छक्त्यनुरोधेन सकृदेतत्प्रवर्त्यते ।
मत्प्रासादाङ्गनेमुष्मिञ्शालिचूर्णं विकीर्यताम् ॥ १०२ ॥
प्रदक्षिणं कुर्वतोस्य त्रिरत्र यदि दृश्यते ।
ब्रह्महत्यापादमुद्रा पादमुद्रानुयायिनी ॥ १०३ ॥
तदेष वधको भूत्वा सदृशं दण्डमर्हति ।
रात्रावेष विधिः कार्यो दिने पापहृदर्यमा ॥ १०४ ॥
अथ तत्कारयित्वा स दृष्टदोषे द्विजन्मनि ।
दण्दं दण्डधरश्चक्रे द्विजत्वाद्वधवर्जितम् ॥ १०५ ॥
महीमघोना भर्तृघ्ने तस्मिन्विहितशासने ।
ततो द्विजन्मजाया सा कृताशीरभ्यधादिदम् ॥ १०६ ॥
इयत्यवनिभृत्सर्गे गूढपापानुशासनम् ।
कार्तवीर्यस्य वा दृष्टं तव वा पृथिवीपते ॥ १०७ ॥
दण्डधारे त्वयि क्ष्माप क्षितिमेतां प्रशासति ।
को वैरस्नेहयोः पारमनासाद्यावसीदति ॥ १०८ ॥
इत्थं कृतयुगध्येयैर्धर्म्यवृत्तान्तवस्तुभिः ।
स्वल्पोपि राज्यकालोस्य पर्याप्तैः पर्यपूर्यत ॥ १०९ ॥
स्रष्टुर्विष्टरपाथोजसंसर्गेण निरर्गलः ।
निबिडं जडिमा जाने व्यधत्त धियि संनिधिम् ॥ ११० ॥

विभक्तवर्णशोभस्य तस्यासावन्यथा कथम् ।
माहेन्द्रस्येव धनुषो विदधे दृष्टनष्टताम् ॥ १११ ॥
कारयित्वाभिचारं तं निग्रहोग्ररुषं द्विजम् ।
तं यशःशेषतामीशं तारापीडोनुजोनयत् ॥ ११२ ॥
दुष्कर्मदुर्भगान्भोगान्भोक्तुं पापा गुणोन्नतम् ।
मृद्नन्ति कण्टकान्प्राप्तुं करभा इव केतकम् ॥ ११३ ॥
ततः प्रभृति भूपानां राज्येच्छूनां गुरून्प्रति ।
दुष्टाः प्रवृत्ता राज्येस्मिन्नभिचारादिकाः क्रियाः ॥ ११४ ॥
श्रीचन्द्रापीडदेवस्य तत्क्षमित्वमपश्चिमम् ।
संस्मर्यमाणं कुरुते न कस्योत्पुलकं वपुः ॥ ११५ ॥
मुमूर्षुर्यत्स लब्ध्वापि तं कृत्याधायिनं द्विजम् ।
वराकेन्यप्रयुक्तेस्मिन्को दोष इति नावधीत् ॥ ११६ ॥
विस्मृतः स कृतक्ष्माभृत्पङ्क्तिमध्येद्य वेधसा ।
दत्त्वा काकपदं नूनं न्यस्तः कलिनृपावलौ ॥ ११७ ॥
अष्टौ वर्षान्साष्टमासाननुगृह्येति मेदिनीम् ।
प्रविवेश वशी स्वर्गमनिशं च सतां मनः ॥ ११८ ॥
भ्रातृद्रोहास्त्रसुहृदा प्रतापेन भयावहः ।
उवाह तारापीडः स चण्डः क्ष्मामण्डलीं ततः ॥ ११९ ॥
पूर्णपात्रप्रतिभटं द्विषां लुण्ठयता यशः ।
शिशोः प्रतापस्योत्पत्तौ कबन्धा येन नर्तिताः ॥ १२० ॥
तस्यातिदुष्टचेष्टस्य लक्ष्मीर्दीप्तापि सर्वतः ।
अभूदुद्वेगजननी श्मशानाग्नेरिव द्युतिः ॥ १२१ ॥
मन्त्रैः प्रभावसांनिध्यं देवानां क्रियते द्विजैः ।
मत्वेति देवद्वेषी स द्विजानां दण्डमत्यजत् ॥ १२२ ॥

मासं षड्भिर्दिनैरूनं चतस्रश्च समा भुवि ।
स प्राभवद्गुरुद्रोहप्ररोहत्सुकृतात्ययः ॥ १२३ ॥
अथ गूढाभिचारेण विहितायुःक्षयो द्विजैः ।
स भ्रातुःसदृशीं शान्तिं प्रपेदे न पुनर्गतिम् ॥ १२४ ॥
यो यं परापकरणाय सृजत्युपायं
तेनैव तस्य नियमेन भवेद्विनाशः ।
धूमं प्रसौति नयनान्ध्यकरं यमग्नि-
र्भूत्वाम्बुदः स शमयेत्सलिलैस्तमेव ॥ १२५ ॥
राजा श्रीललितादित्यः सार्वभौमस्ततोभवत् ।
प्रादेशकेश्वरस्रष्टुर्विधेर्बुद्धेरगोचरः ॥ १२६ ॥
प्रतापांशुच्छटाकूटैः पटवाससधर्मभिः ।
जम्बुद्वीपद्विपेन्द्रस्य येनातन्यत मण्डनम् ॥ १२७ ॥
नयाञ्जलिषु बद्धेषु राजभिर्विजयोद्यमे ।
पार्थिवः पृथुविक्रान्तिर्युधि क्रोधं मुमोच यः ॥ १२८ ॥
विनिःसरज्जनतया भयाद्गर्भानिवामुचन् ।
द्विषां वसतयो यस्य निशम्यास्कन्ददुन्दुभिम् ॥ १२९ ॥
विलोलतिलकान्तैर्यः सनेत्राम्भोभिराननैः ।
निवापाञ्जलिदानानि द्विषां नारीरकारयत् ॥ १३० ॥
क्षितिं प्रदक्षिणयतो रवेरिव महीपतेः ।
जिगीषोः प्रायशस्तस्य यात्रास्वेव वयो ययौ ॥ १३१ ॥
करं पूर्वदिशो गृह्णन्प्रतापानलसंनिधौ ।
अन्तर्वेद्यां महाराजः स कीर्त्युष्णीषभृद्बभौ ॥ १३२ ॥
कन्यानां यत्र कुब्जत्वं व्यधाद्गाधिपुरे मरुत् ।
तत्रैव शंसनीयः स पुंसां चक्रे भयस्पृशाम् ॥ १३३ ॥

यशोवर्माद्रिवाहिन्याः क्षणात्कुर्वन्विशोषणम् ।
नृपतिर्ललितादित्यः प्रलयादित्यतां ययौ ॥ १३४ ॥
मतिमान्कन्यकुब्जेन्द्रः प्रत्यभात्कृत्यवेदिनाम् ।
दीप्तं यल्ललितादित्यं पृष्ठं दत्त्वा न्यषेवत ॥ १३५ ॥
तत्सहायास्ततोप्यासन्निकाममभिमानिनः ।
कुसुमाकरतोप्युच्चैः सुरभिश्चन्दनानिलः ॥ १३६ ॥
श्रीयशोवर्मणः संधौ सांधिविग्रहिको न यत् ।
नयं नियमनालेखे मित्रशर्मास्य चक्षमे ॥ १३७ ॥
सोभूत्संधिर्यशोवर्मललितादित्ययोरिति ।
लिखितेनादिनिर्देशादनर्हत्वं विदन्प्रभोः ॥ १३८ ॥
युगलकम् ॥
सुदीर्घविग्रहाशान्तैः[1] सेनानीभिरसूयिताम् ।
औचित्यापेक्षतां तस्य क्षितिभृद्बह्वमन्यत ॥ १३९ ॥
प्रीतः पञ्चमहाशब्दभाजनं तं व्यधत्त सः ।
यशोवर्मनृपं तं तु समूलमुदपाटयत् ॥ १४० ॥
अष्टादशानामुपरि प्राक्सिद्धानां तदुद्भवैः ।
कर्मस्थानैः स्थितिः प्राप्ता ततः प्रभृति पञ्चभिः ॥ १४१ ॥
महाप्रतीहारपीडा स महासंधिविग्रहः ।
महाश्वशालापि महाभाण्डागारश्च पञ्चमः ॥ १४२ ॥
महासाधनभागश्चेत्येता यैरभिधाः श्रिताः ।
शाहिमुख्या येष्वभवन्नध्यक्षाः पृथिवीभुजः ॥ १४३ ॥
कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः ।
जितो ययौ यशोवर्मा तद्गुणस्तुतिवन्दिताम् ॥ १४४ ॥
किमन्यत्कन्यकुब्जोर्वी यमुनापारतोस्य सा ।
अभूदा शालिकातीरं गृहप्राङ्गनवद्वशे ॥ १४५ ॥

---

१ विग्रहश्रान्तैः इति स्यात् ।

यशोवर्माणमुल्लङ्घ्य हिमाद्रिमिव जाह्नवी ।
सुखेन प्राविशत्तस्य वाहिनी पूर्वसागरम् ॥ १४६ ॥
पश्यद्भिर्जन्मवसुधां सेर्ष्याधोरणभर्त्सितैः ।
तन्मातङ्गैः कलिङ्गेभ्यः कथंचित्प्रस्थितं पथि ॥ १४७ ॥
आकृष्टलक्ष्मीपर्यङ्कदन्तिसख्यादिवागताः ।
अशिश्रियंस्तं निःशेषा दन्तिनो गौडमण्डलात् ॥ १४८ ॥
कटकेभघटाहस्तकृतवीचिकचग्रहः ।
अदृश्यताग्रगैस्तस्य गृहीतः पूर्ववारिधिः ॥ १४९ ॥
वनराजिश्यामलेन दिशं वैवस्वताङ्किताम् ।
स प्रतस्थेब्धितीरेण तत्कृपाणेन तु द्विषः ॥ १५० ॥
तस्योर्ध्वजूटाः कर्णाटाः कृतप्रणतयोनयन् ।
सुवर्णकेतकीस्त्यक्त्वा प्रतापमवतंसताम् ॥ १५१ ॥
तस्मिन्प्रसङ्गे रट्टाख्या कर्णाटी चटुलेक्षणा ।
अपासीन्नृपतिर्भूत्वा पृथुश्रीर्दक्षिणापथम् ॥ १५२ ॥
विन्ध्याद्रिमार्गाः पर्याप्ता निष्पर्यन्तप्रभावया ।
दुर्गयेव तया देव्या कृता निहतकण्टकाः ॥ १५३ ॥
ललितादित्यपादाब्जनखदर्पणमण्डले ।
स्वमूर्तिं वीक्ष्य संक्रान्तां प्रणता सापि पिप्रिये ॥ १५४ ॥
तालीतरुतलाचान्तनालिकेररसोर्मयः ।
कावेरीतीरपवनैस्तद्योधाः क्लममत्यजन् ॥ १५५ ॥
चन्दनाद्रेस्तदास्कन्दत्रासभ्रश्यदहिच्छलात् ।
श्रीखण्डद्रुमदोःषण्डान्मण्डलाग्रा इवापतन् ॥ १५६ ॥
उत्तराश्मस्विव पदं क्षिप्त्वा द्वीपेष्वविघ्नतः ।
स कुल्याया इवाम्भोधेः क्षिप्रं चक्रे गतागतम् ॥ १५७ ॥

ततोब्धिवीचिनिर्घोषैरुद्गीतजयमङ्गलः ।
प्रतस्थे पश्चिमामाशां जिगीषूणामपश्चिमः ॥ १५८ ॥
आक्रम्य क्रमुकश्यामान्कोङ्कणान्सप्त तापयन् ।
तुरगानिव तिग्मांशोः प्रतापस्तस्य पप्रथे ॥ १५९ ॥
पश्चिमाब्धेर्मरुद्यस्तवीचेराविर्भवन्त्यभूत् ।
द्वारका तस्य सैन्यानां प्रवेशौत्सुक्यदायिनी ॥ १६० ॥
विन्ध्याद्रिस्तद्बलक्षुण्णधातुरेण्वावृताम्बरः ।
प्रत्यभात्यक्तमर्यादः कोपताम्र इवोन्नमन् ॥ १६१ ॥
विशतां दशनश्रेण्यस्तस्यावन्तिषु दन्तिनाम् ।
महाकालकिरीटेन्दुज्योत्स्नया खण्डिताः परम् ॥ १६२ ॥
सर्वतोदिक्कमालोक्य जितप्रायांस्ततो नृपान् ।
स प्राविशत्सुविस्तीर्णमपथेनोत्तरापथम् ॥ १६३ ॥
राजभिस्तस्य तत्रोग्रैः संग्रामोभूत्पदे पदे ।
कुलाद्रिभिरिवेन्द्रस्य पक्षच्छेदोद्यमस्पृशः ॥ १६४ ॥
काम्बोजानां वाजिशाला जायन्ते स्म हयोज्झिताः ।
ध्वान्तच्छलात्तद्विरुद्धैर्निरुद्धा महिषैरिव ॥ १६५ ॥
भुःखाराः शिखरश्रेणीर्यान्तः संत्यज्य वाजिनः ।
कुण्ठभावं तदुत्कण्ठां निन्युर्दृष्ट्वा हयाननान् ॥ १६६ ॥
त्रीन्वारान्समरे जित्वा जितं मेने स मुम्मुनिम् ।
सकृज्जयमरेर्वीरा मन्यन्ते हि घुणाक्षरम् ॥ १६७ ॥
चिन्ता न दृष्टा भौट्टानां वक्त्रे प्रकृतिपाण्डुरे ।
वनौकसामिव क्रोधः स्वभावकपिले मुखे ॥ १६८ ॥
तस्य प्रतापो दरदां न सेहेनारतं मधु ।
दरीणामोषधिज्योतिः प्रत्यूषेर्क इवोदितः ॥ १६९ ॥

कस्तूरीमृगसंस्पर्शी धूतकुङ्कुमकेसरः ।
सैन्यसीमन्तिनीस्तस्य संचस्कारोत्तरानिलः ॥ १७० ॥
शून्ये प्राग्ज्योतिषपुरे निर्जिहानं ददर्श सः ।
धूपधूमं वनप्लुष्टात्कालागुरुवनात्परम् ॥ १७१ ॥
मरीचिकावितीर्णार्णोविभ्रमे वालुकाम्बुधौ ।
तद्गजेन्द्रा महाग्राहसमूहसमतां ययुः ॥ १७२ ॥
तद्योधान्विगलद्धैर्यान्स्त्रीराज्ये स्त्रीजनोकरोत् ।
तुङ्गौ स्तनौ पुरस्कृत्य न तु कुम्भौ कवाटिनाम् ॥ १७३ ॥
स्त्रीराज्यदेव्यास्तस्याग्रे वीक्ष्य कम्पादिविक्रियाम् ।
संत्रासमभिलाषं वा निश्चिकाय न कश्चन ॥ १७४ ॥
उत्तराः कुरवोविक्षंस्तद्भयाज्जन्मपादपान् ।
उरगान्तकसंत्रासाद्विलानीव महोरगाः ॥ १७५ ॥
जयार्जितधनः सोथ प्रविवेश स्वमण्डलम् ।
भिन्नेभमौक्तिकापूर्णपाणिः सिंह इवाचलम् ॥ १७६ ॥
जालंधरं लोहरं च मण्डलानीतराणि च ।
प्रसादीकृत्य विदधे राजत्वं सोनुजीविनाम् ॥ १७७ ॥
पराजयव्यञ्जनार्थं नानालिङ्गानि पार्थिवाः ।
उग्रेण ग्राहितास्तेन वहन्त्यद्यापि निर्मदाः ॥ १७८ ॥
बन्धमुद्राभिधानाय पश्चाद्बाहू तदाज्ञया ।
तुरुष्का दधते व्यक्तं मूर्धानं चार्धमुण्डितम् ॥ १७९ ॥
क्षितिभृद्दाक्षिणात्यानां तिर्यक्त्वज्ञापनाय सः ।
पुच्छं महीतलस्पर्शि चक्रे कौपीनवाससि ॥ १८० ॥
न तत्पुरं न स ग्रामो न सा सिन्धुर्न सोर्णवः ।
न स द्वीपोस्ति यत्रासौ प्रतिष्ठां न विनिर्ममे ॥ १८१ ॥

---

१ बलप्लुष्टात् इति स्यात् ।

क्वचिच्चेष्टासमुचितं क्वचिच्च समयानुगम् ।
बाहुल्येन प्रतिष्ठानां स मानी नाम संदधे ॥ १८२ ॥
सुनिश्चितपुरं चक्रे दिग्जये कृतनिश्चयः ।
सगर्वो दर्पितपुरं कृतवाकृतकेशवम् ॥ १८३ ॥
फलं गृह्णन्फलपुरं पर्णोत्सं पर्णमाददत् ।
क्रीडारामविहारं च क्रीडन्राजा विनिर्ममे ॥ १८४ ॥
एकमूर्धं नयद्रत्नमधः कर्षत्तथापरम् ।
बद्ध्वा व्यधान्निरालम्बं स्त्रीराज्ये नृहरिं च सः ॥ १८५ ॥
दिगन्तरस्थे भूपाले तस्मिंस्तत्कर्मकृत्किल ।
पुरं विधाय तन्नाम्ना तत्कोपफलमन्वभूत् ॥ १८६ ॥
ललिताख्ये पुरे तस्मिन्नादित्याय स भूपतिः ।
सग्रामां कन्यकुब्जोर्वीमभिमानोर्जितो ददौ ॥ १८७ ॥
तेन हुष्कपुरे श्रीमान्मुक्तस्वामी व्यधीयत ।
बृहद्विहारो भूपेन सस्तूपश्च महात्मना ॥ १८८ ॥
एकां कोटिं गृहीत्वा स दिग्जयाय विनिर्गतः ।
भूतेशाय ददौ शुद्ध्यै कोटीरेकादशागतः ॥ १८९ ॥
स तत्र ज्येष्ठरुद्रस्य शिलाप्रासादयोजनम् ।
भूमिग्रामप्रदानं च विदधे वसुधाधिपः ॥ १९० ॥
चक्रे चक्रधरस्तेन वितस्ताम्भः प्रतारणम् ।
विनिर्मायारघट्टालीस्तांस्तान्ग्रामान्प्रयच्छता ॥ १९१ ॥
सोखण्डिताश्मप्राकारं प्रासादान्तर्व्यधत्त च ।
मार्ताण्डस्याद्भुतं दाता द्राक्षास्फीतं च पत्तनम् ॥ १९२ ॥
लोकपुण्ये पुरं कृत्वा नानोपकरणावलीम् ।
प्रतिपादितवाञ्जिष्णुर्ग्रामैः साकं स विष्णवे ॥ १९३ ॥

ततः परं परीहासशीलो भूलोकवासवः ।
विहसद्भासवावासं परीहासपुरं व्यधात् ॥ १९४ ॥
विरेजे राजतो देवः श्रीपरीहासकेशवः ।
लिप्तो रत्नाकरस्वापे मुक्ताज्योतिर्भरैरिव ॥ १९५ ॥
नाभीनलिनकिञ्जल्कपुञ्जेनेवानुरञ्जितः ।
अचकात्काञ्चनमयः श्रीमुक्ताकेशवो हरिः ॥ १९६ ॥
महावराहः शुशुभे काञ्चनं कवचं दधत् ।
पाताले तिमिरं हन्तुं वहन्निव रविप्रभाः ॥ १९७ ॥
गोवर्धनधरो देवो राजतस्तेन कारितः ।
यो गोकुलपयःपूरैरिव पाण्डुरतां दधे ॥ १९८ ॥
चतुष्पञ्चाशतं हस्तान्रोपयित्वा महाशिलाम् ।
ध्वजाग्रे दितिजारातेस्तार्क्ष्यस्तेन निवेशितः ॥ १९९ ॥
चक्रे बृहच्चतुःशालाबृहच्चैत्यबृहज्जिनैः ।
राजा राजविहारं स विरजाः सततोर्जितम् ॥ २०० ॥
तोलकानां सहस्राणि चतुर्भिरधिकानि सः ।
अशीतिं निदधे हेम्नो मुक्ताकेशवविग्रहे ॥ २०१ ॥
तावन्त्येव सहस्राणि पलानां रजतस्य च ।
संधाय शुद्धधीश्चक्रे श्रीपरीहासकेशवम् ॥ २०२ ॥
रीतिप्रस्थसहस्रैस्तु तेन तावद्भिरेव सः ।
व्योमव्यापिवपुः श्रीमान्बृहद्बुद्धो व्यधीयत ॥ २०३ ॥
चतुःशालां च चैत्यं च तावता तावता व्यधात् ।
धनेनैवेति तस्यासन्पञ्च निर्मितयः समाः ॥ २०४ ॥
राजतान्कापि सौवर्णान्कापि देवान्विनिर्ममे ।
पार्श्वेषु मुख्येदवानां पार्थिवो धनदोपमः ॥ २०५ ॥

कियन्ति तत्र रत्नानि ग्रामान्परिकरं तथा ।
स प्रादादिति कः शक्तः परिच्छेत्तुमियत्तया ॥ २०६ ॥
अवरोधैरमात्यैश्च सेवकैश्च नरेश्वरैः ।
तत्र प्रतिष्ठाः शतशो विहिता भुवनाद्भुताः ॥ २०७ ॥
राज्ञी कमलवत्यस्य कमलाहट्टकारिणी ।
राजतं विपुलाकारं कमलाकेशवं व्यधात् ॥ २०८ ॥
अमात्यो मित्रशर्मापि चक्रे मित्रेश्वरं हरम् ।
श्रीकय्यस्वामिनं चक्रे लाटः कय्याभिधो नृपः २०९ ॥
श्रीमान्कय्यविहारोपि तेनैव विदधेद्भुतः ।
भिक्षुः सर्वज्ञमित्रोभूत्क्रमाद्यत्र जिनोपमः ॥ २१० ॥
भुःखारश्चङ्कुणश्चक्रे स चङ्कुणविहारकृत् ।
भूपचित्तोन्नतं स्तूपं जिनान्हेममयांस्तथा ॥ २११ ॥
ईशानदेव्या तत्पत्न्या खाताम्बु प्रतिपादितम् ।
सुधारसमिव स्वच्छमारोग्याधायि रोगिणाम् ॥ २१२ ॥
वल्लभादित्यभूभर्तुर्वल्लभा चक्रमर्दिका ।
सहस्राण्योकसां सप्त तत्र चक्रपुरं व्यधात् ॥ २१३ ॥
आचार्यो भपटो नाम विदधे भपटेश्वरम् ।
अन्येपि रक्कटेशाद्या बहवो बहुभिः कृताः ॥ २१४ ॥
अधिष्ठानान्तरेप्यत्र चङ्कुणेनाढ्यमन्त्रिणा ।
सचैत्यः सुकृतोदारो विहारो निरमीयत ॥ २१५ ॥
भिषगीशानचन्द्राख्यः श्यालश्चङ्कुणमन्त्रिणः ।
विहारमकरोल्लब्ध्वा तक्षकानुग्रहाच्छ्रियम् ॥ २१६ ॥
एवं हेममयीमुर्वीं स कुर्वन्नुर्वरापतिः ।
गुणैरौदार्यशौर्याद्यैर्मघवानमलङ्घयत् ॥ २१७ ॥

हेलयापि विनिर्यान्ती वक्राद्वसुमतीपतेः ।
न कदाचन तस्याज्ञा देवैरप्युदलङ्घ्यत ॥ २१८ ॥
तथाहि पूर्वपाथोधेस्तटे सकटको वसन् ।
आनीयन्तां कपित्थानीत्यादिदेश स जातुचित् ॥ २१९ ॥
किंकर्तव्यतयान्धेषु पुरोगेषु स्थितेष्वथ ।
उपानयत्कपित्थानि दिव्यः कोपि पुमान्पुरः ॥ २२० ॥
अग्रादुपायनं गृह्णन्कृतसंज्ञो भ्रुवा प्रभोः ।
कस्य त्वमिति पप्रच्छ प्रतीहारः प्रसृत्य तम् ॥ २२१ ॥
सोभ्यधात्तं कपित्थानि दत्त्वा राज्ञः प्रियाण्यहम् ।
प्रहितोद्य महेन्द्रेण नन्दनोद्यानपालकः ॥ २२२ ॥
रहो महेन्द्रसंदिष्टं वक्तव्यं किंचिदस्ति मे ।
इति श्रुत्वा प्रतीहारः सभां चक्रे स निर्जनाम् ॥ २२३ ॥
ततो दिव्यः पुमानूचे शक्रस्त्वां वक्ति भूपते ।
क्षन्तव्यं पथ्यमप्येतत्सौजन्यान्निष्ठुरं वचः ॥ २२४ ॥
तुर्ये युगेपि भूपाल दिक्पाला अपि ते वयम् ।
बिभृमो यत्प्रणम्याज्ञां श्रूयतां तत्र कारणम् ॥ २२५ ॥
पुरा ग्रामगृहस्थस्य कस्यचित्पृथुसंपदः ।
जन्मान्तरे कर्मकरो हालिकोभूद्भवान्किल ॥ २२६ ॥
एकदा तस्य ते ग्रीष्मे वाहयित्वा महावृषान् ।
श्रान्तस्य निर्जलेरण्ये क्षीणप्रायमभूदहः ॥ २२७ ॥
ततः स्वामिगृहात्क्षुत्तृट्खिन्नस्य भवतोन्तिकम् ।
वारिकुम्भीमपूपं च गृहीत्वा कश्चिदाययौ ॥ २२८ ॥
निर्धौतपाणिपादस्त्वं भोक्तुं संप्रस्तुतस्ततः ।
विप्रं कण्ठगतप्राणमपश्यः पुरतोतिथिम् ॥ २२९ ॥

स त्वामवोचन्मा भुङ्क्ष्व दुर्भिक्षोपहतस्य मे।
कण्ठे यियासवः प्राणा वर्तन्ते भोजनं विना ॥ २३० ॥
वारितः पार्श्वगेनापि तस्मै त्वं प्रीतिपूर्वकम्।
पूपार्धं वारिकुम्भीं च प्रादाः प्रियमुदीरयन् ॥ २३१ ॥
पात्रे प्रसन्नचित्तस्य काले दानेन तेन ते।
अखण्डितानामाज्ञानां शतमासीत्त्रिविष्टपे ॥ २३२ ॥
तेन वारिप्रदानेन वाञ्छामात्रेपि दर्शिते।
प्रादुर्भवन्ति सुस्वादा नद्यो मरुपथेष्वपि ॥ २३३ ॥
सत्क्षेत्रप्रतिपादितः प्रियवचोबद्धालवालावलि-
र्निर्दोषेण मनःप्रसादपयसा निष्पन्नसेकक्रियः।
दातुस्तत्तदभीप्सितं किल फलन्कालेतिबालोप्यसौ
राजन्दानमहीरुहो विजयते कल्पद्रुमादीनपि ॥ २३४ ॥
अल्पावशेषास्तास्त्वद्य सन्त्याज्ञास्तव भूपते।
वचोलङ्घं क्षपयतो यत्र तत्राविचारतः ॥ २३५ ॥
अपि चेतरभूपालसुलभं महतः सतः।
कस्माद्विचारशून्यत्वं तवापि हृदि रोहति ॥ २३६ ॥
दिनानि कतिचिद्यानि कश्मीरेषु घनागमे।
जायन्ते तानि पूर्वाब्धौ फलानि शिशिरे कुतः ॥ २३७ ॥
विगाहसे दिशं यां यां तत्र तत्रैव तत्पतेः।
त्वदाज्ञाग्रहणे यत्नः पूर्वदानप्रभावतः ॥ २३८ ॥
आशां श्रितस्य माहेन्द्रीमाज्ञा स्वल्पापि तेधुना।
गृहीता कथमप्येषा शक्रेणाभग्नशक्तिना ॥ २३९ ॥
विना प्रयोजनं मुख्यं तस्मादाज्ञास्त्वया क्वचित्।
नैवमेव पुनर्देया विरलाः सन्ति ता यतः ॥ २४० ॥

इत्युक्त्वान्तर्हिते तस्मिन्भूपालो विपुलाशयः ।
चिन्तयन्दानमाहात्म्यं परं विस्मयमाययौ ॥ २४१ ॥
ततः प्रभृति तादृक्षयोग्यार्थिप्राप्तिलालसः ।
परिहासपुरे चक्रे स्थिरां गुर्वीं स पर्विणीम् ॥ २४२ ॥
सहस्रभक्तमित्येवं प्रख्यातायां सदक्षिणम् ।
लक्षमेकोत्तरं भक्तपात्राणां यत्र दीयते ॥ २४३ ॥
अभिप्रायेण तेनैव पत्तनान्यूषरेषु सः ।
चक्रे यद्येषु तृष्णार्तः कश्चिज्जातु पिबेदपः ॥ २४४ ॥
संजग्राह स देशेभ्यस्तांस्तानन्तरविघ्नरान् ।
विकचान्सुमनःस्तोमान्पादपेभ्य इवानिलः ॥ २४५ ॥
तेन कङ्कणवर्षस्य रससिद्धस्य सोदरः ।
चङ्कुणो नाम भुःखारदेशानीतो गुणोन्नतः ॥ २४६ ॥
स रसेन समातन्वन्कोशे बहुसुवर्णताम् ।
पद्माकर इवाब्जस्य भूभृतोभूच्छुभावहः ॥ २४७ ॥
रुद्धः पञ्चनदे जातु दुस्तरैः सिन्धुसंगमैः ।
तटे स्तम्भितसैन्योभूद्राजा चिन्तापरः क्षणम् ॥ २४८ ॥
ततोम्बुतरणोपायं तस्मिन्पृच्छति मन्त्रिणः ।
अगाधेम्भसि रोधस्थश्चङ्कुणो मणिमक्षिपत् ॥ २४९ ॥
तत्प्रभावाद्विधाभूतं सरिन्नीरं ससैनिकः ।
उत्तीर्णो नृपतिस्तूर्णं परं पारं समासदत् ॥ २५० ॥
मणिमन्येन मणिना चङ्कुणोप्याचकर्ष तम् ।
सलिलं प्रागवस्थं च क्षणेन सरितामभूत् ॥ २५१ ॥
परिभाव्याद्भुतं तत्स प्रशंसामुखराननः ।
प्रणयाच्चङ्कुणं राजा मणियुग्ममयाचत ॥ २५२ ॥

स तमाह स्म विहसन्कर्मैमौ कुरुतो मणी ।
योग्यौ मत्पाणिगावेव किं स्यात्स्वीकरणेन वः ॥ २५३ ॥
सामान्येष्वेव लभते सोत्कर्षं वस्तु संप्रथाम् ।
महत्सु तस्य का शोभा विविधोत्कृष्टवस्तुषु ॥ २५४ ॥
प्रस्यन्दनं शशिमणेर्गणयन्ति ताव-
द्यावत्स्थितो जलनिधेः पुलिनैकदेशे ।
स स्वीक्रियेत यदि तेन ततस्तदास्य
स्यन्दः स्फुरन्नपि न तत्सलिले विभाव्यः ॥ २५५ ॥
इत्युक्त्वा विरते तस्मिन्राजा सस्मितमब्रवीत् ।
संभावयसि किं रत्नमाभ्यामभ्यधिकं मम ॥ २५६ ॥
अतोधिकतरं यद्वा किंचित्त्वं मम पश्यसि ।
तदादाय प्रयच्छेदं निष्क्रयेण मणिद्वयम् ॥ २५७ ॥
ततो महान्प्रसादोयमित्युक्त्वा चङ्कुणोब्रवीत् ।
स्वायत्ते स्वामिनो रत्ने मह्यमिष्टं तु दीयताम् ॥ २५८ ॥
गजस्कन्धेधिरोप्यैतन्मागधेभ्यो[1] यदाहृतम् ।
दत्त्वा सुगतबिम्बं तज्जनोयमनुगृह्यताम् ॥ २५९ ॥
सलिलोत्तरणोपायो मणी देवेन गृह्यताम् ।
संसारोत्तरणोपायः सुगतो मह्यमर्प्यताम् ॥ २६० ॥
इति तेनार्थितो युक्त्या जिनबिम्बं ददौ नृपः ।
वाग्मिनां कस्य सामर्थ्यं परिपन्थयितुं वचः ॥ २६१ ॥
स्वविहारेथ भगवान्स तेन विनिवेशितः ।
कपिशाभिः सकाषाय इव यो भाति कान्तिभिः ॥ २६२ ॥
दृश्यतेद्यापि कटकैरायसैः परिवेष्टितः ।
गजस्कन्धनिबद्धस्य सूचको यस्य विष्टरः ॥ २६३ ॥

---

१ मगधेभ्यो इति स्यात् ।

अभिप्रायानुसारेण प्रकटीकुरुते प्रियम् ।
अहो महाप्रभावानां भूपतीनां वसुंधरा ॥ २६४ ॥
अशिक्षितं कदाचित्स स्वयं दमयितुं हयम् ।
निनायारण्यमेकाकी हयविद्याविशारदः ॥ २६५ ॥
दूरान्निर्मानुषे तत्र ललनां ललिताकृतिम् ।
एकां ददर्श गायन्तीं नृत्यन्तीमपरामपि ॥ २६६ ॥
क्षणाच्च ते समापय्य गीतनृत्ते मृगीदृशौ ।
प्रणम्य किंचिद्गच्छन्त्यावपश्यद्हमयन्हयम् ॥ २६७ ॥
तुरगं तं समारुह्य तत्रागच्छद्दिने दिने ।
दृष्ट्वा तथैव ते कान्ते गत्वापृच्छत्सविस्मयः ॥ २६८ ॥
तमूचतुस्ते नर्तक्यावावां देवगृहाश्रिते ।
यः शूर वर्धमानोयं ग्रामस्तत्रावयोर्गृहम् ॥ २६९ ॥
इहत्यजीवनभुजां मातृणामुपदेशतः ।
अस्मत्कुलेन नियतं नृत्तमत्र विधीयते ॥ २७० ॥
रूढिः परम्परायाता सेयमस्मद्गृहे स्थिता ।
आवामन्योपि वा नात्र निमित्तं ज्ञातुमीश्वरः ॥ २७१ ॥
एवं वचस्तयोः श्रुत्वा नृपोन्येद्युः सविस्मयः ।
तदुक्त्या मेदिनीं कृत्स्नां कारुभिर्निरदारयत् ॥ २७२ ॥
दूरं निर्हृतमृद्भिस्तैरथाद्राक्षीन्निवेदितम् ।
नृपतिः पिहितद्वारं जीर्णं देवगृहद्वयम् ॥ २७३ ॥
उद्घाटितारिर्वर्णैः पीठोत्कीर्णैर्निवेदितौ ।
अपश्यत्केशवौ तत्र रामलक्ष्मणनिर्मितौ ॥ २७४ ॥
परिहासहरेः पार्श्वे पृथक्कृत्वा शिलागृहम् ।
स रामस्वामिनः श्रीमान्प्रतिष्ठाकर्म निर्ममे ॥ २७५ ॥

देवोपि लक्ष्मणस्वामी तथैवाभ्यर्थ्य पार्थिवम् ।
चक्रमर्दिकया चक्रेश्वरपार्श्वे निवेशितः ॥ २७६ ॥
दिग्जये पुरुषः कश्चिद्वृत्तप्रत्यग्रनिग्रहः ।
अग्रे न्यक्षिपदात्मानं गजारूढस्य भूभुजः ॥ २७७ ॥
तं कृत्तपाणिघ्राणादिव्रणैः शोणितवर्षिणम् ।
त्राणार्थिनं कारुणिकः स्वोदन्तं पृष्टवान्नृपः ॥ २७८ ॥
स तस्मै सिकतासिन्धुसविधस्थस्य भूपतेः ।
प्रख्यातमूचे सचिवमात्मानं हितकारिणम् ॥ २७९ ॥
प्रणतिर्ललितादित्यनृपतेः क्रियतामिति ।
हितं कथयतः स्वस्य निग्रहं च ततो नृपात् ॥ २८० ॥
युग्मम् ॥
प्रतिजज्ञे च भूपेन ततस्तत्स्वामिनिग्रहः ।
रूढव्रणोगदंकारैः स चाकार्यत सत्कृतैः ॥ २८१ ॥
ततो विहितयात्रं तं स मन्त्री कृतसत्क्रियः ।
कदाचिदेवमवदद्विजने जगतीभुजम् ॥ २८२ ॥
एवंविधस्य कायस्य राजन्यत्परिरक्षणम् ।
तत्र वैरविशुद्ध्याशा विडम्बयति मामियम् ॥ २८३ ॥
बाष्पैर्जलाञ्जलिं दत्त्वा दुःखाय च सुखाय च ।
कृतकृत्यो ध्रुवं जह्यादवमानहतानसून् ॥ २८४ ॥
अपकृत्याधिकं शत्रोरपकारं जयेन्मितम् ।
गम्भीरं प्रतिनद्येव निनादं नदतो गिरिः ॥ २८५ ॥
इतो मासैस्त्रिभिर्गम्या भूः प्राप्या त्वरितं कथम् ।
यदा वा प्राप्यते वैरी तदा तत्रैव किं वसेत् ॥ २८६ ॥
मासार्धलङ्घ्यं पन्थानं तस्मादुपदिशामि ते ।
गृहीत्वा स जलं गम्यश्रमूनां किंतु निर्जलः ॥ २८७ ॥

तद्भूमिजा बन्धवो मे न वक्ष्यन्ति त्वदागमम् ।
सामात्यान्तःपुरो राजा छद्मनानेन गृह्यते ॥ २८८ ॥
इत्युक्त्वा सोकरोत्तस्य प्रवेशं वालुकार्णवे ।
पक्षे क्षीणे च कटको निस्तोयः समपद्यत ॥ २८९ ॥
तत्राप्यहानि द्वित्राणि वहन्नेवाभवन्नृपः ।
तृष्णार्तं वीक्ष्य सैन्यं च मन्त्रिणं तमभाषत ॥ २९० ॥
उक्तकालाधिका यावद्वासरा गमिताः पथि ।
मुमूर्षु तृष्णया सैन्यं तदध्वा शिष्यते कियान् ॥ २९१ ॥
ततो विहस्य सोवादीज्जिगीषो शेषमध्वनः ।
किं पृच्छत्यरिराष्ट्रस्य यमराष्ट्रस्य वा भवान् ॥ २९२ ॥
त्वं हि स्वामिहितायैव समुपेक्ष्य स्वजीवितम् ।
मृत्युवक्त्रं स कटको मया युक्त्या प्रवेशितः ॥ २९३ ॥
नेदं मरुमहीमात्रं भीमोयं वालुकार्णवः ।
नाम्भोत्र लभ्यते क्वापि कस्त्राता तेद्य भूपते ॥ २९४ ॥
श्रुत्वेति पृतना कृत्स्ना समभूद्भीतसौष्ठवा ।
करकाभ्रंशितफला स्तम्बशेषेव शालिभूः ॥ २९५ ॥
संत्यक्तजीविताशानां भीरूणां क्रन्दितध्वनिम् ।
भुजमुद्यम्य शमयंस्ततो नृपतिरब्रवीत् ॥ २९६ ॥
अमात्य तव कृत्येन प्रीताः स्वामिहितैषिणः ।
मरावप्यत्र शीतार्ता इव रोमाञ्चिता वयम् ॥ २९७ ॥
अभेद्यसारे मयि तु व्यक्तमेवंविधोपि ते ।
प्रयोगः कुण्ठतां यातो लोहं वज्रमणाविव ॥ २९८ ॥
मणिभ्रमाद्बर्हिकणं गृह्णन्दग्धा इवाङ्गुलीः ।
त्वं मिथ्यावयवाँल्लूनानद्य शोचिष्यसि ध्रुवम् ॥ २९९ ॥

निदेशेनैव मे पश्य पयः सूतेद्य मेदिनी ।
रसितेनाम्बुवाहस्य रत्नं वैदूर्यभूरिव ॥ ३०० ॥
इत्युक्त्वा सोम्बु निष्क्रष्टुं कुन्तेनोर्वीं व्यदारयत् ।
उज्जिहीर्षुर्वितस्ताम्भः शूलेनेव त्रिलोचनः ॥ ३०१ ॥
अथोज्जगाम पाताललक्ष्मीलीलास्मितच्छविः ।
रसातलात्सरित्साकं सैन्यानां जीविताशया ॥ ३०२ ॥
तस्य सेनाचराणां सा क्रमं चिच्छेद वाहिनी ।
वृथाव्ययीकृताङ्गस्य मन्त्रिणस्तस्य चेप्सितम् ॥ ३०३ ॥
लूनाङ्गोमङ्गलाशंसी स मन्त्री विफलश्रमः ।
स्वस्य भर्तुर्विवेशादौ नगरीमन्तकस्ततः ॥ ३०४ ॥
राज्ञापि कुटिलाचारो निगृह्य स महीपतिः ।
निजस्य मन्त्रिणस्तस्य तुल्यावस्थो व्यधीयत ॥ ३०५ ॥
यथोपयोगं तेनैव स्थाने स्थाने प्रवर्तिताः ।
अद्यापि कुन्तवाहिन्यः प्रवहन्त्युत्तरापथे ॥ ३०६ ॥
सहस्रशः संभवन्तोप्यपरे भुवनाद्भुताः ।
अतिप्रसङ्गभङ्गेन तद्वृत्तान्ता न दर्शिताः ॥ ३०७ ॥
यन्निःशब्दजला घनाश्मपरुषे देशेतिघोरारवा
यच्चाच्छाः समये पयोदमलिने कालुष्यसंदूषिताः ।
दृश्यन्ते कुलनिम्नगा अपि परं दिग्देशकालाविमौ
तत्सत्यं महतामपि स्वसदृशाचारप्रवृत्तिप्रदौ ॥ ३०८ ॥
कलेर्वायं प्रभावः स्यान्नरनाथासनस्य वा ।
यत्सोपि भीमकलुषाः प्रवृत्तीः समदर्शयत् ॥ ३०९ ॥
युग्मम् ॥

अवरोधसखो राजा परिहासपुरे स्थितः ।
स जातु मदिराक्षीवः सचिवानेवमन्वशात् ॥ ३१० ॥

कृतं प्रवरसेनेन यदेतत्प्रवरं पुरम् ।
तन्निर्दहथ मन्यध्वे मत्पुरस्यैव चेच्छ्रियम् ॥ ३११ ॥
घोरामलङ्घिताज्ञस्य श्रुत्वेत्याज्ञां महीपतेः ।
गत्वाश्वघासकूटानि तेदहन्वातुलानके ॥ ३१२ ॥
हर्म्याग्राद्वीक्षमाणस्तद्वह्निज्वालोज्ज्वलाननः ।
उल्कामुख इवाभूत्स हर्षाट्टहसितोत्कटः ॥ ३१३ ॥
द्वेषादिवैकृतवतः प्रतिभासतेन्यो
मिथ्यैव चित्रमधिको विशदात्मनोपि ।
चन्द्रादि पश्यति पुरो द्विगुणं प्रकृत्या
तेजोमयं तिमिरदोषहतं हि चक्षुः ॥ ३१४ ॥
नैवं चेदेकमपि तत्पुरं प्रवरभूपतेः ।
असंख्यपुरनिर्माता स विवेदाधिकं कुतः ॥ ३१५ ॥
युग्मम् ॥
क्षीणक्षैव्योथ निर्ध्याय नगरप्लोषकिल्बिषम् ।
उष्णनिःश्वाससुहृदा पस्पर्शानुशयाग्निना ॥ ३१६ ॥
तत्कुर्वतेन्तःसुषिरा गूढं येनातनुक्षयम् ।
दह्यन्ते जीर्णतरवः कोटरस्थानला इव ॥ ३१७ ॥
प्रातस्तमथ शोचन्तं सदुःखं वीक्ष्य मन्त्रिणः ।
चिन्तानिवर्तनायोचुः पुरप्लोषं मृषैव तत् ॥ ३१८ ॥
श्रुतेप्रनष्टे नगरे निःशोकोभून्महीपतिः ।
स्वप्नान्तर्हारिते पुत्रे प्रबुद्धोग्र इव स्थिते ॥ ३१९ ॥
कार्यं जातु न तद्वाक्यं यत्क्षीवेण मयोच्यते ।
तान्युक्तकारिणोमात्यान्प्रशंसन्निति सोब्रवीत् ॥ ३२० ॥
प्रियमनुचितं क्ष्मापण्यस्त्रीक्षणप्रभुरीश्वरो
रमयति यतो धिक्तान्भृत्यान्स्ववृत्तिसुखार्थिनः ।

नृपमपथगं पान्ति प्राणानुपेक्ष्य निजानपि
प्रसभमिह ये तैः पूतेयं महात्मभिरुर्वरी ॥ ३२१ ॥
अतीन्द्रमपि माहात्म्यं राज्ञस्तस्याधितिष्ठतः ।
अयमन्योपि दोषोभूदितरक्षितिपोचितः ॥ ३२२ ॥
दत्त्वापि यत्स मध्यस्थं श्रीपरीहासकेशवम् ।
जघान तीक्ष्णपुरुषैस्त्रिग्राम्यां गौडपार्थिवम् ॥ ३२३ ॥
गौडोपजीविनामासीत्सत्त्वमत्यद्भुतं तदा ।
जह्रुर्ये जीवितं धीराः परोक्षस्य प्रभोः कृते ॥ ३२४ ॥
शारदादर्शनमिषात्कश्मीरान्संप्रविश्य ते ।
मध्यस्थदेवावसथं संहताः समवेष्टयन् ॥ ३२५ ॥
दिगन्तरस्थे भूपाले प्रविवेक्षूनवेक्ष्य तान् ।
परिहासहरिं चक्रुः पूजकाः पिहितारिम् ॥ ३२६ ॥
ते रामस्वामिनं प्राप्य राजतं विक्रमोर्जिताः ।
परिहासहरिभ्रान्त्या चक्रुरुत्पाट्य रेणुशः ॥ ३२७ ॥
तिलं तिलं तं कृत्वा च चिक्षिपुर्दिक्षु सर्वतः ।
नगरान्निर्गतैः सैन्यैर्हन्यमानाः पदे पदे ॥ ३२८ ॥
श्यामला रक्तसंसिक्तास्तेपतन्निहता भुवि ।
अञ्जनाद्रिदृषत्खण्डा धातुस्यन्दोज्ज्वला इव ॥ ३२९ ॥
तदीयरुधिरासारैः समभूदुज्ज्वलीकृता ।
स्वामिभक्तिरसामान्या धन्या चेयं वसुंधरा ॥ ३३० ॥
वज्राद्वज्रकृतं भयं विरमति श्रीः पद्मरागाद्भवे-
न्नानाकारमपि प्रशाम्यति विषं गारुत्मतादश्मनः ।
एकैकं क्रियते प्रभावनियमात्कर्मेति रत्नैः परं
पुंरत्नैः पुनरप्रमेयमहिमोन्नद्धैर्न किं साध्यते ॥ ३३१ ॥

---

१ प्रविविक्षून् इत्युचितम् ।

क्व दीर्घकाललङ्घ्योध्वा शान्ते भक्तिः क्व च प्रभौ ।
विधातुरप्यसाध्यं तद्यद्गौडैर्विहितं तदा ॥ ३३२ ॥
लोकोत्तरस्वामिभक्तिप्रभावानि पदे पदे ।
तादृशानि तदाभूवन्भृत्यरत्नानि भूभृताम् ॥ ३३३ ॥
राज्ञः प्रियो रक्षितोभूद्गौडराक्षसविप्लवे ।
रामस्वाम्युपहारेण श्रीपरीहासकेशवः ॥ ३३४ ॥
अद्यापि दृश्यते शून्यं रामस्वामिपुरास्पदम्[1] ।
ब्रह्माण्डं गौडवीराणां सनाथं यशसा पुनः ॥ ३३५ ॥
एवं नानाविधोदन्तैर्वासराः क्ष्मापतेर्ययुः ।
विरलाः स्वपुरे तस्य भूयांसस्तु दिगन्तरे ॥ ३३६ ॥
अनन्याक्रान्तपृथिवीसमालोकनकौतुकी ।
अपारं प्रविवेशाथ पुनरेवोत्तरापथम् ॥ ३३७ ॥
कर्तुं प्रभावजिज्ञासां प्रहितैर्धनदादिभिः ।
नैर्ऋतैः सह वृत्तान्तास्तस्य ते ते तदाभवन् ॥ ३३८ ॥
नाद्यापि या भुवो दृष्टा जाने भानुकरैरपि ।
राज्ञस्तस्य बभूवाज्ञा तत्र स्वैरविहारिणी ॥ ३३९ ॥
चिरमज्ञातवृत्तान्तैर्मन्त्रिभिः प्रहितस्ततः ।
प्रत्यावृत्तस्तस्य पार्श्वाद्दूतस्तानेवमुक्तवान् ॥ ३४० ॥
इत्यादिशति वः स्वामी कोयं मोहो भवादृशाम् ।
क्षमामिमां मे प्रविष्टस्य प्रतीक्षध्वे यदागमम् ॥ ३४१ ॥
नवं नवं प्रतिदिनं संत्यज्य विजयार्जनम् ।
स्वराष्ट्रं संप्रविष्टस्य किं कार्यं मम पश्यथ ॥ ३४२ ॥
विनिर्गतानां स्वभुवः सरितां सलिलाकरः ।
न निर्व्याजजिगीषूणां दृश्यते ह्यवधिः क्वचित् ॥ ३४३ ॥

---

१ सुरास्पदम् इति स्यात् ।

तस्मादाचारसारं वो वक्ष्ये स्वविषयोचितम् ।
राज्यं तदनुसारेण निर्विघ्नं कुरुतानघाः ॥ ३४४ ॥
अत्रस्थैः सर्वदा रक्ष्यः स्वभेदः प्रभविष्णुभिः ।
चार्वाकाणामिवैषां हि भयं न परलोकतः ॥ ३४५ ॥
अपराधं विनाप्यत्र दण्ड्या गह्वरवासिनः ।
ते हि संभृतवित्ताः स्युर्दुर्भेद्या दुर्गसंश्रयाः ॥ ३४६ ॥
वर्षोपभोग्यान्यन्नानि क्षेत्रभूसंमिता वृषाः ।
ग्राम्याणां नातिरिच्यन्ते यथा कार्यं तथासकृत् ॥ ३४७ ॥
अधिकीभूतवित्ता हि वत्सरेणैव ते भृशम् ।
भवेयुर्डामराः क्रूरा नृपाज्ञातिक्रमक्षमाः ॥ ३४८ ॥
वस्त्रं स्त्रियः कुथा भोज्यमलंकारा हया गृहाः ।
आसाद्यन्ते यदा जातु ग्रामीणैर्नगरोचिताः ॥ ३४९ ॥
मदाद्दुर्गाण्युपेक्ष्यन्ते संरक्ष्याणि यदा नृपैः ।
यदा चानन्तरज्ञत्वं तेषां भृत्येषु दृश्यते ॥ ३५० ॥
प्रदेशादेकतो रूढा यदा वृत्तिश्च शस्त्रिणाम् ।
अन्योन्योद्वाहसंबन्धैः कायस्थाः संहता यदि ॥ ३५१ ॥
कर्मस्थानानि वीक्षन्ते क्ष्मापाः कायस्थवद्यदा ।
तदा निःसंशयं ज्ञेयः प्रजाभाग्यविपर्ययः ॥ ३५२ ॥

चक्कलकम् ॥

चेष्टानुसारेणोन्नीय गूढमाशयसंविदम् ।
मयोक्तं हृदये कार्यमन्तरं राजवीजिनाम् ॥ ३५३ ॥
प्रत्यासत्तिं मदकरटिनो दानगन्धेन वायु-
र्गर्जोद्भूतिं प्रकटितरुचिश्चञ्चलेवाम्बुदस्य ।
चेष्टा स्पष्टं वदति मतिमन्नैपुणोन्नेयतत्त्वा
जन्तोर्जन्मान्तरपरिचितां निश्चलां चित्तवृत्तिम् ॥ ३५४ ॥

पुत्रः कुवलयादित्यो वज्रादित्यश्च मे समौ ।
भिन्नशीला तयोर्भ्रात्रोर्धीर्द्वैमातुरयोः पुनः ॥ ३५५ ॥
ज्यायान्राज्येभिषेक्तव्यः स च स्याद्बलवान्यदा ।
तस्याज्ञातिक्रमः कार्यो भवद्भिर्नियमात्तदा ॥ ३५६ ॥
उत्सृजञ्जीवितं वापि राज्यं वापि स पार्थिवः ।
शोचनीयो न केनापि स्मरतेदं वचो मम ॥ ३५७ ॥
कार्यः कनीयान्न नृपः प्रमादात्क्रियते यदि ।
नोल्लङ्घनीया तस्याज्ञा रक्ष्यश्च विषमोपि सः ॥ ३५८ ॥
पौत्रेषु मे कनीयान्यो जयापीडोस्ति दारकः ।
पितामहसमो भूया इति वाच्यः स सर्वदा ॥ ३५९ ॥
भर्तुर्गृहीतनैराश्याः साभिप्रायां प्रणम्य ताम् ।
आनर्चुः पश्चिमामाज्ञां ते बाष्पार्घकणत्यजः ॥ ३६० ॥
उवाच चङ्कुणो जातु संनिपत्याखिलाः प्रजाः ।
बाष्पैः पतिवियोगाग्नितप्तां सिञ्चन्वसुंधराम् ॥ ३६१ ॥
राज्ये कुवलयापीडो राजपुत्रोभिषिच्यताम् ।
सुगृहीताभिधो राजा गतः स सुकृती दिवम् ॥ ३६२ ॥
ससृजे यस्य कृतिनो दैवतैः कोशवृद्धये ।
रससिद्धिरकस्मान्मे यस्मात्सास्तमुपागता ॥ ३६३ ॥
दूरस्थोपि हि भूभृत्स भाग्यशक्त्या कयाचन ।
कार्याणि घटयन्नासीद्दुर्घटान्यपि हेलया ॥ ३६४ ॥
अम्भोजानि घनाघनव्यवहितोप्युल्लाघयत्यंशुमा-
न्दूरस्थोपि पयोधरोतिशिशिरस्पर्शं करोत्यातपम् ।
शक्तिः काप्यपरिक्षतास्ति महतां स्वैरं दविष्ठान्यहो
यन्माहात्म्यवशेन यान्ति घटनां कार्याणि निर्यत्नाम् ॥ ३६५ ॥

सैकादशदिनान्सप्त मासान्पट्त्रिंशतं समाः ।
एवमाह्लाद्य स महीं प्रजाचन्द्रोस्तमाययौ ॥ ३६६ ॥
तुषारवर्षैर्बहलैस्तमकाण्डनिपातिभिः ।
आर्याणकाभिधे देशे विपन्नं केचिदूचिरे ॥ ३६७ ॥
राजप्रष्ठः प्रतिष्ठां स रक्षितुं चिरसंचिताम् ।
संकटे क्वापि दहनं प्राविक्षदिति केचन ॥ ३६८ ॥
केषांचित्तु मते भूभृद्वीयस्युत्तरापथे ।
सोमर्त्यसुलभां भूमिं प्रविष्टः कटकान्वितः ॥ ३६९ ॥
अत्यद्भुतानि कृत्यानि श्रुतान्यस्य यथा किल ।
विपत्तिरपि भूभर्तुस्तथैवात्यद्भुता श्रुता ॥ ३७० ॥
यातोस्तं द्युमणिः पयोधिसलिलं कैश्चित्प्रविष्टोपरैः
संप्राप्तो दहनं गतः किल परैर्लोकान्तरे कीर्त्यते ।
जायन्ते महतामहो निरुपमप्रस्थानहेवाकिनां
निःसामान्यमहत्त्वयोगपिशुना वार्ता विपत्तावपि ॥ ३७१ ॥
ततः कुवलयापीडो भेजे कुवलयेशताम् ।
जातः कमलदेव्या यः श्रीमाञ्शक्र इवादितेः ॥ ३७२ ॥
त्यागेन चक्रे विशदां योनुरक्तां नृपश्रियम् ।
महोरगस्त्वचमिव स्वभावमलिनामपि ॥ ३७३ ॥
भ्रात्रा तुल्यप्रभावेन कंचित्कालं हृतप्रभः ।
स हुताशोष्मणाक्रान्तः प्रदीप इव नारुचत् ॥ ३७४ ॥
भृङ्गैरिवानुगैर्दानलोभात्पर्यायवृत्तिभिः ।
श्रीर्दुस्थाभूत्तयोरन्तर्मत्तेभकटयोरिव ॥ ३७५ ॥
अथोभयधनादायिभृत्यचक्रिकया समम् ।
राजा कुवलयापीडो बभञ्जानुजमञ्जसा ॥ ३७६ ॥

राज्यं निष्कण्टकं कृत्वा ततः प्राप्तबलो नृपः ।
दिग्जयायोर्जितक्रान्तिः सोभूत्संभृतसाधनः ॥ ३७७ ॥
एकस्तस्मिन्क्षणे मन्त्री तस्याज्ञामुदलङ्घयत् ।
स्मरन्वा तत्पितुर्वाचं भजन्वा दर्पविक्रियाम् ॥ ३७८ ॥
प्राप्तायामथ यामिन्यां तल्पे कोपाकुलो नृपः ।
तमाज्ञातिक्रमं ध्यायन्न निद्रां क्षणमप्यगात् ॥ ३७९ ॥
एवं कृतागसं हन्तुं सस्पृहस्य तदाश्रयात् ।
बहवः प्रत्यभासन्त वध्यास्तस्योद्यतक्रुधः ॥ ३८० ॥
विचारशैलमथितात्तस्य चित्तमहोदधेः ।
प्रकोपकालकूटस्य पश्चाच्छमसुधोदगात् ॥ ३८१ ॥
दध्यौ सोथ गतक्रोधः प्रवृद्धः प्राणिसंक्षयः ।
एतावान्कस्य नु कृते कर्तव्यः प्रत्यभान्मम ॥ ३८२ ॥
अकार्याण्यपि पर्याप्य कृत्वापि वृजिनार्जनम् ।
विधीयते हितं यस्य स देहः कस्य सुस्थिरः ॥ ३८३ ॥
कृतघ्नस्यास्य कायस्य हेतोरगलितस्मृतेः ।
हन्तव्याः कस्य पन्थानः प्रतिभान्त्यनपायिनः ॥ ३८४ ॥
विदन्ति जन्तवो हन्त पच्यमानस्य नात्मनः ।
अवस्थां कालसूदेन कृतां तां तां क्षणे क्षणे ॥ ३८५ ॥
ह्यः पश्यद्भिरकारणस्मितसितं पाथोजकोशाकृति
श्मश्रूद्बोधकठोरमद्य रभसादुत्तप्ततताम्रप्रभम् ।
प्रातर्जीर्णवलक्षकेशविकृतं वृद्धाजशीर्षोपमं
वक्त्रं नः परिहस्यते ध्रुवमिदं भूतैश्चिरस्थास्नुभिः ॥ ३८६ ॥
इत्याद्यनित्यताचिन्तादत्तशान्तिसुखादरः ।
राज्यं संत्यज्य स वनं प्लक्षप्रस्रवणं ययौ ॥ ३८७ ॥

गच्छ भद्र वनायैव तपस्याधीयतां मनः ।
सापायाः क्षणभङ्गिन्य एवंप्राया विभूतयः ॥ ३८८ ॥
तेन संत्यजता राज्यं लिखितेन निजासने ।
वैराग्यवासनोत्सेकः श्लोकेनानेन सूचितः ॥ ३८९ ॥
अभग्नशमसंवेगलब्धसिद्धिर्नराधिपः ।
श्रीपर्वतादावद्यापि भव्यानामेति दृक्पथम् ॥ ३९० ॥
तथा याते प्रभोः पुत्रे मित्रशर्मा शुचान्वितः ।
वितस्तासिन्धुसंभेदे सभार्यो जीवितं जहौ ॥ ३९१ ॥
राज्यं समां समासार्धां कृत्वा स वसुधाधिपः ।
निःश्रेयसाप्तिनिःश्रेणीं सुधीः सिद्धिं समासदत् ॥ ३९२ ॥
वज्रादित्यो वप्पियको ललितापीड इत्यपि ।
ख्यातोथ भूभृदभवद्यन्माता चक्रमर्दिका ॥ ३९३ ॥
स क्रूरचरितो भ्रातुः प्रजाह्लादविधायिनः ।
सुधांशोरिव दुर्वासा नूनं विसदृशोभवत् ॥ ३९४ ॥
परिहासपुरात्पित्र्यां नानोपकरणावलीम् ।
स जहार दुराचारो भूभृल्लोभवशंवदः ॥ ३९५ ॥
रागिणो भूमिपालस्य भूयस्योन्तःपुरस्त्रियः ।
बीजाश्वस्येव वडवास्तास्ताः समभवन्प्रियाः ॥ ३९६ ॥
विक्रयेण प्रयच्छन्स म्लेच्छेभ्यः पुरुषान्बहून् ।
म्लेच्छोचितां व्यवहृतिं प्रावर्तयत मण्डले ॥ ३९७ ॥
सप्ताब्दान्वसुधां भुक्त्वा सोतिसंभोगजन्मना ।
जगाम संक्षयं क्षमाभृत्क्षयरोगेण किल्बिषी ॥ ३९८ ॥
तस्मान्मञ्जरिकादेव्या जातो राजा प्रजान्तकः ।
ततः पृथिव्यापीडोभूत्समासाश्चतुरः समाः ॥ ३९९ ॥

जातो मम्माभिधानायां वप्पियात्सप्त वासरान्[1] ।
संग्रामापीडनामाथ तमुत्पाट्याभवन्नृपः ॥ ४०० ॥
भ्रातरौ तौ समासाद्य राज्यं नैव व्यराजत ।
हेमन्तशिशिरावाप्य चण्डांशोरिव मण्डलम् ॥ ४०१ ॥
शान्तेथ संग्रामापीडे कनीयान्वप्पियात्मजः ।
राजा श्रीमाञ्जयापीडः प्राप राज्यं ततः क्रमात् ॥ ४०२ ॥
पितामहसमो भूया इत्यमात्यवचः स्मरन् ।
जिगीषुः संभृतबलो दिग्जयाय स निर्ययौ ॥ ४०३ ॥
स्वदेशादेव नयविद्भशं नीतैः समं नृपैः ।
वृद्धान्पप्रच्छ निर्गच्छन्कश्मीरद्वारगोचरान् ॥ ४०४ ॥
पितामहस्य नः सैन्यं कियन्निर्गच्छतोभवत् ।
इति ब्रूताद्य यात्रासु यूयं संख्यातसैनिकाः ॥ ४०५ ॥
कृतस्मितास्तमूचुस्ते किं प्रश्नेनामुना प्रभो ।
वस्तु कश्चिदतिक्रान्तं नानुकर्तुं क्षमोधुना ॥ ४०६ ॥
कर्णीरथानां तस्यासीत्सपादं लक्षमीशितुः ।
अशीतिस्तु सहस्राणि देवस्याद्य जयोद्यमे ॥ ४०७ ॥
तदाकर्ण्य जयापीडो बहु मेने न निर्जयम् ।
क्षिप्रं क्षितेः संकुचन्त्याः कालस्य बलवत्तया ॥ ४०८ ॥
जिगीषोः क्ष्माभुजस्तस्य भावमालोक्य तादृशम् ।
दध्युर्भावज्ञतां वृद्धा ललितादित्यभूपतेः ॥ ४०९ ॥
तस्य दूरप्रयातस्य स्यालो जज्ञाभिधो बलात् ।
द्रोहेणाक्रम्य कश्मीरान्स्वयं भेजे नृपासनम् ॥ ४१० ॥
दिने दिने राजसैन्यात्स्वदेशस्मारिणस्ततः ।
सैनिकाः स्वा न्यवर्तन्त स्वामिभक्तिपराङ्मुखाः ॥ ४११ ॥

---

१ वत्सरान् इति स्यात् ।

प्रख्यापयिष्यन्स्वामेव शक्तिं परिकरं विना ।
निश्चिकाय जयापीडो युक्तां कांचित्तु संविदम् ॥ ४१२ ॥
अभङ्गुरास्तेभिमानास्तस्यैवासन्मनस्विनः ।
अत्यवर्तत यैरेष वैधात्रीरपि वामताः ॥ ४१३ ॥
स विसृज्य भुवं स्वां स्वां भूपतीननुयात्रिकान् ।
प्रयागमगमत्सैन्यैः परिमेयैर्निजैः समम् ॥ ४१४ ॥
तत्रावशिष्टान्सुच्चित्य वाजिनः स मनोजवान् ।
द्विजेभ्यो लक्षमेकोनं प्रददौ भूरिदक्षिणम् ॥ ४१५ ॥
संपूर्णमन्यो लक्षं यः प्रदद्यादत्र वाजिनाम् ।
तन्मुद्रयेयं मन्मुद्रा विनिवार्येत्युदीर्य च ॥ ४१६ ॥
श्रीजयापीडदेवस्येत्यक्षरैरुपलक्षिताम् ।
दिग्देशगामिनो मुद्रां गाङ्गस्य पयसो ददौ ॥ ४१७ ॥
तन्मुद्राङ्कं पयः पीत्वा गाङ्गमद्यापि निर्मलम् ।
चित्ते प्रवर्धते तापो भूपानामभिमानिनाम् ॥ ४१८ ॥
स्वदेशगमनानुज्ञां सैन्यस्याप्तमुखेन सः ।
दत्त्वा निशायामेकाकी निर्ययौ कटकान्तरात् ॥ ४१९ ॥
मण्डलेषु नरेन्द्राणां पयोदानामिवार्यमा ।
... ... ॥ ४२० ॥
गौडराजाश्रयं गुप्तं जयन्ताख्येन भूभुजा ।
प्रविवेश क्रमेणाथ नगरं पौण्ड्रवर्धनम् ॥ ४२१ ॥
तस्मिन्सौराज्यरम्याभिः प्रीतः पौरविभूतिभिः ।
लास्यं स द्रष्टुमविशत्कार्तिकेयनिकेतनम् ॥ ४२२ ॥
भरतानुगमालक्ष्य नृत्तगीतादि शास्त्रवित् ।
ततो देवगृहद्वारशिलामध्यास्त स क्षणम् ॥ ४२३ ॥

तेजोविशेषचकितैर्जनैः परिहृतान्तिकम् ।
नर्तकी कमला नाम कान्तिमन्तं ददर्श तम् ॥ ४२४ ॥

असामान्याकृतेः पुंसः सा ददर्श सविस्मया ।
अंसपृष्ठेथ धावन्तं करं तस्यान्तरान्तरा ॥ ४२५ ॥

अचिन्तयत्ततो गूढं चरन्नेष भवेद्ध्रुवम् ।
राजा वा राजपुत्रो वा लोकोत्तरकुलोद्भवः ॥ ४२६ ॥

एवं ग्रहीतुमभ्यासः पृष्ठस्थाः पर्णवीटिकाः ।
अंसपृष्ठेन येनायं लसत्पाणिः प्रतिक्षणम् ॥ ४२७ ॥

लोलश्रोत्रपुटो मदोत्कमधुपापातात्ययेपि द्विपः
सिंहोसत्यपि पृष्ठतः करिकुले व्यावृत्य विप्रेक्षिता ।
मेघौन्मुख्यशमेप्यशान्तवदनोद्गीर्णस्वरो बर्हिण-
श्रेष्टानां विरमेन्न हेतुविगमेप्यभ्यासदीर्घा स्थितिः ॥ ४२८ ॥

इत्यन्तश्चिन्तयन्ती सा कृत्वा संक्रान्तसंविदम् ।
सखीमभिन्नहृदयां विससर्ज तदन्तिकम् ॥ ४२९ ॥

प्राग्वत्पृष्ठं गते पाणौ पूगखण्डांस्तयार्पितान् ।
वक्त्रे क्षिपञ्जयापीडः परिवृत्त्य ददर्श ताम् ॥ ४३० ॥

भ्रूसंज्ञयासि कस्य त्वं पृष्टाया इति सुभ्रुवः ।
ददत्या वीटिकास्तस्या वृत्तान्तमुपलब्धवान् ॥ ४३१ ॥

तया जनितदाक्षिण्यस्तैस्तैर्मधुरभाषितैः ।
सख्याः समाप्तनृत्ताया निन्ये स वसतिं शनैः ॥ ४३२ ॥

अग्राम्यपेशलालापा तथा तं सा विलासिनी ।
उपाचरत्परार्ध्यश्रीः सोप्यभूद्विस्मितो यथा ॥ ४३३ ॥

ततः शशाङ्कधवले संजाते रजनीमुखे ।
पाणिनालम्ब्य भूपालं शय्यावेश्म विवेश सा ॥ ४३४ ॥

ततः काञ्चनपर्यङ्कशायी मैरेयमत्तया।
तयार्थितोपि शिथिलं विदधे नाधरांशुकम् ॥ ४३५ ॥
प्रवेशयन्निव बृहद्वक्षस्तां सत्रपां ततः।
दीर्घबाहुः समाश्लिष्य स शनैरिदमब्रवीत् ॥ ४३६ ॥
न त्वं पद्मपलाशाक्षि न मे हृदयहारिणी।
किं तु कालानुरोधोयं सापराधं करोति माम् ॥ ४३७ ॥
दासस्तवायं कल्याणि गुणैः क्रीतोस्म्यकृत्रिमैः।
अचिराज्ज्ञातवृत्तान्ता ध्रुवं दाक्षिण्यमेष्यसि ॥ ४३८ ॥
कार्यशेषमनिष्पाद्य सज्जं मानिनि कंचन।
अभोगे कृतसंकल्पं सुखानां त्वमवेहि माम् ॥ ४३९ ॥
तामेवमुक्त्वा पर्यङ्कं साङ्गुलीयेन पाणिना।
वादयन्निव निःश्वस्य श्लोकमेतं पपाठ सः ॥ ४४० ॥
असमाप्तजिगीषस्य स्त्रीचिन्ता का मनस्विनः।
अनाक्रम्य जगत्कृत्स्नं नो संध्यां भजते रविः ॥ ४४१ ॥
श्लोकेनात्मगतं तेन पठितेन महीभुजा।
सा कलाकुशलाज्ञासीन्महान्तं कंचिदेव तम् ॥ ४४२ ॥
गन्तुकामं च तं प्रातर्नृपं प्रणयिनी बलात्।
अर्थयित्वा चिरं कालमप्रस्थानमयाचत ॥ ४४३ ॥
एकदा वन्दितुं संध्यां प्रयातः सरितस्तटम्।
चिरायातो गृहं तस्या ददर्श भृशविह्वलम् ॥ ४४४ ॥
किमेतदिति पृष्टाथ तमूचे सा शुचिस्मिता।
सिंहोत्र सुमहात्रात्रौ निपत्याहन्ति देहिनः ॥ ४४५ ॥
नरनागाश्वसंहारः कृतस्तेन दिने दिने।
त्वय्यभूवं चिरायाते तद्भयेन समाकुला ॥ ४४६ ॥

राजानो राजपुत्रा वा तद्भयेन विसूत्रिताः ।
गृहेभ्यो नात्र निर्यान्ति प्रवृत्ते क्षणदाक्षणे ॥ ४४७ ॥
तामिति ब्रुवतीं मुग्धां निषिध्य च विहस्य च ।
सव्रीड इव तां रात्रिं जयापीडोत्यवाहयत् ॥ ४४८ ॥
अपरेद्युर्दिनापाये निर्गतो नगरान्तरात् ।
सिंहागमप्रतीक्षोभून्महावटतरोरधः ॥ ४४९ ॥
अदृश्यत ततो दूरादुत्फुल्लबकुलच्छविः ।
अट्टहासः कृतान्तस्य संचारीव मृगाधिपः ॥ ४५० ॥
अध्वनान्येन यान्तं तमथ मन्थरगामिनम् ।
राजसिंहो नदन्सिंहं समाह्वयत हेलया ॥ ४५१ ॥
स्तब्धश्रोत्रो व्यात्तवक्त्रः कम्प्रकूर्चः प्रदीप्तदृक् ।
उदस्तपूर्वकायस्तं सगर्जः समुपाद्रवत् ॥ ४५२ ॥
तस्य न्यस्याननबिले कफोणिं पततः क्रुधा ।
क्षिप्रकारी जयापीडो वक्षः क्षुरिकयाभिनत् ॥ ४५३ ॥
शोणितं जग्धगन्धेभसिन्दूराभं विमुञ्चता ।
एकप्रहारभिन्नेन तेनात्यज्यत जीवितम् ॥ ४५४ ॥
आमुक्तव्रणपट्टः स कफोणिमथ गोपयन् ।
प्रविश्य नर्तकीवेश्म निशि सुष्वाप पूर्ववत् ॥ ४५५ ॥
प्रभातायां विभावर्यां श्रुत्वा सिंहं हतं नृपः ।
प्रहृष्टः कौतुकाद्द्रष्टुं जयन्तो निर्ययौ स्वयम् ॥ ४५६ ॥
स दृष्ट्वा तं महाकायमेकप्रहृतिसंहृतम् ।
साश्चर्यो निश्चयान्मेने प्रहर्तारममानुषम् ॥ ४५७ ॥
तस्य दन्तान्तरालुब्धं केयूरं पार्श्वगार्पितम् ।
श्रीजयापीडनामाङ्कं ददर्शाथ सविस्मयः ॥ ४५८ ॥

स्यात्कुतोत्र स भूपाल इति ब्रुवति पार्थिवे ।
जयापीडागमाशङ्कि पुरमासीद्भयाकुलम् ॥ ४५९ ॥
ततः पौरान्विमृश्यैवं जयन्तः क्षितिपोब्रवीत् ।
प्रहर्षावसरे मूढाः कस्माद्वो भयसंभवः ॥ ४६० ॥
श्रूयते हि जयापीडो राजा भुजबलोर्जितः ।
केनापि हेतुना भ्राम्यन्नेकाक्येव दिगन्तरे ॥ ४६१ ॥
राजपुत्रः कलट इत्युक्त्वा कल्याणदेव्यसौ ।
तस्मै नियमिता दातुं निष्पुत्रेण सुता[1] मया ॥ ४६२ ॥
सोन्वेष्यश्चेत्स्वयं प्राप्तस्तद्रत्नाहरणेच्छया ।
रत्नद्वीपं प्रतिष्ठासोर्निधानासादनं गृहात् ॥ ४६३ ॥
अस्मिन्नेव पुरे तेन भाव्यं भुवनशासिना ।
ब्रूयादेनं ममान्वेष्य[2] योसौ दद्यामभीप्सितम् ॥ ४६४ ॥
वाचि सप्रत्ययाः पौरा भूपतेः सत्यवादिनः ।
अन्विष्य कमलावासवर्तिनं तं न्यवेदयन् ॥ ४६५ ॥
सामात्यान्तःपुरोभ्येत्य प्रयत्नेन प्रसाद्य तम् ।
ततः स्ववेश्म नृपतिर्निनाय विहितोत्सवः ॥ ४६६ ॥
कल्याणदेव्यास्तेनाथ कल्याणाभिनिवेशिना ।
राजलक्ष्म्या व्यपास्ताया इव सोजिग्रहत्करम् ॥ ४६७ ॥
व्यधाद्विनापि सामग्रीं तत्र शक्तिं प्रकाशयन् ।
पञ्च गौडाधिपाञ्जित्वा श्वशुरं तदधीश्वरम् ॥ ४६८ ॥
गतशेषं प्रभुत्यक्तं सैन्यं संवाहयन्स्थितः ।
मित्रशर्मात्मजो देवशर्मामात्यस्तमाययौ ॥ ४६९ ॥
निजदेशं प्रति ततः स प्रतस्थे तदर्थितः ।
अग्रे जयश्रियं कुर्वन्पश्चात्तेथ[3] सुलोचने ॥ ४७० ॥

---

१ सुता इत्युचितम् । २ ममान्विष्य इत्युचितम् । ३ ते च इत्युचितम् ।

सिंहासनं जितादादौ कन्यकुब्जमहीभुजः ।
स राज्यककुदं राजा जहारोदारपौरुषः ॥ ४७१ ॥
तस्मिन्प्रविष्टे स्वभुवं स्फूर्जदूर्जितविक्रमे ।
सैन्यैः समं समित्सज्जैर्जज्ञो योद्धुं विनिर्ययौ ॥ ४७२ ॥
शुष्कलेत्राभिधे ग्रामे तेन सार्धं सुदारुणः ।
जयापीडस्य संग्रामः सुबहूनि दिनान्यभूत् ॥ ४७३ ॥
अनुरक्तप्रजो राजा जज्ञराज्यासहिष्णुभिः ।
युधि सोन्विष्यमाणोभूद्ग्राम्याटविकमण्डलैः ॥ ४७४ ॥
श्रीदेवो ग्रामचण्डालः प्राप्तो ग्राम्यैः समं युधि ।
कोत्र जज्ञ इति भ्राम्यन्योधान्पप्रच्छ सर्वतः ॥ ४७५ ॥
तृष्णार्तं स्वर्णभृङ्गारात्पिबन्तं वारि तस्य ते ।
रणमध्ये हयारूढं तं दूरात्समदर्शयन् ॥ ४७६ ॥
भ्रमयन्क्षेपणीयं स क्षिप्त्वाश्मानं तदानने ।
सोयं हतो मया जज्ञ इत्यमोघक्रियोनदत् ॥ ४७७ ॥
साहायकाय राज्ञोहं यामीत्युक्त्वार्थिताशनः ।
मातुर्हसन्त्या जज्ञस्य प्रतिज्ञायाययौ वधम् ॥ ४७८ ॥
अश्मसंरुग्णभीमास्यं मुमूर्षुं पतितं हयात् ।
विवेष्टमानं मेदिन्यां जज्ञं त्यक्त्वा ययुर्निजाः ॥ ४७९ ॥
स समर्थाहितापातचिन्तासततदुःस्थितः ।
द्रोहाज्जितेन राज्येन त्रिभिर्वर्षैर्व्ययुज्यत ॥ ४८० ॥
न्यासापहाराद्वणिजां वेश्यानां कामिवञ्चनात् ।
द्रोहाच्चोपनता राज्ञामस्थिरा एव संपदः ॥ ४८१ ॥
हते जज्ञे जयापीडः प्रत्यावृत्त्य निजां श्रियम् ।
जग्राह दोष्णा भूभारं कृत्येन च सतां मनः ॥ ४८२ ॥

---

१ सोन्वीयमानो इति स्यात् । २ द्रोहार्जितेन इति स्यात् ।

प्रपेदे यत्र कल्याणं स विरोधिवधान्नृपः ।
देशे कल्याणपुरकृत्तत्र कल्याणदेव्यभूत् ॥ ४८३ ॥
राजा महाणपुरकृच्चक्रे विपुलकेशवम् ।
कमला सा स्वनाम्नापि कमलाख्यं पुरं व्यधात् ॥ ४८४ ॥
महाप्रतीहारपीडाधिकारं प्रतिपद्य सः ।
कल्याणदेवीदाक्षिण्यादकरोदधिकोन्नतिम् ॥ ४८५ ॥
उत्पत्तिभूमौ देशेस्मिन्दूरदूरतिरोहिता ।
कश्यपेन वितस्तेव तेन विद्यावतारिता ॥ ४८६ ॥
वचो मूर्खोयमित्येव कस्मैचिद्वदते स्फुटम् ।
सर्वज्ञानं ददच्चक्रे सर्वान्विद्याभियोगिनः ॥ ४८७ ॥
देशान्तरादागमय्य व्याचक्षाणः क्षमापतिः ।
प्रावर्तयत विच्छिन्नं महाभाष्यं स्वमण्डले ॥ ४८८ ॥
क्षीराभिधाच्छब्दविद्योपाध्यायात्संभृतश्रुतः ।
बुधैः सह ययौ वृद्धिं स जयापीडपण्डितः ॥ ४८९ ॥
भूपतेरात्मना स्पर्धां चक्षमे न स कस्यचित् ।
आत्मनस्तु बुधैः स्पर्धां शुद्धधीर्बह्वमन्यत ॥ ४९० ॥
तावत्पण्डितशब्देभूद्राजशब्दादपि प्रथा ।
तैस्तैर्दोषैर्न तु म्लानिं कालान्तरवदाययौ ॥ ४९१ ॥
नृपतौ विद्वदायत्ते राजसांमुख्यकाङ्क्षिभिः ।
गृहा बभूवुर्विदुषां व्याप्ताः सेवागतैर्नृपैः ॥ ४९२ ॥
समग्रहीत्तथा राजा सोन्विष्यन्निखिलान्बुधान् ।
विद्वद्दुर्भिक्षमभवद्यथान्यनृपमण्डले ॥ ४९३ ॥
अध्यक्षो भक्तशालायां शुक्रदन्तस्य मन्त्रिणः ।
विद्वत्तया थक्कियाख्यस्तेन स्वीकृत्य वर्धितः ॥ ४९४ ॥

---

१ पीठाधिकारं इतिस्यात् ।

विद्वान्दीनारलक्षेण प्रत्यहं कृतवेतनः ।
भट्टोभूदुद्भटस्तस्य भूमिभर्तुः सभापतिः ॥ ४९५ ॥
स दामोदरगुप्ताख्यं कुट्टनीमतकारिणम् ।
कविं कविं बलिरिव धुर्यं धीसचिवं व्यधात् ॥ ४९६ ॥
मनोरथः शङ्खदत्तश्चटकः संधिमांस्तथा ।
बभूवुः कवयस्तस्य वामनाद्याश्च मन्त्रिणः ॥ ४९७ ॥
स स्वप्ने पश्चिमाशायां लक्षयन्नुदयं रवेः ।
देशं धर्मोत्तराचार्ये प्रविष्टे साध्वमन्यत ॥ ४९८ ॥
सचेताः संस्तवव्यक्तविवेकृत्वो बभूव सः ।
भावानां भुज्यमानानामास्वादान्तरविन्नृपः ॥ ४९९ ॥
अपश्यद्भिर्महास्वादान्भावान्स्वादुविवेकिभिः ।
किं ज्ञेयमशनादन्यत्क्षमापैरन्धैरिवोक्षभिः ॥ ५०० ॥
आरूढस्य चितां कृतानुमरणोद्योगप्रियालिङ्गनं
पुण्ड्रेक्षुद्रवपानमुल्बणमहामोहप्रलुप्तस्मृतेः ।
वीतासोरवतंसमाल्यवलयामोदश्च यादृग्भवे-
द्भावानां सुभगः स्वभावमहिमा निश्चेतसस्तादृशः ॥ ५०१ ॥
मन्त्रविक्रमयोस्तस्य द्वयोर्दर्पणयोरिव ।
एकैव बिम्बिता मूर्तिः सहस्रगुणतां ययौ ॥ ५०२ ॥
अकुर्वन्विगुणामाज्ञां लङ्केन्द्रात्पश्च राक्षसान् ।
तेनानयेति जगदे दूतो जातु पुरःस्थितः ॥ ५०३ ॥
सांधिविग्रहिकः सोथ गच्छन्पोताच्युतोम्बुधौ ।
प्राप पारं तिमिग्रासं तिमिमुत्पाट्य निर्गतः ॥ ५०४ ॥
प्रियमर्त्यो रामभक्त्या नृपाज्ञालेखदायिनम् ।
स्वदेशमनयद्दत्तै रक्षोभिस्तं विभीषणः ॥ ५०५ ॥

---

१ स्वाद्वविवेकिभिः इतिस्यात् ।

दूतं वित्तैः पूरयित्वा सरोगाधं च राक्षसैः ।
चक्रे जयपुरं कोट्टं त्रिविष्टपसमं नृपः ॥ ५०६ ॥
बुद्धत्रयं महाकारं विहारं च विधाय सः ।
नगरान्तर्जयादेवीं पुण्यकर्मा स निर्ममे ॥ ५०७ ॥
तत्पुरे चतुरात्मा च शेषशायी च केशवः ।
विष्णुलोकस्थितिं त्यक्त्वा ध्रुवं बध्नाति संनिधिम् ॥५०८॥
अन्यत्कर्मान्तरं किंचित्कारयित्वा स राक्षसान् ।
प्यधात्कारुभिरेवाम्भ इति शंसन्ति केचन ॥ ५०९ ॥
स हि स्वप्ने जलान्तर्मे कुरु द्वारवतीमिति ।
उक्तः कंसारिणा चक्रे विनिर्माणं तथाविधम् ॥ ५१० ॥
श्रीद्वारवत्यधिष्ठानं बाह्यं कोट्टं तथाह्यसौ ।
अभ्यन्तरं जयपुरं ब्रूतेद्याप्यखिलो जनः ॥ ५११ ॥
मन्त्री पञ्चमहाशब्दभाजनं जगतीभुजः ।
तस्मिञ्जयपुरे कोट्टे जयदत्तो व्यधान्मठम् ॥ ५१२ ॥
राजक्षत्तुः प्रमोदस्य जामाता मथुरापतेः ।
आचाभिधो व्यरचयच्छुचिराचेश्वरं हरम् ॥ ५१३ ॥
पुनः संभृतसामग्र्यो दिग्जयाय विनिर्ययौ ।
बलैर्जलधिवेलाद्रीन्द्राघयन्नलघुद्विपैः ॥ ५१४ ॥
संप्रविष्टापि पूर्वाब्धिमविच्छिन्ना हिमाचले ।
भगीरथस्य गङ्गेव रेजे तस्यानुगा चमूः ॥ ५१५ ॥
सार्धं प्रचण्डैश्चण्डालैरटन्तः कटकाद्बहिः ।
तस्यासन्यामिका रात्रौ सुम्मुनिप्रमुखा नृपाः ॥ ५१६ ॥
नामान्यद्विनयादित्य इति प्रख्यापयन्नृपः ।
पूर्वाशां विनयादित्यपुरेणालंकृतां व्यधात् ॥ ५१७ ॥

अत्युत्सेकेन सहसा साहसाध्यवसायिनाम् ।
श्रीरारोहति संदेहं महतामपि भूभृताम् ॥ ५१८ ॥
भीमसेनाभिधानस्य स दुर्गे पूर्वदिक्पतेः ।
निःशब्दो व्रतिभिः सार्धं व्रतिलिङ्गी विवेश यत् ॥ ५१९ ॥
तं रन्ध्रान्वेषिणं तत्र परिज्ञाय चिरस्थितः ।
भ्राता जज्ञस्य सिद्धाख्यो गत्वा राज्ञे न्यवेदयत् ॥ ५२० ॥
भूपतिं भीमसेनोथ राजाकस्माद्बबन्ध तम् ।
नहुषाजगरो भीममिव भीमपराक्रमम् ॥ ५२१ ॥
तस्मिन्वीरे तथा बद्धे धुर्ये पुरुषकारिणाम् ।
पौरुषद्वेषिणा जाने दैवेनोन्नमितं शिरः ॥ ५२२ ॥
जयापीडस्त्वसंमूढो व्यसनेप्यतिदारुणे ।
तांस्तान्संचिन्तयन्नासीदुपायानुदयोन्मुखः ॥ ५२३ ॥
अत्रान्तरे नरपतेः पौराणामतिदुस्तरा ।
लूतामयकृता व्यापदुदपद्यत मण्डले ॥ ५२४ ॥
आमयः स्पर्शसंचारी तत्र व्यापादकश्च सः ।
देशदोषादतो जन्तुर्लूताव्याप्तो विवर्ज्यते ॥ ५२५ ॥
तदाकर्ण्य जयापीडो जातोपायप्रयुक्तधीः ।
स्वभृत्येनोपयुक्तानि द्रव्याण्यानीतवान्नहः ॥ ५२६ ॥
तैः पित्तोद्रेचकैर्भुक्तैर्ज्वलत्पित्तोवहज्ज्वरम् ।
वज्रवृक्षपयश्चाङ्गे क्षिप्त्वा सपिटकोभवत् ॥ ५२७ ॥
तं लूताव्याप्तमाकर्ण्य विपक्षो रक्षिणां मुखात् ।
विपत्स्यते ध्रुवमिति ध्यात्वा देशाद्बहिर्व्यधात् ॥ ५२८ ॥
एवं स्वमतिमाहात्म्यात्संतीर्णो विपदर्णवात् ।
व्याप्तव्योमाग्रहीद्दुर्गं यशश्च परिपन्थिनः ॥ ५२९ ॥

यः सर्वकालमबुधैः परिहस्यमानो
मूलाङ्कुराद्यपि न जातु पुरस्करोति ।
व्यापत्सु शास्त्रविटपी स फलं प्रसूय
पुंसः किलैकपद एव लुनात्यलक्ष्मीम् ॥ ५३० ॥

तमैच्छदभिसंधातुं विद्याविक्रमसंयुतः ।
मायाव्यरमुडिर्नाम राजा नेपालपालकः ॥ ५३१ ॥
अकृतप्रणतिस्तस्य प्रविष्टस्य स्वमण्डलम् ।
अग्रात्सुदूरमध्वानं ससैन्योपससार सः ॥ ५३२ ॥
जिगीषोस्तस्य तु तथा तत्तत्पार्थिवनिर्जयः ।
पृथक्प्रयत्ननिर्वर्त्यो नाभूत्तदनुसारिणः ॥ ५३३ ॥
मग्नं क्वापि क्वचिद्दृश्यं प्रतिदेशं स वैरिणम् ।
श्येनः कपोतं कक्ष्यान्तरिवान्विष्यञ्जगाम सः ॥ ५३४ ॥
ततो निःशेषितापाये तस्मिन्कुर्वन्स दिग्जयम् ।
आसन्नाब्धेस्तटे सिन्धोः समुपावेशयद्बलम् ॥ ५३५ ॥

प्रतस्थे दिवसैर्द्वित्रैरथ पूर्वार्णवोन्मुखः ।
कर्षन्वेलानिलस्पर्शोत्सृष्टध्वजपटाश्रमूः ॥ ५३६ ॥
ततस्तस्मिन्सरित्पारे दक्षिणस्मिन्क्षमापतेः ।
तस्थावरमुडिः सैन्यं स्वच्छत्राङ्कं प्रकाशयन् ॥ ५३७ ॥
भूरिभेरीरवोद्गारि प्रबलं वीक्ष्य तद्बलम् ।
प्रजज्वाल जयापीडः पीतसर्पिरिवानलः ॥ ५३८ ॥
स जानुदघ्नं निर्विघ्नं पश्यन्नग्रे सरिज्जलम् ।
अपूर्वत्वादभूमिज्ञः क्रुद्धस्तर्तुं व्यगाहत ॥ ५३९ ॥
मध्यं प्राप्ते नृपे पूर्णा वेलया वर्धमानया ।
अकालेभूदगाधाम्भाः सार्णवाभ्यर्णगा सरित् ॥ ५४० ॥

नरनागाश्वबहुलं तया सैन्यं महीपतेः ।
प्रवृद्धया प्लाव्यमानं क्षणात्संक्षयमाययौ ॥ ५४१ ॥
नृपतिर्वीचिसंमर्दभ्रंशिताभरणांशुकः ।
बाहुभ्यां लहरीश्छिन्दञ्जलैर्दूरमनीयत ॥ ५४२ ॥
एकस्य करुणाक्रन्दैः सैन्यस्यान्यस्य गर्जितैः ।
सरित्तरङ्गघोषैश्च बभूवुस्तुमुला दिशः ॥ ५४३ ॥
क्षिप्रकारी सदृतिभिः संनद्धैः सरितोन्तरात् ।
स चाकृष्य जयापीडं बबन्ध विहितोत्सवः ॥ ५४४ ॥
दैवस्याम्बुमुचश्च नास्ति नियमः कोप्यानुकूल्यं प्रति
व्यञ्जन्यः प्रियमुत्कटं घटयते जन्तोः क्षणादप्रियम् ।
क्षिप्रं दीर्घनिदाघवासरविपत्संतापनिर्वापणं
प्रादुष्कृत्य वनस्पतेः प्रकुरुते विद्युद्विसर्गं च यः ॥ ५४५ ॥
स कालगण्डिकातीराश्रयात्युच्चाश्मवेश्मनि ।
निचिक्षेप जयापीडमाप्तानां रक्षिणां करे ॥ ५४६ ॥
तथा काश्मीरिको राजा निमग्नो व्यसने पुनः ।
स किंकर्तव्यतामूढः शुचा गूढमदह्यत ॥ ५४७ ॥
कलावत्सु शशाङ्कोपि तेजस्विष्वर्यमापि तम् ।
न ददर्श यथा धीमान्स ररक्ष तथा नृपः ॥ ५४८ ॥
अपश्यन्निर्गतः किंचिदालोकन्यस्तलोचनः ।
आसन्नां तटिनीमासीदुपायांश्च स चिन्तयन् ॥ ५४९ ॥
अवस्थावेदकास्तत्र ग्रथिताः पृथिवीभुजा ।
आर्द्रान्तःकरणैः श्लोकाः स्मर्यन्तेद्यापि सूरिभिः ॥ ५५० ॥
तथा तस्मिन्स्थिते मानी देवशर्मैव मन्त्रिषु ।
चिन्तयन्स्वामिसंमानमनिशं पर्यतप्यत ॥ ५५१ ॥

भर्तुः स्वदेहत्यागेन स हितं कर्तुमुद्यतः।
दूतैररमुडेश्चक्रे प्रियवाग्भिः प्रलोभनम् ॥ ५५२ ॥
जयापीडश्रिया साकं राज्यं कश्मीरमण्डले।
दास्यामि तुभ्यमित्यस्य दूतैः स श्रावितोभवत् ॥ ५५३ ॥
प्राप्तेषु प्रतिदूतेषु पूर्णायामथ संविदि।
गृहीतकटको मन्त्री नेपालविषयं ययौ ॥ ५५४ ॥
स कालगण्डिकासिन्धोरर्वाचि कटकं तटे।
स्थापयित्वा परं पारं ययौ मितपरिच्छदः ॥ ५५५ ॥
सामन्तैरग्रमायातैस्तं सभां संप्रवेशितम्।
सत्कृत्यारमुडिः प्रह्वं न्यवेशयत विष्टरे ॥ ५५६ ॥
अध्वश्रान्त इति क्षिप्रं प्रतिक्षिप्तः क्षमाभुजा।
तद्विसृष्टोपचारस्तन्निनायावसथे दिनम् ॥ ५५७ ॥
स चारमुडिभूभृच्च पीतकोशौ परस्परम्।
आसातां निर्जनेन्येद्युः कर्तव्यकृतनिश्चयौ ॥ ५५८ ॥
नृपमूचेथ सचिवो जयापीडार्जितं धनम्।
अस्ति सैन्ये तदाप्तानां तस्य वा विदितं च तत् ॥ ५५९ ॥
दानेन भविता मोक्षस्तवेत्युक्त्वा विमोहयन्।
तस्मात्तं प्रष्टुमिच्छामि क्व वसु न्यस्तमित्यहम् ॥ ५६० ॥
अत एव मया सैन्यं संहतं न प्रवेशितम्।
यदेतन्मध्यगाः शक्या न बन्द्धुं न्यासधारिणः ॥ ५६१ ॥
तस्मादेकैकमाहूय तेषु बद्धेषु सैनिकाः।
कोपमज्ञातहृदया न यास्यन्ति विवक्षवः ॥ ५६२ ॥
एवं विमोहितात्तस्मात्प्राज्ञोनुज्ञां स लब्धवान्।
बद्धस्य प्रययौ पार्श्वं जयापीडमहीभुजः ॥ ५६३ ॥

तदालोकनजं शोकं गोपयन्धैर्यसागरः ।
गृहं तन्निर्जनं कृत्वा क्षिप्रं पप्रच्छ तं नृपम् ॥ ५६४ ॥
अपि त्वया निजं तेजो भित्तिभूतं न हारितम् ।
तस्मिन्हि सति सिध्यन्ति साहसालेख्यकल्पनाः ॥ ५६५ ॥
स तं बभाषे निःशस्त्रो मन्त्रिन्नेवं व्यवस्थितः ।
अद्भुतं कर्म किं कुर्यां म्रियमाणेन तेजसा ।। ५६६ ॥
मन्त्री तमूचे तेजश्चेद्राजन्न निसृतं तव ।
जानीहि तत्क्षणेनैव लङ्घितं विपदर्णवम् ॥ ५६७ ॥
अपि वातायनादस्मात्पतित्वा निम्नगाम्भसि ।
पारं गन्तुं समर्थोसि सैन्यं ह्यत्र निजं तव ॥ ५६८ ॥
राजा जगाद तं नास्मात्पतित्वोत्थीयतेम्भसः ।
विना दृतिं दृतिश्चात्र दूरपाताद्विदीर्यते ॥ ५६९ ॥
तस्मान्नायमुपायोत्र न च नाम विमानितः ।
बहु मन्ये तनुत्यागमनिर्मथ्यापकारिणम् ॥ ५७० ॥
ततो निश्चित्य सोमात्यस्तमवादीन्महीपते ।
बहिः केनाप्युपायेन वहेस्त्वं नालिकाद्वयम् ॥ ५७१ ॥
प्रविश्यैकाकिनैवाथ द्रष्टव्यः संभृतो मया ।
सरिदुत्तरणोपायः सोनुष्ठेयोप्यशङ्कितम् ॥ ५७२ ॥
श्रुत्वेति निर्गतो गत्वा पायुक्षालनवेश्म सः ।
सविलम्बं बहिर्वेलां तदुक्तामत्यवाहयत् ॥ ५७३ ॥
एकाकी संप्रविष्टोथ तं ददर्श च्युतं क्षितौ ।
विपन्नं गलमुद्बध्य दृढया चेलचीरया ॥ ५७४ ॥
सद्योव्यापादिततनुः श्वासापूरितविग्रहः ।
अभेद्योहं तव दृतिर्मामारुह्य तरापगाम् ॥ ५७५ ॥

आरोढुरूरुबन्धाय स्वोर्वोरुष्णीषपट्टिका।
बद्धा मया तां प्रविश्य क्षिप्रमेव पताम्भसि ॥ ५७६ ॥
नखनिर्भिन्नगात्रास्रलिखितामिति संविदम्।
दृष्ट्वा चावाचयत्कण्ठनिबद्धांशुकपल्लवे ॥ ५७७ ॥
तिलकम् ॥
विस्मयस्नेहयोः पश्चात्पूर्वं स सरितस्ततः।
प्रवाहे पतितो राजा परं पारं समासदत् ॥ ५७८ ॥
प्राप्तसैन्यः प्रविश्याथ क्षणेनैव निनाय सः।
तमशेषं सभूपालं नेपालविषयं क्षयम् ॥ ५७९ ॥
रक्षिणोपि न यावत्तमजानन्बन्धनाच्युतम्।
तावदेव कथाशेषं विषयं तं चकार सः ॥ ५८० ॥
नृत्यत्कबन्धः स्वर्गस्त्रीमुक्तस्रक्कूर्यघोषवान्।
भूपतेर्बन्धनान्मोक्षे बभूव समरोत्सवः ॥ ५८१ ॥
दावानलोल्बणभुवो गिरयो निदाघे
यत्रैव दूरमितरे परिवर्जनीयाः।
तत्रैव संभवति सान्द्रहिमद्रवार्द्र-
श्चित्रं तुषारशिखरी नितरां निषेव्यः ॥ ५८२ ॥
जज्ञादीनां क्षणे यत्र जन्म स्वामिद्रुहामभूत्।
तत्रैव मन्त्रिणश्चित्रं कृतिनो देवशर्मणः ॥ ५८३ ॥
नाभूद्विसदृशः सूनुः स पितुर्मित्रशर्मणः।
तमोमयो भास्वरस्य भानोरिव शनैश्चरः ॥ ५८४ ॥
रक्षारत्नोपमे तस्मिन्सचिवेस्तमुपागते।
प्राप्तामपि श्रियं मेने नृपतिर्हारितामिव ॥ ५८५ ॥
तस्य दिग्विजयस्यान्ते मानम्लानिर्विनिर्ययौ।
मानसात्पृथिवीभर्तुर्नामात्योपक्रिया पुनः ॥ ५८६ ॥

चित्रं जितवतस्तस्य स्त्रीराज्ये मण्डलं महत् ।
इन्द्रियग्रामविजयं बह्वमन्यन्त भूभुजः ॥ ५८७ ॥
कर्णश्रीपटमाबध्य स्त्रीराज्यान्निर्जिताद्धृतम् ।
धर्माधिकरणाख्यं च कर्मस्थानं विनिर्ममे ॥ ५८८ ॥
द्वितीयं चलगञ्जाख्यं कर्मस्थानमपि व्यधात् ।
उपयुक्तं प्रयाणेषु गञ्जे दूरस्थिते निजे ॥ ५८९ ॥
किमन्यत्तद्भुजावासनिवासिन्या जयश्रियः ।
चत्वारोम्बुधयोभूवन्विलासमणिदर्पणाः ॥ ५९० ॥
पुनः प्रविश्य कश्मीरान्स भूपैः परिवारितः ।
चिराय बुभुजे राजा विजयोपार्जितां श्रियम् ॥ ५९१ ॥
तं कदाचिन्नृपं स्वप्ने सर्वाशाविजयोर्जितम् ।
पुमान्दिव्याकृतिः कोपि व्याजहार कृताञ्जलिः ॥ ५९२ ॥
सुखं त्वद्विषये राजन्वसन्नस्मिन्सबान्धवः ।
नागेन्द्रोहं महापद्मनामा त्वां शरणं श्रितः ॥ ५९३ ॥
द्राविडो मान्त्रिकः कश्चिन्मामितो नेतुमुद्यतः ।
जलाकाङ्क्षिणि वित्तेन विक्रेतुं मरुमण्डले ॥ ५९४ ॥
तस्माच्चेत्पासि मां तत्ते स्वर्णधातुसुवं गिरिम् ।
स्वदेशे दर्शयिष्यामि स्फीतोपकृतिकारिणः ॥ ५९५ ॥
राजा स्वप्ने निशम्येति दिक्षु संप्रेषितैश्चरैः ।
कुतोपि प्राप्तमानीय तं पप्रच्छ चिकीर्षितम् ॥ ५९६ ॥
दत्ताभयः स नागोक्तं यथावत्सर्वमुक्तवान् ।
सविस्मयेन भूभर्त्रा स्वयं भूयोप्यपृच्छयत ॥ ५९७ ॥
भूरियोजनविस्तीर्णात्सरसोभ्यन्तरात्त्वया ।
नागः प्रभावोत्कृष्टः स निष्कृष्टुं शक्यते कथम् ॥ ५९८ ॥

स तं व्यजिज्ञपद्राजन्नचिन्त्या मन्त्रशक्तयः ।
ताश्चेद्विद्दक्षसे क्षिप्रमेत्याश्चर्यं विलोक्यताम् ॥ ५९९ ॥
अथानुगम्यमानः स राज्ञा प्राप्तः सरोन्तिकम् ।
अभिमन्त्र्योज्झितैर्बाणैर्बद्धाशोशोषयज्जलम् ॥ ६०० ॥
राजापश्यत्ततः पङ्के लुठन्तं मानुषाननम् ।
वितस्तिदेश्यमुरगं भूरिह्रस्वोरगान्वितम् ॥ ६०१ ॥
मन्त्रसंकोचितं राजन्गृह्णाम्यमुमिति ब्रुवन् ।
मा ग्रहीरिति भूपेन सोभिधाय न्यषिध्यत ॥ ६०२ ॥
तूर्णं राजाज्ञया तेन मन्त्रवीर्येथ संहृते ।
सरोभूत्प्रागवस्थं तत्पुनर्व्याप्तदिगन्तरम् ॥ ६०३ ॥
द्राविडं द्रविणं दत्त्वा विसृज्याचिन्तयन्नृपः ।
दद्यान्नाद्याप्यसौ नागः कथं स्वर्णाकरं गिरिम् ॥ ६०४ ॥
ध्यायन्तमेव तं स्वप्ने ततः प्रोवाच पन्नगः ।
केनोपकारेण गिरिः स्वर्णसूस्तव दर्श्यते ॥ ६०५ ॥
स्वदेशोयं विदेशोयमिति बुद्धेः प्रवर्तकः ।
अन्वयव्यतिरेकाभ्यां स्थित्यभ्यासः शरीरिणाम् ॥ ६०६ ॥
शरणं त्वामहमगामवमानभयात्पुनः ।
शरण्येन सता तत्तु भवतैव प्रदर्शितम् ॥ ६०७ ॥
उदन्वानिव योक्षोभ्यो ज्ञायते संश्रितैः प्रभुः ।
का ह्रीस्ततोन्या सोन्यैर्यत्तेषामग्रेभिभूयते ॥ ६०८ ॥
याभिरन्याभिभूताभिरीक्षितस्त्रातुमक्षमः ।
तासां केनाभिमानेन स्त्रीणां द्रक्ष्याम्यहं मुखम् ॥ ६०९ ॥
ये कारणसधर्माणो व्यामूढस्य भवाम ते ।
विडम्ब्यमानाः क्रीडायै ते वयं प्राकृता इव ॥ ६१० ॥

अथवा श्रीमदान्धानामप्रेक्षापूर्वकारिणाम् ।
यत्किंचनविधायित्वं पार्थिवानां किमद्भुतम् ॥ ६११ ॥
मन्यन्ते क्ष्माभुजः क्रीडामुन्नतानां विमाननाम् ।
यावज्जीवं तु सश्वासं मरणं तां विदन्ति ते ॥ ६१२ ॥
उपेक्ष्यपक्षे भूपानां मानः स्वार्थस्य सिद्धये ।
स तु प्राणानुपेक्ष्यापि ग्राह्यपक्षे मनस्विनाम् ॥ ६१३ ॥
महतो येवमन्यन्ते घटन्ते च विमानितैः ।
मानस्वरूपाभिज्ञत्वं तेषां केनानुमीयते ॥ ६१४ ॥
भवन्त इव तत्रापि न वयं व्यर्थदर्शनाः ।
ताम्रधातुरसस्यन्दी दृश्यते तद्गिरिस्तव ॥ ६१५ ॥
इत्युक्त्वा संविदं तस्मै स्वप्न एव स तां ददौ ।
यया प्रबुद्धः प्रत्यूषे प्राप ताम्राकरं गिरिम् ॥ ६१६ ॥
स तस्मात्क्रमराज्यस्थात्ताम्रमाकृष्य निर्ममे ।
शतं दीन्नारकोटीनामेकोनं स्वाभिधाङ्कितम् ॥ ६१७ ॥
पूर्णे कोटिशतं कुर्याद्यः स मां निर्जयेदिति ।
दर्पभङ्गाय भूपानां समयं स्थापयन्नृपः ॥ ६१८ ॥
समस्या इव स क्ष्माभृत्सावशेषैर्विचेष्टितैः ।
चिक्षेप तुल्यनिर्माणकुण्ठत्वायेति भूभृताम् ॥ ६१९ ॥
अथाकस्मान्महीपालः प्रजाभाग्यविपर्ययैः ।
त्यक्त्वा पैतामहं मार्गं ययौ पित्र्येण सोध्वना ॥ ६२० ॥
किं दिग्जयादिभिः क्लेशैः स्वदेशादर्ज्यतां धनम् ।
इत्यर्थ्यमानः कायस्थैः स्वमण्डलमदण्डयत् ॥ ६२१ ॥
शिवदासादिभिर्लुब्धैर्धनस्थानाधिकारिभिः ।
प्रविवर्धितवित्तेच्छः सोभूल्लोभवशंवदः ॥ ६२२ ॥

काश्मीरिकाणामुत्पन्नं निजाज्ञाव्यवधायकम् ।
कायस्थवक्त्रप्रेक्षित्वं ततः प्रभृति भूभृतात् ॥ ६२३ ॥
मन्त्रस्तस्य महीभर्तुर्योभूत्तत्तन्नृपग्रहे ।
वास्तव्यबन्धचिन्तायां स एव स्थैर्यमाययौ ॥ ६२४ ॥
यत्सतां प्रशमाधायि पापस्योपदिदेश तत् ।
जयापीडस्य पाण्डित्यं प्रजापीडनशौण्डताम् ॥ ६२५ ॥
स सौदास इवानेकलोकप्राणापहारकृत् ।
अस्तुत्यकृत्यसौहित्यं स्वप्नेपि न समाययौ ॥ ६२६ ॥
कुर्मः किल्बिषमेतदेव हृदये कृत्वेति कौतूहला-
त्स्वैरिण्यः क्षितिपाश्च धिक्कपलतां क्रौर्यं च कुर्युः सकृत् ।
पापाक्रान्तधियो भवन्त्यथ तथा नान्त्यान्स्पृशन्त्योपि ता
दूयन्ते न च ते यथा स्वपितरौ घ्नन्तोपि शान्तत्रपाः ॥६२७॥
लोभाभ्यासात्तथा क्रौर्यं स ययौ वत्सरत्रयम् ।
सह कार्षिकभागेण यथाहार्षीच्छरत्फलम् ॥ ६२८ ॥
लुब्धत्वध्वस्तधीर्भूभृत्स्वल्पवित्तलवप्रदान् ।
सर्वस्वहारिणो मेने कायस्थान्हितकारिणः ॥ ६२९ ॥
सामुद्रास्तिमयो नृपाश्च सदृशा एके हृतादम्भसः
स्वस्मादेव कणान्धनस्य जहतो जानन्ति ये दातृताम् ।
सर्वस्मात्स्फुटलुण्ठिताद्धितरतो लेशान्किलान्येपि ये
दुष्कायस्थकुलस्य हन्त कलयन्त्यन्तर्हिताधायिताम् ॥६३०
सर्वकालं ब्राह्मणानामहो धैर्यमकुण्ठितम् ।
निस्त्रिंशस्य बभूवुर्ये तस्यापि परिपन्थिनः ॥ ६३१ ॥
देशान्तरं प्रयातेभ्यो ये शेषास्ते व्यरंसिषुः ।
विक्रोशन्तो न मरणाद्धरणान्नापि पार्थिवः ॥ ६३२ ॥

विप्राणां शतमेकोनमेकाहेन विपद्यते ।
निवेद्यमेतदित्यूचे क्रौर्याक्रान्तोथ पार्थिवः ॥ ६३३ ॥
विपर्यस्तचरित्रस्य तस्य क्रूरस्य भूपतेः ।
एवं स्तुतिविपर्यासः काव्येष्वपि बुधैः कृतः ॥ ६३४ ॥
नितान्तं कृतकृत्यस्य गुणवृद्धिविधायिनः ।
श्रीजयापीडदेवस्य पाणिनेश्च किमन्तरम् ॥ ६३५ ॥
भाष्यव्याख्याक्षणे श्लोको वैचक्षण्यहृतैः कृतः ।
सोयं तस्य विपर्यासो बुधैरेव प्रवर्तितः ॥ ६३६ ॥
कृतविप्रोपसर्गस्य भूतनिष्ठाविधायिनः ।
श्रीजयापीडदेवस्य पाणिनेश्च किमन्तरम् ॥ ६३७ ॥
तूलमूल्यापहर्ता च चन्द्रभागातटे स्थितः ।
विप्राणां शतमेकोनमशृणोत्तज्जले मृतम् ॥ ६३८ ॥
ततोग्रहारहरणादेव प्रविरतोभवत् ।
वास्तव्यानां हृतां भूमिं न तु निःशेषतो जहौ ॥ ६३९ ॥
अथ विज्ञप्तिसमये तूलमूल्यौकसो द्विजाः ।
चुक्रुशुर्जातु तस्याग्रे प्रतीहारकराहताः ॥ ६४० ॥
मनुमांधातृरामाद्या बभूवुः प्रवरा नृपाः ।
अन्वभावि तदग्रेपि ब्राह्मणैर्न विमानना ॥ ६४१ ॥
सेन्द्रं स्वर्गं सशैलां क्ष्मां सनागेन्द्रं रसातलम् ।
निर्दग्धुं हि क्षणेनैव विप्राः शक्ताः प्रकोपिताः ॥ ६४२ ॥
तदाकर्ण्यास्तसामन्तत्यक्तपृष्ठः क्षमापतिः ।
उल्लासितैकभ्रूलेखो दर्पाद्वचनमब्रवीत् ॥ ६४३ ॥
भिक्षाकणभुजां कोयं शठानां वो मदज्वरः ।
येनर्षय इव ब्रूथ प्रभावाख्यापकं वचः ॥ ६४४ ॥

भीमभ्रूभङ्गभीतेषु तेषु तूष्णीं स्थितेष्वथ।
इट्टिलाख्यस्तमाह स्म ब्रह्मतेजोनिधिर्द्विजः ॥ ६४५ ॥
राजन्युगानुरूप्येण भावाभावानुवर्तिनः।
शासितुस्तेनुसारेण न कस्माद्वयो वयम् ॥ ६४६ ॥
आह स्म विश्वामित्रो वा वसिष्ठो वा तपोनिधिः।
त्वमगस्त्योथवा किं स्या इति दर्पेण तं नृपः ॥ ६४७ ॥
ज्वलन्निव ततः स्फूर्जत्तेजोदुष्प्रेक्ष्यविग्रहः।
स फणीवोत्फणस्ताम्यन्कोपान्नृपतिमब्रवीत् ॥ ६४८ ॥
भवान्यत्र हरिश्चन्द्रस्त्रिशङ्कुर्नहुषोपि वा।
विश्वामित्रमुखेभ्योहं तत्रैको भवितुं क्षमः ॥ ६४९ ॥
विहस्योवाच तं राजा विश्वामित्रादिकोपतः।
हरिश्चन्द्रादयो नष्टास्त्वयि क्रुद्धे तु किं भवेत् ॥ ६५० ॥
पाणिना ताडयन्भुर्वीं ततः क्रुद्धोभ्यधाद्द्विजः।
मयि क्रुद्धे क्षणादेव ब्रह्मदण्डः पतेन्न किम् ॥ ६५१ ॥
तच्छ्रुत्वा विहसन्राजा कोपाद्ब्राह्मणमब्रवीत्।
पततु ब्रह्मदण्डोसौ किमद्यापि विलम्बते ॥ ६५२ ॥
नन्वयं पतितो जाल्मेत्यथ विप्रेण भाषिते।
राज्ञः कनकदण्डोङ्गे वितानस्खलितोपतत् ॥ ६५३ ॥
कृतव्रणः स तेनाङ्गे विसर्पक्लिन्नविग्रहः।
कीर्यमाणक्रिमिकुलः ककचैश्चारितैरभूत् ॥ ६५४ ॥
अनुभाव्य व्यथां भाविनिरयक्लेशवर्णिकाम्।
गणरात्रेण तं प्राणाः काङ्क्षितापगमा जहुः ॥ ६५५ ॥
ब्रह्मदण्डकृतं दण्डं भुक्त्वा दण्डधराधिपः।
अकाण्डदण्डस्रष्टाथ ययौ दण्डधरान्तिकम् ॥ ६५६ ॥

तस्यानियतचित्तस्य त्रिंशतं परिवत्सरान् ।
एवं प्रतापिनः सैकान्भूभोगो भूपतेरभूत् ॥ ६५७ ॥
तथा भूभृन्मत्स्या द्रविणकलुषाम्भःकृततृषः
स्थितिं स्वामुज्झन्तो विदधति कुमार्गानुसरणम् ।
क्रियन्ते कार्तान्तानुगविकृतकैवर्तनिवहै-
र्यथाह्येतेकस्मात्स्थिरनिरयजालप्रणयिनः ॥ ६५८ ॥
कृतपापं तमुद्दिश्य विपन्नममृतप्रभा ।
मृतोद्धाराय तन्माता व्यधत्तामृतकेशवम् ॥ ६५९ ॥
ललितापीडनामाभूत्ततो वसुमतीपतिः ।
देव्यां दुर्गाभिधायां यो जयापीडादजायत ॥ ६६० ॥
बभूव रागिणो राज्ये राज्यकार्याण्यपश्यतः ।
यस्य वाराङ्गनाभोज्यं राज्यं दुर्नयदूषितम् ॥ ६६१ ॥
दुष्कृतेनार्जितं वित्तं पित्रा निरयभागिणा ।
यश्चारणादिषु न्यस्यन्ननुरूपव्ययं व्यधात् ॥ ६६२ ॥
बन्धकीबन्धुभावेन प्राप्तराजगृहाश्रयाः ।
तं पाञ्चालीयविद्यानामन्तरङ्गं व्यधुर्विटाः ॥ ६६३ ॥
केशान्स्त्रीदशनच्छिन्नान्वक्षस्तन्नखलाञ्छितम् ।
वपुषो मण्डनां मेने किरीटकटकोज्झितः ॥ ६६४ ॥
यो यो वेश्याकथाभिज्ञो यो यो नर्मविचक्षणः ।
स स तत्प्रियतां लेभे न शूरो न च पण्डितः ॥ ६६५ ॥
अतृप्तः स्त्रीभिरल्पाभिरुग्ररागः स पार्थिवः ।
जडं मेने जयापीडं स्त्रीराज्यान्निर्गतं जितात् ॥ ६६६ ॥
दिङ्नि(न)र्जयव्यसनिनः पूर्वभूपाञ्जहास सः ।
गणिकाभोगसुखितः स्वसामयिकमध्यगः ॥ ६६७ ॥

संकोचकारिणो वृद्धान्मर्मोक्त्योद्वेज्य वारयन्।
तस्माद्विटजनो लेभे संप्रीतात्पारितोषकम् ॥ ६६८ ॥
अट्टचेट इव स्पष्टपरिहासविचक्षणः।
सोलज्जयन्मन्त्रिवृद्धानास्थाने गणिकासखः ॥ ६६९ ॥
बन्धकीपादमुद्राङ्कं चारु प्रावरणादि सः।
गौरवार्हान्दुराचारः सचिवान्पर्यधापयत् ॥ ६७० ॥
मानी मनोरथो मन्त्री परं परिजहार तम्।
अशक्नुवन्यमयितुं मध्यपातपराङ्मुखः ॥ ६७१ ॥
कुकृत्यं योगवाहित्वं वैधुर्यं द्रोहवृत्तिता।
दुर्वृत्तस्य प्रभोरन्यत्परिहारान्न भेषजम् ॥ ६७२ ॥
सुवर्णपार्श्वं विप्रेभ्यो ददत्फलपुरं तथा।
भूभृत्स लोचनोत्सं च द्वादशाब्दानभूद्विभुः ॥ ६७३ ॥
कल्याणदेव्यां संजातो जयापीडमहीभुजः।
संग्रामापीडनामाथ बभूव भुवनेश्वरः ॥ ६७४ ॥
पृथिव्यापीड इत्यन्यन्नाम बिभ्रत्स भूपतिः।
समाप्तिं सप्तभिर्वर्षैः साम्राज्यस्य समासदत् ॥ ६७५ ॥
श्रीचिप्पटजयापीडो बृहस्पत्यपराभिधः।
ललितापीडजो राजा शिशुदेश्यस्ततोभवत् ॥ ६७६ ॥
रागग्रहगृहीतस्य ललितापीडभूपतेः।
वेश्यायां कल्पपाल्यां यो जयादेव्यामजायत ॥ ६७७ ॥
उप्पाख्यस्याखुवग्रामकल्पपालस्य तां सुताम्।
रूपलुब्धोवरुद्धात्वमनैषीत्स हि भूपतिः ॥ ६७८ ॥
पद्मोत्पलककल्याणमम्मधम्मैः स मातुलैः।
[1]बालकैः पाल्यमानोभूत्पृथिवीभोगभागिभिः ॥ ६७९ ॥

---

1 बालकः इत्युचितम्।

तस्य पञ्च महाशब्दाञ्ज्यायानुत्पलकोग्रहीत् ।
अन्ये जगृहिरेन्यानि कर्मस्थानानि मातुलाः ॥ ६८० ॥
स्वायत्तीकृतसाम्राज्यैर्भ्रातृभिर्वन्दिताज्ञया ।
भूभृज्जनन्या विदधे जयादेव्या जयेश्वरः ॥ ६८१ ॥
राज्ञां कृपणवित्तैर्यत्प्रविष्टैर्दूष्यते धनम् ।
अचिरान्नीयते शान्तिमपूर्वैः कैश्चिदेव तत् ॥ ६८२ ॥
जयापीडस्य यत्किंचित्सूनुना हि व्ययीकृतम् ।
सूनुस्यालैरशेषं तत्तैः क्रमेण हृतं वसु ॥ ६८३ ॥
भगिनीभगसौभाग्यसंभवैर्विभवैः कृताः ।
तेभङ्गुराणां भोगानां भोक्तारो भाग्यभागिनः ॥ ६८४ ॥
निरङ्कुशं चेष्टमानाः शनकैस्त्यक्तशैशवात् ।
ते स्वस्त्रीयान्नृपान्नाशमकुलीनाः शशङ्किरे ॥ ६८५ ॥
अथाभिचारक्रियया मिथः संमन्त्र्य पापिभिः ।
राज्येच्छया तैः स्वस्त्रीयः स्वामी च स नृपो हतः ॥६८६॥
भुक्तक्षितौ द्वादशाब्दांस्तस्मिन्व्यापादिते तथा ।
नैच्छन्नेकस्य ते राज्यं परस्परमहंकृताः ॥ ६८७ ॥
तेषामाक्रान्तदेशानां नाममात्रमहीपतीन् ।
तांस्तान्कर्तुमसांमत्याद्विरोधोन्योन्यमुद्ययौ ॥ ६८८ ॥
अथ मेघावलीदेव्यां जातो वप्पियभूपतेः ।
ज्येष्ठोप्यचाक्रिकतया योभूद्राज्यविवर्जितः ॥ ६८९ ॥
सोयं त्रिभुवनापीडो जयादेव्यामजीजनत् ।
राजानमजितापीडं तं बलादुत्पलो व्यधात् ॥ ६९० ॥
युग्मम् ॥
देडादिगणनास्थाननिःष्यन्दोत्थान्नृपाय ते ।

पञ्चमाद्गणनास्थानादशनाच्छादने ददुः ॥ ६९१ ॥
एकसंभाषणात्खेदं यात्स्वन्येषु दिने दिने ।
पञ्च तुल्यसुखान्नैच्छदुःस्थो राजा तदाश्रितः ॥ ६९२ ॥
ते राजन्यजितापीडे राज्योत्पत्त्यपहारिणः ।
पुरदेवगृहादीनां प्रतिष्ठाकर्म चक्रिरे ॥ ६९३ ॥
सापत्यास्ते बुभुजिरे राज्यं स्वामिविवर्जितम् ।
निर्जने महिषं शान्तं मिथः सेर्ष्या वृका इव ॥ ६९४ ॥
उत्पलेनोत्पलस्वामी तथोत्पलपुरं कृतम् ।
पद्मस्य पद्मस्वाम्यास्ते कृतिः पद्मपुरं तथा ॥ ६९५ ॥
वधूर्व्यधत्त पद्मस्य गुणादेवी गुणोज्ज्वला ।
मठमेकमधिष्ठाने द्वितीयं विजयेश्वरे ॥ ६९६ ॥
धम्मो धर्मोद्यमी हेतुर्धम्मस्वामिविनिर्मितेः ।
कल्याणवर्मा सत्कर्मा कल्याणस्वामिकेशवे ॥ ६९७ ॥
दीन्नाराणां सहस्राणि पञ्चोपकरणं कृती ।
एकैकस्याः सुधीर्धेनोः कृत्वा मम्मो महाधनः ॥ ६९८ ॥
पञ्चाशीतिसहस्राणि गवां दत्त्वा प्रकल्पयन् ।
कुम्भप्रतिष्ठासंभारं यो मम्मस्वामिनं व्यधात् ॥ ६९९ ॥
तस्यैकस्यैव सामग्र्यां कः संख्यां कर्तुमर्हति ।
भ्रातॄणां किं पुनस्तेषां सर्वेषां भूरिसंपदाम् ॥ ७०० ॥
द्रोहार्जितास्तु वा लक्ष्मीः सुकृतोपार्जिताथ वा ।
सर्वेषां स्पृहणीयैव तेषां दातृतया तया ॥ ७०१ ॥
कृता देवगृहास्तैर्यै तत्पार्श्वेन्यसुरास्पदैः ।
दिङ्मातङ्गसमीपस्थकलभौपम्यमाश्रितम् ॥ ७०२ ॥

एकोननवते वर्षे स्वस्रीये शान्तिमागते ।
निर्विघ्नभोगास्तेभूवन्षड्विंशाब्दात्ययावधि ॥ ७०३ ॥
अथ मम्मोत्पलकयोरुदभूद्दारुणो रणः ।
रुद्धप्रवाहा यत्रासीद्धितस्ता सुभटैर्हतैः ॥ ७०४ ॥
कविर्बुधमनःसिन्धुशशाङ्कः शङ्कुकाभिधः ।
यमुद्दिश्याकरोत्काव्यं भुवनाभ्युदयाभिधम् ॥ ७०५ ॥
मम्मसूनुर्यशोवर्मा संग्रामाग्रे व्यपाहरत् ।
स यत्र तेजः शूराणां नक्षत्राणामिवार्यमा ॥ ७०६ ॥
अथोत्पाट्याजितापीडं संग्रामापीडसंभवः ।
अनङ्गापीडनामाभूत्कृतो मम्मादिभिर्नृपः ॥ ७०७ ॥
मम्मोत्साहासहिष्णुत्वात्संभृतामर्षवैकृतः ।
तस्य राज्यं द्विषन्नासीत्सुखवर्मोत्पलात्मजः ॥ ७०८ ॥
वर्षत्रयेणोत्पलके ततः प्रमयमागते ।
स चकारोत्पलापीडमजितापीडजं नृपम् ॥ ७०९ ॥
तेषामाश्वयुजीराजसदृशानां महीभुजाम् ।
भूत्वापि भृत्याः कठिना विभूतिं केपि लेभिरे ॥ ७१० ॥
सांधिविग्रहिकस्तस्य रत्नो नाम विभूतिभाक् ।
तस्मिन्कालेपि यश्चक्रे रत्नस्वामिसुरास्पदम् ॥ ७११ ॥
भेजुर्दार्वाभिसारादीन्देशानुत्तुम्ब्य भूपताम् ।
विमलाश्वाग्रामभुजो नराद्या व्यवहारिणः ॥ ७१२ ॥
राज्ञां कार्कोटवंश्यानां क्षीणप्रायमभूत्कुलम् ।
वंशस्तूत्पलकुल्यानां भुवि वैपुल्यमाययौ ॥ ७१३ ॥
सामर्थ्योपनतप्रायपार्थिवत्वो व्यपद्यत ।
विद्वेषात्सुखवर्माथ शुष्काख्येन स्वबन्धुना ॥ ७१४ ॥

ततः शूराभिधो मन्त्री सुखवर्मात्मजेकरोत्।
राज्ययोग्योयमित्यास्थां सगुणेवन्तिवर्मणि ॥ ७१५ ॥
एकत्रिंशे स वर्षेथ प्रजाविप्लवशान्तये।
विनिवार्योत्पलापीडं तमेव नृपतिं व्यधात् ॥ ७१६ ॥
यत्कृते विफलक्लेशा आसन्पितृपितामहाः।
पौत्रेण हेलया प्राप्ता सा सिद्धिः पुण्यकर्मणा ॥ ७१७ ॥
कुम्भाः पयोनिधिपयोहरणप्रवृत्ता
नित्यं वहन्ति किल ये विफलश्रमत्वम्।
चित्रं क्षणादिह तदेकसमुद्भवेन
संदर्शिता निखिलवारिधिपानलीला ॥ ७१८ ॥
अभूत तदनुमूर्ध्नि राजलक्ष्मी-
घटितकटाक्षकृतादिपट्टबन्धे।
कनकघटमुखान्नवाभिषेकं
झटिति पतन्तमवन्तिवर्मदेवः ॥ ७१९ ॥
संप्राप्तावुपदेष्टुमिन्दुतपनावुक्तं स्ववंशोद्भवै-
र्भूपालैर्नवराज्यतन्त्रमिव स श्रोत्रद्वये धारयन्।
राजा मण्डनकुण्डलद्वयमिषात्स्वच्छातपत्रच्छला-
ल्लक्ष्मीविष्टरपुण्डरीकघटितच्छायोदयो दिद्युते ॥ ७२० ॥

इति श्रीकाश्मीरिकमहामात्यचण्पकप्रभुसूनोः कह्लणस्य कृतौ राजतरङ्गिण्यां चतुर्थस्तरङ्गः ॥

समाशतद्वये षष्टियुते मासेषु षट्सु च।
निर्दशाहेषु कार्कोटवंशे सप्तदशाभवन् ॥

पञ्चमस्तरङ्गः ।

काप्येतेषु रुचिः कचेषु फणिनां पुंस्कोकिलस्येव ते
गोभिः कण्ठतटस्य हृष्यति पुरो दृक्पश्य चक्षुःश्रुतेः ।
संधानेभिनवे मिथो भगवतोर्जिह्वापृथक्स्पन्दिनी
भिन्नार्थां सदृशाक्षरामपि वदन्त्येवं गिरं पातु वः ॥ १ ॥
अवन्तिवर्मा साम्राज्यं प्राप्य पाटितकण्टकः ।
चकार चरितैश्चित्रं सतां कण्टकितं वपुः ॥ २ ॥
[1]आसतां क्षितिपामात्यौ तौ द्वावपि परस्परम् ।
आज्ञादाने परिवृढौ भृत्यावाज्ञापरिग्रहे ॥ ३ ॥
कृतज्ञः क्षान्तिमान्क्ष्माभृन्मन्त्री भक्तः स्वयोज्झितः ।
अभङ्गुरोयं संयोगः सुकृतैर्जातु दृश्यते ॥ ४ ॥
विवेक्ता प्राप्तराज्यः स क्ष्माभृद्वीक्ष्य नृपश्रियम् ।
अविलुप्तस्मृतिर्धीमानन्तरेवमचिन्तयत् ॥ ५ ॥
गोभुजां वल्लभा लक्ष्मीर्मातङ्गोत्सङ्गलालिता ।
सेयं स्पृहां समुत्पाद्य दूषयत्युन्नतात्मनः ॥ ६ ॥
स नास्ति कश्चित्प्रथमं यः प्रदर्श्यानुकूलताम् ।
संताप्यते न चरमं नीचप्रीत्येव नानया ॥ ७ ॥
चपलाभिः प्रवृद्धेयं स्वर्वेश्याभिः सहाम्बुधौ ।
तदेकचारिणीवृत्तमनया शिक्षितं कुतः ॥ ८ ॥
निःस्नेहा नान्वगात्कांश्चित्सुचिरं संस्तुताप्यसौ ।
परलोकाध्वगान्भूपानपाथेयानबान्धवान् ॥ ९ ॥
हेमभोजनभाण्डादि भाण्डागारे यदर्जितम् ।
कस्मादस्य न नाथास्ते लोकान्तरगता नृपाः ॥ १० ॥

---

१ आसातां इत्युचितः पाठः ।

अन्योच्छिष्टेषु पात्रेषु भुक्तवैतेषु महीभुजः ।
कस्मान्न लज्जामवहञ्शौचचिन्तां न वा दधुः ॥ ११ ॥
स्थूलेषु राजतस्थालकपालेष्ववलोकितैः ।
प्रेतभूपालनामाङ्कैः शङ्का कस्य न जायते ॥ १२ ॥
कृष्टाः प्रविष्टे ये कालपाशे कण्ठान्मुमूर्षताम् ।
अशस्ता अपवित्राश्च ते हाराः कस्य हारिणः ॥ १३ ॥
संदूष्य बाष्पैर्दुःखोष्णैस्त्यक्तान्पूर्वैर्मुमूर्षुभिः ।
स्पृशन्नेतानलंकारान्न कः संकोचमाप्नुयात् ॥ १४ ॥
या वारिराशिसलिलान्तरसंनिधान-
संसेवयापि सततं मलिनैव लक्ष्मीः ।
पात्रेषु रोरशिखिभागिषु सा विमुक्ता
वैमल्यमेति हरिणीव हुताशशौचा ॥ १५ ॥
इति निर्ध्याय नृपतिर्नीत्वा स्वर्णादि चूर्णताम् ।
निजैरञ्जलिभिः प्रादाद्द्विजन्मभ्यः करम्भकम् ॥ १६ ॥
साधु भूपेति वक्तव्ये हर्षान्निर्गौरवं द्विजः ।
साध्ववन्तिन्निति वदन्नेकः प्रापाञ्जलीन्बहून् ॥ १७ ॥
लक्ष्मीं कृत्वार्थिसात्कृत्स्नां कृतिनावन्तिवर्मणा ।
विभूतिश्चामरच्छत्रमात्रशेषा व्यधीयत ॥ १८ ॥
अनन्तसंपत्संपन्नभूरिगोत्रजविप्लवे ।
राजश्रीर्दुर्जरा तस्य नवत्वे भूभुजोभवत् ॥ १९ ॥
विप्लुतान्समरे भ्रातॄन्भ्रातृव्यांश्च विजित्य सः ।
चकार भूरिभिर्वीरै राज्यं विगतकण्टकम् ॥ २० ॥
राज्यं निष्पाद्य निर्विघ्नमथ वात्सल्यपेशलः ।
विभज्य बन्धुभृत्येषु बुभुजे पार्थिवः श्रियम् ॥ २१ ॥

भ्राता द्वैमातुरस्तेन शूरवर्माभिधः सुधीः ।
ज्ञातिप्रियेण विततते यौवराज्येभ्यषिच्यत ॥ २२ ॥
खाधूयाहस्तिकर्णाख्यावग्रहारौ प्रदाय यः ।
शूरवर्मस्वामिनं च गोकुलं च विनिर्ममे ॥ २३ ॥
संपूर्णः पूर्णमहिमामर्त्यमाहात्म्यमन्दिरम् ।
पञ्चहस्ताप्रदश्चक्रे मठं सुकृतकर्मठः ॥ २४ ॥
भ्राता व्यधत्त नृपतेरपरः समराभिधः ।
केशवं चतुरात्मानं समरस्वामिनं तथा ॥ २५ ॥
द्वौ शूरावरजौ धीरविन्नपाख्यौ निजाख्यया ।
व्यधत्तां विबुधावासौ द्वावन्यौ गणनापती ॥ २६ ॥
भूत्वा वातूलताच्छन्नप्रभावानुभवौ भुवि ।
गतौ सविग्रहावेव हरावासाद्यसभ्यताम् ॥ २७ ॥
युग्मम् ॥
राजदौवारिकः श्रीमाञ्शूरस्यासीन्महोदयः ।
महोदयस्वामिनो यः प्रतिष्ठां समपादयत् ॥ २८ ॥
रामजाख्यमुपाध्यायं ख्यातव्याकरणश्रमम् ।
व्याख्यातृपदकं[1] चक्रे स तस्मिन्सुरमन्दिरे ॥ २९ ॥
अमात्येन महीभर्तुः श्रीप्रभाकरवर्मणा ।
कृतं प्रभाकरस्वामिनाम्नो विष्णोर्निकेतनम् ॥ ३० ॥
आयातेन शुकैः सार्धं दत्ता गृहशुकेन यः ।
मुक्ताः प्राप्य प्रतिष्ठायां चक्रे ख्यातां शुकावलीम् ॥ ३१ ॥
विच्छिन्नप्रसरा विद्या भूयः शूरेण मन्त्रिणा ।
सत्कृत्य विदुषः सभ्यान्देशेस्मिन्नवतारिता ॥ ३२ ॥

---

१ पदगं इति स्यात् ।

युग्यैः क्षितिभुजां योग्यैरुह्यमाना महर्द्धयः ।
बुधाः प्रवृद्धसत्कारा विविशुर्भूपतेः सभाम् ॥ ३३ ॥
मुक्ताकणः शिवस्वामी कविरानन्दवर्धनः ।
प्रथां रत्नाकरश्चागात्साम्राज्येवन्तिवर्मणः ॥ ३४ ॥
आस्थाने कृतमन्दारो बन्दी शूरस्य मन्त्रिणः ।
संकल्पस्मृतिमाधातुमिमामार्यां सदा[1] पठेत् ॥ ३५ ॥
अयमवसर उपकृतये प्रकृतिचला यावदस्ति संपदियम् ।
विपदि सदाभ्युदयिन्यां पुनरुपकर्तुं कुतोवसरः ॥ ३६ ॥
कृतः सुरेश्वरीक्षेत्रे बहुगेहविधायिना ।
शिवयोर्मिश्रयोस्तेन प्रासादः सोव्ययस्थितिः ॥ ३७ ॥
शूरेश्वरं प्रतिष्ठाप्य स्ववेश्मेव समुन्नतम् ।
चक्रे शूरमठं धीमान्स भोगाय तपस्विनाम् ॥ ३८ ॥
स्वकृते पत्तनवरे तेन शूरपुराभिधे ।
क्रमवर्तप्रदेशस्थो ढक्कोभूद्विनिवेशितः ॥ ३९ ॥
सुरेश्वरीप्राङ्गनतश्चक्रे[2] भूतेश्वरं हरम् ।
मठं शूरमठान्तश्च शूरजो रत्नवर्धनः ॥ ४० ॥
काव्यदेव्यभिधा शूरवधूः शुद्धान्वया व्यधात् ।
सदाशिवं सुरेश्वर्यां काव्यदेवीश्वराभिधम् ॥ ४१ ॥
निर्मत्सरोवन्तिवर्मा सोदरेभ्योनपायिनीम् ।
शूराय च स पुत्राय नृपतिप्रक्रियां ददौ ॥ ४२ ॥
छन्दानुवर्ती भूपालो दैवतस्येव मन्त्रिणः ।
आ बाल्याद्वैष्णवोप्यासीच्छैवतामुपदर्शयन् ॥ ४३ ॥
क्षेत्रे विश्वैकसाराख्ये मृतानामपवर्गदे ।
भूरिभोगास्पदं राज्ञा तेनावन्तिपुरं कृतम् ॥ ४४ ॥

---

१ सदापठत् इत्युचितः पाठः । २ प्राङ्गनान्तः इति स्यात् ।

अवन्तिस्वामिनं तत्र प्राग्राज्याधिगमात्कृती ।
विधाय प्राप्तसाम्राज्यश्चक्रेवन्तीश्वरं तदा ॥ ४५ ॥
त्रिपुरेश्वरभूतेशविजयेशेषु भूभृता ।
स्नानद्रोण्या रौप्यमय्या तेन पीठत्रयं कृतम् ॥ ४६ ॥
शूरस्यापि नरेन्द्रं तं ध्यायतः स्वाधिदैवतम् ।
तत्प्रियार्थमुपेक्ष्योभूद्धर्मः प्राणाः सुतोपि वा ॥ ४७ ॥
तथा चार्चयितुं जातु यातो भूतेश्वरं नृपः ।
विभवानुगुणे स्वस्मिन्पूजोपकरणेर्पिते ॥ ४८ ॥
ददर्श पीठे देवस्य पूजकैरुपपादितम् ।
वन्यमुत्पलशाकाख्यं तिक्तशाकमवस्थितम् ॥ ४९ ॥
युग्मम् ॥
तत्रस्थाः क्ष्माभुजा पृष्टास्तन्निवेदनकारणम् ।
व्यजिज्ञपन्क्षितिन्यस्तजानु प्राञ्जलयस्ततः ॥ ५० ॥
डामरो धन्वनामास्ति लहरे विषये बली ।
शूरस्य मन्त्रिणो देव सेवको यः सुतोपमः ॥ ५१ ॥
हृतेषु तेन ग्रामेषु निरवग्रहशक्तिना ।
निवेद्यमेतदेवास्मै भूतेशाय निवेद्यते ॥ ५२ ॥
अकाण्डशूलजनितां पार्थिवः कथयन्व्यथाम् ।
श्रुतमश्रुतवत्कृत्वा त्यक्तपूजोथ निर्ययौ ॥ ५३ ॥
पूजां संत्यज्य गमनं शूलं चाकस्मिकं प्रभोः ।
सहेतुकं विदञ्शूरो वृत्तान्तान्वेषकोभवत् ॥ ५४ ॥
ज्ञाततत्त्वस्ततस्तूर्णं भूतेशाभ्यर्णवर्तिनः ।
क्रुद्धः समातृचक्रस्य भैरवस्याविशद्गृहम् ॥ ५५ ॥
निषिद्धजनबाहुल्याद्भूत्वा विरलपार्श्वगः ।
प्राहिणोद्धन्यमानेतुं ततो दूतान्पुनः पुनः ॥ ५६ ॥

स क्षितिं पत्तिपृतनासंमर्देन प्रकम्पयन् ।
अप्रकम्पतनुः प्राप क्रूरः शूरान्तिकं पुरः ॥ ५७ ॥
तस्य प्रविष्टमात्रस्य शस्त्रिणः शूरचोदिताः ।
मुण्डं सजीवितस्यैव चिच्छिदुर्भैरवाग्रतः ॥ ५८ ॥
आसन्ने सरसि क्षिप्त्वा रुधिरोद्गारि तद्वपुः ।
क्ष्मापतेः क्षालितामर्षो धीरः शूरो विनिर्ययौ ॥ ५९ ॥
तस्य श्रुत्वा शिरश्छिन्नं स्वपुत्रस्येव मन्त्रिणा ।
क्षीणमन्युः क्षितिपतिः सवैलक्ष्य इवाभवत् ॥ ६० ॥
शूरोथ पृष्टकुशलो निर्व्यथोस्मीति भाषिणम् ।
उत्थाप्य तल्पात्तं देवं पूजाशेषमकारयत् ॥ ६१ ॥
इत्थं समस्तकृत्येषु भावज्ञः स महीपतेः ।
अनुक्त्वैव हितं तत्तत्प्राणांस्त्यक्त्वाप्यसाधयत् ॥ ६२ ॥
परस्परमनुत्पन्नमन्युकालुष्यदूषणौ ।
न दृष्टौ न श्रुतौ वान्यौ तादृशौ राजमन्त्रिणौ ॥ ६३ ॥
श्रीमेघवाहनस्येव साम्राज्येवन्तिवर्मणः ।
अशेषप्राणिनामासीदमारो दश वत्सरान् ॥ ६४ ॥
जलं जहद्भिः शिशिरं तटानेत्याकुतोभयैः ।
तत्कालं सेवितः पृष्टे पाठीनैः शरदातपः ॥ ६५ ॥
अनुग्रहाय लोकानां भट्टश्रीकल्लटादयः ।
अवन्तिवर्मणः काले सिद्धा भुवमवातरन् ॥ ६६ ॥
चरित्रे बहुवक्तव्ये येषामेकस्य पावनः ।
अयं प्रासङ्गिकः कश्चिद्वृत्तान्तो वर्णयिष्यते ॥ ६७ ॥
देशः प्रबलतोयोयं महापद्मसरोजलैः ।
कूलिनीभिश्च शबलः स्वल्पोत्पत्तिः सदाभवत् ॥ ६८ ॥

ललितादित्यभूभर्तुरुद्योगेन बलीयसा ।
किंचिदाकृष्टसलिलः प्रापोत्पत्तिं मनाक्ततः ॥ ६९ ॥
जयापीडे क्रमाद्याते स्वल्पवीर्येषु राजसु ।
सलिलोपप्लवैरासीत्पुनरेवावृता क्षितिः ॥ ७० ॥
दीन्नाराणां दशशती पञ्चाशदधिकाभवत् ।
धान्यखारीक्रये हेतुर्देशे दुर्भिक्षविक्षते ॥ ७१ ॥
अवन्तिवर्मणः पुण्यैर्जन्तूञ्जीवयितुं ततः ।
स्वयमन्नपतिः श्रीमान्सुय्यः क्षितिमवातरत् ॥ ७२ ॥
यस्याविज्ञातसंभूतेस्तुर्ये कालेपि निश्चितम् ।
अयोनिजत्वं कृतिनश्चरितैर्भुवनाद्भुतैः ॥ ७३ ॥
पुरा रथ्यारजःपुञ्जं संमार्जन्ती पिधानवत् ।
पूंयाभिधाना चण्डाली मृद्भाण्डं प्राप नूतनम् ॥ ७४ ॥
तस्मिन्पिधानमुद्धृत्य सापश्यन्मध्यशायिनम् ।
बालं कमलपत्राक्षं धयन्तं स्वकराङ्गुलीः ॥ ७५ ॥
मात्रा कयापि त्यक्तोसौ सुन्दरो मन्दभाग्यया ।
अथेति चिन्तयन्त्यासीत्सा स्नेहात्प्रस्रुतस्तनी ॥ ७६ ॥
अदूषयन्त्या स्पर्शेन धात्र्याः शूद्रस्त्रियो गृहे ।
तया विहितवृत्तिः स शिशुर्वृद्धिमनीयत ॥ ७७ ॥
स सुय्यनामा मतिमान्प्रवृद्धः शिक्षिताक्षरः ।
कस्याप्यासीद्बृहपतेरर्भकाध्यापको गृहे ॥ ७८ ॥
व्रतस्नानादिनियमैस्तं सतां हृदयंगमम् ।
गोष्ठीषु विशदप्रज्ञं विदग्धाः पर्यवारयन् ॥ ७९ ॥
तेषां कथाव्यवस्थासु निन्दतां जलविप्लवम् ।
धीरस्ति मे निरर्थस्तु किं कुर्यामिति सोब्रवीत् ॥ ८० ॥

---

१ सुय्याभिधाना इति स्यात् ।

उन्मत्तस्येव वदतस्तस्य तन्नियमाद्वचः ।
निशम्य भूभृच्चारेभ्यश्चिरमासीत्सविस्मयः ॥ ८१ ॥
ततस्तमानीय नृपः किं ब्रूष इति पृष्टवान् ।
धीरस्तीत्यादि राजाग्रेप्यवोचत्सोप्यसंभ्रमः ॥ ८२ ॥
वातूलोसाविति निजैरुक्तोप्यथ महीपतिः ।
धियं दिदृक्षुर्विदधे तस्यायत्तं निजं धनम् ॥ ८३ ॥
कोशाद्दीन्नारभाण्डानि बहून्यादाय हेलया ।
ययौ मडवराज्यं स नावमारुह्य रंहसा ॥ ८४ ॥
ग्रामे तत्र प्रवृद्धाम्बुनिमग्ने नन्दकाभिधे ।
एकं निक्षिप्य दीन्नारभाण्डं व्यावर्तत द्रुतम् ॥ ८५ ॥
सत्यं वातूल एवासौ सभ्येष्वपि वदत्स्वपि ।
वार्तां निशम्य तां राजा तन्निष्ठान्वेषकोभवत् ॥ ८६ ॥
क्रमराज्यं स संप्राप्य देशे यक्षदराभिधे ।
अञ्जलिभ्यां निचिक्षेप दीन्नारान्सलिलान्तरे ॥ ८७ ॥
यत्र तीरद्वयालम्बिशैलनिर्लुठिताः शिलाः ।
चक्रुर्वितस्तां निष्पीड्य पयः प्रतिपथोन्मुखम् ॥ ८८ ॥
दुर्भिक्षोपहता ग्राम्या दीन्नारान्वेषिणस्तदा ।
शिलाः प्रवाहादुद्धृत्य वितस्तां समशोधयन् ॥ ८९ ॥
एवं दिनानि द्वित्राणि पयो युक्त्या विकृष्य तत् ।
वितस्तामेकतः स्थानात्कर्मकृद्भिरबन्धयत् ॥ ९० ॥
पाषाणसेतुबन्धेन सुय्येनाद्भुतकर्मणा ।
सप्ताहमभवद्बद्धा निखिला नीलजा सरित् ॥ ९१ ॥
अधः प्रवाहं संशोध्य लुठदश्मप्रतिक्रियाम् ।
कृत्वा बद्धैः शिलाबन्धैः सेतुबन्धमपाटयत् ॥ ९२ ॥

चिरकालनिरोधेन सोत्कण्ठेवाम्बुधिं प्रति ।
ततः प्रावर्तत जवाद्गन्तुं सागरगामिनी ॥ ९३ ॥
जम्बालाङ्का स्फुरन्मीना भूर्बभौ सलिलोज्झिता ।
व्यक्तकार्ष्ण्या सनक्षत्रा निर्मेघेव नभःस्थली ॥ ९४ ॥
यत्र यत्र विवेदौघवेधं सलिलविप्लवे ।
तत्र तत्र वितस्तायाः प्रवाहान्नूतनान्व्यधात् ॥ ९५ ॥
मूलस्रोतोग्र्यनिष्ठ्यूतभूरिस्रोता बभौ सरित् ।[1]
एकभोगाश्रयानेकफणेवासितपन्नगी ॥ ९६ ॥
वामेन सिन्धुस्त्रिग्राम्या वितस्ता दक्षिणेन तु ।
यान्त्यौ ये समगंसातां प्राग्वैन्यस्वामिनोन्तिके ॥ ९७ ॥
वर्ततेद्य महानद्योः कल्पापायेप्यनत्ययः ।
संगमो नगरोपान्ते स सुय्योपक्रमस्तयोः ॥ ९८ ॥
अद्याप्यास्तां फलपुरपरिहासपुरस्थितौ ।
विष्णुस्वामी संगमस्य वैन्यस्वामी च तीरयोः ॥ ९९ ॥
सुन्दरीभवनाभ्यर्णप्राप्तस्याद्यतनस्य तु ।
योगशायी हृषीकेशः सुय्यस्याभ्यर्चितस्तटे ॥ १०० ॥
दृश्यन्तेद्यापि सरितां पूर्वस्रोतस्तटोद्भवाः ।
निषादाकृष्टनौरज्जुरेखाङ्का जीर्णपादपाः ॥ १०१ ॥
स्फुरत्तरङ्गजिह्वाः स नदीमार्गमजिग्रहत् ।
तास्ताः स्वेच्छानुसारेण मान्त्रिकः पन्नगीरिव ॥ १०२ ॥
बद्ध्वा शैलमयान्सेतून्वितस्तां सप्तयोजनीम् ।
महापद्मसरोवारि स चकार नियन्त्रितम् ॥ १०३ ॥
महापद्मसरःकुण्डाद्वितस्ता येन योजिता ।
जवान्निर्याति कोदण्डयन्त्रादिषुरिवाधुना ॥ १०४ ॥

---

१ स्रोतोग्र इत्युचितम् ।

उद्धृत्य सलिलादुर्वीमेवमादिवराहवत् ।
अनेकजनसंकीर्णान्ग्रामान्नानाविधान्व्यधात् ॥ १०५ ॥
पालीभिरम्भः संरोध्य यान्कुण्डसदृशान्व्यधात् ।
कुण्डलानीति सर्वान्नसमृद्धान्ब्रुवते जनाः ॥ १०६ ॥
उत्खातकीलनिवहान्नद्योद्यापि शरत्कृशाः ।
व्यञ्जन्ति जलगन्धेभबन्धनस्तम्भसंनिभान् ॥ १०७ ॥
दीन्नारभाण्डानौज्झीत्स यदगाधजलान्तरे ।
नन्दके निर्गतजले स्थलान्तात्तदलभ्यत ॥ १०८ ॥
अदेवमातृकान्ग्रामान्परीक्ष्य विविधाः क्षितीः ।
संविभेजे विभक्तेन नादेयेन स वारिणा ॥ १०९ ॥
असिचच्च जलैर्ग्रामान्ग्रामान्मृदमुपाहृताम् ।
या यावता क्षणेनागाच्छोषं तां तावता हृदि ॥ ११० ॥
कालेन मत्वा सेकार्हां प्रतिग्रामं जलस्रुतेः ।
परिमाणं विभागं च परिकल्प्य निरत्ययम् ॥ १११ ॥
चकार चानूलाद्याभिः सिन्धुभिः सर्वतो दिशः ।
सत्फलोदारकेदारसंपत्संपन्नविभ्रमाः ॥ ११२ ॥

तिलकम् ॥

न कश्यपेनोपकृतं न यत्संकर्षणेन वा ।
हेलया मण्डलेमुष्मिंस्तत्सुय्येन सुकर्मणा ॥ ११३ ॥
भूमेर्जलादुद्धरणं द्विजक्षेत्रे तथार्पणम् ।
सेतुबन्धोश्मभिस्तोये यमनं कालियस्य च ॥ ११४ ॥
चतुर्षु सिद्धमिति यद्विष्णोः सत्कर्म जन्मसु ।
सुय्यस्य तत्पुण्यराशेरेकस्मिन्नेव जन्मनि ॥ ११५ ॥

युग्मम् ॥

---

१ भाण्डं इत्युचितम् ।

यस्मिन्महासुभिक्षेषु दीन्नाराणां शतद्वयी ।
धान्यखारीप्राप्तिहेतुरा सर्गादभवत्पुरा ॥ ११६ ॥
ततःप्रभृति तत्रैव चित्रं कश्मीरमण्डले ।
षट्त्रिंशता धान्यखारेर्दीन्नारैरुदितः क्रयः ॥ ११७ ॥
निर्गताया महापद्मसलिलात्स्वर्गसंनिभम् ।
वितस्तायास्तटे चक्रे स्वनामाङ्कं स पत्तनम् ॥ ११८ ॥
स्वकृता स्थापिता तेन सरसि व्याप्तदिक्तटे ।
आसंसारं स्थिता मारमर्यादा झषपक्षिणाम् ॥ ११९ ॥
सुय्याकुण्डलनामानं ग्रामं कृत्वा द्विजातिसात् ।
सुय्यामुद्दिश्य तन्नाम्ना सुय्यासेतुं स निर्ममे ॥ १२० ॥
तेनोद्धृतासु सलिलाद्भूषु ग्रामाः सहस्रशः ।
अवन्तिवर्मप्रमुखैर्जयस्थलमुखाः कृताः ॥ १२१ ॥
ईदृशैर्धर्म्यवृत्तान्तैः प्रवर्तितकृतोदयः ।
अवन्तिदेवः पाति स्म मांधातेव वसुंधराम् ॥ १२२ ॥
प्राणप्रयाणसोद्योगरोगग्रस्तस्ततो ययौ ।
क्षेत्रं स त्रिपुरेशाद्रिनिष्ठज्येष्ठेश्वराश्रितम् ॥ १२३ ॥
आत्मनस्तत्र निश्चित्य विपत्तिं चिरगोपितम् ।
प्राणान्ते प्राञ्जलिः शूरो[1] वैष्णवत्वमदर्शयत् ॥ १२४ ॥
तेनान्ते भगवद्गीताः शृण्वता भावितात्मना ।
ध्यायता वैष्णवं धाम निरमुच्यत जीवितम् ॥ १२५ ॥
आषाढशुक्लपक्षस्य तृतीयस्यां क्षमापतिः ।
वर्षे एकोनषष्टे स क्षमावृषास्तमुपाययौ ॥ १२६ ॥
तस्मिन्प्रशान्ते प्रत्येकं विभवोत्सिक्तचेतसाम् ।
तुल्यमुत्पलवंश्यानां राज्येच्छा भूयसामभूत् ॥ १२७ ॥

---

१ शूरं इत्युचितः पाठः ।

ततश्चक्रे प्रतीहारः प्रयत्नाद्रत्नवर्धनः ।
नृपं शंकरवर्माणमवन्तिनृपतेः सुतम् ॥ १२८ ॥
कर्णपो विन्नपामात्यस्तनूजं शूरवर्मणः ।
तद्द्वेषात्सुखवर्माख्यं यौवराज्येप्ययोजयत् ॥ १२९ ॥
अतस्तयोरभूद्वैरं क्षितीशयुवराजयोः ।
यस्मिन्क्षणे क्षणे राज्यमासीद्दोलामिवाश्रयत् ॥ १३० ॥
शिवशक्त्यादयो वीराः स्वामिकार्योज्झितासवः ।
यत्राभूवन्स्वसत्त्वस्य परीक्षाक्षणलाभिनः ॥ १३१ ॥
कुर्वतां स्वामिशत्रूणां दानमानप्रतिश्रवम् ।
सत्त्वैकाग्र्यान्न ते यस्मादानुकूल्यमशिश्रियन् ॥ १३२ ॥
पिण्डस्पृहां परित्यज्याहंकृताः शिक्षिताः क्वचित् ।
तावन्न वीततमसः श्ववृत्तिमनुजीविनः ॥ १३३ ॥
कथंचिदथ निर्जित्य युवराजं महौजसम् ।
प्राज्यः स्वविजयोंकारश्चक्रे शंकरवर्मणा ॥ १३४ ॥
सम्राट्ठमरवर्माद्यैर्वितीर्णसमरोसकृत् ।
कीर्तिं श्रिया प्रणयिनीं लब्धयाधिविवेद सः ॥ १३५ ॥
अथ निर्जित्य दायादांल्लब्ध्वा लक्ष्मीं क्षितीश्वरः ।
जिष्णुर्दिग्विजयं कर्तुं श्रीमानासीन्महोद्यमः ॥ १३६ ॥
तस्य कालबलाद्देशे प्रक्षीणजनसंपदि ।
लक्षाणि नव पत्तीनां द्वारान्निष्क्रामतोभवन् ॥ १३७ ॥
स्वपुरस्योपकण्ठेपि योभूत्कुण्ठितशासनः ।
स एव रत्नोत्तंसेषु राज्ञामाज्ञां न्यवेशयत् ॥ १३८ ॥
गच्छन्नाम्नायविच्छेदं संप्रदायः ककुब्जये ।
स्वप्रज्ञया समुन्नीतो राज्ञा शंकरवर्मणा ॥ १३९ ॥

तत्सेना नरनाथानां पृतनाभिः पदे पदे ।
कुलापगेव कुल्याभिर्विशन्तीभिरवर्धत ॥ १४० ॥
दार्वाभिसारराजेन त्रस्यता समुपाश्रिताः ।
अद्रिद्रोण्यो न वाहिन्यस्तत्सेनानादमादधुः ॥ १४१ ॥
जवोल्बणैर्हरिगणैर्गृह्णन्हरिगणं क्षणात् ।
अनासादितदुर्गं स चक्रे दुर्गान्तरातिथिम् ॥ १४२ ॥
लक्षाणि नव पत्तीनां वारणानां शतत्रयी ।
लक्षं च वाजिनामासीद्यस्य सेनापुरःसरम् ॥ १४३ ॥
स गूर्जरजयव्यग्रः स्वपराभवशङ्किनम् ।
त्रैगर्तं पृथिवीचन्द्रं निन्ये तमसि हास्यताम् ॥ १४४ ॥
पुत्रं भुवनचन्द्राख्यं नीविं प्रागेव दत्तवान् ।
स ह्यभूत्प्रणतिं कर्तुं तस्याभ्यर्णमुपागतः ॥ १४५ ॥
अथ तत्कटकं भ्राम्यद्भूरिमण्डलनायकम् ।
वीक्ष्य संमुखमायान्तं महार्णवमिवोल्बणम् ॥ १४६ ॥
समागमक्षणे यस्माच्छङ्कमानः स्वबन्धनम् ।
पलाय्य प्रययौ दूरं निर्वाणौजोविजृम्भितः ॥ १४७ ॥

तिलकम् ॥

यमप्रतिमसौन्दर्यमद्याप्याहुः पुराविदः ।
तमेवाद्राक्षुरुत्रस्ता नृपाः कालमिवोल्बणम् ॥ १४८ ॥
उच्चखानालखानस्य संख्ये गूर्जरभूभुजः ।
बद्धमूलां क्षणाल्लक्ष्मीं शुचं दीर्घामरोपयत् ॥ १४९ ॥
तस्मै दत्त्वा टक्कदेशं विनयादङ्गुलीमिव ।
स्वशरीरमिवापासीन्मण्डलं गूर्जराधिपः ॥ १५० ॥

---

१ जवोल्बणैः इति स्यात् । २ अनासादितदुर्गं इत्युचितः पाठः । ३ तमपि इति स्यात् ।

हृतं भोजाधिराजेन स संम्राज्यमदापयत् ।
प्रतीहारतया भृत्यीभूते थक्कियकान्वये ॥ १५१ ॥
दरत्तुरुष्काधिपयोर्यः केसरिवराहयोः ।
हिमवद्विन्ध्ययोरासीदार्यावर्त इवान्तरे ॥ १५२ ॥
उदभाण्डपुरे तस्थुर्यदीये निर्भया नृपाः ।
पक्षच्छेदव्यथात्रस्ता महार्णव इवाद्रयः १५३ ॥
नक्षत्रेष्विव भूपेषु नभसीवोत्तरापथे ।
यस्यैव विपुलाख्याति मार्तण्डस्येव मण्डलम् ॥ १५४ ॥
स श्रीमाल्लँल्लियः शाहिरलखानाश्रयः क्रुधा ।
निराकरिष्णोः साम्राज्यात्तस्य सेवां न लब्धवान् ॥ १५५ ॥
एवं दिग्विजयं कृत्वा प्राप्तः स निजमण्डलम् ।
प्रदेशे पञ्चसत्राख्ये स्वनाम्ना विदधे पुरम् ॥ १५६ ॥
तस्य श्रीस्वामिराजस्य तनयोदक्पथप्रभोः ।
पूर्णिमेव क्षपाबन्धोः सुगन्धाख्याभवत्प्रिया ॥ १५७ ॥
तया समं पुरवरे सुरराजोपमो नृपः ।
तस्मिञ्शंकरगौरीशसुगन्धेशौ विनिर्ममे ॥ १५८ ॥
द्विजस्तयोर्नायकाख्यो गौरीशसुरसद्मनोः ।
चातुर्विद्यः कृतस्तेन वाग्देवीकुलमन्दिरम् ॥ १५९ ॥
परकाव्येन कवयः परद्रव्येण चेश्वराः ।
निर्लोठितेन स्वकृतिं पुष्णन्त्यद्यतने क्षणे ॥ १६० ॥
स्वल्पसत्त्वो नरपतिः स्वपुराख्यापनाय सः ।
सारापहारमकरोत्परिहासपुरस्य यत् ॥ १६१ ॥
ख्यातिहेतुः पट्टवानं पशूनां क्रयविक्रयौ ।
इत्यादि यत्पत्तनेस्ति तत्तस्मिन्हि पुरेभवत् ॥ १६२ ॥

---

१ साम्राज्यं इत्युचितम् । २ निर्लुण्ठितेन इत्युचितम् ।

राज्यप्रदेन नृपते रत्नवर्धनमन्त्रिणा ।
श्रीरत्नवर्धनेशाख्यो व्यधीयत सदाशिवः ॥ १६३ ॥
चित्रं नृपद्विपाः पूतमूर्तयः कीर्तिनिर्झरैः ।
भवन्ति व्यसनासक्तिपांसुस्नानमलीमसाः ॥ १६४ ॥
अथ क्रमेण नृपतिर्लोभाभ्यासेन भूयसा ।
आधीयमानचित्तोभूत्प्रजापीडनपण्डितः ॥ १६५ ॥
आरब्धैर्व्यसनैर्भूम्नां क्षीणकोशः क्षणे क्षणे ।
देवादीनां स सर्वस्वं जहारायासयुक्तिभिः ॥ १६६ ॥
कर्मस्थाने पुरग्रहग्रामादिधनहारिणा ।
तेनाट्टपतिभागाख्यगृहकृत्याभिधे कृते ॥ १६७ ॥
धूपचन्दनतैलादिविक्रयोत्थं समाददे ।
द्रविणं देववेश्मभ्यः क्रयमूल्यकलाछलात् ॥ १६८ ॥
प्रत्यवेक्षां मुखे दत्त्वा विभक्तैरधिकारिभिः ।
चतुःषष्टिं सुरगृहान्मुमोषेतरदञ्जसा ॥ १६९ ॥
ग्रामान्देवगृहग्राह्यान्राजा प्रतिकरेण सः ।
स्वयं स्वीकृत्य चोत्पत्तिं क्षमां कार्षक इव व्यधात् ॥ १७० ॥
तुलां कृत्वा त्रिभागोनां वर्षदेयां स पर्षदे ।
भुक्तिकम्बलमूल्यादिदम्भादभ्यधिकं ददौ ॥ १७१ ॥
दिगन्तरस्थो ग्रामीणानूढभाराननागतान् ।
तद्देशार्घैर्भारमूल्यं वर्षमेकमदण्डयत् ॥ १७२ ॥
वर्षेपरस्मिन्निखिलान्भारमूल्यं निरागसः ।
तयैव संख्यया ग्राम्यान्प्रतिग्राममदण्डयत् ॥ १७३ ॥
इत्येषा गूढभारोढिः प्रथमं तेन पातिता ।
दारिद्र्यदूती ग्रामाणां या त्रयोदशधा स्थिता ॥ १७४ ॥

स्कन्धकग्रामकायस्थमासवृत्त्यादिसंग्रहैः ।
अन्यैश्च विविधायासैर्व्यधाद्ग्रामान्स निर्धनान् ॥ १७५ ॥
तुलापहारोपचयग्रामदण्डादिसंग्रहैः ।
इत्येष तेन संवाहो गृहकृत्ये प्रवर्तितः ॥ १७६ ॥
व्यधत्त पञ्च दिविरान्स तस्मिन्भिन्नकर्मणि ।
षष्ठं तथा गञ्जवरं शकचं लवटाभिधम् ॥ १७७ ॥
आत्मनो निरयं मूढः सोङ्गीकृत्येत्युपक्रियाम् ।
भाविनामकरोद्राज्ञां पापी यद्वा नियोगिनाम् ॥ १७८ ॥
निमित्तं मण्डलेमुष्मिन्सविद्यानामनादरे ।
राज्ञां प्रतापहानौ च नान्यः शंकरवर्मणः ॥ १७९ ॥
मुख्येन गुणिनां राज्ञा धनहान्या प्रथापहाः ।
मूर्खेण येन कायस्थ दास्याः पुत्राः प्रवर्तिताः ॥ १८० ॥
तथा कायस्थभोज्या भूर्जाता तत्प्रत्यवेक्षया ।
यथा संजायतेवर्णे हरणादिव भूभुजाम् ॥ १८१ ॥
तस्मिन्घोरे प्रजादुःखे कृपार्द्रः पृथिवीपतिम् ।
पुत्रो गोपालवर्माख्यः कदाचिदिदमब्रवीत् ॥ १८२ ॥
प्रदातुस्तात भवतः पूर्वं न्यासीकृतः स्थितः ।
वरो यः सत्यसंधस्य सोधुना प्रार्थ्यते मया ॥ १८३ ॥
कायस्थप्रेरणादेतैर्दैवेनाद्य प्रवर्तितैः ।
आयासैः श्वासशेषैव प्राणवृत्तिः शरीरिणाम् ॥ १८४ ॥
न च नामास्ति तातस्य काचिल्लोकद्वयोचिता ।
मनागपि हितप्राप्तिरेतया जनपीडया ॥ १८५ ॥
अदृष्टविषयां वार्तां गहनां विवृणोति कः ।
दृष्टेप्यनिष्टादन्यन्न कर्मणानेन दृश्यते ॥ १८६ ॥

---

१ गञ्जवरे शकं च इति स्याव ।

एकतो व्याधिदुर्भिक्षप्रमुखा विपदोखिलाः ।
प्रजानामेकतस्त्वेका लुब्धता वसुधापतेः ॥ १८७ ॥
भूभुजोभ्यस्तलोभस्य श्रीः कैश्चिन्नाभिनन्द्यते ।
अकालकुसुमस्येव फलसंभावनोज्झिता ॥ १८८ ॥
दानं च सूनृता सूक्तिर्विश्वसंवननं प्रभोः ।
लोभः पूर्वं तयोरेव विनाशाय महोद्यमः ॥ १८९ ॥
प्रतापमायतिं शोभां हेमन्ताहस्य वारिदः ।
स्मृतिशेषां करोत्येव लोभश्च पृथिवीभुजाम् ॥ १९० ॥
दायादा व्ययभीरुतापरिहृतारब्धेर्भवन्त्युन्नता
भृत्याः प्रत्युपकारकातरमतेः कुर्युर्न केपि प्रियम् ।
राशीभूतधनस्य जीवितहृतौ शश्वद्यतेरन्निजा
भूभर्तुः क्रियते द्विषेव रभसाल्लोभेन किं नाप्रियम् ॥ १९१ ॥
राजसंवाहनामायं नवायासो जनासुहृत् ।
तदेष लोभप्रभवः प्रजानाथ निवार्यताम् ॥ १९२ ॥
श्रुत्वेति राजपुत्रस्य सौजन्येनोज्ज्वलं वचः ।
स्मितधौताधरो राजा शनैर्वचनमब्रवीत् ॥ १९३ ॥
तवाकृत्यविसंवादि वचः सौजन्यपेशलम् ।
स्मारयत्यद्य मामेतच्चित्तवृत्तिं पुरातनीम् ॥ १९४ ॥
कुमारभावे पूर्वं मे तवेवार्द्रान्तरात्मनः ।
प्रजावत्सलता वत्स पर्याप्ता पर्यवर्धत ॥ १९५ ॥
सोहं घर्मे महद्धर्मे शीते दत्त्वोच्छमंशुकम् ।
पदातिरपपादत्रः पित्रा संचारितोभवम् ॥ १९६ ॥
मृगव्यादौ हयैः सार्धमटन्तं कण्टकक्षतम् ।
अन्तर्बाष्पं मां विलोक्य तमसूयिषुरग्रगाः ॥ १९७ ॥

---

१ दत्त्वोन्नं इति स्यात् ।

स तानुवाच सामान्यो भूत्वाहं राज्यमाप्तवान् ।
काले काले सेवकानां जाने सेवापरिश्रमम् ॥ १९८ ॥
ईदृग्दुःखमयं भुक्त्वा ज्ञास्यत्यन्यव्यथां ध्रुवम् ।
प्राप्तैश्वर्यो भवेन्मूढो गर्भेश्वरतयान्यथा ॥ १९९ ॥
उपायैरीदृशैर्योहं कृतः पित्रा सुशिक्षितः ।
तेनापि प्राप्तराज्येन मयैवं पीडिताः प्रजाः ॥ २०० ॥
गर्भवासव्यथां जातः शरीरी विस्मरेद्यथा ।
प्राप्तराज्यस्तथा राजा नियतं पूर्वचिन्तितम् ॥ २०१ ॥
त्वयैव तस्मादेकोद्य वरो मह्यं प्रदीयताम् ।
प्राप्तराज्यः प्रजापीडां मा कार्षीस्त्वमतोधिकाम् ॥ २०२ ॥
सासूयमिति तेनोक्तः कृतान्योन्यस्मितैर्विटैः ।
राजाप्तैर्वीक्षितश्चासीत्कुमारो ह्रीनताननः ॥ २०३ ॥
त्यागभीरुतया तस्मिन्गुणिसङ्गपराङ्मुखे ।
आसेवन्तावरावृत्तीः कवयो भल्लटादयः ॥ २०४ ॥
निर्वेतनाः सुकवयो भारिको लवटस्त्वभूत् ।
प्रसादात्तस्य दीन्नारसहस्रद्वयवेतनः ॥ २०५ ॥
कलपपालकुले जन्म तत्तेनैव प्रमाणितम् ।
क्षीबोचितापभ्रंशोक्तेर्दैवी वाग्यस्य नाभवत् ॥ २०६ ॥
वेष्टितश्मश्रुरुष्णीषो घ्राणस्याग्रे प्रदेशिनी ।
ध्यानैकाग्रा दृगित्यासीत्सुखराजस्य मन्त्रिणः ॥ २०७ ॥
योयमार्योचितो वेषो दुर्नयासेविनः प्रभोः ।
छन्दानुवृत्त्या स प्राप नटस्येव विडम्बनाम् ॥ २०८ ॥
युग्मम् ॥
सोनुगैः सह निर्द्रोहं जघान द्रोहशङ्कया ।
शूरं दार्वाभिसारेशं शर्वर्यां नरवाहनम् ॥ २०९ ॥

प्रजाभिशापे पतिते नृपस्योन्मार्गवर्तिनः ।
त्रिंशद्विंशाः सुतास्तस्य व्यपद्यन्तामयं विना ॥ २१० ॥
वंशः श्रीर्जीवितं दारा नामापि पृथिवीभुजाम् ।
क्षणादेव क्षयं याति प्रजाविप्रियकारिणाम् ॥ २११ ॥
इत्युक्तं वक्ष्यते चाग्रे व्यक्तमेतत्तु चिन्त्यताम् ।
प्रणष्टं तस्य नामापि यथा क्रूरेण कर्मणा ॥ २१२ ॥
नाम्ना पत्तनमित्येव प्रख्यातं स्वपुरं कृतम् ।
कस्यान्यस्याभिधाध्वंसि यथा शंकरवर्मणः ॥ २१३ ॥
स्वस्रीयः सुखराजस्य तेन द्वाराधिपः कृतः ।
वीरानकाभिधे स्थाने प्रमादादासदद्वधम् ॥ २१४ ॥
तत्कोपात्स स्वयं राजा दत्तयात्रो मदोर्जितः ।
वीरानकं समुन्मूल्य प्रविवेशोत्तरापथम् ॥ २१५ ॥
सिन्धुकूलाश्रयान्देशाञ्जित्वा भूरीन्भयातुरैः ।
कृतानतिर्महीपालैः प्रत्यावृत्तोभवत्ततः ॥ २१६ ॥
उरशां विशतस्तस्य वास्तव्यैरौरशैः समम् ।
निकेतहेतोः सैन्यानामकस्मादुदभूत्कलिः ॥ २१७ ॥
गिरिश्रृङ्गाधिरूढेन श्वपाकेन निपातितः ।
वेगवाही शरस्तस्य प्रमादादविशद्गलम् ॥ २१८ ॥
मुमूर्षुराप्तान्कटकं संरक्ष्य नयतेति सः ।
उक्त्वा कर्णीरथारूढः स्थानात्तस्माद्विनिर्ययौ ॥ २१९ ॥
हीनदर्शनसामर्थ्यः परिज्ञाय शनैर्गिरा ।
क्रन्दन्त्या वपुरालिङ्ग्य स्थितायाः क्षामभाषितः ॥ २२० ॥
पुत्रं गोपालवर्माख्यं न्यासीकृत्य च रक्षितुम् ।
शिशुदेश्यं महादेव्याः सुगन्धाया अबान्धवम् ॥ २२१ ॥

फाल्गुने कृष्णसप्तम्यां वत्सरे सप्तसप्ततौ ।
उत्खायमानविशिखो मार्ग एव व्यपद्यत ॥ २२२ ॥

तिलकम् ॥

सुखराजादयः सैन्यं रक्षन्तः परभूमिषु ।
वृत्तान्तैर्गोपयन्तस्तं यान्त एवाभवन्पथि ॥ २२३ ॥
तं यत्रसूत्रैस्ते मूर्ध्नो नम्रतोन्नम्रतावहैः ।
प्रतिप्रणामं प्राप्तानां सामन्तानामकारयन् ॥ २२४ ॥
षड्भिर्दिनैर्निजे स्थाने प्राप्ते बोल्यासकाभिधे ।
चक्रिरे गतसंत्रासास्ततस्तस्यान्तसक्रियाम् ॥ २२५ ॥
तिस्रः सुरेन्द्रवत्याद्या राज्ञयो राजानमन्वयुः ।
वालाविभुः कृतज्ञश्च जयसिंहाह्वयः कृती ॥ २२६ ॥
द्वौ लाडो वज्रसारश्च तं भृत्यावनुजग्मतुः ।
इति षड्भिश्चितारूढैः[1] सहसाक्रियताग्निसात् ॥ २२७ ॥
ततो जुगोप गोपालवर्मा धार्मिकतोज्ज्वलः ।
सुगन्धया पाल्यमानः सत्यसंधो वसुंधराम् ॥ २२८ ॥
मध्ये लालितकादीनां दुर्वृत्तानां वसन्नपि ।
अनतिक्रान्तबाल्योपि दुःसंस्कारान्न सोग्रहीत् ॥ २२९ ॥
भूपालजननी भोगैर्वैधव्येधिकमुन्मदा ।
सा प्रभाकरदेवाख्यमचीकमत मन्त्रिणम् ॥ २३० ॥
तया निर्भरसंभोगप्रीतया स व्यधीयत ।
सौभाग्यपदशृङ्गारमौलिचक्रत्रयाङ्कितः ॥ २३१ ॥
कोशाध्यक्षेण रागिण्यास्तस्या लुण्ठितसंपदा ।
उदभाण्डपुरे तेन शाहिराज्यं व्यधीयत ॥ २३२ ॥
आज्ञातिक्रमिणः शाहेः कृत्वा कमलुकाभिधाम् ।
तोमराणाय स प्रादाद्राज्यं ललियसूनवे ॥ २३३ ॥

---

१ सह सोक्रियत इतिस्यात् ।

प्रत्यावृत्तोथ नगरं विवेश विजयोर्जितः ।
शौर्यशृङ्गारवसतौ साभिमानः स्वविग्रहे ॥ २३४ ॥
स राजजननीजारः साहंकारो जयार्जनात् ।
मानक्षतिमधिक्षेपैर्वीराणां व्यधितान्वहम् ॥ २३५ ॥
क्षुद्रेण कामिना वेश्यावेश्मनीव नृपास्पदे ।
तेनावृते संप्रवेशो नाभूदन्यस्य कस्यचित् ॥ २३६ ॥
शनैर्विज्ञातवार्तस्य धनमानापहारकृत् ।
सोभूदक्षिगतोत्यर्थं राज्ञो गोपालवर्मणः ॥ २३७ ॥
विद्यते यन्न गञ्जेस्मिंस्तत्सर्वं शाहिविग्रहे ।
गतमित्यब्रवीद्भूपं स कोशगणनोद्यतम् ॥ २३८ ॥
अथ गञ्जाधिपो राजभीतः खार्खोदवेदिनम् ।
रामदेवाह्वयं बन्धुमभिचारमकारयत् ॥ २३९ ॥
तयाभिचारक्रियया भुक्तभूर्वत्सरद्वयम् ।
गोपालवर्मनृपतिर्जातदाहो व्यपद्यत ॥ २४० ॥
व्यक्तीभूतकुकर्मा स राजदण्डभयाकुलः ।
रामदेवोवधीत्पापः स्वयमेव स्वविग्रहम् ॥ २४१ ॥
रथ्यागृहीतो गोपालवर्मभ्राताथ संकटः ।
बभूव प्राप्तराज्यः स दशभिर्दिवसैर्व्यसुः ॥ २४२ ॥
अथ वंशक्षये वृत्ते राज्ञः शंकरवर्मणः ।
प्रजाप्रार्थनया राज्यं सुगन्धा विदधे स्वयम् ॥ २४३ ॥
गोपालपुरगोपालमठगोपालकेशवान् ।
सा पुरं च स्वनामाङ्कं विदधे धर्मवृद्धये ॥ २४४ ॥
गोपालवर्मणो जाया नन्दानिन्द्यान्वयोद्भवा ।
शिशुरप्यभवन्नन्दामठकेशवधारिणी[1] ॥ २४५ ॥

---

१ कारिणी इत्युचितम् ।

अन्तर्वत्न्याः क्षणे तस्मिन्पत्न्या गोपालवर्मणः ।
जयलक्ष्म्या बबन्धास्थां श्वश्रूः संतानकाङ्क्षिणी ॥ २४६ ॥
तस्यां विपन्नापत्यायां प्रसवान्तेतिदुःखिता ।
साभूदन्वयिने राज्यं कस्मैचिद्दातुमुद्यता ॥ २४७ ॥
तस्मिन्काले महीपालनिग्रहानुग्रहक्षमम् ।
तत्र तत्त्रिपदातीनां कृतसंहत्यभूत्कुलम् ॥ २४८ ॥
ततः समाश्रितैकाङ्गा स्वयं संवत्सरद्वयम् ।
सुगन्धा विदधे राज्यं सा मित्रत्वेन तत्त्रिणाम् ॥ २४९ ॥
योग्याय दातुं साम्राज्यं कस्मैचित्सा किलैकदा ।
मन्त्राय मन्त्रिसामन्तांस्तत्रैकाङ्गानढौकयत ॥ २५० ॥
अवन्तिवर्मवंशान्ते नप्तारं शूरवर्मणः ।
गग्गायाः स्वकुटुम्बिन्याः संजातं सुखवर्मणा ॥ २५१ ॥
अनुव्रतो मे संबन्धिस्नेहादेवं भवेदिति ।
राज्ये निर्जितवर्माख्यं कर्तुं तस्या मनोभवत् ॥ २५२ ॥

युग्मम् ॥

तया तदुक्तं विषयव्यसनित्वेन जागरात् ।
रात्रौ दिवाशयतया योप्यनुत्थानदूषितः ॥ २५३ ॥
नाम पङ्गुरिति प्राप राज्ये का तस्य योग्यता ।
इत्युदीर्याभवन्मन्तो यावत्केचन मन्त्रिणः ॥ २५४ ॥
संहतैर्भेदनिर्यातैस्तावन्निर्जितवर्मजः ।
दशवर्षः कृतो राजा पार्थस्तत्त्रिपदातिभिः ॥ २५५ ॥

तिलकम् ॥

ते गञ्जाधिपवाक्यानां सुगन्धोत्पाटनात्कृतम् ।
प्रायश्चित्तममन्यन्त मानक्षतिविधायिनाम् ॥ २५६ ॥
सा राजधान्याः साम्राज्यपरिभ्रष्टा विनिर्ययौ ।
हृताधिकारा हारस्य पतितैर्बाष्पबिन्दुभिः ॥ २५७ ॥
शरणं प्रत्यभाद्भृत्यो यो यस्तस्याः क्रमागतः ।
तं तमैक्षिष्ट निर्यान्ती विपक्षैः सह संगतम् ॥ २५८ ॥
वर्ष एकोननवते संभूयैकाङ्गसैनिकाः ।
गत्वा सुगन्धामानिन्युः पुनर्हुष्कपुरस्थिताम् ॥ २५९ ॥
तामापतन्तीमाकर्ण्य पार्थानुग्राहका मदात् ।
चैत्रान्ते तत्रिणः सर्वे निर्ययुः समरोन्मुखाः ॥ २६० ॥
ते जित्वा नवते वर्षे वैशाखे भिन्नसंहतीन् ।
एकाङ्गान्व्यूढसंघातान्बबन्धुस्तां पलायिताम् ॥ २६१ ॥
निष्पालकविहारान्तस्तैर्बद्धा सा व्यपद्यत ।
अनित्यपतनोच्छ्राया विचित्रा भाग्यवृत्तयः ॥ २६२ ॥
अस्मिन्धनजनक्षैण्यनिमित्तं मण्डलोत्तमे ।
सर्वतोदिक्कमुत्तस्थावथानर्थपरम्परा ॥ २६३ ॥
जनकः पालको भूत्वा पङ्गुर्बालस्य भूपतेः ।
सामात्योपीडयल्लोकमुत्कोचग्रहतत्परः ॥ २६४ ॥
भूभुजो ग्रामकायस्था इवान्योन्यविपाटनम् ।
दत्ताधिकाधिकोत्कोचा विदधुस्तत्रिसेवया ॥ २६५ ॥
यद्राज्यैः[1] कन्यकुब्जाद्या विलब्धास्तत्र मण्डले ।
तत्रिणां हुण्डिकादानाद्भूभुजां जीविकाभवत् ॥ २६६ ॥
विष्णुः पुराणाधिष्ठाने मेरुवर्धनमत्रिणा ।
श्रीमेरुवर्धनस्वामिनामा येन व्यधीयत ॥ २६७ ॥

---

१ यद्राजैः इत्युचितम् ।

तदात्मजाः क्षणे तस्मिन्गहनद्रोहचाक्रिकाः ।
चक्रुर्निगूढराज्येच्छाः प्रजायासैर्धनार्जनम् ॥ २६८ ॥

युग्मम् ॥

सार्धं सुगन्धादित्येन गूढं शंकरवर्धनः ।
तेषां ज्येष्ठो बद्धसख्यो मुमोष नृपमन्दिरम् ॥ २६९ ॥
क्षीणप्रजे क्षणे तस्मिन्क्षारपात इव क्षते ।
उदीपः प्लाविताशेषशरच्छालिरजृम्भत ॥ २७० ॥
खार्यां सहस्रक्रेयायां दुर्लभे भोजनेभवत् ।
वर्षे त्रिनवते घोरे दुर्भिक्षेण जनक्षयः ॥ २७१ ॥
शवैश्चिरप्रविष्टाम्बुसंसेकोच्छ्वनविग्रहैः ।
वितस्ता सर्वतश्छन्ना दुर्लक्ष्यसलिलाभवत् ॥ २७२ ॥
विश्वतोस्थिमये जाते नैबिड्यात्क्षितिमण्डले ।
सर्वभूतभयादायि श्मशानैक्यमजायत ॥ २७३ ॥
महार्घधान्यसंभारविक्रयप्राप्तसंपदः ।
मन्त्रिणः क्ष्मापतेः प्रापुस्तन्त्रिणश्च धनाढ्यताम् ॥ २७४ ॥
आदेयः क्ष्माभुजः सोभून्मन्त्री यस्तादृशीः प्रजाः ।
विक्रीय वाहयन्नासीत्तन्त्रिणां हुण्डिकाधनम् ॥ २७५ ॥
अटव्यां वृष्टिसंपाते वातवर्षैरुपद्रुतम् ।
बहिः सर्वं जनं पश्यन्कश्चित्प्राप्तोष्णमन्दिरः ॥ २७६ ॥
यथा तथा जनं दुःस्थं वीक्ष्य कापुरुषश्चिरम् ।
राजधानीस्थितः पङ्गुः स्वसुखं बह्वमन्यत ॥ २७७ ॥

युग्मम् ॥

तुञ्जीनचन्द्रापीडादिप्रजापालप्रियाः प्रजाः ।
एवं तस्मिन्क्षणे नीताः संक्षयं राजराक्षसैः ॥ २७८ ॥

प्रापुश्चिरमवस्थानं पार्थिवा न तदा क्वचित् ।
धारासंपातसंभूता बुद्बुदा इव दुर्दिने ॥ २७९ ॥
पार्थः पितरमुत्पाट्य कदाचित्प्राभवत्स्वयम् ।
कदाचित्स तमुत्पाट्य तत्रिचक्रिकयाप्यभूत् ॥ २८० ॥
अप्रीणयत्पङ्गुवधूवडवामण्डलं युवा ।
सुगन्धादित्यबीजाश्वो व्यवायविधिसेवया ॥ २८१ ॥
राज्ञ्या बप्पटदेव्याः स निर्दयैः सुरतोत्सवैः ।
खण्डयामास कण्डूतिं साप्यस्यार्थैषणां[1] धनैः ॥ २८२ ॥
भगिनीभगसौभाग्यबद्धराज्याः स्वयं ददुः ।
यां पङ्गवे मनोज्ञाङ्गीं मेरुवर्धनसूनवः ॥ २८३ ॥
सुगन्धादित्यमौत्सुक्यात्सापि देवी मृगावती ।
स्वयं संबुभुजेभ्यर्थ्य कान्ता कामितकामिनी ॥ २८४ ॥
पर्यायेणाभवद्भृत्यः स तयोर्भोगवृद्धये ।
दरिद्रयोषितोरेकं भुक्तिपात्रमिवान्वहम् ॥ २८५ ॥
पुत्रयो राज्यलाभाय स्पर्धयाभ्यां स्वमन्त्रिणे ।
दत्ता निधुवनश्रद्धा धनदानैः सदक्षिणा ॥ २८६ ॥
अथ पार्थं समुत्पाट्य तत्पिता पङ्गुराश्रितः ।
तन्त्रिभिः सप्तनवते वर्षे पौषेभिषेचितः ॥ २८७ ॥
माघेष्टानवते वर्षे सोभिषिच्य शिशुं सुतम् ।
चक्रवर्माभिधं राज्ये क्षीणपुण्यो व्यपद्यत ॥ २८८ ॥
पैतृकं वाञ्छतो राज्यं पार्थस्यानुचरा व्यधुः ।
एकाङ्गैः सह संग्रामं तत्र तन्त्रिपदातयः ॥ २८९ ॥
मातुर्बप्पटदेव्याः स कंचित्कालं शिशुर्नृपः ।
मातामह्याः क्षिल्लिकायाः पाल्यस्त्वासीत्समा दश ॥ २९० ॥

---

१ साप्यस्यार्थैषणां इत्युचितम् ।

बाल्यादव्यक्तदौःशील्ये तस्मिंस्तत्पालनं तयोः ।
निर्दोषमासीदण्डस्थफणिलालनसंनिभम् ॥ २९१ ॥
जातः पङ्गोर्मृगावत्यां नवमेब्देथ तत्रिभिः ।
चक्रवर्माणमुत्पाट्य शूरवर्मा नृपः कृतः ॥ २९२ ॥
निःस्नेहा मातुलामात्याः प्रययुः स्वार्थतत्पराः ।
अदत्त्वा तत्रिणां देयं तस्योत्पाटनहेतुताम् ॥ २९३ ॥
अदुर्वृत्तोपि स क्ष्माभृद्विना भूरिधनापर्णम् ।
गुणवानिव वेश्यानां तत्रिणां नाभवत्प्रियः ॥ २९४ ॥
वर्षे गते तमुत्पाट्य दृष्टोत्पत्तितया नृपम् ।
बह्वर्थदं पुनः पार्थं व्यधुस्तत्रिपदातयः ॥ २९५ ॥
अभूत्साम्बवती वेश्या साम्बेश्वरविधायिनी ।
पार्थप्रिया तत्रिचक्रसंग्रहे ज्ञातचक्रिका ॥ २९६ ॥
कालापेक्षी चक्रवर्मा ततोप्यैच्छद्धनं बहु ।
एकादशाब्दस्याषाढे कृतो भूयोपि तत्रिभिः ॥ २९७ ॥
पार्थादीन्यैः समुत्पाट्य भुक्तं चक्रिकया पुरा ।
तैस्तैः स्थानैश्च ये तेभ्यो जीवनाद्युपलेभिरे ॥ २९८ ॥
पिता भ्राता च यैरस्य राज्यादुत्पाटितोभवत् ।
संबन्धिभ्योपि यैर्द्रुग्धं कन्यां दत्त्वेतरेतरम् ॥ २९९ ॥
अकरोद्दृष्टदोषाणां तेषामेव स नष्टधीः ।
मेरुवर्धनपुत्राणामधिकारसमर्पणम् ॥ ३०० ॥

तिलकम् ॥

कृतोक्षपटलाधीशस्तेन शंकरवर्धनः ।
गृहकृत्येप्यसत्कृत्यो दाम्भिकः शंभुवर्धनः ॥ ३०१ ॥
पौषे तस्यैव वर्षस्य धनाभावात्स तत्रिणाम् ।
अदत्तद्रुण्डिकादेयः पलायिष्ट भयाकुलः ॥ ३०२ ॥

स्थिते मडवराज्यान्तस्तस्मिञ्शंकरवर्धनः ।
राज्यार्थी तन्त्रिणां दूतं प्राहिणोच्छंभुवर्धनम् ॥ ३०३ ॥
आवर्जितैः स निखिलैरधिकोत्कोचचर्चया ।
वञ्चयित्वाग्रजं राज्ये तैः स्वमेवाभ्यषेचयत् ॥ ३०४ ॥
तीर्थस्थितः स्वकुलजांस्तिमिरत्ति भुङ्क्ते
मौनी बकस्तिमिमुपेत्य वनान्तवासी ।
व्याधो निहन्ति तु बकं प्रभवन्ति ते ते
पात्राण्युपर्युपरि वञ्चनचुञ्चुतायाः ॥ ३०५ ॥
भ्रष्टश्रीश्चक्रवर्माथ निशि श्रीढक्कवासिनः ।
एकदा डामराग्र्यस्य संग्रामस्याविशद्गृहम् ॥ ३०६ ॥
ज्ञात्वा कान्तिविशेषेण राजानं स कृताञ्जलिः ।
प्रणम्य ग्राहयामास संभ्रमान्निजमासनम् ॥ ३०७ ॥
राज्यभ्रंशादिवृत्तान्तमुक्त्वा साहायकार्थिनम् ।
तं विपत्पेशलं प्रह्वो विचिन्त्योवाच डामरः ॥ ३०८ ॥
तन्त्रिणां वा तृणानां वा राजन्का गणना रणे ।
त्वत्सेवनार्थं सामर्थ्यं कस्मिन्न मम कर्मणि ॥ ३०९ ॥
प्राप्तोत्साहः पुनर्नूनमस्मानेव हनिष्यसि ।
विस्मरन्त्युपकारं हि कृतकार्या महीभुजः ॥ ३१० ॥
ऊर्ध्वारोहे य आलम्बहेतुर्भूभृच्छिनत्ति तम् ।
कुठारिकस्तरुस्कन्धमिवाधोगमनोन्मुखः ॥ ३११ ॥
श्रीधैर्यादिप्रकर्षेण येनोपक्रियते नृपः ।
प्राप्तोदयः स तेनैव शङ्क्यं वेत्त्युपकारिणम् ॥ ३१२ ॥
अस्मिन्स्थिते विपदभूदिति संचिन्त्य वर्ज्यते ।
मूढैः परिवृढैरापत्सेवको मङ्गलेच्छुभिः ॥ ३१३ ॥

संपद्यापत्सहायस्य विस्मृतोपक्रिया नृपाः ।
मध्ये प्रमादस्खलितमुत्पन्नं हृदि कुर्वते ॥ ३१४ ॥
आमयार्तिरिपुत्रासक्षुदादौ दृष्टवैकृतान् ।
लब्धोदया ह्रीभयेन क्षमापा घ्नन्त्यनुयायिनः ॥ ३१५ ॥
राज्ञः सतोपि नाश्वासो यस्येभस्येव कर्णयोः ।
अविशुद्धप्रकृतयो ध्वनन्ति मधुपा इव ॥ ३१६ ॥
दिवसे संनिधानेन पिशुनप्रेरणा प्रभोः ।
ईर्ष्यालुना स्वैरिणीव रक्षितुं यदि पार्यते ॥ ३१७ ॥
राजन्नजन्युपाध्यायो देवी यच्छिक्षयेद्रहः ।
तत्र प्रजागरः कर्तुमसर्वज्ञैर्न शक्यते ॥ ३१८ ॥
कथंचिदह्नि हृदये कुशलैर्विनिवेशिता ।
शिक्षा गौरखरेणेव राज्ञा विस्मार्यते निशि ॥ ३१९ ॥
न के लोभं समुत्पाद्य जिह्वया स्निग्धदीर्घया ।
पिपीलका इव ग्रस्ताः क्षमापालैः शल्यकैरिव ॥ ३२० ॥
जानाति हन्तुं हन्तव्यमासन्नं न तु दूरगम् ।
एको बकः परः सत्यं द्रोहवृत्तिर्महीपतिः ॥ ३२१ ॥
न नाम कण्टकाकीर्णः कौटिल्यं लक्ष्यतां नयेत् ।
कालापेक्षी क्षितिपतिः शरीरमिव जाहकः ॥ ३२२ ॥
नमन्नपि हरिर्हन्यादाश्लिष्यन्नपि पन्नगः ।
विहसन्नपि वेतालः स्तुवन्नपि महीपतिः ॥ ३२३ ॥
अद्रोहवृत्त्या तस्मात्त्वं द्रक्ष्यस्यस्मान्सदा यदि ।
ससैन्यस्ते तदेषोहं प्रातरेव पुरःसरः ॥ ३२४ ॥
तदाकर्ण्याब्रवीद्राजा लज्जास्मितसिताधरः ।
स्वात्मेव यूयं संरक्ष्या मम पूर्वोपकारिणः ॥ ३२५ ॥

ततो निक्षिप्य चरणं रक्ताक्ते मेषचर्मणि ।
कोशं चक्रतुरन्योन्यं सखड्गौ नृपडामरौ ॥ ३२६ ॥
अथ संघटितासंख्यचण्डडामरमण्डलः ।
चक्रवर्माकरोद्यात्रां प्रत्यूषे नगरोन्मुखः ॥ ३२७ ॥
तस्मिन्क्षणे पुरस्कृत्य योद्धुं शंकरवर्धनम् ।
विनिर्ययुः सिताष्टम्यां चैत्रे तन्त्रिपदातयः ॥ ३२८ ॥
कालानुवृत्तिप्रच्छन्नं तेषां संभावनोज्झितम् ।
स तत्वरे पुरस्कर्तुं चक्रवर्मा स्वविक्रमम् ॥ ३२९ ॥
अथ प्रवृत्ते संग्रामे घोरे पद्मपुराद्बहिः ।
जघान प्रेरितहयः पूर्वं शंकरवर्धनम् ॥ ३३० ॥
हते सेनाधिपे तत्र शतधा तन्त्रिवाहिनी ।
प्रययौ पवनाघातप्रेरिता नौरिवार्णवे ॥ ३३१ ॥
पृष्ठानुसरणोद्युक्तो नृपस्तेषामपाहरत् ।
गतिं तुरगवेगेण शिरःश्रेणिं तथासिना ॥ ३३२ ॥
भ्रमतः समरे बभ्रुर्वीरपट्टाञ्चलच्छटाः ।
चक्रवर्ममृगेन्द्रस्य सटापटलविभ्रमम् ॥ ३३३ ॥
किमन्यत्पञ्चषाण्यासन्सहस्राणि रणाङ्गने ।
पतितानि क्षणादेव हतानां तत्र तन्त्रिणाम् ॥ ३३४ ॥
तन्त्रिणो रणसंरम्भपरिश्रान्ताः क्षमातले ।
गृध्रपक्षकृतच्छाये शायिताश्चक्रवर्मणा ॥ ३३५ ॥
विशुद्धवंश्यैर्गुणिभिर्निहतः संश्रितैः समम् ।
अभूषयद्वीरशय्यां शूरः शंकरवर्धनः ॥ ३३६ ॥
उदयं संहता एव संहता एव च क्षयम् ।
प्रयान्तः स्पृहणीयत्वं तन्त्रिणः कस्य नागमन् ॥ ३३७ ॥

माननीयानधृष्यांश्च महावंश्यान्महीपतीन् ।
अहीनिव खिलीकृत्य भिक्षयन्तः क्षणे क्षणे ॥ ३३८ ॥
अनयन्क्रीडया व्रीडां माद्यन्तो जीविकाकृते ।
प्रागाहितुण्डिकाः क्रूरा इव ये गर्ह्यवृत्तयः ॥ ३३९ ॥
ते तत्रिणः क्षणाद्दग्धा गूढवैरविषाग्निना ।
विमाननाविविग्नेन चक्रवर्ममहाहिना ॥ ३४० ॥

तिलकम् ॥

अथ द्वितीये दिवसे भग्नानामपि तत्रिणाम् ।
वीरः संघटनां यावदकरोच्छंभुवर्धनः ॥ ३४१ ॥
तावन्मिलितसामन्तसचिवैकाङ्गलालितः ।
सैन्यैर्नानापथायातैर्नदद्भिर्व्याप्तदिक्पथः ॥ ३४२ ॥
वलगन्मध्येश्ववाराणां नृत्यतेवाग्र्यवाजिना ।
वलगाङ्केनोद्वहल्लुम्बं शिरस्त्रं वामपाणिना ॥ ३४३ ॥
सस्वेदेतरहस्ताग्रवेष्टनोल्लासनस्पृशः ।
खड्गस्य बिम्बितार्कस्य भाभिर्द्योतितकुण्डलः ॥ ३४४ ॥
कवचोत्सेधसंरुद्धकण्ठायासेन ताम्यता ।
बद्धभ्रुकुटिबन्धेन वदनेन भयावहः ॥ ३४५ ॥
तर्जयन्कृतहुंकाराल्लुण्ठकाल्लुण्ठितापणान् ।
शिरोक्षिसंज्ञया त्रस्तवास्तव्यकृतसान्त्वनः ॥ ३४६ ॥
भेरीरवैः श्रुतिं भिन्दन्पौराशीर्घोषरोधिभिः ।
संग्रामजयशोभाङ्कश्चक्रवर्माविशत्पुरम् ॥ ३४७ ॥

कुलकम् ॥

तस्मिन्सिंहासनं प्राज्यमाक्रामति जयोर्जिते ।
बद्ध्वा कुतश्चिदानिन्ये भूभटः शंभुवर्धनम् ॥ ३४८ ॥

राज्ञः पुरस्तात्तं शस्त्रपातभीमीलितेक्षणम् ।
भक्तिं प्रदर्शयन्पापश्चण्डाल इव सोवधीत् ॥ ३४९ ॥
उज्झतां धर्ममर्यादां भृत्यानां जनकोपमान् ।
हन्तुं नरेन्द्रान्द्रोहेण प्रारम्भः शंभुवर्धनात् ॥ ३५० ॥
प्राप्य निष्कण्टकं राज्यं चक्रवर्मनृपः क्रमात् ।
अजायत धृतोत्सेको नृशंसविषमक्रियः ॥ ३५१ ॥
स्वविक्रमकथास्तोत्ररोमन्थप्रियताहृतः ।
सोभवद्विटबन्ध्यादिचाटुकारविधेयधीः ॥ ३५२ ॥
आत्मानं दैवतमिव स्तुतिमोहितचेतसः ।
जानतः प्राभवंस्तस्य विवेकविगुणाः क्रियाः ॥ ३५३ ॥
तस्मिन्प्रसङ्गे रङ्गाख्यः प्रख्यातो डोम्बगायनः ।
वैदेशिकोभवद्राज्ञा वितीर्णावसरो बहिः ॥ ३५४ ॥
प्राप्तान्सचिवसामन्तान्विन्यस्यन्तो यथाक्रमम् ।
प्रतीहारा नृपस्याग्रमनयन्त विविक्तताम् ॥ ३५५ ॥
विबभौ धवलोष्णीषा सभा दीपप्रभोज्ज्वला ।
शेषशय्येव मणिभिः कृतालोका फणोद्भवैः ॥ ३५६ ॥
कृतावरोधधम्मिल्लमालान्दोलनकेलिभिः ।
प्रदोषपवनैश्चक्रे शिशिरैर्घ्राणतर्पणम् ॥ ३५७ ॥
जातगीतदिदृक्षाणां गवाक्षावलयो बभुः ।
आसवामोदिभिर्वक्त्रैरवरोधमृगीदृशाम् ॥ ३५८ ॥
हारकङ्कणकेयूरपारिहार्यादिशोभिना ।
स्ववृन्देनानुयातोथ प्राविशद्डोम्बगायनः ॥ ३५९ ॥
हंसी नागलता चास्य सुते ललितलोचने ।
चक्रतुः कौतुकोद्रीवां सभां चित्रार्पितामिव ॥ ३६० ॥

तयोर्विलासवलितैश्चलितापाङ्गविभ्रमैः ।
द्वितीयपुष्पप्रकरो व्यकीर्यत सभान्तरे ॥ ३६१ ॥
गायनैर्जयजीवेति कृतकोलाहलैरभूत् ।
सदः सशब्दं कुर्वद्भिस्तत्तन्नृपगुणग्रहम् ॥ ३६२ ॥
भुक्तोत्तरोचितोदञ्चत्पञ्चमस्थानचारिणः ।
वंशै रागविशेषस्य दत्ते स्थाने ततः शनैः ॥ ३६३ ॥
अविक्रियशिरःकम्पभ्रूनेत्रभ्रमशोभितः ।
अभिन्न इव गायन्त्योर्गीतध्वनिरजृम्भत ॥ ३६४ ॥
युग्मम् ॥
अथ ताम्बूलरोमन्थत्यागनिश्चलमूर्त्तिना ।
जातं राजकुरङ्गेण प्रमोदास्पन्ददृष्टिना ॥ ३६५ ॥
गायन्त्यौ भावमालक्ष्य तस्य स्निग्धमगायताम् ।
अधिकोद्रेचिताभिख्यं विलासस्मितविभ्रमैः ॥ ३६६ ॥
राज्ञस्तयोश्च संसक्तचित्तयोरितरेतरम् ।
दृग्व्यापारैः स्वसंवेद्यैः संलाप इव पप्रथे ॥ ३६७ ॥
नृपं हारितचित्तं तं विज्ञायैकः प्रियो विटः ।
ततः प्रसङ्गे प्रोवाच प्रीतिवृद्धिकरं वचः ॥ ३६८ ॥
देव गीतमिदं यातं संप्राप्यैते मनोरमे ।
कर्पूरपारीपतितं मैरेयमिव हारिताम् ॥ ३६९ ॥
गायन्त्योर्मार्जितामेतां रागाद्दन्तचतुष्किकाम् ।
अनयोः प्रतिमाव्याजाच्चुम्बतीव निशाकरः ॥ ३७० ॥
करन्यस्तकपोलान्तमुद्गायन्त्याविमे ध्रुवम् ।
कटाक्षैः कुरुतो व्योम्नि वैमानिकविमोहनम् ॥ ३७१ ॥
जानत्या स्वाश्रयां चर्चामनयोरेकयावयोः ।
असूयास्मितगर्भोयं कटाक्षः पश्य पातितः ॥ ३७२ ॥

गायन्त्येकानतमुखी कर्णव्यालोलकुण्डला ।
विपरीतरतोद्रेककृतारम्भेव शोभते ॥ ३७३ ॥
सफलं तस्य तारुण्यमीदृश्यो निर्जने स्त्रियः ।
औत्सुक्याद्विरहे यस्य गायन्त्येवंविधैः स्वरैः ॥ ३७४ ॥
उपपत्तिपरित्यक्तशास्त्रानुष्ठानमोहितैः ।
एकसार्थप्रयातेभ्यः कथमेको विवर्ज्यते ॥ ३७५ ॥
नेत्रस्य रूपं श्रोत्रस्य ध्वनिं संस्पृशतो न चेत् ।
तदङ्गस्यान्यकान्ताङ्गं स्पृशतो दुष्कृतं कुतः ॥ ३७६ ॥
अभिलाषाङ्कुरः सिक्त इव तैर्विटभाषितैः ।
राज्ञः स्वभावलोलस्य शतशाखत्वमाययौ ॥ ३७७ ॥
ये विस्तारितवर्णसंकररुचः संदर्श्य गोत्रान्तक्-
द्वद्धावस्थितिचापलङ्घनमलं पार्श्वे धनन्त्युद्धताः ।
नीयन्ते विपथावपातपरतां लब्धोदयैस्तैः क्षणा-
त्सिंहा वारिधरैरमी च रभसाद्भूपालसिंहा विटैः ॥ ३७८ ॥
वस्तु क्षणादनुपपत्त्युपपत्तियुक्तं
कृत्वा जडान्यदि विमोहयितुं समर्थाः ।
न स्युर्विटा अथ कुतर्कपथस्थिताश्च
नित्योद्वसेषु निरयेषु मृगाश्चरेयुः ॥ ३७९ ॥
संतोष्य हारकेयूरकुण्डलैर्डोम्बमण्डलम् ।
अमार्गत्यागराधेयः शुद्धान्तमगमन्नृपः ॥ ३८० ॥
कान्तोस्याः क्षितिवल्लभोयमभिधेत्युर्वीपतेरेकतो
ब्रूतेसावतिचण्डताण्डवयुतं डोम्बस्य नामान्यतः ।
मध्ये यत्किमपीति गीतरचनाकाव्यं यदेतद्विदो
यल्लक्ष्मीं क्षपयन्ति तान्धिगबुधान्कीर्त्यर्थिनः पार्थिवान् ॥३८१॥

वेश्यानुरागस्य महेन्द्रचाप-
धाम्नो हरिद्रारसरञ्जनस्य ।
उपाङ्गगीतस्य च हारिणोपि
सौन्दर्यमस्थैर्यहतप्रकर्षम् ॥ ३८२ ॥
दर्शनाभ्याससंवृद्धचक्षूरागः क्षमापतिः ।
विना श्वपाककन्ये ते न पुनः प्राप निर्वृतिम् ॥ ३८३ ॥
गायन्त्यौ शयनोपान्ते शनैर्विहितचुम्बनम् ।
नृपं रतिसुखाभिज्ञं तं हठात्ते प्रचक्रतुः ॥ ३८४ ॥
समागमेन नव्येन तयोर्वैयात्यशोभिना ।
चक्रे क्षपितसामर्थ्यः स लज्जोद्वहनाक्षमः ॥ ३८५ ॥
रत्यन्तसुलभोद्भेदैर्निःसृतैः स्वेदबिन्दुभिः ।
भाग्योष्मसंक्षयजडं वपुस्तस्य व्यधीयत ॥ ३८६ ॥
रागान्धेन कृता हंसी महादेवी महीभुजा ।
भेजे राजवधूमध्ये वालव्यजनवीजनम् ॥ ३८७ ॥
तस्या यैर्भुक्तमुच्छिष्टं ते यथा चक्रवर्मणः ।
नृपान्तराणामन्येषामप्यभूवन्सभासदः ॥ ३८८ ॥
मन्त्रिणामक्षपटलप्रख्यमुख्याधिकारदा ।
प्रवृद्धिहेतुतां प्राप डोम्बसेवनचक्रिका ॥ ३८९ ॥
मौर्ख्यात्सचिवतां केचिच्छ्वपाका न व्यधुः स्वयम् ।
केचित्त्वकुर्वन्नीतिज्ञा राजकार्याणि मन्त्रिवत् ॥ ३९० ॥
मन्त्रिणस्तस्करा राज्ञी श्वपाकी श्वपचाः प्रियाः ।
किं न लोकोत्तरमभूद्भूपतेश्चक्रवर्मणः ॥ ३९१ ॥
ऋतुस्नातार्तवाङ्कानि श्वपाकी स्वांशुकान्यदात् ।
तदाच्छादनदृप्तेच्छा मन्त्रिणः प्राविशन्सभाम् ॥ ३९२ ॥

कैश्चित्क्षितिभुजा वैरमङ्गीकृत्यापि तत्क्षणम् ।
यैर्नाशि श्वपचोच्छिष्टं तेभूवन्सोमपैः समाः ॥ ३९३ ॥
मण्डलेस्मिन्प्रभावोग्रा न देवा न्यवसन्ध्रुवम् ।
तद्वेश्मानि तदा नो चेच्छ्वपाकी प्राविशत्कथम् ॥ ३९४ ॥
तां रणस्वामिनं द्रष्टुं तिलद्वादश्यहे गताम् ।
सामन्तेभ्यः साभिमाना नान्वयुर्डामराः परम् ॥ ३९५ ॥
राजकौटुम्ब्यदृप्तानां डोम्बानां निर्गता मुखात् ।
राज्ञामिवाज्ञा दुर्लङ्घ्या न केनाप्युदलङ्घयत ॥ ३९६ ॥
राज्ञा प्रदत्ते रङ्गाय हेलुग्रामेग्रहारवत् ।
लिलेख पट्टोपाध्यायो न यदा दानपट्टकम् ॥ ३९७ ॥
तदाक्षपटलं गत्वा रङ्गः कोपात्तमब्रवीत् ।
रङ्गस्स हेलु दिण्णेति दासीसुत न लिख्यते ॥ ३९८ ॥
युग्मम् ॥
लिलेख सोथ संत्रासाद्रङ्गभ्रूभङ्गतर्जितः ।
को न राजनि दुर्वृत्ते भवेन्नीतिव्यतिक्रमः ॥ ३९९ ॥
अन्त्यागमनपापस्य पापः पृच्छन्स निष्कृतिम् ।
विटैर्हास्यावहान्येव प्रायश्चित्तानि कारितः ॥ ४०० ॥
हिमेनैव हिमं शाम्येदुष्कृतेनैव दुष्कृतम् ।
सोनुशिष्टो विटैरेवं दधत्पामरसारताम् ॥ ४०१ ॥
पवित्रास्पर्शतोस्पृश्यास्पर्शपापं जिहीर्षुणा ।
तेनादूष्यत विप्रस्य योषिन्मासोपवासिनः ॥ ४०२ ॥
ततोपि पापिनोभूवन्केपि तस्मिन्क्षणे द्विजाः ।
तस्मादप्यग्रहारान्ये जगृहुर्गृहभोजिनः ॥ ४०३ ॥
चक्रे चक्रमठं सोपि पापः पाशुपताश्रयम् ।
तस्मिन्हतेर्धनिष्पन्नं तद्धूर्यमयोजयत् ॥ ४०४ ॥

पूर्वोपकारान्विस्मृत्य डामरान्स निरागसः ।
नृपतिः श्वपचाकामी विश्वस्तांश्छद्मनावधीत् ॥ ४०५ ॥
हन्तुं व्याजेन विश्वस्ताः केचिद्डामरतस्कराः ।
तस्थुस्तस्यान्तिके द्रोहच्छिद्रानेहःप्रतीक्षिणः ॥ ४०६ ॥
श्वपाकीशयनावासासन्नावस्करमन्दिरे ।
शौचस्थितं तं निःशस्त्रं ते रात्रौ प्रापुरेकदा ॥ ४०७ ॥
अथ तैः प्राप्तसमयैरकस्मात्तस्य सर्वतः ।
क्षिप्रं न्यपात्यताशेषशातशस्त्रपरम्परा ॥ ४०८ ॥
सुप्तस्तटाद्ह्रदे भ्रष्ट इव निद्रालसेक्षणः ।
प्रबुद्धः शस्त्रपातैः स व्यमुचद्भैरवान्रवान् ॥ ४०९ ॥
निःशस्त्रः शस्त्रमन्विष्यन्क्षरत्क्षतजनिर्झरः ।
अनुद्रुतोरिभिर्धावञ्शय्यावेश्म विवेश तत् ॥ ४१० ॥
अप्राप्तहेतिं क्रन्दन्त्या श्वपाक्यालिङ्गिताङ्गकम् ।
तत्कुचोत्सङ्गलग्नाङ्गं जघ्नुस्तेनुप्रविश्य तम् ॥ ४११ ॥
स्वैरेव प्रेरिता दारैस्ते तस्य नृपतेः किल ।
मुमूर्षोर्जानुनी स्वैरं शिलया समचूर्णयन् ॥ ४१२ ॥
त्रयोदशाब्दे ज्येष्ठस्य शुक्राष्टम्यां क्षपाक्षणे ।
श्वपाकभोग्यः स श्वेवावस्करे तस्करैर्हतः ॥ ४१३ ॥
उन्मत्तावन्तिनामाथ पार्थसूनुर्दुराशयः ।
अभ्यषिच्यत वैधेयैः सचिवैः शर्वटादिभिः ॥ ४१४ ॥
श्वपाकीकामुके पापे निहते निशि तस्करैः ।
प्रजानां पाप्मना सोभूत्पापात्पापतरो नृपः ॥ ४१५ ॥
स्थगिता तत्कथापापस्पर्शभीत्या सरस्वती ।
कथंचिन्नस्तुरश्वेव सेयं प्रस्थाप्यते मया ॥ ४१६ ॥

आसीत्पितृकुलं तस्य भक्ष्यं दुर्नृपरक्षसः ।
और्वाभिधस्य हव्याशविशेषस्येव जीवनम् ॥ ४१७ ॥
तस्यासंघट्टकराघातसटांकारकरोटिकाः ।
घ्राणस्कन्दादिवाद्यज्ञाः[1] सभायां मुख्यमन्त्रिणः ॥ ४१८ ॥
तेमात्याश्चारणत्वेन निर्लज्जास्तमरञ्जयन् ।
कालान्तरेण यैरेव भूमिपालैर्भविष्यते ॥ ४१९ ॥
पर्वगुप्तोभवत्तस्य सर्वेभ्योप्यधिकं प्रियः ।
आस्थाने नर्तनं कुर्वन्नपाकृतकटीपटः ॥ ४२० ॥
आ तन्त्रिविप्लवाद्दृष्ट्वा[2] कीटप्रायान्महीपतीन् ।
पर्वगुप्तः सर्वदाभूद्राज्यावाप्तिकृतोद्यमः ॥ ४२१ ॥
तदा निगूढराज्येच्छः सख्यं मुख्यैः स मन्त्रिभिः ।
पीतकोशैः प्रविदधे पञ्चभिर्भूभटादिभिः ॥ ४२२ ॥
भूभटः शर्वटश्छोजः कुमुदः सोमृताकरः ।
पर्वगुप्तेन संबन्धं चक्रिरे कोशपीथिनः ॥ ४२३ ॥
गवाक्षासरसि प्राप्तश्रीजलोवागलद्द्विजः ।
संग्रामडामरगृहे यो रक्षः ख्यातपौरुषः ॥ ४२४ ॥
पदातिमात्रो भूपेन दृष्टशौर्यः स संयुगे ।
महोदरो महाकायः प्रापितो मुख्यमन्त्रिताम् ॥ ४२५ ॥
युग्मम् ॥
यादृशी तेन ददृशे देवी श्रीः सरसोन्तरे ।
तादृद्रक्षजयादेवीत्यभिधानेन निर्ममे ॥ ४२६ ॥
राज्यं निष्कण्टकं कृत्वा धूर्तेनापजिहीर्षुणा ।
प्रेरितः पर्वगुप्तेन भूभृच्चक्रे कुलक्षयम् ॥ ४२७ ॥

---

१ स्कन्धादि इति स्यात् ।

तेन लुण्ठितसर्वस्वः पार्थस्तस्थौ कलत्रवान् ।
श्रीजयेन्द्रविहारान्तः श्रमणैर्दत्तभोजनः ॥ ४२८ ॥
शिशून्शंकरवर्मादीन्भ्रातॄन्द्वारान्निरोध्य सः ।
तत्र स्थिताननशनैरुत्क्रान्तासूनकारयत् ॥ ४२९ ॥
उद्यतः पितरं हन्तुं मन्त्रिणोनुमतिप्रदान् ।
बद्धपट्टान्व्यधाद्बद्धनिगडानितरान्पुनः ॥ ४३० ॥
एकदा मन्त्रिसामन्ततन्त्रिकायस्थसैनिकाः ।
पार्थं तदाज्ञामासाद्य निशाया पर्यवेष्टयन् ॥ ४३१ ॥
म्लानक्षीणाम्बरां पत्नीं रुद्धद्वारां निपात्य ते ।
आलिङ्ग्यमानां क्रन्दद्भिस्तर्णकैरिव दारकैः ॥ ४३२ ॥
केशानालम्ब्य कर्षन्तः शर्करोत्पाटिताङ्गकम् ।
विपन्नं गोकुलाद्दान्तमिव निर्हृत्य तं गृहात् ॥ ४३३ ॥
क्षुत्क्षामरूक्षं क्रन्दन्तं निजघ्नुर्नग्नविग्रहम् ।
चण्डाला इव निःशस्त्रं कुमुदाद्या नृपप्रियाः ॥ ४३४ ॥
युग्मम् ॥
पितरं निहतं श्रुत्वा राजा संजातकौतुकः ।
प्रातः स्वसचिवैः सार्धं गत्वा हृष्टोथ दृष्टवान् ॥ ४३५ ॥
अत्राङ्गेस्य प्रहारोयं मद्दत्त इति वादिनः ।
तस्याग्रे राजपुरुषाः शशंसुर्निजविक्रमम् ॥ ४३६ ॥
न्यक्कृत्य स्वीकृतो राज्ञा तदा तद्रञ्जनोद्यतः ।
अचूचुदत्पर्वगुप्तो देवगुप्ताभिधं सुतम् ॥ ४३७ ॥
पार्थस्य निहतस्याङ्गे सोक्षिपत्क्षुरिकां ततः ।
रञ्जितो येन भूपालो जातहासोभवच्चिरम् ॥ ४३८ ॥
डामरैर्लुण्ठितो देशः प्रणाशे चक्रवर्मणः ।
उत्थाप्य पापान्कायस्थांस्तेन भूयोपि दण्डितः ॥ ४३९ ॥

संप्रेरितः कुसचिवैः शस्त्राभ्यासं चकार सः ।
पाटयन्क्षुरिकाघातैः कोटवीस्तनकोटरम् ॥ ४४० ॥
गर्भिणीनां च जठरं गर्भान्द्रष्टुमपाटयत् ।
काठिन्यस्य परीक्षार्थमङ्गं कर्मकृतामपि ॥ ४४१ ॥
प्रतिग्रहाग्रहाद्घोराद्यद्वा वधभयाद्द्विजाः ।
प्रत्यगृह्णन्नग्रहारांस्तस्मादपि नृपाधमात् ॥ ४४२ ॥
क्रूरपापानुरूपेण क्षयरोगेण पार्थिवः ।
ततोनुबाध्यमानोभूदपर्यन्तव्यथातुरः ॥ ४४३ ॥
व्यथया तस्य तादृश्या प्रजा एव न केवलम् ।
तुतुषुर्निजशुद्धान्तमहिष्योपि चतुर्दश ॥ ४४४ ॥
अथान्तःपुरदासीभिर्यः कुतश्चिदुपाहृतः ।
क्षितिपालात्प्रजातोयमिति प्रख्यापितो मृषा ॥ ४४५ ॥
तं शिशुं शूरवर्माख्यं विनिवेश्य नृपासने ।
हस्ते निक्षिप्य सामन्तसचिवैकाङ्गतत्रिणाम् ॥ ४४६ ॥
कम्पनाधिपतेर्बद्धद्वेषः कमलवर्धनात् ।
बिभ्यन्मडवराज्यस्थाडामरोत्पाटनक्षमात् ॥ ४४७ ॥
आसन्ननिरयप्राप्तिः पितृहा पार्थिवाधमः ।
शुचौ पञ्चदशाब्दस्य प्रजापुण्यैः क्षयं ययौ ॥ ४४८ ॥

चक्कलकम् ॥

पितृघातिसुतो राजा जयस्वामिविरोचनम् ।
आषाढशुक्लसप्तम्यां शिशुर्द्रष्टुं विनिर्ययौ ॥ ४४९ ॥
नवा विरेजे राजश्रीर्बालस्य पृथिवीपतेः ।
कृपाणवेणिललिता छत्रचामरहासिनी ॥ ४५० ॥
अत्रान्तरे जवायातैश्चारैरावेदितः श्रुतः ।
सामन्तैर्नगरोपान्तं प्राप्तः कमलवर्धनः ॥ ४५१ ॥

एकाङ्गतत्रिसामन्तस्यालहारकसादिभिः ।
नगरं प्रविशञ्श्रान्तः समं सैन्यैररुध्यत ॥ ४५२ ॥
विरुद्धडामरानीकान्युद्धा मार्गेषु निर्गतः ।
श्रान्तोप्यसौ वैरिसेनामजयद्विक्रमोर्जितः ॥ ४५३ ॥
सहस्रमश्ववाराणां विद्राव्य तुरगैर्मितैः ।
राजधानीमसंरुद्धः प्रविवेश ततः क्षणात् ॥ ४५४ ॥
तं लब्धजयमाकर्ण्य सैन्यैस्त्यक्तं पलायितैः ।
एकाकिनं क्वाप्यनयज्जननी शिशुभूपतिम् ॥ ४५५ ॥
प्राक्कर्मभिर्मोहितो वा प्रेरितो वा कुमन्त्रिभिः ।
नाभूत्सिंहासनारूढो मूढः कमलवर्धनः ॥ ४५६ ॥
तदानीं स्वगृहान्यातो राज्यकामोन्यवासरे ।
संघट्टयद्विजान्सर्वानच्चूचुददनीतिवित् ॥ ४५७ ॥
प्रौढं शक्तं च कुरुत क्षमापं कंचित्स्वदेशजम् ।
मामेव कुर्युः सामर्थ्यादिति मूढः स चिन्तयन् ॥ ४५८ ॥
एकाकिनीं रहः क्षीबां लब्ध्वा दुर्लभयोषितम् ।
अप्रौढोनुपभुज्यान्यदिने दूत्यार्थयेत यः ॥ ४५९ ॥
विभूतिं रभसावाप्तां यश्च संत्यज्य तत्क्षणम् ।
नीत्या कामयतेन्येद्युः शोच्यस्ताभ्यां परोस्ति कः ॥ ४६० ॥

युग्मम् ॥

अथोत्पलकुले छिन्ने स्थूलकम्बलवाहिनः ।
अभ्रङ्गोक्षनिभा विप्राः समगंसत गोकुले ॥ ४६१ ॥
धूमनिर्दग्धकूर्चानां राज्ञस्तांस्तांश्चिकीर्षताम् ।
राज्यव्यवस्थोपन्यासस्तेषां चिरमवर्धत ॥ ४६२ ॥

---

१ संघट्टयन् इत्युचितम् ।

वैमत्येन मिथस्तेषां नान्यः कोप्यभ्यषिच्यत ।
कूर्चाभाषणनिष्ठ्यूतैः स्वकूर्चैः ष्ठीवनैः परम् ॥ ४६३ ॥
राज्यार्हान्वेषिभिर्विप्रैः प्राप्तः स्वस्मृतिकृन्नये ।
अवार्यतेष्टकाघातैर्मुग्धः कमलवर्धनः ॥ ४६४ ॥
पञ्चषाणि दिनान्येव यावत्तस्थुर्द्विजातयः ।
काहलाकांस्यतालादिवाद्यकोलाहलाकुलम् ॥ ४६५ ॥
उत्पताकध्वजच्छत्रशोभियुग्यार्पितासनम् ।
अशेषं पारिषद्यानां तावत्तत्रामिलद्बलम् ॥ ४६६ ॥
युग्मम् ॥
स्वपत्नीं बन्धकीभूतामिवान्यवशवर्तिनीम् ।
वीक्ष्य राजश्रियं शोचन्नासीत्कमलवर्धनः ॥ ४६७ ॥
पितृघातिवधूश्छन्नपुत्रराज्यार्थिनी ततः ।
प्राहिणोद्राजपुरुषान्पार्श्वे प्रायोपवेशिनाम् ॥ ४६८ ॥
पिशाचकपुरग्रामे वीरदेवाभिधस्य यः ।
कुटुम्बिनः कामदेवनामा सूनुरजायत ॥ ४६९ ॥
स शिक्षिताक्षरो लब्ध्वा मेरुवर्धनमान्दिरे ।
बालाध्यापकतां स्नानशीलादिगुणभूषितः ॥ ४७० ॥
क्रमाद्गञ्जाधिकार्यासीदथ तस्यात्मजः शनैः ।
लेभे गञ्जाधिकारित्वं राज्ञः शंकरवर्मणः ॥ ४७१ ॥
यः प्रभाकरदेवोपि सुगन्धाछन्नकामुकः ।
लक्ष्म्या सरस्वतीद्वेषाद्देशविप्लवतोथवा ॥ ४७२ ॥
विद्वान्यशस्करो नाम तत्पुत्रोत्यन्तदुर्गतः ।
सख्या फल्गुनकाख्येन समं देशान्तरं गतः ॥ ४७३ ॥

---

१ उच्चभाषण इति स्यात् ।

सुस्वप्नदर्शनैः पीठदेव्याशीर्भिश्च हर्षुलः ।
तस्मिन्प्रसङ्गे सोत्साहः प्रत्यावृत्तो निजां भुवम् ॥ ४७४ ॥
पितृघातिवधूदूतैर्यातैर्बोधयितुं द्विजान् ।
मध्ये गृहीतो वाग्मित्वात्प्रविवेश तदन्तिकम् ॥ ४७५ ॥
कुलकम् ॥
दृष्ट्वैव तं दैववशादैकमत्यस्पृशो द्विजाः ।
ध्वनिं राजायमेवास्त्वित्युच्चैरुदचारयन् ॥ ४७६ ॥
अथाभ्यषिच्यत क्षिप्रं विप्रैरेत्य यशस्करः ।
क्ष्माधृतिप्रौढसामर्थ्यः सानुमानिव तोयदैः ॥ ४७७ ॥
दग्धं वेणुवनं परस्परमहासंघर्षजेनाग्निना
तन्मूलोद्धृतिरम्भसा क्षणधृतोद्रेकेण संपादिता ।
वात्यावेगविपाटितं विटपिनं प्राप्तं कुतश्चिद्दृढां
रूढिं नेतुमहो महाद्रिकुहरे धात्रा न किं सूत्रितम् ॥ ४७८ ॥
भृत्यप्रेरणया वंशं पार्थजः स्वं न चेद्दहेत् ।
तत्पुत्रोत्पाटनं कुर्यान्न चेत्कमलवर्धनः ॥ ४७९ ॥
अनुच्चकुलजातस्य दरिद्रस्याटतः क्षितिम् ।
तद्यशस्करदेवस्य राज्यप्राप्तिः कथं भवेत् ॥ ४८० ॥
पद्भ्यां व्रजन्निरनुगो ददृशे जनेन
यस्तत्क्षणं निखिललोकसमानमूर्तिः ।
साम्राज्यरम्यममुमीक्षितुमास्त नारी-
दृङ्नीरजस्तवकितो नरनाथमार्गः ॥ ४८१ ॥
नृपतिवसतिं प्रत्यागच्छन्यशस्करभूपतिः
पुरमृगदृशामाशीर्मध्ये वचोपि विवक्षितम् ।
स्तिमितवलितापाङ्गं शृण्वन्निमीलदहंकृतिः
कृतपरिकरस्तज्ज्ञैर्जज्ञे प्रजापरिपालने ॥ ४८२ ॥

प्रतिमितरविदीपोद्भासिशुभ्रातपत्र-
प्रचयरजतपात्रासूत्रितारात्रिकश्रीः ।
अथ मुखरितमाशीर्मङ्गलैरङ्गनाना-
मवनिहरिणधामा राजधाम प्रपेदे ॥ ४८३ ॥

इति श्रीकाश्मीरिकमहामात्यचण्पकप्रभुसूनोः कह्लणस्य कृतौ राजतरङ्गिण्यां पञ्चमस्तरङ्गः ॥

त्र्यधिकायां समाशीतौ मासेषु च चतुर्ष्वगात् ।
कलपपालाष्टकं रथ्याहृतस्त्रीसचिवा अपि ॥

षष्ठस्तरङ्गः ।

नेदं पर्णसमीरणाशनतपोमाहात्म्यमुक्षोरगौ
पश्यैतावत एव संप्रति कृतौ तन्मात्रवृत्ती बहिः ।
प्रेम्णैवार्धमिदं चराचरगुरोः प्रापेयमात्मस्तुती-
रेवं देववधूमुखाच्छ्रुतिसुखाः शृण्वत्यपर्णावतात् ॥ १ ॥
इच्छन्नलङ्घनीयत्वमथ कक्ष्यां विलङ्घयन् ।
प्रतीहारान्द्विजा दूरं वार्यन्तामिति सोन्वशात् ॥ २ ॥
वेत्रिवित्रास्यमानांस्तु तान्कृताञ्जलिरब्रवीत् ।
राज्यप्रदाश्च पूज्याश्च यूयं नो दैवतैः समाः ॥ ३ ॥
राज्यदानाभिमानेन वर्तिष्यत मदोद्धताः ।
यत्कार्यकालादन्यत्र नागन्तव्यं मदन्तिकम् ॥ ४ ॥
तदाकर्ण्याखिलो लोकस्तमधृष्यममन्यत ।
व्यस्मरत्सहसंवाससंभूतमपि लाघवम् ॥ ५ ॥
खिलीभूताः पूर्वराजव्यवस्थाः प्रतिभाबलात् ।
उन्नीतवान्स सुकविः प्राक्कविप्रक्रिया इव ॥ ६ ॥

अचौराभूत्तथा भूमिर्यथा रात्रौ वणिक्पथाः।
अतिष्ठन्विवृतद्वारा मार्गाश्चाविघ्निताध्वगाः॥ ७॥
प्रत्यवेक्षापरे तस्मिन्नासीत्सर्वापहारिणाम्।
कृष्यध्यक्षत्वमुत्सृज्य कृत्यं नान्यन्नियोगिनाम्॥ ८॥
ग्राम्याः कृषिपराधीना नापश्यन्राजमन्दिरम्।
विप्राः स्वाध्यायसंसक्ता नाकुर्वञ्शस्त्रधारणम्॥ ९॥
न विप्रगुरवः साम गायन्तो मदिरां पपुः।
न तापसाः पुत्रदारपशुधान्यान्यढौकयन्॥ १०॥
न मूर्खगुरवो मत्स्यापूपयागविधायिनः।
चक्रिरे स्वकृतैर्ग्रन्थैस्तर्कागमपरीक्षणम्॥ ११॥
नादृश्यन्त च गेहिन्यो गुरुदीक्षोत्थदेवताः।
कुर्वाणा भर्तृशीलश्रीनिषेधं मूर्धधूननैः॥ १२॥
कार्तान्तिको भिषक्सभ्यो गुरुर्मन्त्री पुरोहितः।
दूतः स्थेयो लेखको वा न तदाभूदपण्डितः॥ १३॥
प्रायोपवेशाधिकृतैर्बोधितेन महीभृता।
प्रायोपविष्टो निकटं प्रापितः कश्चिदब्रवीत्॥ १४॥
अहमाढ्योभवं पूर्वं वास्तव्योत्र महीपते।
निष्किंचनत्वं शनकैरगच्छं दैवयोगतः॥ १५॥
उत्तमर्णैः पीडितस्य प्रवृद्धर्णस्य तस्य मे।
निश्चयोभूद्दणं छित्त्वा परिभ्रान्तुं दिगन्तरे॥ १६॥
अथ विक्रीय सर्वस्वमृणं शोधयता मया।
महाधनाय वणिजे विक्रीतं निजमन्दिरम्॥ १७॥
भार्यामुद्दिश्य भर्त्तव्यामेक एव तु वर्जितः।
सोपानकूपो विक्रीतान्महतो वेश्मनस्ततः॥ १८॥

निदाघे पुष्पताम्बूलीपर्णाद्यत्रातिशीतले ।
न्यस्यद्भिर्मालिकैर्दत्तात्सा जीवेद्भाटकादिति ॥ १९ ॥
ततो दिगन्तराद्भ्रान्त्वा विंशत्या वत्सरैरहम् ।
लब्धाल्पवित्तः संप्राप्तो जन्मभूमिमिमां पुनः ॥ २० ॥
अन्विष्यता मया साध्वी स्ववधूर्ददृशेथ सा ।
विवर्णदेहा जीवन्ती प्रेष्यात्वेनान्यवेश्मसु ॥ २१ ॥
किं दत्तजीविकापि त्वमीदृशीं वृत्तिमाश्रिता ।
मयेति सा सदुःखेन पृष्टा स्वोदन्तमब्रवीत् ॥ २२ ॥
सोपानकूपं संप्राप्ता त्वयि याते दिगन्तरम् ।
लगुडैस्ताडयित्वाहं वणिजा तेन वारिता ॥ २३ ॥
तदन्या कास्ति मे वृत्तिरित्युक्त्वा विरराम सा ।
तदाकर्ण्य निमग्नोहमन्तरे शोककोपयोः ॥ २४ ॥
कृतप्रायोपवेशोथ स्थेयैस्तैस्तैः पदे पदे ।
प्रत्यर्थिनो दत्तजयैः किमप्यस्मि पराजितः ॥ २५ ॥
जडत्वाद्वेद्मि न न्यायं न विक्रीतो मया पुनः ।
सोपानकूप इत्यस्मिन्नर्थे प्राणा इमे पणः ॥ २६ ॥
सोहं विपद्ये क्षीणार्थो द्वारि शास्तुस्तव ध्रुवम् ।
वृजिनादस्ति चेद्भीतिर्वस्तु निर्णीयतां स्वयम् ॥ २७ ॥
राजेति तेन विज्ञप्तो गत्वा धर्मासनं स्वयम् ।
संघट्टय्याखिलान्स्थेयानासीत्तत्त्वं विचारयन् ॥ २८ ॥
स्थेयास्तमूचुर्बहुशो विचार्यायं पराजितः ।
शाठ्यादगणयन्न्यायं दण्ड्यो लिखितदूषकः ॥ २९ ॥
सोपानकूपसहितं विक्रीतं गृहमित्यथ ।
राजा विक्रयपत्रस्थान्स्वयं वर्णानवाचयत् ॥ ३० ॥

---

१. संघट्य्य इत्युचितम् ।

ततोधिगतमित्येव सभ्येषु निगदत्स्वपि ।
अन्तरात्मा जगादेव नृपतेरर्थिनो जयम् ॥ ३१ ॥
मुहूर्त्तमिव संचिन्त्य राजान्याभिरभूच्चिरम् ।
कथाभिरतिचित्राभिर्मोहयन्सभ्यमण्डलम् ॥ ३२ ॥
कथान्तराले सर्वेभ्यो गृह्णन्रत्नानि वीक्षितुम् ।
हसन्प्रत्यर्थिनो हस्तादुपादत्ताङ्गुलीयकम् ॥ ३३ ॥
क्षणादेवाखिलैः स्थेयमित्थमेवेति सस्मितम् ।
वचो ब्रुवाणः प्रययौ पादक्षालनकैतवात् ॥ ३४ ॥
अभिज्ञानाय तत्रस्थः स वितीर्याङ्गुलीयकम् ।
भृत्यमेकं वणिग्वेश्म प्राहिणोदत्तवाचिकम् ॥ ३५ ॥
स वणिग्गणनाध्यक्षं ययाचे साङ्गुलीयकः ।
यत्राब्दे पत्रमुत्पन्नं गणनापत्रिकां ततः ॥ ३६ ॥
निर्णयेद्य तया कृत्यमस्ति भाण्डपतेरिति ।
श्रुत्वादाद्गणनाध्यक्षस्तां गृहीताङ्गुलीयकः ॥ ३७ ॥
दीन्नाराणां दशशतीं तस्यां भूभृदवाचयत् ।
व्ययमध्येधिकरणलेखकाय समर्पिताम् ॥ ३८ ॥
तस्मै मितधनार्हाय बहुमूल्यार्पणान्नृपः ।
रेफे सकारं वणिजा कारितं निश्चिकाय सः ॥ ३९ ॥
सभायां तत्प्रदर्श्याथ पृष्ट्वा दत्त्वाभयं च तम् ।
आनीय लेखकं सभ्यान्संजातप्रत्ययान्व्यधात् ॥ ४० ॥
सभ्यैरभ्यर्च्यमानेन राज्ञा सार्थं वणिग्गृहम् ।
वितीर्णमर्थिने देशात्प्रत्यर्थी च प्रवासितः ॥ ४१ ॥
कृताह्निकं भोक्तुकामं तं दिनान्ते च भूपतिम् ।
अकालावेदनाद्भिभ्यत्क्षत्ता जातु व्यजिज्ञपत् ॥ ४२ ॥

देवः समाप्तकृत्योद्य विज्ञप्तौ श्वस्तव क्षणः ।
इत्युक्तो दर्शने प्राणत्यागी विप्रो बहिः स्थितः ॥ ४३ ॥
दत्तप्रवेशादेशोथ रुद्धसूदेन भूभुजा ।
द्विजः प्रविष्टः पृष्टश्च तीव्रार्तिरिदमब्रवीत् ॥ ४४ ॥
सुवर्णरूपकशतं भ्रान्त्वा देशान्तरेर्जितम् ।
गृहीत्वा श्रुतसौराज्यः स्वदेशमहमागतः ॥ ४५ ॥
त्वयि राजनि निश्चौरैरध्वभिर्विशतः सुखम् ।
ह्योभवल्लवणोत्से मे दिनान्ते श्राम्यतः स्थितिः ॥ ४६ ॥
दीर्घाध्वलङ्घनक्लान्तस्तत्राहमकुतोभयः ।
मार्गारामतरोर्मूले त्रियामामत्यवाहयम् ॥ ४७ ॥
वेतनं ग्रन्थिबद्धं तदुत्थास्नोरपतन्मम ।
अरघट्टे समीपस्थे कक्षयोगादलक्षिते ॥ ४८ ॥
तस्मिन्दुरवरोहेतिनिर्वसुत्वाज्जहद्वपुः ।
सोहं हारितसर्वस्वः शोचन्रुद्धश्चिरं जनैः ॥ ४९ ॥
एकोध्यवसितः कोपि साहसे पुरुषोब्रवीत् ।
मह्यं दापितवित्ताय किं ददासीति मां ततः ॥ ५० ॥
तमस्म्यवोचं विवशस्तस्यार्थस्यास्मि कः प्रभुः ।
तुभ्यं यद्रोचते मह्यं तत्ततो दीयतां त्वया ॥ ५१ ॥
अवरुह्याधिरूढोथ रूपकेभ्यो द्वयं मम ।
स प्रादात्स्पष्टमेवाष्टानवतिं स्वीचकार तु ॥ ५२ ॥
व्यवहारा वचोनिष्ठा एव राज्ञि यशस्करे ।
निन्दन्व्यवस्थां तां लोकैर्न्यक्कृतोस्मीतिवादिभिः ॥ ५३ ॥
उपचारोक्तिसारल्यच्छलहारितवेतनः ।
सोहं जहाम्यसून्द्वारे दुर्व्यवस्थापकस्य ते ॥ ५४ ॥

पुंसस्तस्य स राज्ञाथ पृष्टः प्रकृतिनामनी ।
वदनप्रत्यभिज्ञैव ममास्तीत्यभ्यभाषत ॥ ५५ ॥
प्रातस्तवेप्सितावाप्तिं करिष्यामीति भूभुजा ।
प्रतिज्ञाय कथंचित्स स्वपार्श्वे कारितोशनम् ॥ ५६ ॥
लवणोत्सौकसां दूताहूतानां·स विशां ततः ।
स्थितमन्तर्द्विजोन्येद्युस्तं राज्ञेदर्शयन्नरम् ॥ ५७ ॥
पृष्टः स राज्ञा विप्रेण यथैवोक्तं तथैव तत् ।
सर्वमूचे वाक्प्रतिष्ठं व्यवहारमुदीरयन् ॥ ५८ ॥
सत्यवाक्पारतन्त्र्यस्य वस्तुवृत्तस्य चान्तरम् ।
अलक्षयन्तः प्रैक्षन्त दोलाकुलधियो धराम् ॥ ५९ ॥
धर्मासनस्थो राजाथ रूपकाणामभाषत ।
तमष्टानवतेः पात्रं विप्रमन्यं द्वयस्य तु ॥ ६० ॥
अनुयोक्तृञ्जगादापि दुःसंचिन्त्या महात्मनः ।
धर्मस्याधर्ममुद्वृत्तं निहन्तुं धावतो गतिः ॥ ६१ ॥
सायं हुताशं प्रविशन्नम्मयं चेन्दुमण्डलम् ।
स्वतेजसा संविभजन्प्रदीपैर्ज्योत्स्नयाप्यसौ ॥ ६२ ॥
तदुत्थाय यथा भानुर्निहन्ति ध्वान्तमुद्धतम् ।
अनन्यकर्मा धर्मोयं तथाधर्मं व्यपोहति ॥ ६३ ॥
युग्मम् ॥
दुःसंलक्ष्यस्तु धर्मोसावधर्मं बाधतेञ्जसा ।
तिष्ठन्नित्यमधिष्ठाय दाह्यं काष्ठमिवानलः ॥ ६४ ॥
ददाति यद्भवान्दत्तां तदित्याद्युक्तमुज्झतः ।
तुभ्यं रोचत इत्यादि वचोस्य निसृतं तदा ॥ ६५ ॥
रुचितास्य बभूवाष्टानवतिर्लोभिनोस्य ताम् ।
नादादस्यायरुचितं रूपकाणां द्वयं ददत् ॥ ६६ ॥

इत्यादिसूक्ष्मेक्षिकया धर्माधर्मान्तरं विदन् ।
प्रत्यवेक्षापरः क्ष्माभृद्व्यधात्कृतयुगोदयम् ॥ ६७ ॥
इत्थं जनं स विनयन्हास्योभून्निजदुर्नयैः ।
परस्योपदिशन्पथ्यमपथ्याशीव रोगहृत् ॥ ६८ ॥
श्रोत्रियेणैव[1] तेनापि मृदम्भःशौचशालिना ।
डोम्बोच्छिष्टभुजो भृत्याः पार्श्वान्न परिजह्विरे ॥ ६९ ॥
यथोत्तरं संश्रितार्थैरन्योन्यं पृष्ठपातिभिः ।
नगराधिकृतैश्चक्रे चतुर्भिः सोर्थसंग्रहम् ॥ ७० ॥
लेभिरे निधनं तस्मात्सत्यंकारात्पदातयः ।
श्रीरणेश्वरपीठाग्रन्यस्तखड्गा[2]दपि प्रभोः ॥ ७१ ॥
स ज्येष्ठे भ्रातरि मृते तथाभून्मुदितश्चिरम् ।
तदुपघ्नं यथा प्राज्ञैस्तत्रोत्प्रेक्षि[3] रसार्पणम् ॥ ७२ ॥
नीतस्य मण्डलेशत्वं वेलावित्तस्य भूभुजा ।
देवीः कामयमानस्य चक्रे गजनिमीलिका ॥ ७३ ॥
रागाच्छुद्धान्तकान्तानां मूर्धानमधिरोपिता ।
लल्ला नामाभवत्तस्य वेश्या वैवश्यकारिणी ॥ ७४ ॥
अवकाशः सुवृत्तानां हृदयान्तर्न योषिताम् ।
इतीव विहितौ धात्रा सुवृत्तौ तद्बहिः कुचौ ॥ ७५ ॥
उत्तमाधमसंसक्तौ जानन्सदृशवृत्तिताम् ।
नारीणां शुचिबाह्यानामङ्गनात्वं व्यधाद्विधिः ॥ ७६ ॥
सा लालितापि राज्ञा यल्लल्ला ललितलोचना ।
चण्डालयामिकेनागाद्यामिनीषु समागमम् ॥ ७७ ॥
युग्मम् ॥

---

१ श्रोत्रियेणेव इत्युचितम् । २ खड्गा अपि इत्युचितम् । ३ तत्रोत्प्रेक्षि इत्युचितम् ।

सुभगंकरणं किंचिच्चण्डालतरुणेभवत् ।
तं यत्प्रभावविवशा भेजे राजवधूरपि ॥ ७८ ॥
सा वा चण्डालकुलजा स वा कार्मणकर्मवित् ।
अन्यथा संगमः किं स्यादसंभाव्यस्तथाविधः ॥ ७९ ॥
सोभूत्केन प्रकारेण तया सह समागतः ।
इत्येष लेभे वृत्तान्तः प्रतिभेदं न कुत्रचित् ॥ ८० ॥
केवलं प्रत्यभात्तादृक्पापिनोः प्रेम तत्तयोः ।
दृग्व्यापारेक्षणात्क्षिप्रं हाडिनाम्नोधिकारिणः ॥ ८१ ॥
तमर्थमथ तथ्येन वीक्ष्य प्रणिधिभिर्नृपः ।
प्रायश्चित्तानुचरणक्षामः कृष्णाजिनं दधौ[1] ॥ ८२ ॥
कुपितोपि स यन्नैनां[2] न्यवधीद्रागमोहितः ।
तेनैवागात्पुरोभागिवितर्कातङ्कपात्रताम् ॥ ८३ ॥
डोम्बोच्छिष्टानुगासङ्गादशुचित्वं यशस्करे ।
संक्रान्तं कुष्ठिसंस्पर्शात्कुष्ठं दुःखमिवाभवत् ॥ ८४ ॥
सामान्येन सता कैश्चित्सदृशैः शुभकर्मभिः ।
जन्मान्तरीयैः साम्राज्यं मया प्रापीति चिन्तयन् ॥ ८५ ॥
साम्राज्यकामो नृपतिर्भाविष्वपि स जन्मसु ।
युक्त्या प्रादान्निरातङ्कां राज्यलक्ष्मीं द्विजन्मने ॥ ८६ ॥
भूभुजा दानशौण्डेन पैतृके स्थण्डिले कृतः ।
छात्राणामार्यदेश्यानां तेन विद्यार्थिनां मठः ॥ ८७ ॥
मठाधिपतये तत्र च्छत्रचामरहासिनीम् ।
स नरेन्द्राश्रितां[3] प्रादाद्भ्रान्तःपुरवर्जिताम् ॥ ८८ ॥
वितस्तापुलिने राजा नानोपकरणान्वितान् ।
ब्राह्मणेभ्यः सोग्रहारान्पञ्चपञ्चाशतं ददौ ॥ ८९ ॥

---

१ ददौ इत्युचितम् । २ यन्नैनं इति स्यात् । ३ नरेन्द्रश्रियं इति स्यात् ।

अथ जातोदरव्याधिर्मज्ञातो नायमित्यसौ ।
जानन्संग्रामदेवाख्यं परिवर्ज्य निजात्मजम् ॥ ९० ॥
समर्प्य सचिवैकाङ्गसामन्तानभ्यषेचयत् ।
रामदेवात्मजं राज्ये वर्णटं प्रपितृव्यजम् ॥ ९१ ॥
युग्मम् ॥
शक्ये राज्यादपाकर्तुं शिशावनभिषेचिते ।
निराशाः समपद्यन्त तदा राज्यजिहीर्षवः ॥ ९२ ॥
स पर्वगुप्तकौटिल्यप्रयुक्तेरुदयोन्मुखः ।
विपाककालस्तत्राहि भङ्गोन्मुख इवाभवत् ॥ ९३ ॥
राजधानीस्थितस्यापि वर्णटो राज्यदायिनः ।
आरोग्यवार्तयाप्यासीन्मुमूर्षोरनिरीक्षकः ॥ ९४ ॥
ततः सानुशयो राजा ताम्यन्प्रैर्यत मन्त्रिभिः ।
राज्यं संग्रामदेवाय दातुमाश्वासकारिभिः ॥ ९५ ॥
राजाज्ञया निशामेकां बद्धोष्टस्तम्भमण्डपात् ।
बहिर्दत्तार्गलात्प्रातर्वर्णटो निरवत्स्यत[1] ॥ ९६ ॥
भयात्प्रजागराद्यापि तद्भृत्यानां विवेकिनाम्[2] ।
आस्थानमण्डपं प्राप पायुक्षालनभूमिताम् ॥ ९७ ॥
एकाहराजपुरुषस्तदासिं विजयेश्वरे ।
व्रीडाद्देवप्रसादाख्यो राजवीजी समार्पयत् ॥ ९८ ॥
अथाभिषिच्य संग्रामदेवं तीव्रीभवद्व्यथः ।
स राजधान्या निर्गत्य मर्तुं निजमठं ययौ ॥ ९९ ॥
धीः केशश्मश्रुवपने शिरःशाटकवर्जनम् ।
काषायग्रहणोद्वेगः शस्त्रत्यागग्रहश्च यः ॥ १०० ॥

---

१ निरवास्यत इति स्यात् । २ विरेकिणाम् इत्युचितम् ।

राजभृत्यैः प्रतिज्ञातः स तस्मिन्निश्चितक्षये ।
जीवत्येव कृतज्ञत्वव्यञ्जकैः परिवर्जितः ॥ १०१ ॥
युग्मम् ॥

द्वे सहस्रे सुवर्णस्य सार्धे बद्ध्वा पटाञ्चले ।
यो निर्जगाम राजासौ मुमूर्षुर्निजमन्दिरात् ॥ १०२ ॥
पञ्चभिः पर्वगुप्ताद्यैर्यौतकं तस्य मन्त्रिभिः ।
हृतं सजीवितस्यैव विभक्त्वान्योन्यमग्रतः[1] ॥ १०३ ॥
युग्मम् ॥

विवेष्टमानः शय्यायां व्याधिदग्धान्तरो नृपः ।
तिष्ठन्मठाङ्गनकुटीगर्भे ध्वान्तान्धकारिते ॥ १०४ ॥
अजातसंविद्भंशोग्रे पश्यन्द्रोहपरान्निजान् ।
प्राणैरहानि द्वित्राणि न यदा निरमुच्यत ॥ १०५ ॥
तदा सुहृद्बन्धुभृत्यवेलावित्तैः कृतत्वरैः ।
जिहीर्षुभिश्च साम्राज्यं विषं दत्त्वा विपादितः ॥ १०६ ॥
तिलकम् ॥

अवरोधवधूमध्यात्सती तं पतिमन्वगात् ।
एका त्रैलोक्यदेव्येव स्वप्रभेव विरोचनम् ॥ १०७ ॥
वर्णाश्रमप्रत्यवेक्षाबद्धकक्ष्यः क्षितीश्वरः ।
चक्रभान्वभिधं चक्रमेलके द्विजतापसम् ॥ १०८ ॥
कृतात्याचारमालोक्य राजा धर्मवशंवदः ।
निजग्राह श्वपादेन ललाटतटमङ्कयन् ॥ १०९ ॥
युग्मम् ॥

तन्मातुलेन तद्रोषाद्वीरनाथेन योगिना ।
सांधिविग्रहिकेणाथ स स्वेनैव न्यगृह्यत ॥ ११० ॥
पूर्वाचार्यप्रभावेण स्वमाहात्म्याधिरोपणम् ।
प्रख्यापयद्भिर्गुरुभिः श्रद्धयेति यदुच्यते ॥ १११ ॥

---

१ विभज्य इत्युचितम् ।

तत्स्थापितैव सप्ताहात्स विपन्न इति श्रुतिः ।
दीर्घव्याधिहते तस्मिन्नुपपत्तिः कथं भवेत् ॥ ११२ ॥
युग्मम् ॥
अथामयान्तरे वाभूत्सा वार्तेत्युच्यते यदि ।
वर्णटाद्यभिशापोपि तदायात्वत्र हेतुताम् ॥ ११३ ॥
भुक्तैश्वर्यो नव समाश्चतुर्विंशे स हायने ।
मासि भाद्रपदे कृष्णतृतीयस्यां व्यपद्यत ॥ ११४ ॥
पितामहीं शिशोर्गोप्त्रीं विनिवेश्य नृपासने ।
भूभटाद्यैः समं प्राभूत्पर्वगुप्तोथ पञ्चभिः ॥ ११५ ॥
क्रमात्समं पितामह्या तान्व्यापाद्येतरान्बली ।
एकः स एवमाक्रान्तिः प्रबभूव नृपास्पदे ॥ ११६ ॥
स पार्थिवत्वमन्त्रित्वमिश्रया चेष्टया स्फुरन् ।
राजा राजानकश्चेति मिश्रामेवं धियं व्यधात् ॥ ११७ ॥
सेवमानः स्वयं बालभूपं भोज्यार्पणादिभिः ।
ऋजूनां प्रत्यभात्पर्वगुप्तो द्रोहबहिष्कृतः ॥ ११८ ॥
यान्द्रोहभीरून्संभाव्य संविभेजे यशस्करः ।
तस्य तत्तनयोच्छेदे त एवासन्प्रयोजकाः ॥ ११९ ॥
करभाङ्गरुहापिङ्गे श्मश्रुणि क्षितिपालवत् ।
स ददौ कुङ्कुमालेपं वर्चःशाद्वलविस्तृते ॥ १२० ॥
बिभ्यदेकाङ्गसंघातात्प्रकटोत्पाटनाक्षमः ।
प्रमापणाय प्रायुङ्क्त शिशोः कर्माभिचारिकम् ॥ १२१ ॥
न्याय्यं ते सान्वयस्यास्ति राज्यं चैत्रादिवासरे ।
अन्यथा चरतो नाशः क्षिप्रं वंशायुषोर्भवेत् ॥ १२२ ॥
इतीमामपि यामिन्यां श्रुतवान्भूतभारतीम् ।
अभिचारस्य वन्ध्यत्वं निर्ध्यायाधिकशङ्कितः ॥ १२३ ॥

एकाङ्गेभ्यो विभिन्नेभ्यो बिभ्यदुद्भिन्नसंभ्रमः ।
उदतामत्तथा चिन्तालुप्तसंविद्दिवानिशम् ॥ १२४ ॥
यथा महाहिमापातनिःसंचारजने दिने ।
अकस्मात्संभृतबलो राजधानीं निरुद्धवान् ॥ १२५ ॥
विरोधकारिणं बुद्धाभिधेन सह सूनुना ।
निर्द्रोहमाहवे हत्वा मन्त्रिणं रामवर्धनम् ॥ १२६ ॥
पित्र्येण वेलावित्तेन प्राभृतार्थमुपाहृताम् ।
गले पुष्पस्रजं बद्ध्वा पातितं पार्थिवासनात् ॥ १२७ ॥
स तं वक्राङ्गिसंग्रामं हतमन्यत्र मन्दिरे ।
पातयित्वा वितस्तान्तः कण्ठबद्धशिलं निशि ॥ १२८ ॥
चतुर्विंशस्य वर्षस्य दशम्यां कृष्णफाल्गुने ।
पापः सखड्गकवचो न्यविक्षत नृपासने ॥ १२९ ॥

चक्कलकम् ॥

पारेविशोकं दिविराज्ञातस्याभिनवाभिधात् ।
सूनुः संग्रामगुप्तस्य स तदा पार्थिवोभवत् ॥ १३० ॥
केचित्तं प्रत्यवस्थानं ये पुरा प्रतिजज्ञिरे ।
ते सर्व एव तद्भीताः प्रातरेव प्रणेमिरे ॥ १३१ ॥
पार्थिवैकाङ्गसामन्तमन्त्रिकायस्थतन्त्रिणाम् ।
तद्भीत्या द्रोहवृत्तीनां द्रोहाद्वैतमदृश्यत ॥ १३२ ॥
एकाङ्गस्य तदा स्थाने सुय्याभिजनजन्मनः ।
प्रमादान्मदनादित्यनाम्नो ढक्का व्यदीर्यत ॥ १३३ ॥
हृतांशुकेन भूभर्त्रा कुपितेन खलीकृतः ।
स निकृत्तकचश्मश्रुस्तपस्वी समपद्यत ॥ १३४ ॥
तादृशस्य पुनस्तस्य सस्त्रीपुत्रत्वमीयुषः ।
अद्याप्यभिजने जाता वसन्ति त्रिपुरेश्वरे ॥ १३५ ॥

कुर्वता पर्वगुप्तेन भूभृता द्रविणार्जनम् ।
प्रापिताः पुनरुत्साहं प्रजारोगा नियोगिनः ॥ १३६ ॥
व्यधत्त स्कन्दभवनविहारवसुधान्तिके ।
पर्वगुप्तेश्वरं सोपि वृजिनार्जितया श्रिया ॥ १३७ ॥
श्रीयशस्करभूभर्तृशुद्धान्तस्य विशुद्धधीः ।
कौलीनमलुनादेका गौरी नृपतिसुन्दरी ॥ १३८ ॥
सुचिराङ्कुरितप्रीतेः पर्वगुप्तस्य याकरोत् ।
समागमार्थिनो युक्त्या वञ्चनामुचितां सती ॥ १३९ ॥
इदं यशस्करस्वामिसुरवेश्मार्धनिर्मितम् ।
त्यक्त्वा पत्युर्विपन्नस्य कृत्वा निर्वाणपूरणम्[1] ॥ १४० ॥
अमोघमस्मि नियमाद्विधास्यामि त्वदीप्सितम् ।
स ह्युपच्छन्दयन्नेवं सुभ्रुवाभिहितस्तया ॥ १४१ ॥
युग्मम् ॥
अथ प्रवृद्धगर्वेण तत्स्वल्पैरेव वासरैः ।
संपूर्णतां सुरगृहं गमितं तेन भूभुजा ॥ १४२ ॥
सा यागज्वलने राजललना पीतसर्पिषि ।
पूर्णाहुत्या समं साध्वी जुहाव सहसा तनुम् ॥ १४३ ॥
उपर्यस्या निरस्तासोः पुष्टाः कुसुमवृष्टयः ।
तत्काङ्क्षिणस्तु न्यपतन्नवर्णमुखरा गिरः ॥ १४४ ॥
सुदीर्घसाहसारम्भचिन्तासंरम्भशोषितः ।
पर्वगुप्तो बभूवाथ तृष्णामयपथातिथिः ॥ १४५ ॥
व्याध्याधिप्रशमायासैर्ज्ञात्वाप्यस्थायिनीं स्थितिम् ।
मूढाः प्ररूढिं नोज्झन्ति द्रोहे श्रीलोभमोहिताः ॥ १४६ ॥
आशङ्क्यतादृङ्निष्ठोपि सोकुण्ठैः प्राक्तनैः शुभैः ।
कैश्चित्सुरेश्वरीक्षेत्रे परासुः समपद्यत ॥ १४७ ॥

---

१ निर्माण इति स्यात् ।

षड्त्रिंशवत्सराषाढबहुलेह्नि त्रयोदशे ।
द्रोहार्जितेन नृपतिः स राज्येन व्ययुज्यत ॥ १४८ ॥
अतीन्द्रियायां परलोकवृत्ता-
विहैव तीव्राशुभपाकशंसी ।
दृश्येत नाशो यदि नाम नाशु
न कः कुकृत्येन यतेत भूत्यै ॥ १४९ ॥
क्षेमगुप्ताभिधानोभूदथ राजा तदात्मजः ।
आसवासेवनोत्सिक्तवित्ततारुण्यसंज्वरः ॥ १५० ॥
सोभूत्स्वभावदुर्वृत्तो नितरां दुर्जनाश्रयात् ।
कृष्णक्षपाक्षणो घोरमेघान्ध इव भीतिकृत् ॥ १५१ ॥
स्वतुल्यवेषालंकाराः शतं लालितका नृपम् ।
तं फल्गुणप्रभृतयो दुराचाराः सिषेविरे ॥ १५२ ॥
द्यूतासवाङ्गनासेवाव्यसनेपि स पार्थिवः ।
विटनिर्लुण्ठ्यमानोपि नाभूल्लक्ष्मीवहिष्कृतः ॥ १५३ ॥
रागी मधुप्रणयवान्विहिताक्षसक्ति-
र्यः सख्यमेति मधुपैर्हृतकोशसारैः ।
पद्मे प्रयाति दिनमात्रमपि प्रसक्तिं
श्रीस्तत्र चेत्किमिव तन्न कुतूहलाय ॥ १५४ ॥
विटाः प्रविष्टा हृदयं जिष्णुजा वामनादयः ।
पिशाचस्येव रुचितामशुचिं तस्य चक्रिरे ॥ १५५ ॥
परोपहासकुशलः परनारीरतिप्रियः ।
परायत्ताशयस्तस्थौ पार्थिवोनर्थतत्परः ॥ १५६ ॥
ष्ठीवनं श्मश्रुमालासु गालयः श्रोत्रपालिषु ।
तेन क्षिप्ताः प्रतीक्ष्याणां करोटीषु च टङ्कराः ॥ १५७ ॥

कटिसंघटनैर्नार्यो मृगव्यज्ञा वनाटनैः ।
विटाश्चाश्लीलरटनैर्वाल्लभ्यं तस्य लेभिरे ॥ १५८ ॥
पुंश्चलीजालमवैधेयबालकद्रोग्धृनिर्भरा ।
समभूदप्रवेशार्हा राजपर्षन्मनस्विनाम् ॥ १५९ ॥
जिष्णुपुत्रैः क्षेमगुप्तक्षमाभृद्यत्रपुत्रकः ।
चारणत्वगुणाकृष्टः किं न धूर्तैरनर्त्यत ॥ १६० ॥
तस्य कङ्कणवर्षोसीत्यभिधानं विधाय ते ।
तोषिताच्चासकृच्चक्रुर्दोष्णोः कङ्कणवर्षिताम् ॥ १६१ ॥
निर्दोषदोषाविष्कारे नववस्तुप्रदर्शने ।
अधृष्यटङ्कराधाने प्रसादः प्रापि तैर्नृपात् ॥ १६२ ॥
संलक्ष्यकुचकक्ष्यान्ताः कृत्वा निजवधूः पुरः ।
रागी राजा गृहान्नीतो द्यूते तैर्निर्धनः कृतः ॥ १६३ ॥
संभोगाभग्नसौभाग्यकृतस्पर्धैः परस्परम् ।
संभुज्यैता भवान्वक्तु विशेषमिति चोदितः ॥ १६४ ॥
उपभोगं स्वभार्याणां निर्लज्जैस्तैः स कारितः ।
का ह्येति च रत्यन्ते पृष्टोभीष्टधनप्रदः ॥ १६५ ॥
युग्मम् ॥

तस्य लालितकेष्वास्तां मूढौ संभोगढौकने ।
मात्रोश्चारित्ररक्षित्वाद्भिक्षाकौ हरिधूर्जटी ॥ १६६ ॥
नीत्वा नर्मकथाङ्गतां निजवपुर्मुञ्चन्ति मानोन्नतिं
संदूष्य स्वयमङ्गनाः शुचितया त्यक्तं कुलं कुर्वते ।
सौख्यं घ्नन्ति सुदीर्घसेवनसमासक्त्या यदर्थं श्रमः
प्रत्याख्याय तदेव वेद्मि न विटैः किं प्रार्थ्यते सेवया ॥ १६७ ॥
यशस्करस्य भूत्वापि सचिवो भट्टफल्गुणः ।
तस्याभूदनुजीव्यन्ते धिग्भोगाभ्यासवासनाम् ॥ १६८ ॥

फल्गुणस्वामिमुख्यानां प्रतिष्ठानां विधायिनः ।
तस्योपदेशो भूभर्त्रा पर्यहास्यसकृद्गृहः ॥ १६९ ॥
गृह्णन्विद्वेषितां हन्तुं टक्करादिबलात्ततः ।
वृद्धो रङ्कः कम्पनेशो दुर्गोष्ठीमध्यगोभवत् ॥ १७० ॥
तीक्ष्णाक्षेपे संप्रविष्टं हन्तुं संग्रामडामरम् ।
श्रीजयेन्द्रविहारं स निर्घृणो निरदाहयत् ॥ १७१ ॥
सुगतप्रतिमारीतिं हृत्वा दग्ध्वा ततोखिलात् ।
जरद्देवगृहेभ्यश्च संग्राह्य ग्रावसंचयम् ॥ १७२ ॥
सुरप्रतिष्ठया दाढर्यं मूढः स्वयशसो विदन् ।
नगरापणवीथ्यन्तः क्षेमगौरीश्वरं व्यधात् ॥ १७३ ॥
युग्मम् ।।
एकः प्रयात्युपरतिं द्रविणं तदीयं
हृत्वा परः प्रसभमुद्वहति प्रमोदम् ।
नो वेत्ति तत्स्वनिधने परकोशगामि
धिग्वासनामसममोहकृतान्धकाराम् ॥ १७४ ॥
त्यागिना क्षेमगुप्तेन भुक्त्यर्थं खशभूभुजे ।
हृत्वा विहारान्निर्दग्धान्[1] ग्रामाः षट्त्रिंशदर्पिताः ॥ १७५ ॥
दुर्गाणां लोहरादीनां शास्ता शतमखोपमः ।
नृपतिः सिंहराजाख्यस्तस्मै स्वां तनयां ददौ ॥ १७६ ॥
स तस्यां शाहिदौहित्र्यां दिद्दायां सक्तमानसः ।
दिद्दाक्षेम इति ख्यातिं ययौ लज्जावहां नृपः ॥ १७७ ॥
मातामहेन भूभर्तृवध्वास्तस्या व्यधीयत ।
श्रीभूमिस्वामिनोदात्तप्रासादो भीमकेशवः[2] ॥ १७८ ॥
चन्द्रलेखाभिधां कन्यां राज्ञे दत्तवताभवत् ।
फल्गुणद्वारपतिना समं दिद्दा समत्सरा ॥ १७९ ॥

---

१ निर्दग्धात् इति स्यात् । २ श्रीभीमस्वामिना इति स्यात् ।

गुरूपदेशः सुमहान्कुन्तविद्याश्रमस्तथा ।
तस्य निर्वहणाद्गर्ह्याद्भूभुजो ह्रास्यतां ययौ ॥ १८० ॥
अमोघपतनान्प्रासान्योग्यान्संग्रामकर्मसु ।
सृगालमृगयासक्त्या स हि श्लाघ्यानमन्यत ॥ १८१ ॥
तं वृतं वागुरावाहिडोम्बाटविकपेटकैः ।
पर्यटन्तं श्वभिः सार्धमपश्यन्सततं जनाः ॥ १८२ ॥
तस्य दामोदरारण्यलल्यानशिमिकादिषु ।
स्थानेषु क्रोष्टृमृगयारसिकस्य वयोगमत् ॥ १८३ ॥
अथ कृष्णचतुर्दश्यां स कुर्वन्मृगयां नृपः ।
ज्वालामपश्यत्क्रोशन्त्याः सृगाल्या निर्गतां मुखात् ॥१८४॥
तदालोकनसंजातसंत्रासाकम्पितस्ततः ।
लूतामयज्वरेणाभूत्परीतो मृत्युहेतुना ॥ १८५ ॥
मर्तुं ययौ च वाराहक्षेत्रं यत्र विधायकः ।
श्रीकण्ठक्षेममठयोरासीद्धुष्कपुरान्तिके ॥ १८६ ॥
मसूरविदलाकारलूताक्लिन्नकलेवरः ।
पौषे चाब्दे चतुस्त्रिंशे नवमेह्नि सिते मृतः ॥ १८७ ॥
क्षेमगुप्तात्मजः क्षाभृदभिमन्युरभूत्ततः ।
शिशुर्निस्त्रिंशधर्मिण्या दिद्दादेव्यानुपालितः ॥ १८८ ॥
संधिविग्रहशुद्धान्तमुख्यकर्माधिकारिणः ।
निःसाध्वसं राजवधूमवन्ध्यशयनां व्यधुः ॥ १८९ ॥
अभिमन्यौ क्षितिं रक्षत्यकस्मादेव दारुणः ।
तुङ्गेश्वरापणोपान्तादुज्जगाम हुताशनः ॥ १९० ॥
वर्धनस्वामिपार्श्वस्थभिक्षुकीपारकावधिः ।
वेतालसूत्रपातस्थान्स ददाह महागृहान् ॥ १९१ ॥

डोम्बचण्डालसंस्पृष्टभूपसंपर्कदूषितान् ।
दग्ध्वा महागृहान्वह्निर्भुवः शुद्धिमिवाकरोत् ॥ १९२ ॥
रक्षित्री क्षमापतेर्माता स्त्रीस्वभावाद्विमूढधीः ।
सारासारविचारेण लोलकर्णी न पस्पृशे ॥ १९३ ॥
राज्ञः सुतार्पणाद्बद्धवैरा तस्थौ पुरा यतः ।
पतिवद्ध्येव सा सार्धं फल्गुणेनाग्र्यमन्त्रिणा ॥ १९४ ॥
पत्यौ मृते सपत्नीनां दृष्ट्वानुमरणं ततः ।
दम्भेनानुमुमूर्षन्तीमनुमेने स तां द्रुतम् ॥ १९५ ॥
निषिषेधानुबन्धात्तु सानुतापां चितान्तिके ।
कृपालुर्मरणादेताममात्यो नरवाहनः ॥ १९६ ॥
अतो निसर्गपिशुनो रक्तस्तां मन्युदूषिताम् ।
फल्गुणाद्राज्यहरणाशङ्कां राज्ञीमजिग्रहत् ॥ १९७ ॥
विरागशंसिभिर्लिङ्गैस्तां ज्ञात्वा विषमाशयाम् ।
समन्युं साखिलामात्यां फल्गुणोप्यास्त शङ्कितः ॥ १९८ ॥
स हि सर्वाधिकारस्थः सर्वस्याक्षिगतोभवत् ।
दीप्यमानोधिकं मन्त्रशौर्योत्साहादिभिर्गुणैः ॥ १९९ ॥
अस्थीनि क्षेमगुप्तस्य गृहीत्वा जाह्नवीं गते ।
पुत्रे कर्दमराजाख्ये प्रबलैरन्वितो बलैः ॥ २०० ॥
तत्प्रत्यागमपर्यन्तं पर्णोत्से स्थातुमुद्यतः ।
अविश्वसन्नृपगृहे फल्गुणो वैरिशङ्कितः ॥ २०१ ॥
निर्गत्य नगराद्यावत्सभाण्डागारिसैनिकः ।
काष्ठवाटान्तिकं प्राप्य[1] तावद्रक्तादिचोदिता ॥ २०२ ॥
आकलय्य द्रुतं दिद्दा संत्यज्य प्रार्थनादिकम् ।
पृष्ठे प्रत्युत याष्टीकांस्तस्य हन्तुं व्यसर्जयत् ॥ २०३ ॥

चक्कलकम् ॥

१ प्राप इत्युचितम् ।

नवावमानखिन्नः स मिलितानन्तसैनिकः ।
प्रत्यावृत्त्य ततो मानी वाराहं क्षेत्रमाययौ ॥ २०४ ॥
श्रुत्वा समेतसैन्यं तं प्रत्यायातं प्रतापिनम् ।
आस्कन्दशङ्किनी दिद्दा सामात्या समकम्पत ॥ २०५ ॥
तस्मिन्क्षेत्रे गतं शान्तं[1] विलप्य स्वामिनं चिरम् ।
वराहपादसविधे तेन शस्त्रं समर्पितम् ॥ २०६ ॥
द्रोहसंभावनापापं शस्त्रत्यागेन मन्त्रिणा ।
स्वस्य संमार्जितं तेन राजमातुश्च साध्वसम् ॥ २०७ ॥
युक्तायुक्तविचारबाह्यमनसः सेवा महद्भैशसं
क्रुद्धेस्मिन्प्रतिकारकर्म गहनद्रोहापवादावहम् ।
येन न्यूनगुणेदृशोपकरणीभावोपि तस्मै परं
कोपः कोपि विवेकिनः समुचितः शास्त्राय शस्त्राय वा २०८
पर्णोत्समेव शनकैः ससैन्ये फल्गुणे गते ।
विगताध्यापका बाला इवामोदन्त मन्त्रिणः ॥ २०९ ॥
योगक्षेमौ चिन्तयन्ती क्षेमगुप्तवधूरपि ।
अनिशं प्रजजागार स्वयं कण्टकपाटने ॥ २१० ॥
राज्यप्रार्थी पर्वगुप्तो मन्त्रिणौ कोशपीथिनौ ।
अजिग्रहत्करौ पूर्वं पुत्र्योर्यौ छोजभूभटौ ॥ २११ ॥
तयोः प्रजातौ तनयौ ख्यातौ महिमपाटलौ ।
अवर्धिषातां यौ राजमन्दिरे राजपुत्रवत् ॥ २१२ ॥
तौ तत्रावस्थितावेव तत्कालं राज्यलालसौ ।
संमत्र्य समगंसातामुद्दामैर्हिम्मकादिभिः ॥ २१३ ॥
बलिनौ तावबलया राज्ञ्यापास्तौ नृपास्पदात् ।
समन्यू स्वगृहादास्तां यावत्कृतगतागतौ ॥ २१४ ॥

---

१ शान्ति इत्युचितम् ।

एकतः पृष्ठतः प्रादान्महिम्नो निर्गतस्य सा ।
निर्वासनाय याष्टीकांस्तावत्प्रकटवैकृता ॥ २१५ ॥
युग्मम् ॥
शक्तिसेनाभिधानस्य श्वशुरस्य निवेशनम् ।
प्रविवेश स तज्ज्ञात्वा तं ते तत्रापि दुद्रुवुः ॥ २१६ ॥
शक्तिसेनेन याष्टीकाः सान्त्विता नाचलन्यदा ।
तदा भीतस्य जामातुर्व्यक्तं प्रादात्स संश्रयम् ॥ २१७ ॥
तं लब्धसंश्रयं प्राप हिम्मको मुकुलस्तथा ।
एरमत्तकनामा च परिहासपुराश्रयः ॥ २१८ ॥
श्रीमानुदयगुप्ताख्योप्यमृताकरनन्दनः ।
ललितादित्यपुरजा यशोधरमुखा अपि ॥ २१९ ॥
युग्मम् ॥
एकैकं तं मिथः सैन्यैर्भुवनक्षोभकारिणः ।
संभूय चक्रुर्द्वैराज्यं महिम्नः पक्षमाश्रिताः ॥ २२० ॥
तस्मिन्महाभये दिद्दापक्षं मन्त्री सबान्धवः ।
एक एव तु तत्याज नाद्रोहो नरवाहनः ॥ २२१ ॥
प्रवर्धमानपृतना योद्धुं बद्धोद्यमास्ततः ।
पद्मस्वाम्यन्तिकं प्रापुर्दीप्यमानायुधा द्विषः ॥ २२२ ॥
अथ शूरमठे दिद्दा विसृज्यात्मजमाकुला ।
आपच्छान्तिक्षमांस्तांस्तानुपायान्समचिन्तयत् ॥ २२३ ॥
ललितादित्यपुरजान्द्विजान्स्वर्णेन भूरिणा ।
तूर्णं स्वीकृत्य विदधे रिपूणां संघभेदनम् ॥ २२४ ॥
एकाक्षेपेखिलैः कोपो विधेय इति वादिभिः ।
महिम्नः पीतकोशैस्तैः संधिर्देव्या समं कृतः ॥ २२५ ॥
गोष्पदोल्लङ्घने यस्याः शक्तिर्नाज्ञायि केनचित् ।
वायुपुत्रायितं पङ्ग्वा तया संघाब्धिलङ्घने ॥ २२६ ॥

यत्संग्रहो रत्नमहौषधीनां
करोति सर्वव्यसनावसानम् ।
त्यागेन तद्यस्य भवेन्नमोस्तु
चित्रप्रभावाय धनाय तस्मै ॥ २२७ ॥
उत्कोचकाञ्चनादानेप्युच्चां ध्यायन्त्युपक्रियाम् ।
दिद्दा यशोधरादिभ्यः कम्पनादि समार्पयत् ॥ २२८ ॥
अभिचारं महिम्नश्च कृतवत्या मितैर्दिनैः ।
मण्डलेखण्डिताज्ञत्वं दिद्दायाः समजृम्भत ॥ २२९ ॥
कदाचित्थक्कनाख्यस्य शाहीशस्योपरि क्रुधा ।
सत्रा स्ववंशजैर्यात्रां कम्पनाधिपतिर्ददौ ॥ २३० ॥
तद्देशं निम्नगाशैलदुर्गं प्रविशता जवात् ।
अखण्डशक्तिना तेन बलादग्राहि थक्कनः ॥ २३१ ॥
स कृतप्रणतेस्तस्य करमादाय भूपतेः ।
अभिषेकाम्बुभिश्चक्रे श्रीलताप्यायनं पुनः ॥ २३२ ॥
लब्धप्रवेशैः समये तस्मिन्नक्कादिभिः खलैः ।
कम्पनाधिपतौ राज्ञ्या विद्वेषोग्राहि मूढया ॥ २३३ ॥
उर्वीपतेश्च स्फटिकाश्मनश्च
शीलोज्झितस्त्रीहृदयस्य चान्तः ।
असंनिधानात्सततस्थितीना-
मन्योपरागः कुरुते प्रवेशम् ॥ २३४ ॥
स्वचित्तसंवादि वचो वदन्तो
धूर्ता वितन्वन्ति मनःप्रवेशम् ।
पृथग्जनानां गणिका वधूनां
विटाः प्रभूणामपि गर्भचेटाः ॥ २३५ ॥

द्रोग्धायं थक्कनं रक्षन्धनादायीति पैशुनम्।
तथ्यमेव तदीयं सा स्वयं वादादमन्यत ॥ २३६ ॥
अथ स्ववसतिं प्राप्ते कम्पनेशे जयोर्जिते।
याष्टीकान्व्यसृजद्दिद्दा स्फुटं निर्वासनोद्यता ॥ २३७ ॥
तदाक्षेपं समाकर्ण्य स्मरन्तः कोशसंविदम्।
ते हिम्मकैरमत्ताद्याः पूर्ववद्विक्रियां ययुः ॥ २३८ ॥
नरवाहनमुख्यास्तु राज्ञीपक्षं न तत्यजुः।
विभेदं पूर्ववत्प्रापदेवं निजबलं पुनः ॥ २३९ ॥
प्रविष्टेषु ततः कोपात्पुरं शुभधरादिषु।
भट्टारकामठे दिद्दा भूयः पुत्रं व्यसर्जयत् ॥ २४० ॥
दत्तार्गले नृपगृहे स्थितां तां दैवमोहिताः।
ते तदैव विना पुत्रं विमूढा नोदपाटयन् ॥ २४१ ॥
राज्ञ्या संजघटे लोकः परस्मिन्नेव वासरे।
यद्बलेन तदा स्थैर्यं सा किंचित्समदर्शयत् ॥ २४२ ॥
जयाभट्टारिकापार्श्वाद्यावच्छूरमठान्तिकम्।
व्याप्य स्थितैर्द्विषत्सैन्यैरथ प्रववृते रणः ॥ २४३ ॥
राजधानीं राजसैन्ये प्रविष्टे त्रासविद्रुते।
सिंहद्वारे घटाबन्धमेकाङ्गाः समदर्शयन् ॥ २४४ ॥
शरीरनिरपेक्षास्ते भीतं संस्तम्भ्य तद्बलम्।
अधावन्विद्विषां सैन्यं चेलुः केचिच्च शत्रवः ॥ २४५ ॥
तस्मिन्नवसरे राजकुलभट्टः समाययौ।
तूर्यघोषैर्द्विषां सैन्यं भिन्दन्नानन्दयन्निजम् ॥ २४६ ॥
तस्मिन्प्राप्ते द्विषां सैन्यं विननाश विनेश्वरम्।
न द्रोहाविनयं जातु सहन्ते शस्त्रदेवताः ॥ २४७ ॥

त्रोटयत्यायसान्बन्धान्स्फोटयत्युपलानिति ।
यः ख्यातिमवहत्तथ्यां हिम्मको भीमविक्रमः ॥ २४८ ॥
तस्यासिना राजकुलभट्टदेहार्धपातिना ।
चर्ममात्रं न तुत्रोट कङ्कटस्यातिसंकटे ॥ २४९ ॥
युग्मम् ॥
विलोक्य तदसंभाव्यं सैन्ये दैन्यं समाश्रिते ।
अघानि हिम्मको योधैरवष्टम्भि[1] यशोधरः ॥ २५० ॥
तथाप्यासीत्स्फुरन्संख्ये य ऐरमत्तकः क्षणम् ।
स भग्नासिश्च्युतो वाहाज्जीवग्राहमगृह्यत ॥ २५१ ॥
नाजौ तैरेष्यताधातुं यः श्रीमान्राजबान्धवः ।
जगामोदयगुप्तः स क्वापि त्यक्त्वा महाहवम् ॥ २५२ ॥
इत्थं लब्धजया राज्ञी तत्क्षणान्न्यग्रहीद्रुषा ।
यशोधरं शुभधरं मुकुलं च सबान्धवम् ॥ २५३ ॥
काश्मीरिकाणां यः श्राद्धशुल्कोच्छेत्ता गयान्तरे ।
सोप्येरमत्तकः शूरः परिहासपुराश्रयः ॥ २५४ ॥
बद्ध्वा महाशिलां कण्ठे वितस्ताम्भसि पातितः ।
स्वदुर्नयफलं देव्याः प्रकोपेनानुभावितः ॥ २५५ ॥
युग्मम् ॥
ये सप्तसप्तताद्धर्षादा गोपालनृपात्पुरा ।
अभिमन्युं यावदासन्षोडशानां महीभुजाम् ॥ २५६ ॥
वर्षषष्टिं प्रतापायुःश्रीहरा द्रोहवृत्तयः ।
ते क्षिप्रं मन्त्रिणः सर्वे सान्ववायाः सहानुगाः ॥ २५७ ॥
भीमभ्रूभङ्गमात्रेण दिद्दादेव्या सकोपया ।
आसन्निःशेषतां नीता दुर्गयेव महासुराः ॥ २५८ ॥
तिलकम् ॥

---

१ अवाष्टम्भि इत्युचितम् ।

अभवन्विहिता राज्ञ्या तानुत्पाट्य मदोद्धतान् ।
रक्षादयः कम्पनादिकर्मस्थानाधिकारिणः ॥ २५९ ॥
इत्थं मन्त्रिप्रकाण्डः स रण्डामाखण्डलोपमाम् ।
अखण्डमण्डलां चक्रे निर्द्रोहो नरवाहनः ॥ २६० ॥
राज्ञी कृतज्ञभावेन सापि मन्त्रिसभान्तरे ।
तमाजुहाव निर्द्रोहं स्वयं राजानकाख्यया ॥ २६१ ॥
सुप्ते सुष्वाप निष्पन्नभोजनेस्मिन्नभुङ्क्त सा ।
हृष्टे जहर्ष निर्विण्णे निर्विवेदानुकूल्यतः ॥ २६२ ॥
आरोग्यान्वेषणं शिक्षाप्रार्थनां गृहवर्तिनः ।
सात्मवस्तुविसर्गं[1] च नाकृत्वा तस्य पिप्रिये ॥ २६३ ॥
अभूतां युग्यवाहस्य कुय्यनाम्नः सुतौ पुरा ।
यौ सिन्धुभुय्यौ तज्ज्यायान्सिन्धुर्लालितकः किल ॥ २६४ ॥
पर्वगुप्तगृहे भूत्वा गञ्जाध्यक्षे स्थिते क्रमात् ।
लब्ध्वा गञ्जाधिकारित्वं तस्या राज्ञ्याः शनैरभूत् ॥ २६५ ॥
रूढ्या तयैव गञ्जेशो नवायासविधायकः ।
कर्मस्थानस्य निर्माता सिन्धुगञ्जाभिधस्य यः ॥ २६६ ॥
प्रायशो हृतराज्यस्ते वर्तते नरवाहनः ।
इति नेयधियं राज्ञीं सोभ्यधत्त दुराशयः ॥ २६७ ॥
सा तथेत्यब्रवीद्यावत्तावत्प्रेम्णा स जातुचित् ।
मन्त्री तां प्रार्थयामास भोक्तुं निजगृहागमम् ॥ २६८ ॥
सा सानुगां तत्र यातां ध्रुवं त्वामेव वन्त्स्यति ।
इत्युक्ता सिन्धुनापृच्छत्तत्कर्तव्यं भयाकुला ॥ २६९ ॥
अनुक्त्वैव प्रचलिता राजधानीमलक्षिता ।
स्त्रीधर्मिण्यस्मि जातेति पश्चाद्द्वार्तां व्यसर्जयत् ॥ २७० ॥

---

१ सात्म्य इति स्यात् ।

संप्रवृत्तोपचारायां गतायां तत्पथात्तथा ।
राज्ञ्यां नाशममात्यस्य प्रीतिः संविच्च सा ययौ ॥ २७१ ॥
तयोस्ततः प्रभृत्येव निष्कृष्टस्नेहयोः कृतम् ।
चाक्रिकैरतिरूक्षत्वं तिलपिण्याकयोरिव ॥ २७२ ॥
कुलिशं सर्वलोहानामम्भसां शैलसेतवः ।
अभेद्याः प्रतिभाव्यन्ते न किंचिदसतां पुनः ॥ २७३ ॥
ये बालादपि संमूढाः प्राज्ञाः सुरगुरोरपि ।
तेषां न विद्मः किं तावन्निर्माणपरमाणवः ॥ २७४ ॥
विश्वासोज्झितधीः शिशून्कलयते काकोन्यदीयान्निजा-
न्हंसः क्षीरपयोविभागकुशलस्त्रस्यत्यसाराद्धनात् ।
लोकावेक्षणतीक्ष्णधीः खलगिरं जानाति सत्यां नृपो
धिग्वैदग्ध्यविमुग्धताव्यतिकरस्पृष्टं विधानं विधेः ॥ २७५ ॥
मूढाचरणहीना सा श्रुतिबाह्यतया तया ।
वैधेयविप्रप्रकृतिरिव प्रायाद्विगर्ह्यताम् ॥ २७६ ॥
उद्वेजितस्तया शश्वत्तथा स नरवाहनः ।
यथा विमाननोत्तप्तः स्वयं तत्याज जीवितम् ॥ २७७ ॥
प्रकुप्यत्यप्रतीकार्ये स्वतेजस्तप्तचेतसाम् ।
शरणं मरणं त्यक्त्वा किमिवान्यद्यशोर्थिनाम् ॥ २७८ ॥
शशिहीनेव रजनी सत्यत्यक्तेव भारती ।
विरराज न राजश्रीर्नरवाहनवर्जिता ॥ २७९ ॥
सा क्रौर्याभ्यासविषमा हन्तुं विततविक्रमान् ।
संग्रामडामरसुतान्समीपस्थानचिन्तयत् ॥ २८० ॥
निजमुत्तरघोषं ते तद्भयेन विनिर्गताः ।
कय्यकद्वारपत्यादीन्कृतारब्धीन्व्यपादयन् ॥ २८१ ॥

उत्पिञ्जभीतया राज्ञ्या त्यक्त्वा परिभवत्रपाम् ।
ते यत्नात्समघट्यन्त मानः स्वार्थार्थिनां कुतः ॥ २८२ ॥
स्थानेश्वरादिभिर्मुख्यैर्डामरैरितरैः समम् ।
ते भीताः पुरतस्तस्याः पुनरेत्य जजृम्भिरे ॥ २८३ ॥
अथ तद्भीतया राज्ञ्या रक्के प्रमयमागते ।
आनीतः फल्गुणो भूयो वीरार्थिन्या निजान्तिकम् ॥२८४॥
राजकार्याणि कुर्वाणः स भूयः शस्त्रमग्रहीत् ।
न्यस्तशस्त्रोपि यत्सत्यं दुस्त्यजा भोगवासना ॥ २८५ ॥
महिमा राजपुर्यादिजयिनस्तस्य पश्चिमः ।
अद्भुतो वृद्धबन्धक्या अवरुद्ध इवाभवत् ॥ २८६ ॥
अभूदुदयराजस्य देवीभ्रातुरतिप्रियः ।
यः सहायोक्षपटले जयगुप्ताभिधः कुधीः ॥ २८७ ॥
अन्येधिकारिणस्तेन सहिताः क्रूरवृत्तयः ।
कश्मीरेषु व्यधुर्लुण्ठि दुष्कृतैस्तदुपार्जितैः ॥ २८८ ॥
दौःशील्यभाजो मातुश्च पाप्मभिर्विधुरीकृतः ।
अभिमन्युः क्षणे तस्मिन्क्षयरोगेण पस्पृशे ॥ २८९ ॥
पण्डितः पुण्डरीकाक्षो विद्वत्पुत्रैरुपस्कृतः ।
कृतश्रुतः[1] स वैदुष्यतारुण्याभ्यां विदिद्युते ॥ २९० ॥
तथा विशुद्धप्रकृतेस्तस्य दुष्कृतसंगमः ।
शोषाधायी शिरीषस्य रवितप इवाभवत् ॥ २९१ ॥
अर्धमानः[2] प्रजाचन्द्रस्तृतीयस्यां स कार्तिके ।
शुक्लेष्टचत्वारिंशाब्दे ग्रस्तो नियतिराहुणा ॥ २९२ ॥
तत्पुत्रो नन्दिगुप्तस्तु बालश्चक्रे निजासने ।
वृद्धस्तनयशाकेस्तु दिद्दाया हृदये पदम् ॥ २९३ ॥

---

१ कृतश्रुतो यो इत्युचितम् । २ वर्धमानः इति स्यात् ।

सा शोकपिहितक्रौर्या तस्थौ प्रशमशीतला ।
रविरत्नशलाकेव ध्वान्तच्छन्नोष्मवैकृता ॥ २९४ ॥
ततः प्रभृत्यद्भुताभिस्तस्या धर्मप्रवृत्तिभिः ।
कुकर्मभिरुपोढापि लक्ष्मीः प्राप्ता पवित्रताम् ॥ २९५ ॥
नगराधिपतिर्भुव्यः सिन्धुभ्राता शुभाशयः ।
तदीयधर्मचर्यायां बभूव परिपोषकः ॥ २९६ ॥
सा तेनोत्पादितानर्घजनरागा गतैनसा ।
ततः प्रभृत्यभूद्देवी सर्वलोकस्य संमता ॥ २९७ ॥
राज्ञः स सचिवः सत्यं दुष्प्रापो लुप्तचण्डिमा ।
कुर्याद्यः सुखसेव्यत्वं हेमन्त इव भास्वतः ॥ २९८ ॥
सा निर्मात्री विपन्नस्य सूनोः सुकृतवृद्धये ।
अभिमन्युस्वामिनोभूदभिमन्युपुरस्य च ॥ २९९ ॥
अथ दिद्दापुरोपेतो दिद्दास्वामी तया कृतः ।
मठश्च मध्यदेशीयलाटशौण्डोत्रसंश्रयः ॥ ३०० ॥
भर्तुः कङ्कणवर्षस्य पुण्योत्कर्षाभिवृद्धये ।
चकार कङ्कणपुरं रमणी स्वर्णवर्षिणी ॥ ३०१ ॥
श्वेतशैलमयं चान्यं सा दिद्दास्वामिनं व्यधात् ।
धवलं चरणोद्भूतगङ्गाम्भःप्लवनैरिव ॥ ३०२ ॥
चक्रे काश्मीरिकाणां च दैशिकानां समाश्रयः ।
तयात्युच्चचतुःशालो विहारश्चारुसंपदा ॥ ३०३ ॥
श्रीसिंहस्वामिनं नाम्ना सिंहराजस्य सा पितुः ।
मठं च विदधे स्थित्यै दैशिकानां द्विजन्मनाम् ॥ ३०४ ॥
मठप्रतिष्ठावैकुण्ठनिर्माणाद्यैः स्वकर्मभिः ।
तयातिपावनश्चक्रे वितस्तासिन्धुसंगमः ॥ ३०५ ॥

---

१ शौण्डोड्र इति स्यात् । २ सुकर्मभिः इति स्यात् ।

तेषु तेषु प्रदेशेषु किमुक्तैर्भूरिभिः शुभैः।
सा प्रतिष्ठा व्यरचयच्चतुःषष्टिमिति श्रुतिः ॥ ३०६ ॥
जीर्णोद्धारकृता देव्या प्लुष्टप्राकारमण्डलाः।
प्रायः सुरगृहाः सर्वे शिलावप्रावृताः कृताः ॥ ३०७ ॥
क्रीडाचङ्क्रमणे राज्ञ्याः पङ्क्त्वा विग्रहवाहिनी।
वल्गाभिधा वैवधिकी वल्गामठमकारयत् ॥ ३०८ ॥
तीर्थासेवनमौनभागपि तिमिः सक्तः स्वकुल्याशने
वाताशान्ग्रसते शिखी घनपयोमात्राशनोप्यन्वहम्।
विश्वस्ताञ्जलचारिणः प्रकटितध्यानोपि भुङ्क्ते बकः
सत्कर्माचरणेपि दोषविरतौ न प्रत्ययः पापिनाम् ॥ ३०९ ॥
चर्षणी वर्षमात्रेण शान्तशोका बभूव सा।
भोगोत्सुकार्भके तस्मिन्नप्तरि व्यभिचारकृत् ॥ ३१० ॥
वर्ष एकान्नपञ्चाशे नीतः पक्षे सिते क्षयम्।
स मार्गशीर्षद्वादश्याममार्गव्यग्रया तया ॥ ३११ ॥
पौत्रस्त्रिभुवनो नाम मार्गशीर्षे सितेहनि।
पञ्चमेप्येकपञ्चाशे वर्षे तद्धत्तया हतः ॥ ३१२ ॥
अथ मृत्युपथे राज्यनाम्नि स्वैरं निवेशितः।
क्रूरया चरमः पौत्रो भीमगुप्ताभिधस्तया ॥ ३१३ ॥
तस्मिन्नवसरे वृद्धः फल्गुणोपि व्यपद्यत।
निगूढक्रौर्यदौःशील्या दिद्दा यद्वौरवादभूत् ॥ ३१४ ॥
बभूव साथ सुस्पष्टदुष्टचेष्टाशतोत्कटा।
भ्रष्टवक्रपटा मत्तदन्तिमूर्तिरिवोत्कटा ॥ ३१५ ॥
महाभिजनजातानामपि हा धिङ्निसर्गतः।
सरितामिव नारीणां वृत्तिर्निम्नानुसारिणी ॥ ३१६ ॥

स्रोतोधिराज्यमधिगम्य विराजमाना-
त्सिन्धोः प्रसूय कमलाल्पपयोनिकेते ।
जाते सरस्यविरतं जलजे प्रसक्ता
नार्यो महाभिजनजा अपि नीचभोग्याः ॥ ३१७ ॥
खशस्य बद्दिवासाख्यपर्णोत्सग्रामजन्मनः ।
बाणस्य सूनुस्तुङ्गाख्यो विंशन्महिषपालकः ॥ ३१८ ॥
प्रविष्टो जातु कश्मीराँल्लेखहारककर्मणा ।
सुगन्धिसीहप्रकटनागाद्दयिकषण्मुखैः ॥ ३१९ ॥
पञ्चभिर्भ्रातृभिः सार्धं संधिविग्रहकान्तिके ।
देव्या दृग्गोचरं यातो हृदयावर्जकोभवत् ॥ ३२० ॥

तिलकम् ॥

रहः प्रवेशितो दूत्या स भाव्यर्थबलाद्युवा ।
संभुक्तभूरिजाराया अपि तस्याः प्रियोभवत् ॥ ३२१ ॥
तुङ्गानुरागिणी राज्ञी पापा लज्जोज्झिता ततः ।
रसदानेन वैमुख्यभाजं भुय्यमघातयत् ॥ ३२२ ॥
धिङ्निर्विचारान्कुपतीन्येषां विषमचेतसाम् ।
फलशून्या स्तुतिस्तोषे दोषे प्राणधनक्षयः ॥ ३२३ ॥
रक्तजो देवकलशो वेलावित्तः कृतस्तया ।
भुय्याधिकारे कौट्टन्यमाचरन्निस्त्रपो विटः ॥ ३२४ ॥
येपि कर्दमराजाद्या वीरा द्वारादिनायकाः ।
तेपि कौट्टन्यमभजन्नन्येषां गणनैव का ॥ ३२५ ॥
चतुष्पञ्चानि वर्षाणि तिष्ठन्नृपगृहे शिशुः ।
भीमगुप्तोभवद्यावत्किंचित्प्रौढीभवन्मतिः ॥ ३२६ ॥

---

१ विशां इति स्यात् ।

राज्यव्यवस्था यावच्च पितामह्याश्च वृत्तयः ।
दुःस्थिताः प्रत्यभासन्त संस्थाप्यास्तस्य चेतसि ॥ ३२७ ॥
अङ्गशीलविहीनाया निर्घृणाया निसर्गतः ।
तावन्नेयधियस्तस्याः स चिन्त्यः समपद्यत ॥ ३२८ ॥

तिलकम् ॥

अभिमन्युवधूस्तं हि चक्रे गूढप्रवेशितम् ।
महाभिजनजं पुत्रं तस्मात्सोभूत्तथाविधः ॥ ३२९ ॥
सा देवकलशेनाथ दत्तमन्त्रा विशङ्किता ।
त्रपोज्झिता स्पष्टमेव भीमगुप्तमबन्धयत् ॥ ३३० ॥
निगूढे नन्दिगुप्तादिद्रोहे लोकस्य योभवत् ।
संदेहः स तया तेन व्यक्तकृत्येन वारितः ॥ ३३१ ॥
ताभिस्ताभिर्यातनाभिर्भीमगुप्तं निपात्य सा ।
षट्पञ्चाशेभवद्वर्षे स्वयं क्रान्तनृपासना ॥ ३३२ ॥
प्रवृद्धरागया राज्ञ्या दत्तोद्रेको दिने दिने ।
सर्वाधिकारी तुङ्गोथ बभूवाधरिताखिलः ॥ ३३३ ॥
सभ्रातृकेण तुङ्गेन मीलिताः पूर्वमन्त्रिणः ।
राज्यविप्लवमाधातुमयतन्त विरागिणः ॥ ३३४ ॥
तेथ संमन्त्र्य कश्मीरानानिन्युः क्रूरपौरुषम् ।
उग्रं विग्रहराजाख्यं दिद्दाभ्रातुः सुतं नृपम् ॥ ३३५ ॥
मुख्याग्रहारान्स प्राप्तो विधातुं राज्यविप्लवम् ।
धीमान्प्रायोपवेशाय द्रुतं प्रायोजयद्द्विजान् ॥ ३३६ ॥
विहितैक्येषु विप्रेषु लोकः सर्वोपि विप्लुतः ।
अन्वियेषान्वहं तुङ्गं तत्र तत्र जिघांसया ॥ ३३७ ॥
कस्मिंश्चित्पिहितद्वारे तुङ्गं प्रच्छाद्य वेश्मनि ।
दिनानि कतिचिद्दिद्दा तस्थावास्कन्दशङ्किनी ॥ ३३८ ॥

तया स्वर्णप्रदानेन सुमनोमन्तकादयः ।
ब्राह्मणाः समगृह्यन्त ततः प्रायो न्यवर्तत ॥ ३३९ ॥
एवं तस्मिन्महाक्षेपे तया दानेन वारिते ।
ययौ विग्रहराजः स भग्नशक्तिर्यथागतम् ॥ ३४० ॥
अथ दार्ढ्यं समासाद्य तुङ्गाद्याः प्रभविष्णवः ।
शनैः कर्दमराजादीञ्जघ्नुर्विहितविप्लवान् ॥ ३४१ ॥
सुलक्कनो रक्कसूनुस्तथान्ये मुख्यमन्त्रिणः ।
रुष्टैर्निर्वासिता देशात्तुष्टैस्तैः संप्रवेशिताः ॥ ३४२ ॥
प्रवर्धमानवैरेण गूढदूतैर्विसर्जितैः ।
प्रायं विग्रहराजेन ब्राह्मणाः कारिताः पुनः ॥ ३४३ ॥
उत्कोचादित्सया विप्रा भूयः प्रायविधायिनः ।
लब्धस्थैर्येण तुङ्गेन संनिपत्यापहस्तिताः ॥ ३४४ ॥
तेषां मध्ये वसन्गूढमादित्याख्यः पलायितः ।
हतो विग्रहराजस्य प्रियः कटकवारिकः ॥ ३४५ ॥
शस्त्रक्षतः प्रतीहारो वत्सराजाभिधः पुनः ।
न्यङ्कोतकादिभिर्धावञ्जीवग्राहमगृह्यत ॥ ३४६ ॥
ते स्वर्णग्राहिणो विप्राः सुमनोमन्तकादयः ।
सर्वेपि बद्धास्तुङ्गेन कारागारं प्रवेशिताः ॥ ३४७ ॥
अथ फल्गुणनाशेन दृप्ते राजपुरीपतौ ।
तां प्रत्यारब्धिरभवत्क्रुध्यतां सर्वमन्त्रिणाम् ॥ ३४८ ॥
निपत्य संकटे वीरः पृथ्वीपालाभिधस्ततः ।
चक्रे राजपुरीराजः काश्मीरिकबलक्षयम् ॥ ३४९ ॥
शिपाटको हंसराजो विपन्नौ तत्र मन्त्रिणौ ।
चन्द्राद्यैर्दुर्गतिर्दृष्टा मरणं यत्र भेषजम् ॥ ३५० ॥

अथान्येन पथाकस्मात्तुङ्गः सार्धं सहोदरैः ।
कृत्स्नां राजपुरीं वीरः प्रविश्य सहसादहत् ॥ ३५१ ॥
ननाश तेनोपायेन पृथ्वीपालः स पार्थिवः ।
शेषाणां मन्त्रिणां सैन्यं प्राप मुक्तिं च संकटात् ॥ ३५२ ॥
अबलः सन्स भूपालस्तुङ्गाय प्रददौ करम् ।
एवं कृतं तदा तेन नष्टस्यार्थस्य योजनम् ॥ ३५३ ॥
प्रविशन्नगरं तुङ्गस्ततः स्वीकृतकम्पनः ।
चकार डामरग्रामसंहारं सिंहविक्रमः ॥ ३५४ ॥
दिद्दाप्युदयराजस्य भ्रातुः पुत्रं परीक्षितम् ।
चक्रे संग्रामराजाख्यं युवराजमशङ्किता ॥ ३५५ ॥
सा हि सर्वाञ्शिशुप्रायान्पुरो भ्रातृसुतान्स्थितान् ।
परीक्षितुं मुमोचाग्रे पालेवतफलावलिम् ॥ ३५६ ॥
शक्तः कियन्ति कः प्राप्तुं फलान्यत्रेति वादिनी ।
साभवद्राजपुत्राणां तेषां कलहकारणम् ॥ ३५७ ॥
गृहीतालपफलाँल्लुप्तप्रहारांस्तान्ददर्श च ।
संग्रामराजं त्वस्वलपफलभाजमविक्षतम् ॥ ३५८ ॥
अनन्तफलसंप्राप्तावक्षतत्वे च कारणम् ।
सविस्मयं तया पृष्टः स तामेवं तदाब्रवीत् ॥ ३५९ ॥
अन्योन्यकलहव्यग्रानेतान्कृत्वा पृथग्वसन् ।
समवापं फलान्यन्स्मिन्न चाभूवं परिक्षतः ॥ ३६० ॥
व्यसने संप्रवेश्यान्यान्स्थितानामप्रमादिनाम् ।
न काः क्लेशविहीनानां घटन्ते स्वार्थसिद्धयः ॥ ३६१ ॥
श्रुत्वेति तस्य सा वाचमप्रमत्तत्वदूतिकाम् ।
भीरुर्नारीस्वभावेन राज्येमन्यत योग्यताम् ॥ ३६२ ॥

शूरस्य लभ्यं शौर्येण भीरोर्भीरुतया यथा ।
कार्यं हि प्रतिभात्यन्तर्न भवेच्च तदन्यथा ॥ ३६३ ॥
काष्ठं वह्नयुज्झितमपि भवेच्छीतशान्त्यै कपीनां
लोष्ठां शुद्ध्यै सलिलमनलश्चाग्निशौचैणकानाम् ।
जन्तोर्भावा विदधति यथाभाविनः कार्यसिद्धिं
तत्त्वं तेषां क्वचन सहजं वस्तुतो नास्ति किंचित् ॥ ३६४ ॥
तस्यामेकान्नशीत्यब्दशुक्लभाद्राष्टमीदिने ।
देव्यां दिवं प्रयातायां युवराजोभवन्नृपः ॥ ३६५ ॥
स्त्रीसंबन्धेन भूपालवंशानां भुवनाद्भुतः ।
तृतीयः परिवर्तोयं वर्ततेमुत्र मण्डले ॥ ३६६ ॥
निर्नष्टकण्टककुले वसुसंपदाढ्ये
श्रीसातवाहकुलमाप महीतलेस्मिन् ।
दावाग्निदग्धकुतरौ जलदाम्बुसिक्ते
चूतप्ररोह इव केलिवने प्रवृद्धिम् ॥ ३६७ ॥
अथ स मृदुतयान्तर्गूढधैर्यानुभावः
सुखमवनिमशेषां दोष्णि संग्रामराजः ।
बिसकुलनिभशोभानिह्नुतप्राणसारः
फणकुल उरगाणामीशितेव न्यधत्त ॥ ३६८ ॥

इति श्रीकाश्मीरिकमहामात्यचम्पकप्रभुसूनोः कह्लणस्य कृतौ राजतरङ्गिण्यां षष्ठस्तरङ्गः ॥

अत्र वर्षचतुःषष्टौ मासेप्यर्धे दिनेषु च ।
अष्टस्वभूवन्भूपाला दश भूभोगभागिनः ॥

सप्तमस्तरङ्गः ।

मातुस्तेजनि निर्मिते पितृकुले श्लाघ्या तनुर्वेधसा
त्वं संध्याहितसंनिधिर्मम जपारक्तेधरे खेलसि ।
संध्यावन्दनसाभ्यसूयगिरिजास्तुत्येदृशैर्वाकछलै-
र्यः संध्यामपि वन्दते स्म स जगत्प्रीणातु गौरीश्वरः ॥ १ ॥
क्षमां क्षमापतिर्बिभ्रन्मनसा च भुजेन च ।
गाम्भीर्येण च शक्त्या च सोजयद्वाहिनीपतीन् ॥ २ ॥
जज्ञे राज्ञीक्षये भङ्गो यैस्तुङ्गस्य तदाखिलैः ।
दिनश्रीविगमे संध्याप्रसङ्गस्येव रागिणः ॥ ३ ॥
तत्तत्प्रतिभटाटोपत्रोटनात्प्रत्युतास्य तैः ।
उदयो ददृशे शश्वद्भूतिं को वेत्ति वेधसः ॥ ४ ॥

युग्मम् ॥

नृपेण जातज्ञातेयः शूरः शक्तिसमन्वितः ।
सर्वाधिकारयोग्योगात्तदा चन्द्राकरः क्षयम् ॥ ५ ॥
अन्ये भीमतिकाग्रामदिविरस्योरुसंपदः ।
पुण्याकरस्य तनयाः शूराः शान्तिं प्रपेदिरे ॥ ६ ॥
समर्थमन्त्रिविरहादनिच्छन्नपि वेधसा ।
निन्ये गत्यन्तरत्यक्तस्तुङ्गपक्षं क्षमापतिः ॥ ७ ॥
संग्रामराजतुङ्गादीन्देवी कोशमपाययत् ।
मुमूर्षन्ती पुरा स्थातुमद्रोहेणेतरेतरम् ॥ ८ ॥
क्लेशासहो महीपालस्ततः कार्यवशादपि ।
तुङ्गन्यस्तप्रजाकार्यो भोगाभ्यासालसोभवत् ॥ ९ ॥
पर्याप्तं तस्य भीरुत्वं कियदन्यत्प्रकाश्यताम् ।
असमैर्यौनसंबन्धैश्चक्षमे यशसः क्षतिम् ॥ १० ॥

साहायकार्थी यत्प्रादाच्छ्रीशौर्यादिमते सुताम् ।
दिद्दामठाधिपतये प्रेमनाम्ने स लोठिकाम् ॥ ११ ॥
क्व लोकोद्वहनोन्नद्धभूभृद्योग्या नृपात्मजा ।
प्रतिग्रहजलक्लिन्नपाणिः क्वालपमना द्विजः ॥ १२ ॥
अथ तुङ्गादिभङ्गाय प्रायं ब्राह्मणमन्त्रिणः ।
परिहासपुरे विप्रपारिषद्यानकारयन् ॥ १३ ॥
विप्रमन्त्रिमतैक्येन कृतो राज्ञः स विप्लवः ।
दुःसहः पवमानाग्निसमागमसमोभवत् ॥ १४ ॥
राज्ञोप्युत्पाटने सज्ज्ञैः कथंचित्प्रार्थितो[1] द्विजैः ।
मतिः क्षान्तिचरुप्राये तुङ्गनिःसारणे कृता ॥ १५ ॥
राज्ञस्[2]तुङ्गादिभिश्चैतद्यावत्तेभ्यः प्रतिश्रुतम् ।
अन्यत्प्रार्थयितुं लज्जास्तावत्ते शठबुद्धयः ॥ १६ ॥
तुङ्गास्कन्देन विप्रोयं यो मृतस्तद्गृहे वयम् ।
तं निर्दहाम इत्युक्त्वा शवः कोप्यरघट्टतः ॥ १७ ॥
तैरुद्धृत्य यदा नीतः शठैस्तुङ्गगृहान्प्रति ।
केशहोमाद्य विहिताद्या कृत्योत्थापिताभवत् ॥ १८ ॥
तया प्रतीपपातिन्या निःशौचानां द्विजन्मनाम् ।
अकस्मान्निरगाच्छस्त्रं विनाशायोत्थिते कलौ ॥ १९ ॥

तिलकम् ॥

ततः पलायिता विप्रा यस्तेषां मन्त्रदोभवत् ।
निगूढं राजकलशस्तद्वेश्म प्राविशन्भयात् ॥ २० ॥
स व्यक्तीभूतकौटिल्यः संग्रामं सुचिरं व्यधात् ।
अपद्वारैस्तु ते विप्राः पलाय्य स्वगृहान्ययुः ॥ २१ ॥
विजिते राजकलशे समकार्या द्विजातयः ।
मन्त्रिणः श्रीधरसुताः सप्तागत्य व्यधुर्मृधम् ॥ २२ ॥

---

१ प्रार्थितैः इत्युचितः पाठः । २ राज्ञा इत्युचितः पाठः ।

ते कृत्वा सुमहत्कर्म समाप्तिं समरे गताः ।
निर्भिद्य मण्डलं सप्त सप्तसप्तेर्द्रुतं ययुः ॥ २३ ॥
जितः सुगन्धिसीहेन तेषु शान्तेषु संयुगे ।
बद्धाथ राजकलशस्तुङ्गेनानायितो गृहम् ॥ २४ ॥
नीयमानोधिरोप्याशु स्कन्दं[1] मार्गेषु विक्षतः ।
तुङ्गस्य युग्यवाहैः स नर्तितोपहृतायुधः ॥ २५ ॥
अन्योपि भूतिकलशो नाम मन्त्री विनिर्जितः ।
सुतेन राजकाख्येन सह शूरमठं ययौ ॥ २६ ॥
क्रमात्सुगन्धिसीहाद्यैर्मुक्तः करुणया ततः ।
सपुत्रः सोवमानाग्नितप्तो देशान्तरं ययौ ॥ २७ ॥
परिहासपुरादेवं जातो यो देशविप्लवः ।
स दैवयोगात्तुङ्गस्य शुभाय प्रत्युताभवत् ॥ २८ ॥
ततः प्रसादिते राज्ञि गुणदेवेन मन्त्रिणा ।
आययौ भूतिकलशः कृतगङ्गानिमज्जनः ॥ २९ ॥
पुनर्नृपगृहे तस्मिन्किंचिल्लब्धपदे शनैः ।
तुङ्गं निहन्तुं राज्ञैनं गूढं दूताः प्रयोजिताः ॥ ३० ॥
ज्ञातवार्तेन तुङ्गेन तस्मिन्नर्थे प्रकाशिते ।
सपुत्रो भूतिकलशो राज्ञा निर्वासितः पुनः ॥ ३१ ॥
अवष्टम्भं मनाग्लेभे चन्द्राकरसुतः शनैः ।
यो मय्यामत्तकः सोपि तस्मिन्काले व्यपद्यत ॥ ३२ ॥
भूत्वा किंचित्[2]क्षणं भूभृत्कन्यासंभोगभाजनम् ।
राजोपकारकृच्छ्रीमान्प्रेमापि प्रमयं ययौ ॥ ३३ ॥
विषेदिरेन्ये गङ्गाद्याः सर्वेपि नृपतिप्रियाः ।
अवाशिष्यत भोगाय तुङ्गः सभ्रातृकः परम् ॥ ३४ ॥

---

१ स्कन्धं इत्युचितः पाठः । २ कंचित् इत्युचितः पाठः ।

इति यो यो हि वृत्तान्तस्तस्य नाशाय शङ्कितः ।
स स दैवानुकूल्येन प्रत्युतोद्रेचकोभवत् ॥ ३५ ॥
कालक्रमत्रुटितसंश्रयभूः स्वमूल-
मात्राश्रयी तटतरुः सरितोम्बुपूरैः ।
यैः शङ्क्यते निपततीति वितीर्णमृद्धि-
स्तैरेव तस्य हि भवेत्स्थितिभूमिदार्ढ्यम् ॥ ३६ ॥
नीत्युज्ज्वलं व्यवहरन्प्रजाराधनतत्परः ।
प्राक्पुण्यसंक्षयात्तुङ्गः शनैस्त्वासीत्स्खलन्मतिः ॥ ३७ ॥
यत्स्वभाग्यापहाराय हीनजन्मानमाददे ।
साहायकाय कायस्थं क्षुद्रं भद्रेश्वराभिधम् ॥ ३८ ॥
द्विवाणिज्यं सौनिकत्वं काष्ठविक्रयितादि च ।
आरामिकस्य यस्यासीत्कृत्यं वंशक्रमोचितम् ॥ ३९ ॥
कम्बलोद्धृष्टपृष्ठोथ भोजनार्थमवालगत् ।
भस्त्रामषीभाण्डवाही यश्च पश्चान्नियोगिनाम् ॥ ४० ॥
अनन्तराजकार्यादिचिन्ताश्रान्तो विधाय तम् ।
तुङ्गः सहायं नाबुद्ध संसर्गाद्भाग्यसंक्षयम् ॥ ४१ ॥
धार्मिकं तेन धर्मात्कं[1] विनिवार्यार्यचेतसम् ।
गृहकृत्याधिकारे स दुष्कृती विनिवेशितः ॥ ४२ ॥
देवगोब्राह्मणानाथातिथिराजोपजीविनाम् ।
अकालमृत्युर्विदधे वृत्तिच्छेदं स दुर्मतिः ॥ ४३ ॥
शवाजीवोपि पुष्णाति क्रूरः कापालिको निजान् ।
भद्रेश्वरस्तु पापोभून्निजानामपि जीवहृत् ॥ ४४ ॥
तुङ्गेन चैत्रे सर्वत्र कृते भद्रेश्वरे प्रभौ ।
सुगन्धिसीहः प्रययावाषाढे मासि संक्षयम् ॥ ४५ ॥

---

१ धर्माख्यं इति पाठः स्यात् ।

परलोकं गते तस्मिन्सर्वभारसहेनुजे ।
तुङ्गश्छिन्नोत्तमाङ्गत्वं सदैन्योमन्यतात्मनः ॥ ४६ ॥
श्रीत्रिलोचनपालस्य शाहेः साहायकार्थिनः ।
देशं ततो मार्गशीर्षे मासि तं व्यसृजन्नृपः ॥ ४७ ॥
राजपुत्रमहामात्यसामन्तादिनिरन्तरम् ।
सैन्यं तमन्वगाद्भूरि भुवनक्षोभणक्षमम् ॥ ४८ ॥
अग्रागतेन स तथा शाहिना कृतसत्क्रियः ।
पञ्चषाणि दिनान्यासीत्तद्देशे स यदोन्मदः ॥ ४९ ॥
प्रजागरचरन्यासशस्त्राभ्यासादिवासनाः ।
अभियोगोचिताः शाहिरपश्यंस्तं तदाब्रवीत् ॥ ५० ॥
युग्मम् ॥
तुरुष्कसमरे यावन्न यूयं कृतबुद्धयः ।
आलस्यविवशास्तावत्तिष्ठतास्मिन्गिरेस्तटे ॥ ५१ ॥
एवं त्रिलोचनेनोक्तं सोग्रहीन्न हितं वचः ।
तस्थौ परं समं सैन्यैरुत्सेकादाहवोत्सुकः ॥ ५२ ॥
हम्मीरेण तदा सैन्यं जिज्ञासार्थं विसर्जितम् ।
तौषीपारे मितप्रायैस्ततस्तीर्त्वावधीद्बलैः ॥ ५३ ॥
ततस्तमाहितोत्सेकमपि शाहिः पुनः पुनः ।
जगादाहवतत्त्वज्ञः पूर्वोक्तामेव संविदम् ॥ ५४ ॥
स तस्य नाग्रहीद्वाक्यं रणौत्सुक्यवशंवदः ।
प्रत्यासन्नविनाशानामुपदेशो निरर्थकः ॥ ५५ ॥
प्रातस्ततः स्वयं कोपात्तुरुष्कानीकनायकः ।
सर्वाभिसारेणागच्छच्छलाहवविशारदः ॥ ५६ ॥
अथ तुङ्गस्य कटकः सहसा भङ्गमाययौ ।
शाहिसैन्यं परं संख्ये ददृशे विचरत्क्षणम् ॥ ५७ ॥

शाहिसैन्ये गतेप्यासीज्जयसिंहः स्फुरत्रणे ।
श्रीवर्धनश्च संग्रामे विभ्रमार्कश्च डामरः ॥ ५८ ॥
घोरे तुरंगतुमुले प्रहरद्भिस्त्रिभिर्भटैः ।
वीरक्षेत्रे निजे देशे रक्षितस्तैर्यशःक्षयः ॥ ५९ ॥
कस्त्रिलोचनपालस्य माहात्म्यं वक्तुमीश्वरः ।
निःसंख्या अपि यं संख्ये न जेतुमशकन्द्विषः ॥ ६० ॥
शुशुभे रुधिरासारवर्षी युद्धे त्रिलोचनः ।
कल्पान्तदहनज्योतिर्विसारीव त्रिलोचनः ॥ ६१ ॥
स योधयित्वा संग्रामे कोटीः कङ्कटवाहिनाम् ।
एकाकी कार्यमर्मज्ञो निर्ययौ रिपुसंकटात् ॥ ६२ ॥
गते त्रिलोचने दूरमशेषं रिपुमण्डलम् ।
प्रचण्डचण्डालचमूशलभच्छायमानशे ॥ ६३ ॥
संप्राप्तविजयोप्यासीन्न हम्मीरः समुच्छ्वसन् ।
श्रीत्रिलोचनपालस्य स्मरञ्शौर्यममानुषम् ॥ ६४ ॥
त्रिलोचनोपि संश्रित्य हास्तिकं स्वपदाच्युतः ।
सयत्नोभून्महोत्साहः प्रत्याहर्तुं जयश्रियम् ॥ ६५ ॥
यथा नामापि निर्नष्टं शीघ्रं शाहिश्रियस्तथा ।
इह प्रासङ्गिकत्वेन वर्णितं न सविस्तरम् ॥ ६६ ॥
स्वप्नेपि यदसंभाव्यं यत्र भग्ना मनोरथाः ।
हेलया तद्विदधतो नासाध्यं विद्यते विधेः ॥ ६७ ॥
ईषद्यद्भूमिवैपुल्यं राज्ञः शंकरवर्मणः ।
वृत्तान्तवर्णने पूर्वममुत्र प्रकटीकृतम् ॥ ६८ ॥
स शाहिदेशः सामात्यः सभूभृत्सपरिच्छदः ।
किमभूत्किमु वा नाभूदिति संचिन्त्यतेधुना ॥ ६९ ॥

अवतारं तुरुष्काणां दत्त्वाशेषे महीतले ।
प्राप्तभङ्गस्ततस्तुङ्गः स्वदेशं प्राविशच्छनैः ॥ ७० ॥
सृगालायेव तुङ्गाय लब्धभङ्गाय भूपतिः ।
न तत्रागसि चुक्रोध स धैर्यसदृशाशयः ॥ ७१ ॥
किं तु खेदाय समभूत्तुङ्गायत्तत्वमीशितुः ।
परायत्ततया चित्तं पशोरप्युपतप्यते ॥ ७२ ॥
तुङ्गात्मजोपि कंदर्पसिंहः श्रीशौर्यगर्वितः ।
राज्योचितं[1] व्यवहरंस्तस्योद्वेगप्रदोभवत् ॥ ७३ ॥
गूढलेखैः क्षणे तस्मिंश्छिद्रान्वेषी स भूभुजाम्[2] ।
भ्राता विग्रहराजोपि प्रैरयत्तुङ्गमारणे ॥ ७४ ॥
कोशादिस्मरणाद्राजा चिरं दोलायमानधीः ।
अभीक्ष्णप्रेरणोद्विग्नः प्रेरकानब्रवीत्ततः ॥ ७५ ॥
एकाक्येव सपुत्रः स गोचरे नः कदाचन ।
पतेद्यदि क्षणे तस्मिन्पश्यामः किं विदध्महे ॥ ७६ ॥
अन्यथा ध्रुवमाक्षिप्तो हन्यादस्मानसौ बलात् ।
इति कालापहारार्थमुक्त्वाभूद्विरतो नृपः ॥ ७७ ॥
तावन्मात्रं वचो बीजभूतं हृदि निधाय ते ।
विधातुं तदवस्थत्वं तुङ्गस्यासन्कृतोद्यमाः ॥ ७८ ॥
षण्मासाभ्यन्तरे तुङ्गो भूपेनाकारितो गृहात् ।
ससुतो निर्ययौ दृष्टदुःस्वप्नोपि विधेर्वशात् ॥ ७९ ॥
स प्रविश्य नृपास्थानं स्थित्वा राज्ञोग्रतः क्षणम् ।
पञ्चषैः सहितो भृत्यैः प्राविशन्मन्त्रमण्डपम् ॥ ८० ॥
पश्चात्प्रविष्टास्तत्रैनं पर्वशर्करकादयः ।
अनुक्त्वापि महीपालं तुङ्गं शस्त्रैरपातयन् ॥ ८१ ॥

---

१ राजोचितं इत्युचितः पाठः । २ भूभुजम् इत्युचितः पाठः ।

मन्त्री महारथो नाम योभूच्छंकरवर्मणः ।
तद्वंश्यस्तुङ्गभृत्येषु श्लाघ्यः सिंहरथः परम् ॥ ८२ ॥
निःशस्त्रो यः क्षणे तस्मिन्परित्राणविधित्सया ।
हन्यमानस्य तुङ्गस्य पृष्ठे स्वं वपुरक्षिपत् ॥ ८३ ॥
युग्मम् ॥
तुङ्गस्य प्रथमाघाते रुद्धश्वासोभवद्भयात् ।
राजा तस्मिन्निरुच्छ्वासे सोच्छ्वासः समपद्यत ॥ ८४ ॥
आस्थानब्राह्मणस्यासीद्धर्मनाम्नः सुतोन्तिके ।
यः पापकारी तुङ्गस्य पार्थः कङ्कश्च दुर्मतिः ॥ ८५ ॥
ताभ्यामाशुविरेकिभ्यां त्राणार्थं स्वाङ्गुलीर्मुखे ।
क्षिपद्भ्यां पशुवत्तत्र शस्त्रं त्रासवशाज्जहे ॥ ८६ ॥
युग्मम् ॥
अन्तरङ्गाश्च चङ्गाद्या येभूवंस्तुङ्गमन्त्रिणः ।
तैः स्त्रीवदासितं तूष्णीं त्रस्तैः शस्त्रान्वितैरपि ॥ ८७ ॥
अज्ञाततुङ्गमृत्युभ्यस्तुमुले तत्र भूपतिः ।
तद्भृत्येभ्यः शङ्कमानो वह्निदानाहवादिकम् ॥ ८८ ॥
आश्वासाय स्वभृत्यानां छित्त्वा खड्गेन सत्वरम् ।
पातयामास तुङ्गस्य ससुतस्य शिरो बहिः ॥ ८९ ॥
युग्मम् ॥
दृष्ट्वा स्वामिशिरश्छिन्नं सैन्ये दैन्यात्पलायिते ।
भृत्यतामुज्वलीचक्रुः कतिचित्तुङ्गसेवकाः ॥ ९० ॥
भुजंगनामा सामन्तद्विजापत्यो गृहागतः ।
संग्रामराजं विदधे गेहाद्गेहं पलायितम् ॥ ९१ ॥
द्वारं कनकदण्डेन भञ्जन्नर्गलितं ततः ।
विंशतिं हतवान्योधान्स राजास्थानमण्डपे ॥ ९२ ॥

कोशाधिकारी त्रैलोक्यराजनामा हतो रणे ।
कंय्यामत्तकधात्रेयो वीरोप्यभिनवाभिधः ॥ ९३ ॥
अङ्गने त्रिंशदेकाङ्गा वीरास्तुङ्गोपजीविनः ।
श्रेणीं बबन्धुर्निहता निःश्रेणीं स्वर्गपद्धतेः ॥ ९४ ॥
संग्रामं पद्मराजाख्यः कृत्वापि निसृतोक्षतः ।
स्वामिप्रमयदुःखाग्नितापं तीर्थाश्रयाज्जहौ ॥ ९५ ॥
अन्ये लोकद्वयत्राणमित्रं शस्त्रं रणाङ्गने ।
संत्यजन्तो व्ययुज्यन्त यशसा जीवितेन च ॥ ९६ ॥
चन्दाख्यः सुभटंमन्यो दैशिकश्चार्जुनाभिधः ।
हेलाचक्रो डामरश्च त्यक्तशस्त्राः परैर्हताः ॥ ९७ ॥
लोठितावसथस्तुङ्गो लुण्ठितश्रीर्महीभुजा ।
आषाढशुक्लद्वादश्यां कथाशेषो व्यधीयत ॥ ९८ ॥
निर्द्रोहवृत्तौ भूभर्त्रा तुङ्गे सतनये हते ।
लब्धोदया व्यजृम्भन्त खलप्राया नृपास्पदे ॥ ९९ ॥
राज्ञो मनः कलुषयन्गूढपैशुन्यकर्मणा ।
यो भ्रातृभ्रातृसुतयोर्विपत्तौ हेतुतां गतः ॥ १०० ॥
स दुष्प्रवादनिर्दग्धो नागो निजकुलान्तकः ।
तुङ्गभ्राता ततो राज्ञा कम्पनाधिपतिः कृतः ॥ १०१ ॥
युगलकम् ॥
भार्या कंदर्पसिंहस्य क्षेमा परमचर्षणी ।
नागेन संगमं चक्रे रक्षसेवासितक्षपा ॥ १०२ ॥
प्रशान्ते तुमुले बिम्बा चतुर्भिर्दिवसैः सती ।
तुङ्गस्नुषा सुता शाहेः प्रविवेश हुताशनम् ॥ १०३ ॥

---

१ मय्यामत्तक इति स्यात् ।

मम्मायामवरुद्धायां कंदर्पो यावजीजनत् ।
पुत्रं विचित्रसिंहं च मातृसिंहं च विश्रुतौ ॥ १०४ ॥
गृहीत्वा तौ स्नुषां तां च मङ्खना तुङ्गवल्लभा ।
देशाद्विनिर्गता दीना राजपुर्यां स्थितिं व्यधात् ॥ १०५ ॥
युग्मम् ॥

तुङ्गस्थाने ततो राज्ञा पापो भद्रेश्वरः कृतः ।
भूतेश्वरादिदेवानां चक्रे कोशादिलुण्ठनम् ॥ १०६ ॥
कियद्विवेकवैकल्पमस्य राज्ञः प्रकाश्यताम् ।
तादृशानपि यश्चक्रे पार्थादीनधिकारिणः ॥ १०७ ॥
पार्थः परमदुर्मेधाः ख्यातो भ्रातृकलत्रगः ।
निर्विचारेण यत्तेन नगराधिकृतः कृतः ॥ १०८ ॥
वधादिपापं पार्थेन सुकृतत्यक्तचेतसा ।
पवित्रे प्रवरेशस्य रङ्गपीठे प्रवर्तितम् ॥ १०९ ॥
चक्रे लुब्धस्य भूभर्तुः पतङ्गः कृपणाग्रणीः ।
सिन्धोः सुतः कोशवृद्धिं प्रजापीडनपण्डितः ॥ ११० ॥
पुरा देवमुखाख्यस्य दिविरस्य किलाजनि ।
आपूपिकायां वेश्यायां पुत्रश्चन्द्रमुखाभिधः ॥ १११ ॥
यस्तुङ्गोपाश्रयाल्लब्ध्वा लालितत्वं महीपतेः ।
वराटकात्प्रभृत्यासीत्कोटीनां कृतसंचयः ॥ ११२ ॥
विभूतिमध्ये लुब्धस्य प्राभृतायान्यढौकितैः ।
अपूपैर्निजभृत्येषु विक्रयोभूत्कुलोचितः ॥ ११३ ॥
प्रभूताग्निररोगश्च भूत्वा लब्धोदयः पुनः ।
यो मन्दाग्निः सरोगश्च तिष्ठँल्लोकैर्व्यहस्यत ॥ ११४ ॥
एकमेवाभवद्यस्य सुकृतं मरणक्षणे ।
कोटेस्त्रिभागं यददाच्छ्रीरणेश्वरयोजने ॥ ११५ ॥

तदात्मजाः कृता नानभोगनन्दिमुखास्त्रयः ।
अधीशाः पृतनाङ्गस्य राज्ञा तुङ्गोपजीविनः ॥ ११६ ॥
हास्यं बभूव भूभर्तुस्तेषां तुङ्गपदार्पणम् ।
बन्धनं यवकाण्डीनां हेमस्थाने शिशोरिव ॥ ११७ ॥
ते तुरुष्काहवे राज्ञा तुङ्गवत्प्रहिताः पुनः ।
प्रत्यावृत्त्य ययुर्देशं निजमेव पलायिताः ॥ ११८ ॥
इत्थं मन्त्रिष्वयोग्येषु क्षान्तिशीले च भूपतौ ।
केचिदुद्रेकमभजन्दरद्दिविरडामराः ॥ ११९ ॥
सा लोठिकामठं कृत्वा लोठिका नृपतेः सुता ।
तिलोत्तमाया विदधे मातुर्नाम्ना परं मठम् ॥ १२० ॥
पापिनामपि हन्तेयं कापि सत्कर्मवासना ।
भद्रेश्वरोपि यश्चक्रे[1] विहारं सुकृतोज्ज्वलम् ॥ १२१ ॥
सत्यं विवेक्ता संग्रामराजो यो न्यायतोर्जितम् ।
निजं ब्रुवाणो द्रविणं प्रपामपि न निर्ममे ॥ १२२ ॥
श्रीलेखा पार्थिववधूः श्रीयशोमङ्गलात्मजा ।
पत्यौ शिथिलसामर्थ्ये स्वैरिणीत्वमसेवत ॥ १२३ ॥
सुतः सुगन्धिसीहस्य जयलक्ष्म्यां बभूव यः ।
वल्लभो निर्भरं देव्याः सोस्यास्त्रिभुवनोभवत् ॥ १२४ ॥
स जयाकरगञ्जादिगञ्जस्रष्टातितीक्ष्णधीः ।
कोशोपकारकृत्तस्या जारोप्यासीज्जयाकरः ॥ १२५ ॥
मयग्रामीणगञ्जादिकर्त्री संचयतत्परा ।
साभूद्भर्तुः प्रसादेन सुभगा भूरिवैभवा ॥ १२६ ॥
स चतुर्थसमाषाढप्रारम्भाहे महीपतिः ।
हरिराजाभिधं पुत्रमभिषिच्यास्तमाययौ ॥ १२७ ॥

---

१ यच्चक्रे इत्युचितः पाठः ।

सुमनःसेवितः कुर्वन्नशेषाशाप्रकाशनम् ।
ह्लादावहः स सर्वस्य चैत्रोत्सव इवाभवत् ॥ १२८ ॥
अमोघाज्ञेन तेनेमां निश्चौरां कुर्वता महीम् ।
पण्यवीथ्यां निशीथिन्यां निषिद्धा द्वारसंवृतिः ॥ १२९ ॥
अचिरस्थायिनी राज्ञस्तस्याज्ञा चिन्तितोन्नतिः ।
वन्द्या नवेन्दुलेखेव पार्थिवानामजायत ॥ १३० ॥
द्वाविंशतिमहान्युर्वीं स रक्षित्वा क्षमापतिः ।
क्षयं ययौ शुचियशाः शुचिशुक्लाष्टमीदिने ॥ १३१ ॥
प्राणिनां द्योतमानानां नक्षत्राणामिव क्षणात् ।
लक्ष्मीर्ग्रीष्मक्षपेवेयं संगता भङ्गदायिनी ॥ १३२ ॥
समन्योः स्वैरिणीवृत्तिः सुतस्य जननी निजा ।
अभिचारं चकारास्येत्यविगाना जनश्रुतिः ॥ १३३ ॥
राज्योपकरणे सज्जीकृते राज्यार्थिनी स्वयम् ।
सा राजमाता श्रीलेखा यावत्क्षात्वा समागता ॥ १३४ ॥
मिलितैस्तावदेकाङ्गैर्भ्रात्रा धात्रेयकेण च ।
सागराख्येण तत्पुत्रो बालोनन्तो नृपः कृतः ॥ १३५ ॥

युग्मम् ॥

रत्नं जिघृक्षोरन्येन हृते तत्र प्रमापणम् ।
तद्रक्षिणोहेर्लुब्धस्य पापायैव यथा किल ॥ १३६ ॥
राजमातुस्तथा राज्यलुब्धायाः पुत्रनाशनम् ।
अभूदन्यहृते राज्ये वृजिनायैव केवलम् ॥ १३७ ॥

युग्मम् ॥

सा राज्यविप्रलम्भेन तादृशा व्यथिताशया ।
व्यस्मरत्तनयस्नेहं धिग्भोगाभ्यासवासनाम् ॥ १३८ ॥

अथाजगाम स्थविरः पितृव्यो बालभूपतेः ।
राज्यं विग्रहराजाख्यो हन्तुं विततविक्रमः ॥ १३९ ॥
स लोहरात्प्रचलितो दग्ध्वा द्वारमतर्कितः ।
दिनद्वयेन सार्धेन नगरं सत्वरोविशत् ॥ १४० ॥
श्रीलेखाप्रेरिताः सेनाः प्रविष्टं लोठिकामठम् ।
उद्दीपिताश्नयस्तत्र निजघ्नुस्तं सहानुगम् ॥ १४१ ॥
मठद्वयं ततः कृत्वा स्वस्य भर्तुः सुतस्य च ।
तस्थौ व्ययवती राज्ञी राज्यद्रोहोद्यतानिशम् ॥ १४२ ॥
ततो नरपतिः किंचिच्छनैः शिथिलशैशवः ।
अतिव्ययादिव्यसनी गर्भेश्वरतयाभवत् ॥ १४३ ॥
तस्यासन्रुद्रपालाद्याः शाहिपुत्राः परं प्रियाः ।
अनल्पवेतनादानै राज्योत्पत्त्यपहारिणः ॥ १४४ ॥
कृतप्रत्यहनिर्वाहः सार्धलक्षेण भूभुजा ।
रुद्रपालो दरिद्रत्वं कदाचिदपि नात्यजत् ॥ १४५ ॥
दिद्दापालः क्षमापाललब्धया प्रतिवासरम् ।
सहस्राणामशीत्यापि शेते स्म न सुखं निशि॥ १४६ ॥
अनङ्गपालवेतालश्चक्रे क्ष्मापाललालितः ।
शश्वत्सुवर्णगीर्वाणप्रतिमापाटने मनः ॥ १४७ ॥
रुद्रपालः परित्राता धनप्राणादिहारिणाम् ।
बभूव चौरचण्डालप्रायाणां वज्रपञ्जरः ॥ १४८ ॥
कायस्था रुद्रपालाप्ताः प्रजानां पीडनं व्यधुः ।
चकारान्धमठं श्रीमानुत्पलाख्यो यदग्रणीः ॥ १४९ ॥
कियद्भूपालवाल्लभ्यमन्यत्तस्याभिधीयताम् ।
जालन्धराधिपस्येन्दुचद्रस्येन्दुमुखीं सुताम् ॥ १५० ॥

---

१ हर्तुं इत्युचितः पाठः ।

उपयेमे मनोज्ञत्वाज्ज्येष्ठामासमतिं स्वयम् ।
यया मठः स्वाभिधया विदधे त्रिपुरेश्वरे ॥ १५१ ॥
तस्याः किंचिद्वयोन्यूनां स्वसारं यो यवीयसीम् ।
अथ सूर्यमतीं देवीं भूभुजे परिणीतवान् ॥ १५२ ॥
रुद्रेण भूपतिः सख्या स कर्णसुखदायिना ।
पात्रीकृतो दुर्नयानां कर्णेनेव सुयोधनः ॥ १५३ ॥
कम्पनाधिपतिस्तत्र क्षणे त्रिभुवनो बली ।
आययौ भूपतेर्हर्तुं राज्यं संभृतडामरः ॥ १५४ ॥
आकृष्टाशेषकटके तस्मिन्योद्धुमुपागते ।
एकाङ्गाः सहयारोहा राजपक्षं न तत्यजुः ॥ १५५ ॥
असिना लङ्घयन्प्रासानमोघाञ्छाघ्यविक्रमः ।
प्रजहारानन्तदेवः स्वयं त्रिभुवनं रणे ॥ १५६ ॥
संनाहरक्षिताङ्गः स दृढप्रहृतिपीडितः ।
विदद्रौ वदनेनासृक्स्वप्रतापमिवोद्गमन् ॥ १५७ ॥
विनयच्छन्नशौटीर्यः शिशुप्रायः स भूपतिः ।
दृष्ट्वा बलमसंभाव्यं तस्मिंस्त्यक्त्वा रणं गते ॥ १५८ ॥
शमालाडामरं घ्नन्तं प्रासैरभिनवाभिधम् ।
शालास्थले व्यधाच्छाघ्यविक्रमो मोघविक्रमम् ॥ १५९ ॥
मांसासृग्वेष्टनाद्यष्टीभूतखड्गो भ्रमन्रणे ।
भुवनक्षोभकृदभूद्भैरवोनन्तभूपतिः ॥ १६० ॥
पश्यन्प्रहारलूनाङ्गानेकाङ्गान्स पदे पदे ।
निवेद्यमानानग्रस्थैर्नामग्रहणपूर्वकम् ॥ १६१ ॥
क्षितिभृज्जातदाक्षिण्यो विलम्ब्यिस्थावरे ततः ।
चाञ्चल्यमक्षपटलादेकाङ्गानां न्यवारयत् ॥ १६२ ॥

युग्मम् ॥

एवं तत्र कृतज्ञेन भृत्येभ्यः प्रतिपादिता ।
विलब्धिस्तेन दीन्नारकोटिषण्णवतेः क्रमात् ॥ १६३ ॥
राज्ञो रणान्निवृत्तस्य दुग्धसेकैः करात्सरुः ।
स्थिरग्रहद्दढः कृष्टश्चिरेणेति जनश्रुतिः ॥ १६४ ॥
अहो महत्त्वं भूभर्तुर्दीनो देशान्तरागतः ।
तादृक्त्रिभुवनो येन संविभेजे विमन्युना ॥ १६५ ॥
ब्रह्मराजाभिधस्तेन बन्धुर्गञ्जाधिपः कृतः ।
रुद्रपालकृतद्वेषो विरक्तश्चलितो ययौ ॥ १६६ ॥
सप्तभिर्म्लेच्छभूपालैः समं मिलितडामरः ।
तेनानीतो दरद्राजो यत्नादचलमङ्गलः ॥ १६७ ॥
क्षीरपृष्ठाभिधं ग्रामं प्राप्तस्य समरोत्सुकः ।
तस्याग्रं विक्रमोदग्रो रुद्रपालो विनिर्ययौ ॥ १६८ ॥
श्वो व्यवस्थापिते युद्धे सैन्याभ्यां दरदीश्वरः ।
क्रीडन्पिण्डारकाख्यस्य नागस्य भवनं ययौ ॥ १६९ ॥
दुर्नयाचरणात्तत्र पार्श्वस्थैर्वारितोपि सः ।
प्लवमानस्य मत्स्यस्य गात्रे कुन्तमपातयत् ॥ १७० ॥
अथोज्जगाम गोमायुवपुःकुण्डाद्भुजंगमः ।
स च तं मृगयौत्सुक्यादधावद्दरदीश्वरः ॥ १७१ ॥
तमापतन्तमालोक्य व्यवस्थोन्मूलनं विदत् ।
आस्कन्दाशङ्कि भूभर्तुः सैन्यं युद्धाय निर्ययौ ॥ १७२ ॥
अभूत्ततोस्त्रसंघर्षसंजातानलसंहतिः ।
कृतस्वर्गाङ्गनोद्वाहो वीराणां समरोत्सवः ॥ १७३ ॥
तस्मिन्महाभटाटोपे शिरश्छिन्नं दरत्पतेः ।
रुद्रस्य रौद्रमहसः संप्ररूढं यशः पुनः ॥ १७४ ॥

समरे वधबन्धादि म्लेच्छराजाः प्रपेदिरे ।
संप्राप हेमरत्नादि पुनः कश्मीरभूपतिः ॥ १७५ ॥
उत्तंसमुक्ताद्योताम्भःक्षालितास्त्रझलज्झलम् ।
रुद्रपालो दरद्राजशिरो भर्तुरुपानयन् ॥ १७६ ॥
भ्रात्रोदयनवत्सेन कृतप्रायैस्तथा द्विजैः ।
तथाह्येवंविधास्तस्य बभूवुरवदालिकाः ॥ १७७ ॥
रुद्रपाले ततो लूतामयेन प्रमयं गते ।
अन्येपि शाहितनयाः क्षिप्रमेव क्षयं ययुः ॥ १७८ ॥
पालस्नेहान्ध्यविगमे शुद्धाशयजुषोभवत् ।
देवी सूर्यमती भर्तुर्दर्पणस्येव बिम्बिता ॥ १७९ ॥
सुभटापरनामा सा गौरीश्वरविधायिनी ।
पुण्यं वितस्तापुलिने निर्ममे सुभटामठम् ॥ १८० ॥
गोहेमहयरत्नादिप्रदानैः सुबहून्द्विजान् ।
सदाशिवप्रतिष्ठायामदरिद्रांश्चकार सा ॥ १८१ ॥
आशाचन्द्रापराख्यस्य कल्हनस्यानुजन्मनः ।
नाम्ना व्यधायि वात्सल्यात्साग्रहारो मठस्तया ॥ १८२ ॥
सिल्हनाख्यस्य च भ्रातुर्भर्तुश्चाभिधया सती ।
मठौ चाकारयत्पार्श्वे विजयेशामरेशयोः ॥ १८३ ॥
अष्टोत्तरं चाग्रहारशतं श्रीविजयेश्वरे ।
ब्राह्मणेभ्यो महापुण्यं विद्वद्भ्यः प्रत्यपादयत् ॥ १८४ ॥
पत्युर्नाम्नाप्यग्रहारान्प्रददावमरेश्वरे ।
त्रिशूलबाणलिङ्गादिप्रतिष्ठाश्च विनिर्ममे ॥ १८५ ॥
दंपती राजराजाख्ये मृते पुत्रे प्रचक्रतुः ।
सदाशिवान्तिके राजवेश्म संत्यज्य तौ स्थितिम् ॥ १८६ ॥

ततः प्रभृति संत्यज्य पूर्वराजकुलस्थितिम् ।
तयैव रूढ्या भूपालास्तत्रैव वसतीर्व्यधुः ॥ १८७ ॥
पार्थिवस्याश्वशालीयाः प्रियवाजितया प्रियाः ।
प्रसादैर्देशलुण्ठ्या च सर्वतः समतां ययुः ॥ १८८ ॥
गर्भेश्वरतया भर्तुर्वल्लभो नर्मकोविदः ।
अलुण्ठयत्प्रजा नित्यं डल्लको नाम देशिकः ॥ १८९ ॥
मालवाधिपतिर्भोजः प्रहितैः स्वर्णसंचयैः ।
अकारयद्येन कुण्डयोजनं कपटेश्वरे ॥ १९० ॥
प्रतिज्ञा भोजराजेन पापसूदनतीर्थजैः ।
सततं वदनस्नाने या तोयैर्विहिताभवत् ॥ १९१ ॥
अपूरयत्तस्य यस्तां दुस्तरां नियमादितः ।
प्रहितैः काचकलशीकुलैस्तद्वारिपूरितैः ॥ १९२ ॥
स तस्य पद्मराजाख्यः पर्णप्रातिकदैशिकः ।
प्रियताम्बूलशीलस्य त्यागिनो वल्लभोभवत् ॥ १९३ ॥
चक्कलकम् ॥
तेन नागरखण्डादिपर्णविक्रयिणा नृपः ।
देशोत्पत्तिधनं प्रायो निःशेषं दापितस्तदा ॥ १९४ ॥
पञ्चचन्द्रकशोभाङ्कमौलिसिंहासने[1] नृपात् ।
बन्धायादत्त लब्धव्ये धने स धनिकोधिके ॥ १९५ ॥
तद्राजचिह्नमास्थानोपयुक्तं तस्य मन्दिरात् ।
आनीयमानं मासार्धवासरे मासि मास्यभूत् ॥ १९६ ॥
स्वकोशसंचयं दत्त्वा देवी सूर्यमती ततः ।
पद्मराजोद्भवां देशस्याव्यवस्थां न्यवारयत् ॥ १९७ ॥
शमिते चाश्वशालीयडल्लकादिभये तदा ।
प्रावर्तन्त पुनर्देशे व्यवस्था निरुपद्रवाः ॥ १९८ ॥

---

१ सिंहासनं इत्युचितम् ।

ततः प्रभृति राज्येव राजकार्योद्यताभवत् ।
तस्थौ शौर्यकथां त्यक्त्वा राजा कार्यकरः पुनः ॥ १९९ ॥
भर्तुर्नारीविधेयत्वं तस्या भर्तृजयस्तथा ।
निष्कलङ्केन शीलेन नान्योन्यं गर्ह्यतामगात् ॥ २०० ॥
भवभक्तिव्रतस्नानत्यागशीलादिभिर्गुणैः ।
कृतिनानन्तदेवेन मुनयोपि विनिर्जिताः ॥ २०१ ॥
राज्ये तस्य महीभर्तुर्दीर्घे तांस्तानलङ्घयत् ।
पतिंवरेव राजश्रीर्भृत्यान्नवनवोन्मुखी ॥ २०२ ॥
क्षेमाभिधो राजगञ्जपूरणं वालभञ्जकः ।
व्यधाद्धादशभागादिप्रकारैर्ढौंकयन्धनम् ॥ २०३ ॥
मन्त्री ततोभवत्साधुस्त्रैगर्तः केशवो द्विजः ।
सौधश्चन्द्रातपेनेव भूपालो येन भूषितः ॥ २०४ ॥
भ्राम्यन्गतश्रीरेकाकी स एव ददृशे जनैः ।
भाग्याम्बुवाहतडितो निविडाः कस्य संपदः ॥ २०५ ॥
युग्मम् ॥
भाग्याधीनं धनं ध्यात्वा मुधा मुग्धधियामसौ ।
कुलविक्रमयोर्दर्पो मिथ्यैव पृथुतां प्रति ॥ २०६ ॥
प्रासादपालवैश्यस्य गौरीशात्रिदशालये ।
भूतेर्हलधरो वज्रो वराहश्चाभवन्सुताः ॥ २०७ ॥
तेभ्यो हलधरः सूर्यमत्या विहितसेवनः ।
वृद्धिं दिने दिने गच्छँल्लेभे सर्वाधिकारिताम् ॥ २०८ ॥
विधेयान्बुद्धियुक्तेन कुर्वतः क्षित्यनन्तरम्[1] ।
सपत्नीकोभवत्तस्य मुखप्रेक्षी क्षमापतिः ॥ २०९ ॥

---

१ क्षित्यनन्तरान् इत्युचितः पाठः ।

क्षेमेण सूत्रितं पूर्वं सपादाग्रमुदग्रधीः।
कर्मस्थानं स्फुटीचक्रे सर्वस्थानधुरंधरम् ॥ २१० ॥
अभूद्वर्णकमूल्यादिलेखनं कनकस्य यत्।
राजायत्तं जनस्यार्थसंचयानां प्रकाशकम् ॥ २११ ॥
स तन्निवारयामास भाविनां भूभुजां विदन्।
ज्ञानी संचितवित्तस्य दण्डाद्यायासकारिताम् ॥ २१२ ॥
भर्त्सितानश्वशालीयान्धनदारापहारिणः।
कांश्चिद्यापाद्य स शमं निन्ये लोकस्य विप्लवम् ॥ २१३ ॥
तेनायासहृता नीतः कचत्स्वर्णैः सुरास्पदैः।
शोभां मठाग्रहारैश्च वितस्तासिन्धुसंगमः ॥ २१४ ॥
भ्रातरश्च सुताश्चास्य लक्ष्मीपरिचयोन्मदाः।
द्विरदा इव न क्वापि दानप्रणयितां जहुः ॥ २१५ ॥
तद्भ्रातृपुत्रो विम्बाख्यः श्रीमान्वीरो वराहजः।
द्वाराधिकारकार्यासीद्दानप्रलयवारिदः ॥ २१६ ॥
स डामरकुलाकालमृत्युः स्वल्पानुगो भवन्।
खशाहवेजहत्प्राणान्पलायनपराङ्मुखः ॥ २१७ ॥
चम्पायां सालभूपालमुन्मूल्यानन्तभूपतिः।
तत्तन्नृपजयी नव्यं धराधवमरोपयत् ॥ २१८ ॥
मन्त्रशून्येन शौर्येण परदेशेषु भूपतिः।
हठप्रवेशान्विदधत्सोभूत्कृच्छ्रगतोसकृत् ॥ २१९ ॥
तुक्कात्मजस्य कलशस्यारब्धौ खिन्नसैनिकम्।
अमोचयद्बलधरो युक्त्या वल्लापुरादमुम् ॥ २२० ॥
उरशां च प्रविष्टस्य वैरिरुद्धाध्वनो व्यधात्।
कम्पनाधिपतिस्तस्य मार्गान्संशोध्य निर्गमम् ॥ २२१ ॥

कालेनन्तमहीभर्तुर्वैरिविग्रहसंकटे ।
साहसान्युदजृम्भन्त तानि तानि क्षणे क्षणे ॥ २२२ ॥
राजेश्वरो द्वारपतिः श्रीमान्भद्रेश्वरात्मजः ।
डामरैः क्रमराज्यस्थैरन्येपि बहवो हताः ॥ २२३ ॥
वीक्ष्य नीतिदृशा कार्यं भीत्या व्यवहरन्नपि ।
भृत्यतां निष्परिभवां को भुङ्क्ते नृपमन्दिरे ॥ २२४ ॥
दुष्प्रवादास्पदीभूतो देव्या निबिडसेवनात् ।
आशाचन्द्रादिभिः क्रुद्धैर्बद्धो हलधरोप्यभूत् ॥ २२५ ॥
स राज्ञा हृतसर्वस्वो बन्धनक्लेशमन्वभूत् ।
भाग्यप्रभावे निःसारे सुखमेकान्ततः कुतः ॥ २२६ ॥
नृपेण बन्धनात्त्यक्तं तं श्रीः प्रत्यागता पुनः ।
आलिलिङ्ग सितच्छत्रलज्जास्मितसिताननना ॥ २२७ ॥
स राज्ञ्याः प्रावृष इव प्रणयेन क्षणे क्षणे ।
कोपप्रसादमेघार्कपर्यायापातमन्वभूत् ॥ २२८ ॥
ततः सरलचित्तस्य क्रमेण समपद्यत ।
भार्याजितत्वं भूभर्तुर्दुर्विपाकार्पणोन्मुखम् ॥ २२९ ॥
अधिकारपरित्यागाद्दोषाननुशयावहान् ।
वदद्भिर्वार्यमाणोपि प्राज्ञैर्हलधरादिभिः ॥ २३० ॥
पत्न्या संप्रेरितः शश्वत्तनयस्नेहमूढया ।
पुत्राय कलशायाभूद्राज्यं दातुं समुद्यतः ॥ २३१ ॥
य़ास्यस्यनुशयं राजन्नेवंवाद्यपि कारितः ।
सज्जं तेन रणादित्यनामा क्षत्ताभिषेचनम् ॥ २३२ ॥
एकान्नचत्वारिंशस्य वर्षस्य तनयः सिते ।
षष्ठेह्नि बाहुलस्याभूदभिषिक्तो महीभुजा ॥ २३३ ॥

अथास्थाने रणादित्यो राजपुत्रान्निवेशयन्[1] ।
चिन्तयन्राज्यमाहात्म्यं प्रतिपत्तिषु निष्ठुरः ॥ २३४ ॥
अनन्तो राजपुत्रोयं देवेति कथयन्वचः ।
कृकाटिकान्यस्तहस्तः क्षितिपालं न्यवेदयत् ॥ २३५ ॥
कुपितेन स भूभर्त्रा परिवृत्यावलोकितः ।
एवं कृतस्मितो व्यक्तं तमूचे नीतिनिष्ठुरः ॥ २३६ ॥
इत्थं यत्र निवेद्यन्ते कन्यकुब्जादिभूभुजः ।
तत्रैव त्यक्तराज्यस्य कान्यास्तु प्रक्रिया तव ॥ २३७ ॥
दिने दिने सानुशयो नियतं भविता भवान् ।
नाभिमानपरित्यागः कर्तुं शक्यो मुनेरपि ॥ २३८ ॥
सुदूरदर्शिनां तत्र मन्त्रिणां हृदयंगमम् ।
राजा तस्य वचः श्रुत्वा प्रतिवाक्याक्षमोभवत् ॥ २३९ ॥
दृष्ट्वान्येद्युर्नवं भूपं राजचक्रेण सेवितम् ।
नवेतरं च सहितं परिमेयैः परिच्छदैः ॥ २४० ॥
धीमान्हलधरो युक्त्या कृतकासूयया नृपम् ।
एवं निर्भर्त्सयँल्लक्ष्मीं तं प्रत्याजीहरत्पुनः ॥ २४१ ॥
विधाय निःसुखं सूनुं राज्यभारार्पणाच्छिशुम् ।
कस्मात्स्वसुखसापेक्षो न जिह्रेष्यत्र वार्धके ॥ २४२ ॥
तत्स्वयं राजकार्याणां कार्यमुद्वहनं त्वया ।
अशून्यो यौवनाभोगैरयमस्तु सुतस्तव ॥ २४३ ॥
इत्युक्त्वा स पुनर्भूपमधिकारमजिग्रहत् ।
चक्रे कलशदेवं च कलया युक्तिवञ्चितम् ॥ २४४ ॥
पित्रोरेवान्तिके कुर्वन्नाहाराद्यापि संततम् ।
ततो बभूव कलशो नाममात्रमहीपतिः ॥ २४५ ॥

---

१ निवेदयन् इत्युचितम् ।

सर्वास्थानास्त्रपूजादिविधाने पार्थिवोचिते ।
पितुः सहायकल्पः स पौरोहित्यमिवाकरोत् ॥ २४६ ॥
अनिमित्तप्रहृष्टानामनिमित्तानुतापिनाम् ।
न क्वापि चलचित्तानां तिरश्चामिव निश्चयः ॥ २४७ ॥
दापयित्वा पतिं राज्यं निर्बन्धेनापि तावता ।
सूनौ बभूव यद्राज्ञी क्षिप्रमेवानुतापिनी ॥ २४८ ॥
सेर्ष्या स्नुषाणामुत्कर्षे पार्थिवप्रमदोचितम् ।
वेषालंकरणादौ सा रूक्षचित्ता न चक्षमे ॥ २४९ ॥
दासीकृत्यं तया पुत्रमहिष्यः कारिताः सदा ।
गृहोपलेपने यावन्न वैमुख्यमदर्शयन् ॥ २५० ॥
पुत्रो विग्रहराजस्य क्षितिराजाभिधस्ततः ।
राज्ञः पितृव्यजो भ्राता कदाचित्पार्श्वमाययौ ॥ २५१ ॥
तस्मै न्यवेदयत्खेदं स चित्तस्योपतापकम् ।
पुत्रे भुवनराजाख्ये राज्यलुब्धेतिविश्रुते ॥ २५२ ॥
स हि तस्यात्मजो नीलपुराराज्यं समाश्रितः ।
तद्बलैः पितुरारब्धि विधातुं सोद्यमोभवत् ॥ २५३ ॥
नाम भागवतानां च पूज्यानां स्वपितुर्व्यधात् ।
दत्तयज्ञोपवीतानां शुनामशुचिमानसः ॥ २५४ ॥
क्षितिराजः स्ववध्वां च विरुद्धायां विशुद्धधीः ।
मनस्तापापहे चक्रे सर्वत्यागामृते स्पृहाम् ॥ २५५ ॥
राज्यं कलशपुत्राय ज्येष्ठानन्तरजन्मने ।
रामलेखाभिधानायां राज्ञ्यां जाताय सत्वरम् ॥ २५६ ॥
दत्त्वा स्तनंधयायापि तदोत्कर्षाभिधाय सः ।
राजर्षिर्विबुधैः सार्धं विदधे तीर्थसेवनम् ॥ २५७ ॥

भुक्त्वा शमसुखं भूरीन्वर्षान्परमवैष्णवः ।
स चक्रायुधसायुज्यं ययौ चक्रधरे सुधीः ॥ २५८ ॥
स च भोजनरेन्द्रश्च दानोत्कर्षेण विश्रुतौ ।
सूरी तस्मिन्क्षणे तुल्यं द्वावास्तां कविबान्धवौ ॥ २५९ ॥
पितुः पितृव्यजाद्भ्रातुर्जातस्यानन्तभूभुजा ।
तन्वङ्गराजस्योत्सङ्गे नप्ता न्यासीकृतः शिशुः ॥ २६० ॥
तन्वङ्गोपि विवृद्धिं तन्नीत्वा राष्ट्रं शिशुं च तम् ।
पुनः प्रविष्टः कश्मीरानस्तं चक्रधरे ययौ ॥ २६१ ॥
सर्वसाधारणीभूतभोगानां राजवीजिनाम् ।
तावज्ज्ञातेयमभवन्नेह द्रोहकलङ्कितम् ॥ २६२ ॥
इन्दुराजात्मजात्सिद्धराजो यो बुद्धराजतः ।
जातो मदनराजाख्यं वीरं पुत्रमजीजनत् ॥ २६३ ॥
अत्युत्सिक्तः सुतस्तस्य दरन्नृपतिमण्डलात् ।
विधुरे राज्ञि निर्यातः शौर्योद्रेकादखण्डितः ॥ २६४ ॥
तदानीं जिन्दुराजाख्यो डामरोद्रेकखिन्नया ।
राज्ञ्या स्वयं गृहं नीत्वा साचिव्यं ग्राहितोभवत् ॥ २६५ ॥
काणः शोभाभिधस्तेन गाढोद्वेगावहः प्रभोः ।
देग्रामस्थो डामरोथ दत्त्वास्कन्दं निपातितः ॥ २६६ ॥
कम्पनाधिपतां दत्त्वा ततस्तस्य प्रतापिनः ।
पार्थिवो राजपुर्यादीन्देशांश्चक्रे करप्रदान् ॥ २६७ ॥
अनन्तभूभुजो राज्ये तत्तत्स्खलितसंकटे ।
आलम्बयष्टिप्रतिमो ययौ हलधरः क्षयम् ॥ २६८ ॥
मुमूर्षुणा चक्रधरे तेन पार्श्वस्थितो नृपः ।
सजानिरुपदेशार्थी स तदेत्थमकथ्यत ॥ २६९ ॥

मा कार्ष्ट परराष्ट्रेषु रभसारब्धिसाहसम् ।
युक्त्या वल्लापुरादौ वो व्यपोढं व्यसनं मया ॥ २७० ॥
विशङ्को जिन्दुराजोयं पराध्यां वृद्धिमागतः ।
भेदं वः सह पुत्रेण जयानन्दो विधास्यति ॥ २७१ ॥
कथितं तेन तत्स्मृत्वा जिन्दुराजं महौजसम् ।
विज्ञेनाबन्धयद्राजा युक्तिमांस्त्याजितायुधम् ॥ २७२ ॥
अथ कालेन कलशक्ष्माभृत्कलुषिताशयः ।
भृत्यैरसाधुसंसेव्ये प्रसक्तिं ग्राहितोध्वनि ॥ २७३ ॥
तस्याभवद्विज्ञपित्थराजपाजादयः प्रियाः ।
उत्सेकदा राजपुत्राश्चत्वारः शाहिवंशजाः ॥ २७४ ॥
पुत्रो गञ्जपतेर्नागनाम्नो निकटसेवकः ।
सोपि तस्य जयानन्दः कौटिल्याध्यापकोभवत् ॥ २७५ ॥
द्विजेन्द्रेमरकण्ठे तु याते शिवसमानताम् ।
राजा प्रमदकण्ठस्य ययौ तज्जस्य शिष्यताम् ॥ २७६ ॥
दुःशीलस्य प्रकृत्यैव तस्याकृत्योपदेशकृत् ।
गम्यागम्यविचारस्य परिहर्ताभवद्गुरुः ॥ २७७ ॥
गुरोर्गतविकल्पत्वं तस्यान्यत्किमिवोच्यताम् ।
त्यक्तशङ्कः प्रववृते स्वसुतासुरतेपि यः ॥ २७८ ॥
महासमयसंचारचतुरैर्यैरभीतितः ।
गण्यते स्वप्रभावोग्रैर्भैरवोपि न निर्भयैः ॥ २७९ ॥
ते भट्टपादास्त्रासेन पतिता भग्नजानवः ।
विडालवणिजा स्वस्थाः शिरोहस्तार्पणैः कृताः ॥ २८० ॥
पुरा कृष्णविडालाङ्को वणिक्कश्चिदिहाभिधाम् ।
विडालवणिगित्यात्मनामविस्मारिकां दधे ॥ २८१ ॥

---

१ तस्याभवन् इत्युचितः पाठः ।

योव्याजमूर्खो वैद्यत्वगुरुत्वाहंकृतः क्रमात् ।
पंदकृद्रजकादीनां शिल्पिनां गुरुतामगात् ॥ २८२ ॥
स भट्टपादानुल्लाघांश्चक्रे मूर्ध्न्यधिरोपयन् ।
श्रेष्ठी विडालविष्ठौघहिङ्गुगन्धोत्कटं करम् ॥ २८३ ॥
एवं प्रकृतिनिःसारैरपि गर्जद्भिरन्वहम् ।
आन्ध्यं स गुरुभिर्निन्ये दिवसोम्बुधरैरिव ॥ २८४ ॥
ये दीर्घजागरा रात्रौ भूरिभोजनसेविनः ।
अजीर्णपिशितोद्गारनित्यदुर्गन्धकंधराः ॥ २८५ ॥
अवस्करप्रणालाभाः पृष्ठे क्षिप्तमधःपथैः ।
शौचपाथ इव क्षिप्रमुज्झन्ति मधुनिर्झरम् ॥ २८६ ॥
नक्तमातोद्यवाद्यज्ञैस्तैः सार्धं कृतसेवनः ।
चारणो वेणुवाद्यज्ञो योषितां[2] धर्षयन्हठात् ॥ २८७ ॥
कनकाख्ये मदोद्दामे क्रुद्धे हलधरात्मजे ।
स्तम्भे निबध्य तद्भृत्यैश्छिन्ननासो व्यधीयत ॥ २८८ ॥
यो विटश्चमको नाम लूनाङ्गोमङ्गलावहः ।
शनैर्लेभे स वात्सल्यं कौट्टन्यान्नवभूपतेः ॥ २८९ ॥
प्रसादवित्तो भूभर्तुरन्तरे मन्त्रिणामपि ।
लब्धप्रतिष्ठः स प्राप ठक्कुराख्यां नृकुक्कुरः ॥ २९० ॥
प्रथां प्राप्तस्त्रपाहेतुं स भञ्जन्वंशमञ्जसा ।
प्रागेव नासावंशस्य भञ्जनं बह्वमन्यत ॥ २९१ ॥
तेनोद्दीपितदौःशील्यः स यच्चक्रे त्रपोज्झितः ।
अवाच्यमपि वृत्तान्तं मध्यपातात्तदुच्यते ॥ २९२ ॥
कल्हनाख्या स्वसा राज्ञो नागाख्या च तदात्मजा ।
परदारप्रसक्तेन संभोक्तुं नावशेषिता ॥ २९३ ॥

---

१ पादूकृत् इति पाठो भाति । २ योषितो इति स्यात् ।

तमुदन्तं सपत्नीको बुद्धवान्वृद्धभूपतिः ।
न प्रत्यभैत्सीन्नपया तस्थौ तु निभृतव्यथः ॥ २९४ ॥
भिक्षुको धान्यमुष्टीनामोवनाग्रामजो द्विजः ।
योप्यभूद्ग्रामदैवज्ञो वैधेयो लोष्टकाभिधः ॥ २९५ ॥
स ग्रामक्षेत्रपालस्य प्रसादात्पर्यटन्निशि ।
वस्तूनां मुष्टिबद्धानां विज्ञानान्मुष्टिलोष्टकः ॥ २९६ ॥
परां प्रसिद्धिं संप्राप्तो नवक्ष्मापस्य रागिणः ।
आसीद्गुरुत्वकौट्टन्यदैवज्ञत्वैरतिप्रियः ॥ २९७ ॥

तिलकम् ॥

भट्टारकमठाधीशः साधुर्व्योमशिवो जटी ।
खुर्खुटाख्याधिकरणे गृहीतनियतव्रतः ॥ २९८ ॥
अन्धगान्धर्विकान्मम्मनाम्नः स्वार्चनसेवकात् ।
अवन्तिपुरजं हस्तग्राहकद्विजचेलकम् ॥ २९९ ॥
परिभ्रष्टमुपादत्त लालितत्वेन यं पुरा ।
स तेन वारिताशस्तभङ्गासूत्रमयाम्बरः ॥ ३०० ॥
विसृज्यमानः पुष्पाणि ग्राहयित्वा नृपान्तिकम् ।
मदनो नाम वाचालः प्रपेदेत्यन्तरङ्गताम् ॥ ३०१ ॥
शनैः कौट्टन्यदुर्गोष्ठीमध्यपातं समाश्रयन् ।
.... ॥ ३०२ ॥

चर्कलकम् ॥

तैश्चान्यैश्च विटैश्चाटुकारैः क्षिप्रविमोहितः ।
दोषानपि गुणान्मेने कलशः कलुषीकृतः ॥ ३०३ ॥
नर्म ह्रेपणकारि वाक्यमुचितं कृत्यं प्रजापीडनं
तेजस्वित्वमलज्जता सरसतागम्याङ्गनासंगमः ।

---

१ कुलकम् इति स्यात् ।

सारल्यं खलगालिदानसहनं येषां न तत्संनिधौ ।
किंचित्कर्म कुकर्मदोष इति यद्विज्ञाय संत्यज्यते ॥ ३०४ ॥
राजा चौर्यरतौत्सुक्यात्प्रतिगेहं परिभ्रमन् ।
स्वदारालिङ्गनैः प्रीतिं क्षणदासु न लब्धवान् ॥ ३०५ ॥
पारतन्त्र्यकृतापारप्रीतिः परवधूरतिः ।
अभिलाषानलोत्सेके रागभाजां घृताहुतिः ॥ ३०६ ॥
तान्कुट्टनान्पुरस्कृत्य पञ्चषानेकदा नृपः ।
जिन्दुराजगृहं प्रायात्स रात्रौ चौर्यकामुकः ॥ ३०७ ॥
तत्रासीज्जिन्दुराजस्य स्नुषा परमपुंश्चली ।
स्वगृहे दत्तसंकेता नक्तं कलशभूभुजः ॥ ३०८ ॥
प्रविशन्तमधावंस्तं भषद्भिः सूचितं श्वभिः ।
धृतासयो गृहद्वारं चण्डालाश्चौरशङ्किताः ॥ ३०९ ॥
तान्हन्तुमुद्यतान्दृष्ट्वा तं क्षितौ पतितं भयात् ।
पृष्ठन्यस्तस्ववपुषो ररक्षुरनुयायिनः ॥ ३१० ॥
तेभ्यः स मुष्टिघातादि ददद्भ्यः कथमप्यभूत् ।
मैवं कलशदेवोयमित्युक्त्वा त्याजितो निजैः ॥ ३११ ॥
घ्राणहीनं पुरस्कृत्य नारीमभिससार यत् ।
तदेव कामिनस्तस्य नूनमासीदमङ्गलम् ॥ ३१२ ॥
स निर्यातो गृहात्कान्ताकटाक्षविवशीकृतः ।
पथि कालीकटाक्षाच्च दैवान्न प्रलयं ययौ ॥ ३१३ ॥
निजचित्तापराधेन कुर्वन्नीतिव्यतिक्रमम् ।
अस्पृश्येभ्यः परिभवं भूपालोप्युपलब्धवान् ॥ ३१४ ॥
इन्द्रियैरिन्द्रचन्द्राद्या ह्येपिता यैः सुरा अपि ।
अपरिम्लानमानत्वं तैर्मर्त्यस्याथवा कथम् ॥ ३१५ ॥

प्रागुन्मीलति दुर्यशः सुविषमं गर्ह्योभिलाषस्ततो
धर्मः पूर्वमुपैति संक्षयमथो श्लाघ्योभिमानक्रमः ।
संदेहं प्रथमं प्रयात्यभिजनं पश्चात्पुनर्जीवितं
किं नाभ्येति विपर्ययं विगलने शीलस्य चिन्तामणेः॥३१६॥
राजधानीमवाप्तस्य दुःशीलस्य महीपतेः ।
क्षपायामेव तां वार्तां पितरावधिजग्मतुः ॥ ३१७ ॥
तौ रुदित्वा सुतस्नेहलज्जाशोकान्वितौ चिरम् ।
निश्चयं बन्धने तस्य सदोषस्य प्रचक्रतुः ॥ ३१८ ॥
सर्वविद्यानिधिं ज्येष्ठं नप्तॄणां वप्पिकात्मजम् ।
हर्षे राज्ये चिकीर्षूं च निन्यतुस्तां निशीथिनीम् ॥ ३१९ ॥
आकारितस्ततस्ताभ्यां प्रातः कलशभूपतिः ।
ऊचे विज्जजयानन्दौ साशङ्को जनकाद्भयम् ॥ ३२० ॥
तन्मतेन जयानन्ददत्तहस्तः कथंचन ।
अन्वीयमानो विज्जेन स पित्रोः प्राविशद्गृहम् ॥ ३२१ ॥
पिता प्रविष्टमात्रं तं वक्रे दत्तचपेटकः ।
अभाग्यभागिञ्जहिहि क्षुरिकामित्यथाब्रवीत् ॥ ३२२ ॥
एनं त्रासविसूत्राङ्गसंधिमालम्ब्य पाणिना ।
सावष्टम्भं स्पृशञ्शस्त्रं विज्जो राजानमब्रवीत् ॥ ३२३ ॥
राजन्मानवतां धुर्यो भवन्नपि भवान्कथम् ।
नात्याज्यं मानिनां वेत्ति मानग्रहमहाव्रतम् ॥ ३२४ ॥
गृहीतवेतनेनायं राजपुत्रेण शस्त्रिणा ।
संकटेस्मिन्मया स्वामी जीवता त्यज्यते कथम् ॥ ३२५ ॥
पिता भवानयं पुत्रः क्षणेन्यस्मिन्महीपते ।
मय्यसंनिहितेमुष्य यद्योग्यं तद्विधीयताम् ॥ ३२६ ॥

मुग्धं विमोह्य नृपतिं वचोभिः स्निग्धकर्कशैः ।
विज्ञः स्वामिनमादाय निराक्रामत्तदन्तिकात् ॥ ३२७ ॥
विज्ञस्यापूजयन्धीरास्तद्धैर्यमतिमानुषम् ।
अनन्तदेवस्याप्यग्रे यदेवं स व्यजृम्भत ॥ ३२८ ॥
चण्डी नरपतेः पत्नी भाव्यर्थबलवत्तया ।
अत्याज्यजपमौनस्था तस्मिन्नवसरेभवत् ॥ ३२९ ॥
सा चेदासिष्यतोद्युक्ता नाभविष्यत्तदेतरत् ।
नियमात्सर्वनाशाद्वा बन्धनात्कलशस्य वा ॥ ३३० ॥
ततो विज्ञेन कलशः सत्वरेण प्रवेशितः ।
त्रस्यन्दिल्लाभिधानाया वल्लभाया निवेशनम् ॥ ३३१ ॥
शिरोर्तिरस्य संजातेत्युक्त्वा भीतं पतिं व्यधात् ।
सा प्राज्ञा ज्ञातवृत्तान्ता तैलेनाभ्यक्तमस्तकम् ॥ ३३२ ॥
व्याजेन तेन सर्वस्य संप्रवेशं निषिध्य सा ।
पतिं जुगोप विन्यस्य विज्ञं द्वारस्य रक्षणे ॥ ३३३ ॥
ततः समाधेर्विरता राज्ञी निर्भर्त्स्य भूपतिम् ।
कुशलान्वेषणमिषात्तनयस्यान्तिकं ययौ ॥ ३३४ ॥
बन्द्धुं व्यद्धोद्यमो राजा तथैव प्रययौ यदा ।
दत्तप्रवेशो विज्ञेन तदैकाक्येव सोभवत् ॥ ३३५ ॥
निषेधादनुगन्तॄणां ततः क्रुद्धो धराधवः ।
रुषित्वा विजयक्षेत्रं गन्तुं प्रावर्ततोद्धतः ॥ ३३६ ॥
तं प्रयान्तं सपत्नीकं प्राप्तं पद्मपुरान्तिकम् ।
अवोचन्नेत्य तत्रस्था विश्शावट्टादयो द्विजाः ॥ ३३७ ॥
अधिकारं स्वयं त्यक्त्वा राजन्किमनुतप्यसे ।
कृतस्यानुशयो युक्तो न सतो नासतोपि वा ॥ ३३८ ॥

न च ते दुर्मतौ त्यक्ताः प्रजा एता मयेत्यपि ।
ध्वात्वा सूनोः समुचिता कर्तुं दुष्टस्य वाच्यता ॥ ३३९ ॥
न यत्रपुत्रकस्येव शक्तिः कापि हि भूभुजः ।
भवेत्साधुरसाधुर्वा स प्रजानां शुभाशुभैः ३४० ॥
उज्झन्ति यत्पयोवाहा जलानि तडितोथवा ।
वनस्पतीनां सदसत्कर्मपाकस्य तत्फलम् ॥ ३४१ ॥
यच्चापथस्थितं पुत्रं त्यक्त्वेच्छस्यासितुं सुखम् ।
कोशं त्यक्त्वा प्रस्थितस्य घटते तत्कथं तव ॥ ३४२ ॥
धाराधिरूढसामर्थ्यः सद्वंशः शुचिमानपि ।
संस्पृश्यते क्षीणकोशः कृपाण इव कैः पुमान् ॥ ३४३ ॥
श्रुत्वेत्यैच्छन्नृपो यावत्प्रत्यावृत्तिं विचारवान् ।
तावत्स पुत्रेणाभ्येत्य सभार्येण प्रसादितः ॥ ३४४ ॥
अथ प्रविश्य नगरं स प्रमादापवर्जिताम् ।
अशान्तमन्युरादाय लक्ष्मीं भूयो विनिर्ययौ ॥ ३४५ ॥
हयायुधतनुत्रादि स्वयं स्वीकृत्य निर्गतः ।
देवीं प्रतीक्षमाणोस्थात्सरित्पारे ततः क्षणम् ॥ ३४६ ॥
नानाप्रकारानारोप्य कोशान्नौषु नृपाङ्गनाः ।
नायःशङ्कूनपि गृहे निर्यान्त्यः पर्यशेषयन् ॥ ३४७ ॥
अज्ञातवार्तः प्राक्तूष्णीं तत्प्रस्थानेभवज्जनः ।
ज्ञातवार्तस्तदा त्वासीदाक्रन्दमुखराननः ॥ ३४८ ॥
प्रतिमोक्तुं पुरे ताभ्यां दत्तपुष्पाञ्जलौ जनः ।
वाष्पबिन्दुमिषादौज्झीद्दीर्घानर्घकणानिव ॥ ३४९ ॥
हा मातर्हा पितः क्वेत्थं गच्छतः परिदेवितात् ।
इत्यस्मादपरः शब्दो मार्गेषु न तदा श्रुतः ॥ ३५० ॥

मार्गेन्तरान्तराक्रन्दविरतौ निर्झरध्वनिः ।
शैलानां शोकनिःश्वासशूत्कार इव शुश्रुवे ॥ ३५१ ॥
तयोराक्रन्दितैः शश्वत्पथि संजातसंस्तवौ ।
कर्णौ शून्येप्यशृणुतामाक्रन्दितमिवासकृत् ॥ ३५२ ॥
पुत्रागसा तादृशौ तौ दृष्ट्वा मार्गे द्रुमौकसाम् ।
खगानां शावभरणमपि लोको व्यगर्हत ॥ ३५३ ॥
तयोः पुत्रानयोत्तप्तचेतसोर्विजयेश्वरः ।
मनःप्रसादं संदृष्टः स्निग्धबन्धुरिवाकरोत् ॥ ३५४ ॥
तत्तत्र भाण्डागाराश्वभृत्याद्यावसथार्पणैः ।
संविधानक्रियाभिश्च व्यग्रयोरगमद्दिनम् ॥ ३५५ ॥
देशे कोशोपकरणपूर्णगोणीगणावृते ।
आसन्निन्धनगण्डालीछन्नरथ्या इवापणाः ॥ ३५६ ॥
तन्वङ्गराजतुङ्गादिज्ञातिपुत्रा नृपात्मजाः ।
तं सूर्यवर्मचन्द्राद्या डामराश्चानुवव्रजुः ॥ ३५७ ॥
डामरान्क्षीरभूपादीन्राजा नौनगरादिषु ।
स्थानेषु स्वेषु निक्षिप्य रक्षित्वे गुप्तिमानभूत् ॥ ३५८ ॥
विश्रान्तसर्वचित्तस्य[1] श्रीमतोनन्तभूपतेः ।
प्रावर्तन्तोत्सवैर्गन्तुं दिनानि विजयेश्वरे ॥ ३५९ ॥
राजपुत्रहयारोहशस्त्रिडामरमण्डलैः ।
कृत्स्नैरेव स्थितिर्वद्धा सविधे वृद्धभूभुजः ॥ ३६० ॥
वत्सरे पञ्चपञ्चाशे ज्येष्ठे मासि विनिर्गतः ।
आसाद्य विजयक्षेत्रं स स्वर्गसुखमन्वभूत् ॥ ३६१ ॥
कलशस्तु गते राज्ञि प्राप वीतवसुं महीम् ।
रक्षाहौ चलिते यातरत्नां निधिमहीमिव ॥ ३६२ ॥

---

१ चिन्तस्य इति पाठः स्यात् ।

स्वराज्यमुज्ज्वलीकर्तुं रिक्तोपि विहितोद्यमः ।
चक्रे संमन्त्र्य विज्ञाद्यैः संमतानधिकारिणः ॥ ३६३ ॥
तेन सर्वाधिकारेषु जयानन्दो नियोजितः ।
द्वारे वराहदेवश्च वितस्तात्रपुरोद्भवः ॥ ३६४ ॥
यो ह्यम्बराधिकार्यासीज्जिन्दुराजस्य कम्पने ।
राज्ञा विजयमित्रः स कम्पनाधिपतिः कृतः ॥ ३६५ ॥
यथाधिकारमन्यांश्च विनिधायाधिकारिणः ।
राजार्थचिन्तामारेभे संरब्धः पितृविग्रहे ॥ ३६६ ॥
जयानन्दः पदातीनां चिकीर्षुरथ संग्रहम् ।
यत्नादनुचितेभ्योपि धनिकेभ्योग्रहीद्दणम् ॥ ३६७ ॥
स्वीकृत्य पत्तीन्विज्ञादिराजपुत्रगणान्वितः ।
अथावन्तिपुरं प्राप योद्धुं वृद्धनराधिपम् ॥ ३६८ ॥
अभ्यर्थ्य करितो वेलां राज्ञा काराविनिर्गतः ।
शिमिकावर्त्मना योद्धुं जिन्दुराजो विनिर्ययौ ॥ ३६९ ॥
तेषामुद्योगमाकर्ण्य क्रुद्धा वृद्धमहीभुजम् ।
स्वे डामराश्ववाराद्याः संरम्भादुपतस्थिरे ॥ ३७० ॥
अजायत न्यस्तगुडक्रीडत्तुरगमण्डला ।
शस्त्रैः सव्राटवी कृत्स्ना संकटा विजयेश्वरे ॥ ३७१ ॥
ततः सूर्यमती यत्नात्पतिं परमकोपनम् ।
ययाचे पुत्रवात्सल्यादयुद्धं दिवसद्वयम् ॥ ३७२ ॥
अत्याप्तानथ मय्यादीन्द्विजान्निशि विसृज्य सा ।
तन्मुखेनातिवात्सल्यादिदमूचे रहः सुतम् ॥ ३७३ ॥
विनाशशंस्ययं पुत्र कस्ते मतिविपर्ययः ।
तीव्रशौर्येण पित्राद्य यदेवं योद्धुमिच्छसि ॥ ३७४ ॥

यस्य भ्रूभङ्गमात्रेण दरद्राजादयो हताः ।
तत्प्रकोपानले कस्मादीहसे शलभायितुम् ॥ ३७५ ॥
अस्मिंस्तु वीतिमारूढे वीतिहोत्रसमे नृपे ।
कस्त्राता स्यात्त्वदीयानां तृणानामिव शस्त्रिणाम् ॥ ३७६ ॥
सेनाङ्गैः कतमैः केन शौर्येण कतमैर्धनैः ।
भवाञ्शक्तिमतां धुर्यो योद्धुमेनं प्रधावति ॥ ३७७ ॥
दैवात्संत्यक्तमेतेन भुङ्क्ष्व राज्यमखण्डितम् ।
पित्रा तीर्थोपविष्टेन किमिवापकृतं तव ॥ ३७८ ॥
द्वैधेच्छुभिः पात्यमानो व्यसनेस्मिन्सुदारुणे ।
प्रयास्यसि दिनैरेव रिक्तोप्यत्यन्तरिक्तताम् ॥ ३७९ ॥
नय सेनाः पितुर्भीतिर्जीवन्त्यां मयि नास्ति ते ।
ऋजुमेनं नयस्वार्द्रं प्रत्युतानुनयोक्तिभिः ॥ ३८० ॥
इति दूतमुखैर्गूढं पुत्रो मात्रा कृतार्थनः ।
सर्वाशाभ्योनयत्सैन्यं रात्रावेव निजान्तिकम् ॥ ३८१ ॥
श्रुतापसारं सैन्यानां दूतैश्चैत्यपसादितम् ।
उपालेभे पतिं प्रातर्धृष्टा प्रत्युत वल्लभा ॥ ३८२ ॥
राज्ञ्या मिथस्तयोरेवं शमिताक्षेपयोरपि ।
पिशुनप्रेरणात्प्राप कालुष्यं धीः क्षणे क्षणे ॥ ३८३ ॥
वैरस्य रूपमेतद्धि भेदं याति मुहुर्मुहुः ।
संधीयमानमपि यत्क्लिन्नाम्बरमिवाशयम् ॥ ३८४ ॥
बाह्याल्यादौ सुतोदन्तं श्रुत्वा तप्ताशयो नृपः ।
गृहं प्रविष्टो धृष्टस्त्रीभापितैर्जडतां ययौ ॥ ३८५ ॥
एवं प्रतिदिनं तप्तस्त्यक्तापः प्रतिक्षपम् ।
स्वच्छाशयः शरत्तुच्छतडाकौपम्यमाययौ ॥ ३८६ ॥

चकार पितृपक्षाणां पुत्रो वेश्मादिनाशनम् ।
पिता तु पुत्रपक्षाणां न किंचित्स्त्रीवशीकृतः ॥ ३८७ ॥
पुत्रस्नेहान्धया पत्न्या बाधितैश्चानुयायिभिः ।
रूक्षोक्तिभिस्ताप्यमानस्तस्थौ दुःस्थः सदा नृपः ॥ ३८८ ॥
राज्यं जिहीर्षुः पुत्रस्य निःशूरं तद्बलं विदन् ।
ईषत्स जिन्दुराजस्य गणनां पौरुषेकरोत् ॥ ३८९ ॥
पुत्राज्जिहीर्षुणा राज्यं तेन तन्वङ्गनन्दनाः ।
प्रार्थ्यन्ते स्म तदा राज्यकृतये तत्पराङ्मुखाः ॥ ३९० ॥
संप्रेर्य तं तदा रात्रौ स्वान्वयाशर्मशङ्किनी ।
हर्षे देवी नृपं कर्तुं दूतैराहूतवत्यभूत् ॥ ३९१ ॥
स पितामहयोर्दूतैराहूतः साहसोन्मुखः ।
बाह्याल्यां निर्गतः सज्जै रक्ष्यमाणोपि रक्षिभिः ॥ ३९२ ॥
दत्तपार्ष्णिकषाघातः क्षणार्धेनोदलङ्घयत् ।
मनोजवेनाभग्नौजा वाजिना पञ्चयोजनीम् ॥ ३९३ ॥
वाजिनं विजिताभ्यासमनुगन्तुं समुद्यताः ।
अगच्छन्बहवो मार्गे दीनाः सेनाह्वयाः श्रमम् ॥ ३९४ ॥
प्राप्तस्य पादयोस्तस्य पतितस्य पितामहौ ।
आनन्दाश्रुजलस्यन्दैरभिषेकं प्रचक्रतुः ॥ ३९५ ॥
पुत्रे तन्निकटं प्राप्ते कलशः कम्पिताशयः ।
अप्रियाचरणात्पित्रोः संधित्सुः स न्यवर्तत ॥ ३९६ ॥
स तस्य नगरात्पत्नीः पार्श्वे प्राज्ञो व्यसर्जयत् ।
अकरोद्विप्लुते राष्ट्रे स्वभेदस्याप्रकाशनम् ॥ ३९७ ॥
एवं प्रवर्तमानेपि वैरे कलशभूपतिः ।
कंचित्कालं मते मातुरवर्तिष्ट मनागिव ॥ ३९८ ॥

खशालाः कलशादेशाद्धियासोः कम्पनापतेः ।
तया प्रावर्तितनतेर्मार्गं संत्याजितः पतिः ॥ ३९९ ॥
अत्रान्तरे शमयितुं वैरं देशोपघातकृत् ।
तावुद्दिश्य पितापुत्रौ द्विजाः प्रायं प्रचक्रिरे ॥ ४०० ॥
संधिबन्धे समुत्पन्ने ततस्तदनुरोधतः ।
दंपती संप्रविष्टौ तौ सार्धं मासद्वयं पुरम् ॥ ४०१ ॥
जयानन्दादिबुद्ध्याथ बुद्ध्वा बन्धोद्यतं सुतम् ।
भूयोपि ययतुः खेदान्निर्गत्य विजयेश्वरम् ॥ ४०२ ॥
तस्याश्वघासकूटानि पुत्रो रात्रावदाहयत् ।
व्यापादयत्पदातींश्च विषशस्त्राग्नियुक्तिभिः ॥ ४०३ ॥
तया[1] प्रवर्धमानेपि विरोधे सत्यरोधयत् ।
वात्सल्यविवशा राज्ञी भर्तुः प्रतिचिकीर्षितम् ॥ ४०४ ॥
लुङ्डाभिधाभूत्कैवर्तबन्धकी तद्विधेयधीः ।
थक्कडामरनामा च तज्जारः खलतिस्तदा ॥ ४०५ ॥
स तन्नाम्नैव दुष्टात्मा कथ्यमानौ समीपगैः ।
शुश्राव पितरौ नित्यं लीलास्मितसिताननः ॥ ४०६ ॥
युग्मम् ॥
तौ दंपती पुनर्हेमतुलापुरुषयुग्मदौ ।
चित्राभिर्धर्मचर्याभिर्मनस्तापममुञ्चताम् ॥ ४०७ ॥
यदा पुनस्तयोर्दार्ढ्यमाढ्यत्वान्न व्यहीयत ।
तदा सेर्ष्यः स दुष्पुत्रो रात्रौ वह्निमदापयत् ॥ ४०८ ॥
तेनाग्निनोर्वरीशस्य सर्वोपकरणैः समम् ।
भस्मावशेषमभवद्विजयेश्वरपत्तनम् ॥ ४०९ ॥

---

१ तथा इत्युचितः पाठः ।

सर्वनाशशुचा दीना राज्ञी मर्तुं समुद्यता ।
तन्वङ्गपुत्रैश्चकृषे कथंचिज्ज्वलतो गृहात् ॥ ४१० ॥
त्यक्त्वांशुकानि शय्याभ्यो निशायां सुप्तमुत्थितम् ।
निःशेषं राजसैन्यं तदजायत दिगम्बरम् ॥ ४११ ॥
तद्राजधानीसौधाग्रात्पश्यन्कलशभूपतिः ।
तोषादनृत्यज्ज्वालौघैर्गगनालिङ्गिभिः समम् ॥ ४१२ ॥
अतरन्नष्टसर्वस्वः स पारं सरितो नृपः ।
निममज्ज सजानिस्तु दुस्तरे शोकसागरे ॥ ४१३ ॥
संप्राप्य प्रातरप्युष्टं रत्नलिङ्गं नृपाङ्गना ।
व्यक्रीणाल्लक्षसप्तत्या जाकानां पूर्वमीयुषाम् ॥ ४१४ ॥
क्रीत्वा तत्प्रददौ पूर्वं भृत्यानां भोजनांशुके ।
धनेन तेन निर्दग्धान्यपि धामान्यशोधयत् ॥ ४१५ ॥
भस्मकूलतलात्तावल्लुब्धं[1] स्वर्णादि भूभुजा ।
कथापि यावतो हन्त ग्रथयत्यद्य कौतुकम् ॥ ४१६ ॥
राजा शून्याटवीभूते पत्तने तत्र सानुगः ।
नडत्वग्ग्रथितच्छत्रपटलाच्छादितेवसत्[2] ॥ ४१७ ॥
तावत्यप्यर्थसामर्थ्ये चिकीर्षोस्तत्पुरं नवम् ।
विना राजोचितामाज्ञां न सिद्धं वृद्धभूपतेः ॥ ४१८ ॥
अदृष्टाभिभवो मातुरानुकूल्यान्नवो नृपः ।
परितापं पितुस्तैस्तैर्दुःसंदेशैः सदाकरोत् ॥ ४१९ ॥
निर्बन्धादथ पुत्रेण पर्णोत्सगमनं पिता ।
निर्वासनोत्सुकेनोक्तः शश्वदूतमुखैर्यदा ॥ ४२० ॥
प्रभवन्त्या यदा चासीत्पत्न्या तस्यैव वस्तुनः ।
निष्पत्तये प्रेर्यमाणः साधिक्षेपं क्षणे क्षणे ॥ ४२१ ॥

---

१ कूट इत्युचितः पाठः । २ छादितः इत्युचितः पाठः ।

तदा जातु रहः कुप्यंस्तन्वङ्गे थक्कने स्थिते ।
उवाचानुक्तपूर्वं तामेवं स परुषं वचः ॥ ४२२ ॥

तिलकम् ॥

अभिमानो यशः शौर्यं राज्यमोजो मतिर्धनम् ।
मया जायाविधेयेन हन्त किं किं न हारितम् ॥ ४२३ ॥
मिथ्योपकरणं नारीर्गणयन्ति नृणां जनाः ।
परिणामे तु नारीणां क्रीडोपकरणं नराः ॥ ४२४ ॥
द्वेषोन्मेषात्प्रसक्ताभिर्विरक्ताभिरसूयया ।
के नाम नात्र कान्ताभिः कृतान्तस्यातिथीकृताः ॥ ४२५ ॥
रूपं काश्चिद्बलं काश्चित्प्रज्ञां काश्चिच्च कार्मणैः ।
पुंस्त्वं काश्चिदसून्काश्चिद्धर्तृणां जह्नुरङ्गनाः ॥ ४२६ ॥
हरन्ति ग्रावभिरिव क्ष्मां पुत्रैरन्यगोत्रजैः ।
मत्ताः पयोधरौन्नत्यात्तरङ्गिण्य इवाङ्गनाः ॥ ४२७ ॥
पर्यन्ते वेतनमिमे किं जीर्णैरीदृशैरिति ।
पोषयन्ति सुतान्भर्तॄञ्शोषयन्ति तु योषितः ॥ ४२८ ॥
सर्वकालं विदित्वापि दोषान्योषित्कृतानमून् ।
प्रतिपत्त्यनुरोधेन मयेयं नावधीरिता ॥ ४२९ ॥
प्रभविष्णुर्निहत्येयमैहिकीः सुखसंपदः ।
परलोकसुखस्याशामपि हन्तुं ममोद्यता ॥ ४३० ॥
वलीपलितयुक्तस्य नेदीयोमरणावधेः ।
विहाय विजयक्षेत्रं कुत्र गन्तुं ममोचितम् ॥ ४३१ ॥
क्षपाकरकलामौलेः किल्बिषक्षपणक्षमा ।
द्वारोपकण्ठसंसेवोत्कण्ठा कुण्ठीभवेत्कथम् ॥ ४३२ ॥
पुत्रो लोकद्वयत्राता कस्यान्यस्येदृशो भवेत् ।
तीर्थात्प्रस्थापयन्मां यत्कुपथे मृतमिच्छति ॥ ४३३ ॥

प्रतिभात्यवगीतोयं प्रवादो मेद्य चेतसि ।
अनयान्यकुलोद्भूतो यदयं संप्रवेशितः ॥ ४३४ ॥
विसंवादिनमाकाराचारैर्बन्धुविरोधिनम् ।
पुत्रं पितुरसंस्निग्धं जानीयादन्यरेतसम् ॥ ४३५ ॥
सुचिराविष्कृताकूतां त्यक्त्वाप्राणाय यत्नणाम् ।
एवं वदन्पतिस्तस्याश्चक्रे मर्मसु ताडनम् ॥ ४३६ ॥
गोत्रजस्य पुरः पुत्रोत्पत्तिगुह्ये प्रकाशिते ।
आमृष्टविप्रियालापा साभूदधिकलज्जिता ॥ ४३७ ॥
महत्तमस्य पुत्रो हि प्रशस्ताख्यस्य सोभवत् ।
विपन्नापत्ययोपात्तस्तयेत्यासीज्जनश्रुतिः ॥ ४३८ ॥
उत्सिक्तभाषितं भर्तुर्योषितो जितभर्तृकाः ।
जानन्त्यन्याङ्घ्रिसंवृत्तशिरस्ताडनसंनिभम् ॥ ४३९ ॥
अतः सा सुदृढं प्रौढिसंस्कारपरुषं वचः ।
प्राकृतप्रमदेवोच्चैरित्युवाच रुषा पतिम् ॥ ४४० ॥
गतश्रीस्तापसो मन्दो जातभाग्यविपर्ययः ।
वृथा वृद्धः क्व किं वाच्यमिति मूढो न वेत्त्ययम् ॥ ४४१ ॥
स्नात्वोत्थितस्य यस्यास्य नाभूत्प्रावरणं पुरा ।
लोको जानात्ययं किं न तेन मां प्राप्य हारितम् ॥ ४४२ ॥
स्वकुलस्त्रीसमुचितं यत्किंचिन्मामभाषथाः ।
क्रियते किं न कालोयं यत्प्रायश्चित्तसेवने ॥ ४४३ ॥
अकर्मण्यो गतवया देशात्पुत्रेण वारितः ।
पत्न्यापि त्यक्त इत्यस्मात्परिवादाद्धि मे भयम् ॥ ४४४ ॥
कुलदोषादिवृत्तान्तगर्भोपालम्भनिर्भरैः ।
वचोभिर्व्यथितस्तस्यास्तस्थौ तूष्णीं यदा नृपः ॥ ४४५ ॥

तदा तस्यासनप्रान्तनिःसृतः प्रसरन्बहिः ।
निर्विकाराकृतेर्व्यक्तं ददृशे रक्तनिर्झरः ॥ ४४६ ॥
संभ्रान्तायां ततो राज्ञ्यामपश्यत्थक्कनो रुदन् ।
असिधेनुं गुदे तेन क्रुधा राज्ञा प्रवेशिताम् ॥ ४४७ ॥
ततोतिधीरो राजैव तं लज्जाचकितोन्वशात् ।
राज्ञो रक्तातिसरणं जातमित्युच्यतां बहिः ॥ ४४८ ॥
विधेया नारीणां तनयनिहिताशेषविभवाः
कृतम्लानौ भृत्ये पुनरुदितविस्रम्भरभसाः ।
नयन्तो गण्यत्वं प्रसभमभियोगं[1] लघुमरिं
नयत्यक्ताः क्षमापाः प्रलयमुपगच्छन्ति न चिरात् ॥ ४४९ ॥
नृपतिर्वाहितहयः शरदातपखेदितः ।
तृष्यन्निपीय धान्याम्बु च्युतासृग्जात इत्यभूत् ॥ ४५० ॥
गम्भीरै राजपुरुषैस्तथा वार्ता प्रवर्तिता ।
यथा नाबुद्ध वृत्तान्तमेतं कोपि बहिर्जनः ॥ ४५१ ॥
युग्मम् ॥
वत्सरे सप्तपञ्चाशे पौर्णमास्यां स कार्तिके ।
विजयेशाग्रतो राजा जीवितेन व्ययुज्यत ॥ ४५२ ॥
पत्न्याः पुत्रस्य चोद्वेगैस्त्यक्तो राजा सुखोचितः ।
प्रसार्य पादौ निद्रातुं प्राप सोवसरं चिरात् ॥ ४५३ ॥
चुकोपासौ न कस्मैचिच्चुकोपास्मै न कश्चन ।
चक्रे सुखी विमन्युश्च मरणेन महामनाः ॥ ४५४ ॥
संग्रामराजदायादो न कस्यचिदिव प्रियः ।
अंशुकाच्छादितो भूमावनाथ इव सोस्वपत् ॥ ४५५ ॥

---

१ अभियोगैः इति पाठः स्यात् ।

न प्रियाक्रन्दितैः स्निह्यन्न कुप्यन्नप्रियोक्तिभिः ।
सर्वत्यागी ययौ राजा दीर्घनिद्रारसज्ञताम् ॥ ४५६ ॥
दाक्षिण्योल्लङ्घनप्रायश्चित्तायेव त्यजन्नसून् ।
कृतज्ञया पतिः पत्न्या ततो निन्ये सनाथताम् ॥ ४५७ ॥
आराजपुत्रचण्डालं देयं प्रत्यहवेतनम् ।
ददौ स्वस्थेव भृत्येभ्यः सा कर्तुमनृणं पतिम् ॥ ४५८ ॥
गृहीतवेतना भृत्याः कोशं सर्वे तया स्वयम् ।
पुरस्ताद्विजयेशस्य नप्तुः क्षेमाय पायिताः ॥ ४५९ ॥
पादन्यस्तशिराः पौत्रो रुदन्नर्पितकोशया ।
मूर्धन्याघ्राय कथितो मा पितुर्विश्वसीरिति ॥ ४६० ॥
उत्थितैव ततो भूत्वा स्वयमात्तलता सती ।
प्रातिहार्यं व्यधाद्भर्तुः कारयन्त्यन्तमण्डनाम् ॥ ४६१ ॥
सादिनां शतमादिश्य नप्तुस्तत्रैव रक्षणे ।
सा पुनः शिबिकारूढमथ प्रास्थापयत्पतिम् ॥ ४६२ ॥
क्षपामेकां दिनार्धं च स्थित्वैवं पतिदेवता ।
प्रणम्य विजयेशानं युग्यारूढा विनिर्ययौ ॥ ४६३ ॥
निर्यान्तौ वीक्ष्य तौ प्रेततूर्यकल्लोलमिश्रितैः ।
लोकस्याक्रन्दतुमुलैर्भग्ना इव दिशोभवन् ॥ ४६४ ॥
विमानस्योत्पताकस्य परिष्कारेषु बिम्बिताः ।
प्रजा राज्ञोन्तिके रेजुरनुगन्तुमिवोद्यताः ॥ ४६५ ॥
राज्ञां वितीर्णस्कन्धानां मरुल्लोलाः शिरोरुहाः ।
विमानस्थस्य नृपतेरवहंश्चामरश्रियम् ॥ ४६६ ॥
पश्यन्ती पश्चिमां सेवां सैन्यानां नृपतिप्रिया ।
अस्ताभिलाषिणि दिने प्रपेदे पितृकाननम् ॥ ४६७ ॥

दुस्त्यजात्सुतवात्सल्याद्यद्वा केनापि हेतुना।
सा बभूव क्षणे तस्मिंस्तनयालोकनोत्सुका ॥ ४६८ ॥
जानन्ती पवनोद्धूतं रजः सेनासमुत्थितम्।
चकितोत्कण्ठिता साभूत्कलशागमनाशया ॥ ४६९ ॥
तस्मिन्क्षणे जनाः केचिदायाता नगराध्वना।
अङ्ग किं कलशः प्राप्त इति पृष्टास्तया स्वयम् ॥ ४७० ॥
स तु पुत्रः क्षणे तस्मिन्नियायासुर्मातुरन्तिकम्।
दत्त्वा बिभीषिकास्तास्ता निरुद्धो द्वैधकारिभिः ॥ ४७१ ॥
ततो गृहीतनैराश्या राज्ञी पुत्रावलोकने।
सा प्रार्थयित्वा वैतस्तं वारि श्लोकमथापठत् ॥ ४७२ ॥
वैतस्तेन तु तोयेन जठरस्थेन ये मृताः।
मोक्षं गच्छन्त्यसंदेहं ते यथा ब्रह्मवादिनः ॥ ४७३ ॥
उपनीतं वितस्ताम्बु पीत्वोपस्पृश्य चाथ सा।
एवं शशाप पिशुनान्स्नेहसंक्षयकारिणः ॥ ४७४ ॥
जनितं प्राणहृद्वैरं यैः पुत्रेण सहावयोः।
सान्वयानां क्षयस्तेषां भूयात्परिमितैर्दिनैः ॥ ४७५ ॥
तस्यास्तेनोपतप्तायाः शापेनाव्यभिचारिणा।
क्षिप्रमेव जयानन्दजिन्दुराजादयो मृताः ॥ ४७६ ॥
चक्रे हलधराप्तत्वजातकौलीनशान्तये।
परलोकं पणीकृत्य युक्त्या च शपथं सती ॥ ४७७ ॥
एवं विशुद्धशीलत्वं संप्रकाश्य शुचिस्मिता।
कर्णीरथाददाज्झम्पां ज्वलिते जातवेदसि ॥ ४७८ ॥
अजायत नभो वह्निज्वालावलयमालितम्।
तदागमोत्सवे दत्तसिन्दूरमिव निर्जरैः ॥ ४७९ ॥

साक्रन्दैर्न चटत्कारी दुःखोत्तप्तैर्न चोष्मलः ।
परमालेख्यलिखित इव जज्ञे शिखी जनैः ॥ ४८० ॥
गङ्गाधरष्टक्किबुद्धो युग्यवाहश्च दण्डकः ।
तावुद्दा नोनिका वल्गा चेति दास्यस्तदान्वयुः ॥ ४८१ ॥
बप्पटोद्भटयोः कुल्यौ सोनटक्षेमटावुभौ ।
भूपालवल्लभावास्तां वैराग्याद्विजयेश्वरे ॥ ४८२ ॥
भावा यत्र निसर्गभङ्गुरतरास्तिष्ठन्ति नैते चिरं
चेतःकाचघटस्य तस्य घटते दीर्घोयमेको गुणः ।
यत्तस्मिन्निहितप्ररूढि न गलत्यायाति न म्लानतां
धत्ते नापचयं चमत्कृतिवचोगीर्वाणगङ्गापयः ॥ ४८३ ॥
एकषष्टिमतिक्रम्य वर्षान्भूपतिरायुषः ।
सपत्नीकः पुरारातिगौरीसायुज्यमासदत् ॥ ४८४ ॥
अथास्थीनि समादाय चतुर्थे दिवसे तयोः ।
पुत्रास्तन्वङ्गराजस्य सर्वे गङ्गां प्रतस्थिरे ॥ ४८५ ॥
पैतामहेन कोशेन परिवारेण चान्वितः ।
पित्रा विरोधं जग्राह हर्षस्तु विजयेश्वरे ॥ ४८६ ॥
आद्ये पिता पुत्रवरे[1] पिता श्रीविजयेश्वरे ।
तस्मिन्पुत्रस्तु तत्रासीत्पिता तु नगरान्तिके ॥ ४८७ ॥
ततोतिव्ययिनं पुत्रं दरिद्रो नीतिमान्पिता ।
अभ्यर्थ्यानर्थभीतश्च संधिं दूतैरयाचत ॥ ४८८ ॥
स तैरसकृदायातैरुत्सिक्तो युक्तवादिभिः ।
राजपुत्रः समं पित्रा संधिं निन्ये कथंचन ॥ ४८९ ॥
रक्षां पैतामहे कोशे शरीरे चात्मजन्मने[2] ।
प्रतिशुश्राव जनकः कृतप्रत्यहवेतनः ॥ ४९० ॥

---

१ वैरे इत्युचितः पाठः । २ जन्मनः इत्युचितः पाठः ।

नृपतेः पुत्रमानेतुं विशतो विजयेश्वरम् ।
दृष्टिः प्लुष्टैर्गृहैर्दग्धा श्रुतिश्च जनगर्हया ॥ ४९१ ॥
स पीतकोशः संगृह्य तनयं प्राविशत्पुरम् ।
कोशं चास्थापयन्मुद्रां दत्त्वा तदभिधाङ्किताम् ॥ ४९२ ॥
अत्रान्तरे तस्य राज्ञो धार्मिकी धीरजायत ।
दारिद्र्यच्छेदिनी धर्म्या धनवृद्धिश्च सर्वतः ॥ ४९३ ॥
तनयो नयनाख्यस्य कल्यः सेल्यपुरौकसः ।
कुटुम्बिनो जय्यकाख्यः क्रमाड्डामरतामगात् ॥ ४९४ ॥
स्थूलोत्पत्तिः स दिग्देशविक्रीतान्नो वणिज्यया ।
संभृतार्थः शनैर्लुब्धो धनेशस्पर्धितां दधे ॥ ४९५ ॥
सार्धं क्रोशं खनित्वा स नित्यं दीन्नारराशिभिः ।
पूरितायाः क्षितेः पृष्ठे बहून्व्रीहीनवापयत् ॥ ४९६ ॥
दीन्नारन्यसनं भृत्यैः कारयित्वा प्रतिक्षपम् ।
बहवो भेदभीतेन तेन गूढं निपातिताः ॥ ४९७ ॥
स भाङ्गिलं लब्धुमिच्छन्बलेकस्मात्पलायिते ।
द्राक्षालतानिरुद्धाश्वो हृतः केनापि पत्तिना ॥ ४९८ ॥
तदीयेनोपलब्धेन धनेन वसुधातलात् ।
पर्याप्तेनात्यजद्राजा यावदायुर्दरिद्रताम् ॥ ४९९ ॥
समृत्सु क्षाल्यमानेषु तद्दीन्नारेष्वहर्निशम् ।
कलुषाम्भा बहून्मासान्वितस्ता समपद्यत ॥ ५०० ॥
दानोपभोगरहिताः काले क्लेशेन भूयसा ।
अन्यार्थमर्थान्रक्षन्ति चित्रं लुब्धा महाशयाः ॥ ५०१ ॥
प्राणान्धारयते निपीय मरुतः शेते तमोन्धे बिले
संभोगे परदत्तमिच्छति पटं नग्नस्त्रपाशान्तये ।

विस्तार्येति कदर्यतामहिरवत्यन्यस्य हेतोर्निधी-
न्नान्यः कोपि परं परोपकृतिषु प्रौढोस्ति लुब्धं विना॥५०२॥
अन्यैश्च बहुभिर्मार्गैर्नद्यः सिन्धुमिवाविशन् ।
नानार्थसंपदस्तास्ता भाग्यभाजं महीभुजम् ॥ ५०३ ॥
अर्था भाग्योदये जन्तुं विशन्ति शतशः स्वयम् ।
दिग्भ्योभ्युपेत्य सर्वाभ्यः सायं तरुमिवाण्डजाः ॥ ५०४ ॥
स्रोतांसि प्रबलत्वमेत्य वसुधां मूलेषु पुष्णन्त्यधो
व्योम्नोम्भः पतति त्यजन्ति हरितो वारि प्रणालीमुखैः ।
इत्थं शुष्कसरः पयोदसमये संपूर्यते सर्वतो
भाग्यानामुदये विशन्ति शतशो द्वारैर्न कैः संपदः ॥५०५॥
जनरक्षणदाक्षिण्ये ततः पितुरिवान्वहम् ।
कुशला कलशस्यासीत्प्रजापुण्योदयैर्मतिः ॥ ५०६ ॥
स्वयं वणिगिवार्थानां गणनाकुशलोपि सः ।
विवेक्ता सत्पथत्यागे मुक्तहस्तः सदाभवत् ॥ ५०७ ॥
उपस्थितौ भाविनौ च पश्यन्नायव्ययौ स्वयम् ।
अन्तिकान्नात्यजद्भूर्जखटिकादि नियोगिवत् ॥ ५०८ ॥
तस्य स्वरूपमूल्येन रत्नादि क्रीणतः स्वयम् ।
नाशकन्वञ्चनां कर्तुं केपि विक्रयकारिणः ॥ ५०९ ॥
त्रिवर्गं सेवमानः स विभज्य समयं सुखी ।
मध्याह्नादूर्ध्वमभवद्दृश्यः सर्वकार्यिणाम् ॥ ५१० ॥
तस्य स्वेषां परेषां च कृत्यमन्विष्यतश्चरैः ।
अज्ञातः स्वप्नवृत्तान्तः प्रजानामभवद्यदि ॥ ५११ ॥
स्ववेश्मेव गृहस्थस्य ध्यायतश्चास्य मण्डलम् ।
जनो जनपदे जातु न कश्चिद्दैन्यमस्पृशत् ॥ ५१२ ॥

कौलीनचकितो राजा कुर्वन्कण्टकशोधनम् ।
प्रकटं नात्यजद्दण्डं चौरेभ्योपि स जातुचित् ॥ ५१३ ॥
न तस्यार्थः कोपि नष्टो मन्त्रिणो यमयोजयन् ।
मन्त्रिणां स पुनश्चक्रे नष्टस्यार्थस्य योजनम् ॥ ५१४ ॥
विवाहयज्ञयात्रादिमहोत्सवशताकुलः ।
नित्यप्रहृष्टो निर्दैन्यस्तद्राज्ये ददृशे जनैः[1] ॥ ५१५ ॥
तेन नीतिविदाक्रान्ताः क्ष्माभुजः क्षित्यनन्तराः ।
आहाराचरणेप्यासंस्तदध्यक्षान्विनाक्षमाः ॥ ५१६ ॥
तन्वङ्गस्थस्थक्कनादींस्त्रीनायातान्दिगन्तरात् ।
व्ययितैकानुजान्मल्लप्रमुखान्गुङ्गजानपि ॥ ५१७ ॥
अप्रीणयद्बन्धुभृत्यान्स भव्याभिर्विभूतिभिः ।
कलाभिरमृतार्द्राभिः सोमः सुरपितॄनिव ॥ ५१८ ॥
युग्मम् ॥
अवाप्तपरिपाकोपि दौःशील्येन न भूपतिः ।
कुदैशिकोपदिष्टेन दुष्टाचारेण चोज्झितः ॥ ५१९ ॥
टक्केन वुल्लियाख्येन कन्यकाः समुपाहृताः ।
क्रीतास्तस्य तुरुष्केभ्यो नानादिग्देशसंभवाः ॥ ५२० ॥
स ताभिः परदारैश्च रूपलोभादुपाहृतैः ।
अवरोधपुरंध्रीणां द्वासप्ततिमढौकयत् ॥ ५२१ ॥
बह्वीः कामयमानस्य योषितः प्रतिवासरम् ।
मत्स्ययूषादिभिर्वृष्यैर्नास्य पुष्टिरहीयत । ५२२ ॥
महासमयपूजास्वव्यग्रः स गुरुभिः समम् ।
महाचरूणामाहारं नीतिमुत्सृज्य चाकरोत् ॥ ५२३ ॥

---

१ जनः इत्युचितः पाठः ।

एवं शवलकृत्येन पुरं तेन नवीकृतम् ।
निर्दग्धे विजयक्षेत्रे शिलावेश्मनि[1] शूलिनः ॥ ५२४ ॥
विजयेशशिलावेश्ममौलावातपवारणम् ।
नृपोम्बरशिरश्चुम्बि जाम्बूनदमयं व्यधात् ॥ ५२५ ॥
व्यवस्थितिं चानपायां व्यधत्त त्रिपुरेश्वरे ।
पिनाकिनश्च प्रासादं स स्वर्णमलसारकम् ॥ ५२६ ॥
ततः सत्कर्मकुशलश्चकार कलशेश्वरम् ।
निःसंख्यहाटकघटीपटलाङ्कशिलागृहम् ॥ ५२७ ॥
कलशेशोपरिच्छत्रं चिकीर्षोः काञ्चनाञ्चितम् ।
तुरुष्कदेशजः शिल्पी राज्ञोभ्यर्णमुपाययौ ॥ ५२८ ॥
सहस्रैर्भूरिभिर्हेम्नश्छत्रसिद्धिं वदन्कलाम् ।
स च्छादयन्निजां ताम्रे काञ्चनारोपणं विदन् ॥ ५२९ ॥
कानिचिद्दिवसान्यासीत्प्राप्नुवन्नृपसत्क्रियाम् ।
ततोतितीक्ष्णप्रज्ञेन नोनकाख्येन मन्त्रिणा ॥ ५३० ॥
अभ्यूह्य शिक्षितकलो विलक्षोगाद्यथागतम् ।
तच्च च्छत्रं ययौ सिद्धिमत्यल्पैरेव काञ्चनैः ॥ ५३१ ॥
अनन्तेशाभिधं बाणलिङ्गमन्याश्च भूपतिः ।
प्रतिष्ठा विविधाश्चक्रे स शक्राधिकवैभवः ॥ ५३२ ॥
नृपे सहजपालाख्ये शान्तिं यातेभ्यषिच्यत ।
ततः संग्रामपालाख्यो राजपुर्यां तदात्मजः ॥ ५३३ ॥
राज्यं जिहीर्षुर्बालस्य पितृव्यस्तस्य भूपतेः ।
भेजे मदनपालाख्यो बलीयानुद्यमं मदात् ॥ ५३४ ॥
तद्भयाच्छरणं प्रायान्नृपं साहायकार्थिनी ।
स्वसा संग्रामपालस्य जस्सराजश्च ठक्कुरः ॥ ५३५ ॥

---

१ वेश्म च इत्युचितः पाठः ।

कृतप्रसादो नृपतिः साहायककृते ददौ।
तयोः पश्चाज्जयानन्दं शूरैर्विज्ञादिभिः समम् ॥ ५३६ ॥
तत्र विद्राविताभित्रः संस्फूर्जत्क्रान्तमण्डलः ॥
संग्रामपालामात्यानां कार्यान्तेशक्यतां ययौ ॥ ५३७ ॥
काङ्क्षन्तो गमनं तस्य दत्त्वा तास्ता बिभीषिकाः।
ते त्रासमैच्छन्नाधातुं स वीरो न त्वकम्पत ॥ ५३८ ॥
मतिं राजपुरीयाणामसावेतामदादिति।
शङ्कमानेन तेनाथ विज्ञे मन्युरुपाहृतः ॥ ५३९ ॥
तैस्तत्र दत्तद्रविणैः प्रार्थितोथ महामतिः।
रक्षापदेशात्स्वं सैन्यं स्थापयित्वा न्यवर्तत ॥ ५४० ॥
एवं राजपुरीं तस्मिन्स्वीकृत्यान्तिकमागते।
तुतोष कार्यमर्मज्ञः प्राज्ञः कलशभूपतिः ॥ ५४१ ॥
क्रमाद्राजायमानेषु विज्ञादिष्वथ पस्पृशे।
आमयेन जयानन्दो दैवात्प्रमयहेतुना ॥ ५४२ ॥
स्वास्थ्यवार्तोपलम्भाय भूपतिं गृहमागतम्।
वाच्यमस्ति रहः किंचिदित्यूचे स कथान्तरे ॥ ५४३ ॥
निर्यातेष्वथ सर्वेषु किंचिन्नैवाब्रवीद्यदा।
तदा ताम्बूलतित्यक्षाव्याजाद्विज्ञो विनिर्ययौ ॥ ५४४ ॥
आप्तेनोक्तोपि निर्गच्छन्किं प्रयासीति भूभुजा।
मन्त्रिणा चैत्य स प्राज्ञो बहिरेव व्यलम्बत ॥ ५४५ ॥
जयानन्दोभ्यधाद्भूपमुक्त्वा राजपुरीकथाम्।
व्यक्तं नास्त्येव ते राज्यं विज्ञे वृद्धिमुपागते ॥ ५४६ ॥
आदीयमानाद्विज्ञेन कार्येभ्यो वेतनादपि।
दर्शयामास गणनां बहुमूल्यां महीभुजे ॥ ५४७ ॥

प्राप्तः कलुषतां राजा प्रयातः स्वगृहांस्ततः ।
याचितो गमनानुज्ञां विज्ञेनेङ्गितवेदिना ॥ ५४८ ॥
निषेधन्निव दाक्षिण्यलेशान्निर्बन्धकारिणः ।
तस्यानुज्ञां ददौ गन्तुं सान्तस्तोषो महीपतिः ॥ ५४९ ॥
लब्धादेशो गृहान्गत्वा सर्वोपकरणैः समम् ।
प्रस्थाप्य सोग्रतो भ्रातृनाप्रष्टुं नृपतिं ययौ ॥ ५५० ॥
राजधर्मगभीरत्वक्रूरयोः स्वामिभृत्ययोः ।
काचिदेव क्षणे तस्मिंश्चेष्टाभूदद्भुतावहा ॥ ५५१ ॥
न यत्प्रभुः प्रियं भृत्यं गमनात्स न्यवर्तयत् ।
उपालेभे समन्युश्च न यद्भृत्यः प्रियं प्रभुम् ॥ ५५२ ॥
सहोत्थितेन कतिचित्पदानि सह भूभुजा ।
चिरं कृत्वा कथां नीचैर्हसन्विज्ञो विनिर्ययौ ॥ ५५३ ॥
जिन्दुराजं हलधरो मुमूर्षुर्दूषयन्यथा ।
तथा विज्ञं जयानन्दः स व्यवारोपयत्पदात् ५५४ ॥
तल्लक्ष्मीमात्रशेषां क्ष्मां कृत्वा गच्छन्विधीयताम् ।
हृतार्थो विज्ञ इत्युक्तिं नाग्रहीन्मन्त्रिणां नृपः ॥ ५५५ ॥
निवर्तयिष्यति क्ष्माभृन्नियतं गमनादमुम् ।
इत्याशयान्वगाद्विज्ञं राजवर्जं जनोखिलः ॥ ५५६ ॥
आस्कन्दं शङ्कमानोस्थाद्विज्ञाद्राजा बलोर्जितात् ।
तृणस्पन्देपि चकितो निर्निद्रः पञ्च यामिनीः ॥ ५५७ ॥
तस्मिञ्शूरपुराद्याते निवृत्तेष्वनुगन्तृषु ।
निवृत्तशङ्कस्तां शङ्कां प्रादुश्चक्रे स मन्त्रिणाम् ॥ ५५८ ॥
ते तदाकर्ण्य यं मन्त्रं विज्ञार्थहरणेब्रुवन् ।
तस्याविधाने भूभर्तुरमन्यन्त नयज्ञताम् ॥ ५५९ ॥

विज्ञादयस्तु निर्द्रोहा यं यं देशमशिश्रयन् ।
तत्र तत्रैव पूज्यत्वं रत्नानीव प्रपेदिरे ॥ ५६० ॥
विज्ञोधिकं प्रवृद्धोपि दैवतस्येव भक्तिमान् ।
पद्म्यां कलशदेवस्य सत्यंकारः सदाभवत् ॥ ५६१ ॥
एवं निर्वास्य विज्ञादीनचिरावाप्तवैभवः ।
क्षिप्रं सूर्यमतीशापाज्जयानन्दः क्षयं ययौ ॥ ५६२ ॥
राज्ञो विरोधकृद्वक्तुं शापस्याव्यभिचारिताम् ।
प्रमयं जिन्दुराजोपि तस्मिन्नेव क्षणे ययौ ॥ ५६३ ॥
तेपि विज्ञादयः क्षिप्रमचिरावाप्तसंपदः ।
प्रापुः शापोचितं सर्वे प्रमयं गौडमण्डले ॥ ५६४ ॥
आकस्मिकेथ प्रमये विज्ञः प्रमयमाययौ ।
सुदीर्घबन्धनक्लेशं प्रापुस्तदनुजा अपि ॥ ५६५ ॥
पलायितेषु कारायास्तेषु व्याघ्रेण पाजकः ।
हतस्तदनुजाः शेषा भुक्तक्लेशाः क्षयं ययुः ॥ ५६६ ॥
द्वित्रास्तद्वैधकाराणां नानश्यन्मदनादयः ।
अदीर्घेणैव कालेन दुरन्तैर्यैर्भविष्यते ॥ ५६७ ॥
जयानन्दसहायोथ तत्पुत्रान्परिपालयन् ।
सर्वाधिकारे भूपेन वामनाख्यो व्यधीयत ॥ ५६८ ॥
यस्य तास्ता व्यवहृतीर्नीतिज्ञस्याद्भुतावहाः ।
वर्णयन्ति वयोवृद्धा गोष्ठीष्वद्यापि धीमताम् ॥ ५६९ ॥
ग्रामानवन्तिस्वाम्यादिभोग्यानाहृत्य लुब्धधीः ।
राजा कलशगञ्जाख्यं कर्मस्थानं विनिर्ममे ॥ ५७० ॥
मन्त्रिणे नोनकायासौ धनोत्पादविदेप्यदात् ।
क्रौर्यत्रस्तो न पादाग्रं जनरक्षणदक्षिणः ॥ ५७१ ॥

मन्त्रिणो राजकलशापत्यान्यत्यन्तरङ्गताम् ।
लेभिरे क्ष्माभुजः पार्श्वे प्रशस्तकलशादयः ॥ ५७२ ॥
सुताः स्वाच्छन्द्यविवशाश्चौराः संध्यादिसंश्रयाः ।
युक्त्या निदधिरे राज्ञा निबद्धस्वाधिकारिणः ॥ ५७३ ॥
पुनर्मदनपालेन क्रान्ते राजपुरीपतौ ।
साहायकाय व्यसृजत्सेनान्यं बप्पटं नृपः ॥ ५७४ ॥
प्रतापैर्भूपतेस्तेन भृत्यांशेनापि निर्जितः ।
बद्ध्वा मदनपालोपि कश्मीरान्संप्रवेशितः ॥ ५७५ ॥
भ्राता वराहदेवस्य कंदर्पाख्यो महीभुजा ।
कृतो द्वाराधिपो वीरो विदधे डामरक्षयम् ॥ ५७६ ॥
बभूव जिन्दुराजात्स शिक्षितो नयविक्रमौ ।
भूम्यनन्तरसामन्तमुकुटस्पृष्टशासनः ॥ ५७७ ॥
स राजपुर्यादिजयी द्वारं परमकोपनः ।
क्षणे क्षणेत्यजद्राज्ञा प्रसाद्य ग्राहितः स्वयम् ॥ ५७८ ॥
मदनः क्षितिपालेन प्रापितः कम्पनेशताम् ।
लब्धप्रकर्षान्वोपादीन्डामरान्बहुशोवधीत् ॥ ५७९ ॥
सेवावशीकृतः श्येनपालं स नगराधिपम् ।
चक्रे विजयसिंहाख्यं हताशेषमलिम्लुचम् ॥ ५८० ॥
कंदर्पोदयसिंहाद्यैः प्रहिते[1] लोहरेसकृत् ।
राजा भुवनराजस्य दूरं निःसारणं व्यधात् ॥ ५८१ ॥
कीर्तिराजस्य तनयां स च नीलपुरप्रभोः ।
लब्ध्वा भुवनमत्याख्यां रिपोश्छिन्नामयोभवत् ॥ ५८२ ॥
कार्यप्रतिग्रहे कर्तुं प्रवृत्तिं ग्राहितोभवत् ।
हत्वा विजयसिंहाद्यो नृपेण नगरेशताम् ॥ ५८३ ॥

---

१ प्रहितैः इत्युचितः पाठः ।

गुङ्गात्मजः स मल्लोथ तेन द्वारपतिः कृतः ।
राज्ञां मौलिमणिस्थाने स्वप्रतापमरोपयत् ॥ ५८४ ॥
युग्मम् ॥
शौर्यं निष्परिवारस्य पार्थस्योत्तरगोग्रहे ।
उरशासंप्रवेशे वा श्रुतं मल्लस्य मानिनः ॥ ५८५ ॥
पञ्चाशैस्तुरगैर्यत्स कृष्णां तीर्त्वा व्यपाहरत् ।
राज्यं वाजिव्रजैः सार्धमभयाख्यस्य भूभुजः ॥ ५८६ ॥
एवं वशीकृतभुवो भूपतेर्नयवेदिनः ।
सममेवाष्ट भूपालास्त्रिषष्टेब्देविशन्पुरम् ॥ ५८७ ॥
कीर्तिन्यर्ध्वपुराधीशश्चाम्पेयो भूभृदासटः ।
तुक्कात्मजस्तु कलशो वल्लापुरनरेश्वरः ॥ ५८८ ॥
राजा संग्रामपालाख्यः स च राजपुरीपतिः ।
उत्कर्षो लोहरोर्वीभृदौर्वशो मुङ्गजो नृपः ॥ ५८९ ॥
गाम्भीरसीहः कान्देशः काष्ठवाटधराधिपः ।
श्रीमानुत्तमराजोपि राजानमुपतस्थिरे ॥ ५९० ॥
तिलकम् ॥
राजलोकः प्रवृद्धोपि घने जनपदेभवत् ।
दुर्लक्ष्यो वार्षिकसरित्पूरो वारिनिधाविव ॥ ५९१ ॥
तस्मिन्क्षणे शिलीभूतवितस्तासलिले नृपैः ।
शीतक्षणेप्यसंक्षीणं सुखं तैरन्वभूयत ॥ ५९२ ॥
मनसापि हि भूपाला यत्ते किंचिदचिन्तयन् ।
प्राप्तमेव पुरोपश्यन्वामनेन तदाहृतम् ॥ ५९३ ॥
कौशलं मन्त्रिणस्तस्य रराजेतरदुर्लभम् ।
निमित्तं तदसंभ्रान्तो नित्यवद्योत्यवाहयत् ॥ ५९४ ॥

पार्थिवेष्वथ यातेषु मल्ले कार्यपराङ्मुखे ।
क्षितिपालेन कंदर्पो द्वारं स्वीकारितः पुनः ॥ ५९५ ॥
अभिमानधनो मन्त्री कृतारब्धिर्निजैर्धनैः ।
दुर्गं स स्वापिकं नाम युक्त्या दुर्ग्रहमग्रहीत् ॥ ५९६ ॥
स प्रविष्टोपि नगरं खिन्नः केनापि हेतुना ।
पार्थिवाभ्यर्थ्यमानोपि कार्यं नैवाग्रहीद्यदा ॥ ५९७ ॥
तदा प्रशंस्तकलशं नित्यं दूत्यं समाचरन् ।
तदुत्सिक्तोक्तिसंतप्तः संस्पृशन्नभिमानिताम् ॥ ५९८ ॥
निजश्रियातिभूयस्या भूरीन्संगृह्य शस्त्रिणः ।
तत्पदे रत्नकलशं स्वभ्रातरमकारयत् ॥ ५९९ ॥
सोर्थैः क्रीतप्रथोप्यासीन्न कंदर्पसमः क्वचित् ।
किं चित्रोल्लिखितः सिंहः सत्यसिंहक्रियां स्पृशेत् ॥ ६०० ॥
ततः क्रमेण भूभर्त्रा भृत्यरत्नं कथंचन ।
राजस्थानाधिकारं स नगरे ग्राहितः पुनः ॥ ६०१ ॥
अतिताडनतश्चौरे विपन्नेथ कृपाकुलः ।
त्यक्त्वा तमप्यधीकारं विषण्णो जाह्नवीमगात् ॥ ६०२ ॥
पटान्तकृतसंरोधस्ताडयित्वा करं प्रभोः ।
कोपाद्देशान्तरं यातस्तं प्रत्यास्ते स्म मन्युमान् ॥ ६०३ ॥
अत्यन्तखेदितोप्यासीदानीतस्यान्तिकं पुनः ।
दर्पं हर्तुं नृपस्तस्य संनद्धो न तु जीवितम् ॥ ६०४ ॥
इत्थं पुरुषसिंहानां प्रौढदार्ढ्यौ विसोढवान् ।
आरोहमवरोहं च सोन्तरङ्गः क्षमापतिः ॥ ६०५ ॥

---

१ प्रशस्तकलशः इत्युचितः पाठः ।

उपाङ्गगीतव्यसनं नर्तकीसंग्रहादरः ।
देशान्तरोचितं राज्ञा तेनैवेह प्रवर्तितम् ॥ ६०६ ॥
ततो जयवनोपान्ते निरन्तरमहागृहम् ।
स्वनामाङ्कं पुरं कर्तुं प्रावर्तत विशांपतिः ॥ ६०७ ॥
मठाग्रहारप्रासादमहागृहपरम्पराः ।
सतोयोपवनास्तत्र ययुः सिद्धिं सहस्रधा ॥ ६०८ ॥
अत्रान्तरे राजसूनुर्हर्षः सोत्कर्षपौरुषः ।
गुणैर्लेभे प्रकाशत्वमन्यभूपालदुर्लभैः ॥ ६०९ ॥
सोशेषदेशभाषाज्ञः सर्वभाषासु सत्कविः ।
कृत्स्नविद्यानिधिः प्राप ख्यातिं देशान्तरेष्वपि ॥ ६१० ॥
लुब्धेन पित्रा संत्यक्ता जना नानादिगागताः ।
गुणशौर्योज्ज्वलास्तेन गृहीताः कृतवेतनाः ॥ ६११ ॥
अपर्याप्ते पितृकृते वेतने व्ययशालिनः ।
एकाहान्तरितं तस्य भोजनं त्यागिनोभवत् ॥ ६१२ ॥
पितरं गायन इव व्यक्तं गीतैः स रञ्जयन् ।
भर्तव्यभरणं चक्रे तद्दत्तैः पारितोषकैः ॥ ६१३ ॥
उद्गायति पुरस्तस्मिन्कदाचिदथ पार्थिवः ।
सभ्येषु प्रीयमाणेषु शौचायोत्थाय निर्ययौ ॥ ६१४ ॥
तेन प्रसङ्गभङ्गेन जाततेजोवधः सुधीः ।
क्षुभ्यन्वैलक्ष्यकोपाभ्यां कुमारः क्षितिमैक्षत ॥ ६१५ ॥
प्रभुर्वीतक्षान्तिः सुहृदतिशठः स्त्री परुषवा-
क्सुतो गर्वोन्नद्धः परिजन उदात्तप्रतिवचाः ।
इयान्सोढुं शक्यो ननु हृदयदाही परिकरो
न तु श्रोतावज्ञालुलितनयनान्तं परिभवन् ॥ ६१६ ॥

पितुरेव तदा भृत्यो विश्शावट्टाभिधो विटः ।
शाधि राज्यं निहत्येमं नर्मणेवेत्युवाच तम् ॥ ६१७ ॥
अधिक्षिपन्स तं रोषान्नानेनोक्तमसांप्रतम् ।
इत्यासन्नेन हसता धम्मटेनाप्यकथ्यत ॥ ६१८ ॥
अग्रे भोगेच्छवश्छन्नाः कुमाराननुगान्पितुः ।
स्नेहं प्रदर्श्य स्वीकुर्युर्वैश्याः कामिसखीरिव[1] ॥ ६१९ ॥
पुनः सभां संप्रविष्टस्तं पिता पर्यतोषयत् ।
प्रीतिदायैस्ततस्तैस्तैः साधुवादैश्च मानिनाम्[2] ॥ ६२० ॥
अन्येद्युस्तु पितुः पार्श्वात्स भुक्त्वा स्वगृहान्गतः ।
अभ्येत्य विश्शावट्टेन तदेव जगदे रहः ॥ ६२१ ॥
उपपन्नं तत्तदुक्त्वा तेनाभीक्ष्णं निषेधता ।
निर्बध्नन्नपि हस्तेन सोथ कोपादताड्यत ॥ ६२२ ॥
लग्नाभिघातं रुधिरं वमन्तं घ्राणवर्त्मना ।
तं वीक्ष्य सोभिजातोभूत्सदाक्षिण्यो नृपात्मजः ॥ ६२३ ॥
भृत्यैः प्रक्षालयन्नस्रं तस्येदृक्पाप्मनो भवेत् ।
उक्तेनापीति कथयन्स्मित्वा वासांस्यदापयत् ॥ ६२४ ॥
अनिच्छोरपि तस्येच्छा दानात्तेनान्वमीयत ।
दुःशीलेनान्यकामिन्याः स्मितमात्रादिव स्पृहा ॥ ६२५ ॥
असकृत्कृतयत्नः स ततः कालेन भूयसा ।
तं प्रैरयत्तत्र कृत्ये मध्ये स्वीकृत्य धम्मटम् ॥ ६२६ ॥
स रोहद्द्रोहसंकल्पजन्मना पाप्मना श्रितः ।
संमन्त्र्य पितरं हन्तुं तीक्ष्णान्प्रायुङ्क सर्वतः ॥ ६२७ ॥

---

१ कामिसखीनिव इत्युचितः पाठः । २ मानिनम् इत्युचितः पाठः ।

शश्वत्स गोचरीभूतस्तेषां स्नेहलवस्पृशाम् ।
न घातितः सूनुना च वर्जिता न च तत्कथा ॥ ६२८ ॥
आप्तत्वं तीक्ष्णवर्गेथ प्रतिभेदभयाद्गते ।
तां विश्शावट्ट एवाशु वार्तां राज्ञे न्यवेदयत् ॥ ६२९ ॥
बुद्धवान्राजपुत्रस्तत्तस्मिन्नहनि जातभीः ।
भोक्तुं नागात्पितुः पार्श्वमपि दूतैः कृतार्थनः ॥ ६३० ॥
सोपि तस्मिन्ननायाते तत्रार्थे शान्तसंशयः ।
दिने तत्र मनस्तापान्नाभुङ्क्त सपरिच्छदः ॥ ६३१ ॥
सभ्रातृकस्य प्राप्तस्य प्रातर्दुःखं न्यवेदयत् ।
सुचिरं थक्कनस्याङ्के शिरो विन्यस्य सोरुदत् ॥ ६३२ ॥
उक्त्वा च धम्मट्टोदन्तं बुद्ध्या तस्य समर्पणम् ।
विधेहीत्यभ्यधान्नापि तं भङ्गीभणितिक्रमैः ॥ ६३३ ॥
न कृताधिगमावावां कृत्यस्यास्येत्युदीर्य ताम् ।
अभाषेतां भ्रातुरर्थे पुनस्तन्वङ्गनन्दनौ ॥ ६३४ ॥
त्वत्प्रसादबलाद्राजन्नापन्नत्राणदीक्षितौ ।
यावावां तत्प्रवेशार्थं व्यक्तद्वारं निशास्वपि ॥ ६३५ ॥
कथं नु पृथिवीपाल प्राप्ते प्राणात्ययक्षणे ।
निर्दोषो वा सदोषो वा ताभ्यां संत्यज्यतेनुजः ॥ ६३६ ॥

युगलकम् ॥

स्वामिद्रोहापवादश्च भवेत्तद्रक्षणाद्ध्रुवम् ।
देशत्यागं तदुत्सृज्य शरणं नान्यदावयोः ॥ ६३७ ॥

---

१ निवेदयन् इत्युचितः पाठः । २ बद्ध्वा इत्युचितः पाठः । ३ चापि इत्युचितः पाठः । ४ तम् इत्युचितः पाठः ।

इत्यादि संभाव्य तयोः पादन्यस्तोत्तमाङ्गयोः ।
रुदित्वा गमनानुज्ञां कथंचित्पार्थिवो ददौ ॥ ६३८ ॥
पथि कश्चिदमुं हन्यान्मध्येकृत्येति धर्म्मटम् ।
तौ विनिर्जग्मतुर्देशात्ततः सबलवाहनौ ॥ ६३९ ॥
तन्वङ्गजेषु यातेषु विविक्तीकृतमन्दिरः ।
सुतमानीय नृपतिः सान्त्वयन्निदमब्रवीत् ॥ ६४० ॥
आसंसारं जगत्यस्मिन्सर्वतः ख्यातकीर्तिना ।
जनकेनैव जन्यस्य ज्ञप्तिरुत्पाद्यते जनैः ॥ ६४१ ॥
पुत्र शीतांशुनेवाब्धिं दिग्द्वीपख्यातकीर्तिना ।
भवता तु सुपुत्रेण मां जानात्यखिलो जनः ॥ ६४२ ॥
स त्वं गुणवतामग्र्यो निरर्गलयशा भवन् ।
असाधुसेव्यमध्वानं वद कस्मान्निषेवसे ॥ ६४३ ॥
पैतामहं निजं चार्थं यन्न तुभ्यं समार्पयम् ।
तत्र हेतुमनाकर्ण्य नासूयां कर्तुमर्हसि ॥ ६४४ ॥
रिक्तः स्वेभ्यः परेभ्यश्च प्राप्नोत्यभिभवं नृपः ।
इति निर्ध्याय हि मया क्रियते कोशरक्षणम् ॥ ६४५ ॥
पुरप्रतिष्ठां निष्पाद्य क्षिप्त्वा राज्यधुरं त्वयि ।
वाराणस्यां गमिष्यामि नन्दिक्षेत्रेथवा पुनः ॥ ६४६ ॥
तद्राज्यकोशयोः स्वामी बुभूषुर्न चिराद्भवान् ।
अतितात्पर्यतः कस्मादनार्योचितमीहसे ॥ ६४७ ॥
संभाव्यते त्वयि न तद्यन्ममावेदितं खलैः ।
यथार्थकथनात्तस्मात्कौलीनं विनिवार्यताम् ॥ ६४८ ॥
विशुद्धये करोत्वेष स्वकृतस्याप्रतिश्रवम् ।
स्नेहादितीच्छंस्तद्राजा साभिप्रायं वचोभ्यधात् ॥ ६४९ ॥

अपलापवचोमात्रं निनीषुस्तस्य हेतुताम् ।
जनप्रत्यायने सोभूद्यस्मात्क्षान्तिसमुत्सुकः ॥ ६५० ॥
हर्षस्तु साधुवादैस्तत्पितुः संपूज्य भाषितम् ।
वक्ष्याम्यात्तमुखे तत्त्वमित्युक्त्वा निर्ययौ बहिः ॥ ६५१ ॥
सामान्यप्रेरणादेषा चिकीर्षाभूदिति ब्रुवन् ।
स पितृप्रहितं दूतं ह्रीतः स्वावसथं ययौ ॥ ६५२ ॥
दूतं म्लाननानं वीक्ष्य पाणिभ्यां ताडयञ्शिरः ।
हा पुत्रेति वदन्राजा तस्यास्कन्दमदापयत् ॥ ६५३ ॥
हतेस्मिन्स्वशिरश्छिन्द्यामिति प्रोक्तवतः प्रभोः ।
निदेशाद्वेष्टयित्वैव तस्थुस्तद्वेश्म शस्त्रिणः ॥ ६५४ ॥
तीक्ष्णास्तु पिहितद्वाराः परिवार्य नृपात्मजम् ।
ऊचुः सपरुषां वाचमेवं निश्चितमृत्यवः ॥ ६५५ ॥
अस्मान्घृणी प्रमादी च विरुद्धं छद्म कारयन् ।
घातयित्वा दुराचार क्व जीवन्स्थातुमिच्छसि ॥ ६५६ ॥
रक्षिष्यति सुतं स त्वां स पिता रक्षितस्त्वया ।
ज्ञातेयं युवयोरस्ति वयमेव हताः पुनः ॥ ६५७ ॥
युध्यस्व मध्यगोस्माकं त्वां निहन्मोन्यथा वयम् ।
एवं सर्वप्रकारं ते व्यक्तं नास्त्येव जीवितम् ॥ ६५८ ॥
तां वार्तां भूपतेः श्रुत्वा व्याकुलस्याग्रतः स्थितः ।
हर्षान्तिकं दण्डकाख्यः प्रायान्निजमहत्तरः ॥ ६५९ ॥
तीक्ष्णैर्निजतया दत्तप्रवेशः स नृपात्मजम् ।
प्रसृत्योवाच मतिमानेवं सर्वान्विमोहयन् ॥ ६६० ॥
क्षत्रियापुत्र जीवित्वा कल्पानल्पेतरानपि ।
कारणैरपि गन्तव्यं नियमान्नियतेर्वशम् ॥ ६६१ ॥

तदेतस्मिन्समासन्ने मरणेव्यभिचारिणि ।
यदर्थं गृह्यते शस्त्रं स मानः पाल्यतां त्वया ॥ ६६२ ॥
कृतश्रुतः ख्यातयशा युवा सुक्षत्रियो भवान् ।
तदाहवविलम्बेन कार्यं किमिव पश्यसि ॥ ६६३ ॥
एतेषु सुसहायेषु मयि चाग्रेसरेधुना ।
विपत्तिर्विजयो वापि प्रतापिंस्तव शोभते ॥ ६६४ ॥
उत्तिष्ठ नखकेशादियोजनं कारय द्रुतम् ।
वीरपट्टं बधानापि स्वःस्त्रीपरिणयस्रजम् ॥ ६६५ ॥
इत्युक्त्वा क्षुरकर्मार्थं राजपुत्रं सनापितम् ।
प्रावेशयत्पूज्यमानस्तीक्ष्णैराभ्यन्तरं गृहम् ॥ ६६६ ॥
न्यस्तासिधेनुर्हर्षेण दत्तझम्पः क्षणात्स्वयम् ।
पश्चात्प्रविश्य तद्वेश्म चक्रे सुनिहितार्गलम् ॥ ६६७ ॥
ततः स राजस्थानीयं तमारादब्रवीद्वचः ।
रक्षितो राजपुत्रोयं क्रियतां स्वोचितं त्वया ॥ ६६८ ॥
भूतग्रहादिभवमोषधिभिर्विरोधि-
जातं बलैः प्रहरणप्रभवं तनुत्रैः ।
निर्वाप्यते प्रतिभयं पृथिवीपतीनां
सार्वत्रिकं तु रभसाद्भुवि बुद्धिवृद्धैः ॥ ६६९ ॥
नदन्तस्तुमुलं योधास्ततो राजसुतास्पदे ।
आरोढुमाययुर्वप्रहर्म्यादि प्रविवेक्षवः[1] ॥ ६७० ॥
तीक्ष्णा दृढद्वारगृहस्थितं त्यक्त्वा नृपात्मजम् ।
यावन्निर्गन्तुमिच्छन्ति हन्यमाना युयुत्सवः ॥ ६७१ ॥
द्वित्राः प्रसङ्गसांनिध्यान्मध्यपातं समाश्रिताः ।
तावद्विनिर्ययुर्वीरा निर्द्रोहा अभिमानिनः ॥ ६७२ ॥

---

१ प्रविविक्षवः इत्युचितम् ।

ते निर्याताः सूर्यमतीगौरीशाश्रयिणो गृहात् ।
सदाशिवान्तिकं प्रापुर्घ्नन्तो युधि विरोधिनः ॥ ६७३ ॥
रक्ष्यमाणोपि भूभर्तुर्गिरा ज्ञातेयशालिनः ।
राजज्ञातिर्हतस्तेषु प्रथमं सहजाभिधः ॥ ६७४ ॥
द्विजस्तिव्याभिधो वीरः पण्डितः शौर्यमण्डितः ।
रामदेवश्च केशी च कर्णाटोरिभटैर्हतः ॥ ६७५ ॥
केचित्त्यजन्तः शस्त्राणि स्वं घ्नन्तः केपि च स्वयम् ।
लेभिरे वधबन्धादि पापाः कापुरुषोचितम् ॥ ६७६ ॥
सितषष्ठ्यां सहस्यस्य चतुःषष्टे स वत्सरे ।
वैरं नीत्वा पितापुत्रौ विप्लवः कारितो विटैः ६७७ ॥
हठत्यागासक्तिः प्रियायुवतिसंप्रेरणवचः
खलासङ्गः पूर्वप्रणयपरिहारो जनयितुः ।
अमात्येन भ्रात्रा सममपरमात्राथ कलहः
कुमाराणां बुद्धिं पितरि विपरीतां प्रतनुते ॥ ६७८ ॥
एवं स खलसंगत्या कुमारो लब्धलाघवः ।
बन्धं[1] कारागृहे प्रापदसुखानि सुखोचितः ॥ ६७९ ॥
राज्ञी भुवनमत्यस्मिन्बद्धे माध्यस्थसंविदि ।
स्थापिता मानिनी कण्ठच्छेदं कृत्वा जहावसून् ॥ ६८० ॥
रक्षिणो मन्त्रिणामाप्तांस्तस्य विन्यस्य भूपतिः ।
प्राहिणोदुचितान्भोगान्सुतस्नेहाद्दिने दिने ॥ ६८१ ॥
चक्रिकायामशक्तोयमिति संचिन्त्य भूभुजा ।
भृत्यः प्रयागनामास्य निजः पार्श्वान्न वारितः ॥ ६८२ ॥
नोनको हर्षमुद्दिश्य स्वेनान्यैश्च महीभुजम् ।
जीवितं लोचने वास्य कृष्येतामित्यभाषत ॥ ६८३ ॥

---

१ बद्धः इत्युचितम् ।

नृपः स शीलवैकल्ये पशुतुल्ये ह्रियं त्यजन् ।
रिपोरिव तनूजस्य चकमे कतिचित्प्रियाः ॥ ६८४ ॥
तासु श्वशुरवाल्लभ्यमवाप्य सुगलाभिधा ।
बभूव तुक्कभूभर्तुर्नप्तृभर्तृपदार्थिनी[1] ॥ ६८५ ॥
संमन्त्र्य नोनकः सा च द्वौ सूदावशनान्तरे ।
रसं प्रदातुं हर्षस्य पापं[2] प्रैरयतां ततः ॥ ६८६ ॥
अन्यसूदमुखाद्वार्तां प्रयागस्तामवाप्तवान् ।
प्रभुं तद्दाप्यमानान्नपरिहारमकारयत् ॥ ६८७ ॥
तेनान्नेन परीक्षार्थं दापितेनापजीवितौ ।
हर्षः श्वानौ निशम्याभून्निराशो निजजीविते ॥ ६८८ ॥
प्रयुक्तिं गूढदण्डस्य पितुरेव स तां विदन् ।
ततः सर्वाणि भोज्यानि स्पृष्ट्वैवौज्झीद्दिने दिने ॥ ६८९ ॥
प्रयागोपहृतेनासीत्परं बाह्येन सर्वदा ।
भोज्येन येन केनापि कुर्वञ्जीवितधारणम् ॥ ६९० ॥
अन्नस्याभोजनं श्रुत्वा राजा सूदैर्निवेदितम् ।
ततः प्रयागमानीय तत्र पप्रच्छ कारणम् ॥ ६९१ ॥
प्रयोजकौ च सूदौ च सोपलभ्य न्यवेदयत् ।
रसार्पणकथां कृत्स्नां तज्ज्ञानं च स्वयं प्रभोः ॥ ६९२ ॥
अथान्येष्वापि सूदेषु पित्रा दत्तेषु शङ्कितः ।
राजसूनुर्न बुभुजे प्रयागोपहृतं विना ॥ ६९३ ॥
स सर्वेषु विरुद्धेषु यद्यत्तत्रात्यवाहयत् ।
मेने तत्तद्दिनं लब्धं शेषेष्वास्थापराङ्मुखः ॥ ६९४ ॥
अत्रान्तरे समुदभूदकस्मान्नाशसूचकः ।
अदृष्टपूर्वो भूभर्तुः सदाचारविपर्ययः ॥ ६९५ ॥

---

१ नप्त्री भर्तृवधार्थिनी इति पाठः स्यात् । २ पापौ इत्युचितः पाठः ।

उत्पाट्य ताम्रस्वाम्याख्यं पूर्वं ताम्रमयं रविम् ।
स रीतिप्रतिमाः स्वैरं विहारेभ्योप्यपाहरत् ॥ ६९६ ॥
धनानि निरपत्यानामाहर्तुं व्यवसायिना ।
न्यवार्यतार्यमर्यादा क्रौर्याक्रान्तेन भूभुजा ॥ ६९७ ॥
ततोभिशापसंतापव्यञ्जकेनाञ्जसाभवत् ।
अतिसंभोगजातेन धातुक्षैण्येन सोर्दितः ॥ ६९८ ॥
कुम्भप्रतिष्ठासंभारं चिकीर्षोर्हरमन्दिरे ।
तस्यापतन्महाकालकुम्भे नासापुटादसृक् ॥ ६९९ ॥
आकस्मिकं दुर्निमित्तं तत्प्रतीकारसंविदा ।
न मनागप्यगाच्छान्तिं प्रवृद्धिं प्रत्युताययौ ॥ ७०० ॥
अस्रु[1]स्रुत्यनुबन्धेन तेन ग्लपितसौष्ठवः ।
शनैः शय्याप्रणयितामन्तः स प्रत्यपद्यत ॥ ७०१ ॥
बलमांसकृतक्षैण्यमग्निमान्द्याद्युपद्रवैः ।
कलाशेषेण शशिना तद्वपुः साम्यमाययौ ॥ ७०२ ॥
राज्यं स दित्सुर्हर्षाय दृष्ट्वामात्यान्पराङ्मुखान् ।
ततो[2]भिषेकमौत्कर्षमानिन्ये लोहराचलात् ॥ ७०३ ॥
उच्चावचास्तेन सर्वे संविभक्ता मुमूर्षुणा ।
परमीर्ष्याविधेयेन न शुद्धान्तवधूजनः ॥ ७०४ ॥
कृत्वा धनार्पणं कुर्यां देशादस्य प्रवासनम् ।
इत्युक्त्वा हर्षमानेतुं तेना[3]प्रार्थ्यन्त मन्त्रिणः ॥ ७०५ ॥
ते तु गोप्तॄन्निवार्याद्यांष्ठक्कुराँल्लोहराश्रितान् ।
विन्यस्य रक्षिभावे तमुत्कर्षाय न्यवेदयन् ॥ ७०६ ॥

---

१ अस्र इत्युचितः पाठः । २ ततोभिषेक्तुमुत्कर्षं इत्युचितः पाठः । ३ तेन प्रार्थ्यन्त इत्युचितम् ।

स नाट्यमण्डपात्तेन निष्कृष्टः क्षामविग्रहः ।
निवेशितश्चतुःस्तम्भे बद्ध्वा बान्धववर्जितः ॥ ७०७ ॥
अथोज्जिगमिषून्प्राणान्निःसामर्थ्यो विदन्नृपः ।
मुमूर्षुरभवत्तीर्थप्रस्थानाय कृतत्वरः ॥ ७०८ ॥
स जानन्दैवतक्रोधं ताम्रस्वामिविपाटनात् ।
इयेष शरणं कर्तुं मार्तण्डं प्राणलब्धये ॥ ७०९ ॥
संत्यज्य विजयक्षेत्रमत एवापवर्गदम् ।
महीश्वरोपि[1] प्रययौ तत्र त्रासवशंवदः ॥ ७१० ॥
अधीकारप्राप्त्या तृणमिव विदन्विश्वमखिलं
नियोगी जातार्तिर्नमति गृहदासीरपि रुदन् ।
नदन्मूर्खो ज्ञानी बहुदुरुपदेशोधिगमतः
करोति प्राणान्ते शिशुरिव च किं किं न विगुणम् ॥७११॥
तादृश्या कृपणप्रायसेव्यया क्लैब्यसंविदा ।
गुरूपदेशाहंकारस्तस्य हास्यत्वमाययौ ॥ ७१२ ॥
शुक्लायां मार्गशीर्षस्य तृतीयस्यां निशामुखे ।
तलादेवाश्रितो[2] युग्यं भूभृन्मर्तुं विनिर्ययौ ॥ ७१३ ॥
स भेरीतूर्यनिर्घोषैर्जनाक्रन्दं तिरोदधत् ।
सामात्यान्तःपुरो नौभिः प्रतस्थे जलवर्त्मना ॥ ७१४ ॥
यामशेषे दिनेन्यस्मिन्प्राप्तस्य चरणान्तिके ।
मार्तण्डस्य स्वजीवास्यै सौवर्णीं प्रतिमां व्यधात् ॥७१५॥
भृत्यैरगणिताज्ञस्य दिदृक्षोर्ज्येष्ठमात्मजम् ।
औत्सुक्येनारतिस्तस्य व्यथितस्याधिकाभवत् ॥ ७१६ ॥
बहिर्हर्षकृतं गीतं गायनानां स गायताम् ।
विवृतद्वारविवरः शृणोति स्म विनिःश्वसन् ॥ ७१७ ॥

---

१ माहेश्वरोपि इति स्यात् । २ तल्पादेव इति स्यात् ।

प्राणावसानसमये परिसंकुचन्ती
स्वप्नप्रसङ्ग इव धावनशक्तिराज्ञा ।
प्राचुर्यदा खलु रुजो मरणोद्भवाया
मर्मव्यथां प्रथयते पृथिवीपतीनाम् ॥ ७१८ ॥
प्रजा ज्येष्ठं तनूजं च संविभक्तुं कृतार्थनः ।
उत्कर्षे ग्राहयञ्शिक्षां बद्धजिह्वोभवत्ततः ॥ ७१९ ॥
अव्यक्तं वदतो हर्ष इति वाचं पुनः पुनः ।
निह्नोतुं नोनको भावं तस्यादर्शमढौकयत् ॥ ७२० ॥
स तन्निवार्य विहसन्दष्टौष्ठः कम्पयञ्शिरः ।
जपन्किमपि सार्धे द्वे बद्धवागभवद्दिने ॥ ७२१ ॥
आसन्नप्राणनिर्याणः संज्ञयाहूय मन्त्रिणः ।
ततः स्वं तैरसंमूढैर्मार्तण्डाग्रमनाययत् ॥ ७२२ ॥
वर्षानेकान्नपञ्चाशद्भुक्तवान्स सितेहनि ।
मार्गस्य पञ्चषष्ठेऽब्दे षष्ठ्यां निष्ठामथासदत् ॥ ७२३ ॥
सप्त मम्मनिकामुख्या देव्यः परिणयाहृताः ।
अवरुद्धापि जयमत्यभिधाना तमन्वगुः ॥ ७२४ ॥
प्रसादवित्तया तस्य पुनः कय्याभिधानया ।
अवरुद्धिकया कृत्स्ना स्त्रीजातिरपवित्रिता ॥ ७२५ ॥
सर्वावरोधप्राधान्यप्रदानं नास्मरद्यदि ।
मा स्मार्षीन्नाम भर्तुस्तदनुच्चाभिजनोद्भवा ॥ ७२६ ॥
संश्रित्य विजयक्षेत्रं क्रमाद्ग्रामनियोगिनः ।
भेजे यत्त्ववरुद्धात्वमतो दुःखाकरोति नः ॥ ७२७ ॥
भूपालभोग्यं स्ववपुः सा भोगाभ्यासभासुरम् ।
निनाय ग्राम्यभोग्यत्वं धिङ्नारीर्नीचचेतसः ॥ ७२८ ॥

उत्कर्षस्याभिषेकाय व्यग्रेष्वखिलमन्त्रिषु ।
अन्तेष्टिमकरोद्राज्ञः कृतज्ञो वामनः परम् ॥ ७२९ ॥
घोषोभिषेकतूर्याणामेकतो गीतमङ्गलः ।
साक्रन्दः प्रेततूर्याणां नादोन्यत्र समुद्ययौ ॥ ७३० ॥
जातः पद्मश्रियो देव्याः पुत्रः कलशभूभुजा ।
ततो विजयमल्लाख्यो भ्रातुर्वैमत्यमादधे ॥ ७३१ ॥
यददाद्धर्षदेवस्य पिता प्रत्यहवेतनम् ।
प्रतिशुश्राव तस्मै स तदेवोत्कर्षभूपतिः ॥ ७३२ ॥
आश्वासाय च मध्यस्थान्ददौ सामन्तमन्त्रिणः ।
कय्यात्मजस्य चक्रे च जयराजस्य वेतनम् ॥ ७३३ ॥
अन्विष्यन्ति रुदत्य एव तरला गत्यन्तरं योषितो
योगक्षेमकथां चितान्तिकगता एवात्मजाः कुर्वते ।
अन्येषां शतशोवसानसमये चर्चां विचार्येदृशीं
स्त्रीपुत्रादिकृते कुकर्मभिरहो संचिन्वतेर्थं जडाः ॥ ७३४ ॥
प्रविवेश ततः श्रीमान्नगरं नृपतिर्नवः ।
न तु हर्षोदयाकाङ्क्षि हृदयं नगरौकसाम् ॥ ७३५ ॥
तद्राज्यलाभदिवसो जनस्याभोगदूषितः ।
सन्नपि प्रत्यभान्नैव सरोगार्तेरिवोत्सवः ॥ ७३६ ॥
हर्षदेवस्तु पितरि प्रयाते मर्तुमातुरे ।
नवबद्धश्चतुःस्तम्भे न तस्मिन्नहि भुक्तवान् ॥ ७३७ ॥
सार्थभ्रष्टमिवाध्वन्यमन्यस्मिन्नहि ठक्कुराः ।
ते शोकमूकं संप्रार्थ्य कथंचित्तमभोजयन् ॥ ७३८ ॥
राज्यं दातुं निजे देशे चक्रुश्चास्य प्रतिश्रवम् ।
राज्यद्वयं नायमर्हत्येक एवेति वादिनः ॥ ७३९ ॥

---

१ अन्त्येष्टिं इति स्यात् ।

एवं मिलितचित्तस्तैर्विपत्तिं श्रुतवान्पितुः ।
कृतोपवासः सोन्येद्युः शुश्रावोत्कर्षमागतम् ॥ ७४० ॥
बाष्पैः पित्रे प्रयच्छन्तं निवापसलिलाञ्जलीन् ।
तं दूतैरनुजो राजा स्नातुं प्रार्थयताथ सः ॥ ७४१ ॥
तस्य स्नानक्षणे राज्ञि[1] सज्जे राज्याभिषेचने ।
घोषोभिषेकतूर्याणामुदभूत्सजयध्वनिः ॥ ७४२ ॥
स तेन सुनिमित्तेन प्राप्तां मेने निमित्तवित् ।
विद्युद्द्योतेन जीमूतगर्जामिव नृपश्रियम् ॥ ७४३ ॥
ततः प्रभृत्युन्मुखता सुनिमित्तैरगृह्यत ।
तस्यात्यासन्नराज्यस्य भृत्यैरिव दिने दिने ॥ ७४४ ॥
स भोजनं कारयितुं दूतान्भ्रात्रा विसर्जितान् ।
देशान्निर्वासयतु मां राज्यात्संत्यज्य बन्धनात् ॥ ७४५ ॥
स्थातुमप्रत्यवस्थित्या विदध्यां कोशसंविदम् ।
म्रियेन्यथा निरशनैः संदिश्येति व्यसर्जयत् ॥ ७४६ ॥
स तन्मिथ्या प्रतिश्रुत्य तं दूतैः प्रहितैस्ततः ।
कृतकोशं सान्त्वयित्वा राजा भोज्यमभोजयत् ॥ ७४७ ॥
नित्यं च श्वो विधास्ये तदर्थमान[2] इति ब्रुवन् ।
कालापहारं कुर्वाणः शङ्कां तस्योदपादयत् ॥ ७४८ ॥
विश्वासाय स्वताडङ्कपाणिं कृत्वा प्रयागकम् ।
पार्श्वं विजयमल्लस्य सोथ गूढं व्यसर्जयत् ॥ ७४९ ॥
तदेवोक्त्वा तमूचे स त्वां ब्रूते दुःस्थितोग्रजः ।
कुमारे त्वयि राज्येस्मिञ्शुश्यामो[3] बन्धने वयम् ॥ ७५० ॥
संक्रान्तदुःखः संचिन्त्य चिरेणापि तमब्रवीत् ।
कार्यं कुर्यात्कथमिदं मद्विरा नीतिमान्नृपः ॥ ७५१ ॥

---

१ राज्ञः इतिस्यात् । २ तदर्थ्यमान इत्युचितम् । ३ शुष्यामः इत्युचितम् ।

तथाप्यस्मिन्यथाशक्ति यतिष्ये त्वद्विमोक्षणे ।
त्वया तु सावधानेन रक्षणीयं स्वजीवितम् ॥ ७५२ ॥
तं पार्श्वे हर्षदेवस्य संदिश्येति व्यसर्जयत् ।
उपायांश्चिन्तयन्नासीत्तस्य कार्यस्य सिद्धये ॥ ७५३ ॥
उत्कर्षः प्राप्तराज्यस्तु दैवतैरिव मोहितः ।
नादधे किंचिदारम्भं व्यवस्थाग्रथनक्षमम् ॥ ७५४ ॥
समर्पिताधिकारोपि कंदर्पादीन्[1] स मन्त्रिणः ।
राज्यकृत्यं न पप्रच्छ विदधे स च न स्वयम् ॥ ७५५ ॥
परिमातुं परीमाणं कोशसंचयवीक्षणे ।
परं क्षमापतेस्तस्य दिनकृत्यमजायत ॥ ७५६ ॥
कर्मणा निर्व्ययेनास्य चिन्त्यमानस्य येन वा ।
सुदीर्घदर्शी लोकोभूत्तेन लुब्धत्वंनिश्चयी ॥ ७५७ ॥
सा तस्य लुब्धताख्यातिः समुद्वान्नप्रदायिनः ।
भूभर्तुः पितृपत्नीभिः स्वैरिणीभिः प्रवर्धिता ॥ ७५८ ॥
स श्रोत्रिय इवोत्कम्पी व्यवहारमिताशयः ।
महाहृदयभोग्यानां प्रजानां नाभवत्प्रियः ॥ ७५९ ॥
ततो नियमितां वृत्तिं तस्माल्लुब्धादनाप्नुवन् ।
कुप्यन्विजयमल्लोभूद्देशा[2]न्गन्तुं कृतोद्यमः ॥ ७६० ॥
स्वं रक्षितुं स मध्यस्थाननुव्रज्याकृतेखिलान् ।
प्रार्थयामास तेना[3]पि सज्जास्तमनुवव्रजुः ॥ ७६१ ॥
लवणोत्से निशामेकां पुरान्निर्गत्य तस्थुषः ।
मध्यस्थदे[4]व्यास्तस्यैव योधाः पक्षमशिश्रियन् ॥ ७६२ ॥

---

१ सुमन्त्रिणः इति स्यात् । २ देशाद्गन्तुं इत्युचितम् । ३ ते चापि इति स्यात् ।
४ देश्याः इति स्यात् ।

हर्षे बद्धे त्वयि गते कृतकृत्यो भवेन्नृपः ।
तत्तं निष्कृष्य कारागा गमनं तव सांप्रतम् ॥ ७६३ ॥
इति तैः प्रेर्यमाणः स राजसूनुरुदायुधैः ।
विनिवृत्त्याकरोद्यात्रां प्रत्यूषे नगरोन्मुखः ॥ ७६४ ॥
श्रुत्वा चिकीर्षितं तस्य व्यावृत्तस्य तथाविधम् ।
सहायाः समपद्यन्त कतिचिड्डामरा अपि ॥ ७६५ ॥
अकरोन्मधुरावट्टो हयसेनापतिः सुतम् ।
राजसूनुर्यियासुर्यं मध्यस्थाननुयात्रिकम् ॥ ७६६ ॥
नागाह्वयो द्रोहहीनो राजपक्षमसंत्यजन् ।
कैश्चित्सह हयारोहैः स पद्मपुरवर्त्मना ॥ ७६७ ॥
आगच्छन्नन्तिकं राज्ञो दुर्निमित्तहृतत्वरः ।
न यावन्नगरं प्राप क्षिप्रकारी नृपात्मजः ॥ ७६८ ॥
शकुनैराहितोत्साहः शालाग्रोद्दीपिताग्निभिः ।
सैन्यैर्गृहान्दहंस्तावद्राजधानीमवेष्टयत् ॥ ७६९ ॥

चक्कलकम् ॥

समयाय विनिर्यातं त्यक्त्वोत्कर्षं महीभुजम् ।
तत्पक्षं जयराजोपि राजसूनुरशिश्रियत् ॥ ७७० ॥
हस्तस्थितौ राजपुत्रौ तस्याचिन्तयतां गतिम् ।
नवौ कवी व्यवहर्तिं सिद्धवाचः कवेरिव ॥ ७७१ ॥
हर्षदेवे परित्यक्ते यास्याम इति वादिनः ।
स हस्तिमहिषादीनां शालाः सैन्यैरदाहयत् ॥ ७७२ ॥
त्यागप्रलयजीमूतो हर्षदेवोभिषिच्यताम् ।
लुब्धः स्वशो वणिक्प्रायो राज्यादेष निवार्यताम् ॥ ७७३ ॥
एवं वदन्तः सन्तोपि हर्षमेत्य पुरौकसः ।
पुष्पैः प्राच्छादयन्बद्धं तमोरिविवरार्पितैः ॥ ७७४ ॥

उत्पिञ्जे तत्र संजाते भग्नसैन्यस्य भूपतेः ।
संप्रेष्य ठक्कुरान्हर्षस्तटस्थं तद्बलं व्यधात् ॥ ७७५ ॥
इत्थं बद्धोपि तत्कृत्वा वैरिकार्यविरोधिनः ।
संदेहवेपमानाङ्गस्ततस्तानेवमब्रवीत् ॥ ७७६ ॥
वर्तेद्य संकटे दुष्टे तन्मां मुञ्चत बन्धनात् ।
न चेदाशु महीपालादनिष्टं नियमाद्भवेत् ॥ ७७७ ॥
इत्युच्यमानास्ते यावद्विमृशन्ति स्म तन्मुहुः ।
पादप्रहारा न्यपतंस्तावद्द्वारगृहाद्बहिः ॥ ७७८ ॥
उच्चचार स किं द्रोहः प्रक्रान्तोयं दुराशयैः ।
रे ठक्कुरा विवृणुत द्वारमित्युच्चकैर्वचः ॥ ७७९ ॥
ठक्कुरेष्वथ भीतेषु धैर्यादगणयन्भयम् ।
अकारयद्धर्षदेव एव द्वारमपावृतम् ॥ ७८० ॥
नेत्रमात्रस्थितप्राणो ददर्श विशतस्ततः ।
लोहराञ्शस्त्रिणो हन्तुं प्राप्तान्षोडश वारिकान् ॥ ७८१ ॥
ते हि च्छित्त्वोज्झिते हर्षशीर्षे सर्वमिदं क्षणात् ।
शाम्येदिह भयं मत्रं नोनकस्येति जल्पतः ॥ ७८२ ॥
उत्कर्षेणासकृच्छ्रुत्वा तं निहन्तुं विसर्जिताः ।
विमृश्य चोक्ता गच्छन्तः कार्यशेषं विमुञ्चता ॥ ७८३ ॥
कदाचित्तेन कृत्यं स्यादहतेनेति तत्क्षणम् ।
निवार्य ठक्कुरात्रक्ष्यो हन्तव्यश्च यदोर्मिकाम् ॥ ७८४ ॥
इमां दद्यामभिज्ञानं यदा चेयं विसृज्यते ।
तदा तु बन्धनात्त्याज्य इत्युदीर्याङ्गुलीयकम् ॥ ७८५ ॥
पाणौ दर्शयता चोक्ता विलम्बालम्बनं यतः ।
निवार्य ठक्कुरांस्तस्मिन्क्षिप्रं न प्राहरंस्ततः ॥ ७८६ ॥

कुलकम् ॥

स तु प्रत्येकमाहूय नामग्रहणपूर्वकम् ।
अजिग्रहत्तांस्ताम्बूलमप्युपावेशयत्पुरः ॥ ७८७ ॥
जहुस्ते कृतसत्कारास्ताम्बूलग्रहणक्षणे ।
ह्रीताः कराग्राच्छस्त्राणि प्रजिहीर्षां च मानसात् ॥ ७८८ ॥
धत्ते श्रियं सृजति कीर्तिमघं लुनीते
मित्रत्वमानयति हन्त विरोधिनोपि ।
यात्यध्वभिः प्रतिपदं सुमनोनुकूलै-
र्गौः कामधुक्कमिव नापहरत्यनर्थम् ॥ ७८९ ॥
राजपुत्रः स तानूचे किं ह्रीता इव तिष्ठथ ।
निर्दोषाः सर्वथा प्रेष्याः स्वाम्यादेशानुपालने ॥ ७९० ॥
विलम्ब्यतां तथाप्यत्र द्रष्टव्यं महदद्भुतम् ।
यथोदेष्यत्यवस्थानामन्यथात्वं क्षणे क्षणे ॥ ७९१ ॥
द्विपद्वीपिक्रव्यादुरगतुरगादिभ्रमकृतो
यथास्यां भिद्यन्ते दिवि किल त एवाम्बुदलवाः ।
तथा सौम्यक्रूरक्रमविकृतिभाजस्तनुभृतां
क्षणानां नानात्वान्ननु हृदि विकारोर्मय इमाः ॥ ७९२ ॥
क्षणानुवृत्तिं कुर्वाणास्तद्यथात्र स्थिता वयम् ।
तथा सन्तु भवन्तोपि कार्यान्तरदिदृक्षवः ॥ ७९३ ॥
अपि चैवंविधा एव वितन्वन्तो रसान्तरम् ।
आसन्नराज्यप्राप्तीनां राज्ञां स्युः प्राणसंशयाः ॥ ७९४ ॥
ग्रीष्मस्योष्मा व्रजति घनतां नूनमासन्नवृष्टे-
र्नैशं गाढीभवति तिमिरं संनिकृष्टप्रभातम् ।
जन्तोरेवं प्रसभविभवस्फारसंपत्प्रचारा-
न्निष्क्रामन्ती विपदुपचितोपद्रवोद्रेकमेति ॥ ७९५ ॥

प्राणचारेण शकुनं निश्चित्येति वदन्सताम् ।
आचचक्षे शुभोदर्काः स्वोदन्तसदृशीः कथाः ॥ ७९६ ॥
कालं क्षेतुमुपन्यस्तशुद्धिव्यक्तीभवद्रसाम् ।
तेभ्यश्च कथयामास हरिश्चन्द्राश्रयां कथाम् ॥ ७९७ ॥
तद्रज्ञने स्वरक्षायां बाह्यवार्तागवेषणे ।
व्यापृतत्वं गभीरस्य न तस्य समलक्ष्यत ॥ ७९८ ॥
अत्रान्तरे तमुद्दिश्य मते जाते नवे नवे ।
राजश्रियश्च काल्याश्च शतशोभूद्गतागतम् ॥ ७९९ ॥
उत्कर्षो भूमिपस्तस्य परित्यागं ह्यमन्यत ।
आदिदेशानुगांस्तांस्तान्भूरिशश्च प्रमापणे ॥ ८०० ॥
अभिज्ञानोर्मिकादानं वधादेशे तु नास्मरत् ।
तेनोक्तिं तस्य दूतानामन्वतिष्ठन्त[1] रक्षिणः ॥ ८०१ ॥
स तान्वन्ध्यश्रमान्वीक्ष्य स्मृत्वाभिज्ञानसंविदम् ।
सत्त्वात्मजं राजपुत्रं शूराख्यं व्यसृजत्ततः ॥ ८०२ ॥
अभिज्ञानं वितरतस्तत्करे तस्य मुह्यतः ।
दैवयोगात्क्षणे तस्मिन्नूर्मिकाव्यत्ययोभवत् ॥ ८०३ ॥
यः पातार्थमुपार्जितोन्यशिरसस्तेनैव सिन्धुप्रभु-
र्वृद्धक्षत्रधराधवः स्वशिरसः पातं वरेणान्वभूत् ।
दिव्या स्वैव गदा श्रुतायुधनृपं हन्तावधीदाहवे
यत्राणाय विगण्यते विधिवशात्तेनैव नाशो भवेत् ॥ ८०४ ॥
तथा चैकस्य विस्मृत्या व्यत्ययेनापरस्य च ।
अभिज्ञानस्य स नृपो नाशं प्रत्युत लब्धवान् ॥ ८०५ ॥
आभिजन्येन हर्षस्य ते क्षणादेव रक्षिणः ।
प्रपेदिरे हितैषित्वमुत्कर्षाज्ञाविरोधिनः ॥ ८०६ ॥

---

१ अन्वतिष्ठन्न इत्युचितम् ।

द्वारमाक्रान्तमुत्क्रोधो वधायायमुपागतः ।
इति निर्ध्याय ते शूरं हन्तुमैच्छन्नुदायुधाः ॥ ८०७ ॥
उद्घाटितारिपुटा दृष्ट्वा तस्योर्मिकां करे ।
तेनैव साकं नृत्यन्तो हर्षे समुपतस्थिरे ॥ ८०८ ॥
पादन्यस्तोत्तमाङ्गैस्तैर्निर्गच्छेत्यर्थितस्ततः ।
अविश्वसन्नाजसूनुः क्षणमासीत्स चिन्तयन् ॥ ८०९ ॥
तस्मिन्क्षणे हर्षदेवं हतं ज्ञात्वा रणे स्थितः ।
क्रुध्यन्विजयमल्लोभूदधिकोद्रिक्तपौरुषः ॥ ८१० ॥
तं दग्धुमुद्यतं राजधानीं जीवति तेनुंजः ।
अभिधायेति रुरुधुः कथंचित्पार्थिवानुगाः ॥ ८११ ॥
प्रत्ययार्थं ततस्तस्य राज्ञा हर्षवधूर्द्रुतम् ।
गृहीतभर्तृताडङ्का सुगला प्रैष्यतान्तिकम् ॥ ८१२ ॥
तां विलोक्यैव विरते वह्निदाहान्नृपात्मजे ।
राजा भयप्रतीकारं हर्षत्यागादमन्यत ॥ ८१३ ॥
गत्वामात्याः स्वयं नोनप्रशस्तकलशादयः ।
हर्षे निर्निगडं कृत्वा कारागारात्ततोत्यजन् ॥ ८१४ ॥
मन्त्रः स तेषां शोकेन वक्त्रात्कृतगतागतः ।
अन्त्यक्षणे श्वास इव प्रससार बहिश्चरन् ॥ ८१५ ॥
हर्षः प्रच्छाद्यमानस्तु पौराणां पुष्पवृष्टिभिः ।
हयमारुह्य सामात्यो रणस्थं नृपमासदत् ॥ ८१६ ॥
अभिनन्द्यानुजो राजा तमूचे भ्रातरं रणात् ।
निवार्यागम्यतां कुर्मः प्राप्तकालं ततो वयम् ॥ ८१७ ॥
तथेति प्रस्थिते तस्मिंस्त्यक्त्वा तत्स रणाजिरम् ।
प्राविशन्मन्त्रिभिः सार्धं कोशं हेमादिसंश्रयम् ॥ ८१८ ॥

---

१ तेग्रजः इत्युचितम् ।

उत्तीर्णं महतः कृच्छ्राद्धर्षदेवमुपस्थितम् ।
दृष्ट्वा विजयमल्लोभूत्प्रहर्षान्निष्क्रियः क्षणम् ॥ ८१९ ॥
ततो ववन्दे तत्पादौ स चोत्क्राम्यालिलिङ्ग तम् ।
तास्ताः कथास्तयोरासन्नुपकर्त्रुपकार्ययोः ॥ ८२० ॥
व्यापादयैनमेवादौ हर्षोत्कर्षे ततो नृपः ।
निष्कण्टकोसि भवितेत्याप्तस्योपांशु जल्पतः ॥ ८२१ ॥
ततो विजयमल्लेन नाद्रोहेणादृतं वचः ।
ज्ञात्वेङ्गितज्ञो हर्षस्तत्ततस्तु चकितः क्षणम् ॥ ८२२ ॥
युग्मम् ॥
स्वदेहमामिषीभूतं स भ्रात्रोः श्येनयोरिव ।
निष्पत्रपक्षप्रतिमो[1] ररक्षार्वगतश्चरन् ॥ ८२३ ॥
आसन्नाभ्रजलस्य दावविगमे विद्युद्भयं शाखिनो
नक्रास्याद्गलतश्च मज्जनमयी शङ्का भवेद्वारिधौ ।
भोक्तव्यस्य विधिः शुभस्य रभसात्स्वादुत्वनिष्पत्तये
जन्तोः संतनुते निराकृतभियो भीत्यन्तरोत्पादनम् ॥८२४॥
तं हयभ्रमणव्याजाद्रक्षन्तं निजजीवितम् ।
ज्ञातवार्ता निजाः केचित्पत्तयः पर्यवारयन् ॥ ८२५ ॥
साकं विजयमल्लेन ततः संमन्त्र्य स क्षणात् ।
चचाल विप्लवापायमाख्यातुं तं महीभुजे ॥ ८२६ ॥
अग्रं तद्वेश्मनः प्राप्तं विनिर्यान्तं नृपात्मजात् ।
ततो विजयसिंहस्तं संप्रवेशान्न्यवारयत् ॥ ८२७ ॥
ऊचे च मरणात्तीर्णो मर्तुं विशसि किं पुनः ।
निष्प्रज्ञ गत्वोपविश त्यक्तशङ्कं नृपासने ॥ ८२८ ॥

---

१ पक्षिप्रतिमः इत्युचितम् ।

एवमुक्तवतस्तस्य भृत्यैः कोशादुपाहृते ।
सिंहासने हर्षदेवस्ततस्तूर्णमुपाविशत् ॥ ८२९ ॥
वैयात्यच्छादितानन्तप्रातिकूल्या तदन्तिके ।
उपाविशच्च सुगला महादेवीत्वसिद्धये ॥ ८३० ॥
तस्याभिषेकशब्देन समघट्यन्त सर्वतः ।
रसितेनाम्बुवाहस्य चातका इव मन्त्रिणः ॥ ८३१ ॥
तद्वार्ताश्रवणेनार्तमुत्कर्षं मन्दिरात्ततः ।
धूर्तो विजयसिंहोपि कृष्ट्वान्यमनयद्गृहम् ॥ ८३२ ॥
आस्थानस्थस्य भूभर्तुरग्रेण स मितानुगः ।
नष्टश्रीर्ददृशे गच्छन्स्थिराः कस्य विभूतयः ॥ ८३३ ॥
तस्य वेश्म प्रविष्टस्य बहिर्विन्यस्य रक्षिणः ।
राज्ञो विजयसिंहस्तत्कृतं कार्यं न्यवेदयत् ॥ ८३४ ॥
कारायां संस्तुताद्राजपार्श्वमानीय ठक्कुरान् ।
तत्सैन्येग्रस्थितेत्याक्षीद्भयं विजयमल्लतः ॥ ८३५ ॥
सोप्यग्रजं प्राप्तराज्यं श्रुत्वा तत्सविधं व्रजन् ।
निन्ये संमान्य तद्दूतैः स्वामेव वसतिं क्षणात् ॥ ८३६ ॥
तत्सैन्यं स्वान्तिकं प्राप्तमथ वीक्ष्य क्षमापतिः ।
आनिनाय तमभ्यर्णं क्षणमात्रेण नीतिवित् ॥ ८३७ ॥
मह्यं प्राणाश्च राज्यं च त्वया दत्तमिति ब्रुवन् ।
स प्राञ्जलिस्तमकरोत्क्लेशसाफल्यदायिनम् ॥ ८३८ ॥
तस्य दैवानुकूल्येन नीत्यैवं सुप्रयुक्तया ।
तत्कालमेव तद्राज्यशय्यायां[1] समुपाविशत् ॥ ८३९ ॥
कारागृहान्तःसंवीतान्येव वासांसि धारयन् ।
सिंहासनेन शुशुभे श्रीसांनिध्यान्नवो नृपः ॥ ८४० ॥

---

१ तद्राज्यं इति स्यात् ।

तादृक्साहससंरम्भपरिश्रान्तो दिनात्यये ।
कृतारोहोथ शय्यायां त्यक्तभार इवापतत् ॥ ८४१ ॥
पश्यन्निव स[1] तामेव सर्वतो विशरारुताम् ।
न स निद्रासुखं तत्र मीलिताक्षोपि लब्धवान् ॥ ८४२ ॥
उत्कर्षौ युद्धिबद्धस्तु मन्त्रं पृच्छन्स्वमन्त्रिणः ।
आक्षिप्यान्यद्वचो रूक्षं नोनकेनेत्यकथ्यत ॥ ८४३ ॥
प्रातः प्रोक्तोसि यन्मन्त्रं तन्नाकार्षीर्महीपते ।
पतितामनयादस्माद्धाविनीं शृणु संविदम् ॥ ८४४ ॥
अध्याक्षिपो बन्धनस्थं त्वं तमुच्छिष्टभोजिनाम् ।
श्वः श्वमांसार्पिणां हस्ते स तु त्वामर्पयिष्यति ॥ ८४५ ॥
शरणं मरणादन्यत्तस्मादस्मिन्क्षणेस्ति किम् ।
त्यक्ताहवानामस्माकं तदप्यप्राप्यतां गतम् ॥ ८४६ ॥
अवसादफलास्वादकालेत्यन्तमरुंतुदम् ।
यद्वोपालम्भपाण्डित्यं न विपक्षेषु शोभते ॥ ८४७ ॥
त्वयापायमनालोच्य य उपायः प्रवर्तितः ।
सर्वमेकपदे तेन मुहूर्तेनैव हारितम् ॥ ८४८ ॥
संस्थाप्यमानो दुर्नीत्या सूच्येव जरढः पटः ।
प्रत्युतोपद्रवोल्पोपि शतद्वारः प्रजायते ॥ ८४९ ॥
एवं श्रुत्वा स तन्मध्यान्निर्गत्याभ्यन्तरं गृहम् ।
अवरुद्धिकया सार्धं विवेश सहजाख्यया ॥ ८५० ॥
तत्र संध्यासमाधिस्थस्तिष्ठामीत्यभिधाय ताम् ।
क्षणं तिरस्करिण्यन्तरेकाक्येवाकरोत्स्थितिम् ॥ ८५१ ॥
निःशस्त्रेण गले क्षिप्त्वा पटच्छेदनकर्तरीम् ।
नाड्यः प्राणहरास्तेन च्छिन्नाः खिन्नात्मना ततः ॥ ८५२ ॥

---

१ च तामेव इत्युचितम् ।

फणत्कारेण कर्तर्याश्च्युताया भुवि शङ्किता ।
अपश्यत्सहजा रक्तं श्च्योतज्जवनिकान्तरात् ॥ ८५३ ॥
सोथ लम्बशिरोनिर्यत्सान्द्रासृग्ददृशे तया ।
वज्रावभग्नशृङ्गान्तः श्च्योतद्धातुरिवाचलः ॥ ८५४ ॥
तस्यास्तदानीमौचित्यं निर्व्यूढं येन योषिताम् ।
भर्तृप्रसादपात्राणामद्याप्युच्चैस्तरां शिरः ॥ ८५५ ॥
व्रजति रजनी त्यक्त्वा क्वापि क्षये क्षणदाकरं
पदमुपगतस्यास्तं संध्या रवेरनुगच्छति ।
इति परिणतौ प्रेमण्युच्चावचे परिचिन्तिते
क्वचन नियमान्निन्द्या वन्द्या न वा सुधियां स्त्रियः ॥८५६॥
कुलाचारपतिप्रेमसादृश्येप्यभवत्तदा ।
कय्यासहजयोर्यस्मान्निन्द्या वन्द्या च पद्धतिः ॥ ८५७ ॥
युग्मम् ॥
सापि हि द्युसदो वेश्मनर्तकी नाट्यमण्डपे ।
दृष्ट्वा तेनावरुद्धात्वं निन्ये राजवधूः पुरा ॥ ८५८ ॥
कान्तास्वगैरिकास्यन्दकृतसान्द्राङ्गरागया ।
प्रेम्णो हेम्न इवौज्ज्वल्यं प्रविश्याग्निं तयार्पितम् ॥ ८५९ ॥
हर्षदेवस्यापि पूर्वं वेश्यात्वे साभवत्प्रिया ।
अतस्तेनार्थ्यमानापि मरणान्न न्यवर्तत ॥ ८६० ॥
चतुर्विंशाब्ददेशीयो दिनद्वाविंशतौ नृपः ।
मृतस्तिष्ठन्निशामेकां प्रातः सोक्रियताग्निसात् ॥ ८६१ ॥
तस्यावरोधलोलाक्ष्यो लोहराद्रिस्थिता अपि ।
कृशानुवर्त्मना काश्चित्पदवीं द्रुतमन्वयुः ॥ ८६२ ॥
शस्त्रं संत्याज्यमानेषु तन्मन्त्रिषु नृपानुगैः ।
मुमूर्षुर्नोनकः शस्त्रं न तत्याज क्षणं यदा ॥ ८६३ ॥

विनास्मान्मन्त्रदो राज्ञः कोन्यः स्याद्यद्दिनैरसौ ।
मोक्ष्यत्यस्मांस्ततः प्राणान्नोपैक्षिष्टाविचारयन् ॥ ८६४ ॥
स्वयूथ्य एवेति वचः प्रशस्तकलशो वदन् ।
तदा संत्याजयामास स्वयं तच्च समर्पितम् ॥ ८६५ ॥

तिलकम् ॥

नोनसिह्लारभट्टारप्रशस्तकलशादयः ।
बद्ध्वाथ हर्षदेवेन कारागारं प्रवेशिताः ॥ ८६६ ॥
इत्येवमेकेनैवाह्ना तादृग्राजविपर्ययः ।
कृतश्च हर्षदेवेन दैवेनेव महाद्भुतः ॥ ८६७ ॥
यथाकथंचिद्भ्युत्क्रान्ता बहवः पृथिवीभृतः ।
प्रतीतिविषमो मार्गः कष्टमापतितोधुना ॥ ८६८ ॥
सर्वोत्साहोदकक्षेत्रं सर्वानुल्लासदूतिका ।
सर्वव्यवस्थाजननी सर्वनीतिव्यपोहकृत् ॥ ८६९ ॥
उद्रिक्तशासनस्फूर्तिरुद्रिक्ताज्ञाक्षयक्षितिः ।
उद्रिक्तत्यागसंपत्तिरुद्रिक्तहरणग्रहा ॥ ८७० ॥
कारुण्योत्सेकसुभगा हिंसोत्सेकभयंकरी ।
सत्कर्मोत्सेकललिता पापोत्सेककलङ्किता ॥ ८७१ ॥
स्पृहणीया च वर्ज्या च वन्द्या निन्द्या च सर्वतः ।
निश्चोद्या चोपहास्या च काम्या शोच्या च धीमताम् ८७२
आशास्या चापकीर्त्या च स्मार्या त्याज्या च मानसात् ।
हर्षराजाश्रया चर्चाकथा व्यावर्णयिष्यते ॥ ८७३ ॥

कुलकम् ॥

नूनं स तैजसैरेव ससृजे परमाणुभिः ।
कुतोन्यथाभूत्प्रसवे दुष्प्रेक्ष्यो महतामपि ॥ ८७४ ॥

न मर्त्येषु न देवेषु तद्वेषो दृश्यते क्वचित् ।
दानवेन्द्रेषु स प्राज्ञैः परमुत्प्रेक्ष्यते यदि ॥ ८७५ ॥
प्रतिमार्कपरीमाणज्वलत्कुण्डलमण्डितः ।
उत्तुङ्गमुकुटानद्धविकटोष्णीषमण्डलः ॥ ८७६ ॥
प्रसन्नसिंहविप्रेक्षी नीचश्मश्रुच्छटाञ्चितः ।
वृषस्कन्धो महाबाहुः श्यामलोहितविग्रहः ॥ ८७७ ॥
व्यूढवक्षः[1] क्षाममध्यो मेघघोषगभीरवाक् ।
सोमानुषाणामपि यत्प्रतिभाभङ्गकार्यभूत् ॥ ८७८ ॥

तिलकम् ॥

सिंहद्वारे महाघण्टाश्चतुर्दिक्कमबन्धयत् ।
ज्ञातुं विज्ञप्तिकामान्स प्राप्तांस्तद्वाद्यसंज्ञया ॥ ८७९ ॥
आर्तां च वाचमाकर्ण्य तेषां तृष्णानिवारणम् ।
प्रावृषेण्यः पयोवाहश्चातकानामिवाकरोत् ॥ ८८० ॥
अचित्रवस्त्रो निर्हेमभूषणोल्पपरिच्छदः ।
ददृशे विगतोष्णीषो न कश्चिद्राजमन्दिरे ॥ ८८१ ॥
सिंहद्वारे नरपतेर्नानाजनसमाश्रिते ।
सर्वदेशश्रियोश्रान्तमासत्राशीकृता इव ॥ ८८२ ॥
अपेतसंख्याः सौवर्णशृङ्खलाकटकान्विताः ।
भ्रेमुर्मन्त्रिप्रतीहारमुख्याः क्षमापतिमन्दिरे ॥ ८८३ ॥
एवं स्फूर्जन्स नृपतिर्नवसाम्राज्यसुन्दरः ।
अभूद्विजयमल्लस्य गुरोरिव मते स्थितः ॥ ८८४ ॥
आदीयमानवचसः कृतज्ञेन महीभुजा ।
तस्याभूत्पार्थिवस्येव सेवकैः संकटा सभा ॥ ८८५ ॥

---

१ वक्षाः इत्युचितम् ।

स्वसेवकाननादृत्य रक्षन्संस्थाव्यतिक्रमम् ।
पित्र्येभ्य एव मन्त्रिभ्यः सोधिकारान्समपर्यत्[1] ॥ ८८६ ॥
द्वारे चकार कंदर्पं मदनं चापि कम्पने ।
अन्यान्विजयसिंहादीन्कर्तव्ये च निजे निजे ॥ ८८७ ॥
तेन प्रशस्तकलशप्रमुखाः शान्तमन्युना ।
बन्धात्संत्यज्य कार्येषु निजेष्वेव नियोजिताः ॥ ८८८ ॥
स्मृत्वापकारान्सुबहूनमात्यो नोनकः परम् ।
धात्रेयेण समं भ्रात्रा कोपाच्छूले विपादितः ॥ ८८९ ॥
काले काले तु कार्येषु संकटेषु महामतिम् ।
संस्मरन्स्वामिभक्तं तं पश्चात्तापेन पस्पृशे ॥ ८९० ॥
योग्यः कृतापकारोपि कदाचिदुपयुज्यते ।
विहितागारदाहोग्निः शरणं भोज्यसिद्धये ॥ ८९१ ॥
संदर्श्याग्रे स्वभार्यायाः कर्णनासावकर्तनम् ।
विश्शाभट्टो राजभृत्यैः शूलेनैव विपादितः ॥ ८९२ ॥
उदये संविभेजे स भृत्यान्कारागविनिर्गतान् ।
मधौ प्रफुल्लः शाखीव भृङ्गान्भूविवरोत्थितान् ॥ ८९३ ॥
राक्केः क्षेमस्य यः पौत्रो वज्रजः स महीभुजा ।
सर्वामात्यप्रधानत्वं निन्ये सुन्नः सहानुजः ॥ ८९४ ॥
राज्ञो यात्रादिसमये प्रेक्षकाणां पदे पदे ।
एक एकोभवन्मन्त्री महीपालभ्रमप्रदः ॥ ८९५ ॥
सर्वप्रतीहारघटामूर्धानमधिरोपितः ।
यायराजोनुजस्तस्य जीवितादधिकोभवत् ॥ ८९६ ॥

---

१ समार्पयत् इत्युचितम् ।

जाह्नवीयात्रया भ्रात्रोरानृशंस्या..... ।
धम्मटः सोपि तान्वङ्गैर्भ्रातृपुत्रैः सहाययौ ॥ ८९७ ॥
संमान्य तं नरपतिः स्वकृते हारिताग्रजम् ।
सभ्रातृपुत्रमद्राक्षीत्स्वाविशेषेण सर्वदा ॥ ८९८ ॥
विभज्य भुञ्जतो राज्यं तस्यैवं प्रेरितः खलैः ।
क्रमाद्विजयमल्लोथ दुद्रुक्षुर्[1]विकृतिं दधे ॥ ८९९ ॥
राज्यं प्रादाः किमन्यस्मै जित्वेत्युक्तः स दुर्जनैः ।
तल्लिप्सुर्मन्त्रयामास वधं प्रथमजन्मनः ॥ ९०० ॥
विजने मन्दिरे हन्यामिति संमन्त्र्य भूपतिः ।
यागं विधाय व्याजेन तेनागन्तुं निमन्त्रितः ॥ ९०१ ॥
मन्त्रे श्रुतिं गते राज्ञः सोथास्कन्दविशङ्कितः ।
आदिदेश स्वसैन्यानां द्रुतं संनहनोद्यतम्[2] ॥ ९०२ ॥
संनद्धे राजसैन्येथ द्रुतं निर्गत्य भूपतेः ।
हृता विजयमल्लेन मन्दुराभ्यस्तुरंगमाः ॥ ९०३ ॥
संहरंस्तुरगान्वीक्ष्य प्रहरन्नृपतेर्बलम् ।
कुर्वन्महाहवं वीरो निर्गन्तुं तत्वरे पुरात् ॥ ९०४ ॥
आश्लिष्य पृष्ठं तिष्ठन्त्या जायया सहितो व्रजन् ।
स चकार तुरंगस्थः संग्राममतिमानुषम् ॥ ९०५ ॥
धारासारैः क्षणे तस्मिन्नकालजलदोज्झितैः ।
विपर्यस्तेव पृथिवी सर्वतः समलक्ष्यत ॥ ९०६ ॥
भांकारमारुतारब्धभूरिभेरीरवे रणे ।
आसारेण शरैश्चासीच्छाद्यमानो नृपात्मजः ॥ ९०७ ॥

---

१ दुध्रुक्षुः इत्युचितम् । २ संनहनोद्यमम् इत्युचितः पाठः ।

तं क्षीयमाणपृतनं यान्तं हन्तुं समुद्यताः ।
कर्माणि प्राकृतानीव न चण्डकसुता जहुः ॥ ९०८ ॥
भग्नसेतुं पयोवेगैर्वितस्तासिन्धुसंगमम् ।
सजानिरतरद्दोर्भ्यामवतीर्य स वाजिनः ॥ ९०९ ॥
सत्त्ववानकरोत्पल्यासज्जनं रिपुसंकटे ।
सिन्धुं प्रवृद्धामुत्तीर्य तुरंगोपि तमन्वगात् ॥ ९१० ॥
द्विषां दृग्गोचराद्यातः स तमारुह्य वाजिनम् ।
दरद्देशोन्मुखो वीरः प्रायाल्लहरवर्त्मना ॥ ९११ ॥
कंदर्पद्वारपतिना सर्वतो रुद्धपद्धतिः ।
गिरीनुल्लङ्घ्य चाविक्षद्विरिगुप्तां दरत्पुरीम् ॥ ९१२ ॥
दरदाभ्यर्चितं तत्र श्रीविद्याधरदेहिना ।
केचिन्निजाः परिजनाः शनकैस्तं प्रपेदिरे ॥ ९१३ ॥
श्रुत्वा स्वीकार्यमाणं च संरम्भं डामरादिभिः ।
प्रायुङ्क्त हर्षपृथ्वीभृदुपायांश्चकितोन्वहम् ॥ ९१४ ॥
तेषु वन्ध्येषु शीतर्तुं सोतिवाह्य दरत्पुरे ।
डामरैः प्रहितालापश्चैत्रे यात्रामदान्मदात् ॥ ९१५ ॥
उत्तीर्य संकटांस्तिष्ठन्मार्गान्तः पटमण्डपे ।
अकस्मादभवन्मानी हिमानीहृतजीवितः ॥ ९१६ ॥
यदुल्लासाय संरम्भो धीरैर्विस्तार्यते महान् ।
कृत्यं हिनस्ति तद्दैवमत्यल्पेनैव वस्तुना ॥ ९१७ ॥
उन्मीलनं तिग्मरुचिः प्रयत्ना-
द्येषां सहस्रेण करैः करोति ।
उन्मूलयत्येककरेण तानि
पद्मानि धाता कुपितो द्विपेन ॥ ९१८ ॥

द्वैराज्यशङ्कया कंचित्कालं संकुचितं ततः।
भूयः प्रभर्यतो[1] लग्नं राज्यं हर्षमहीभुजः ॥ ९१९ ॥
राजशब्दस्तदा सेहे न कुत्राप्यधिरोहणम्।
अत्युदग्रतया तस्मिल्लँघुत्वेनान्यराजसु ॥ ९२० ॥
स शोभादायिनीर्भङ्गीः प्रावर्तयत मण्डले।
निर्मत्सरो नरपतिः पुष्पर्तुरिव कानने ॥ ९२१ ॥
मुक्तकेशा निरुष्णीषा निष्कलाभरणाः पुरः।
संत्यज्यैकं महीपालमभवन्निह देहिनः ॥ ९२२ ॥
धम्मिल्लग्रथनाद्यत्र मदनः कम्पनापतिः।
जयानन्दोप्यमात्याग्र्यश्चित्रार्धोरुकधारणात् ॥ ९२३ ॥
अन्वभूत्पार्थिवक्रोधमविशेषेण मण्डले।
तेन राज्योचितो वेषस्तत्र राज्ञा प्रवर्तितः ॥ ९२४ ॥
युग्मम् ॥
स केषांचिदमात्यानामाकल्पोल्लासशोभिनाम्।
निर्मत्सरः स्वदासीभिरारात्रिकमकारयत् ॥ ९२५ ॥
दाक्षिणात्याभवद्भङ्गिः प्रिया तस्य विलासिनः।
कर्णाटानुगुणष्टङ्कस्ततस्तेन प्रवर्तितः ॥ ९२६ ॥
लडत्तालीदलाः स्थूलचन्दनस्थाससुन्दराः।
रेजुर्जनास्तदास्थाने श्लाघ्यदीर्घासिधेनवः ॥ ९२७ ॥
स्वर्णकेतकपत्राङ्कजूटलम्बोर्जितस्रजः।
चटुलातिलकाश्लिष्टविलोलतिलकाङ्कुराः ॥ ९२८ ॥
अपाङ्गश्रोत्रयोर्बद्धसंधयोञ्जनरेखया।
निर्नीरङ्गिककेशान्तबद्धहेमोपवीतकाः ॥९२९ ॥
अधराम्बरपुच्छान्तैर्लम्बैश्चुम्बितभूतलाः।
प्रच्छादितार्धदोर्लेखकञ्चुकाङ्कपयोधराः ॥ ९३० ॥

---

१ प्रभवतो इति स्यात्।

कर्पूरोद्धूलनस्मेरा भ्रमन्त्यस्तरलभ्रुवः ।
बभ्रुराश्रितपुंवेषा झषाङ्कच्छलदङ्कताम् ॥ ९३१ ॥

चक्कलकम् ॥

अन्योपजीव्यतां प्रापुस्तस्यार्थित्वेन मार्गणाः ।
विश्वाप्यायकतां मेघाः प्रणयेनेव वारिधेः ॥ ९३२ ॥
प्रसादैस्त्यागिनस्तस्य राज्ञः कनकवर्षिणः ।
समस्ता गाथकगणाः पार्थिवस्पर्धितां ययुः ॥ ९३३ ॥
विद्वच्चूडामणिर्भूभृत्पण्डिताग्रत्नमण्डितान् ।
चकार युग्यतुरगच्छत्रादिप्रक्रियाभृतः ॥ ९३४ ॥
कश्मीरेभ्यो विनिर्यान्तं[1] राज्ये कलशभूपतेः ।
विद्यापतिं यं कर्णाटश्चक्रे पर्माडिभूपतिः ॥ ९३५ ॥
प्रसर्पतः करटिभिः कर्णाटकटकान्तरे ।
राज्ञोग्रे ददृशे तुङ्गं यस्यैवातपवारणम् ॥ ९३६ ॥
त्यागिनं हर्षदेवं स श्रुत्वा सुकविबान्धवम् ।
बिल्हणो वञ्चनां मेने विभूतिं तावतीमपि ॥ ९३७ ॥
सौवर्णामलसाराढ्या राजधान्यो धरापतेः ।
सुबह्वयोभ्रंलिहगृहा भ्रेजिरे भुवनाद्भुताः ॥ ९३८ ॥
तदीये नन्दनवने द्रुमेभ्यो न व्यधुः स्थितिम् ।
त्यागिना निर्जितास्तेन केवलं कल्पपादपाः ॥ ९३९ ॥
विविधाभिरशून्याम्बु विहङ्गमृगजातिभिः ।
तेन व्याप्तदिगाभोगं चक्रे पम्पाभिधं सरः ॥ ९४० ॥
सोज्ञासीद्यावतीर्विद्यास्तासां नामापि निश्चितम् ।
वक्तुं नास्त्येव सामर्थ्यं व्यक्तं वाचस्पतेरपि ॥ ९४१ ॥

---

१ विनिर्यातं इत्युचितम् ।

गीतमाकर्ण्यतेद्यापि तस्य वाग्गेयकारिणः ।
विपक्षैरपि पक्ष्माग्रलुठद्बाष्पोदबिन्दुभिः ॥ ९४२ ॥
स्वपतो दिनयामौ द्वौ सर्वकालं विलासिनः ।
दत्तस्थानस्य तस्यासीद्यामिनीषु प्रजागरः ॥ ९४३ ॥
तस्य दीपसहस्राङ्के स्थितस्यास्थानमण्डपे ।
विद्वद्गोष्ठीगीतनृत्तप्रस्तावेन क्षपा ययुः ॥ ९४४ ॥
कथान्ते शुश्रुवे तत्र पर्णचर्वणजः परम् ।
कान्ताधम्मिल्लशेफालीत्रुटिजन्मा च मर्मरः ॥ ९४५ ॥
वितानैः सपयोदेव साग्निवप्रेव दीपकैः ।
रुक्मदण्डैः सशम्पेव सधूमेवासिमण्डलैः ॥ ९४६ ॥
साप्सरा इव कान्ताभिः सनक्षत्रेव मन्त्रिभिः ।
सर्षिसंघेव विबुधैः सगन्धर्वेव गायनैः ॥ ९४७ ॥
नित्यसंकेतवसतिर्धनदस्य यमस्य च ।
एकं विहरणारण्यं दानस्य च भयस्य च ॥ ९४८ ॥
क्षपास्थानस्थितिस्तस्य राज्ञः शक्राधिकश्रियः ।
कस्य वाचस्पतेर्वाचा वक्तुं कात्स्न्र्येन शक्यते ॥ ९४९ ॥

चक्कलकम् ॥

रौक्मैश्च राजतैश्चासीद्व्यवहारस्तदा घनः ।
मण्डले विरलोमुष्मिन्दीन्नारैस्ताम्रजैः पुनः ॥ ९५० ॥
दण्डनायकतां प्राप्य सुन्नः सर्वोन्नतिं भजन् ।
तस्मिन्काले त्वभूल्लोभान्नीचो मुष्टिपचः परम् ॥ ९५१ ॥
निजा जयवने सूर्यामूलके विजयेश्वरे ।
आख्यान्ति यस्य लुब्धत्वं निर्व्ययस्थितयो मठाः ॥ ९५२ ॥
क्षुधितव्याधितानाथदीनाद्यार्तिनिवारणम्[1] ।
सुस्पष्टं प्राप पट्टस्य राज्यलक्ष्मीः कृतार्थताम् ॥ ९५३ ॥

---

१ निवारणात् इत्युचितम् ।

नन्दिक्षेत्रे व्ययीकृत्य प्रत्यब्दं सप्त वासरान् ।
चम्पकः सफलां चक्रे सर्वकालार्जितां श्रियम् ॥ ९५४ ॥
कृष्णाजिनोभयमुखीमुख्यैर्दानैः क्षमाभुजा ।
अदरिद्रीकृता विप्रा निःशेषार्तिच्छिदार्थिनाम् ॥ ९५५ ॥
राज्ञो वसन्तलेखाख्या शाहिवंशप्रियाकरोत् ।
मठाग्रहाराग्रनगरे पूज्ये च त्रिपुरेश्वरे ॥ ९५६ ॥
माहेश्वर्यमयी काचिदित्थं ज्वालेव सोद्ययौ ।
उदारव्यवहारं तु न तद्राज्यं प्रचक्षते ॥ ९५७ ॥
अथ प्रवृद्धिं संप्राप्ताः शनकैर्नवमन्त्रिणः ।
पूर्वामात्यद्विषो राज्ञो मतिमोहं प्रचक्रिरे ॥ ९५८ ॥
कुष्ठार्ताङ्घ्रियुगः शिखी बहुपदं गृह्णाति धावन्नहिं
भानुः पादसहस्रभाक्प्रतिपदं संचार्यतेनूरुणा ।
वञ्च्यन्ते बलिनोपि यल्लघुबलैः सामर्थ्यहीनैश्च य-
द्भ्राम्यन्ते परिपूर्णवृत्तय इदं दैवस्य लीलायितम् ॥ ९५९ ॥
स सर्वशास्त्राधिगमप्रौढः परिवृढो विशाम् ।
यन्मोहितमतिश्चक्रे वैधेयैरपि मन्त्रिभिः ॥ ९६० ॥
विपन्नस्य पितुर्वैरप्रतिकारविधित्सया ।
स राजधानीनामाङ्कं मठादि निरलोठयत् ॥ ९६१ ॥
त्यागी तत्कोशसंभारं व्ययीकुर्वन्नितस्ततः ।
लुब्धस्य चाभिधां तस्य पापसेन इति व्यधात् ॥ ९६२ ॥
शुद्धान्तेशुद्धशीलानां ढौकितं मूढचेतसा ।
स्पष्टं षष्ट्यधिकं राज्ञा स्त्रीणां तेन शतत्रयम् ॥ ९६३ ॥
यादृशीस्तादृशीस्तत्र नारीर्विन्यस्यतानिशम् ।
नागृह्यन्त परं डोम्बजनंगमकुलाङ्गनाः ॥ ९६४ ॥

अत्रान्तरे पूर्यमाणो गूढं कोटपदातिभिः ।
पुनर्भुवनराजोभूल्लहरालब्धिलुब्धधीः ॥ ९६५ ॥
स दर्पितपुरं प्राप्तः कंदर्पद्वारनायकम् ।
श्रुत्वा योद्धुं विनिर्यातं ययौ भूयोप्यदृश्यताम् ॥ ९६६ ॥
तस्मिन्प्रसङ्गेपि नृपो दृप्यन्नाजपुरीपतिः ।
संग्रामपालः केनापि हेतुना विक्रियां ययौ ॥ ९६७ ॥
कंदर्पे कोटभृत्यानां भिन्नानां संग्रहोद्यते ।
क्रुध्यन्नाजपुरीं राजा व्यसृजद्दण्डनायकम् ॥ ९६८ ॥
स महद्भिः समं सैन्यैर्गच्छँल्लोहरवर्त्मना ।
अधीरः कोटकच्छेषु सार्धं मासं व्यलम्बत ॥ ९६९ ॥
प्रत्यासन्नाच्छुचेर्मासात्प्रतापाच्च विरोधिनाम् ।
त्रस्यतस्तस्य यात्रायां न संकल्पोप्यराजत ॥ ९७० ॥
अविशेषज्ञभावेन भर्तुस्तिष्ठन्निरुद्यमः ।
ततो जगाम कंदर्प एवोपालम्भमात्रताम्[1] ॥ ९७१ ॥
कृतप्रतिज्ञोनाहारतया राजपुरीजये ।
उपालम्भार्दितः सोथ निःसामग्र्योप्यवाचलत् ॥ ९७२ ॥
निराहारस्य वसतः कंदर्पस्याद्रिगह्वरे ।
षष्ठेह्नयभूद्राजपुरीयोजनेभ्यधिके स्थिता ॥ ९७३ ॥
अव्याहतः सोरिबलाद्विषच्छस्त्राणि पातयन् ।
कदलीपल्लवान्मृद्नन्वनं सिंह इवाविशत् ॥ ९७४ ॥
दण्डनायकसैन्येभ्यः परमेकस्तमन्वगात् ।
सेनानीः कुलराजाख्यो बुद्धराजकुलोद्भवः ९७५ ॥
तं वाह्यालपां राजपुर्या हतासंख्याहितं द्विषः ।
निहत्य शुक्लच्छत्राङ्कं कंदर्पं मेनिरे हतम् ॥ ९७६ ॥

---

१ पात्रतामित्युचितम् ।

मध्यान्हे स तु कंदर्पः स्वयं संप्राविशद्बली ।
राजधानीं राजपुर्या विंशत्रिंशैः समं भटैः ॥ ९७७ ॥

द्विषां त्रिंशत्सहस्राणि योधानामनिवर्तिनाम् ।
रुरोध राजपुर्यग्रे तत्पदातिशतत्रयम् ॥ ९७८ ॥

काश्मीरकाणां निहतं रणे तत्र शतद्वयम् ।
चत्वारि तु शतान्युर्वी खशानामप्यशेरत ॥ ९७९ ॥

भग्ने रिपुबले दूरमसंख्येयैश्चिताग्निभिः ।
संस्कुर्वद्भिर्हतांत्राशीव्रणो मृत्योर्महानसः ॥ ९८० ॥

तेनैवं स्वाम्युपालम्भवेतालो रभसार्पितः ।
रणश्मशाने वीरेण शमितो मांसशोणितैः ॥ ९८१ ॥

याममात्रावशेषेह्नि पुनरेवाथ संहताः ।
द्विषः परिभवोत्तप्ताः कंदर्पं योद्धुमाययुः ॥ ९८२ ॥

ततस्तानथ नाराचान्निचिक्षेप स संयुगे ।
लिप्तानौषधतैलेन विद्धा यैः प्राज्वलन्दिशः ॥ ९८३ ॥

आग्नेयं वेत्त्यसावस्त्रमिति मूढा विशङ्किताः ।
ते दूरं प्रययुर्भीता निन्दन्तः पुनरागमम् ॥ ९८४ ॥

प्रगल्भभावः प्रतिभानमोजः
प्रयोगचातुर्यमसंभ्रमश्च ।
महाशयानामतिसंकटेषु
धैर्योपनद्धां न धियं जहाति ॥ ९८५ ॥

राजधानीं प्रविष्टः स भानावस्ताभिलाषिणि ।
भूयोप्यपश्यत्संछन्नां बाह्यालीं बहुलैर्बलैः ॥ ९८६ ॥

योद्धुं ययासुः शुश्राव प्राप्तं तं दण्डनायकम् ।
घोरां रणाटवीं दृष्ट्वा भयात्स्थगितसैनिकम् ॥ ९८७ ॥

---

१ हतानासीद्रणो इति स्यात् ।

स्वीयैर्दृष्टैः क्षतैः कैश्चिद्[1]दृप्यन्त्यधिकमाहवे ।
पारकीयैस्त्रसन्त्यन्ये कोन्तरं वेत्ति देहिनाम् ॥ ९८८ ॥
आनीतोथ विनिर्गत्य तेनैव स भये ब्रुडन् ।
स्पर्धमानो यथाम्भोधौ मज्जन्हंसेन वायसः ॥ ९८९ ॥
रक्तप्रजं वीत[2]सैन्यमभिन्नं बहुकोशवत् ।
परराष्ट्रं विशेदेवं स्ववीर्येणैव कोपरः ॥ ९९० ॥
प्रणतात्करमादाय ततो राजपुरीपतेः ।
मासमात्रेण कंदर्पः पुनः स[3] भुवमाययौ ॥ ९९१ ॥
प्रत्युद्गमादिसत्कारैः कृतपूजो महीभुजा ।
स दण्डनायकादीनां शिरःशूलावहोभवत् ॥ ९९२ ॥
परिहासपुरे पारिपाल्यं कुर्वन्कठोरधीः ।
वातगण्डाख्यया ख्यातिं निन्ये यस्तत्र पर्षदा ॥ ९९३ ॥
प्रभूतोत्कोचसंप्रीतसचिवप्रेरणस्पृशा ।
अपास्य वासनं राज्ञा पादाग्रादौ नियोजितः ॥ ९९४ ॥
आनन्दः स क्षणे तस्मिन्निच्छन्द्वाराधिकारिताम् ।
कंदर्पद्वेषिणामासीन्मन्त्रिणामभिसंमतः ॥ ९९५ ॥
तत्प्रेरितस्ततः पातुं लोहरं विप्लुताहितम् ।
मण्डलेश्वरतां दत्त्वा कंदर्पं प्राहिणोन्नृपः ॥ ९९६ ॥
मन्त्रविक्रमसंपन्नः कुभृत्यैः स्वोदयेप्सुभिः ।
युक्त्या तया राजपशोः समीपात्सोपवाहितः ॥ ९९७ ॥
दूत्यार्होयमिति प्रहाय निकटाद्देशान्तरं वाग्मिनं
सूरिं बन्धुवियोगकृन्नु वचोमुष्येति संत्यज्य च ।
शूरं राज्यमसौ हरेदिति [4]तया हित्वा विचारोज्झितो
धूर्तप्रेरणयाबुधो नृपपशुर्नायाति नाशं चिरात् ॥ ९९८ ॥

---

१ केचित् इति स्यात् । २ वीरसैन्यं इत्युचितम् । ३ स्वभुवं इत्युचितम् । ४ भ-
यात् इति स्यात् ।

अदर्शनात्सुबद्धापि कंदर्पप्रीतिराशयात् ।
राज्ञो जगाल कालेन सा मुष्टेरिव वालुका ॥ ९९९ ॥
उत्कर्षपुत्रावादाय चिकीर्षुर्लोहरेशताम् ।
कंदर्पो वर्तत इति क्षितिपं मन्त्रिणोवदन् ॥ १००० ॥
तथेति नृपतिर्गृह्णन्बन्द्धुं हन्तुमथाशु तम् ।
ससैन्यं व्यसृजत्पट्टं टक्कं चासिधराभिधम् ॥ १००१ ॥
तयोः संप्राप्तयोर्वार्तां तां लेख्यव्यत्ययाद्विदन् ।
विमुखश्चकितात्मा च कंदर्पोभूद्यथा[1] मुहुः ॥ १००२ ॥
केलिद्यूतक्षणे हस्तं मृद्नन्सेवकवत्पुरः ।
आसीदसिधरस्तस्य बन्द्धुमभ्युद्यतस्तदा ॥ १००३ ॥
ततः पाणिं विनिष्कृत्य[2] सोङ्गुष्ठाग्रेण तत्करम् ।
अमृद्नाद्येन निस्त्वक्त्वं क्लिन्नः पक्षीव सोगमत् ॥१००४॥
अनन्तरज्ञो भूभृच्च तेनात्मा च नृपाश्रितः ।
विगर्ह्यते स्म खिन्नेन पट्टश्चैवमकथ्यत ॥ १००५ ॥
नेयाशयो नरपतिः कुटुम्बं प्रहिणोतु मे ।
अर्पयित्वा ततः कोट्टं प्रयास्यामि दिगन्तरम् ॥ १००६ ॥
आनीय दत्तांस्तैर्ज्ञातीनादाय द्रोहवर्जितः ।
स विमुक्ताधिकारोथ मन्त्री वाराणसीं ययौ ॥ १००७ ॥
हत्वा गयायां सामन्तमेकमन्यं निवेश्य च ।
काश्मीरकाणां चक्रे स श्राद्धशुल्कनिवारणम् ॥ १००८ ॥
स हत्वा चौरसेनान्यं ससैन्ये दुर्गमेध्वनि ।
पूर्वाशामध्वनीनां च व्यधान्निर्धूतकण्ठकम्[3] ॥ १००९ ॥

---

१ यदा इत्युचितम् । २ विनिष्कृष्य इत्युचितम् । ३ कण्टकाम् इत्युचितम् ।

व्याघ्रं निहत्योग्रसत्त्वं वाराणस्यां निरस्यता ।
पूर्वा दिग्भूषिता तेन मठैः सुकृतकर्मठैः ॥ १०१० ॥
ते तन्निर्वासनादेव लब्धलक्षाः कुमन्त्रिणः ।
अन्योन्यासूयया जघ्नुरथ कार्याणि भूभुजः ॥ १०११ ॥
स्वैराहारोदितगुरुमदाः शृङ्गकण्डूतिशान्त्यै
दुर्वारेर्ष्याकलुषमतयो यत्र दुर्मन्त्रिमेषाः ।
घ्नन्त्यन्योन्यं भवति गणितैर्वासरैरेव कैश्चि-
न्मध्यस्थाणोरिव नरपतेस्तत्र सर्वाङ्गभङ्गः ॥ १०१२ ॥
अतिक्रामति कालेथ पार्थिवं हन्तुमुद्यमम् ।
दुंदुक्षुर्[1] जातराज्येच्छस्तान्वङ्गिर्धम्मटोभजत् ॥ १०१३ ॥
द्रोहापवादभागेष भवेद्राज्यमिदं पुनः ।
मामेव वेश्यापुत्रत्वादनर्हंस्मिन्नुपैष्यति ॥ १०१४ ॥
इति संमन्त्र्य सुचिरं निहन्तुं पृथिवीभुजम् ।
प्रेरितो जयराजोभूत्तेनासरलचेतसा ॥ १०१५ ॥
युग्मम् ॥
विलावग्रामजान्क्षिप्त्वा तीक्ष्णान्द्रोहाय भूपतेः ।
सोवरोधवधूर्द्धित्रा विदधे मध्यपातिनीः ॥ १०१६ ॥
क्रमात्सिद्ध्युन्मुखे तस्मिन्कार्ये राजपुरीं नृपः ।
दूत्याय व्यसृजज्जातु बहुमानेन धम्मटम् ॥ १०१७ ॥
सहस्रमङ्गलगृहे सुदिनापेक्षया स्थिंतिम् ।
तं सिद्धिभङ्गचकितो जयराजः समाययौ ॥ १०१८ ॥
तमर्थं मण्डपे गूढं तयोर्मन्त्रायमाणयोः ।
प्रयागानुचरः कश्चिद्भित्तिव्यवहितोशृणोत् ॥ १०१९ ॥

---

१ दुध्रुक्षुः इत्युचितम् । २ स्थितम् इत्युचितम् । ३ मन्त्रयमाणयोः इत्युचितम् ।

तदावेदिततद्भार्तात्प्रयागात्तत्कथां ततः ।
बुद्ध्वा निवर्तयामास धम्मटं गमनान्नृपः ॥ १०२० ॥
कुलक्षयभयात्तिष्ठंस्तत्प्रतीकारमन्थरः ।
स्वमेव केवलं रक्षन्नासीत्स चकितोन्वहम् ॥ १०२१ ॥
असिद्धिं जयराजस्तु दृष्ट्वा दूतैः स्वसंमुखौ ।
शमालडामरौ वीरौ वागपाजाभिधौ व्यधात् ॥ १०२२ ॥
स्वभृत्यैर्भेदनिर्यातैर्यियासुं तं निवेदितम् ।
श्रुत्वा क्षपायां क्षितिभृद्दिक्षु चिक्षेप रक्षिणः ॥ १०२३ ॥
व्याजाद्यात्रां वदन्सज्ज्ञः प्रातस्तान्वङ्गिरेव तम् ।
चतुष्कं पूजने धूर्तो जयराजमुपानयत् ॥ १०२४ ॥
राज्ञो दत्तार्गले धाम्नि स्थितस्यास्थानमण्डपम् ।
सत्रा स भ्रातृपुत्रेण धम्मटेन ततोविशत् ॥ १०२५ ॥
रक्षिणोथ बहिर्न्यस्य प्रयागः पार्थिवाज्ञया ।
जयराजं बधानेति नीचैर्धम्मटमभ्यधात् ॥ १०२६ ॥
धम्मटे विश्वसञ्शस्त्रं जयराजस्त्यजेद्ध्रुवम् ।
निदेशेनामुना वेत्ति स्वमज्ञातं च धम्मटः ॥ १०२७ ॥
द्वयोरेकस्य वा युद्धे तयोर्मृत्यौ हितं च नः ।
व्यक्तीकृतैक्ययोर्वापि वधो लोकेप्यगर्हितः ॥ १०२८ ॥
इति निर्ध्यायतः शश्वदविरोधेन वेधसः ।
प्रज्ञास्य[1] प्रत्यभाद्राज्ञो मन्त्रो युक्ततमस्तथा[2] ॥ १०२९ ॥
तिलकम् ॥
नाबुद्ध मां ध्रुवं राजा तान्वङ्गिरिति विश्वसन् ।
जयराजमुपागत्य ततो धार्ष्ट्याद्वचोब्रवीत् ॥ १०३० ॥

---

१ प्राज्ञस्य इत्युचितम् । २ तदा इत्युचितम् ।

अप्रसन्नस्त्वयि नृपो यद्यद्रोहोसि निश्चयात् ।
तत्त्वयाशु विशुद्ध्यर्थमसिधेनुः समर्प्यताम् ॥ १०३१ ॥
दैवेन वा मोहितः स तद्विश्वासेन वात्यजत् ।
आक्षिप्यमाणः शस्त्रास्त्रकोविदः शस्त्रमन्यवत् ॥ १०३२ ॥
वैक्लव्यदर्शनात्सेर्ष्यस्ततः स परुषां गिरम् ।
तन्वङ्गपौत्रश्चुल्लाख्यस्तं जगादाज्जकात्मजः ॥ १०३३ ॥
न त्वं निःसत्त्व कय्याया जातः कलशभूभुजा ।
आसीज्जनयिता नूनं क्लीवो यः कश्चिदेव ते ॥ १०३४ ॥
निष्ठायां धैर्यचर्याणां परिणाममजानता ।
तेनेत्युक्तः स शीताम्बुसिक्तसुप्तोपमोभवत् ॥ १०३५ ॥

युगलकम् ॥

द्रोहोदन्तं पृच्छ्यमानो धीरस्तन्मध्यपातिनम् ।
यातनाक्लेशितोप्यूचे स्वमेव न तु धम्मटम् ॥ १०३६ ॥
विषघ्नमन्त्रवीर्येण मोघीकृतविषाशनः ।
रज्ज्वा निपीड्य ग्रीवाग्रं ततो निशि विपादितः ॥१०३७॥
जय्यकेन प्रतीहर्त्रा शिरश्छित्त्वोज्झितं ययौ ।
भट्टारनड्वलातोये तद्वपुर्मत्स्यभोज्यताम् ॥ १०३८ ॥
तमेकसप्तते वर्षे हत्वा भाद्रपदे नृपः ।
वधं गभीरहृदयो धम्मटस्याप्यचिन्तयत् ॥ १०३९ ॥
आदिदेशाथ तत्सिद्ध्यै रहः शस्त्रभृतां वरम् ।
शूरं कलशराजाख्यं ठक्कुरं लोहराश्रयम् ॥ १०४० ॥
प्रहिणोति यदा दूतं प्रयागस्ते तदा त्वया ।
संपाद्यमेतदित्यूचे तं चोपचितसत्क्रियम् ॥ १०४१ ॥

असिद्धिभीत्या स्वं दूतं[1] स प्रहिण्वन्प्रयागकः ।
संमन्त्र्य क्रियतामेतदित्यूचे कुपितो नृपम् ॥ १०४२ ॥
राज्ञि मन्त्रियमाणेथ[2] पश्चानीयाद्यमन्त्रिणः ।
वामनः सार्गले द्वारे त्यक्तदेहोब्रवीद्वचः ॥ १०४३ ॥
मन्त्रश्च मन्त्रिणश्चैते न यावन्निःसृता बहिः ।
तावत्क्रियेत चेदेतन्न भद्राणि दरिद्रति ॥ १०४४ ॥
राजाज्ञया प्रयागेण ततो दूते विसर्जिते ।
तीक्ष्णः कलशराजाख्यस्तनयाभ्यां सहाययौ ॥ १०४५ ॥
तस्मिन्प्रसङ्गे तान्वङ्गिः श्येनस्य ददृदातपम् ।
राजधान्यन्तरेवासीद्भित्रैरनुचरैः समम् ॥ १०४६ ॥
पुरः कलशराजं तं दृष्ट्वा पश्चाच्च तत्सुतौ ।
यावत्सशङ्कमाचख्यौ तावद्भृत्यैर्निजैर्जहे ॥ १०४७ ॥
शक्तोपि धम्मटः कृष्टुं कृपाणीमिति वादिनम् ।
हन्तुं कलशराजं तु यावच्छस्त्रे व्यधात्करम् ॥ १०४८ ॥
तावत्तेनाग्रतः पश्चात्तत्पुत्राभ्यां कृताहतिः ।
आसनादुच्चलन्नेव क्षिप्रं प्राणैरमुच्यत ॥ १०४९ ॥
मुमूर्षुणा क्षतस्तेन ज्यायान्कलशराजजः ।
चित्रमायुधवैगुण्यान्नाभीक्ष्णव्रणितोभवत् ॥ १०५० ॥
तस्य ह्यभाग्ययोगेन तेष्वेवाहःसु शस्त्रिणः ।
निजा कृपाणी तुत्रोट तेनाभद्रायुधोभवत् ॥ १०५१ ॥
निहत्य पातितः पृष्ठात्स तैर्व्याधैरिवाण्डजः ।
शुनां ग्रासाय संत्यक्तः श्वपाकैः पार्थिवाज्ञया ॥ १०५२ ॥
राज्ञा तन्वङ्गनप्तारौ स्वयं रङ्गणसङ्गणौ ।
आगत्य प्राङ्गणे त्यक्तकृपाणी परिरक्षितौ ॥ १०५३ ॥

---

१ दूतमप्रहिण्वन् इति स्यात् । २ मन्त्रयमाणे इत्युचितम् ।

दत्तास्कन्दास्तु दुल्लाद्याः संरम्भेण युयुत्सवः ।
मायया उदयसिंहेन दाम्भिकेनैत्य वञ्चिताः ॥ १०५४ ॥
यूयं पुत्रा ममेत्युक्तवतस्ते धार्मिकस्य यत् ।
प्रत्ययात्तस्य शस्त्राणि तत्यजुर्जीवितेच्छवः ॥ १०५५ ॥
राज्ञो विशुद्धिः क्रियतां पार्श्वमेत्येति तद्वचः ।
तैः समागत्य जगृहे मार्गो राजगृहान्प्रति ॥ १०५६ ॥
तन्वङ्गजगृहोच्छिष्टैर्बाल एव विवर्धितः ।
दुल्लं ततो विहस्यैवं स्वच्छत्रग्राहकोवदत् ॥ १०५७ ॥
तन्वङ्गनप्तो यत्पूर्वं जयराजमभाषथाः ।
न त्वं निःसत्त्व कय्याया इति तद्विस्मृतं तव ॥ १०५८ ॥
स ते तादृश एवायं वर्तते संकटः[1] क्षण ।
किं धैर्यावसरे मूढ वैक्लव्यमवलम्बसे ॥ १०५९ ॥
तस्माज्जातोसि नियतं मत्पित्रोच्छिष्टमुष्टिना ।
अहं तु तेन वीरेण त्वत्पित्रा कीर्तिभागिना ॥ १०६० ॥
इत्युक्त्वा स रणे गृह्णन्खड्गधाराजलं[2]ज्जलाम् ।
पपात जन्ममालिन्यं मानी प्रक्षालयन्निव ॥ १०६१ ॥
नृपान्तिकं प्रयास्याम इति निश्चयतस्ततः ।
दुल्लादीन्राजपुरुषाः कारागारे निचिक्षिपुः ॥ १०६२ ॥
ते यौवनभरोन्मत्ता द्रुमा वासन्तिका इव ।
प्रत्यभासन्त कारुण्याद्रक्षणीयाः क्षमाभुजः ॥ १०६३ ॥
टक्कस्तु बिम्बियो नाम पापः संप्रेक्ष्य भूभुजम् ।
न्यजिग्रहत्तान्ग्रीवासु निशि पाशान्निवेशयन् ॥ १०६४ ॥
गुल्लो[3] विजयराजश्च वल्लो गुल्लश्च तेलुठन् ।
तन्वङ्गपौत्राश्चत्वारो हता वध्यमहीतले ॥ १०६५ ॥

---

१ संकटक्षणः इत्युचितम् । २ झलज्झलाम् इति स्यात् । ३ टुल्लो इति स्यात् ।

हतानामपि सौन्दर्यं तेषामद्यापि वर्ण्यते ।
कथान्तरे वयोवृद्धैर्बद्धास्रुस्यन्ददुर्दिनैः ॥ १०६६ ॥
सतताभ्यस्ततास्रूलैः स्रस्तैस्तद्दशनाङ्कुरैः ।
कीर्णगोणाश्ममालेव सुचिरं वध्यभूरभूत् ॥ १०६७ ॥
वृद्धिमानीतयो राज्ञाप्युत्कर्षापत्ययोस्ततः ।
ज्यायान्प्रमिम्ये डोम्बाख्यो गूढदण्डैः कुलच्छिदा॥१०६८॥
स्फुलिङ्गमिव संभाव्य तेजोविस्फूर्जितं शिशुम् ।
जघान जयमल्लं च तद्वद्विजयमल्लजम् ॥ १०६९ ॥
गोसृन्स्वगोत्रजान्हत्वा भोक्तुमेकस्य कस्यचित् ।
कुर्वन्ति दैवोपहता राज्यं निष्कण्टकं नृपाः ॥ १०७० ॥
संरूढं मधुगोलमुच्चविटपव्यूहावलीगह्वरे
मूढः कर्तुमकृच्छ्रहार्यमभितः कस्यापि भव्यात्मनः ।
दैवप्रेरणया प्रकम्पविवशः पत्त्रप्रहारैर्दृढं
तद्गोसृन्मधुपान्निहत्य शमयत्यश्वत्थपृथ्वीरुहः ॥ १०७१ ॥
ज्ञातिद्रोहमहापाप्मनष्टधीरथ पार्थिवः ।
डिम्बानामप्यसंभाव्यामभजद्विटभोज्यताम् ॥ १०७२ ॥
वामनस्यात्मजः क्षेमस्तं जानञ्जनकद्विषम् ।
प्रैरयत्कलशेशस्थच्छत्रहेमनिबर्हणे ॥ १०७३ ॥
तामिच्छामच्छिनत्तस्य भक्तो युक्त्या प्रयागकः ।
धावतः श्वभ्रपातेच्छां धीरो यन्तेव दन्तिनः ॥ १०७४ ॥
अनिशं नष्टचेष्टानां शवानामिव भूभुजाम् ।
अन्तःप्रवेशकुशलो यो वेताल इवाभवत् ॥ १०७५ ॥

---

१ शोणाश्म इत्युचितम् । २ डिम्भानां इत्युचितम् ।

नप्ता हलधरस्याथ विटो लोष्टधराभिधः ।
जगाद निर्जने जातु राजानं रञ्जनेच्छया ॥ १०७६ ॥
युग्मम् ॥
ह्रियतां ग्रामहेमादि कलशेश्वरसंश्रयम् ।
तत्प्रसादाश्मभिः सेतुं वितस्तायां करोमि ते ॥ १०७७ ॥
आलेख्यं गगने लिखामि बिसिनीसूत्रैर्वयाम्यम्बरं
स्वप्नालोकितमानयामि कनकं ग्रन्नामि वप्रं हिमैः ।
इत्याद्युक्तमपि स्फुटं जडमतिर्जानाति सत्यं नृपो
यस्ताद्दक्त्रपया न वक्ति स गतप्रौढिः परं वञ्चयते ॥ १०७८
निषिषेध चिकीर्षां तु प्रयागस्तामपि प्रभोः ।
सदुपस्थायिकोपथ्याभ्यर्थनामिव रोगिणः ॥ १०७९ ॥
अथ लोष्टधरो हास्यावसरे जातु भूपतिम् ।
बद्धस्य मोक्षो देवस्य क्रियतामित्यभाषत ॥ १०८० ॥
स्मित्वा किमेतदित्युक्तवन्तं तं स व्यजिज्ञपत् ।
तदभुण्डपुरे भीम·····श्चाहिरभूत्पुरा ॥ १०८१ ॥
विरोधात्परिपन्थानां तत्कृतो भीमकेशवः ।
राज्ये कलशदेवस्य बद्धद्वारोभवच्चिरम् ॥ १०८२ ॥
तैः शान्तवैरैर्विदधे यदाथ विवृताररिः ।
चौरापहृतदुर्वर्णकवचो ददृशे तदा ॥ १०८३ ॥
भूयोपि चक्रे तद्भीत्या कोशसामग्र्यभागिति ।
ततः प्रभृत्यद्य यावद्बद्धद्वाराररिः स्फुटम् ॥ १०८४ ॥
आदीयतां तदीयस्तत्कोशश्चौरभयावहः ।
सोपि बन्धाद्विमुक्तोस्तु पुष्पदीपादिभोगभाक् ॥ १०८५ ॥

---

१ तत्प्रासादाश्मभिः इति समुचितः पाठः । २ उदभाण्डपुरे इति स्यात् । ३ शाहिः इति स्यात् । ४ पारिषद्यानां इति स्यात् ।

इति संप्रेरितस्तेन तथा चक्रे स भूपतिः ।
कोशं ततः प्रपेदे च मणिस्वर्णादिनिर्भरम् ॥ १०८६ ॥
अचिन्तयच्च यत्रेदृग्वस्तु शून्यसुरास्पदे ।
कीदृक्तत्रापरेषु स्यादाढ्येषु सुरवेश्मसु ॥ १०८७ ॥
कृतप्रायः स तत्रत्यैः पारिषद्यैस्ततो नृपः ।
निष्क्रयं रूढभारोढिवारणेन प्रदापितः ॥ १०८८ ॥
क्रमेण सेनानानाङ्गव्ययव्यसनशालिनः ।
सुरार्थहरणे रूढा धीः संभावनया तया ॥ १०८९ ॥
पूर्वराजार्पितान्कोशांस्ततः स भुवनाद्भुतान् ।
सर्वगीर्वाणवेश्मभ्यो लुब्धबुद्धिरपाहरत् ॥ १०९० ॥
हृतेषु कोशेष्वानेतुं देवानां प्रतिमा अपि ।
चकारोदयराजाख्यं देवोत्पाटननायकम् ॥ १०९१ ॥
वदनेषु स नग्नाटैः शीर्णघ्राणाङ्घ्रिपाणिभिः ।
मूर्तिनाशाय देवानां शकृन्मूत्राद्यपातयत् ॥ १०९२ ॥
स्वर्णरूप्यादिघटिता गीर्वाणाकृतयोलुठन् ।
अध्वस्विन्धनगण्डाल्य इव सावस्करेष्वपि ॥ १०९३ ॥
विबुधप्रतिमाश्चक्रुराकृष्टा गुल्फदामभिः ।
थूत्कारकुसुमच्छन्ना रुग्ण[1]नग्नाटकादयः ॥ १०९४ ॥
ग्रामे पुरेथ नगरे प्रासादो न स कश्चन ।
हर्षराजतुरुष्केण न यो निष्प्रतिमीकृतः ॥ १०९५ ॥
तस्य देवावधूष्यौ द्वौ परमास्तां प्रभाविनौ ।
नगरे श्रीरणस्वामी मार्त्तण्डः पत्तनेष्विव ॥ १०९६ ॥
द्वौ महाप्रतिमामध्याद्बुद्धबिम्बावरक्षताम् ।
दानप्रसङ्गे तं जातु याचित्वा त्यागिनं नृपम् ॥ १०९७ ॥

---

१ रुग्ण इत्युचितम् ।

परिहासपुरे जन्ममेदिन्यां कनकाभिधः ।
गायनः कुशलश्रीश्च श्रमणो नगरान्तरे ॥ १०९८ ॥
अधिगतवतां लोके विश्वाद्भुतामपि संपदं
न खलु विरतिर्दुष्कर्मभ्यो धनार्जनकाङ्क्षिणाम् ।
किमपि कमलावास्यै पद्माकरोद्धृतिपातकं
भजति कमलालीलावासो भवन्नपि हि द्विपः ॥ १०९९ ॥
पैतामहेन पित्र्येण तथा राज्यचिकीर्षया ।
लोहरादाहृतार्थस्य कोशेनोत्कर्षभूपतिः[1] ॥ ११०० ॥
युक्तोपि पूर्वराजार्थं देवौकोभ्यो जहार यः ।
ऐच्छद्धनार्जनं हा धिक्सोपि वास्तव्यपीडया ॥ ११०१ ॥
युग्मम् ॥
तदाज्ञामात्रमादाय सचिवैरथ पापिभिः ।
ते ते नवनवायासनामाङ्का नायकाः कृताः ॥ ११०२ ॥
कालानुवृत्तिपरतां धिग्धिग्राजोपजीविनाम् ।
यत्र मन्त्री वयस्थः सन्सदाचारोपि गौरकः ॥ ११०३ ॥
सर्वदेवगृहग्रामसर्वस्वापहृतिव्रतम् ।
स्वीचकाराज्ञया भर्तुरर्थनायकतामपि ॥ ११०४ ॥
युग्मम् ॥
पार्षदः समरस्वामिदेवागारे च हेलकः ।
आप्तो विजयमल्लस्य यो राज्ञो द्वेष्यतां ययौ ॥ ११०५ ॥
द्विगुणोत्पत्तिदानेन सोर्थनायकतां गतः ।
लब्धावकाशो राजाग्रे क्रमेणासीन्महत्तमः ॥ ११०६ ॥
किमन्यद्धरता तेन सर्वार्थान्सर्वनायकैः ।
व्यधीयत धनावाप्त्यै पुरीषस्यापि नायकः ॥ ११०७ ॥

---

१ भूपतेः इत्युचितम् ।

श्रीगर्भपदपर्यायच्छन्नजाड्यप्रभावतः ।
तथार्जितस्य कोशस्य सोनुरूपव्ययोभवत् ॥ ११०८ ॥
मृगीदृशां दुर्लभतां हयानां
श्वासान्विटानां कुवचःसहत्वम् ।
वैतालिकानां च विकत्थनत्वं
क्रेतुं क्षितीशाः क्षपयन्ति लक्ष्मीम् ॥ ११०९ ॥
कोपप्रसादैर्दयिताजनस्य
हयादिवृत्तान्तगवेषणेन ।
भृत्यानुवृत्त्या मृगयाकथाभी
राज्ञां शिशूनामिव याति कालः ॥ १११० ॥
विलासहासासनयानदान-
पानाशनाद्या असतीः सतीर्वा ।
छायेव चेष्टाः क्षितिपालवर्गः
परानुकारेण करोति सर्वाः ॥ ११११ ॥
अमानुषत्वं पुरुषाधिराजा
विटस्तवैः स्वस्य विचिन्त्य सत्यम् ।
तृतीयमक्ष्यभ्यधिकं भुजौ वा
ममेति मत्वा न विदन्ति मृत्युम् ॥ १११२ ॥
निशासु येषां प्रभवन्ति दारा
दिनेष्वमात्या नियताधिकाराः ।
अहो भ्रमः स्वस्य यदत्र तेपि
विदन्ति भूपाः प्रभविष्णुभावम् ॥ १११३ ॥
स्वादूचितं स्वादुतयैव भुङ्क्ते
थूत्कृत्य मुञ्चत्यपि थूत्कृतानि ।

वित्रासितस्त्रासमुपैत्यकस्मा-
द्भूभृच्च बालश्च समानभावः ॥ १११४ ॥
जाड्यमित्यादि यत्किंचित्क्षितिपानां कटाक्षितम् ।
तत्सर्वं हर्षदेवस्य जाड्येन लघुतां ययौ ॥ १११५ ॥
तुष्टः पटहवाद्येन हृद्यातोद्यविदे ददौ ।
भीमनायकनाम्ने स करिणं करिणीसखम् ॥ १११६ ॥
स्वशिष्यस्तेन तस्यासीद्वायनः कनकोथ सः ।
चण्पकावरजः खेदाद्गीताभ्यासकृतोद्यमः ॥ १११७ ॥
प्रसादीकृतमस्मै च खेदच्छेदनमिच्छता ।
तेन काञ्चनदीन्नारलक्षमक्षतचेतसा ॥ १११८ ॥
कर्णाटभर्तुः पर्माण्डेः[1] सुन्दरीं चन्दलाभिधाम् ।
आलेख्यलिखितां वीक्ष्य सोभूत्पुष्पायुधक्षतः ॥ १११९ ॥
उत्तेजयन्ति संघर्षे हास्ये जडमतीन्विटाः ।
सारमेयानिवाजस्रं प्रोत्साह्य प्राकृताशयाः ॥ ११२० ॥
स विटोद्रेचितो वीतत्रपश्चक्रे सभान्तरे ।
प्रतिज्ञां चन्दलावाप्त्यै पर्माण्डेश्च विलोडने ॥ ११२१ ॥
कृतापक्रिमकर्पूरपरित्यागं प्रतिज्ञया ।
तं च स्तुतिमिषादेवं जहसुः कविचारणाः ॥ ११२२ ॥
भाषावेषविशेषतः परिगतस्त्वं दाक्षिणात्योध्वगो
गन्धादप्यवधारितं यदुत ते कर्पूरकोलं करे ।
पक्वं चेदिदमङ्ग हर्षनृपतेस्तत्कल्पयोपायनं
नो चेत्तिष्ठतु नालिकेरकुहरे संप्रत्यमुष्मिन्यतः ॥ ११२३ ॥
आ कर्णाटवसुंधराधववधादा चन्दलालिङ्गना-
दा कल्याणपुरप्रवेशनविधेरा पिम्मलादर्शनात् ।

---

१ पर्माडेः इति स्यात् ।

आ राजाश्रयकाननान्तवसुधापार्द्धिकौतूहला-[1]
देवेन प्रतिषिद्धमिद्धमहसा पोतासंचर्वणम् ॥ ११२४ ॥
विटः प्रसाद्य नृपतिं मदनः कम्पनापतिः ।
महत्तरत्वं जग्राह तस्याश्चित्रार्पिताकृतेः ॥ ११२५ ॥
वस्त्रालंकारनिर्वाहकृतेमुष्याश्च वेतनम् ।
नित्यमादत्त भूपालाद्दायमीर्ष्याशमाय च ॥ ११२६ ॥
विटत्वे निस्त्रपत्वे च मदनस्य कथाक्रमः ।
मौग्ध्ये पारिप्लवत्वे च नृपस्य निकषोभवत् ॥ ११२७ ॥
मातेयं वर्द्धिकी[2] नाकात्तवानीतेति वादिभिः ।
संदर्श्य जरतीं नारीं मुषितः सोपरैर्विटैः ॥ ११२८ ॥
दासीश्च देवता एता इत्युक्त्वान्यैः प्रवेशिताः ।
उन्नतिं च श्रियं चौज्झत्प्रणमज्जहसे जनैः ॥ ११२९ ॥
दास्यो मदनसंलापमन्ध्रालेखकारिभिः ।
अध्यापिता विटैस्तस्य मतिमोहं प्रचक्रिरे ॥ ११३० ॥
ताभ्यः काभिरपि क्ष्माभृत्सुरतं समयोचितम् ।
वाञ्छन्तीभिः कृतः स्वाङ्गस्पर्शाद्भाग्याशयोज्झितः॥ ११३१॥
आयुष्कामाय भूयांसं कालं जीवितकाङ्क्षिणे ।
आयुर्वर्षशतान्यस्मै ता मूढमतये ददुः ॥ ११३२ ॥
डोम्बेन पिण्डसिद्ध्यर्थी केनाप्येतद्रसायनम् ।
पिण्डसिद्धिकृदित्युक्त्वा पेयं किमपि पायितः ॥ ११३३ ॥
किं तस्य कथितैरन्यैर्मौग्ध्यैर्यो याचितो विटैः ।
विद्यमानादिव धनादायुषोपि व्ययं व्यधात् ॥ ११३४ ॥
बलरूपेच्छुरपरानुपायान्यानसेवत ।
कथयेत्कः सदाचारस्तानतोपि त्रपावहान् ॥ ११३५ ॥

---

१ पार्पद्धिकौतूहलात् इत्युचितम् । २ वप्पिका इति स्यात् ।

स एवमन्धतामिस्रे निक्षिप्तः शाश्वतीः समाः ।
मुग्धबुद्धिः स्वजाड्येन दुर्जातैश्च कुमन्त्रिभिः ॥ ११३६ ॥
मेघवाहनमुख्यानां कृते[1] लोकोत्तरे यथा ।
सन्त्यद्याल्पधियः केचित्संदेहान्दोलिताशयाः ॥ ११३७ ॥
तथास्मिन्नपि दुष्कृत्ये वर्ण्यमानेद्भुतावहे ।
भविष्यतीव कालेन नूनमप्रत्ययो जनः ॥ ११३८ ॥
राज्ये बहुच्छले तादृग्दुर्नीत्योपहतोप्यभूत् ।
आयुःशेषेण न वशे स रन्ध्रान्वेषिणां द्विषाम् ॥ ११३९ ॥
नर्तकीः शिक्षयन्रात्रावुत्थायाभिनयं स्वयम् ।
तिष्ठन्दीपोज्ज्वले धाम्नि दूरात्केनापि शत्रुणा ॥ ११४० ॥
क्षिप्तेषुरपि नाभूद्यन्निहतो व्रणितोथवा ।
फलं तस्यायुःशेषस्य[2] प्रजानां कुकृतस्य वा ॥ ११४१ ॥
कश्चिदेवाथ शुद्धान्ते पातदूतो महीपतेः ।
सर्वशुद्धनिधेः प्राभून्नारीचारित्रविप्लवः ॥ ११४२ ॥
ते युवानो मदोन्मत्तास्ताः स्त्रियो यौवनोन्मदाः ।
नाशाय हर्षदेवस्य तस्मिन्नेवाभवन्क्षणे ॥ ११४३ ॥
निगृहीतास्तेन रोषात्सजाराः काश्चन स्त्रियः ।
काश्चित्त्वाकृष्य शुद्धान्ताज्जारैर्नीता दिगन्तरम् ॥ ११४४ ॥
स्वेन दौःशील्यदोषेण सर्व एव विशङ्किताः ।
भृत्यास्तस्याशुभान्यैच्छन्नयतन्त च शान्तये ॥ ११४५ ॥
तस्यापि शीलवैकल्यं तावत्सर्वत्र पप्रथे ।
यावत्कलशभूपालात्संजातस्योपपद्यते ॥ ११४६ ॥
शैशवे वर्धितो याभिरङ्कमारुह्य[3] मातृभिः ।
सोङ्कमारोप्य ता एव चुम्बन्संबुभुजेनिशम् ॥ ११४७ ॥

---

१ कृत्ये इत्युचितम् । २ तदायुःशेषस्य इत्युचितम् । ३ आरोप्य इति स्यात् ।

संभोगं भगिनीवर्गे कुर्वता दुर्वचोरुषा ।
निगृहीता च भुक्ता च नागा पुत्री पितृष्वसुः ॥ ११४८ ॥
स तुरुष्कशताधीशाननिशं पोषयन्धनैः ।
निधनावधि दुर्बुद्धिर्बुभुजे ग्राम्यसूकरान् ॥ ११४९ ॥
अथ सेवाभिसारेण कदापि कुपितो नृपः ।
स मन्दबुद्धिरास्कन्दमदाद्राजपुरीं प्रति ॥ ११५० ॥
विलोक्य सैन्यसामग्रीमनन्यसदृशीं पथि ।
त्रैलोक्याक्रान्तिसामर्थ्यं पार्थिवैस्तस्य शङ्कितम् ॥ ११५१ ॥
स तु पृथ्वीगिरिं दुर्गं दृष्ट्वा तद्ग्रहणोद्यतः ।
अप्रविष्टो राजपुरीं तन्मूले समुपाविशत् ॥ ११५२ ॥
मासमभ्यधिकं तेन तस्थुषा परिपीडिताः ।
प्रक्षीणान्नादिसंभारा बभूवुर्दुर्गरक्षिणः ॥ ११५३ ॥
त्रातुं संग्रामपालस्तानूरीचक्रे धरापतिः ।
कियन्तं न करं भीतः कियतीर्न च संविधाः ॥ ११५४ ॥
उपोढदार्ढ्ये नृपतौ स तदप्रतिगृह्णति ।
लुब्धमुत्कोचदानेन स्वीचक्रे दण्डनायकम् ॥ ११५५ ॥
अमन्यमाने नृपतौ व्यावृत्तिं प्रेरिता रहः ।
प्रवासवेतनं भूरि मार्गितुं तेन शस्त्रिणः ॥ ११५६ ॥
तैः प्राये प्राकृतप्रायैः कृते सोल्लुण्ठभाषितैः ।
राज्ञो दूरस्थकोशस्य कटकः क्षोभमाययौ ॥ ११५७ ॥
स तत्समर्थनां यावच्चक्रे तावद्विभीषिकाम् ।
तुरुष्कास्कन्दजामन्यां प्रददौ दण्डनायकः ॥ ११५८ ॥
अथाल्पधैर्यो नृपतिरुत्थाप्य कटकं ययौ ।
कृत्स्नां च कोशसामग्रीं तत्याजाध्वसु साध्वसात् ॥ ११५९ ॥

अपरीक्ष्यादृतो भृत्यः स्वामिनामतिसंकटे ।
करोति व्यसनापातमजात्योसिरिवाहवे ॥ ११६० ॥
तेन स्वयमयोग्येन योग्यानन्याननिच्छता ।
कलङ्किता नरेन्द्रश्रीः क्षुद्राश्वेनेव मन्दुरा ॥ ११६१ ॥
ततःप्रभृति निर्वाणप्रतापस्य महीपतेः ।
प्रतापचक्रवर्त्याख्या सर्वतो म्लानिमाययौ ॥ ११६२ ॥
म्लाननो न यत्सिद्धं स्वेन भृत्यैस्तथाखिलैः ।
तत्कर्म कृतवन्तं स कंदर्पं बह्वमन्यत ॥ ११६३ ॥
आनिनीषोश्च तं तस्य जडस्याकृत भूपतेः ।
दण्डनायक एवेच्छाछेदं पैशुनकर्मणा ॥ ११६४ ॥
ज्ञातद्रोहोथ नृपतिरबध्नाद्दण्डनायकम् ।
प्रातिपत्त्यानुरोधेन न क्रुधा न्यग्रहीत्पुनः ॥ ११६५ ॥
दुग्धे संदिग्धजीवोपि निवसन्संचिकाय सः ।
लुब्धस्ताम्बूलवस्त्रादि प्रहितं भृत्यबान्धवैः ॥ ११६६ ॥
आत्मनः सर्वनाशाय संजातं दैवमोहितः ।
वधार्हं प्रत्युत पुनर्निन्ये तं स्वपदं नृपः ॥ ११६७ ॥
तं विटाश्चाटुभिर्भूयो राजानमुदतेजयन् ।
घोषयात्राजितं स्तोत्रैः कर्णाद्या इव कौरवम् ॥ ११६८ ॥
वादी वादपराजितः प्रतिभटं गालीभिरत्याक्षिप-
न्योषिन्नष्टसतीव्रता कुकलहैरुद्वेजयन्ती पतिम् ।
कायस्थश्च हृताखिलार्थमहिमा कृच्छ्रे नृपं पातय-
न्स्वस्यासन्नपराभवस्य कुरुते भूयः समुत्तम्भनम् ॥११६९॥
भुक्तदेयधनो बिभ्यत्तं सहेलमहत्तमः ।
उर्वीपतिं दुर्व्यसने प्रेरयन्स्वार्थपण्डितः ॥ ११७० ॥

बन्धुमन्विष्य दरदं लवन्यैः सह लाहरैः ।
दुर्गघाताभिधं दुर्गं ग्रहीतुं तमचूचुदत् ॥ ११७१ ॥
तद्धि लक्कनचन्द्राख्ये पुरा गोप्तरि डामरे ।
जनकद्वारपतिना हतेनन्तनृपाज्ञया ॥ ११७२ ॥
प्रायोपविष्टया द्वारे तत्पत्न्यापि समर्पितम् ।
कलशक्ष्माभुजा कृप्तोपेक्षं प्राप दरन्नृपः ॥ ११७३ ॥
तद्बलाद्दारदैः क्रान्तानन्तग्रामेत्र मण्डले ।
राजा च मन्त्रिणा चाथ बभूव स्वीकृतोद्यमः ॥ ११७४ ॥
निर्ह्रादे तत्र गोप्तॄणां वृत्तये संभृतं हिमम् ।
अवग्रहेण तत्तस्मिन्क्षणे निःशेषतां ययौ ॥ ११७५ ॥
चारैस्तद्रन्ध्रमालक्ष्य तद्ग्रहाय महत्तमः ।
अभीक्ष्णं प्रैरयत्क्ष्मापं स च तत्रोद्यमं व्यधात् ॥ ११७६ ॥
वातगण्डस्तदुद्योगे प्रतिष्ठासुं नृपाज्ञया ।
चण्पको द्वारकार्यस्थमभिसंधातुमैहत ॥ ११७७ ॥
द्वारं निर्वार्य भूपेन प्रापितो मण्डलेशताम् ।
सर्वैः सहाभजद्द्वारं स हि द्वाराधिकारिभिः ॥ ११७८ ॥
विसूत्रितापि[1] कटके तेन द्वारपतिस्ततः ।
तीर्त्वा मधुमतीं सिन्धुं सैन्यैर्दुर्गमवेष्टयत् ॥ ११७९ ॥
समस्तानपि सामन्तान्प्रहिण्वन्सर्वतः स्वयम् ।
एकप्रयाणान्तरितः कोटेपि न्यवसन्नृपः ॥ ११८० ॥
त्यजद्भिर्गण्डशैलादि दुर्गसंश्रयदुर्जयैः ।
काश्मीरकाः सह दरत्सैनिकैः समरं व्यधुः ॥ ११८१ ॥
विदधे प्राजिमठिकानाम्न्याघातपदे वसन् ।
सपुत्रो गुङ्गजो मल्लः संभ्रमानतिदुःसहान् ॥ ११८२ ॥

---

१ विसूत्रितेपि इति स्यात् ।

तत्पुत्रौ दैववित्प्रोक्तराज्यप्राप्ती तदिच्छया ।
मानं व्यवर्धिषातां यौ वीरावुच्चलसुस्सलौ ॥ ११८३ ॥
अत्युद्दामस्तयोर्ज्यायान्द्विषन्नपि नृपासनम् ।
आसीद्भाव्यर्थमाहात्म्याद्यात्रायां तत्र निर्गतः ॥ ११८४ ॥
अवग्रहेण भूपालप्रतापेन च शोषिताः ।
यथाकथंचित्तद्दुर्गं ररक्षुर्दारदा भटाः ॥ ११८५ ॥
अथाज्ञेव विधेर्हर्षप्रतापपरिपन्थिनी ।
पपात महती वृष्टिरेकीकृतजलस्थला ॥११८६ ॥
दुर्गशृङ्गं हिमैः कृत्स्नं दुर्भेद्यैः पर्यवार्यत ।
अनुकूलेन विधिना संनाहैर्निहितैरिव ॥ ११८७ ॥
उत्थाने पातयन्कांश्चित्पतने कांश्चिदुत्क्षिपन् ।
वेधाः कन्दलयत्येव कन्दुकक्रीडितभ्रमम् ॥ ११८८ ॥
ततः स्मृत्वा गृहान्वृष्टिदुःस्थास्ते दुष्टमन्त्रिणः ।
चक्रिरे पूर्ववद्राज्ञः स्कन्दावारे[1] विसूत्रणम् ॥ ११८९ ॥
ऊर्ध्वस्रोतोनुसारीव तिमिः शैलहताननः ।
ततोपि चक्रे व्यावृत्तिं राजा जयपराङ्मुखः ॥ ११९० ॥
मुक्तापणः शीर्णकोशस्त्यक्तश्रीकश्च्युतायुधः ।
कटकः सर्व एवाभूत्पलायनपरायणः ॥ ११९१ ॥
धावतः पथिभिस्तैस्तैः साक्रन्दाद्राजसैनिकान् ।
पृष्ठलग्नरिपून्दीर्घा मार्गेग्रसिषतापगा ॥ ११९२ ॥
क्षौमैः सहंसमालेव साब्जषण्डेव खेटकैः ।
सशेवलेव खड्गौघैः सशिलेव तुरंगमैः ॥ ११९३ ॥
सौवर्णैः सरथाङ्गेव राजतैर्भाजनैरपि ।
सफेनेव जनत्यक्तैरासीन्मधुमती सरित् ॥ ११९४ ॥

---

१ स्कन्धावारे इत्युचितम् ।

नीतानां च हतानां च दरदैः प्रसृतोदयैः ।
अभून्नदीहृतानां च संख्या काचिन्न देहिनाम् ॥ ११९५ ॥
अनाथवत्तथाभूतं सैन्यं त्रातुं कृतोद्यमः ।
एकस्तु सानुजो मानी नाचलन्माल्लिरुच्चलः ॥ ११९६ ॥
दरद्वलाम्बुधिर्धावन्स विश्वाक्रमणोद्यतः ।
ताभ्यां वेलागिरीन्द्राभ्यामिव संस्तम्भितोखिलः ॥ ११९७ ॥
तौ रक्षित्वा बलं प्राप्तौ प्रसिद्धिमतुलां गतौ ।
पतिंवरेव राजश्रीर्भेजे लक्ष्येण तेजसा ॥ ११९८ ॥
ततः प्रभृति लोकस्य सर्वस्यासीदसौ मतिः ।
राज्याहौं मानिनावेतौ क्लीबोयं न तु भूपतिः ॥ ११९९ ॥
तथा कृत्वापि यद्राज्ञे[1] दर्शनं परिजह्रतुः ।
तौ प्रीतिदायविमुखौ बबन्धास्थां ततो जनः ॥ १२०० ॥
अथ शान्तरिपुत्रासो नगरं प्राविशन्नृपः ।
प्रतापस्तु दिशः प्रायान्मल्लराजतनूजयोः ॥ १२०१ ॥
तौ रामलक्ष्मणावेताविति सर्वस्तदाब्रवीत् ।
रावणप्रतिमे राज्ञि भाव्यर्थानुगुणं वचः ॥ १२०२ ॥
राजा तु गतलज्जः स नित्यकृत्योपमं जडः ।
कर्तुं प्रारभताखिन्नः पुनर्मण्डलपीडनम् ॥ १२०३ ॥
अल्पापकारमपि पार्श्वगतं निहन्ति
नीचो न दूरमसमागसमप्यरातिम् ।
श्वा निर्दशत्युपलमन्तिकमापतन्तं
तत्त्यागिनं न तु विदूरगमुग्ररोषः ॥ १२०४ ॥
ततः प्रविष्टः संप्रीतः सेवया दत्तकम्पनम् ।
मदनं सोशृणोत्स्वैरं शंसन्तं तत्पराभवम् ॥ १२०५ ॥

---

१ यद्राज्ञः इत्युचितम् ।

तद्रोषेण जिघांसुस्तमागो जग्राह सोपरम् ।
तस्य देवीविसृष्टाज्ञालेखोल्लङ्घनलक्षणम् ॥ १२०६ ॥
प्राप्तो मडवराज्यात्स क्षमाभुजादत्तदर्शनः ।
भीतो लक्ष्मीधरस्यागान्मन्दिरं ठक्कमन्त्रिणः ॥ १२०७ ॥
राजा प्रसाद्यमानोपि तत्कृतेन्येन मन्त्रिणा ।
सस्मितं वीक्षितं सैन्यैस्तं सपुत्रमघातयत् ॥ १२०८ ॥
कोपस्मितं नरपतेरकालकुसुमं तरोः ।
वेतालस्याट्टहसितं नैवमेव प्रशाम्यति ॥ १२०९ ॥
ये संप्ररूढविपुलप्रणयाभिमाना
निःशङ्कमीश्वरनिषेवणमाचरन्ति ।
मन्त्रानुषङ्गरभसाद्भुजगेन्द्रसख्यं
प्रख्यापयन्त इव ते प्रलयं प्रयान्ति ॥ १२१० ॥
कर्णेजपकुले तावन्मदनप्रलयावधिः ।
शापः सूर्यमतीदेव्याः प्रसारितभुजोभवत् ॥ १२११ ॥
विक्रमालोकनोत्कम्पी निचिक्षेप क्षमापतिः ।
बद्ध्वा कलशराजं तं लक्ष्मीधरनिवेशने ॥ १२१२ ॥
विरुद्धं तस्य बद्धस्य शिक्षापेक्षामिषान्नृपः ।
तेजोवधाय सविधमुदयाख्यं व्यसर्जयत् ॥ १२१३ ॥
लक्ष्म्या जाज्वल्यमानं तं वीक्ष्य प्रज्वलितः क्रुधा ।
लब्धासिधेनुः कस्माच्चिन्मनस्वी सहसावधीत् ॥ १२१४ ॥
तद्भृत्यैरथ संक्रुद्धैर्निपत्य स विपादितः ।
दुर्बुद्धेस्तस्य भूभर्तुरेवं भृत्या विपेदिरे ॥ १२१५ ॥
मण्डले राजदण्डेन क्षतेनेव परिक्षते ।
क्षारपातोपमान्यापि प्राभूदुःखपरम्परा ॥ १२१६ ॥

अहारि काञ्चनस्थाली यैः पार्थिवगृहादपि ।
सत्यप्यहस्करे जघ्नुस्तस्करास्तादृशा विशः ॥ १२१७ ॥
प्रवर्धमाने मरके क्रन्दितध्वनिनिर्भरः ।
निर्घोषः प्रेतवाद्यानां न व्यरंसीद्दिवानिशम् ॥ १२१८ ॥
उदीपब्रुडितग्रामे वत्सरे पञ्चसप्तते ।
अखण्डं सर्वभाण्डानां दुर्भिक्षमुदजृम्भत ॥ १२१९ ॥
दीन्नाराणां धान्यखारिः प्राप्याभूत्पञ्चभिः शतैः ।
दीन्नारेणाभवल्लभ्यं मार्द्वीकस्य पलद्वयम् ॥ १२२० ॥
ऊर्णापलस्य दीन्नारैः क्रयः षड्भिरजायत ।
लवणोषणहिङ्ग्वादेरभिधाप्यास्त दुर्लभा ॥ १२२१ ॥
शवैर्नद्योभवन्नम्भःसंसेकोच्छ्वनविग्रहैः ।
छन्नतोया गिरिस्रस्तैश्छिन्नदारुवनैरिव ॥ १२२२ ॥
एतद्व्यवहिता राजधानी दूरान्न दृश्यते ।
ध्यात्वेति सर्वतो राजा द्रुमाणां छेदमादिशत् ॥ १२२३ ॥
सप्रसूनफला वृक्षा गृहस्था इव पातिताः ।
कुटुम्बैरिव रोलम्बैरशोच्यन्त पदे पदे ॥ १२२४ ॥
प्राणापहं महादण्डं तथार्तेपि जने नृपः ।
हलावरुग्णे वृद्धोक्षे गण्डशैलमिवाक्षिपत् ॥ १२२५ ॥
निपीड्य लोकं कायस्थैर्महादण्डव्यवस्थया ।
पुरग्रामादिषु क्वापि न मृदप्यवशेषिता ॥ १२२६ ॥
अथोल्बणत्वं संप्राप्तान्निहन्तुं सर्वडामरान् ।
सदण्डभृदिव क्रुध्यन्नादिक्षन्मण्डलेश्वरम् ॥ १२२७ ॥
पूर्वं मडवराज्योर्व्यां होलडान्तः स डामरान् ।
दत्तास्कन्दोवधीत्तांस्तान्कुलाये विहगानिव ॥ १२२८ ॥

म्रता लवन्यान्नुन्नद्धकुन्तलो विकटाकृतिम्[1] ।
जीवन्मडवराज्यान्तस्तेन विप्रोपि नोज्झितः ॥ १२२९ ॥
लवन्यबुद्ध्या शूलानि पान्थैरप्यथ रोपितैः ।
भीमरूपाभवद्भूमिर्भैरवस्य महानसः ॥ १२३० ॥
शूले लवन्यस्यैकस्य क्रूरां विन्यस्यतो वधूम् ।
ययुः सर्वे दिशो भीता लवन्या मण्डलेश्वरात् ॥ १२३१ ॥
केचिद्बुभुजिरे तेषां गोमांसं म्लेच्छभूमिषु ।
अरघट्टघरट्टादिकृष्टाः[2] केचिदवालगन् ॥ १२३२ ॥
प्राहिणोत्प्राभृतं भूरि भैरवाय महीभुजे ।
लवन्यमुण्डमालालीरखण्डा मण्डलेश्वरः ॥ १२३३ ॥
तोरणावलयो राजद्वारेदृश्यन्त सर्वतः ।
डामराणां करोटीभिर्घटीभिरिव निर्भराः ॥ १२३४ ॥
द्वारे कङ्कणवस्त्रादि लम्बमानं नृपौकसः ।
नेता डामरमुण्डस्य यः कोपि स किलासदत् ॥ १२३५ ॥
भोक्तुं डामरमुण्डानि व्याप्ताः[3] विस्तीर्णतोरणाः ।
विदधुर्गृध्रकङ्काद्या राजद्वारोपसेवनम् ॥ १२३६ ॥
यत्र यत्रास्त भूपालस्तत्र तत्र व्यधुर्जनाः ।
लवन्यमुण्डैरुच्चण्डैर्विस्तीर्णास्तोरणस्रजः ॥ १२३७ ॥
गन्धेनाशुचिना घ्राणं कर्णौ भीमैः शिवारुतैः ।
अखिद्यत शवाकीर्णे श्मशान इव मण्डले ॥ १२३८ ॥
बलेरकप्रपाप्रान्ताल्लोकपुण्यावधि व्यधात् ।
एकश्रेणीं मण्डलेशो डामरैः शूलकीलितैः ॥ १२३९ ॥

---

१ विकटाकृतिः इत्युचितम् । २ कृष्टौ इति स्यात् । ३ व्याप्त विस्तीर्ण इति स्यात् ।

एवं मडवराज्यं स कृत्वा निर्नष्टडामरम् ।
अधावत्क्रमराज्योर्वीं कर्तुं तामेव पद्धतिम् ॥ १२४० ॥
अवश्यं न भविष्याम इति निश्चित्य डामराः ।
चक्रिरे क्रमराज्यस्था लौलाहे सैन्यसंग्रहम् ॥ १२४१ ॥
तैः सर्वैर्दत्तसंग्रामैः कुर्वद्भिः कदनं महत् ।
आस्ते स्म तत्र सुचिरं निरुद्धो मण्डलेश्वरः ॥१२४२ ॥
किमन्यद्राक्षसः कश्चित्सुरतीर्थर्षिपूजितम् ।
निहन्तुं मण्डलमिदं हर्षव्याजादवातरत् ॥ १२४३ ॥
उल्लासो रात्रिषु दिने स्वापः क्रौर्यमुदग्रता ।
अवाङ्मयत्वं कर्तव्ये दक्षिणेशोचिते रतिः ॥ १२४४ ॥
इत्यादयस्तस्य केचिद्धर्मा नक्तंचरोचिताः ।
तथाहि तत्कालभवैः प्रियाः प्राज्ञैः प्रकीर्तिताः ॥ १२४५ ॥
अत्रान्तरे मल्लसूनुः कनीयान्यौवनोन्मदः ।
लक्ष्मीधरस्य गेहिन्या हृदयाह्लादकोभवत् ॥ १२४६ ॥
सा हि राजसुते तस्मिन्संसक्ता प्रातिवेश्मिके ।
नारज्यत निजे पत्यौ वानरप्रतिमाकृतौ ॥ १२४७ ॥
ज्ञातीनगण्यान्हत्वान्यान्कस्माद्राज्यार्हलक्षणौ ।
नावधीरुद्धतावेतौ राजन्नुच्चलसुस्सलौ ॥ १२४८ ॥
इति लक्ष्मीधरेणेर्ष्यारोषादुक्तोपि भूपतिः ।
न चुक्रोधानुतापार्तं पूर्वज्ञातिवधाद्गतः ॥ १२४९ ॥
स्वयमन्यमुखेनापि स तेनोक्तस्ततोसकृत् ।
.....घाते तदौद्धत्यं ध्यात्वा साध्वसमादधे ॥ १२५० ॥
ज्ञातिप्रीत्यनुवृत्त्यादि तेन विस्मरता ततः ।
संमन्त्र्य मन्त्रिभिः सार्धं दध्रे तद्वधनिश्चयः ॥ १२५१ ॥

आसन्नवारवनिता थक्कनाख्याथ तं व्यधात् ।
भूभर्तुर्दुरभिप्रायं तयोः कर्णपथातिथिम् ॥ १२५२ ॥
सख्या दर्शनपालेन तत्रार्थे छिन्नसंशयौ ।
निरगातां निशीथिन्यां द्वित्रैस्तावनुगैः समम् ॥ १२५३ ॥
षट्सप्ततेब्दे नगरान्मार्गशीर्षेथ निर्गतौ ।
तत्रासवसतेः प्राप्तौ डामरस्योपवेशनम् ॥ १२५४ ॥
प्रशस्तराजो दुध्रुक्षुः सिल्लराजं निजानुजम् ।
सोभिसंधाय तौ निन्ये लवन्यो मण्डलान्तरम् ॥ १२५५ ॥
ततो राजपुरीं ज्यायान्प्रायात्कह्लस्य भूपतेः ।
कनीयान्प्रययौ पार्श्वं कालिञ्जरधरेशितुः ॥ १२५६ ॥
तयोर्निगतयो राज्यं न कश्चिच्छ्रद्दधीयत ।
निमित्तज्ञेनं राज्ञैव दुर्निमित्तैस्त्वशङ्कत ॥ १२५७ ॥
लक्ष्मीधरमुखेनैव प्रार्थनां हन्तुमुच्चलम् ।
चक्रे संग्रामपालस्य सोङ्गीकृत्य धनं ततः ॥ १२५८ ॥
स त्वन्तिकागतस्येषन्मल्लसूनोः कृतादरः ।
तया विशङ्कया शत्रोरासीदधिकगौरवः ॥ १२५९ ॥
आसन्नाभ्युदयं शत्रुं द्वेष्टैव विधिचोदितः ।
शङ्काविष्करणाल्लोके नयेत्संभावनाभुवम् ॥ १२६० ॥
राजपुर्याः प्रकृत्यैव काश्मीरानर्थकाङ्क्षिताः ।
प्रभविष्णौ रिपौ प्राप्ते चक्रिकायां किमुच्यताम् ॥ १२६१ ॥
कांश्चिन्निकृतिकप्रायान्पार्श्वायातानथोच्चलः ।
गमागमान्कृतोद्योगो डामराणामकारयत् ॥ १२६२ ॥
डामरास्तु महोत्साहास्तमानेतुं व्यसर्जयन् ।
राज्ञा विप्रकृता दूतान्वितीर्णोपायनान्बहून् ॥ १२६३ ॥

तं सूर्यवर्मचन्द्रस्य तनयो जनकाभिधः ।
चकारोपचितोत्साहं मायादूतैर्विसर्जितैः ॥ १२६४ ॥
वीक्ष्य डामरदूतांस्ताञ्जहृता राजतो भयम् ।
व्यक्तं संग्रामपालेन निन्ये माहात्म्यमुच्चलः ॥ १२६५ ॥
स कार्यगौरवात्प्रह्वो मूर्ध्नि कर्पूरचूर्णनम् ।
कृत्वा तमविनाशाय यावद्विस्रष्टुमैहत ॥ १२६६ ॥
तावत्कलशराजाख्यस्तद्देशे मुख्यठक्कुरः ।
हर्षदेवार्पितोत्कोचस्तमेत्य विजनेब्रवीत् ॥ १२६७ ॥
राज्ञः प्रसादनं त्यक्त्वा तवोच्चलहितैषिणः ।
कामधेनुं विनिर्धूय च्छागकण्ठग्रहे ग्रहः ॥ १२६८ ॥
कोयं काश्मीरभूपानां कास्य शक्तिस्तपस्विनः ।
आराधनेन तद्राज्ञो विधेहि स्वमसाध्वसम् ॥ १२६९ ॥
अयं राजगिरौ दुर्गे स्थाप्यतां पार्थिवस्ततः ।
स्यान्मनीषितवर्षी वस्त्रासान्मित्रं च सर्वदा ॥ १२७० ॥
तेनेति प्रभुराख्यातः खशानां स मिताशयः ।
तद्भीतः स्वार्थलुब्धश्च तथेति प्रतिपद्यत[1] ॥ १२७१ ॥
तमभ्यधाच्च नो बन्द्धुं शक्तोहममुमुद्यतम् ।
त्वयैव बध्यतामेष मिषतः प्रेषितोन्तिकम् ॥ १२७२ ॥
इत्युक्त्वा तं स्ववसतिं विसृज्यावददुच्चलम् ।
प्रातः कलशराजस्य त्वया गन्तव्यमन्तिकम् ॥ १२७३ ॥
इह प्रधानामात्योसौ तेन ते स्यादनत्ययः ।
ततो विपक्षोच्छित्त्यै त्वां प्रतिमोक्ष्यामि सानुगम् ॥१२७४॥
अथ तद्वसतिं गन्तुं चलितोन्येद्युरुच्चलः ।
प्राग्दुर्निमित्तैस्तत्कृत्यमात्तैरथ निबोधितः ॥ १२७५ ॥

---

१ प्रत्यपद्यत इत्युचितम् ।

मन्त्रे भिन्ने निवृत्तं तं श्रुत्वा खशनृपान्तिकम् ।
कुप्यन्कलशराजोथ सज्जसैन्यः समाययौ ॥ १२७६ ॥
तमास्कन्दाय संप्राप्तं जानञ्शस्त्रभृतां वरः ।
ऐच्छद्रणाय निर्गन्तुं निजभृत्यैः सहोच्चलः ॥ १२७७ ॥
क्षोभे संप्रस्तुते तं स सान्त्वयित्वा खशाधिपः ।
तिष्ठन्कलशराजेन सहानिन्ये निजां सभाम् ॥ १२७८ ॥
निषेधाधायिनो भृत्यान्स विधूयौजसां निधिः ।
सज्जं खशसमाजं तं कोपकम्प्राधरोविशत् ॥ १२७९ ॥
द्रष्टुं तं नाशकत्कश्चित्कल्पान्तार्कमिवोल्बणम् ।
क्रुद्धं कलशराजो वा राजा वा तेजसां निधिम् ॥ १२८० ॥
स विविक्तीकृते धाम्नि खशाधीशं समन्त्रिणम् ।
सान्त्वयन्तं महातेजाः कोपरूक्षाक्षरोब्रवीत् ॥ १२८१ ॥
पूर्वं दार्वाभिसारेभूद्धारद्धाजो नरो नृपः ।
नरवाहननामास्य सूनुः फुल्लमजीजनत् ॥ १२८२ ॥
स सार्थवाहनं तस्माच्चन्दोभूत्तत्सुतः सुतौ ।
गोपालसिंहराजाख्यौ चन्दराजोप्यवाप्तवान् ॥ १२८३ ॥
बह्वात्मजः सिंहराजो दिद्दाख्यां तनयां ददौ ।
क्ष्माभुजे क्षेमगुप्ताय सावीरा भ्रातृनन्दनम् ॥ १२८४ ॥
राज्ये संग्रामराजाख्यं व्यधादुदयराजजम् ।
भ्रातापि कान्तिराजोस्या जस्सराजमजीजनत् ॥ १२८५ ॥
पितानन्तस्य संग्रामो जस्सस्तन्वङ्गगुङ्गयोः ।
अनन्तः[1] कलशक्ष्माभृद्दुङ्गान्मल्लोप्यजायत ॥ १२८६ ॥
कलशाद्धर्षदेवाद्या जाता मल्लात्तथा वयम् ।
कोयमित्यादि तन्मन्दैः क्रमेस्मिन्कथ्यते कथम् ॥ १२८७ ॥

१ अनन्तात् इत्युचितम् ।

पृथिव्यां वीरभोज्यायां क्रमो वा क्वोपयुज्यते ।
वीरस्य च सहायोस्तु कः स्वबाहुद्वयात्परः ॥ १२८८ ॥
दिष्ट्या तदनुकम्प्यानां मूर्ध्नि हस्तमिवास्पृशन् ।
काश्मीरकाणां भूपानां नाभूवं कुलपांसनः ॥ १२८९ ॥
तस्माद्द्रक्ष्यथ मे शक्तिमित्युक्त्वा निर्गतस्ततः ।
विजयाय स पत्तीनां शतेनानुगतोचलत् ॥ १२९० ॥
निहतं शशमादाय तस्याग्रे कश्चिदाययौ ।
स तेन सुनिमित्तेन प्राप्तां मेने रिपुश्रियम् ॥ १२९१ ॥
अरघट्टघरट्टादिकृष्टिमुत्सृज्य निर्गताः ।
डामरा वाट्टदेवाद्यास्तं यान्तमुपतस्थिरे ॥ १२९२ ॥
कटकस्थस्य संग्रामपालस्यायातमन्तिकात् ।
तद्देव्यो राजपुर्यन्तः खिन्नं निन्युः प्रसन्नताम् ॥ १२९३ ॥
भुक्त्वा तद्वसतेर्गच्छन्स्वावासं स दिनात्यये ।
सैन्यैः कलशराजस्य दत्तास्कन्दोभवद्बहिः ॥ १२९४ ॥
राज्ञीभिर्निर्गमात्तस्मिन्द्वारं संरोध्य वारिते ।
तदीयाः सैनिका युद्धे लोष्टवट्टादयो हताः ॥ १२९५ ॥
मध्यं प्रविश्य शमिते प्रधानैस्तत्र संयुगे ।
सोल्पसैन्योपि संवृत्तः सुतरामल्पसैनिकः ॥ १२९६ ॥
चैत्रस्य पौर्णमास्यंतः[1] कृच्छ्रमप्यनुभूतवान् ।
वैशाखासितपञ्चम्यां यात्रामत्रस्तधीर्व्यधात् ॥ १२९७ ॥
विसृज्य वेट्टदेवादीन्[2]विप्लवाय स्ववर्त्मभिः ।
आललम्बे प्रवेशेच्छां क्रमराज्याध्वना स्वयम् ॥ १२९८ ॥

---

१ पौर्णमास्यां तत् इत्युचितम् । २ वाट्टदेवादीन् इति स्यात् ।

यं राजोदयसीहान्ते कपिलं क्षेमजात्मजम् ।
आस्थापयल्लोहरोर्व्यां स विशन्तं मुमोच तम् ॥ १२९९ ॥
स्वयमग्रे समग्राणां खड्गचर्मधरो व्रजन् ।
पलायने पूर्वशिष्यान्पर्णोत्से तद्भटान्व्यधात् ॥ १३०० ॥
बद्ध्वा निःशङ्कमासीनं द्वारेशं सुज्जकाभिधम् ।
कश्मीरानामिषाकाङ्क्षी क्षिप्रं श्येन इवापतत् ॥ १३०१ ॥
तं डामराश्च कतिचित्खाशिकाश्चाद्रिसंश्रयाः ।
राजद्विषः प्राप्तमात्रं सर्वतः पर्यवारयन् ॥ १३०२ ॥
तमाकाशादिव स्रस्तं भुवो गर्भादिवोत्थितम् ।
निशम्यातर्कितं प्राप्तं चकम्पे हर्षभूपतिः ॥ १३०३ ॥
मा भूदसौ बद्धमूलः क्रमराज्यान्तरस्थितिम्[1] ।
मा वधीन्मण्डलेशं च ध्यायन्नित्याकुलोथ सः ॥ १३०४ ॥
विलम्बमाने संनद्धसैनिके दण्डनायके ।
त्वरितं प्राहिणोत्पट्टं वितीर्णासंख्यनायकम् ॥ १३०५ ॥
दैवोपहतवीर्यो वा क्रान्तो वा द्रोहचिन्तया ।
अभ्यमित्रीणतां त्यक्त्वा स तु मार्गे व्यलम्बत ॥ १३०६ ॥
अन्यांश्च यान्यांस्तिलकराजादीन्व्यसृजन्नृपः ।
ते ते पट्टं समासाद्य नाकुर्वन्नग्रनिर्गमम् ॥ १३०७ ॥
दण्डनायकमुख्येपि लोके राज्ञा विसर्जिते ।
याते विमूढतां प्राप बद्धमूलत्वमुच्चलः ॥ १३०८ ॥
वराहमूलं प्रविशन्नागतां द्विषतां बलात् ।
अश्वां सुलक्षणोपेतां राजलक्ष्मीमिवासदत् ॥ १३०९ ॥
महावराहमौलिस्रक्तस्य मूर्ध्नि पपात च ।
तदंसस्थितया पृथ्व्या वरणार्थमिवार्पिता ॥ १३१० ॥

---

१ स्थितः इत्युचितम् ।

काकाद्यवैद्यकुलजैर्यौधैः संरुद्धपद्धतिः ।
स हुष्कपुरमुत्सृज्य क्रमराज्योन्मुखो ययौ ॥ १३११ ॥
अत्रान्तरे तमायान्तमाकर्ण्योत्सेकमागतैः ।
विद्रवोन्मुखतां निन्ये डामरैर्मण्डलेश्वरः ॥ १३१२ ॥
तैर्हि प्रागेव भङ्गं स नीतो हत्वा महाभटान् ।
यशोराजमुखान्भूरीन्ययौ मन्दप्रतापताम् ॥ १३१३ ॥
शनैरपसरन्सोथ तारमूलकमासदत् ।
उच्चलाधिष्ठितास्तेपि विद्विषन्तस्तमन्वयुः ॥ १३१४ ॥
समेतानन्तसैन्येन तेन तत्र चिरं धृतः ।
उच्चलप्रलयाभ्रस्य पौरस्त्यानिलविभ्रमः ॥ १३१५ ॥
सैन्ययोरुभयोस्तत्र जयश्रीकरिणीकृते ।
बभूव तुल्यसंघर्षः सेर्ष्ययोरिव दन्तिनोः ॥ १३१६ ॥
आनन्दनामाप्युत्पिञ्जोत्थानमुच्चलमातुलः ।
चक्रे मडवराज्येथ निबिडीकृतडामरः ॥ १३१७ ॥
तद्विप्लवे डामरौघा दिग्देशेभ्यः सहस्रशः ।
उन्ममज्जुर्हिमापाये रन्ध्रेभ्य इव षट्पदाः ॥ १३१८ ॥
तत्क्षणं क्षीणभाग्यस्य यथा द्वारपतिस्तथा ।
कार्यस्थः कम्पने राज्ञः सहेलोभून्महत्तमः ॥ १३१९ ॥
आनन्देन कृतास्कन्दो बहुशो विहिताहवः ।
औज्झीन्मडवराज्यं स न यत्तद्वह्वभूत्तदा ॥ १३२० ॥
अथाद्भुतप्रतापेन वेष्टयित्वा महाचमूम् ।
उच्चलेनाहवे बद्धः ससैन्यो मण्डलेश्वरः ॥ १३२१ ॥
न विद्मः किं तदा वृत्तं योधानां यत्किलाविदन् ।
ते सखड्गाश्वसंनाहा बद्धा वयमिति स्फुटम् ॥ १३२२ ॥

तथा बद्धोपि निर्दध्यौ स भव्यः प्रभवे हितम्।
स्वामिभक्तिर्विपर्येति पर्यन्तेपि न मानिनाम् ॥ १३२३ ॥
तूर्णं पुरप्रवेशाय सोथ प्रैरयदुच्चलम्।
विश्वास्य नेदृगन्योस्ति क्षण इत्यसकृद्ब्रुवन् ॥ १३२४ ॥
विशतस्तस्य चानेकैः पुरग्रामाद्यलुण्ठयत्।
कर्मणानेन कौलीनमस्यास्त्विति विचिन्तयन् ॥ १३२५ ॥
परिहासपुरे तेन स ततः संप्रवेशितः।
श्वभ्राम्बुविषमाद्यस्मान्निर्गमोत्यन्तदुर्गमः ॥ १३२६ ॥
तत्रोच्चलं चतुःशाले स्वं च दग्धुमचूचुदत्।
निजान्स निशि ते तत्तु न चक्रुस्तद्धितैषिणः ॥ १३२७ ॥
यथा चित्तं तथास्य स्यात्कायश्चेत्साहसक्षमः।
तदात्मनिरपेक्षस्य किं न सिध्येन्मनीषितम् ॥ १३२८ ॥
क्लीबश्छन्नवपुस्त्वचा सह वसत्यच्छेद्यया कच्छपो
निर्वर्मा रणकर्मसाहसमहोत्साहश्च सिंहः सदा।
धिक्प्रादुष्कृतपक्षपातरभसो नीचेषु मुग्धो विधि-
र्वीराणां कुरुते शरीरमभितो वैकल्यशल्याहतम् ॥१३२९॥
संदिदेशाथ स क्ष्मापमाकृष्यायं मयाग्रतः।
सृगाल इव ते क्षिप्तः क्षिप्रं निर्गत्य वध्यताम् ॥ १३३० ॥
ततः समस्तसामन्तसैन्यसंततिसंयुतः।
अद्य मृत्युर्जयो वेति निश्चित्य निरगान्नृपः ॥ १३३१ ॥
स प्राणसंशये सर्वायासप्रशममादिशन्।
पटहोद्घोषणेनासीत्पौरैरनुगतोखिलैः ॥ १३३२ ॥
प्राप्तं भरतसेत्वग्रं घ्नन्तः सैन्यं विरोधिनम्।
आजानेयै राजभृत्याः क्षणान्मार्गमलङ्घयन् ॥ १३३३ ॥

---

१ विरोधिनाम् इति स्यात्।

क्षुभितेऽधाविवायाते राजसैन्ये द्विषद्बलम् ।
मण्डलेश्वर एवान्तः प्रविष्टो निरनाशयत् ॥ १३३४ ॥
अथोच्चलबले भग्ने विदद्रुः केपि जाङ्गिकाः ।
श्रान्ता राजविहारं च प्राविशन्केपि डामराः ॥ १३३५ ॥
त्रिलुसेनाभिधं दृष्ट्वा प्रविष्टं डामरं परे ।
उच्चलोसाविति भ्रान्त्या विहारं तमदाहयन् ॥ १३३६ ॥
सोमपालाभिधेनारिहयारोहान्तरे चिरम् ।
कुर्वन्दर्शनपालस्य पितृव्येन सहाहवम् ॥ १३३७ ॥
यल्लाञ्जनकचन्द्राद्यैर्मानी व्यावर्तितो रणात् ।
परिहासपुरात्प्रायान्मृत्युवक्त्रादिवोच्चलः ॥ १३३८ ॥
वितस्तां गौरिकाबालग्रामात्तीर्त्वा हयान्वितः ।
स डामरैः सह पुनः प्रययौ तारमूलकम् ॥ १३३९ ॥
जयेन तावन्मात्रेण कितवोल्प इवोन्मदः ।
राजा प्रशंसन्नानन्दं राजधानीं न्यवर्तत ॥ १३४० ॥
जीवन्तमप्यरिं श्रुत्वा न पश्चादलगत्स यत् ।
आसन्नुच्छ्वसितास्तेन भङ्गभाजोपि डामराः ॥ १३४१ ॥
यातान्पलाय्य ताञ्ज्येष्ठामूलीये मासि सर्वतः ।
भूयोपि संघटयितुं स्थिरधीरैच्छदुच्चलः ॥ १३४२ ॥
स्वदोर्मात्रसहायस्य परायत्तस्य मानिनः ।
दुर्भिक्षान्तर्महोद्योगः स तस्य विषमोभवत् ॥ १३४३ ॥
तन्मध्येतिदरिद्रोपि संप्राप्तं स ररक्ष यत् ।
तमुत्पाट्यानयद्राजा श्रीपरीहासकेशवम् ॥ १३४४ ॥
तस्मिन्विघटिते पांसुः कपोतच्छदधूसरः ।
रोदसीछादनं हर्षशीर्षच्छेदावधि व्यधात् ॥ १३४५ ॥

प्रागन्धकारो देशेस्मिन्दिवसेपि व्यजृम्भत ।
रूपिकादिवसालोक इति यत्पप्रथे जने ॥ १३४६ ॥
निवेशिते परीहासकेशवे प्रशशाम तत् ।
तस्मिन्नुन्मूलिते भूयः सार्धं मासमजृम्भत ॥ १३४७ ॥
किंचिदुच्छ्वसिते राज्ञि मन्दोद्रेकतया रिपोः ।
दिशा शूरपुरस्याथ सुस्सलः प्रत्यदृश्यत ॥ १३४८ ॥
अवनाहे स हि वसन्नुपालम्भपरैः पितुः ।
संदेशैः शंसतो ज्येष्ठमौदासीन्यादपाहृतः ॥ १३४९ ॥
दत्तान्कङ्कक्षितीशेन कांश्चिदादाय वाजिनः ।
चिरेण राजदाक्षिण्यमौज्झीत्तेन व्यलम्बत ॥ १३५० ॥
आरम्भादुदयान्तं च तिष्ठन्वैरेपि निष्ठुरे ।
साम प्रयुयुजे मोहावहं मायानिधी रिपोः ॥ १३५१ ॥
जित्वा माणिक्यनामानं तेन सेनापतिं रणे ।
प्रापि शूरपुरद्रङ्गाज्जयश्रीः श्रीश्च भूयसी ॥ १३५२ ॥
तस्याभ्युदयपात्रस्य तया संप्राप्तया श्रिया ।
आरब्धिसमयः कृत्स्नः स विभूत्यद्भुतोभवत् ॥ १३५३ ॥
मण्डलेश्वरपट्टादीनविचिन्त्योच्चलं ततः ।
प्राहिणोन्नृपतिर्योद्धुं सुस्सलं क्षिप्रकारिणम् ॥ १३५४ ॥
तेन शूरपुरे भग्नास्तद्योधाः शौर्यशालिना ।
भूयांसः प्रलयं प्रापुर्मग्ना वैतरणीजले ॥ १३५५ ॥
तत्र दर्शनपालस्य स्वामिद्रोहकृतो वपुः ।
विक्रामते[1] न संस्पृष्टं खिन्नयेव जयश्रिया ॥ १३५६ ॥
राजसैन्यं तदन्येद्युर्हतशेषं पलायितम् ।
लोकपुण्ये निवसतः सहेलस्यान्तिकं ययौ ॥ १३५७ ॥

---

१ विक्रामतो इत्युचितम् ।

सुस्सलापातकल्पान्तं विशङ्क्यापि सहेलकः ।
तैस्तैर्भग्नैर्बलैः साकं नगरं प्राविशत्ततः ॥ १३५८ ॥
एवमभ्येत्य नृपतौ सुस्सलेन विसूत्रिते ।
अवाप तारमूलस्थः प्रतिष्ठां पुनरुच्चलः ॥ १३५९ ॥
बिभ्यद्भिस्तुरगानीकात्पत्तिप्रायैः स डामरैः ।
आनिन्ये शैलदुर्गेण भूयो लहरवर्त्मना ॥ १३६० ॥
राजाप्युदयराजाख्यं कृत्वा द्वारपतिं पुनः ।
प्राहिणोदुच्चलं जेतुं लहरं मण्डलेश्वरम् ॥ १३६१ ॥
ततः पद्मपुरं प्राप्ते मातुले मल्लजन्मनोः ।
न कोपि कम्पनं भूपान्मन्त्री त्रासातुरोग्रहीत् ॥ १३६२ ॥
को मेस्तीति विनिःश्वस्य वदतोथ महीपतेः ।
अधिकारस्रजं हस्ताच्चन्द्रराजः समाददे ॥ १३६३ ॥
अनाशीः शयने मृत्युर्येषां तेषां स वंशजः ।
श्रीजिन्दुराजमुख्यानामौचित्यं प्रत्यपद्यत ॥ १३६४ ॥
स द्रौणिरिव निर्नष्टे काले सेनापतिः कृतः ।
निर्गत्य तत्पद्मपुरादरिसैन्यं न्यवारयत् ॥ १३६५ ॥
विपक्षः कम्पनेशः स तेन क्ष्मां क्रमता शनैः ।
नवम्यां शुक्लनभसो हतोवन्तिपुरान्तरे ॥ १३६६ ॥
स हि गोवर्धनधरोपान्ते कुर्वद्भिराहवम् ।
स्वसैन्यैर्वर्जितो गीतं शृण्वन्परिमितानुगः ॥ १३६७ ॥
प्रविश्यारिहयारोहैर्वितस्तातीरवर्त्मना ।
प्राप्तोकस्माद्वधं लेभे प्रमत्तानां शुभं कुतः ॥ १३६८ ॥
प्रहितं चन्द्रराजेन क्ष्मापतिर्वीक्ष्य तच्छिरः ।
भूयो जयाशामकरोदानुकूल्यं विदन्विधेः ॥ १३६९ ॥

वैमुख्येन व्रजन्कुर्यात्सांमुख्यैरन्तरा विधिः ।
प्रत्यागमभ्रमं सिंह इव व्यावृत्य वीक्षितैः ॥ १३७० ॥
अथ लब्धबलश्चन्द्रराजोमन्दोद्यमोविशत् ।
विजयक्षेत्रमाकर्षन्कटकं दशधाष्टधा ॥ १३७१ ॥
तुलाधर इव स्रष्टा साम्यभङ्गं न चक्षमे ।
तदा द्वयोः कटकयोस्तुलायाः पुटयोरिव ॥ १३७२ ॥
प्राप्ते यतस्तृतीयस्मिन्दिवसे मण्डलेशितुः ।
अकालवृष्टिविवशं लहरे व्यद्रवद्बलम् ॥ १३७३ ॥
शीतवातहता योधा मग्नाः केदारकर्दमे ।
तुरगासितनुत्रादि द्राक्किर्यञ्च इवामुचन् ॥ १३७४ ॥
उच्चलेन ततो रक्ष्यमाणमप्यार्द्रचेतसा ।
प्राप्तं जनकचन्द्राद्या निजघ्नुर्मण्डलेश्वरम् ॥ १३७५ ॥
हर्षभूभृद्भृत्यवर्गे द्रोहशङ्काङ्किते परम् ।
कलेवरव्ययात्कीर्तिः क्रीता तेनैव मन्त्रिणा ॥ १३७६ ॥
ध्रुवं संस्पर्धतो वन्द्या देवशर्मादयोस्य ते ॥
न चेत्कोपि विपर्यासे दोषमुद्घोषयेज्जनः ॥ १३७७ ॥
लवन्योन्मूलनारातिव्यूहव्यामोहनादयः ।
विध्यधीने फले ध्याते स्तुत्याः कस्य न तत्क्रियाः॥१३७८॥
किं पातालतमो न हन्ति हिमगुः किं नो विषं भीतये
पानीयं गिलतः किमान्तरशिखिध्वस्त्यै न धान्वन्तरिः ।
सर्वत्रैकपदे प्रयात्यफलतां वाच्यो जडो नाम्बुधिः
सिद्धेर्दैवविधेयतां विमृषतां स्तुत्यैव वस्तुज्ञता ॥ १३७९ ॥
स्वामिकृत्योद्यमस्तुत्यसूतिषु स्त्रीषु पूज्यताम् ।
गङ्गा तज्जननी स्वस्य नमस्यन्त्यविशङ्किताम् ॥ १३८० ॥

साहसे सा हि तनये यत्र तत्र महीभुजा ।
प्रहीयमाणे तं स्नेहमोहिताह स्म भूभुजम् ॥ १३८१ ॥
अनन्यसंततेरेकं सुतमेतं प्रभो मम ।
मा नियुङ्क्था यत्र तत्र कार्ये संदेहितासुनि ॥ १३८२ ॥
स तामकथयन्मातर्यथा तेनन्यसंततेः ।
तथा मेनन्यभृत्यस्य सोयमेकोवलम्बनम् ॥ १३८३ ॥
स्वसंभवस्य तां भर्तुर्भक्तिसंभावनामसौ ।
प्राप्तप्रतिष्ठानिष्ठायां मेने मानवती सती ॥ १३८४ ॥
उच्चलस्य क्षणे तस्मिन्हिरण्यपुरमीयुषः ।
राज्याभिषेकं संभूय तत्रत्या ब्राह्मणा ददुः ॥ १३८५ ॥
नृपमत्यन्तविवशं प्रसङ्गे तत्र मन्त्रिणः ।
भूयांसः सन्ति तैः सार्धं व्रज तल्लोहराचलम् ॥ १३८६ ॥
प्रजा एव ततः शान्तोत्कण्ठा नवनृपं प्रति ।
त्वामानेष्यन्ति न चिराद्दिनैर्वा स्वयमेष्यसि ॥ १३८७ ॥
सोभ्यधादवरोधस्त्रीकोशसिंहासनाद्यहम् ।
असामान्यं परित्यज्य गन्तुं सपदि नोत्सहे ॥ १३८८ ॥
पुनस्तेकथयन्नाप्ता यान्तोध्यारुह्य वाजिनः ।
पृष्ठे विन्यस्य नेष्यन्ति कोशान्तःपुरयोषितः ॥ १३८९ ॥
श्वपाकीकामुकोप्यासीद्यस्मिंस्तदपरोपि चेत् ।
सिंहासनं समारोहेत्काभिमानक्षतिस्ततः ॥ १३९० ॥
आस्तामेतत्परं ब्रूथ मन्त्रमित्यथ चोदिताः ।
ते पार्थिवेन भूयोपि ससंरम्भं बभाषिरे ॥ १३९१ ॥
क्षत्रधर्मं पुरस्कृत्य शासतां क्ष्मां क्षमाभुजाम् ।
को दैन्यस्यावकाशः स्यादाशीर्येषां मृधे वधः ॥ १३९२ ॥

अनुद्योगश्च लज्जा च भयं द्वैधं च मन्त्रिणाम् ।
भूभृतां व्यसनोल्लासे शत्रवो न तु गोत्रिणः ॥ १३९३ ॥
कार्यं न पश्येदलसः स्वयं यो
भृत्येषु विन्यस्तसमस्तकृत्यः ।
यष्ट्याश्रयस्येव विनष्टदृष्टेः
पदे पदे तस्य किलोपघातः ॥ १३९४ ॥
लज्जेहमस्य स्वयमात्तशस्त्रः
स्वल्पस्य शत्रोः कलयन्नवज्ञाम् ।
एवं किलादीर्घमतिर्ददाति
स्वयं प्रवृद्धिं त्रपया विमुग्धः ॥ १३९५ ॥
कालेन याति क्रिमितां महेन्द्रो
महेन्द्रभावं क्रिमिरप्युपैति ।
अयं प्रथीयानयमप्रतिष्ठ
इत्येष निष्ठानुचितोभिमानः ॥ १३९६ ॥
पराभवाधायि भयं जिगीषोः
सर्वाङ्गवैकल्यहतत्वमेव ।
येनाभियुक्तः स समस्तसंप-
त्पूर्णोपि वैकल्यहतत्वमेति ॥ १३९७ ॥
लब्धस्थितिः स्फीतविभूतिपात्रं
दीनोभियोक्ता परपिण्डवृत्तिः ।
आद्ये कथं नाम पराभवः स्या-
द्भयं भवेच्चेह न तत्प्रभावः ॥ १३९८ ॥
अमात्यवैमत्यवशेन निष्ठा
द्दष्टा न कार्यस्य तनीयसोपि ।

वैशाखरज्जोरिव कर्षकाभ्यां
पर्याययोगेन कृते विकर्षे ॥ १३९९ ॥
समग्रशक्तेरेकेनाप्याशाक्रान्तस्य भूपतेः ।
वैरी सर्वाङ्गहीनोपि राज्यमायुश्च कर्षति ॥ १४०० ॥
यत्र द्विषस्तत्र याहि क्रान्तां क्रान्तां च मेदिनीम् ।
पातार्थी न चिरादेवं पुनर्जयमवाप्स्यसि ॥ १४०१ ॥
विधुरेपि विधौ शूरसहस्रपरिवारितैः ।
पतद्भिराहवे भूपैः ख्यात्याभिख्योपलभ्यते ॥ १४०२ ॥
नृत्यच्छिन्नशिरोधरोद्धुरनटे ज्यालाबुवीणागुण-
प्रक्काणिन्युदयच्छिवामुखशिखिज्वालाप्रदीपाङ्कुरे ।
धन्याः केप्युपलभ्य वीरशयने शान्ताभिमानज्वरो-
ल्लाघश्लाघ्यशरीरतासफलितस्निग्धाशिषः शेरते ॥१४०३॥
उदात्तमित्यन्तकृत्यं संचिन्त्य कितवा इव ।
राज्ये भजन्ते दीव्यन्तः क्षत्रियास्त्रासहीनताम् ॥ १४०४ ॥
मन्त्रान्तरानुयोक्तारं तदप्युत्सृज्य मन्त्रितम् ।
परुषं प्राप्तकालं च ते निःश्वस्य तमब्रुवन् ॥ १४०५ ॥
उत्कर्षवदसूंस्त्यक्तुमपि शक्नोषि संकटे ।
अन्यथानुचितं किंचित्प्राप्स्यस्यहितचिन्तितम् ॥ १४०६ ॥
स तानुवाच स्वं हन्तुं न शक्तोहं ततो मयि ।
भवद्भिरेव विषमे प्रहर्तव्यमुपस्थिते ॥ १४०७ ॥
गिरं कापुरुषस्येव क्लैब्यग्रस्तस्य तां प्रभोः ।
सबाष्पास्तेनुशोचन्तः पुनरेवं बभाषिरे ॥ १४०८ ॥
प्रतीकाराय नः शक्तिर्न चेद्दैवहतौजसाम् ।
प्रत्युतैवंविधे कृत्ये प्रसरेयुः कराः कथम् ॥ १४०९ ॥

पशून्पुरुषरूपान्स नूनं भूभृत्पुपोष तान् ।
दुःखे[1] नोदखनंस्तस्य ये तादृग्दैन्यमीयुषः ॥ १४१० ॥
युगान्तानपि जीवित्वा कायः सापाय एव यः ।
तत्त्यागमात्रसाध्येर्थे धिग्दैन्यमनुजीविनाम् ॥ १४११ ॥
योषितोपि विशन्त्यग्निं यं ध्यात्वा विस्मृतिं व्रजेत् ।
भर्तृस्नेहः स पुंसोपि यस्य कोन्यस्ततोधमः ॥ १४१२ ॥
शैलूषस्येव ये शोकभयदैन्यादिविक्रियाः ।
भर्तुः पश्यन्ति तैरेषा भूः सतीर्थाप्यपावनी ॥ १४१३ ॥
क्षुत्क्षामस्तनयो वधूः परगृहप्रेष्यावसन्नः सुहृ-
द्दुग्धा गौरशनाद्यभावविवशा हम्बारवोद्गारिणी ।
निष्पथ्यौ पितरावदूरमरणौ स्वामी द्विषन्निर्जितो
दृष्टो येन परं न तस्य निरये भोक्तव्यमस्त्यप्रियम् ॥१४१४॥
भूयोपि मानुषपशून्स तान्नृपतिरब्रवीत् ।
उदात्तकृत्योप्याविश्य भूतैरिव विमोहितः ॥ १४१५ ॥
एतस्मिन्पश्चिमे काले भुक्तं राज्यं यथा मया ।
जाने विशालेच्छतया तथान्यो नोपभोक्ष्यते ॥ १४१६ ॥
यमः कुबेरश्चौष्ठाग्रे राज्ञां तिष्ठत इत्यसौ ।
मदेकशरणैवाभूत्ख्यातिरस्मिन्कलौ युगे ॥ १४१७ ॥
रुद्रोपेन्द्रमहेन्द्राद्याः प्रयातारो यदध्वना ।
उपस्थितायां नियतौ तत्र मर्त्यस्य काः शुचः ॥ १४१८ ॥
किंतु दूये यदेषा भूर्भूत्वा कुलवधूरिव ।
मद्दोषाद्धटचेटीव प्राप्ता प्रसभभोग्यताम् ॥ १४१९ ॥
इतः प्रभृति यः कश्चिद्राज्यस्यास्य गतौजसः ।
चक्रिकामात्रसाध्यत्वं जानन्नाशां करिष्यति ॥ १४२० ॥

---

[1] दुःखं इत्युचितम् ।

अलौकिके कृते यद्यत्तद्वीक्ष्य फलवन्ध्यताम् ।
प्राप्तोदयैरल्पसत्त्वैर्दर्पान्नूनं हसिष्यते ॥ १४२१ ॥
कार्यारम्भः फलोल्लासमालोक्य प्रायशो जनैः ।
अनानुगुण्यगणनां कुर्वाणैर्न विगर्ह्यते ॥ १४२२ ॥
पक्षान्तकोरिरवलम्बनभूः सनेत्रं
दुग्धेन यस्य मरणं धियि कैरिवेत्थम् ।
पारं गते मथनकर्मणि मन्दराद्रे-
र्दोषोर्प्यते विगुणहेतुपरीक्षणेन ॥ १४२३ ॥
शास्त्रसंदर्भवित्त्वेपि श्रीगर्भत्वमदर्शयम् ।
जनोपजीवनार्थं यत्तज्जातं जाड्यसिद्धये ॥ १४२४ ॥
उच्चलेनापि मत्कृत्ये हस्ताग्रोच्चेयचेतसा ।
दर्शितश्यामदशनं करिष्यन्ते विडम्बनाः ॥ १४२५ ॥
ततोवमानान्न त्रासात्संप्राप्तोद्य विहस्तताम् ।
समर्थनेच्छुर्वाञ्छामि मृत्युमीदृशमप्यहम् ॥ १४२६ ॥
स्वैरेव स हतो नोचेत्कस्तस्माद्वसुधां हरेत् ।
लब्धां रक्षितुमिच्छामि ख्यातिमेतेन हेतुना ॥ १४२७ ॥
मुक्तापीडः पुरा राजा ज्वलित्वा मूर्ध्नि भूभुजाम् ।
कार्पण्यप्रणयं प्राप लब्धरन्ध्रो विरोधिभिः ॥ १४२८ ॥
स ह्युत्तरापथे नानापथस्थगितसैनिकः ।
मितानुगोहितै रुद्धमार्गोभूद्दुर्गमेध्वनि ॥ १४२९ ॥
तं शल्यो नाम सामग्र्यवैरल्यविवशं नृपः ।
बन्द्धुं प्रतिज्ञामकरोद्वाजिलक्षैर्युतोष्टभिः ॥ १४३० ॥
स सामप्रमुखोपायापायध्यानावसन्नधीः ।
भवस्वाम्यभिधं कृत्यमपृच्छन्मुख्यमन्त्रिणम् ॥ १४३१ ॥

असाध्यां सोपि निर्ध्याय विनिपातप्रतिक्रियाम्।
न्याये[1] निश्चित्य नैयत्यं कर्तव्ये प्रत्युवाच तम् ॥ १४३२ ॥
उपाययुक्तिप्रत्युक्ते कृत्ये कीर्त्यभिमानिनाम्।
निःसंभ्रमैव प्रतिभा लोभेनाक्षोभिते हृदि ॥ १४३३ ॥
कृत्यं कृत्यविदो लब्धप्रसिद्धिपरिरक्षणम्।
साम्राज्योपार्जनमुखो व्यापारस्त्वानुषङ्गिकः ॥ १४३४ ॥
गच्छञ्शरीरविच्छेदादपि भस्मावशेषताम्।
कर्पूरः सौरभेणेव जन्तुः ख्यात्यानुमीयते ॥ १४३५ ॥
शान्तयोर्जीवितस्थानं द्वयमत्यद्भुतं द्वयोः।
अनङ्गस्याङ्गनापाङ्गः स्तोतृजिह्वा यशस्विनः ॥ १४३६ ॥
ख्यातिसंरक्षणं नाम जन्तोः कल्पान्तरस्थिति[2]ः।
वर्तने कीर्तिकायस्य संपूर्णाः परमाणवः ॥ १४३७ ॥
धीरैर्विधिश्च निर्ध्येयो विरोधिष्ववधानवान्।
यस्तेषामुन्नतिधनध्वंसाय यततेन्वहम् ॥ १४३८ ॥
तुङ्गावपातनहठव्यसनी विधाता
स्वोत्पत्तिपद्मकुलजेपि सरोजषण्डे।
संकोचिनि द्विजपतावपि शुद्धिवन्ध्ये
मातङ्गहस्तपतनैः कुरुतेवमानम् ॥ १४३९ ॥
ये हठापातिनो धातुरियं ख्यातिनिपातने।
रक्षितुं समुपेक्षन्ते न तैः किं नाम रक्षितम् ॥ १४४० ॥
जातिः क्ष्माभृति वंशजाश्रयतया ख्यातिप्रतिष्ठामिमा-
मुद्दीप्यानलमुज्झितस्ववपुषः केप्यत्र वेत्राङ्कुराः।
त्रातुं हन्त विदन्ति ये न विधिना क्रुद्धेन पृथ्वीभृता[3]
द्वारि द्वाःस्थकरैर्गतागतखलीकाराणि संप्रापिताः ॥१४४१॥

---

१ न्याय्ये इत्युचितम्। २ कल्पान्तरस्थितेः इत्युचितम्। ३ पृथ्वीभृतां इत्युचितम्।

भोगान्निर्वाणभूयिष्ठानिष्टान्प्राप्तानवेत्य तत् ।
प्रतिष्ठासौष्ठवत्राणे संरेब्धं देव सांप्रतम् ॥ १४४२ ॥
दण्डकालसकाख्यस्य तद्रोगस्याशुकारिणः ।
पार्थिवाकस्मिकोत्थानं मिषाद्य प्रकाश्यताम् ॥ १४४३ ॥
श्वो वक्तास्म्यथ कर्तव्यं व्यापत्प्रक्षपणक्षमम् ।
उक्त्वेति स महामात्यो निर्गत्य स्वगृहानगात् ॥ १४४४ ॥
दण्डकालसकं दण्डधरो व्यञ्जन्मिषात्ततः ।
अधीर इव चक्रन्द लुठन्निःस्पन्दलोचनः ॥ १४४५ ॥
स्नेहसंवाहनस्नेहवमनाद्यैरुपक्रमैः ।
निःशैथिल्यव्यथं तेन मुमूर्षुं तं जनोवदत् ॥ १४४६ ॥
ततो निश्चितमृत्युत्वं पत्युः कथयता कृतः ।
वह्निप्रवेशोमात्येन कृतज्ञत्वनिवेदकः ॥ १४४७ ॥
कर्तव्यशेषं दाक्षिण्यादनाचक्षाणमग्रतः ।
युक्त्योक्तानिष्ठुराचारमन्तस्तुष्टाव तं नृपः ॥ १४४८ ॥
अप्रौढः सोढुमुद्दामां व्यथामस्मीति वादिना ।
राज्ञाप्यनलसाद्देहं ततश्चक्रेभिमानिना ॥ १४४९ ॥
तेन प्राणानुपेक्ष्यैवमन्यख्यातेर्मनस्विना ।
ऊर्ध्वाधिरोहे सोपानं कृतं न निजकीर्तनात् ॥ १४५० ॥
एवं दैवोपनीतानामख्यातीनां चिकित्सितम् ।
स्वधियामात्यबुद्ध्या वा पारमेति मनस्विनाम् ॥ १४५१ ॥
इत्युक्ता विरतो वंशबीजरक्षार्थमात्मजः ।
भोजो विसृज्यतां कोटमेवमूचेथ मन्त्रिभिः ॥ १४५२ ॥

---

१ भूयिष्ठान्निष्ठां प्राप्तान् इति स्यात् । २ संरम्भो इति स्यात् । ३ युक्त्योक्त-निष्ठुराचारं इत्युचितम् ।

तं राजपुत्रं प्रस्थानमङ्गलान्ते विनिर्गतम् ।
पुनर्व्यावर्तयामास दण्डनायकमोहितः ॥ १४५३ ॥
सा धीः स साहसारम्भस्तदवैह्वल्यमापदि ।
नष्टमेकपदे तस्य नाशकाले ह्युपस्थिते ॥ १४५४ ॥
लक्ष्मीतडिल्लता कीर्तिबलाका शौर्यगर्जितम् ।
प्रतापशक्रचापं[1] च भागधेयाम्बुदानुगम् ॥ १४५५ ॥
धीशौर्यादिगुणेन भाग्यसमये प्रागेष एको नृपः
शक्रस्याक्रमणं क्रियेत न कुतोनेनेति संभाव्यते ।
मौग्ध्यं पङ्गुजडान्धवच्च स ततो गच्छन्नभाग्योदये
दत्तोनेन पदक्रमो भुवि कथं नामेति संचिन्त्यते ॥१४५६॥
विरोधि[2]प्रतिबोधाय तत्रिसैन्यं विसर्जितम् ।
नगरस्थमपि क्ष्मापात्प्रवासधनमा[3]दधे ॥ १४५७ ॥
दायादाश्रयणं राजभृत्याः सर्वेपि चक्रिरे ।
ये केचित्त्ववसन्गेहे ते देहैरेव केवलम् ॥ १४५८ ॥
पराश्रयपरं द्वित्रा न संकल्पमपि व्यधुः ।
किं वा स्तुतैस्तैर्यैं स्त्रीवदमुञ्चन्नचिरादसून् ॥ १४५९ ॥
यां काणश्रावतीनर्तक्यन्वये कापि नर्तकी ।
पुत्रीचक्रे क्वापि जातां जयमत्यभिधाथ सा ॥ १४६० ॥
भूत्वा गृहीतकौमारा तरुण्युच्चलरागिणी ।
धनलुब्धावरुद्धात्वमभजन्मण्डलेशितुः ॥ १४६१ ॥
तस्मिन्हते तदैवास्तापत्रपोच्चलमाययौ ।
तयैव दैवयोगेन पट्टदेव्या भविष्यते ॥ १४६२ ॥

---

१ चापश्च इत्युचितम् । २ प्रतिरोधाय इति स्यात् । ३ आददे इत्युचितम् ।

आबद्धपङ्क्तयश्चर्चामुच्चलाश्रयिणीं व्यधुः ।
भूपालदर्शनेप्यस्तभीतयो राजसेवकाः ॥ १४६३ ॥
वेतनस्वीकृतैः सर्वैः शिक्षाधायी पुरस्कृतः ।
लोभावमानावुद्बोध्य योधश्रद्धां हरन्युधि ॥ १४६४ ॥
मन्दप्रतापतावाप्तौ नर्मोक्त्या मर्मभेदकृत् ।
आहारादिक्षणे कर्ता प्रक्रियार्थनया कलेः ॥ १४६५ ॥
अतीव प्रभुदानादिमाहात्म्याख्यानकोविदः ।
एक एकोकरोद्योधः पृतनानां विसूत्रणम् ॥ १४६६ ॥
श्रीलेखाभ्रातृसूनोर्यस्तनयो व्यङ्गमङ्गलः ।
मल्लजातीयकोपेन स राज्ञास्कन्ध घातितः ॥ १४६७ ॥
मातुलस्यात्मजा मल्लापत्ययोस्तस्य गेहिनी ।
श्वश्वा समं स्ववसतीरादीप्य दहने मृता ॥ १४६८ ॥
मौनव्रतादिनियमच्छन्नक्रौर्योन्तकोपमः ।
करोत्यभ्यन्तरान्भिन्नान्मल्लः परमदाम्भिकः ॥ १४६९ ॥
तदेष पुत्रराज्येच्छुर्वध्यतां निर्भयं रिपुः ।
शाहिपुत्रीभिरित्यूचे तस्मिन्नवसरे नृपः ॥ १४७० ॥
स्वयं प्रादात्समास्कन्दं द्वारि स्थितवतः पुरः ।
तस्य प्राणार्थिनो वाञ्छापूर्त्यै मल्लश्च निर्ययौ ॥ १४७१ ॥
स हि द्वैराज्यसज्ञाभ्यां पुत्राभ्यां प्रार्थितोपि सन् ।
मुनिव्रतः सदाचारानुरोधान्नात्यजन्नृपम् ॥ १४७२ ॥
विश्वासाय परं राज्ञो भ्रातॄन्राज्ञोर्भविष्यतोः ।
द्वैमातुरान्सहणादीन्नीवीं दत्त्वावसद्गृहे ॥ १४७३ ॥
आसेदुषे मुनिदशामाजन्मप्रीणिताग्नये ।
तदा स तस्मै चुक्रोध प्रत्यासन्नवधो नृपः ॥ १४७४ ॥

स सुराभ्यर्चनं कुर्वन्नाहूतः परिपन्थिभिः।
रेजे तेनैव वेषेण समराय विनिर्गतः॥ १४७५॥
उपवीत्यक्षसूत्राङ्कपाणिर्दर्भोज्ज्वलाङ्गुलिः।
भस्मसेरललाटाङ्को जामदग्न्य इवापरः॥ १४७६॥
स्नानार्द्रधवलश्यामलोलधम्मिललीलया।
देहत्यागे प्रयागाम्बु धारयन्निव मूर्धनि॥ १४७७॥
उष्णीषी वीरपट्टेन खेटकेनोष्णवारणी।
सोसिधारातीर्थपान्थो दण्डी खड्गेन दिद्युते॥ १४७८॥
भोगे पुरस्कृताः केचित्तद्भृत्याः पूर्वनिर्गताः।
अमर्त्यनारीभोगेपि तस्यासन्नग्रभागिनः॥ १४७९॥
द्वौ रय्यावट्टविजयौ द्विजौ पौरगवस्तथा।
कोष्ठकः सज्जकाख्यश्च योधा युद्धे हता बभुः॥ १४८०॥
क्षतोप्युदयराजाख्यः क्षत्तायुःशेषसत्तया।
प्राणैर्नियोगभागाजौ नाज्जकोपि व्ययुज्यत॥ १४८१॥
विरोधियोधैर्नीरन्ध्रं द्वारमालोक्य सर्वतः।
त्यक्तकार्यो ददौ झम्पां स तेषामेव मूर्धनि॥ १४८२॥
शैवलेष्विव खड्गेषु खेटकेष्वम्बुजेष्विव।
जरसा धवलो भ्राम्यन्राजहंस इवाबभौ॥ १४८३॥
क्षणाच्च ददृशे शातशरशङ्कुशताचितः।
प्रवीरो वीरशयने सुप्तो भीष्म इवापरः॥ १४८४॥
शोच्यं गतायुषो राज्ञः किं नाभूत्तस्य तादृशः।
चिच्छेद यः शिरः पृष्ठे हयं च भ्रमयन्स्वयात्॥ १४८५॥
राज्ञी कुमुदलेखाख्या मल्लस्याला च वल्लभा।
गृहेष्वजुहतां वीतिहोत्रे गात्राणि संभृते॥ १४८६॥

राजावकल्पयोः पत्न्यौ बाले सङ्गणरङ्गयोः ।
स्नुषे मल्लस्यासमती सहजा चाग्निसाद्गते ॥ १४८७ ॥
सर्वोपभोगभागिन्यस्तदन्तःपुरयोषिताम् ।
परिवाराङ्गना वह्नौ षट्चात्रैव विपेदिरे ॥ १४८८ ॥
महागृहाग्नितापेन शोकोष्णैश्च जनाश्रुभिः ।
तप्ताम्भसो वितस्तायास्तीरे वामे बभूव तत् ॥ १४८९ ॥
प्रवर्धितायाः स्तन्येन द्रष्टुमक्षमया पयः ।
दास्यमानं निवापेषु पुत्र्याश्चन्द्राख्यया समम् ॥ १४९० ॥
धात्र्या परस्मिन्वै तस्मिंस्तीरे स्वान्तःपुरे स्थिता ।
माता भविष्यतो राज्ञोर्नन्दानिन्द्यकुलोद्भवा ॥ १४९१ ॥
महानसाग्निधूमेन संलक्ष्या वीक्ष्य पुत्रयोः ।
सोत्कण्ठं कटकौ सौधादुदग्दक्षिणदिक्स्थयोः ॥ १४९२ ॥
क्रियतां दिवसैरेव पुत्रौ शत्रोः पितृद्विषः ।
जामदग्न्यायितं वंशे शश्वेति नृपतिं सती ॥ १४९३ ॥
अनिषण्णेव दीप्ताग्नौ गृहे स्वं निरदाहयत् ।
प्रनृत्यन्तीभिरालीभिरिव ज्वालाभिरावृता ॥ १४९४ ॥
वधे दर्शनपालस्तु नृपे प्राप्ते प्रतिक्षणम् ।
अत्यद्भुतैरन्तरायैरायुःशेषेण रक्षितः ॥ १४९५ ॥
वर्षमात्रावशेषायुर्यद्वा द्रोहेण रक्षितः ।
सोवमानस्य पूयस्य रोगजस्य च भुक्तये ॥ १४९६ ॥
कृष्णभाद्रनवम्यां तं वधं श्रुतवतोः पितुः ।
मल्लात्मजन्मनोः शोकः कोपेन निरपीयत ॥ १४९७ ॥
आवह्निपुरकग्रामान्[1]प्रज्वलन्क्रोधवह्निना ।
अधावद्विजयक्षेत्रं सोन्येद्युरथ सुस्सलः ॥ १४९८ ॥

---

१ अवन्तिपुरकग्रामात् इति स्यात् ।

योद्धुमस्यापतन्तं तं चन्द्रराजोथ निर्गतः।
पट्टदर्शनपालाद्यैः ससैन्यैः पर्यवर्ज्यत ॥ १४९९ ॥
निजैरुपेक्षितश्चक्रे स चिरं तत्र दुष्करम्।
स्वल्पसैन्योपि संग्रामं भूरिसैन्येन शत्रुणा ॥ १५०० ॥
अक्षोटमल्लः समरे तत्र मल्लश्च चाचरिः।
अगातां राजगृह्यौ द्वौ स्वर्गस्त्रीभोगभागिताम् ॥ १५०१ ॥
रजोन्धकारे छत्रेन्दुद्योतिन्यालिङ्गितो हतः।
चन्द्रराजः सुरस्त्रीभिरिन्दुराजोस्य चानुगः ॥ १५०२ ॥
तस्मिन्नपि हते वीरे चक्रे हर्षमहीभुजः।
आशारविन्दिनीमूलकन्दनिर्दलनं विधिः ॥ १५०३ ॥
पट्टादयः प्रविश्याथ विजयेशाङ्गनं भयात्।
प्रविष्टे सुस्सले देशं द्वारं दत्तार्गलं व्यधुः ॥ १५०४ ॥
आस्थानीयः परं पद्मनामा युद्ध्वा हतो बहिः।
लक्ष्मीधरो मर्तुमिच्छुर्बद्ध्वा नीतः स डामरैः ॥ १५०५ ॥
विजयेश्वरगञ्जाग्रसौधारूढोथ सुस्सलः।
अधो ददर्श तान्सर्वान्पशूनिव भयाकुलान् ॥ १५०६ ॥
धूर्तः स दत्तमध्यस्थो हसन्नानीतवान्पुनः।
पट्टदर्शनपालौ द्वौ तेषां पूर्वं निजान्तिकम् ॥ १५०७ ॥
निःश्रेण्यभावादारोढुमक्षमौ सुस्सलानुगैः।
तौ मृताविव निर्बद्धपाणी रज्ज्वाधिरोपितौ ॥ १५०८ ॥
तयोर्विदेशगमनं व्रीडादर्थायमानयोः।
प्रतिश्रुत्याकरोद्धीमान्सुस्सलो म्लानिमार्जनम् ॥ १५०९ ॥
स्निग्धोक्त्या भृष्टमांसादिभोगैस्तस्याग्रतस्तयोः।
तस्मिन्नेवाह्नि मन्दत्वं विदेशौत्सुक्यमाययौ ॥ १५१० ॥

केनाप्यधिष्ठितश्चक्रे परेद्युर्यत्स सुस्सलः ।
जाने विश्वसृजोप्यङ्गं रोमाण्वयति तत्स्मृतिः ॥ १५११ ॥
जासटो नृपतिर्हर्षभूभर्तुर्मातुलात्मजः ।
उमाधरमुखाश्चान्ये राजानो यत्र च त्रयः ॥ १५१२ ॥
राजपुत्रहयारोहतन्त्रिसामन्तसंततेः ।
न यत्र गणना काचित्सैन्येष्वष्टादशस्वभूत् ॥ १५१३ ॥
विजयेशाङ्गनस्थानां द्वारमुत्पाट्य सोविशत् ।
एकाक्येवान्तरं तेषां सासिराक्षेपरूक्षवाक् ॥ १५१४ ॥
स तत्र साक्षिणं कृत्वा क्षमावान्विजयेश्वरम् ।
प्रतिश्रुत्याभयं तेभ्यः प्रणतेभ्यो विनिर्ययौ ॥ १५१५ ॥
पुनः सौधाग्रमारूढस्तान्सर्वानर्पितायुधान् ।
रज्जुबद्धकरान्भृत्यैरानिनाय ततोन्तिकम् ॥ १५१६ ॥
स्वर्णरूप्यत्सरुश्रेणिपूर्णायुधपरिष्कृता ।
कीर्णपुष्पोपकारेव सुस्सलास्थानभूरभूत् ॥ १५१७ ॥
विन्यस्य पशुपालानां पशूनिव स तान्करे ।
संरक्षितुं डामराणां त्र्यहं तत्राकरोत्स्थितिम् ॥ १५१८ ॥
ततः सुवर्णसानूरग्रामं संप्राप्य बन्धनात् ।
पट्टदर्शनापालौ द्वावौज्झीद्देशान्तरोन्मुखौ ॥ १५१९ ॥
पट्टः शूरपुरं प्राप्तो भार्ययागतया गृहात् ।
संसृष्टमानोप्यस्मार्षीदल्पसत्त्वो दिगन्तरम् ॥ १५२० ॥
यावन्मात्राप्यौचिती सा विदेशौन्मुख्यलक्षणा ।
द्रोग्धुर्दर्शनपालस्य पट्टमैत्र्या विसूत्रिता ॥१५२१ ॥
अहंपूर्विकया राज्यं जिघृक्षुरथ सुस्सलः ।
नगरासादनादैच्छदभिसंधातुमग्रजम् ॥ १५२२ ॥

---

१ संसज्यमानः इत्युचितम् ।

समानप्रायवयसोः सर्वदोद्दामयोरभूत् ।
यस्माज्ज्येष्ठकनिष्ठत्वं प्रक्रियारहितं तयोः ॥ १५२३ ॥
द्वित्रेष्वहःसु यातेषु क्रामंस्तां तां भुवं बली ।
उदतिष्ठद्राजधान्याः सविधादेव सुस्सलः ॥ १५२४ ॥
निर्दग्धुं कलशा''''तत्प्रस्तुतं भूपतेः सुतः ।
वुप्पापराभिधो भोजदेवो योद्धुं विनिर्ययौ ॥ १५२५ ॥
आत्मवच्छङ्कमानेन कुमाराणां प्रदुष्टताम् ।
यो भाव्यर्थबलात्पित्रा हृतौजा विदधे सदा ॥ १५२६ ॥
कृतो गत्यन्तराभावात्तदानीं तु निरङ्कुशः ।
केषु केषु न युद्धेषु योधानामग्रणीरभूत् ॥ १५२७ ॥
प्रपितामहतुल्यः स स्याच्चेत्प्रागेव वर्धितः ।
कुर्यादुत्साहसंपन्नो निर्दायादा न किं दिशः ॥ १५२८ ॥
नानीतिविन्नाम कश्चित्प्रयोगस्तु विहीयते ।
अस्त्यविल्लभ्यते सर्वो विषयज्ञस्तु दुर्लभः ॥ १५२९ ॥
स राजसूनुरुद्दामविक्रमस्य रिपोरभूत् ।
अत्युद्दामोधिकं जातस्तिमेरिव तिमिंगिलः ॥ १५३० ॥
कृतघ्नभावं पितरि प्रपन्ने
विगर्हणां नार्हति तत्प्रसूतिः ।
शल्कीभवेच्चेत्तिलमुज्झ्यते किं
तैलेन दत्तः कुसुमाधिवासः ॥ १५३१ ॥
देवेश्वरात्मजः पित्थः पार्थिवेनाधिगौरवम् ।
वर्धितोप्यभजत्पापः प्रतिपक्षसमाश्रयम् ॥ १५३२ ॥
ततस्तदात्मजो मिल्लः प्रस्थिते[1] सुस्सलाहवे ।
नृपेणार्थायमानोध्वखेदात्सावज्ञमीक्षितः ॥ १५३३ ॥

---

१ प्रस्तुते इत्युचितम् ।

ज्ञास्यस्यद्यान्तरं राजन्ममेत्युक्त्वा विनिर्गतः ।
खड्गधाराजलैर्मानी म्लानिमक्षालयद्रणे ॥ १५३४ ॥
सर्वनाशादभूद्दुःखं तथा न हृदि भूपतेः ।
तदन्तरापरिज्ञानात्कृतज्ञस्य यथाधिकम् ॥ १५३५ ॥
विभवैर्नित्यसंमूढा जानते त्वन्तरं नृपाः ।
तदा शक्या यदा तेषां प्रलापैरेव सत्क्रिया ॥ १५३६ ॥
भोजेन निर्जितानीको विद्रुतः सुस्सलो रणात् ।
लवणोत्सं पलाय्यागाद्भिर्दर्शितगतागतः ॥ १५३७ ॥
प्रत्यावृत्तस्ततो भोजस्तीव्रातपकदर्थितः ।
उद्यानान्तस्तनुं तल्पे पित्रा सह मुहुर्जहौ ॥ १५३८ ॥
अथोत्तरेणोदतिष्ठन्नादः पारान्नृपौकसः ।
ज्यायान्मल्लात्मजः प्राप्तः सेतुराच्छिद्यतामिति ॥ १५३९ ॥
सुस्सलेन हृतं राज्यं नाद्यायासि द्रुतं यदि ।
स दण्डनायकेनाभूत्संदिष्ट इति पापिना ॥ १५४० ॥
अतो जवेन चाविक्षत्प्रथमं चावधीन्मृधे ।
नरेन्द्रेश्वरदेवाग्रवर्तिनं देवनायकम् ॥ १५४१ ॥
अथोज्जगाम स्थामस्थः सह व्यूहेन सादिनाम् ।
नगराधिकृतो नागस्तस्याग्राद्भूरिसैनिकः ॥ १५४२ ॥
यत्रास्थां पार्थिवोबभ्रात्प्रधानपृतनान्विते ।
बभार नोच्चलाशङ्कां सुस्सलाहवनिर्गतः ॥ १५४३ ॥
अल्पसैन्यो मल्लसूनुर्यावत्तस्मादशङ्कत ।
अपनीतशिरस्त्राणस्तावत्स तमवन्दत ॥ १५४४ ॥
मण्डलेश्वरवत्तं स प्रियं शत्रोरविश्वसन् ।
ऊचे स्ववेश्म याहीति स च पापस्तथाकरोत् ॥ १५४५ ॥

तस्य द्रोहफलं द्रष्टमेतस्मिन्नेव जन्मनि ।
मण्डले यदनन्यस्मिन्भिक्षित्वा जीवितं जहौ ॥ १५४६ ॥
ततो राजा सरित्तीरं प्राप्तः प्रैक्षत डामरान् ।
सेत्वग्रे श्यामविकृतान्दावदग्धान्द्रुमानिव ॥ १५४७ ॥
वलक्षवारवाणस्य तेषां मध्ये वपुर्बभौ ।
परं जनकचन्द्रस्य शुक्रस्येव तमोन्तरे ॥ १५४८ ॥
महासेतुः स घटितो राज्ञा नौभिः स्वसिद्धये ।
पर्यवस्यद्विधिवशाच्छत्रूणां सिद्धये पुनः ॥ १५४९ ॥
अथारुरुहुरादाय वह्निं हर्म्यचतुष्किकाम् ।
शतद्वारे मर्तुकामा देव्यः शाहिसुतादिकाः ॥ १५५० ॥
लोके[1] विरक्तः सेत्वग्रे दायादैः सह संगरम् ।
ददर्शाश्वयुजीलागिमिव निर्विक्रियः प्रभोः ॥ १५५१ ॥
विजये सावशेषो[2]सौ वह्निदानोद्यताः प्रियाः ।
अनिशं वारयन्राजा सेत्वग्रे रणमग्रहीत् ॥ १५५२ ॥
अथ विन्यस्तवर्माणं राजसेनागजं शरैः ।
सेतोर्जनकचन्द्राद्याः प्रमुखस्थमताडयन् ॥ १५५३ ॥
स विद्धो मर्मसु शरैः पूत्कारोद्गारकृद्गजः ।
स्वचमूमेव चरणैरमृद्नाद्विमुखीकृतः ॥ १५५४ ॥
विधिनेव विरुद्धेन सिन्धुरेण कदर्थिता ।
भ्रश्यत्पत्तिहयारोहा समपद्यत वाहिनी ॥ १५५५ ॥
सेतुं तीर्णस्ततो वैरिसैनिकैर्विमुखीकृतः ।
शतद्वाराङ्गनं त्रस्तः साश्वारोहोविशन्नृपः ॥ १५५६ ॥
उदात्तवेषरहितो रहोपि ददृशे न यः ।
भुञ्जानस्यापि यस्यास्यमुद्रा नैव व्यभाव्यत ॥ १५५७ ॥

---

१ लोको इत्युचितम् । २ सावशेषे इत्युचितम् ।

स भयद्विगुणार्कांशुस्वेदप्रस्विन्नविग्रहः ।
पुनः पुनः क्षिप्यमाणस्रस्तवर्मांसयोर्निजैः ॥ १५५८ ॥
अनवस्थितपार्ष्ण्यन्ताघातप्रचलितं हयम् ।
निरोद्धुं बहुशः कर्षन्नष्टवलगाग्रहं करम् ॥ १५५९ ॥
खल्वाटशीर्षपर्यन्तलम्बिनीः कुन्तलच्छटाः ।
प्रापयञ्श्रवणोपान्तं करेण गलितासिना ॥ १५६० ॥
लडत्प्रलम्बनिर्भूषश्रोत्रपालिलताच्छलात् ।
कालाहिनेव मूर्तेन वेष्टितोच्छुष्ककंन्दरः[1] ॥ १५६१ ॥
निस्ताम्बूलतयोच्छुष्कौ जतुपीताविवासकृत् ।
ओष्ठावुत्क्षिप्य कृच्छ्रेण विह्वलो जिह्वया लिहन् ॥ १५६२ ॥
कनीनिकासक्तरेणुक्षामधूसरमाननम् ।
उत्तानीकृत्य पृष्ठस्थाः पश्यन्दीनमनाः प्रियाः ॥ १५६३ ॥
परिभ्रमन्नङ्गनान्तः स्रस्तः स ददृशे जनैः ।
वह्निदानोद्यतास्ताश्च वारयन्करसंज्ञया ॥ १५६४ ॥
मल्लराजस्य वेश्माभूद्राजधान्यन्तिकेपि यत् ।
तीर्त्वा जनकचन्द्रेण तत्र वह्निरदीयत ॥ १५६५ ॥
राजधान्युन्मुखं दृष्ट्वा ज्वलन्तं वह्निमागतम् ।
भेजे पलायनं भोजो राज्यं निश्चित्य हारितम् ॥ १५६६ ॥
स शूलैर्विद्विषां भीमैर्नडैरिव तिरोहितम् ।
द्वारं भित्त्वा तुरंगस्थः प्राङ्गणान्निर्ययौ बहिः ॥ १५६७ ॥
पञ्चषैः सादिभिः सार्धं लोहरौन्मुख्यमाश्रितः ।
प्रतस्थे सेतुमुत्तीर्य सिंहराजमठाग्रगम् ॥ १५६८ ॥
यातस्य दृक्पथात्सूनोः सास्रुरालोकयन्दिशम् ।
राजाश्ववारैः सहितो वेश्मनां बहिरभ्रमीत् ॥ १५६९ ॥

---

१ कंधरः इत्युचितम् ।

अत्रान्तरे मर्तुकामास्त्रातुं काश्चिन्नृपाङ्गनाः ।
अश्मभिस्तत्परिजनैरभज्यत चतुष्किका ॥ १५७० ॥
शाहिपुत्र्यस्तदा ज्ञात्वा शत्रवः पतिता इति ।
मत्वा चतुष्किकाशृङ्गे ततोग्निमुददीपयन् ॥ १५७१ ॥
वास्तव्या डामराश्चाथ घ्नन्तोन्योन्यमुदायुधाः ।
ज्वलतः क्षमापतिगृहाद्भाण्डागाराद्यलुण्ठयन् ॥ १५७२ ॥
केचित्तत्र वधं प्रापुर्विपदं केचनात्यजन् ।
अदृष्टवस्तुसंप्राप्तिः केषांचिद्धास्यदाभवत् ॥ १५७३ ॥
सितेयं शर्करेत्येकः कर्पूरं वदनेक्षिपत् ।
ततः सरिति तद्भाण्डं निर्दग्धवदनो व्यधात् ॥ १५७४ ॥
पामरैः स्वर्णचित्राणि कैश्चित्स्वर्णग्रहेच्छया ।
विनिर्दग्धानि वासांसि विचितं भस्म चादरात् ॥ १५७५ ॥
अविद्धमौक्तिकस्तोमः सिततण्डुलविभ्रमात् ।
क्वचित्पामरनारीभिर्घरट्टेषु विचूर्णितः ॥ १५७६ ॥
वसत्यदृश्ये देशेस्मिन्खलीकारेण तादृशा ।
एवं विडम्बिता लक्ष्मीर्न पुनः क्वाप्यदृश्यत ॥ १५७७ ॥
विद्याधरीरिवोदात्तवेषाः क्षमापतिसुन्दरीः ।
हरन्तो डामराः क्रूरा दृश्यन्ते स्म पदे पदे ॥ १५७८ ॥
वसन्तलेखाप्रमुखाः सस्नुषास्तत्र चक्रिरे ।
निर्यातशेषाः स्वान्देहान्राज्ञ्यः सप्तदशाग्निसात् ॥ १५७९ ॥
गृहाणां दह्यमानानामश्रूयत चटत्कृतिः ।
गाढोष्मक्वथमानाभ्रसिन्धुघोषप्रतीतिकृत् ॥ १५८० ॥
श्रीपद्मश्रीप्रपापार्श्वस्थितस्तद्वीक्ष्य पार्थिवः ।
आर्षं श्लोकमिमं शोकात्स्मृत्वापाठीत्पुनःपुनः ॥ १५८१ ॥

प्रजापीडनसंतापात्समुद्भूतो हुताशनः ।
राज्ञः कुलं श्रियं प्राणान्नादग्ध्वा विनिवर्तते ॥ १५८२ ॥
दग्ध्वाथ राजधानीं तामुच्चलो डामरान्वितः ।
अत्यक्तसैन्यं वीक्ष्यारिं पारमेवातरत्पुनः ॥ १५८३ ॥
ततो युद्ध्वा मर्तुमिच्छन्निन्ये राजाकुलात्मताम् ।
उच्चावचैर्मतिद्वैधैः पदातीनां क्षणे क्षणे ॥ १५८४ ॥
गच्छन्ननन्तपालादिराजपुत्रधिया मृधम् ।
दण्डनायकवाक्येन न्यषिध्यत पदे पदे ॥ १५८५ ॥
युध्यस्व लोहरं वापि याहीत्यूचे च चण्पकः ।
प्रयागस्योत्तरः पक्षः प्रत्यभान्नाग्रिमः पुनः ॥ १५८६ ॥
वार्तामबुद्ध्वा पुत्रस्य नृपतिर्व्याकुलीभवन् ।
पदवीं भोजदेवस्य याहीत्याह स्म चण्पकम् ॥ १५८७ ॥
प्रयागमात्रानुचरो राजन्संपत्स्यसे क्षणात् ।
तस्मान्मामपि मा त्याक्षीरित्यूचे तं स निःश्वसन् ॥ १५८८ ॥
सोन्तर्बाष्पस्तं बभाषे निर्द्रोहोसीति कथ्यते ।
त्वयाप्यस्मिन्क्षणे कस्मात्तस्मादुल्लङ्घ्यते वचः ॥ १५८९ ॥
विना पुत्रं न पश्यामि सार्केपि दिवसे दिशः ।
त्वं तस्मिन्नङ्कसंवृद्धे न मन्युं कर्तुमर्हसि ॥ १५९० ॥
अश्वानिमित्तं कलहस्तेष्वेव दिवसेष्वभूत् ।
मन्त्रिणो राजपुत्रेण तेन तस्याभिमानिना ॥ १५९१ ॥
गिरा प्रभोरुपालब्धस्तदागूरणगर्भया ।
स लज्जानम्रवदनो राजपुत्रानुसार्यगात् ॥ १५९२ ॥
पञ्चाशताश्ववारैः स भ्रातृभृत्यादिभिः समम् ।
उत्तीर्णः सरितः पारमात्मनापञ्चमोभवत् ॥ १५९३ ॥

भ्रातृद्वारेश्ववारे च शेषा राजात्मजे पथि ।
हताश्वे पतिते सोभूद्धनकेनान्वितो भ्रमन् ॥ १५९४ ॥
अनाप्नुवन्राजसूनोर्वार्तां वावर्त्मनाप्यटन् ।[1]
गलितेहनि संप्राप वितस्तासिन्धुसंगमम् ॥ १५९५ ॥
एवमाप्तान्परान्पुत्रमन्वेष्टुं प्राहिणोन्नृपः ।
अन्येपि तन्मिषं लब्ध्वा तस्य पार्श्वादवाचलन् ॥ १५९६ ॥
उत्कोचदायिना[2] क्रुद्धं राजपुर्यादिविग्रहे ।
योग्यानसहता भृत्यान्निःसारः कटकः कृतः ॥ १५९७ ॥
लोहरप्रस्थितौ विघ्नं राजपुत्रस्य कारितः ।
प्रवेशितः पुरं वैरी राजन्यन्याहवाकुले ॥ १५९८ ॥
सर्वस्वध्वंसिना येन स एव नृपतेरभूत् ।
तदाप्युचितकर्तव्यनिषेद्धा दण्डनायकः ॥ १५९९ ॥
राज्ञः कृत्स्नावसन्नस्य शृण्वतो बहु मन्त्रितम् ।
नैकत्र रूढिः कर्तव्ये क्वाप्यधीरधियोभवत् ॥ १६०० ॥
सर्वैर्यथा निखिलरन्ध्रमुखेन वंशः
संपूरितो न खलु शब्दमपि प्रसूते ।
तैस्तैस्तथा बहुपथप्रचयेन मन्त्रः
संकल्पितः किल न निश्चयमभ्युपैति ॥ १६०१ ॥
भाग्यक्षयस्यैतदेव लक्षणं प्राकृतोपि यत् ।
अपृष्टः कथयेद्धार्ष्ट्यान्मन्त्रं स्वहृदयोचितम् ॥ १६०२ ॥
त्रैलोक्यनाम्ना सूतेन शंसता दण्डनायकम् ।
निरोध्य वल्गामित्यूचे भूयः क्ष्माभृद्रणोन्मुखः ॥ १६०३ ॥
एकाङ्गैः साश्ववारैः प्राग्जिगायन्तत्सितामहः[3] ।
तद्गच्छामोक्षपटलोपान्तं तत्संग्रहेच्छया ॥ १६०४ ॥

---

१ वार्वर्त्मना इति स्यात् । २ उत्कोचादायिना इत्युचितम् । ३ जिगाय त्वत्पितामहः इति स्यात् ।

पदातिप्रायसैन्यांस्तान्निहन्मः संहताम्रिपून् ।
पश्चान्निपत्य तैः साकं श्येना इव विहंगमान् ॥ १६०५ ॥
ततश्चिचलिषावेव राज्ञि तत्कटको दिशः ।
स वृष्ट्यम्बुहतो रङ्गप्रेक्षिलोक इवागमत् ॥ १६०६ ॥
पारेवितस्तां[1] प्राप्तेभ्यः पाथेयायात्मजन्मनः ।
स शेयाराजजन्मभ्यो रत्नग्रैवेयकाद्यदात् ॥ १६०७ ॥
आरामिकैस्तैः संप्राप्ते राजचिह्ने क्षणादिव ।
तेजःस्फारोर्जितो राजा गतश्रीर्ददृशे जनैः ॥ १६०८ ॥
पदे पदे भ्रश्यमानसैन्योक्षपटलादिषु ।
स्थानेषु चाभ्रमीत्कश्चिन्न च तस्यापदन्तिकम् ॥ १६०९ ॥
संश्रयार्थ्यथ बभ्राम सायं वेश्मानि मन्त्रिणाम् ।
प्रवेशं प्रददौ चास्य न कोपि द्वारि तस्थुषः ॥ १६१० ॥
प्रायोपवेशकुशलाः शक्तास्त्वन्ते न कुत्रचित् ।
मिथ्यासंभावनाभूमिर्भूपानां ब्रह्मबन्धवः ॥ १६११ ॥
ये केपि देशे सन्त्यस्मिंस्तद्वेहेष्वास्थया भ्रमन् ।
प्रविविक्षुर्गृहान्प्राप कपिलाख्यस्य मन्त्रिणः ॥ १६१२ ॥
तस्मिँल्लोहरकोट्टस्थे तत्पत्न्या स्थातुमर्थितः ।
नौभिश्च कोट्टं गन्तुं न प्राविक्षद्दैवमोहितः ॥ १६१३ ॥
आर्तस्य तस्य तत्पुत्रैः पितृवद्द्रोहकारिभिः ।
ऋणिकैरुत्तमर्णस्य स्वं निःस्वैरेव गोपितं[2] ॥ १६१४ ॥
सदोषोस्मीति सोज्ञासीत्स्वयं शृण्वन्विगर्हणाम् ।
तदैव गोपिताशेषकृत्यो दुर्मन्त्रिभिः पुरा ॥ १६१५ ॥
गृहीतसर्वनैराश्यः पार्श्वस्थेष्वप्यविश्वसन् ।
अभूत्प्रद्युम्नमुत्तीर्णो नितरां विरलानुगः ॥ १६१६ ॥

---

१ पारेवितस्तं इत्युचितम् । २ गोपितम् इत्युचितम् ।

प्रख्यापयन्तः संभूतिं षट्त्रिंशतिकुलेषु ये ।
तेजस्विनो भास्वतोपि सहन्ते नोच्चकैः स्थितिम् ॥ १६१७ ॥
तेप्यन्तेनन्तपालाद्या राजपुत्रास्तमत्यजन् ।
सान्द्रतां दधति ध्वान्ते स्थगिताश्वाः पदे पदे ॥ १६१८ ॥
वाहनाज्जोहिलमठोपान्तं प्राप्यावतीर्णवान् ।
स दण्डनायकेनापि तत्यजे सोनुजन्मना[1] ॥ १६१९ ॥
इहास्मच्छ्वशुरावासस्तत्र वस्तुमिमां निजम्[2] ।
वीक्ष्य ते स्थानमेष्यामीत्युक्त्वा व्याजेन सोचलत् ॥ १६२० ॥
यियासोरनुजं तस्य पाथेयार्थं प्रयागकः ।
ययाचेङ्गदमस्मै स प्रादात्सक्तून्न तं पुनः ॥ १६२१ ॥
एकांशुकावशेषश्रीस्ततोवाशेषजीवितः ।
प्रयागशेषानुचरो नृपतिः समपद्यत ॥ १६२२ ॥
सूदश्चण्पकभृत्यस्य जेलकाख्यस्य तत्क्षणम् ।
मुक्तो नामान्तिकं प्राप्तो नृपतेराप्ततामगात् ॥ १६२३ ॥
उदीपविहितैः खातैरग्रे दुःसंचरा क्षितिः ।
भ्राम्यतस्तानुवाचेति नारी काचिद्गृहान्तरात् ॥ १६२४ ॥
ततस्तीरे वितस्ताया निषण्णेस्मिन्प्रयागकः ।
गन्तुं जयपुरं कोट्टमाजुहाव स नाविकान् ॥ १६२५ ॥
स हि प्राक्संविदं चक्रे तत्रत्यैः सह शस्त्रिभिः ।
नृपं प्रेयाश्रयं नेतुं भूमादेवस्य[3] मन्दिरम् ॥ १६२६ ॥
उच्चलाश्रयिणाप्यूचे भीमादेवेन येन सः ।
राज्ञोनुगो गमिष्यामि प्रविष्टस्योपवेशनम् ॥ १६२७ ॥
नौचरैराहृतां नावमारुरोह न भूपतिः ।
नाशोन्मुखः समासन्नवृष्टिपातभयाकुलः ॥ १६२८ ॥

---

१ सानुजन्मना इत्युचितम् । २ निशाम् इत्युचितम् । ३ भीमादेवस्य इति स्यात् ।

पर्यापतत्कालकरस्थभोगि-
संदर्शनेनेव मतिप्रदीपः ।
क्षिप्रं प्रशान्त्युन्मुखतामुपैति
विनाशकालेषु शरीरभाजाम् ॥ १६२९ ॥
तस्मिन्द्रोहसुभिक्षेपि यस्य मानवतः परम् ।
अनन्यालोकिनी दृष्टिर्भेजे कुलवधूव्रतम् ॥ १६३० ॥
नीलाश्वीयः स बिम्बाख्यो डामराभिलितोहितैः[1] ।
तदापि प्रययौ राज्ञो विस्मृतिं संश्रयार्थिनः ॥ १६३१ ॥

युगलकम् ॥

ततः प्रावर्तत त्यक्तुं वारि वारिमुचां गणः ।
क्षमामिव क्षालयितुं द्रोहस्पर्शेन दूषिताम् ॥ १६३२ ॥
भूर्निर्जना वृष्टिपातस्तमिस्रा दुःसहायिता ।
वैरिभीतिरिति प्राभूत्किं किं तस्य न दुःखदम् ॥ १६३३ ॥
इतिवृत्तानुरोधेन धिग्दुष्कर्मविधायिनाम् ।
अस्मर्तव्यमपि व्यक्तं नाम ग्राहिष्यतेधुना ॥ १६३४ ॥
सोमानन्दाभिधानस्य पूज्याः सिद्धस्य देवताः ।
सोमेश्वराभिधाः सन्ति काश्चित्पितृवनान्तरे ॥ १६३५ ॥
तल्लाञ्छिताङ्गना तुङ्गतरुप्रच्छन्नवाटिका ।
अभूद्रुणाभिधानस्य कुटी क्षुद्रतपस्विनः ॥ १६३६ ॥
वारस्त्रिया स विरहभुजंगीतिप्रसिद्धया ।
भिश्चाख्यया समं भेजे चेष्टितं कुट्टनोचितम् ॥ १६३७ ॥
तस्य प्रतापगौरीशदेवागारान्तिकस्थितेः ।
कुटीं मुक्तेन तां निन्ये क्षमाभृद्वस्तुं स तां क्षेमाम्[2] ॥ १६३८ ॥

---

१ डामरोमिलितोहितैः इति स्यात् । २ क्षपाम् इत्युचितम् ।

मुक्तमालम्ब्य नृपतिस्तमालम्ब्य प्रयागकः ।
यान्ति स्म विद्युद्द्योतेन क्ष्मां पश्यन्तोन्तरान्तरा ॥ १६३९ ॥
निरुष्णीषोङ्गसंस्यूतकृतवासाः स्खलन्नृपः ।
स तां प्रयागमुक्ताभ्यां कथंचित्प्रापितः कुटीम् ॥ १६४० ॥
तदा कुमन्त्रिनिष्कृष्टं स व्यापद्धारणक्षमम् ।
शोचन्सस्मार कंदर्पं रुद्रं दैत्यमिवोत्पलः ॥ १६४१ ॥
प्राकारमूर्ध्ना मुक्तेन प्रविष्टेन हृतार्गलाम् ।
नृपः कुटीप्राङ्गणोर्वीं विवेशास्थिततापसाम् ॥ १६४२ ॥
विशतोश्मक्षतः पादस्तस्यासृग्दक्षिणोत्यजत् ।
मेने तेनानिमित्तेन स मृत्युं समुपस्थितम् ॥ १६४३ ॥
कुट्यामर्गलरुद्धायां निषण्णस्याङ्गने ययौ ।
रात्रिर्भीतिमतो भीमा तस्य घोराभ्रमालिनी ॥ १६४४ ॥
पङ्कोपलिप्तः पङ्काङ्कस्थण्डिलस्थो निनाय ताम् ।
दासकम्बलिकाच्छन्नगात्रो वृष्ट्युत्तरां निशाम् ॥ १६४५ ॥
विससारान्तरा दुःखमासीनप्रचलायितैः ।
निर्निद्रस्त्वभवच्छ्वभ्राद्भ्रश्यन्निव समाकुलः ॥ १६४६ ॥
कोहं केनाभिभूतोद्य क्व वर्ते कोनुगोधुना ।
किं कृत्यमिति निर्ध्याय मुहुर्मुहुरकम्पत ॥ १६४७ ॥
हृतं राज्यं प्रिया दग्धा भ्रष्टः सूनुरबान्धवः ।
जातोस्म्येकाक्यपाथेयो लुठन्भिक्षाभुजोङ्गने ॥ १६४८ ॥
इत्येकैकं च निर्ध्याय दुःखं नैक्षिष्ट सोपरम् ।
प्राप्तावसानं शोचन्तमात्मतुल्यं कथास्वपि ॥ १६४९ ॥
युग्मम् ॥
भोजस्तु वाजिभिर्द्वित्रैरवशिष्टैः समं व्रजन् ।
हस्तिकर्णान्तरं प्राप निर्गत्य नगरान्तरात् ॥ १६५० ॥

व्रजतस्तस्य धीरासीन्नियतं पञ्चषैर्दिनैः ।
पुनः संप्राप्नुयां राज्यं यदीन्द्रोपि भवेद्रिपुः ॥ १६५१ ॥
गर्भवास इव पौरुषे स्फुर-
न्किं न कर्म पुरुषश्चिकीर्षति ।
कर्मवायुरिव संस्पृशन्हठा-
न्मूढमेव कुरुते तु तं विधिः ॥ १६५२ ॥
मातृभिर्दत्तपाथेयं भृत्यं नागेश्वराभिधम् ।
प्रतीक्षमाणश्चक्रे स रङ्गवाटान्तरस्थितिम् ॥ १६५३ ॥
शून्ये देवगृहे तत्र तिष्ठञ्श्रुत्वा तमागतम् ।
स निर्ययौ तेन तस्मिन्निःशङ्कं प्रहृतं पुनः ॥ १६५४ ॥
तत्र प्रादुष्कृतद्रोहे क्षत्रधर्मादविच्युतः ।
राजपुत्रः स यच्चक्रे न तत्कस्याद्भुतावहम् ॥ १६५५ ॥
स सिंह इव संहारं कृत्वा युधि विरोधिनाम् ।
अस्राङ्गरागलिप्ताङ्गो वीरशय्यामभूषयत् ॥ १६५६ ॥
भ्रातास्य मातुलापत्यं विपेदे पद्मकाभिधः ।
खेलो लालितवच्चैव संख्येसंख्यपराक्रमः ॥ १६५७ ॥
मठं सूर्यमतीदेव्याः शर्वर्यामुच्चलोविशत् ।
भ्राताप्यस्य रणश्रान्तो लवणोत्सात्समाययौ ॥ १६५८ ॥
हतं भोजं श्रुतवतोर्हर्षमात्रे स्थिते तयोः ।
मनस्युत्खातशूलेश्रिरेवैका पर्यशिष्यत ॥ १६५९ ॥
प्राप्तमप्राप्तवद्राज्यं तथापि प्रत्यभात्तयोः ।
प्रवासे विस्मृते राज्यसुखे लब्धे च कुत्रचित् ॥ १६६० ॥
प्राह्णे कुतश्चिदानीतो मुक्तेनान्विष्य तापसः ।
प्रणम्य नृपतिं चक्रे स्वकुटीं तां निरर्गलाम् ॥ १६६१ ॥

तां दंशमशकाकीर्णामास्तीर्णतृणविष्टराम् ।
कृताम्बुसेकां मुक्तेन नृपतिः प्राविशत्कुटीम् ॥ १६६२ ॥
यद्गिरा बहुमानोभूच्छ्रुतया भूभुजामपि ।
स भूभृच्चाटुकारित्वं भीतो भिक्षाभुजोप्यगात् ॥ १६६३ ॥
भिक्षाकस्योचितो[1] ग्राम्यमनुदात्तं त्रपावहम् ।
आलापव्यवहाराभ्यां तस्य शृण्वन्स विव्यथे ॥ १६६४ ॥
स भिक्षाकः प्रयागेण विक्रयायाधरांशुकम् ।
निजं दत्त्वा विससृजे विपणिं भोज्यसिद्धये ॥ १६६५ ॥
कदुक्तिः कटुवागग्रे परोक्षं भेदभीतिकृत् ।
कुतापसो दौःस्थ्यहेतुर्नृपस्यारिर्यथाप्यभूत् ॥ १६६६ ॥
मध्याह्ने स्कन्धविन्यस्तभोज्यभाण्डकरण्डिका ।
तपस्विन्याप्यथानिन्ये[2] तेन क्षुद्रतपस्विना ॥ १६६७ ॥
भृत्यभिक्षाकयोः पूर्वं स्त्रिया अप्यथ पार्थिवः ।
स्वं वीक्ष्य गोचरीभूतं निराशो जीवितेभवत् ॥ १६६८ ॥
तेन प्रयागोपहृतं भोज्यं तदनुरोधतः ।
स्पृष्टमेव न भुक्तं तु तीव्रदुःखोल्बणात्मना ॥ १६६९ ॥
का वार्तेति प्रयागेण प्राङ्गणस्थेन पृष्टया ।
तापस्याग्रस्थया व्यक्तमुक्तो भोजवधस्ततः ॥ १६७० ॥
मिथ्यैतदिति तेनाथ कथ्यमानोपि पार्थिवः ।
श्रुतिं तामङ्कशकुनं परीक्ष्याबुद्ध नान्यथा ॥ १६७१ ॥
नारोहति गिरं शत्रोरप्रियाख्यायिनोपि यत् ।
तस्य संववृते दुःखं निमग्नस्य तदापदि ॥ १६७२ ॥

---

१ भिक्षाकस्य वचो इति स्यात् । २ तपस्विन्यप्यथानिन्ये इत्युचितम् ।

स शोचन्नात्मजं बाल्ये नीत्यै यां यत्नणां व्यधात् ।
आजन्मदुःखदायित्वं मेने तस्यात्मनस्तया ॥ १६७३ ॥
हतः स समरे वृत्त्या प्रवीरस्पृहणीयया ।
जज्ञे तेनातिवात्सल्यादङ्कशायीव घातितः ॥ १६७४ ॥
गात्रेषु हारान्पुत्रस्य यौवनव्यूढवक्षसि ।
पश्यन्नात्मनि संकल्पैर्विह्वलः सोकृताशिषः ॥ १६७५ ॥
रक्षणीयो हतो बालो वृद्धस्त्वेवं स्वजीवितम् ।
रक्षाम्यनुचिताचारैर्जिह्मायेति स चिन्तयन् ॥ १६७६ ॥
एवं स पुत्रशोकेन धृतावाच्यव्यथो व्यथन् ।
निनाय तापसावासे द्वितीयामपि यामिनीम् ॥ १६७७ ॥
कृतार्थनः प्रयागेण प्रयातुं भगवन्मठम् ।
शोकहारितधी रात्रौ न संकल्पमपि व्यधात् ॥ १६७८ ॥
लम्बेन्दुवदना सान्द्रावश्यायाम्भोम्बुवर्षिणी ।
रथाङ्गाक्रन्दिनी रात्रिः सशोकेवाथ सागमत् ॥ १६७९ ॥
क्षुत्पिपासापरिक्षामं प्रभुं वीक्ष्य स तापसः ।
प्रार्थ्यते स्म प्रयागेण प्रातर्भोक्तव्यसिद्धये ॥ १६८० ॥
उपनिन्ये विनिर्गत्य प्रविष्टस्तापसस्तयोः ।
सव्यञ्जनान्नपूर्णे द्वे पात्रे·····क्षणात्पुरः ॥ १६८१ ॥
कस्यापि गृहिणो यागोत्सवादेते मयाहृते ।
तस्मिन्नित्युक्तवत्यूचे विनिःश्वस्य प्रयागकः ॥ १६८२ ॥
राजन्स्वामिवियोगेस्मिन्पश्य लोकस्य सुस्थताम् ।
स तं जगाद विहसन्किं मूढ इव भाषसे ॥ १६८३ ॥
यो गतो गत एवासौ तत्क्षत्या नापरः क्षतः ।
सर्वो निजसुखापेक्षी न किंचित्कोपि शोचति ॥ १६८४ ॥

---

१ वक्षसः इति स्यात् ।

लोकैकचक्षुषि गते परलोकमर्कं
लोकः स्वपित्यखिल एव सुखं गृहेषु ।
कोन्यो विचिन्तयितुमर्हतु विश्वमेत-
त्तिष्ठेन्मया विरहमेत्य कथं किलेति ॥ १६८५ ॥
पुत्रस्य स्नेहविश्वासः पूर्वमाप्तक्षये श्रुते ।
यथैकः प्रभवेन्नान्यस्तथा स्नेहोपि देहिनः ॥ १६८६ ॥
अहमेव हतं पुत्रं श्रुत्वा जीवितजीवितम् ।
तिष्ठामि स्वस्थवद्यत्र तत्रान्यो निन्द्यतां कथम् ॥ १६८७ ॥
इत्युक्त्वा विरते राज्ञि पुनर्गूढं प्रयागकः ।
प्रैरयत्तापसं भोज्यं कर्तुं ते भाजने त्यजन् ॥ १६८८ ॥
ह्यस्तनव्ययशिष्टं मे पर्याप्तं नास्ति वेतनम् ।
यते तथापीत्युक्त्वा स सखेद इव निर्ययौ ॥ १६८९ ॥
गोप्यं रहस्यभणितमत्यल्पहृदयातिथि ।
अमृतं पारंतमिव नाल्पसत्त्वैः सुदुर्जरम् ॥ १६९० ॥
कुल्यो मनोरथो नाम विप्रस्य वनवासिनः ।
सुहृत्तपस्विनस्तस्य तां कथामुपलब्धवान् ॥ १६९१ ॥
राज्ञः संदर्श्य दायादं भवावो भूतिभाजनम् ।
इत्युक्त्वा तेन निन्ये स द्रोग्धृतां क्षुद्रतापसः ॥ १६९२ ॥
जज्ञे भृत्येन गर्ह्येण जातः सोन्त्येन केनचित् ।
सदृशं यत्सदसतोर्ज्ञापकं जन्म कर्मणोः ॥ १६९३ ॥
इल्लाराजस्तां प्रवृत्तिं बुद्ध्वा ताभ्यां न्यवेदयत् ।
उच्चलाय समादिक्षत्कार्यं तत्र तमेव सः ॥ १६९४ ॥
केचित्तु भूतिभिश्चाख्यमिल्लाराजोपसर्पणे ।
कायस्थं कारणं प्राहुस्तयोस्तापसविप्रयोः ॥ १६९५ ॥

---

१ पारदमिव इत्युचितम् ।

वार्ता चेदवगीतेयं सुबहुश्रोत्रसंकुले ।
काले तद्भृत्यपाशस्य तस्यैव द्रोहमुख्यता ॥ १६९६ ॥
श्वपाकस्कन्धमारूढो लब्ध्वा तास्ता विमाननाः ।
विपेदे यत्स कारायां युक्तं तत्तस्य कर्मणः ॥ १६९७ ॥
क्षुत्तप्तो हर्षदेवस्तु प्रयागेणार्थितोसकृत् ।
प्रत्यग्रे पुत्रशोकेपि भोजनायाकरोन्मनः ॥ १६९८ ॥
गृहीतभोजनं जानन्प्राप्तं प्राप्तं स तापसम् ।
तमोरेर्बहिरैक्षिष्ट नीडाच्छिशुरिवाण्डजः ॥ १६९९ ॥
अपश्यच्च कुटीं कृत्स्नां वेष्टितामेत्य शस्त्रिभिः ।
शुश्राव चाङ्गनद्वाराद्वार्यमाणार्गलाद्ध्वनिम् ॥ १७०० ॥
जानञ्जातं ततो द्रोहमङ्गनात्तापसाधमम् ।
स शस्त्रिणं मुक्तमेहीत्याह्वयन्तं व्यलोकयत् ॥ १७०१ ॥
मुक्तं विसृज्य कृत्वा च द्वारमुद्घाटितारिरि ।
त्यक्तभीराददे लघ्वीं क्षुरिकामन्तिकस्थिताम् ॥ १७०२ ॥
एकस्तत्सविधं क्रूरः साहसाहंक्रियोन्मदः ।
आरुरोहाथ कृष्टासिधेनुः कवचितो भटः ॥ १७०३ ॥
तं राजा संकटकुटीरुद्धायामोप्यपातयत् ।
क्षितौ व्यायामकुशलो नावधीत्कृपया पुनः ॥ १७०४ ॥
पतितेन हतेनार्थो वराकेणामुना न मे ।
इत्यूचे दुरहंकारग्रस्तस्तस्मिन्नपि क्षणे ॥ १७०५ ॥
नीध्रमुत्पाट्य निपतन्नेकोन्योप्युत्पतन्भटः ।
भयाद्भूमौ न्यपततां तं विलोक्योद्यतायुधम् ॥ १७०६ ॥
पृष्ठे पूर्वं प्रविष्ट[1]····तिष्ठन्स्थानकनिष्ठुरः ।
स रुरोविव चामुण्डा रेजे दण्डाकृतिः क्षणम् ॥ १७०७ ॥

१ प्रविष्टस्य इति स्यात् ।

न सिंहनादैर्नो भेरीतूर्यघोषैर्न वोन्मदैः।
शस्त्रशब्दैः स शुशुभे भूपस्यान्तक्षणे रणः॥ १७०८॥
आखोर्भाण्डप्रवेशस्य विडाला इव डामराः।
परं प्रवेशितास्तस्य निःशब्दं शस्त्रिणः कुटीम्॥ १७०९॥
अथान्यो नीध्रमार्गेण संप्रविष्टः प्रयागकम्।
हत्वा दोष्णि च शीर्षे च राजानं समुपाद्रवत्॥ १७१०॥
राज्ञः प्रहरतः शस्त्रं वञ्चयित्वा स शस्त्रभृत्।
वक्षसि क्षुरिकाघातद्वयं प्रादात्कृतत्वरः॥ १७११॥
वर्णान्महेश्वरेत्येतान्द्विरुक्ता गतजीवितः।
पपात निहतो भूमौ छिन्नमूल इव द्रुमः॥ १७१२॥
पलाय्य संप्रविशतो योग्यश्चौरस्य यादृशः।
चक्रवर्त्यपि स प्राप वधं वेश्मनि तादृशम्॥ १७१३॥
नान्यः स इव कालेस्मिन्ददृशे भूतिमान्नृपः।
गर्ह्यनिर्हरणत्वं च तस्येवान्यस्य नेक्षितम्॥ १७१४॥
यद्वैकेनैव संग्रामवैमुख्येनोन्नतात्मनः।
सर्वप्रकारसुभगं माहात्म्यं तस्य खण्डितम्॥ १७१५॥
नेयबुद्धित्वमेवासीदथवा तस्य दूषणम्।
सर्वक्लेशावहा दोषाः कृत्स्नास्तन्मन्त्रिणां पुनः॥ १७१६॥
द्वाचत्वारिंशतः साष्टमासा यस्य वयःसमाः।
स शुक्लभाद्रपञ्चम्यां हतोब्दे सप्तसप्तते॥ १७१७॥
राजा दुर्योधन इव स्ववंशच्छेदमिच्छता।
सोभूज्ज्ञातकयोगेन कारितः स्वकुलक्षयम्॥ १७१८॥
तस्यास्तां क्ष्मार्कजौ जीवबुधौ शुक्रोष्णगू शशी।
तनयामित्रजामित्रखेषु कर्कटजन्मनः॥ १७१९॥

चन्द्रदैत्येज्यपापेषु खमदात्मजगेषु यत् ।
आहुः सुसंहिताकाराः कौरवादीन्कुलान्तकान् ॥ १७२० ॥
निर्ब्रह्मण्यो जनः कृत्स्नो देशोस्मिन्वैरिणोन्तिकम् ।
दस्योरिव शिरश्छित्त्वा स्वामिनोपि निनाय तत् ॥ १७२१ ॥
तस्योत्तमाङ्गे भूभर्त्तुश्छिद्यमाने ससागरा ।
चकम्पे भूर्निरभ्रापि द्यौर्वृष्टिं महतीं जहौ ॥ १७२२ ॥
तन्मुण्डे लगुडारूढे यदयुक्तं जनो व्यधात् ।
अभूत्तेनाभिशापेन सोग्रे दीर्घोपसर्गभाक् ॥ १७२३ ॥
मण्डले देवबिम्बानां यथामुष्मिन्विपाटनम् ।
तथा नवं प्रववृते भूपतेर्मुण्डखण्डनम् ॥ १७२४ ॥
नैक्षिष्ट तच्छिरः प्राप्तमौचित्यादुच्चलो नृपः ।
भूत्वा चिरमुदस्रुस्तु कारयामास वह्निसात् ॥ १७२५ ॥
धिक्कष्टं तस्करस्येव तादृशश्चक्रवर्तिनः ।
नोच्चलाज्ञां विना प्राप्ता शरीरेणान्तसत्क्रिया ॥ १७२६ ॥
भृत्यत्यक्तो नष्टवंशो गौरकाख्येण केनचित् ।
स काष्ठागारिणा चक्रे नग्नोनाथ इवाग्निसात् ॥ १७२७ ॥
दीर्घो हर्षनृपोदन्तः सोयं कोप्यद्भुतावहः ।
रामायणस्य नियतं प्रकारो भारतस्य वा ॥ १७२८ ॥
भाग्याम्बुवाहतडितस्तरलाः श्रियस्ता-
स्तच्चावसानविरसं प्रसभोन्नतत्वम् ।
तत्रापि नैष बत मोहहताशयानां
शान्तिं प्रयाति विभवानुभवाभिमानः ॥ १७२९ ॥
तावत्यप्यवरोधिकापरिकरे नैकापि चक्रन्द तं
तावत्स्वप्यनुगेषु नानुसृतवान्कोप्यास्त तीर्थं न वा ।

लोकस्य स्वसुखोपलिप्तमनसो वीक्ष्येति निःस्नेहतां
निर्वेदं समुपेत्य नाश्रयति धिक्स्वान्तं वनान्ते रतिम् ॥१७३०॥
नादौ किंचिद्भवति नियतं यच्च पश्चान्न किंचि-
न्मध्येकस्मात्सपदि घटयन्सौस्थ्यदौःस्थ्यानुरोधम् ।
निःशीर्षाङ्गैर्नट इव मुहुः कोपि जन्तुर्नटित्वा
नो जानीमो भवजवनिकान्तर्हितः क्व प्रयाति ॥ १७३१ ॥
श्री[1] सातवाहनकुलेकृत कान्तिराज[2]-
वंशे त्यजन्त्युदयराजकुले प्रतिष्ठाम् ।
शृङ्गं सुरैर्विरहितं जहती हिमाद्रे-
र्दिव्ये तटे सुरगिरेरिव वासरश्रीः ॥ १७३२ ॥

इति श्रीकाश्मीरिकमहामात्यचण्पकप्रभुसूनोः कह्लणस्य कृतौ राजतरङ्गिण्यां सप्तमस्तरङ्गः ॥

समाष्टनवतावस्यां त्र्यहोनायां महीभुजः ।
षडत्रोदयराजस्य वंशे जाताः प्रकीर्तिताः ॥

---

१ श्रीः इत्युचितम् । २ कान्तिराज इति स्यात् ।

BOMBAY SANSKRIT SERIES.

Edited under the superintendence of Dr. P. Peterson and

Dr. R. G. Bhândârkar.

	Rs.	a.	p.
No. I.—Pañchatantra, Books IV. and V. Edited, with Notes, by Dr. Bühler	0	4	0
No. II.—Nâgojibhaṭṭa's Paribhâshendus'ekhara. Edited and explained by Dr. Kielhorn. The Sanskrit Text and various Readings, Part I	0	8	0
No. III.—Pañchatantra, Books II. and III. Edited, with Notes, by Dr. Bühler...	0	4	0
No. IV.—Pañchatantra, Book I. Edited, with Notes, by Dr. F. Kielhorn	0	7	0
No. V.—The Raghuvaṁs'a of Kâlidâsa, with the Commentary of Mallinâtha. Edited, with Notes, by S. P. Pandit, M.A. Part I., Cantos I.—VI.	1	0	0
No. VI.—Mâlavikâgnimitra : a Sanskrit Play by Kâlidâsa. Edited, with Notes, by Shankar P. Pandit, M. A.	2	2	0
No. VII.—Nâgojibhaṭṭa's Paribhâshendus'ekhara. Edited and explained by Dr. Kielhorn. Part II. (Translation and Notes), Paribhâshâs I.—XXXVII	0	8	0
No. VIII.—The Raghuvaṁs'a of Kâlidâsa, with the Commentary of Mallinâtha. Edited, with Notes, by S. P. Pandit, M. A. Part II., Cantos VII.—XIII....	0	12	0
No. IX.—Nâgojibhaṭṭa's Paribhâshendus'ekhara. Edited and explained by Dr. Kielhorn. Part II. (Translation and Notes), Paribhâshâs XXXVIII.—LXIX.	0	8	0
No. X.—The Das'akumâracharita of Daṇḍin. Part I. Edited, with Critical and Explanatory Notes, by Dr. Bühler	0	8	0
No. XI.—The Nîtis'ataka and Vairâgyas'ataka of Bhartṛihari, with extracts from two Sanskrit Commentaries. Edited, with Notes, by Kâshinâth Trimbak Telang, M. A. (copies not available.) ...			
No. XII.—Nâgojibhaṭṭa's Paribhâshendus'ekhara. Edited and explained by Dr. Kielhorn. Part II. (Translation and Notes), Paribhâshâs LXX.—CXXII. ...	0	8	0

	Rs.	a.	p.
No. XIII.—The Raghuvaṁs'a of Kâlidâsa, with the Commentary of Mallinâtha. Edited, with Notes, by S. P. Pandit, M. A. Part III., Cantos XIV.—XIX	0	8	0
No. XIV.—Vikramâṅkadeva-Charita. Life of King Vikramâditya Tribhuvanamalla of Kalyâṇa, composed by his Vidyâpati Bilhaṇa. Edited, with an Introduction, by Dr. G. Bühler (copies not available.)			
No. XV.—Mâlatî-Mâdhava: a Drama by Bhavabhûti. Edited, with Critical and Explanatory Notes, by Dr. R. G. Bhândârkar, M. A. (Second Ed. in the Press.)...			
No. XVI.—Vikramorvas'î: a Drama by Kâlidâsa. Edited, with Notes, by Shankar P. Pandit, M. A...	1	4	0
No. XVII.—Hemachandra's Des'înâmamâlâ. Edited, with Critical Notes, a Glossary and a Historical Introduction, by Professor R. Pischel and Dr. G. Bühler. Part I. Text and Critical Notes by Professor Pischel.	1	0	0
No. XVIII.—Vyâkaraṇa-Mahâbhâshya of Patañjali. Edited by Dr. F. Kielhorn. Vol. I. complete. Parts I, II & III.	9	0	0
No. XIX. Ditto ditto by ditto. Vol. I. Part II.	1	0	0
No. XX. Ditto ditto by ditto. Vol. I. Part III.	1	0	0
No. XXI. Ditto ditto by ditto. Vol. II. Part I.	1	0	0
No. XXII. Ditto ditto by ditto. Vol. II. Part II.	1	0	0
No. XXIII. Vâsishṭhadharmas'âstram. Edited, with Notes, by Dr. A. A. Führer	0	8	0
No. XXIV.—Kâdambarî by Bâṇa and his son. Vol. I. Sanskrit Text, complete. Edited by Dr. P. Peterson.	1	0	0
Do. Vol. II. Introduction and Notes, by do. ...	2	0	0
No. XXV.—Kîrti-Kaumudî. Edited, with Notes, by Prof. A. V. Kâthavate. (copies not available.) ...			
No. XXVI.—Vyâkaraṇa-Mahâbhâshya of Patañjali. Edited by Dr. F. Kielhorn. Vol II. Part III. ...	1	0	0
No. XXVII.—Mudrârâkshasa, by Vis'âkhadatta, with the Commentary of Dhuṇḍhirâja. Edited, with Notes, by K. T. Telang. (Copy-right restored to the author.)			
No. XXVIII.—Vyâkaraṇa-Mahâbhâshya of Patañjali. Edited by Dr. F. Kielhorn. Vol. III. Part I ...	1	0	0
No. XXIX.—Ditto do. of do. by do. Vol. III. Part II	1	0	0

	Rs.	a.	p.
No. XXX.—Vyâkaraṇa-Mahâbhâshya Patñjali Edited by Dr. F. Kielhorn. Vol. III. Part III	1	0	0
No. XXXI.—Subhâshitâvali of Vallabhadeva. Edited by Dr. P. Peterson and Pandit Durgâprasâd ...	2	8	0
No. XXXII.—Tarka-Kaumudî of Laugâkshi Bhâskara. Edited by Professor M. N. Dvivedi	0	12	0
No. XXXIII.—Hitopades'a of Nârâyaṇa. Edited by Dr. P. Peterson.	0	14	0
No. XXXIV.—The Gaudavaho, by Vâkpati. Edited by Shankar P. Pandit	3	0	0
No. XXXV.—Mahânârâyaṇa Upanishad. Edited by Colonel G. A. Jacob	0	7	0
No. XXXVI.—University Selections of Hymns from the Ṛigveda. Edited by Dr. P. Peterson ...	4	0	0
No. XXXVII.—S'ârṅgadharapaddhati. Edited by Dr. P. Peterson. Vol. I	3	0	0
No. XXXVIII.—Naishakarmyasiddhi. Edited by Col. G. A. Jacob	2	0	0
No. XXXIX.—A Concordance to the principal Upanishads and Bhagvadgîtâ, by the same author.	8	0	0
No. XL.—Eleven Atharvaṇa Upanishads, with dîpikâs, by the same author	2	8	0
No. XLI.—Handbook to the Study of the Ṛigveda, by Dr. P. Peterson. Part I	3	0	0
No. XLII.—The Das'akumâracharita of Daṇḍin, Part II. (completing Dr. Bühler's Edition). Edited with Critical and Explanatory Notes by Dr. P. Peterson.	0	8	0
No. XLIII.—Handbook to the Study of the Ṛigveda by Dr. P. Peterson, Part II. comprising the Seventh Maṇḍala with the commentary of Sâyana	5	0	0
No. XLIV.—Aphorisms of the sacred Law of the Hindus by Apastamba Edited with critical notes and Index of the Sutras and the various readings of the Hiranyakeshi Dharmasutra, by Dr. G. Bühler	2	12	0

The Department of Public Instruction, Bombay.

THE RÂJATARAṄGIṆÎ

OF

KALHAṆA.

EDITED

BY

DURGÂPRASÂDA, SON OF VRAJALÂLA.

VOL. II.

Taranga VIII.

500 COPIES.

Registered for copy-right under Act XXV of 1867.

Bombay:

GOVERNMENT CENTRAL BOOK DEPÔT

(All rights reserved.)

1894.

Price 2½ Rupees.

Bombay Sanskrit Series No. LI.

BOMBAY:

PRINTED AT JAVAJI DADAJI'S "NIRNAYA-SAGAR" PRESS.

कल्हणकृता

राजतरङ्गिणी ।

द्वितीयो भागः ।

(अष्टमस्तरङ्गः ।)

जयपुरमहाराजाश्रितेन पण्डितव्रजलालसूनुना

पण्डितदुर्गाप्रसादेन

संशोधिता ।

सा च

राजानुशासनेन मुम्बय्यां निर्णयसागराभिधाने मुद्रायन्त्रालये मुद्रिता ।

अस्य च ग्रन्थस्य स्वामित्वं (१८६७) सप्तषष्ट्युत्तराष्टादश-शतस्य पञ्चविंशं स्वनियममनुसृत्य संगृहीतम् ।

१८९४.

मूल्यं सार्धं रूपकद्वयम् ।

NOTE.

In putting through the press from his manuscript this second volume of my friend's edition of the Rajatarangini I have not thought it right—except in one case, my memorandum as to which I have unfortunately mislaid—to take readings from the valuable edition of Dr. Stein. In many cases it will be found that Stein and Durgaprasada agree in new readings which are manifestly correct. It ought to be understood that Durgaprasada arrived at these readings independently. He got them from a manuscript which was obtained for him by me on loan from Mathura, and which I have in the course of the present year been able to purchase for the Government of Bombay Collection. It cannot, of course, be claimed for this manuscript that it is an independent authority for the readings in question. In all probability the Mathura manuscript is no more than a copy, made with unusual care, of the manuscript on which Dr. Stein's edition is founded. But it is due to Durgaprasada to say that the text as presented here is the text as he had finally prepared it before his lamented death and before the publication of my friend Dr. Stein's monumental work.

In the preface to the first volume I promised an Introduction and Notes to the whole work, a part of

the undertaking which had from the beginning been assigned to me by the Pandit's desire. It has since, however, been decided that the *Bombay Sanskrit Series* edition of the Rajatarangini ought to include the supplements to the work of Jonaraja, Srivara and Prajyabhatta. I hope to put these out in a third and concluding volume in the course of next year, and it is convenient to reserve for that volume any remarks of an introductory, critical or explanatory nature.

P. PETERSON.

अष्टमस्तरङ्गः।

प्रौढाः कञ्चुकिनो जरद्धरवृषः कुब्जस्तुषारद्युति-
र्नित्यात्तोपि बहिष्कृतः परिकरः सोयं समस्तोप्यहो ।
अर्धाद्यद्वसतीकृताद्भगवता चारित्रचर्याविदा
सा भिन्द्याद्दुरितं चराचरगुरोरन्तःपुरं पार्वती ॥ १ ॥
छन्नकोपप्रसादोभूत्कंचित्कालं नवो नृपः ।
प्राङ्मन्थादिव पाथोधिरव्यञ्जितविषामृतः ॥ २ ॥
सोदरो डामरौघश्च तस्याभूतां भृशोन्मदौ ।
मेघस्येव पुरोवातावग्रहौ स्फूर्तिहारिणौ ॥ ३ ॥
यत्किंचनविधाय्यासीद्भ्राता यद्यौवनोन्मदः ।
राज्ञो दुष्प्रक्रिया दौःस्थ्यकरी वात्सल्यशालिनः ॥ ४ ॥
सोनिशं हि गजारूढो विकोशासिः परिभ्रमन् ।
आत्तसारां महीं पीतरसां रविरिवाकरोत् ॥ ५ ॥
एकीभूतानमून्सर्वान् डामरान्निर्दहाग्निना ।
इत्युक्तं तेन नोर्वीभृत्सत्त्वैकाग्रो वचोग्रहीत् ॥ ६ ॥
दस्यवो मन्त्रिसामन्ता द्वैराज्येच्छुः सहोदरः ।
भूर्निष्कोशेत्यभूत्किं न भूपतेस्तस्य संकटम् ॥ ७ ॥
अधिराज्याभिषेकेण सत्कृत्य भ्रातरं ततः ।
पातुं लोहरसंबद्धं प्राहिणोन्मण्डलान्तरम् ॥ ८ ॥
द्विरदायुधपत्त्यश्वकोशामात्यादि स व्रजन् ।
निनाय सर्वं वात्सल्यादनिषिद्धोग्रजन्मना ॥ ९ ॥

आशङ्क्य कोट्टभृत्येभ्यः प्रवेशे प्रत्यवस्थितिम् ।
उत्कर्षजं प्रतापाख्यं सह निन्येब्रवीच्च तान् ॥ १० ॥
कुर्याममुं नृपमहं प्रातिहार्यं समाचरन् ।
नम्राः स्वभृत्यवत्तस्थुर्भूभुजो भूम्यनन्तराः ॥ ११ ॥
दिनानि सप्त संरुद्धे मार्गे तदनुयायिनाम् ।
गायनः कनको लब्धान्तरो देशान्तरं ययौ ॥ १२ ॥
वाराणस्यां विजहता निर्वेदात्तेन जीवितम् ।
हर्षभूभर्तृभृत्येषु व्यक्तं निन्ये कृतज्ञता ॥ १३ ॥
ऊर्ध्वाधिरोहं दाक्षिण्याद्दस्यूनामुच्चलः पुनः ।
सेवास्मृत्या सुधीः सेहे चन्दनो भोगिनामिव ॥ १४ ॥
तथा जनकचन्द्रेण दर्पाद्यवहृतं तदा ।
राजान्ये डामराश्चासन्यथा नष्टप्रभा इव ॥ १५ ॥
अभयस्योरशाभर्तुस्तनयायामजीजनत् ।
राज्यां विभवमत्यां यं भोजो हर्षनृपात्मजः ॥ १६ ॥
जातं मृतद्वित्रपुत्रानन्तरं गुरुभिः शिशुम् ।
आयुष्कामैस्तमाबद्धाभव्यभिक्षाचराभिधम् ॥ १७ ॥
ह्यब्दमप्यरिसंतानतन्तुत्वेनाप्रियोचितम् ।
ररक्ष तद्विरा राजा राज्याश्चाङ्के समार्पयत् ॥ १८ ॥

तिलकम् ॥

तमादाय स्वयं वासौ यावद्राज्येकरोन्मनः ।
तावद्बभारेङ्गितज्ञो नीतिकौटिल्यमुच्चलः ॥ १९ ॥
तुल्योत्साहासहिष्णुत्वादस्मै कुप्यन्तु डामराः ।
एष एवातिसत्काराद्यद्वास्तु विशदाशयः ॥ २० ॥
इति संचिन्त्य स द्वारदित्सां तस्योदघोषयत् ।
यथा विकारं प्रययुर्भीमादेवादयोखिलाः ॥ २१ ॥

तेषां तस्य च मात्सर्ये यदापर्याप्तिमाययौ।
तदान्योन्याश्रिता भृत्याः पणं चक्रुर्युयुत्सवः ॥ २२ ॥
दिदृक्षुः क्ष्मापतिस्तेषां सेतुपृष्ठे रणं मिथः।
वार्यमाणोपि सचिवैरारुरोह चतुष्किकाम् ॥ २३ ॥
द्वन्द्वयुद्धे प्रवृत्ते तु डामरैरुभयाश्रितैः।
अथ प्रारभ्यताकस्मात्संरब्धैर्दारुणो रणः ॥ २४ ॥
सेतुद्वयाध्वना युद्धे लग्ने रात्रि सरित्तटात्।
योधा जनकचन्द्रस्य शरवर्षमवाकिरन् ॥ २५ ॥
यान्तः शराः ससीत्कारास्तेस्पृष्टनृपविग्रहाः।
मग्नाः स्तम्भेष्वदृश्यन्त कोपेनेव प्रकम्पिनः ॥ २६ ॥
आकृष्य दोर्भ्यां भूपालं बलादिव ततोनुगाः।
प्रविष्टा मण्डपद्वारं चक्रिरे निहितार्गलम् ॥ २७ ॥
शस्त्रं जनकचन्द्राद्या भीमादेवादयोपि ते।
चतुष्किकायां चक्रुषुस्ततोन्योन्यं जिघांसवः ॥ २८ ॥
तुमुले तत्र शस्त्र्याङ्गं भीमादेवानुगोभिनत्।
तीक्ष्णो जनकचन्द्रस्य कालपाशात्मजोर्जुनः ॥ २९ ॥
स वीक्ष्य स्वं क्षतं द्रोहं प्रयुक्तं भूभुजा विदन्।
पादप्रहारान्विदधे क्रोधाद्वारि नृपौकसः ॥ ३० ॥
अभग्ने तत्र संत्रासात्स्वानद्रोण्यन्तरं गतम्।
अधावत्कृष्टशस्त्रीको भीमादेवो जिघांसया ॥ ३१ ॥
स्तम्भच्छन्नस्तद्विलोक्य तद्देहगणनापतिः।
मध्यं जनकचन्द्रस्य कृपाणेन द्विधा व्यधात् ॥ ३२ ॥
तस्मिन्हते तदनुजौ गग्गसङ्गौ प्रधावितौ।
स एव करवालेनालक्षितोकृत विक्षतौ ॥ ३३ ॥

अवभज्य तरुं वज्रः सुचिरं नावतिष्ठते ।
उदग्रकर्मा च पुमान्निहत्यात्युन्नतं रिपुम् ॥ ३४ ॥
स हि द्विभाद्रे तत्राब्दे हर्षान्ताहादनन्तरम् ।
अन्यूनानतिरिक्तैर्यत्रिभिः पक्षैरहन्यत ॥ ३५ ॥
यद्वोपकर्तुरप्येष द्रोहं यत्स्वामिनो व्यधात् ।
औत्कट्यात्पाप्मनस्तस्य क्षिप्रमेव क्षयं ययौ ॥ ३६ ॥
सान्तस्तोषे कोपशोकावाविष्कुर्वति कृत्रिमौ ।
भीमादेवः पलायिष्ट गग्गस्तु व्यश्वसीन्नृपे ॥ ३७ ॥
प्रहिते लोहरं गग्गे स्वमुल्लाघयितुं क्षतम् ।
त्रस्तास्तेन व्यसृज्यन्त स्वोर्वीरन्येपि डामराः ॥ ३८ ॥
उपायापकृतैः प्राप्तराज्यं दस्युभिरुज्झितम् ।
एवं शनैरवष्टम्भं भेजे भूपतिरुच्चलः ॥ ३९ ॥
तेनाथ लब्धस्थैर्येण दिनैरेव जिगीषुणा ।
त्याजिताः क्रमराज्यान्तर्हयसैन्यादि डामराः ॥ ४० ॥
ततो मडवराज्यं स प्रस्थितो विप्रियप्रियान् ।
डामरान्कालियमुखान्बद्ध्वा शूले व्यपादयत् ॥ ४१ ॥
इल्लाराजोपि बलवांस्तेन क्रान्तक्षितिः क्रमात् ।
बलैर्नगर एवोग्रैरवस्कन्देन घातितः ॥ ४२ ॥
प्राग्जन्मप्रेमसंस्कारादन्तरङ्गतयाथवा ।
तस्य पुत्र इव प्रीतिर्गग्ग एव व्यवर्धत ॥ ४३ ॥
न सेहे नाममात्रं यः कण्टकानां प्रियप्रजः ।
नृपो गग्गाय चुक्रोध सापराधाय न क्वचित् ॥ ४४ ॥
राज्यारम्भेनुयुक्तेन भीमादेवेन धीमता ।
उक्ते शुभावहे शिक्षे द्वे स मन्त्रवदस्मरत् ॥ ४५ ॥

एकया लोकवार्तार्थं प्राह्णात्प्रभृति निर्गतः ।
बहिरुद्दिश्य बाह्यालीरचारीदादिनक्षयम् ॥ ४६ ॥
अन्ययोत्थानशीलेन श्रुत्वा नामापि वैरिणः ।
अर्धरात्रेपि यात्राभिस्तेनाच्छिद्यत विप्लवः ॥ ४७ ॥
तस्यैवालुप्तधैर्यस्य राज्ञां मध्ये मनस्विनः ।
कार्पण्योपहतं वृत्तं नाप्यभूदमलीमसम् ॥ ४८ ॥
अद्योच्चलसदाचारजाह्नवीजलमज्जनात् ।
कुनृपोदीरणोद्भूतो गिरः पाप्मापनेष्यते ॥ ४९ ॥
तेनानुपचिताङ्गेन प्रायशो विनिवारिताः ।
अनूरुणेव सद्दृष्टिध्वंसिनो ध्वान्तसंचयाः ॥ ५० ॥
प्रायोपविष्टप्रमये देहत्यागप्रतिज्ञया ।
निबद्धया प्रत्यवेक्षां धर्माध्यक्षानकारयत् ॥ ५१ ॥
निशम्य कृपणस्यार्तं क्रन्दितं तदनिष्टकृत् ।
बभूव तस्य स्वात्मापि नानिग्राह्यो महात्मनः ॥ ५२ ॥
कार्यिणो यस्य वा दोषादार्ताक्रन्दितमुद्ययौ ।
तस्य स्वबान्धवाक्रन्दैस्तस्मिन्क्रुद्धे शशाम तत् ॥ ५३ ॥
अबलानुग्रहव्यग्रे तस्मिन्राजनि सर्वतः ।
वास्तव्या बलिनस्तस्थुरबलास्त्वधिकारिणः ॥ ५४ ॥
सोथ्वेनैकश्चरन्राजेत्यज्ञात्वा कथितं जनैः ।
यं यं स्वदोषमश्रौषीत्तं तं त्वरितमत्यजत् ॥ ५५ ॥
येन केनापि संप्राप्तः प्राप्त्युपायेन पार्थिवः ।
अमोघदर्शनः सोभूत्कल्पवृक्ष इवार्थिनाम् ॥ ५६ ॥
सुधावर्षी प्रियालापप्रीतिदायैर्जनप्रियः ।
नाशकत्सेवकांस्त्यक्तुं विस्रम्भभवनेष्वपि ॥ ५७ ॥

श्लाघ्यश्रमैः प्रतिकलं तस्य सेवाविधायिभिः ।
प्राप्तं त्रिचतुरान्वारान्क्षणदास्वपि दर्शनम् ॥ ५८ ॥
सेव्यमानः सदाक्षिण्यः क्षणेनैव फलप्रदः ।
कस्यैन्द्रजालिकैरुप्तः शाखीव न बभूव सः ॥ ५९ ॥
वास्तव्यानां निशम्यार्तिं तेन दैन्यनिवारणम् ।
चक्रे पित्रेव पुत्राणां संत्यक्तेतरकर्मणा ॥ ६० ॥
स्वसंचितानि सोन्नानि विक्रीणानोल्पवेतनैः ।
दुर्भिक्षमुद्गतावेव जघान जनवत्सलः ॥ ६१ ॥
निवार्य चौर्याचरणात्कृपार्द्रस्तस्करानपि ।
कोशाध्यक्षान्स विदधच्चकारागर्ह्यजीविकान् ॥ ६२ ॥
कः संविभाग्यश्छेत्तव्या विपदः कस्य मण्डले ।
इत्यन्विष्यन्सदैकैकं चारैश्चिन्तापरोभवत् ॥ ६३ ॥
तस्यैकोप्यर्थनैस्पृह्यं नाम कोपि महान्गुणः ।
अनुषक्तो गुणैस्तैस्तै राज्ञः पल्लवितोभवत् ॥ ६४ ॥
स स्थित्यै दण्डयन्दण्ड्यानघाश्लेषभयाद्धनम् ।
तेषां नादत्त सत्कर्म शुद्धये तांस्त्वकारयत् ॥ ६५ ॥
प्रस्तुतस्यार्थिने दातुं वस्तु तस्यैकसंख्यया ।
सहस्रसंख्यया दानश्रद्धागात्पूर्णतां यदि ॥ ६६ ॥
श्रूयतेर्थी यथा मह्यं देहि देहीति गां वदन् ।
तथास्मै देहि देहीति वदन्दाता स शुश्रुवे ॥ ६७ ॥
अनुदात्तं क्षिप्तकालं क्षीणसंख्यमसत्कृतम् ।
नेतृदूतादिनीतार्थं न तद्दत्तमदृश्यत ॥ ६८ ॥
उत्सवे दैन्यविघ्नौ रञ्जने कार्यसाधने ।
आलेख्यलीनशाखीव न सोलभ्यफलोभवत् ॥ ६९ ॥

उत्सवे शिवरात्र्यादौ जनतां सोसिचद्धनैः ।
ग्रहयोगे पयःपूरैर्महेन्द्र इव मेदिनीम् ॥ ७० ॥
ताम्बूलदानव्यसनं परार्ध्योत्सवता तथा ।
नाभूद्धर्षनृपस्यापि तादृक्तस्यास्त यादृशी ॥ ७१ ॥
लोष्टमात्रावशेषेपि लब्धे नृपपदे व्यधात् ।
स दानविभ्रमांस्तान्ये धनदेनापि दुष्कराः ॥ ७२ ॥
निर्माणलोठनैर्धान्नामजस्रं वाजिनां क्रयैः ।
काश्मीरकोपि चक्रे स न मृत्तस्करसाद्धनम् ॥ ७३ ॥
अध्वन्यध्वनियोगेन प्राणविन्यासनैस्तथा ।
बभूव सर्वकृत्यज्ञः सोन्तरात्मेव देहिनाम् ॥ ७४ ॥
भोगान्राजोचितान्विप्रा भैषज्यं व्याधिपीडिताः ।
वेतनं वृत्तिहीनाश्च तस्मात्समुपलेभिरे ॥ ७५ ॥
पित्र्योपरागकेत्वादिदुर्निमित्तोपमार्तिषु[1] ।
गोसहस्राश्वहेमादिसंभवैः सोभजद्द्विजान् ॥ ७६ ॥
नन्दिक्षेत्रे पुरं कृत्स्नं दग्धमुत्पातवह्निना ।
पूर्वाधिकगुणं तेन नवं राज्ये व्यधीयत ॥ ७७ ॥
श्रीचक्रधरयोगेशस्वयंभूस्थानयोजनम् ।
जीर्णोद्धृतिव्यसनिना कृतं तेन सुकर्मणा ॥ ७८ ॥
हर्षदेवेन यो निन्ये श्रीपरीहासकेशवः ।
परिहासपुरे तं स नवं नरपतिर्व्यधात् ॥ ७९ ॥
प्राग्वर्णितशुकावल्या भूषितो हर्षनीतया ।
तेन त्रिभुवनस्वामी निर्लोभेन महीभुजा ॥ ८० ॥
जयापीडाहृतं हर्षोत्पाटने प्लुष्टमग्निना ।
सिंहासनं नवं चक्रे स राज्यककुदं नृपः ॥ ८१ ॥

---

१ दुर्निमित्तामयार्तिषु इति स्यात् ।

लब्ध्वा तदर्धाध्यारोहं भर्तुः प्रेम्णातिदुर्लभम् ।
सामान्ययापि देवीत्वं जयमत्या न दूषितम् ॥ ८२ ॥
सा ह्यानृशंस्यमाधुर्यत्यागसत्प्रियतानयैः ।
अस्तम्भार्तपरित्राणमुख्यैर्भव्याभवद्गुणैः ॥ ८३ ॥
लब्धभूपालवाल्लभ्या नार्यः क्रोधात्प्रजासु यत् ।
राक्षस्य इव भङ्गाय लावण्यललिता अपि ॥ ८४ ॥
प्रियप्रजस्यायमन्यो गुणः सर्वगुणाग्रणीः ।
उच्चलक्ष्मापतेरासीदर्थनैस्पृह्यशालिनः ॥ ८५ ॥
जिघांसवः पापकामाः परस्वादायिनश्च[1] ताः ।
रक्षांस्यधिकृता नाम तेभ्यो रक्षेदिमाः प्रजाः ॥ ८६ ॥
तेनेतिहासिनीं नीतिं श्रद्दधानेन सर्वदा ।
येन संपठता श्लोकं कायस्थोन्मूलनं कृतम् ॥ ८७ ॥
यत्ते विषूचिकाशूलसंन्यासेभ्यः किलेतरे ।
घ्नन्त्याशुकारिणो विश्वं प्रजारोगा नियोगिनः ॥ ८८ ॥
पितरं कर्कटो हन्ति मातरं हन्ति पुत्तिका ।
हन्ति सर्वं तु कायस्थः कृतघ्नः प्राप्तसंभवः ॥ ८९ ॥
गुणान्समर्प्य स्फुरता येनैवोत्थाप्यते शठः ।
वेताल इव कायस्थस्तमेवाहन्ति हेलया ॥ ९० ॥
विषवृक्षो नियोगी च यदेवाश्रित्य वर्धते ।
चित्रं करोति तस्यैव स्थानस्यानभिगम्यताम् ॥ ९१ ॥
तेन ते क्ष्माभुजा मानक्षतिकार्यनिवारणैः ।
क्काराप्रवेशैश्च खलाः शमं नीताः पदे पदे ॥ ९२ ॥
कार्यान्निवार्य बहुशः सहेलाद्यान्महत्तमान् ।
भङ्गासूत्रमयं वासः कारायां पर्यधापयत् ॥ ९३ ॥

---

१ दायिनः शठाः इत्युचितः पाठः ।

सकार्यवेषं हास्याय सभार्यं चारणोचितम् ।
अकारयद्भूतभिश्चधावनं डोम्भयोधवत् ॥ ९४ ॥
स प्रांशुर्वेष्टितश्मश्रुरुष्णीषेणोत्फलन्पुनः ।
शूलहस्तः सजानूरुः केषामासीन्न हास्यकृत् ॥ ९५ ॥
सशीर्षदशनं साम्यवादवेश्याविटान्वितम् ।
प्रियवेश्यं कंचिदग्रे नृत्तवाद्यमकारयत् ॥ ९६ ॥
बद्ध्वान्यं शकटे नग्नं क्षुरलूनार्धमस्तकम् ।
अकारयत्सटान्यस्तचीनपिष्टच्छटाङ्कितम् ॥ ९७ ॥
ते कुम्भवादनैर्मुण्डमण्डनैश्चाङ्किताभिधाः ।
नियोगिनो भग्नमानाः सर्वतः ख्यातिमाययुः ॥ ९८ ॥
कार्यभ्रष्टा मलक्लिन्नक्षीणवस्त्रावगुण्ठनाः ।
सर्वार्थिनो व्यभाव्यन्त केप्यटन्तः प्रतिक्षपम् ॥ ९९ ॥
वृथावृद्धाः सुखप्राप्यं पाण्डित्यं भूर्जवत्परे ।
मत्वा बाला इवाचार्यगृहे प्रारेभिरे श्रुतम् ॥ १०० ॥
केप्युच्चैरट्टभिक्षाकाः सादरं स्तोत्रपाठिनः ।
कृतानुपाठाः स्वापत्यैः प्राह्णे लोकमहासयन् ॥ १०१ ॥
माता स्वसा सुता भार्या स्वापि कैरप्यकार्यत ।
सामन्तसेवनं कार्यप्राप्त्यै सुरतसेवया ॥ १०२ ॥
जातकस्वप्नशकुनस्वलक्षणनिरीक्षणम् ।
कारयद्भिः शठैरन्यैर्गणकाः परिखेदिताः ॥ १०३ ॥
पिशाचा इव शुष्कास्या रूक्षश्मश्रुकचाः कृशाः ।
बद्धाः परैर्व्यभाव्यन्त श्रद्धलामुखराङ्घ्रयः ॥ १०४ ॥
नृपेण कार्यिणां दर्पलिङ्गनाशे विपाटिते ।
अक्ष्णोर्ज्ञातिपरिज्ञानक्षमत्वं समजायत ॥ १०५ ॥

भारतस्तवराजादिस्तोत्रपाठमशिश्रियन् ।
ते दुर्गोत्तारिणीविद्याजपं चोदस्रुलोचनाः ॥ १०६ ॥
इत्थं दौःस्थ्योदये दीर्घे मज्जन्तो नित्यदुर्जनाः ।
तस्मिन्राजनि कायस्था व्यलोक्यन्त पदे पदे ॥ १०७ ॥
भिन्नसंधानभूर्यर्थदानभोज्यादिढौकनैः ।
नहि मोहयितुं शक्ताः प्राज्ञं तं तेन्यराजवत् ॥ १०८ ॥
तान्प्रजाकण्टकान्दुष्टान्कृतधीरकृतानिशम् ।
तैस्तैः शुचिभिरध्यक्षैः स विशामीश्वरो वशान् ॥ १०९ ॥
भूतेशस्य यथा पुरी हुतवहप्लुष्टा त्वदाज्ञाबला-
द्भूयः स्वां श्रियमाससाद सहसा तद्वत्समस्तामिमाम् ।
त्वं कायस्थकुटुम्बिकृत्तिसचिवप्रायं···पञ्चानली-
लीढामुच्चलदेव निर्वृतिसुखस्थित्या पुरीं स्वां क्रियाः॥११०
शिवरात्र्युत्सवे श्लोकममुं शिवरथाभिधः ।
विद्वान्पठंस्तेन हठात्सर्वाध्यक्षो व्यधीयत ॥ १११ ॥
व्यवहारानभिज्ञोपि कंचित्कालमदीदृशत् ।
शुचित्वादार्यभाजः स क्रामन्कृतयुगास्थितिम् ॥ ११२ ॥
शीघ्रदण्डत्वमुच्चण्डतेजसस्तस्य भूपतेः ।
क्रूरानुद्दिश्य कायस्थान्धीमद्भिर्बह्वमन्यत ॥ ११३ ॥
नहि क्षुद्राश्वकायस्थपिशाचाविष्टवैरिणाम् ।
शंसन्त्यन्तरितं दण्डं दण्डनीतिविशारदाः ॥ ११४ ॥
चिरेण दण्डिता ह्येते कुर्युर्दण्डभयाद्ध्रुवम् ।
लब्धान्तराः प्राणहरं कृच्छ्रं किंचित्प्रशासितुः ॥ ११५ ॥
दण्ड्यानां दण्ड्यमानानां पुत्रस्त्रीमित्रबान्धवाः ।
राज्ञा विचारशीलेन न तेनोपद्रुताः क्वचित् ॥ ११६ ॥

कर्णेजपाल्लोष्टधरप्रमुखांस्तेन दुःखदैः ।
कर्मभिः क्लिश्नताध्वापि पैशुन्यस्य खिलीकृतः ॥ ११७ ॥
विस्मृतिं लब्धराज्यानां पूर्वसंकल्पवासनाः ।
प्रयान्ति प्राप्तजनुषां गर्भवासस्पृहा इव ॥ ११८ ॥
प्राग्राज्याधिगमार्त्तिकचित्सदसद्यद्यचिन्तयत् ।
राज्ये तन्न विससार जातिस्मर इवोच्चलः ॥ ११९ ॥
ददर्श शत्रोरद्रोहान्यान्द्रोग्धृन्वा पुरानुगान् ।
कर्तव्यानुगुणं तेषां प्रतिपत्तिमदर्शयत् ॥ १२० ॥
स्मरेन्नोपपतिः पूर्वपतिद्रोहं कुयोषितः ।
पूर्वस्वाम्यरितां चाद्य कुभृत्यस्येश्वरो जडः ॥ १२१ ॥
शेषाहिदेहान्मेदिन्या समं प्रज्ञापि राज्ञयभूत् ।
तस्मिन्परिणता नूनं कृत्याकृत्यविवेक्तरि ॥ १२२ ॥
तथाह्येकस्य वणिजो व्यवहर्तुश्च सोभवत् ।
विवादे संशयं छिन्दन्नेवं स्थेयाद्यगोचरे ॥ १२३ ॥
सौहृदारूढसद्भावे व्यापदौपयिकं धनी ।
न्यासीचकार दीनारलक्षं कोपि वणिग्गृहे ॥ १२४ ॥
तेनोपयुज्यमाना च व्ययेषु वणिजः करात् ।
कियत्यपि गृहीताभूद्दत्तमात्रान्तरान्तरा ॥ १२५ ॥
त्रिंशद्विंश···द्यातासु समासु न्यासधारिणम् ।
गृहीतशेषं दातुं स धनं प्रार्थयताथ तम् ॥ १२६ ॥
वणिक्तु कुकृती तस्य न्यासग्रासाय सोद्यमः ।
कालापहारमकरोत्तैस्तैः कलुषधीर्मिषैः ॥ १२७ ॥
स्रोतोभिर्व्यस्तमम्भोधौ लभ्यं मेघमुखैः पयः ।
प्राप्तिर्भूयस्तु नास्त्येव वणिङ्न्यस्तस्य वस्तुनः ॥ १२८ ॥

तैलस्निग्धमुखः स्वल्पालापो मृद्वाकृतिर्भवन् ।
न्यासग्रासविवादोग्रो वणिग्व्याघ्राद्विशिष्यते ॥ १२९ ॥
विवादे श्रेष्ठिना शाठ्यं स्मितैः प्राक्सख्यदर्शनैः ।
मुक्तं मुक्तं ज्ञायमानं प्राणान्तेपि न मुच्यते ॥ १३० ॥
निसर्गवञ्चका वेश्याः कायस्थो दिविरो वणिक् ।
गुरूपदेशोपस्कारैर्विशिष्टाः सविषाशिषोः ॥ १३१ ॥
चन्दनाङ्कालिके श्वेतांशुके धूपाधिवासिनि ।
विश्वस्तः स्यात्किराटे यो विप्रकृष्टेस्य नापदः ॥ १३२ ॥
ललाटदक्पुटश्रोत्रद्वन्द्वहृन्न्यस्तचन्दनः ।
षड्विन्दुर्वृश्चिक इव क्षणात्प्राणान्तकृद्वणिक् ॥ १३३ ॥
पाण्डुश्यामोग्निधूमार्द्रः सूच्यास्यो गहनोदरः ।
तुम्बीफलोपमः श्रेष्ठी रक्तं मांसं च कर्षति ॥ १३४ ॥
सोथ निःशेषितामिषः क्रुद्धो निर्बन्धकारिणः ।
गणनापत्रिकां तस्य सभ्रूभङ्गमदर्शयत् ॥ १३५ ॥
यदादौ श्रेयस इति न्यस्तमश्रेयसे पदम् ।
आतरेष्वत्यये सेतोर्गृहीता षट्शती त्वया ॥ १३६ ॥
छिन्नोपानत्कषावन्धे शतं चर्मकृतेर्पितम् ।
विपादिकाकृते दास्या नीतं पञ्चाशतो घृतम् ॥ १३७ ॥
स्फोटने भाण्डभारस्य क्रन्दन्त्याः कृपयार्पितम् ।
कुलाल्या बहुशः पश्य भूर्जे लग्नं शतत्रयम् ॥ १३८ ॥
शिशुभ्योस्य विडालस्य क्रीताः पोषाय मूषिकाः ।
त्वया शतेन वात्सल्याद्भट्टान्मत्स्यरसस्तथा ॥ १३९ ॥
चरणोद्वर्तनं सर्पिः शालिचूर्णं च सप्तभिः ।
क्रीतं शतैः श्राद्धपक्षस्नाने च घृतमाक्षिकम् ॥ १४० ॥

नीतं क्षौद्रार्द्रकं कासायासायादर्भकेण ते ।
सोव्यक्तजिह्वः किं वेत्ति वक्तुं लग्नं शतं ततः ॥ १४१ ॥
वृषणोत्पाटको भिक्षाचरस्ते हठयाचकः ।
यो वारितो युद्धपटुस्तस्मै दत्तं शतत्रयम् ॥ १४२ ॥
आनीते भट्टपादानां मध्यं सर्वव्ययोपरि ।
शतं शतद्वयं धूपशन्दामूलपलाण्डुषु ॥ १४३ ॥
इत्याद्यचिन्ततायुक्तापरिहार्यव्ययानसौ ।
तस्यैकीकृत्य गणनां लाभेपि शनकैर्व्यधात् ॥ १४४ ॥
वर्षमासग्रहतिथिप्रत्यावृत्तिः पुनः पुनः ।
संसारस्येव तस्यान्तं न ययौ नर्तिताङ्गुलेः ॥ १४५ ॥
स मूलग्रहणं पिण्डीकृत्याथ सकलान्तरम् ।
प्रसारितौष्ठस्तन्नेत्रे मीलयन्नभ्यधान्मृदु ॥ १४६ ॥
शल्यमुद्धर निक्षेपं नयोज्ञासधनं त्विदम् ।
विस्रम्भदत्तं निर्दम्भं दीयतां सकलान्तरम् ॥ १४७ ॥
तत्स धर्म्यं वचो जानन्क्षणमुच्छ्वसितोभवत् ।
क्षुरं क्षौद्रोपलिप्तं तु ध्यात्वा पश्चादतप्यत ॥ १४८ ॥
युक्त्यापहृतसर्वस्वं क्रौर्यानार्यमथार्थकः ।
विवादे नाशकज्जेतुं नापि स्थेया विचारकाः ॥ १४९ ॥
स्थेयैरनिश्चितन्यायं पुरो न्यस्तं ततो नृपः ।
तादित्थमिति निश्चित्य वणिजं तमभाषत ॥ १५० ॥
अद्यापि न्यासदीन्नाराः सन्ति चेत्तत्प्रदर्श्यताम् ।
अंशः कियानपि ततस्ततो वक्ष्मि यथोचितम् ॥ १५१ ॥
तथा कृते तेन वीक्ष्य दीन्नारान्मन्त्रिणोब्रवीत् ।
राजभिर्भाविनां राज्ञां नाम्ना टङ्कः क्रियेत किम् ॥ १५२ ॥

---

१ चिन्तता इति युक्तम् ।

न चेत्कलशभूपालकाले न्यासीकृतेष्वमी ।
दीन्नारेषु कुतष्टङ्का मन्नामाङ्का अपि स्थिताः ॥ १५३ ॥
निक्षिप्तेनैष लक्षेण वणिक्तस्माद्यवाहरत् ।
वणिजो द्रविणेनायमप्यात्तेनान्तरान्तरा ॥ १५४ ॥
तस्माद्यदा यदेतेन गृहीतं दीयतां ततः ।
तदाप्रभृत्यद्ययावल्लाभोस्मै वणिजोर्थिनः ॥ १५५ ॥
न्यसनानेहसश्चैष प्रभृत्यस्मै प्रयच्छतु ।
लक्षादखण्डिताल्लाभं किं वाच्यं मौलिके धने ॥ १५६ ॥
अवधारयितुं शक्यं मादृशैः सघृणैरियत् ।
श्रीयशस्करवद्रौक्ष्यमीदृक्षेषु तु युज्यते ॥ १५७ ॥
विवादे संदिहानस्य युक्तं क्षान्त्यानुशासनम् ।
भाव्यं दण्डधराचारैः प्रयुक्तकुसृतेः पुनः ॥ १५८ ॥
अतिहार्येषु शल्येषु महामर्मगतेष्विव ।
सविवादेषु चोपेक्षां कालापेक्षी व्यधान्नृपः ॥ १५९ ॥
पप्रथे पार्थिवस्येत्थं निश्चोद्यं तस्य पालनम् ।
प्रजासु जागरूकस्य मनोरिव मनस्विनः ॥ १६० ॥
सख्यं कारणनिर्व्यपेक्षमिनताहंकारहीना सती
भावो वीतजनापवाद उचितोक्तित्वं समस्तप्रियम् ।
विद्वत्ता विभवान्विता तरुणिमा पारिप्लवत्वोज्झितो
राजत्वं विकलङ्कमत्र चरमे काले किलेत्यन्यथा ॥ १६१ ॥
स[1] तादृशोपि राजेन्द्रचन्द्रमाः स किलाभवत् ।
मात्सर्याविष्टवैवश्याद्दोषोल्कावर्षभीषणः[2] ॥ १६२ ॥
औदार्यशौर्यधीधैर्यगुणतारुण्यमत्सरः ।
बभूव संख्यातीतानां मानप्राणहरो नृणाम् ॥ १६३ ॥

---

१ यत् इति स्यात् । २ मात्सर्यावेश इति स्यात् ।

मानोन्नतैश्च भूयोपि वाक्पारुष्यरुषा हतैः।
लाघवं प्रत्युपालम्भैः पार्थिवोप्यनुभावितः ॥ १६४ ॥
प्रसुप्तानां फणीन्द्राणामिव कोपोद्भवं विना।
तेजोविस्फूर्जितं ज्ञेयं नहि नाम शरीरिणाम् ॥ १६५ ॥
विविधे भूतसर्गेस्मिन्न च कश्चित्स विद्यते।
वपुर्वंशचरित्रादि यस्य दोषैर्न दूषितम् ॥ १६६ ॥
जातिः पङ्करुहाद्वपुःकपिलताक्रान्तं शिरःखण्डनं
प्रभ्रश्यच्छुचिशीलतादिविगुणाचारप्रदुष्टं यशः।
विश्वस्रष्टुरिति प्रभूतविषयव्याप्तिस्पृशो दुःसहा
दोषा यत्र पुरोस्तु तत्र कतमो निर्दोषतोत्सेकभूः ॥१६७॥
अविचार्येति भूपालः स चकारानुजीविनाम्।
वंशचारित्रदेहादिदोषोद्घोषणमन्वहम् ॥ १६८ ॥
अन्योन्यद्वेषमुत्पाद्य संख्यातीता महाभटाः।
युद्धश्रद्धालुता तेन द्वन्द्वयुद्धेषु घातिताः ॥ १६९ ॥
मासार्धदिनमाहेन्द्रमहाद्यवसरेषु सः।
निनाय योधान्संनद्धानन्योन्यप्रधनैर्धनम् ॥ १७० ॥
स नाभूदुत्सवः कश्चित्तदा यत्र नृपाङ्गने।
भूमिर्न सिक्ता रक्तेन हाहाकारो न चोद्ययौ ॥ १७१ ॥
नृत्यन्त इव निर्याता गृहेभ्यो वंशशोभिनः।
बान्धवैर्निन्यिरे योधा लूनाङ्गाः पार्थिवाङ्गनात् ॥ १७२ ॥
स्निग्धश्यामकचांश्चारुश्मश्रूनाकल्पशोभिनः।
हतान्वीक्ष्य भटान्राजा मुमुदे न तु विव्यथे ॥ १७३ ॥
नार्यो राजगृहं गत्वा प्रत्यायातेषु भर्तृषु।
मेनिरे दिवसं लब्धमनास्था नित्यमन्यथा ॥ १७४ ॥

भवेत्तद्यदहं कुर्यामित्यहंक्रियया वदन् ।
साचिव्यमव्याहतवाक्कैस्तैर्भृत्यैरजिग्रहत् ॥ १७५ ॥
प्रवर्धमानांस्तानेव विद्वेषकलुषाशयः ।
हृताधिकारान्विदधे बहुशश्च विमानितान् ॥ १७६ ॥
दञ्छकः कम्पनाधीशः प्रवृद्धौ तत्र सक्रुधि ।
विद्रुतो विषलाटायां निपत्य निहतः स्वशैः ॥ १७७ ॥
तेन स्ववर्धितो द्वाराधीश्वरो रक्कनामिधः ।
हृताधिकारो विदधे विभूतिं वीक्ष्य भूयसीम् ॥ १७८ ॥
माणिक्यसैन्यपतिना द्वारेकस्मान्निवारिते ।
खिन्नेन विजयक्षेत्रे चक्रे व्रतपरिग्रहः ॥ १७९ ॥
कम्पनाद्यधिकारस्थाः प्रवीरास्तिलकादयः ।
काकवंशा मार्दवेन तत्कोपं नानुभाविताः ॥ १८० ॥
भोगसेनो निरनुगः क्षीणवासा भवत्[1]कृतः ।
तेनातिसेवाप्रीतेन राजस्थानाधिकारभाक् ॥ १८१ ॥
यस्येन्द्रद्वादशीयुद्धे सान्द्रसैन्योपि विद्रुतः ।
क्षुद्रवद्गगचन्द्रोपि रौद्रमालोक्य विक्रमम् ॥ १८२ ॥
येपि सङ्गाभिधानस्य पुत्राः सामान्यशस्त्रिणः ।
ताम्रङुच्छुङुव्यङान्स मन्त्रिणः समपादयत् ॥ १८३ ॥
पुत्रौ विजयसिंहस्य तत्सेवात्यक्तदुर्दशौ ।
तिलको जनकश्चास्तामामात्यश्रेणिमध्यगौ ॥ १८४ ॥
यमैलाभायबाणादिमुख्या द्वारादिनायकाः ।
कस्तान्समर्थः संख्यातुं तडित्तरलसंपदः ॥ १८५ ॥
द्विजाः प्रशस्तकलशादयः पूर्वे तदन्तरे ।
प्रापुर्वालद्रुमान्तःस्थजीर्णानोकहविभ्रमम् ॥ १८६ ॥

---

१ कुतोभवत् इत्युचितम् ।

कंदर्पः क्ष्माभुजा दूतैः समानीतोपि नाददे ।
तस्यासहनतां वीक्ष्य प्रार्थितोप्यधिकारिताम् ॥ १८७ ॥
आस्थानाचारसंलापव्यवहारादि मण्डले ।
नवमेवाभवत्सर्वं तस्मिन्नाभिनवे नृपे ॥ १८८ ॥
लक्ष्मीः कार्मणचूर्णाङ्का वेश्येव वशवर्तिनः ।
धीरानपि विधायेय करोत्युन्मार्गवर्तिनः ॥ १८९ ॥
सपिण्डानामपि व्यक्तशीलवीक्षणतत्परा ।
प्रेततेव नरेन्द्रश्रीर्जातिस्नेहापकारिणी ॥ १९० ॥
समस्तसंपत्पूर्णोपि यस्मात्सुस्सलभूपतिः ।
दध्यौ भ्रातुरवस्कन्दं राज्यापहरणोद्यतः ॥ १९१ ॥
अकस्मादश्रृणोच्छ्येनमिव तं शीघ्रपातिनम् ।
स्थानं वराहवार्ताख्यमुल्लङ्घ्यायातमग्रजः ॥ १९२ ॥
क्षिप्रकारी विनिर्गत्य तमप्राप्तपदं ततः ।
निपत्य सैन्यैर्बहुलैः सोपकारमकारयत् ॥ १९३ ॥
विद्रुतस्यास्पदे तस्य नानोपकरणैश्च्युतैः ।
ताम्बूलवेलाकूटैश्च सामग्री समभाव्यत ॥ १९४ ॥
कृतकार्यपरावृत्त्यासावरूढोपि पार्थिवः ।
प्रत्यावृत्तं तमश्रृणोदन्येद्युः क्रूरविक्रमम् ॥ १९५ ॥
गग्गचन्द्रस्तदादेशाद्गत्वा बहलसैनिकः ।
चक्रे सुस्सलभूपालबलनिर्दलनं ततः ॥ १९६ ॥
असंख्यैः सौस्सलैर्योधैराहवायासनिःसहैः ।
क्लान्तिर्विमानोद्यानेषु द्युनारीणाममुच्यत ॥ १९७ ॥
भर्तृप्रसादस्यानृण्यं प्राणैर्युधि समर्पितैः ।
राजपुत्रौ गतौ तत्र सहदेवयुधिष्ठिरौ ॥ १९८ ॥

वराश्वान्सुस्सलानीकान्गग्गस्तान्प्राप विद्रुतान् ।
चक्रे भूरितुरङ्गस्य यैर्भूपस्यापि कौतुकम् ॥ १९९ ॥
निविष्टकटकं तं स श्रुत्वा सेल्यपुराध्वना ।
क्रमराज्योन्मुखं यान्तं द्रुतमन्वसरन्नृपः ॥ २०० ॥
अन्विष्यमाणसरणिः प्रयत्नादग्रजन्मना ।
प्रविवेश दरद्देशं परिमेयपरिच्छदः ॥ २०१ ॥
दत्तमार्गं तस्य राजा डामरं लोष्टकाभिधम् ।
स सेल्यपुरजं हत्वा नगरं प्राविशत्ततः ॥ २०२ ॥
तस्मिन्दूरं गते वैरकलुषोपि स नाददे ।
भ्रातृस्नेहैरसंरम्भं ग्रहीतुं लोहरं गिरिम् ॥ २०३ ॥
कलहः कालिन्दराधीशो दौहित्रीं पुत्रवद्गृहे ।
यामवर्धयत स्नेहादपुत्रः पितृवर्जिताम् ॥ २०४ ॥
राज्ञो विजयपालस्य सुतां सुस्सलभूपतिः ।
उपयेमे स तां श्रीमाननघां मेघमञ्जरीम् ॥ २०५ ॥
तस्य प्रभावाधिष्ठानाच्छिशोरपि न लोहरे ।
शक्तिरासीद्विरुद्धानामपि बाधाय वैरिणाम् ॥ २०६ ॥
धीरः सुस्सलदेवोपि मार्गैर्निर्गत्य दुर्गमैः ।
आसदद्भूरिभिर्मासैः स्वोर्वीं दुर्गिरिवर्त्मना ॥ २०७ ॥
प्रशान्ते व्यसने तस्मिन्धीरस्योच्चलभूपतेः ।
अन्येपि व्यसनाभासा उत्पन्नध्वंसिनोभवन् ॥ २०८ ॥
भीमादेवः समादाय भोजं कलशदेवजम् ।
साहायकार्थमानिन्ये दरद्राजं जगद्दलम् ॥ २०९ ॥
सद्यो हर्षमहीभर्तुरवरुद्धात्मजोभवत् ।
भ्राता दर्शनपालस्य सङ्गपालस्तु तद्बलम् ॥ २१० ॥

---

१ नीकाद्गग: इत्युचितम् ।

नीतिज्ञेन ततो राज्ञा सान्नैव दरदीश्वरः।
आक्षेपाद्धारितः प्रायात्प्रत्यावृत्त्य निजां भुवम् ॥ २११ ॥
सहस्तमन्वगाच्छन्नं भोजोविक्षत्स्वमण्डलम्।
भेजे सुस्सलदेवस्य सञ्जपालोनुजीविताम् ॥ २१२ ॥
गृहीतार्थेन भृत्येन निजेनैव प्रदर्शितः।
भोजः क्षिप्रं नृपात्प्राप निग्रहं तस्करोचितम् ॥ २१३ ॥
देवेश्वरात्मजः पित्थकोपि द्वैराज्यलालसः।
डामरानाश्रिते राज्ञि निर्याते व्यद्रवद्दिशः ॥ २१४ ॥
विचारपरिहारेण धावन्तः सर्वतो जडाः।
तिर्यञ्च इव हास्याय प्रसिद्धिशरणा जनाः ॥ २१५ ॥
मल्लस्य रामलाख्योहं सूनुरासं दिगन्तरे।
अट्टसूदः कश्चिदेवं चक्रिकाचतुरो वदन् ॥ २१६ ॥
निन्ये प्रवृद्धिं व्यामूढैर्बहुभिर्विप्लवप्रियैः।
धनमानादिदानेन भूमिपैर्भूम्यनन्तरैः ॥ २१७ ॥
युग्मम् ॥
ग्रीष्मे प्रविष्टः कश्मीरानेकाकी घर्मपीडितः।
व्यधीयत च्छिन्ननासः परिज्ञाय नृपानुगैः ॥ २१८ ॥
कटके पर्यटन्राज्ञः स एव ददृशे पुनः।
स्वजात्युचितभक्ष्यादिविक्रयी सस्मितं जनैः ॥ २१९ ॥
मिथ्यैव नीतिकौटिल्यैः क्रियतेभ्युदयश्रमः।
शक्यतेपरथा कर्तुं न दैवस्य मनीषितम् ॥ २२० ॥
शान्तापि ज्वलति क्वापि क्वचिद्दीप्तापि शाम्यति।
दैववातवशाच्छक्तिः पुंसः कक्षाग्निसंनिभा ॥ २२१ ॥
पलायनैर्नापयाति निश्चला भवितव्यता।
देहिनः पुच्छसंलीना वह्निज्वालेव पक्षिणः ॥ २२२ ॥

नाच्छिन्नवाहिविषशस्त्रशरप्रयोगै-
र्न श्वभ्रपातरभसेन न चाभिचारैः ।
शक्या निहन्तुमसवो विधुरैरकाण्डे
भोक्तव्यभोगनियतोच्छ्वसितस्य जन्तोः ॥ २२३ ॥
भिक्षाचरः समादिष्टवधो जयमतीगृहात् ।
नक्तं वध्यभुवं निन्ये वधकैः पार्थिवाज्ञया ॥ २२४ ॥
ग्राव्णि प्रस्फोट्य निक्षिप्तो वितस्तायां समीरणैः ।
क्षिप्तस्तटं क्षणं स्पन्दमानवक्षाः कृपालुना ॥ २२५ ॥
द्विजेनैकेन संप्राप्तश्चिरादुद्गतचेतनः ।
आसमत्यभिधानाया ज्ञातिर्दिद्देति गौरवात् ॥ २२६ ॥
शाहिपुत्रीभिरुक्ताया दत्तश्चतुरया तया ।
नीतो देशान्तरं गूढं ववृधे दक्षिणापथे ॥ २२७ ॥
तिलकम् ॥
स वृत्तप्रत्यभिज्ञोथ पुत्रवन्नरवर्मणा ।
मालवेन्द्रेण शस्त्रास्त्रविद्याभ्यासमकार्यत ॥ २२८ ॥
अन्यदीयं घातयित्वा तत्तुल्यवयसं शिशुम् ।
रक्षितो जयमत्यैव स किलेत्यपरेब्रुवन् ॥ २२९ ॥
देशान्तरागताद्दूतात्तां वार्तामुपलब्धवान् ।
अत एवाभवत्तस्या भूभृद्भिरलितादरः ॥ २३० ॥
बहिरप्रतिभिन्दंस्तत्स धीरो मार्गवर्तिभिः ।
चक्रे तदप्रवेशाय संबन्धं पार्थिवैः समम् ॥ २३१ ॥
ईर्ष्यामगोपयन्नार्यां शङ्कामच्छादयन्नृपोः ।
स्वयमन्याभिगम्यत्वं करोति हि जडो जनः ॥ २३२ ॥
भिक्षाचरे हते बालं कंचिदादाय तत्समम् ।
तन्नाम्ना ख्यातिमनयद्दिद्दैवेत्यपरेब्रुवन् ॥ २३३ ॥

तथ्येन सोस्तु मिथ्या वा प्रतिष्ठां तां तथाप्तवान् ।
यथा लघुत्वमानेतुं न दैवेनाप्यशक्यत ॥ २३४ ॥
स्वप्नेन्द्रजालमायानामपि निर्विषया इमाः ।
कर्मवैचित्र्यजनिताः काश्चिदाश्चर्यविप्रुषः ॥ २३५ ॥
स राजबीजी नाशाय विशां गूढं व्यवर्धत ।
पुरग्रामादिदाहाय कक्षान्तरिव पावकः ॥ २३६ ॥
रोहत्यन्तिकसीमनि प्रतिविषा वीरुद्विषक्ष्मारुहः
काले प्रावृडुपद्रुताच्छसलिले मूर्च्छत्यगस्त्योदयः ।
सर्गच्छेदविधिक्षमानुदयतो दृष्ट्वा किलोपद्रवा-
न्संधत्ते प्रतिकारकल्पनमहो दीर्घावलोकी विधिः ॥ २३७ ॥
अजायत विपन्मज्जज्जगदुद्धरणक्षमः ।
तस्मिन्नेव क्षणे यस्मात्सुस्सलक्ष्मापतेः सुतः ॥ २३८ ॥
तज्जन्मकालादारभ्य सर्वतो जयमर्जयन् ।
नामान्वर्थं नृपस्तस्य जयसिंह इति व्यधात् ॥ २३९ ॥
शास्तुः सर्वार्थसिद्धाख्या यथा सर्वार्थसिद्धिभिः ।
तथा तस्याभिधान्वर्था नात्यजद्रूढिशब्दताम् ॥ २४० ॥
मुद्रां सकुङ्कुमस्याङ्घ्रेस्तदीयस्याभ्युपागताम् ।
विलोक्योच्चलदेवोभूद्विमन्युर्भ्रातरं प्रति ॥ २४१ ॥
बालस्यैवाङ्घ्रिमुद्रास्य वैरं पितृपितृव्ययोः ।
निवारयन्ती विदधे सुस्थितं मण्डलद्वयम् ॥ २४२ ॥
स स्वर्गिणः पितुर्नाम्ना ततः सुकृतसिद्धये ।
चकारोच्चलभूपालः पैतृके स्थण्डिले मठम् ॥ २४३ ॥
गोभूमिहेमवस्त्रान्नदाता तस्मिन्महोत्सवे ।
आश्चर्यकल्पवृक्षत्वं त्यागी सर्वार्थिनामगात् ॥ २४४ ॥

प्रसादैः प्रहितैस्तेन महार्घैः श्लाघ्यसंपदा ।
महान्तोपि दिगन्तेषु पार्थिवा विस्मयं ययुः ॥ २४५ ॥
भर्तृप्रसादाधिगतां श्रियं नेतुं पराध्यताम् ।
विहारं समठं देवी जयमत्यपि निर्ममे ॥ २४६ ॥
केषांचित्पूर्वपुण्यानां विरहेण महीभुजः ।
हताभीष्टाभिधानोभून्मठो नवमठाख्यया ॥ २४७ ॥
सुल्लां स्वसारमुद्दिश्य परस्मिन्स्थण्डिले पितुः ।
विहारोपि कृतस्तेन नोचितां ख्यातिमाययौ ॥ २४८ ॥
मृत्योर्मस्तकपातित्वं तस्याकलयतः किल ।
न निष्ठां स्वप्रतिष्ठासु संप्रपेदे व्ययस्थितिः ॥ २४९ ॥
कदाचिक्रमराज्यस्थो द्रष्टुमग्निं स्वयंभुवम् ।
ययौ बर्हणचक्राख्यं गिरिग्रामं स भूपतिः ॥ २५० ॥
तं कम्बलेश्वरग्रामाध्वना यान्तमवेष्टयन् ।
अकस्मादेत्य तत्रत्याश्चौराश्चण्डालशस्त्रिणः ॥ २५१ ॥
प्रजिहीर्षुभिरप्याशु तस्मिन्नत्यल्पसैनिके ।
न तैः प्रहृतमुद्रोजोवष्टम्भस्तम्भितायुधैः ॥ २५२ ॥
अथ हारितमार्गः स गहने गिरिगह्वरे ।
भ्रमन्नल्पानुयाय्येकां क्षणदामत्यवाहयत् ॥ २५३ ॥
उच्चचार क्षणे तस्मिन्स्कन्धावारेषु दुःसहा ।
नास्ति राजेति दुर्वार्ता सर्वतः क्षोभकारिणी ॥ २५४ ॥
कटकान्निःसृतात्यल्पा वात्येव गिरिगह्वरात् ।
सा दुष्प्रवृत्तिदीर्घत्वं पुरेरण्य इवासदत् ॥ २५५ ॥
नगराधिकृतस्तस्मिन्क्षणे छुड्डाभिधोभवत् ।
शस्त्रिणः कामदेवस्य कुल्यो रड्डादिसोदरः ॥ २५६ ॥

कृत्वा पुरक्षोभशान्तिं शस्त्रौकः स नृपास्पदे ।
प्रविश्य भ्रातृभिः सार्धं कार्यशेषमचिन्तयत् ॥ २५७ ॥
नृपं कं कुर्म इत्येवं तान्विचिन्तयतोब्रवीत् ।
सङ्गाभिधोपि कायस्थः कुटुम्बिकुटिलाशयः ॥ २५८ ॥
यूयमेव सुहृद्बन्धुभृत्यबाहुल्यदुर्जयाः ।
राज्यं कुरुत संप्राप्य राष्ट्रमेवमकण्टकम् ॥ २५९ ॥
तेनैवमुक्तास्ते पापा जातराज्यस्पृहास्ततः ।
सिंहासनाधिरोहाय क्षिप्रमासन्समुद्यताः ॥ २६० ॥
श्रीयशस्करदेवस्य वंश्या एत इति श्रुतिः ।
तदन्वयेभूत्सर्वेषां राज्यौत्सुक्यप्रदायिनी ॥ २६१ ॥
अत एवाभजत्क्रोधं तेषां कुसुहृदुक्तिभिः ।
सा वासनान्तःसंलीना सदाचारानपेक्षिणाम् ॥ २६२ ॥
कथं न प्रतिभात्वेषा सङ्गस्यापि कुपद्धतिः ।
भारिकस्य कुले जातो लवटस्य हि सोधमः ॥ २६३ ॥
क्षेमदेवाभिधानस्य पुत्रोप्यल्पनियोगिनः ।
क्रूराशयत्वमभजन्महासाहसिकोचितम् ॥ २६४ ॥
चौर्येण स्वर्णभृङ्गारं हृतवान्भूपतेर्गृहात् ।
संभावितोपि गाम्भीर्यान्नाज्ञायि स किलेङ्गितैः ॥ २६५ ॥
सासिधेनुर्निरुष्णीषो विहसन्नखिलान्स्मयात् ।
राजपुत्र इवात्यल्पं स त्रैलोक्यममन्यत ॥ २६६ ॥
तस्य चिन्ता काचिदासीत्सदा दोलायतोङ्गुलीः ।
या राज्यहेतुः क्रूरेण फलेन समभाव्यत ॥ २६७ ॥
तद्विरा निजसंकल्पादपि ते राज्यलालसाः ।
नृपं जीवन्तमाकर्ण्य ततोभूवन्हतस्पृहाः ॥ २६८ ॥

न स्फुरन्न च संमीलन्न वा सुप्त इवानिशम् ।
तेषां चेतसि संकल्पस्तदाप्रभृति सोभवत् ॥ २६९ ॥
असुस्थिरादरेणाथ शनकैः पृथिवीभुजा ।
निन्यिरे मध्यमां वृत्तिं राजस्थानान्निवार्य ते ॥ २७० ॥
प्रकृत्या रूक्षवाग्राजा सर्वेषामेव सर्वदा ।
तेषामप्यकरोदत्रान्तरे मर्मस्पृशः कथाः ॥ २७१ ॥
ते राज्ये हर्षभूभर्तुः पितरि प्रमयं गते ।
मातुस्तारुण्यमत्ताया विधवाया गृहेवसन् ॥ २७२ ॥
तैर्मद्यासक्तको नाम शस्त्रभृत्प्रातिवेश्मिकः ।
सुहृद्धतोथ विश्वस्तो जननीजारशङ्कया ॥ २७३ ॥
असतीमपि किं नैते न्यगृह्णन्निति भूपतिः ।
विचार्य कोपात्तन्मातुर्नासाच्छेदमकारयत् ॥ २७४ ॥
तां कथां स नृपस्तेषां परोक्षमुदघोषयत् ।
क्व पुत्राश्छिन्ननासाया वदन्नित्यन्वियेष च ॥ २७५ ॥
बृहद्भञ्जादिगञ्जेशं कृत्वा कार्यान्यवारयत् ।
स कायस्थकृतान्तत्वं भजन्सडुमपि प्रभुः ॥ २७६ ॥
पीडितस्तेन रौद्रेण निजोथ गणनापतिः ।
कोशोत्पत्त्यपहर्तारं तं नृपाय न्यवेदयत् ॥ २७७ ॥
प्रवेशभागिकपदे हृते राज्ञा रुषा ततः ।
स क्रूरो रडुच्छुडुादीन्प्रैरयत्पूर्वचिन्तिते ॥ २७८ ॥
जिघांसवस्ते नृपतिं प्रसङ्गापेक्षिणः परैः ।
समगंसत दुष्प्रज्ञैरथ हंसरथादिभिः ॥ २७९ ॥
प्रजिहीर्षुभिरुर्वीशं पीतकोशैः समेत्य तैः ।
चतुष्पञ्चानि वर्षाणि नावाप्यवसरः क्वचित् ॥ २८० ॥

बहुभिर्बहुधा भिन्नैर्बहुकालं विचिन्तितः।
न भेदमगमन्मन्त्रः स चित्रं लोकदुष्कृतैः ॥ २८१ ॥
तवैतां कुरुते शश्वन्नृपो मर्मस्पृशं कथाम्।
इति प्रत्येकमुक्त्वा ते विरागं पार्थिवेभजन् ॥ २८२ ॥
तैरुरःपार्श्वपृष्ठादि गूढैर्वर्मभिरायसैः।
प्रच्छाद्य पार्थिवोजस्रमनुसस्रे जिघांसुभिः ॥ २८३ ॥
असहो विरहं सोढुं यां प्रसादयितुं न काम्।
राजापि संदधे चेष्टां प्राक्प्राकृतभुजंगवत् ॥ २८४ ॥
स्वभाववैपरीत्येन नाशचिह्नेन स स्थिराम्।
जयमत्या सहाप्रीतिं तदादाद्वत्सरद्वयम् ॥ २८५ ॥
रक्षां भिक्षाचरस्याहुर्निमित्तं तत्र केचन।
केचित्तु विद्युत्सदृशीं प्रेम्णां तरलवृत्तिताम् ॥ २८६ ॥
अथ वर्तुलभूभर्तुरात्मजा विज्जलाभिधा।
कृतपाणिग्रहास्यागाद्धाल्लभ्यं वसुधाभुजः ॥ २८७ ॥
सङ्ग्रामपाले नृपतौ तस्मिन्नवसरे मृते।
तत्सूनुः सोमपालाख्यः पित्र्यं राज्यं समादधे ॥ २८८ ॥
राज्यार्हमग्रजं बद्ध्वा सोभ्यषिच्यत चाक्रिकैः।
इति कोपान्नरेन्द्रोभूत्कुध्यन्राजपुरीं प्रति ॥ २८९ ॥
लक्ष्मीस्थैर्यप्रतिभुवः पुत्र्याः पाणिमजिग्रहत्।
..... ॥ २९० ॥
अर्थिचिन्तामणेस्तस्य प्रीणतो निखिलाः प्रजाः।
नानाव्ययोर्जितो रेजे पश्चिमः स महोत्सवः ॥ २९१ ॥
याते जामातरि क्ष्माभृच्चक्रे निखिलतस्त्रिणः।
निर्वृत्तीः किमपि क्रुध्यन्दुध्रुक्षूंस्तु व्यसर्जयत् ॥ २९२ ॥

भोगसेनोपि भूपेन काले तस्मिन्समन्युना ।
निवारितो द्वारकार्यात्सवैरः समपद्यत ॥ २९३ ॥
विक्रान्तः स हि कार्यस्थो निर्जिताखिलडामरः ।
सुस्सलक्ष्मापतिं जेतुं प्रतस्थे लोहरं पुरा ॥ २९४ ॥
वात्सल्यमिश्रं वैरेण वारितोथ महीभुजा ।
तत्परीवादमकरोच्चुक्रोधावेत्य तच्च सः ॥ २९५ ॥
प्रावेशयन्नडुच्छुडुमुखान्स समयान्तरम् ।
तमादिसुहृदं वीरं तदा राज्ञा विमानितम् ॥ २९६ ॥
विमानिता विशालेच्छाः संहता हतवृत्तयः ।
न ते बहिष्कृतास्तेन यमराष्ट्रं जिगीषता ॥ २९७ ॥
तान्भोगसेनविन्यस्तसद्भावान्कुटिलाशयः ।
सङ्गो निनिन्द वीरत्वात्तं जानन्सरलान्तरम् ॥ २९८ ॥
ऊचे चाद्यैव हित्वापि प्राणान्व्यापाद्यतां नृपः ।
भोगसेनोन्यथा भेदं कुर्यादगहनाशयः ॥ २९९ ॥
अन्यथाभून्न सङ्गोक्तं भोगसेनो यदब्रवीत् ।
किंचिद्रहोस्मि वक्तेति नृपतिं भेदलालसः ॥ ३०० ॥
स तु किं वक्षि न द्वारं तव दद्यामिति ब्रुवन् ।
दुध्रुक्षुपक्षप्रणयं निन्ये तमवमानयन् ॥ ३०१ ॥
प्रबोधाधायिनो द्वेष्टि नियतिप्रणयीभवन् ।
तपात्ययाहनिद्रार्त इव जन्तुर्गतस्मृतिः ॥ ३०२ ॥
तत्त्रिणो यामिका भूत्वा स्वस्मिन्वारे ततोविशन् ।
ते राजधानीं संनद्धैः स्वसैन्यैः सह संहताः ॥ ३०३ ॥
यामिन्यां यं वयं हन्मस्तं हतेत्यभिधाय च ।
प्रावेशयन्यस्तचिह्नांश्चण्डालान्मण्डपान्तरम् ॥ ३०४ ॥

भुक्तोत्तरं स्थिते राज्ञि ते बाह्ये मण्डपे स्थिताः।
सरोषो नृप इत्युक्त्वा सेवकोत्सारणं व्यधुः ॥ ३०५ ॥
राजा च विज्ञलावेश्म यियासुर्मण्डपान्तरात्।
दीपिकाभिः कृतालोको निर्ययौ मदनालसः ॥ ३०६ ॥
मध्यमं मण्डपं तस्मिन्प्राप्ते स्वल्पैः सहानुगैः।
तत्त्यक्तं मण्डपं सद्यो रुद्धान्यानरुणज्ञनान् ॥ ३०७ ॥
अन्यैरप्यग्रिमे द्वारे निरुद्धे सर्व एव ते।
जिघांसवः समुत्थाय नृपतिं पर्यवारयन् ॥ ३०८ ॥
विज्ञप्तिदम्भादेकेन रुद्धमग्रे निषेदुषा।
तं द्विजो दिन्नजस्तेजः शस्त्रया कृष्टकचोभिनत् ॥ ३०९ ॥
ततः काञ्चनगौराणि तस्याङ्गान्यसिधेनवः।
बह्वयः सुमेरुशृङ्गाणि महोरग्य इवाविशन् ॥ ३१० ॥
स द्रोहो द्रोह इत्युक्त्वा केशान्कृष्टान्विमोचयन्।
क्रीडाशस्त्रयाः कषां रुद्धमुष्टिं दन्तैर्व्यपाटयत् ॥ ३११ ॥
सुजनाकरनामा हि भृत्यः कट्टारकं वहन्।
तस्यान्तिकात्पलायिष्ट प्रहरत्सु विरोधिषु ॥ ३१२ ॥
अतो बालोचितां लघ्वीं क्षुरिकां स चकर्ष ताम्।
मुष्टावर्गलिता कोशात्सा कृच्छ्रेण विनिर्ययौ ॥ ३१३ ॥
निर्यातास्रः शत्रुभिस्तैस्त्यक्तकेशो बबन्ध तम्।
धम्मिल्लमथ तां शस्त्रीं जानुद्वन्द्वान्तरर्पयन् ॥ ३१४ ॥
नदित्वा प्रहरंस्तेजंस्तादृग्वीर्योपि सोभवत्।
येन क्षितौ निपतितः सर्वमर्मस्विवाहतः ॥ ३१५ ॥
अभिनच्च ततो रङ्गं प्रहरन्तं च पृष्ठतः।
नदन्सिंह इव व्यङ्गं परिवृत्य व्यदारयत् ॥ ३१६ ॥

अन्यं च शस्त्रिणं कंचित्सवर्माणमपातयत् ।
विवेष्टमानो यः प्राणैरचिरेण व्ययुज्यत ॥ ३१७ ॥
लब्धान्तरे प्रवासाय तस्मिन्धावति मण्डपः ।
रक्षिभिर्भूमिपालोयमित्यबुद्ध्वा कवाटितः ॥ ३१८ ॥
द्वारमन्यत्प्रसर्पन्स क्व प्रयासीति जल्पता ।
छुड्डेन रुद्धमार्गेण खड्गपातैरहन्यत ॥ ३१९ ॥
भोगसेनं ततोपश्यद्द्वारस्यान्ते समुत्थितम् ।
दारुतूलिकया भित्तिमालिखन्तं पराङ्मुखम् ॥ ३२० ॥
भोगसेनेक्षसे कस्मादमुं त्वमिति वादिनम् ।
सोव्यक्तं किमपि ह्रीतः प्रधावन्तं जगाद तम् ॥ ३२१ ॥
रय्यावट्टाभिधो दीपधरस्तिष्ठन्निरायुधः ।
अयोदीपिकयारब्धयुद्धस्तैर्विक्षतोपतत् ॥ ३२२ ॥
चाम्पेयः सोमपालाख्यराजपुत्रः क्षताहितः ।
प्रहारैः प्राप्तवैक्लव्यो न गर्ह्याचारतामगात् ॥ ३२३ ॥
पौत्रः श्रीशूरपालस्य राजकापत्यमज्जकः ।
विदद्रौ श्वेव संछाद्य शस्त्रीं पुच्छच्छटोपमाम् ॥ ३२४ ॥
ततः प्रधावन्प्रग्रीवमारुरुक्षुः क्षितीश्वरः ।
निकृत्तजानुश्चण्डालैरालिलिङ्ग वसुंधराम् ॥ ३२५ ॥
तत्पृष्ठे स्वं क्षिपन्देहं प्रहारैर्जर्जरीकृतः ।
शृङ्गारनामा कायस्थो निर्द्रोहो वारितोरिभिः ॥ ३२६ ॥
पुनरुत्थातुकामस्य सर्वे शस्त्रावलीर्द्विषः ।
न्यपातयंस्तस्य काल्या नीलाञ्जवरणस्रजम् ॥ ३२७ ॥
तिष्ठेत्कदाचिद्धूर्तोयमविपन्नो विपन्नवत् ।
कंधरामधमः सङ्कुस्तस्येति स्वयमच्छिनत् ॥ ३२८ ॥

कृतं पदापहरणं यस्य सोहमिति ब्रुवन् ।
छित्त्वाङ्गुलीश्चकर्षापि रत्नाङ्कामूर्मिकावलीम् ॥ ३२९ ॥
एकपादस्थितोपानत्स्रस्तमाल्यैः शिरोरुहैः ।
छन्नवक्त्रः स ददृशे सुप्तो दीर्घभुजः क्षितौ ॥ ३३० ॥
पर्याप्तयास्य पर्यन्ते वीरवृत्त्या महौजसः ।
निर्दोषतामीषदगान्निस्त्रिंशत्वं जनान्प्रति ॥ ३३१ ॥
सेवकः शूरटो नाम पूत्कुर्वन्द्रोहमुच्चकैः ।
निर्गत्य भोगसेनेन बहिः क्रोधान्निपातितः ॥ ३३२ ॥
प्रस्थितो दयितावासं स दिङ्मोहवशादिव ।
पन्थानं पृथिवीनाथः काल्या जग्राह वेश्मनि ॥ ३३३ ॥
राज्योद्याने नृपतिमधुपा भोगकिंजल्कलोला-
श्चेतो नानावसनकुसुमश्रेणिभिः प्रीणयन्तः ।
हा धिग्दैवानिलतरलया पात्यमाना नियत्या
वल्ल्येवैते किमपि सहसा दृष्टनष्टा भवन्ति ॥ ३३४ ॥
तिर्यग्भ्यस्त्रिजगज्जयी परिभवं लङ्केश्वरो लब्धवा-
न्प्रापाशेषनृपोत्तमः कुरुपतिः पादाहतिं मूर्धनि ।
इत्यन्ते बहुमानहृत्परिभवः सर्वस्य सामान्यव-
त्तत्को नाम भवेन्महानहमिति ध्यायन्धृताहंक्रियः ॥३३५॥
परासुमहितैस्त्यक्तं तमनाथमिव प्रभुम् ।
नग्नं हुताशसात्कर्तुं स्वच्छत्रग्राहिणोनयन् ॥ ३३६ ॥
भुजौ कण्ठे गृहीत्वैकः कराभ्यां चरणौ परः ।
तं भुग्नग्रीवमालोलकुन्तलं रुधिरोक्षितम् ॥ ३३७ ॥
सशूत्कारव्रणं नग्नमनाथमिव पार्थिवम् ।
राजधान्या विनिष्कृष्टं न्यधत्तां पितृकानने ॥ ३३८ ॥

युग्मम् ॥

महासरिद्वितस्ताम्भःसंभेदद्वीपभूतले ।
अह्नाय वह्निसंस्कारं ते भीतास्तस्य चक्रिरे ॥ ३३९ ॥
न हतो नापि निर्दग्धः स केनापि व्यलोक्यत ।
उड्डीयेव गतस्त्वाशु नेत्रनिर्विषयोभवत् ॥ ३४० ॥
व्यतीतेन स वर्षैकचत्वारिंशतमायुषा ।
सप्ताशीत्यब्दपौषस्य शुक्लषष्ठ्यां व्ययुज्यत ॥ ३४१ ॥
चक्रेथ सासिकवचो रङ्कुः शोणितमण्डितः ।
श्मशानाश्मनि वेताल इव सिंहासने पदम् ॥ ३४२ ॥
..... ।
.....बद्धमूलानामाद्यानां तन्न दिद्युते ॥ ३४३ ॥
तस्यावरोहतः सिंहासनाद्योद्धुं पुरो युधि ।
विक्रामन्तो बन्धुभृत्या युद्धभूमिमभूषयन् ॥ ३४४ ॥
तत्रिणौ वट्टपट्टाख्यौ युद्ध्वा तद्बान्धवौ चिरम् ।
योधाश्च कट्टसूर्याद्याः सिंहद्वारेपतन्हताः ॥ ३४५ ॥
रणरङ्गनटो नृत्यन्निव राजगृहाङ्गने ।
सखड्गखेटको रङ्कुः खण्डयन्नहितान्बभौ ॥ ३४६ ॥
दिशन्विजयसंदेहमहितानां क्षणे क्षणे ।
प्रहारैः सुबहून्भित्त्वा स चिरेणापतद्रणे ॥ ३४७ ॥
राजद्रोहोचितं तस्य निहतस्यापि निग्रहम् ।
वैशसत्यक्तमर्यादो गर्गः कोपादकारयत् ॥ ३४८ ॥
दिद्दामठान्तिके व्यङ्कुः पौरैर्भस्माश्मवर्षिभिः ।
अवस्करप्रणालान्तर्मग्नवक्त्रो न्यपात्यत ॥ ३४९ ॥
ते गुल्फदामभिः कृष्टाः स्थाने स्थाने प्रभुद्रुहः ।
तत्क्षणं लोकथूत्कारपूजां कृत्योचितां दधुः ॥ ३५० ॥

पलाय्य प्रययुः क्वापि सङ्गं हंसरथादयः ।
मरणाभ्यधिकां कंचित्कालं सोढुं विपद्यथाम् ॥ ३५१ ॥
दृप्यन्पराजितं गर्गं नष्टे तदनुजे विदन् ।
भोगसेनोथ तां वार्तामशृणोत्प्रलयोपमाम् ॥ ३५२ ॥
व्यावृत्य प्रत्यवस्थातुकामः पश्यन्पलायिनः ।
योधान्स्वैः सहितः कैश्चित्ततः क्वापि भयादगात् ॥ ३५३ ॥
इत्थं निहतविध्वस्तनायका द्रोग्धृसंहतिः ।
स्वदोर्मात्रसहायेन गर्गचन्द्रेण सा कृता ॥ ३५४ ॥
सत्त्वं साहससिद्धिं च नेतिहासेष्वपि क्वचित् ।
अश्रौषं तादृशं यादृक्तस्यास्ते स्म प्रतापिनः ॥ ३५५ ॥
निशां प्रहरमह्नश्च राज्यं कृत्वा स लब्धवान् ।
द्रोहकृच्छ्रं खराजाख्यां गतिं कुकृतिनामगात् ॥ ३५६ ॥
यशस्करकुले जन्म द्रोग्धृभिस्तैः प्रमाणितम् ।
क्षणभङ्गयभजद्राज्यं यस्माद्वर्णटदेववत् ॥ ३५७ ॥
दावोद्दीपनकूटयन्त्रघटनैः सिंहादिसंहारिणो
यान्त्याकस्मिकगण्डशैलपतनैरन्तं किराता वने ।
एकेनैव ननु प्रधावति जनः सर्वोपि मृत्योः पथा
हन्ताहं निहतोयमेष तु मितं कालं विभेदग्रहः ॥ ३५८ ॥
स्वोद्वाहे ललनौघमङ्गलरवो यैर्हर्षुलैः श्रूयते
दीनैस्तैर्दयिताविलाप उदयन्नाकर्ण्यतेन्तक्षणे ।
ह्योपि[1] घ्नन्नहितं प्रहृष्यति परः स्वं घ्नन्तमन्ते मुदो-
द्वृत्तं सोप्यवलोकयत्यहह धिङ्मोहोयमान्ध्यावहः ॥ ३५९ ॥
सायं विचिन्तितो रात्रौ फलितोऽन्यत्र वासरे ।
दुर्विपाकप्रदाताभूद्रोग्धृणां साहसद्रुमः ॥ ३६० ॥

---

१ योपि इति स्यात् ।

अथ सिंहासनस्यान्तः कार्यान्ते त्यक्तविग्रहः ।
गर्गः प्रक्षालितामर्षश्चक्रन्द स्वामिनं चिरम् ॥ ३६१ ॥
तस्मिन्रुदति सर्वोपि पौरलोको भयोज्झितः ।
संप्राप्तावसरो भूपं व्यलापील्लोकवत्सलम् ॥ ३६२ ॥
कारुण्योत्पत्तये दत्त्वा कोशं जीवितकामया ।
जयमत्या तदावादि गर्गः कपटशीलया ॥ ३६३ ॥
कुरु मे संविदं भ्रातरिति सत्त्वमयस्तु सः ।
तत्प्रक्रियावचो ज्ञात्वा चितिं तस्या अकल्पयत् ॥ ३६४ ॥
चिकुरनिचये यत्कौटिल्यं विलोचनयोश्च या
तरलतरता यत्काठिन्यं तथा कुचकुम्भयोः ।
वसति हृदि तद्यासां पिण्डीभवन्ननु ता इमा
गहनहृदया विज्ञायन्ते न कैश्चन योषितः ॥ ३६५ ॥
दौःशील्यमप्याचरन्त्यो घातयन्त्योपि वल्लभान् ।
हेलया प्रविशन्त्यग्निं न स्त्रीषु प्रत्ययः क्वचित् ॥ ३६६ ॥
युग्याधिरूढा सा यान्ती यावन्मार्गे व्यलम्बत ।
अग्रतो विज्वला तावन्निर्गत्य प्राविशच्चिताम् ॥ ३६७ ॥
अथ तस्याश्चितारोहं कुर्वत्या भूषणार्थिभिः ।
लुण्ठकैर्लुठ्यमानाया व्यथा गात्रेषु पप्रथे ॥ ३६८ ॥
सच्छत्रचामरे राज्ञ्यौ दह्यमाने विलोकयन् ।
लोकः सर्वोपि साक्रन्दो दग्धदृष्टिरिवाभवत् ॥ ३६९ ॥
औचित्यं तेन च तदा निन्येत्यन्तपवित्रताम् ।
सर्वैर्यदर्थ्यमानोपि नोपाविक्षन्नृपासने ॥ ३७० ॥
सुतमुच्चलदेवस्य बालमङ्के निधित्सता ।
राज्येभिषेक्तुं ते केचित्तेनान्वैष्यन्त यत्नतः ॥ ३७१ ॥

लोको येष्वद्य केषांचित्तत्त्वमालोक्य सस्मितः ।
भिक्षामप्यटितुं जाने नैष जानाति योग्यताम् ॥ ३७२ ॥
राज्ञ्यां श्वेताभिधानायां मल्लराजस्य ये सुताः ।
सह्लणाद्यास्त्रयोभूवन्मध्यमे प्राक्षयं गते ॥ ३७३ ॥
हन्तुं ज्येष्ठकनिष्ठौ द्वौ शेषौ सह्लणलोठनौ ।
अन्विष्टौ शङ्करराजेन भयान्नवमठं गतौ ॥ ३७४ ॥
निर्लज्जैर्निहतान्द्रोग्धृन्विहाय मिलितैः पुनः ।
तत्र्यश्वारोहसचिवैरानीतः कृतचाक्रिकैः ॥ ३७५ ॥
दृष्ट्वा राज्यार्हमप्राप्य कंचिज्ज्यायांस्तयोस्तदा ।
गर्गेण राज्ये संरम्भादभ्यषिच्यत सह्लणः ॥ ३७६ ॥
हा धिक्कतुर्णां यामानामन्तरे नृपतित्रयी ।
अहस्त्रियामे तत्रासीद्दृश्या या पुरुषायुषैः ॥ ३७७ ॥
ये सायमुच्चलनृपं प्राह्णे रङ्कुं सिषेविरे ।
मध्याह्ने सह्लणं प्रापुर्दृष्टास्ते राजसेवकाः ॥ ३७८ ॥
अथ लोहरकोट्टस्थः सार्धेह्नि गलिते नृपः ।
सुस्सलो भ्रातृमरणं श्रुत्वा तूद्भ्रान्तमानसः[1] ॥ ३७९ ॥
गर्गेण प्रहितो दूतः स क्रन्दन्स्वं क्षिपन्क्षितौ ।
ततस्तं वीतसंदेहं चकारार्तप्रलापिनम् ॥ ३८० ॥
आद्यात्सह्लणवृत्तान्तपर्यन्तां नाशृणोत्कथाम् ।
गर्गदूताद्भ्रातृवधं स्वस्याह्वानं च केवलम् ॥ ३८१ ॥
अश्रद्दधानस्तं शीघ्रमरिच्छेदं सुदुष्करम् ।
तदाह्वानाय गर्गो यं प्राहिणोत्तं चलन्गृहात् ॥ ३८२ ॥
आक्रन्दमुखरो भूत्वा तां रात्रिमरुणोदये ।
कश्मीराभिमुखो यात्रामसंभृतबलोप्यदात् ॥ ३८३ ॥

१ श्रुत्वाभूद्भ्रान्तमानसः इत्युचितम् ।

अन्योथ गर्गदूतस्तं पथि संघटितोभ्यधात् ।
कृत्स्नमावेद्य वृत्तान्तं नागन्तव्यमिति ध्रुवम् ॥ ३८४ ॥
क्षिप्रं हतेषु द्रोहेषु त्वय्यसंनिहितेनुजः ।
कृतस्तु सह्लणो राजा कृत्यमागमनेन किम् ॥ ३८५ ॥
श्रुत्वेति गर्गसंदेशं कोपादसहनो नृपः ।
अप्रयाणैषिणो भृत्यान्विहस्यैवं वचोब्रवीत् ॥ ३८६ ॥
नास्माकं पैतृकं राज्यं यदि रिक्थहरोनुजः ।
मज्ज्यायसा मया चैतद्भुजाभ्यामर्जितं पुनः ॥ ३८७ ॥
राज्यं स्वीकुर्वतोरन्यो न दाताभूत्तदावयोः ।
येनाहृतमिदं पूर्वं स क्रमः क्व गतोधुना ॥ ३८८ ॥
इत्युक्त्वाविरतैरेव वहन्नासीत्प्रयाणकैः ।
दूतांश्च पार्श्वे गर्गस्य स्वीकृत्यै प्राहिणोद्बहून् ॥ ३८९ ॥
स काष्ठवाटं संप्राप सह्लणस्य हितैषिणा ।
निर्गत्य गर्गचन्द्रेण चक्रे हुष्कपुरे पदम् ॥ ३९० ॥
प्रवृत्तायां विभावर्यां दूतैः कृतगतागतैः ।
तस्याङ्गीकृतसामापि गर्गो द्रोग्धा व्यधीयत ॥ ३९१ ॥
कार्यमध्यगतो राजा तथापि प्राहिणोत्तदा ।
धात्रेयं भ्रातरं गर्गाभ्यर्णं हितहिताभिधम् ॥ ३९२ ॥
भोगसेनः क्षणे तस्मिन्नाययौ दैवमोहितः ।
खाशकान्विल्ववनजान्मध्येकृत्य नृपान्तिकम् ॥ ३९३ ॥
सोभ्यर्णं कर्णभूत्याख्यमश्वारोहं महीपतेः ।
विसृज्य गर्गं जेष्यामीत्युक्त्वाभूल्लोभनोद्यतः ॥ ३९४ ॥
कालापेक्षामपि त्यक्त्वा हन्तुं भ्रातृद्रुहं स तम् ।
योग्यं प्रसङ्गमन्विष्यञ्ज्ञे लोकैरसज्जनः ॥ ३९५ ॥

यस्य भ्रातृद्रुहः पार्श्वे स त्वमाश्रीयसे कथम्।
गर्गोऽपि तमुपालेभे दूतैरित्यादि संदिशन् ॥ ३९६ ॥
स तु मार्गात्पलाय्यायं तमसीति विलम्बकृत्।
दत्तास्कन्दः क्षपापाये तं सानुगमघातयत् ॥ ३९७ ॥
पतन्नणं कर्णभूतिर्वीरवृत्त्या व्यरोचत।
तस्य द्वैमातुरो भ्राता तेजःसेनोऽप्यनूनया ॥ ३९८ ॥
तेजःसेनस्तु शूलाग्रे नृपादेशाच्यवेश्यत।
मरिचो लवराजस्य तनूजोऽश्वपतेरपि ॥ ३९९ ॥
अवष्टम्भेन भूपोभून्निग्रहानुग्रहक्षमः।
नयेनासितुमप्यास्था तावदासीन्न तद्बलम्[1] ॥ ४०० ॥
पुरोगोऽपि कृतः पश्चाद्योतीतेहि महीभुजा।
स सज्जपालस्तत्पार्श्वमथादाय ययौ[2] हयान् ॥ ४०१ ॥
तेष्वायातेष्ववष्टम्भं यातं किंचिच्च तद्बलम्।
प्राप्तश्च गर्गसेनानीः सूयाश्वोनलपसैनिकः ॥ ४०२ ॥
दुर्भुक्षून्वीक्ष्य तानाप्तैर्नृपोश्वमधिरोपितः।
उत्सेकशठधीर्वर्म कृच्छ्राच्च परिधापितः ॥ ४०३ ॥
गगनं शलभच्छन्नमिव कुर्वन्नथापतत्।
शरासारो रिपुबलात्सर्वतोच्छिन्नसंततिः ॥ ४०४ ॥
ओंकारं शरशूत्कारैः कृत्वा द्रोहस्य दुःसहाः।
प्राहरन्राजकटके सर्वान्सर्वायुधैर्द्विषः ॥ ४०५ ॥
हतविक्षतविध्वस्तसैन्यः साहसिको नृपः।
वेगादपससारैको मध्यान्निर्गत्य वैरिणाम् ॥ ४०६ ॥
गर्जत्सिन्धुरथाश्रान्तनत्युन्नतिरलङ्घयत।
सवाजिना तेन सेतुर्दुर्लङ्घ्यः पत्रिणामपि ॥ ४०७ ॥

---

१ तद्बले इति स्यात्। २ आययौ इत्युचितम्।

सज्जपालादयो द्वित्राः शेकुस्तमनुवर्तितुम् ।
पृष्ठलग्ना निरुन्धन्तः स्थाने स्थाने विरोधिनः ॥ ४०८ ॥
वीरानकाभिधं वीरः स खशानां निवेशनम् ।
त्रिंशद्भिंशैः समं भृत्यैः प्रविष्टस्तत्यजेरिभिः ॥ ४०९ ॥
निरम्बरैर्निराहारैस्तिष्ठन्कतिपयैः समम् ।
स तत्र चित्रमाक्रम्य निर्भयोदण्डयत्खशान् ॥ ४१० ॥
क्रमेण च हिमापातदुर्लङ्घ्याध्वनि संकटे ।
अविपन्नो भाग्ययोगात्प्रययौ लोहरं पुनः ॥ ४११ ॥
पदे पदे प्राप्तमृत्युरायुःशेषेण रक्षितः ।
तथाप्यासीत्स कश्मीरप्राप्तिमेव विचिन्तयन् ॥ ४१२ ॥
वराकं द्वारसेत्वग्राद्गर्गो हितहितं क्रुधा ।
विरुद्धधीर्वितस्तायां बद्धपाण्यङ्घ्रिमक्षिपत् ॥ ४१३ ॥
तस्मिन्प्राक्षिप्यमाणेप्सु क्षेमाख्यः स्वं क्षिपन्पुरः ।
दासोस्योच्चैः पदारोहमधःपातेपि लब्धवान् ॥ ४१४ ॥
राज्यप्रदः क्षतारिश्च गर्गः प्राप्तोन्तिकं ततः ।
प्राप सङ्कणराजस्य सविशेषमधीशताम् ॥ ४१५ ॥
स भूभृन्मन्त्रिविक्रान्तिहीनो राज्यमवाप्तवान् ।
चक्रभ्रममिवापश्यत्सर्वतो भ्रान्तमानसः ॥ ४१६ ॥
न मन्त्रो न च विक्रान्तिर्न कौटिल्यं न चार्जवम् ।
न दातृता न लुब्धत्वं तस्योद्रिक्तं किमप्यभूत् ॥ ४१७ ॥
तद्राज्ये राजधान्यन्तर्मध्याह्नेपि मलिम्लुचः ।
लोकं मुमुषुरन्याध्वसंचारस्य कथैव का ॥ ४१८ ॥
पङ्गुरप्यङ्गनाकालं क्रान्त्या यत्रात्यवाहयत् ।
पुमानप्यभवत्तत्र साध्वसाध्वस्तधीरसौ[1] ॥ ४१९ ॥

---

१ साध्वसध्वस्तधीः इत्युचितम् ।

यामद्य सह्लणोन्येद्युर्भेजे तां लोठनः स्त्रियम् ।
साधारण्यं गतो राज्यभोग इत्यभवत्तयोः ॥ ४२० ॥
पुरुषान्तरविज्ञानविहीनस्य प्रमाद्यतः ।
सर्वोपि तस्य तत्रश्रैर्व्यवहारो व्यहस्यत ॥ ४२१ ॥
श्वशुरो लोठनस्योजसूहस्तेन व्यधीयत ।
द्वारे तापसगोष्ठीषु योग्यो विक्रमनिष्ठुरे ॥ ४२२ ॥
यः सुस्सलभयोच्छेदमङ्गीकुर्वस्तदागमे ।
स्वमन्त्रलक्षजापेन सिद्धिं मन्त्रक्षणेभ्यधात् ॥ ४२३ ॥
जिह्मो गर्गाज्ञया राजा तदप्रियमपातयत् ।
बद्धाश्मानं वितस्तायां बिम्बं नीलाश्वडामरम् ॥ ४२४ ॥
राजानुग्राहको गर्गस्तांस्तान्व्यापादयन्निपून् ।
हालाहाण्डामरान्भूरीन्दत्तभोज्यानघातयत् ॥ ४२५ ॥
राज्यर्किंचित्करे गर्गायत्तजीवितमृत्यवः ।
बहिश्चाभ्यन्तरे चासन्नलपे वा पृथवोपि वा ॥ ४२६ ॥
कदाचिल्लहराद्गर्गे प्रविष्टेथ नृपान्तिकम् ।
चुक्षोभ नगरे लोकः सर्व एव भयाकुलः ॥ ४२७ ॥
तदा ह्युदचरद्वार्ता शूलान्यारोप्य नौषु यत् ।
क्रुध्यन्गर्गोयमायातो हन्तुं सर्वान्नृपाश्रितान् ॥ ४२८ ॥
गर्भिणीगर्भपातिन्या तादृश्या भयवार्तया ।
द्वित्राण्यहान्यन्वभावि जनैर्ज्वर इवाखिलैः ॥ ४२९ ॥
ततस्तिलकसिंहाद्यैरुद्रेकाद्रागदीयत ।
अनवेक्ष्य नृपादेशमास्कन्दो गर्गमन्दिरे ॥ ४३० ॥
देशश्चात्युल्बणः कृत्स्नो धावति स्म धृतायुधः ।
प्रत्यग्रहीत्तानखिलान्गर्गचन्द्रस्त्वविह्वलः ॥ ४३१ ॥

१ श्रियम् इत्युचितम् ।

निर्लज्जा दिल्हभट्टारलक्कका द्यास्तुरंगमैः ।
भ्राम्यन्तस्तत्राद्दश्यन्त गर्गावसथवीथिषु ॥ ४३२ ॥
निषिषेध न तान्राजा प्रत्युतास्कन्ददायिनाम् ।
लोठनं कुण्ठशक्तीनां तेषां स्फूर्त्यै व्यसर्जयत् ॥ ४३३ ॥
तेनापि योधैर्गर्गस्य रुद्धमार्गेण मन्दिरम् ।
न रुद्धं नापि निर्दग्धुं पारितं दत्तवह्निना ॥ ४३४ ॥
धानुष्कः केशवो नाम मठेशो लोठिकामठे ।
अबाधतैव नाराचैस्तद्योधान्घातयन्परम् ॥ ४३५ ॥
प्रकाशेन समं राजलोके विरलतां गते ।
सायं सानुचरो गर्गो हयारूढो विनिर्ययौ ॥ ४३६ ॥
समरैरप्रतिहतो निनाय लहरं व्रजन् ।
बद्धोजसूहमस्वस्थमासीनं त्रिपुरेश्वरे ॥ ४३७ ॥
तापसेन किमेतेनेत्युक्त्वान्येद्युर्मुमोच तम् ।
तं सुस्सलेपि विधुरे नृपतिं नोदपाटयत् ॥ ४३८ ॥
क्षणे क्षणे भवद्देशस्ततः प्रभृति सर्वतः ।
गर्गागमनसंत्रस्तपौरार्गलितमन्दिरः ॥ ४३९ ॥
अथार्तस्य महीभर्तुर्गर्गसंधानमिच्छतः ।
महत्तमः सहेलोभूल्लहरे दूत्यमाचरन् ॥ ४४० ॥
तेनाङ्गीकारितो गर्गः कथंचित्कन्यकार्पणम् ।
भृत्यास्तु तेन संबन्धं नैच्छन्भूतस्य भूपतेः ॥ ४४१ ॥
ततः सुस्सलदेवेन सह संधिं निबद्धवान् ।
पश्चात्संप्रार्थ्यमानोपि संबन्धं न व्यधत्त सः ॥ ४४२ ॥
मण्डले विशरारुत्वमेवं याते नृपोब्रवीत्[1] ।
सङ्गं हंसरथं नोनरथं चासादितांश्चरैः ॥ ४४३ ॥

---

१ नृपोवधीत् इति स्यात् ।

तानग्निकणसूच्यादिप्रवेशै·····र्जनः ।
अत्यक्तानसुभिर्घोरामवस्थामन्वबीभवत् ॥ ४४४ ॥
भोगसेनाङ्गनां मल्लामनुमेने स यन्नृपः ।
अनुसर्तुं पतिं छन्नं वसन्तीं साधु तद्व्यधात् ॥ ४४५ ॥
तादृग्दृष्ट्वापि वैक्लव्यं शङ्कितेन तदन्तरे ।
प्रमिम्ये दिल्लभट्टारो रसदानेन भूभुजा ॥ ४४६ ॥
न राजबीजी नोच्चण्डविक्रमो वा बभूव सः ।
शमितो गूढदण्डेन यत्तथा तेन पापिना ॥ ४४७ ॥
तं या निनिन्दानिष्पन्नपौरुषं तत्स्वसुस्तदा ।
तस्या वह्निप्रवेशेन सिद्धं मानवतीव्रतम् ॥ ४४८ ॥
सोल्पोपि राज्यकालोभूदेवमातङ्कदुःसहः ।
दीर्घक्षपादृश्यमानदीर्घदुःस्वप्नसंनिभः ॥ ४४९ ॥
कालवित्सुस्सलो गर्गाद्बद्धसंधिरपि त्रसन् ।
न्ययुङ्क्ताग्रे सज्जपालं काश्मीरौन्मुख्यभाक्कृतः ॥ ४५० ॥
द्वारेण सह दत्तार्थो लक्कः सल्लभूभुजा ।
वराहमूलं संप्राप कथंचित्प्रस्थितिं भजन् ॥ ४५१ ॥
गर्गः स्मरन्नवस्कन्दं पश्चादभ्येत्य नाशयन् ।
वराहमूलेन समं तस्य सैन्यमलुण्ठयत् ॥ ४५२ ॥
विदद्रौ स तु तद्योधैर्हतैश्च परिषस्वजे ।
अदिव्यैर्मेदिनी दिव्यैर्देहैस्त्वप्सरसां गणः ॥ ४५३ ॥
नायके गलिते शुद्धवृत्तैः सद्वंशजैर्महो ।
पतितै रुप्पछुड्डाद्यैर्भूषिता मौक्तिकैरिव ॥ ४५४ ॥
आगच्छता छिन्नभीतिः सज्जपालेन लक्कः ।
निराश्रयः संप्रपेदे पार्श्वं सुस्सलभूपतेः ॥ ४५५ ॥

सोथ भूभृत्सज्ञपाले दूरं क्रान्तरिपौ गते ।
आजगामान्तिकं प्राप्तैः प्रेरितः पौरडामरैः ॥ ४५६ ॥
संधिं तव विधास्यामि सार्धं सुस्सलभूभुजा ।
इत्युक्त्वा सह्लणं प्रायात्तदभ्यर्णं सहेलकः ॥ ४५७ ॥
काङ्क्षिताभ्युदयं पौरैश्चातकैरिव वारिदम् ।
अशिश्रियन्नाजवर्जं सर्व एवोच्चलानुजम् ॥ ४५८ ॥
गर्गस्य गृहिणी छुड्डाभिधानाथ तदन्तिकम् ।
कन्यकाद्वयमादाय परिणेतुमुपाययौ ॥ ४५९ ॥
उपयेमे स्वयं राजा राजलक्ष्म्यभिधां ततः ।
गुणलेखां स्नुषात्वेन स्वीचक्रे तद्यवीयसीम् ॥ ४६० ॥
सह्लणे सानुजेभ्येत्य सज्ञपालेन वेष्टिते ।
राजापि राजसदसः सिंहद्वारं समासदत् ॥ ४६१ ॥
साक्षाद्विरोधिभृत्येन द्वारमेकेन पातितम् ।
अभून्मोघं तमप्राप्य सार्धं वैरिमनोरथैः ॥ ४६२ ॥
ससैन्येर्गलितद्वारराजवेश्मस्थिते रिपौ ।
गर्गास्कन्दविशङ्क्यासीच्चकितं सौस्सलं बलम् ॥ ४६३ ॥
गर्गे वितीर्णकन्येपि राजसैन्यमविश्वसत् ।
तस्थौ स्थातव्यमित्येव तृणस्पन्देपि शङ्कितम् ॥ ४६४ ॥
अस्ताभिलाषिणि दिने तादृक्त्रासहते बले ।
स्नेहाददहति क्ष्मापे दुर्भेदौकःस्थितान्रिपून् ॥ ४६५ ॥
प्रविश्य ग्रामनिर्भुग्नकवाटेन तमोरिणा ।
द्वारं विवृत्त्याङ्गनस्थैः सज्ञपालोग्रहीद्रणम् ॥ ४६६ ॥
युग्मम् ॥
तस्य निश्चित्य पातंगीं वृत्तिं भूयस्यरिव्रजे ।
अनुप्रवेशं विदधे पदातिर्लक्कनामभिधः ॥ ४६७ ॥

दरदानयने काष्ठवाटसंकटविक्रमे ।
यस्तस्य सदृशो योधः प्रतिबिम्ब इवाभवत् ॥ ४६८ ॥
स केशवश्च स मठाधीशस्तमनुसस्रतुः ।
शैनेयमारुती पार्थमिव प्रार्थितसैन्धवम् ॥ ४६९ ॥
निर्गत्य मण्डपाल्लग्नप्रहारैस्तैः कथंचन ।
विवृते प्राङ्गनद्वारे धीरो राजाविशत्स्वयम् ॥ ४७० ॥
निर्विभागे वर्तमाने संगरे सैन्ययोर्द्वयोः ।
प्राङ्गने प्रमयं प्रापुर्भूयांसस्तत्र शस्त्रिणः ॥ ४७१ ॥
सचिवः सह्वराजस्य पतंगग्रामजो द्विजः ।
आजौ प्रापाज्जको नाम स्वःस्त्रीसंभोगभागिताम् ॥ ४७२ ॥
कायस्थेनापि रुद्रेण लब्ध्वा गज्ञाधिकारताम् ।
स्वामिप्रसादः साफल्यं निन्ये त्यक्त्वा तनुं रणे ॥ ४७३ ॥
सायं वनस्पतिर्लीनैः खगैर्वाचालितो यथा ।
ग्राव्णि प्रविष्टे प्रोड्डीननिःशब्दविहगोभवेत्[1] ॥ ४७४ ॥
आयोधनोर्वी वाचाला चक्रे चित्रार्पितेव सा ।
तथा सुस्सलभूपेन तुरंगस्थेन तर्जिता ॥ ४७५ ॥
अनारूढेङ्गनान्तःस्थे तस्मिन्सिंहासनं ध्वनिः ।
सुस्सलो जयतीत्येवं ढक्कावाद्यं च शुश्रुवे ॥ ४७६ ॥
मल्लराजगृहे तादङ्नान्यस्याप्युदपद्यत ।
अगातां तत्र वैक्लव्यं यादृक्सह्वणलोठनौ ॥ ४७७ ॥
आबद्धकवचावश्वारूढावालिङ्ग्य सुस्सलः ।
बालौ युवामिति वदन्धूर्तोत्याजयदायुधम् ॥ ४७८ ॥
आदिश्य मण्डपेन्यस्मिन्बद्धयोश्च स्थितिं तयोः ।
प्राप्तराज्यस्ततो राजा विवेशास्थानमण्डपम् ॥ ४७९ ॥

---

१ भवेत् इत्युचितम् ।

त्र्यहोनांश्चतुरो मासान्भुक्तराज्यं बबन्ध तम् ।
सितस्य सोष्टाशीतेब्दे राधस्य त्रितयेहनि ॥ ४८० ॥
तेन सिंहासने क्रान्ते भास्वतेव नभस्तले ।
क्षणादेवाखिलो लोकः क्षोभमब्धिरिवात्यजत् ॥ ४८१ ॥
विकोशशस्त्रः सन्द्रोहावेक्षणक्षोभतः सदा ।
व्याधलोके व्यात्तवक्त्रो मृगराज इवाभवत् ॥ ४८२ ॥
भ्रातृद्रुहां कुलच्छेदमन्विष्यान्विष्य कुर्वता ।
न तेन नीतिनिष्ठेन शिशवोप्यवशेषिताः ॥ ४८३ ॥
जनस्य वीक्ष्य दौर्जन्यमधृष्टाकारतां वहन् ।
स कार्यापेक्षयाप्यासीन्न क्वाप्याहितमार्दवः ॥ ४८४ ॥
वस्तुतस्त्वार्द्रहृदयः क्रूरं दमयितुं जनम् ।
अवास्तवं तद्भीमत्वाद्भित्तिव्याल इवादधे[1] ॥ ४८५ ॥
कालवित्समयत्यागी प्रगल्भः प्रतिभानवान् ।
इङ्गितज्ञो दीर्घदृष्टिः स एवान्यो न कोप्यभूत् ॥ ४८६ ॥
अधिकः कोपि कोप्यूनः कोपि तस्य समो गुणः ।
दोषोथ वा पूर्वजस्य स्वभावैक्येप्यदृश्यत ॥ ४८७ ॥
अन्वकारि समानेपि कोपे तत्पूर्वजन्मनः ।
कोपेन विषमालर्कं तदीयेन तु सारघम् ॥ ४८८ ॥
न बभूव स वेषादौ सासूयोनुचितं पुनः ।
स्थितिभेदभयात्सेहे नोत्सेकमनुजीविनाम् ॥ ४८९ ॥
नैच्छत्स द्वन्द्वयुद्धादिसंधानैर्मानिनां वधम् ।
तस्मिन्प्रमादान्निर्व्यूढे त्वदीयत कृपाकुलः ॥ ४९० ॥
वाक्पारुष्यं नृपस्यासीदाद्यस्यातङ्कदुःसहम् ।
तस्य तु प्रणयप्रायं हिंसाद्याबाधवर्जितम् ॥ ४९१ ॥

---

१ तद्भीमत्वं इत्युचितम् ।

तस्यार्थगृध्नोरुत्पादो भूयानास्ते स्म संपदाम् ।
त्यागो विषयकालादिनैयत्या तु मितोभवत् ॥ ४९२ ॥
नवकर्माश्ववाहुल्यप्रिये तस्मिन्दरिद्रताम् ।
तत्यजुः कारवो वाजिविक्रेतारश्च दैशिकाः ॥ ४९३ ॥
दुःसहव्यसनोत्पत्तौ जिगीषोः प्रशमैषिणः ।
तस्यासीदपरित्याज्यं न किंचिद्वसुवर्षिणः ॥ ४९४ ॥
तस्येन्द्रद्वादशी भूरिपरार्ध्यांशुकदायिनः ।
यथा नृपस्य शुशुभे तथा नान्यस्य कस्यचित् ॥ ४९५ ॥
यथा प्रागुच्चलो राजा सुप्रापः प्रियसेवकः ।
स तथा सेवकैरासीद्भूम्ना दुर्लभदर्शनः ॥ ४९६ ॥
नोच्चलादपरस्यासीद्व्यसनं हयवाहने ।
नान्यस्य सुस्सलनृपाद्दाक्ष्यं तत्र च पप्रथे ॥ ४९७ ॥
शममुत्पन्नमुत्पन्नं निन्ये दुर्भिक्षमुच्चलः ।
राज्ये सुस्सलदेवस्य न तत्स्वप्नेप्यदृश्यत ॥ ४९८ ॥
किमन्यदखिलैः सोभूदग्रजादधिको गुणैः ।
त्यक्त्वा त्यागार्थनैस्पृह्यसुप्रापत्वानि केवलम् ॥ ४९९ ॥
औच्चलेः पालको गर्गो यं राज्ये कर्तुमैहत ।
सहस्रमङ्गलस्तेन निरवास्यत स क्रुधा ॥ ५०० ॥
तस्मिन्भद्रावकाशस्थे प्रासनामा तदात्मजः ।
काश्चनोत्कोचदश्चक्रे डामरैः सह चाक्रिकम् ॥ ५०१ ॥
असंत्यजन्नुच्चलजं पितृव्येणार्थितं शिशुम् ।
प्रसङ्गे तत्र गर्गोपि प्रातिकूल्यमदर्शयत् ॥ ५०२ ॥
प्रहितानां नरेन्द्रेण तृणानामिव शस्त्रिणाम् ।
गर्गदावाग्निदग्धानां निःसंख्यानामभूत्क्षयः ॥ ५०३ ॥

गर्गस्यालोपि विजयः स देवसरसोद्भवः ।
प्रातिलोम्येन नृपतिसैन्यानां कदनं व्यधात् ॥ ५०४ ॥
राज्यप्राप्तेर्मासमात्रे दिनैरभ्यधिके गते ।
तेनोत्पिञ्जेन राज्ञोभून्न धीरस्याकुलं मनः ॥ ५०५ ॥
सुरेश्वर्यमरेशोर्वीवितस्तासिन्धुसंगमाः ।
गर्गेण राजसैन्यानां कृताः कदनकाङ्क्षिणः ॥ ५०६ ॥
संग्रामे तुमुलेमार्त्यौ शृङ्गारकपिलौ हतौ ।
कर्णशूद्रकनामानौ तन्त्रिणौ च सहोदरौ ॥ ५०७ ॥
निहतानन्तसुभटसमूहान्तरलक्षितान् ।
तादृशानपि निष्कर्षुं नासीत्कस्यापि पाटवम् ॥ ५०८ ॥
हर्षमित्रः[1] कम्पनेशो भूभर्तुर्मातुलात्मजः ।
विजयेन हतानीको विदधे विजयेश्वरे ॥ ५०९ ॥
पुत्रो मङ्गलराजस्य तिह्लो राजन्यवंशजः ।
तत्र तिग्धाकरमुखास्तन्त्रिणश्च प्रमिम्यिरे ॥ ५१० ॥
राजानीके सज्जपालः प्रवीरप्रवरोभवत् ।
भूरिसैन्येन गर्गेण नाल्पसैन्योपि यो जितः ॥ ५११ ॥
संस्तम्भ्य विजयक्षेत्रे लक्ककाद्यैर्विसर्जितैः ।
धीरो राजा बलं भग्नं स्वयं गर्गोन्मुखं ययौ ॥ ५१२ ॥
सोन्विष्य गर्गेण हतान्योधान्राशीकृतान्बहून् ।
निरदाहयदन्येद्युरसंख्येयैश्चितान्निभिः ॥ ५१३ ॥
बलिना भूभुजा गर्गः पीड्यमानः शनैःशनैः ।
ततः स्ववसतीर्दग्ध्वा फलाहाभिमुखोभवत् ॥ ५१४ ॥
स तत्र रत्नवर्षाख्यं गिरिदुर्गं समाश्रितः ।
हृताश्वोनुचरैस्त्यक्तो नृपेणारादवेष्ट्यत ॥ ५१५ ॥

---

१ हर्षमित्तं इति स्यात् ।

अन्वारूढेन तत्रापि सज्जपालेन वेष्टितः ।
चरणौ शरणीचक्रे राज्ञो दत्त्वोच्चलात्मजम् ॥ ५१६ ॥
अन्तिकस्थं नृपे कर्णकोष्टजं मल्लकोष्टकम् ।
विरुद्धं रुद्धवत्याशु गर्गो विश्वासमाययौ ॥ ५१७ ॥
गृहीतप्रणतिस्तस्य नष्टेषु विजयादिषु ।
शमितोपप्लवो राजा विवेश नगरं शनैः ॥ ५१८ ॥
गत्वाथ लोहरे न्यस्य बद्ध्वा सह्लणलोठनौ ।
स कह्लसोमपालाद्यै रेमे संसेवितो नृपः ॥ ५१९ ॥
भूयः प्रविष्टः कश्मीरान्सेव्यः सर्वातिशायिभिः ।
गर्गे प्रसादैरनयत्प्रवृद्धिमधिकाधिकैः ॥ ५२० ॥
ग्रीष्मार्कप्रतिमे तस्मिन्ह्लादिनावनुचक्रतुः ।
महादेवी कुमारश्च द्रुमच्छायावनानिलौ ॥ ५२१ ॥
डामरौ देवसरसोद्भवौ विजयगोत्रिणौ ।
बृहट्टिक्कस्तथा सूक्ष्मटिक्को वेलां प्रचक्रतुः ॥ ५२२ ॥
सानाथ्यकाङ्क्षिणौ पार्थिवस्य प्रविशतः पुरः ।
लोकपुण्ये तस्थतुस्तौ क्रन्दद्भिः स्वानुगैः समम् ॥ ५२३ ॥
विजये गर्गसंबन्धात्सदाक्षिण्यो महीपतिः ।
सदाचारं परित्यज्य वेत्रिभिस्तावताडयत् ॥ ५२४ ॥
तौ मानिनश्च तद्भृत्याः कृष्टशस्त्रास्ततो व्यधुः ।
साहसं सुमहत्सैन्ये प्रहरन्तो महीपतेः ॥ ५२५ ॥
श्वपाको भोगदेवाख्यः कृपाण्या प्राहरन्नृपम् ।
धीरो गज्जकनामा च करवालेन पृष्ठतः ॥ ५२६ ॥
सावशेषतया भूपस्यायुषो मोघतां ययुः ।
द्विषत्प्रहृतयो वाहतुरगी तु व्यपद्यत ॥ ५२७ ॥

नृपस्यान्तरयन्वैरिप्रहर्तिं बाणवंशजः ।
निहतस्तत्र शृङ्गारसीहः सादी शसस्यकः ॥ ५२८ ॥
सैनिकैस्तैर्बृहट्टिक्काभोगदेवादयो हताः ।
सूक्ष्मटिक्कस्तु निस्तीर्णो हेतुर्भाविनि विप्लवे ॥ ५२९ ॥
शूले व्यापादिता गज्जकादयो द्रोहसंश्रिताः ।
संदेहितासुरित्यासीद्राजा गर्गानुकूल्यभाक् ॥ ५३० ॥
न भवेत्पविपातेपि प्रमयः समयं विना ।
प्रसूनमप्यसून्हन्ति जन्तोः प्राप्तावधेः पुनः ॥ ५३१ ॥
ज्वालाभिरौर्वदहनस्य पयोधिमध्ये
न म्लानतामपि हि यानि मुहुः स्पृशन्ति ।
तान्येव यान्ति विलयं किल मौक्तिकानि
कान्ताकुचेषु युवभावभुवोष्मणापि ॥ ५३२ ॥
प्राक्सेवामपि विस्मृत्य परोत्सेकासहिष्णुना ।
मण्डलात्सज्जपालाद्या निरवास्यन्त भूभुजा ॥ ५३३ ॥
संबन्धी काकवंश्यानां यशोराजाभिधस्ततः ।
सहस्रमङ्गलाभ्यर्णं राज्ञा निर्वासितो ययौ ॥ ५३४ ॥
तमन्यांश्च विनिर्यातान्देशाद्भृङ्गन्समृद्धिमान् ।
ऐच्छल्लब्धप्रतिष्ठः स राज्ञः प्रत्यभियोगिताम् ॥ ५३५ ॥
तत्पुत्रः कान्दमार्गेण विविक्षुः क्ष्मापसैनिकैः ।
यशोराजे क्षते प्रासः प्रत्यावृत्त्य ययौ भयात् ॥ ५३६ ॥
अथान्येष्वपि भृत्येषु राज्ञा निर्वासितेषु सः ।
मीलितेषु प्रथां यावद्यथावदुपलब्धवान् ॥ ५३७ ॥
उपरागे नवे सज्जे पार्वतीयास्त्रयो नृपाः ।
चाम्पेयो जासटो वज्रधरो वल्लापुराधिपः ॥ ५३८ ॥

राजा सहजपालश्च वर्तुलानामधीश्वरः।
युवराजौ त्रिगर्तोर्वीवल्लापुरनरेन्द्रयोः ॥ ५३९ ॥
बल्ह आनन्दराजश्च पञ्च संघटिताः क्वचित्।
प्रस्थानार्थं कृतपणाः कुरुक्षेत्रमुपागताः ॥ ५४० ॥
आसमत्याहृतं तावदभ्येत्य नरवर्मणः।
प्रापुर्भिक्षाचरं तेन दत्तपाथेयकाञ्चनम् ॥ ५४१ ॥
कुलकम् ॥
स जासटेन संबन्धिस्नेहाद्धितसत्कृतिः।
नीतोन्यैश्च प्रथां भूपैर्वल्लापुरमथाययौ ॥ ५४२ ॥
देशाद्विनिर्गतैर्बिम्बप्रमुखैर्वर्धितप्रथे।
तस्मिन्प्राप्ते सहस्रस्य प्रतिष्ठा लघुतामगात् ॥ ५४३ ॥
पौत्रोयं हर्षदेवस्य क एते राज्य इत्यथ।
उक्त्वा त्यक्त्वा सहस्रादींस्तमेवाशिश्रियज्जनाः ॥ ५४४ ॥
कृतज्ञभावमुत्सृज्य संबन्धिस्नेहमोहितः।
दर्यको राजपुत्रस्तं राज्ञानिर्वासितोप्यगात् ॥ ५४५ ॥
पुत्रः कुमारपालस्य तत्पितुर्मातुलस्य सः।
वृद्धिं सुस्सलदेवेन पुरा निन्ये हि पुत्रवत् ॥ ५४६ ॥
प्रेरितो युवराजेन जासटेन च कन्यकाम्।
वल्लापुरेशः प्रददौ भिक्षवेथ स पद्मकः ॥ ५४७ ॥
तद्देशठक्कुरो भूपान्संघटय्याखिलांस्ततः।
तमैच्छद्वयपालाख्यः कर्तुं पैतामहे पदे ॥ ५४८ ॥
तां वार्तां श्रुतवान्राजा यावदासीत्समाकुलः।
गयपालो हतस्तावद्गोत्रजैश्छद्मना बली ॥ ५४९ ॥
पद्मके तान्प्रतिगते योद्धुं प्रधनमध्यगः।
भिक्षाचरचमूधुर्यो दर्यकोपि व्यपद्यत ॥ ५५० ॥

तेन प्रधाननाशेन ततो भिक्षाचरो ययौ ।
अकिंचित्करतां मेघ इवावग्रहवारितः ॥ ५५१ ॥
आसमत्यां प्रयातायां क्षीणे पाथेयकाञ्चने ।
श्वशुरोपि ययौ तस्य शनैर्मन्दोपचारिताम् ॥ ५५२ ॥
चतुष्पञ्चानि वर्षाणि तिष्ठञ्जासटमन्दिरे ।
ग्रासाच्छादनमात्रं स ततः क्लेशात्समासदत् ॥ ५५३ ॥
ठक्कुरो देङ्गपालोथ चन्द्रभागातटाश्रयः ।
दत्त्वा सुतां वप्पिकाख्यां तं निनाय निजान्तिकम् ॥५५४॥
प्राप्तसौख्यो वसंस्तत्र कंचित्कालं भयोज्झितः ।
स राजवीजी दैन्येन शैशवेन च तत्यजे ॥ ५५५ ॥
तदन्तरे साहसिकः प्रासः साहसिरुन्मदः ।
गतागतानि कुर्वाणः संरम्भमनयन्नृपम् ॥ ५५६ ॥
स सिद्धपथमार्गेण विविक्षुर्विप्लवोन्मुखः ।
स्वैरेव भृत्यैर्भूभर्तुर्बद्ध्वा पापैः समर्पितः ॥ ५५७ ॥
तत्रोत्पिञ्जे परं सत्त्वं सज्जपालस्य पप्रथे ।
खिन्नोपि द्रोहविमुखो यत्स देशान्तरं ययौ ॥ ५५८ ॥
तस्मिञ्शूरे कुलीने च किं वाच्यं स दिगन्तरे ।
शौर्येणैव यशोराजः पप्रथे यत्तदद्भुतम् ॥ ५५९ ॥
अथ राजा निवार्याद्यान्सहेलादीन्महत्तमान् ।
सर्वाधिकारे विदधे कायस्थं गौरकाभिधम् ॥ ५६० ॥
स तापसस्य संबन्धी कस्यचिद्विजयेश्वरे ।
सेवया लोहरस्थस्य तस्य वाल्लभ्यमाययौ॥ ५६१ ॥
शमिते पूर्वकायस्थवर्गे तेन ततः क्रमात् ।
नीतः सर्वाधिकारित्वं सोन्यामेव स्थितिं व्यधात् ॥ ५६२ ॥

अशेषकर्मस्थानेभ्यो वृत्तिं राजोपजीविनाम् ।
निर्वादकोशभरणं तेनाकार्यनिशं प्रभोः ॥ ५६३ ॥
अदिन्ना पाप्मिनस्तस्य नाशायि क्रूरता जनैः ।
मधुरिम्णा विषस्येव शक्तिः प्राणापहारिणी ॥ ५६४ ॥
न्यधात्कृपणवित्तं स पूर्वसंचितनाशकृत् ।
विशुद्धे नृपतेः कोशे हिमे हिममिवाम्बुदः ॥ ५६५ ॥
कोशः कृपणवित्तेन प्रविष्टेन हि दूषितः ।
भुज्यते भूमिपालानां तस्करैरथवारिभिः ॥ ५६६ ॥
लोभाभ्यासेन भूयोपि संचिन्वन्कोशमन्वहम् ।
आस्ते स्म लोहरगिरौ प्रहिण्वन्सर्वसंपदः ॥ ५६७ ॥
गौरकाश्रयिभिर्वट्टपञ्चकाद्यैर्नियोगिभिः ।
विधीयते स्म निःसारा महोत्पातैरिव क्षितिः ॥ ५६८ ॥
उच्चलक्ष्मापतौ शान्ते मूर्धारूढशिलोपमे ।
अबाधन्त पुनर्लोकं व्याधा इव नियोगिनः ॥ ५६९ ॥
प्रशस्तकलशस्यान्ते तद्भ्रातृतनयः परम् ।
कायस्थः कनको नाम श्लाघ्यामकृत संपदम् ॥ ५७० ॥
नानादिगन्तरायातो दुर्भिक्षपतितो जनः ।
येनाविच्छिन्नसत्रेण शान्तव्यापद्व्यधीयत ॥ ५७१ ॥
संजातमुच्चलस्यान्ते येषां तत्त्वपरीक्षणम् ।
त एव चक्रिरे राज्ञा प्रमत्तेनाधिकारिणः ॥ ५७२ ॥
द्वारे तिलकसिंहः स तादृक्तेन व्यधीयत ।
राजस्थाने च जनकः काणस्तस्य सहोदरः ॥ ५७३ ॥
प्रतापैर्नृपतेस्तीक्ष्णैः करमाक्रान्तमण्डलः ।
जिताद्धाराधिपः सोपि स्वीचकारोरशाधिपात् ॥ ५७४ ॥

---

१ निवार्य इत्युचितम् ।

काकवंश्यस्तु तिलकः क्ष्माभुजा दत्तकम्पनः ।
निन्ये प्रकम्पमहितान्प्रकम्पन इव द्रुमान् ॥ ५७५ ॥
ग्राम्यशस्त्रभृता शेडराजस्थानाधिकारिणा ।
नृपप्रतापैरहिताः सज्जकेनापि निर्जिताः ॥ ५७६ ॥
काकवंशाश्रयात्प्राप्तराजद्वारेण धीमता ।
अट्टमेलकभृत्येनाप्यवापीष्टेन मन्त्रिता ॥ ५७७ ॥
एवं स्वाहंक्रियात्यक्तगुणापेक्षेण मन्त्रिणः ।
कुर्वतोच्चावचांस्तेन कञ्चित्कालोत्यवाह्यत ॥ ५७८ ॥
वितस्तापुलिने सोथ कर्तुं प्रारभतोन्नतम् ।
स्वस्य श्वश्वाश्च पत्न्याश्च नाम्ना सुरगृहत्रयम् ॥ ५७९ ॥
उत्पातवह्निना दग्धो निःसंख्यधनदायिना ।
तेन दिद्दाविहारोपि नूतनत्वमनीयत ॥ ५८० ॥
पुरीमट्टिलिकां जातु स प्रयातोऽन्तिकस्थितैः ।
आप्तैः प्रैर्यत कल्हाद्यैर्गर्गोच्छेदाय भूपतिः ॥ ५८१ ॥
गार्गिः कल्याणचन्द्राख्यस्तानतिक्रम्य हि स्फुरन् ।
मृगयादिक्षणे तेषामसूयामुदपादयत् ॥ ५८२ ॥
सर्वाभ्यधिकसामर्थ्यं तं निग्राह्यं निवेद्य ते ।
नित्योपजपनैर्गर्गे विक्रियामनयन्नृपम् ॥ ५८३ ॥
बद्ध्वा त्वां लोहरे भूभृदिच्छति क्षेतुमित्यथ ।
गर्गः शशङ्के भृत्येन राज्ञा चैकेन बोधितः ॥ ५८४ ॥
ततः स ससुतस्तत्र पलाय्य स्वभुवं ययौ ।
दिनैर्भूपोपि संप्राप्तः प्रविवेश स्वमण्डलम् ॥ ५८५ ॥
अन्योन्यशङ्कया भेदं यातयो राजगर्गयोः ।
चाक्रिकैः कृतसंचारैर्वैरं प्रौढिमनीयत ॥ ५८६ ॥

स्यालं गर्गस्य विजयं स्नेहशेषवशंवदः।
समीपात्सत्यजन्राजा पश्चात्तापेन पस्पृशे॥ ५८७॥
कारायां गर्गशत्रुर्यस्तेन पूर्वं न्यधीयत।
स मल्लकोष्टकस्तस्मिन्कालेमुच्यत बन्धनात्॥ ५८८॥
निबद्धयौनसंबन्धं डामरैरपरैः समम्।
तं कारयित्वा सामर्षो निनाय बलितां नृपः॥ ५८९॥
शनैर्युद्धाय निर्याते राजसैन्येथ पूर्ववत्।
गर्गेण कदनं चक्रे योधानाममरेश्वरे॥ ५९०॥
तत्र सर्वातिशायिन्या वीरवृत्त्या नृपाश्रितः।
शमालाडामरः प्राप प्रथां पृथ्वीहरः परम्॥ ५९१॥
रणे द्वारपतेर्गर्गनिर्जितस्य पलायने।
शौर्यं तिलकसिंहस्य प्राप सर्वोपहास्यताम्॥ ५९२॥
हतशेषाः क्षताः शस्त्रवस्त्रादि त्याजिता भटाः।
तदीया गर्गचन्द्रेण कारुण्यात्केपि रक्षिताः॥ ५९३॥
वह्निसात्क्रियमाणेषु वीरदेहेषु सर्वतः।
राजसैन्ये चिताग्नीनां गणना कापि नाभवत्॥ ५९४॥
कृष्टसैन्येन राज्ञाथ गर्गो निर्दग्धमन्दिरः।
संत्यज्य लहरं प्रायाद्गिरिं धुडावनाभिधम्॥ ५९५॥
गिरिमूलोपविष्टस्य भूपतेः सैनिकैः समम्।
तेषु तेष्वकरोन्नित्यं गिरिमार्गेषु संगरम्॥ ५९६॥
कूटयुद्धैर्नृपानीकं प्रतिरात्र्युपतापयन्।
रणे त्रैलोक्यराजादिप्रमुखांस्तत्रिणोवधीत्॥ ५९७॥
फाल्गुने हिमसंभारभीमे परिमितानुगः।
स धीरो राज्यपि रिपौ न धैर्येण व्ययुज्यत॥ ५९८॥

धैर्यवान्काकवंश्यस्तु तिलकः कम्पनापतिः ।
परं शिखरिशृङ्गस्थं शक्तोभूत्तं प्रधावितुम् ॥ ५९९ ॥
पीडितस्तेन संप्रेष्य स्वभार्यां तनयान्तिकम् ।
निन्येनुकूलतां भूपं प्रसादाच्छादितक्रुधम् ॥ ६०० ॥
गूढमन्युर्नृपः संधिं बद्ध्वा प्रचलितस्ततः ।
तं मल्लकोष्टकं वृद्धिं निनाय न पुनः शमम् ॥ ६०१ ॥
सेहेथ लहरे द्वित्रान्मासानविशदे नृपे ।
स मल्लकोष्टकासह्यस्पर्धां नीचविमाननाम् ॥ ६०२ ॥
तन्मध्ये नृपतिर्गूढं विभेदं तद्बलं नयन् ।
तदीयानकरोद्भृत्यान्कर्णादीन्स्वहितावहान् ॥ ६०३ ॥
स खिन्नो नीचदायादसमशीर्षिकयाथ तैः ।
प्रेरितः पार्थिवाभ्यर्णं सदारतनयोविशत् ॥ ६०४ ॥
स्नातुं प्रवृत्तः पार्श्वस्थं स्नानद्रोण्युपरिस्थितः ।
अथैकदा तमाक्षिप्तशस्त्रमत्याजयन्नृपः[1] ॥ ६०५ ॥
कुर्यादास्थामवष्टम्भे कोन्यः पौरुषगर्वितः ।
आक्षेपसमये सोपि यत्क्लैब्यं भीरुवद्ययौ ॥ ६०६ ॥
उत्खातरोपितनृपः क्व नु सोभिमानः
कार्पण्यभागितरलोकसमा क्व वृत्तिः ।
यद्भावशं नटयति प्रकटं विधातु-
रिच्छैव यत्रगुणपङ्क्तिरिवात्र जन्तुम् ॥ ६०७ ॥
अशकन्युधि ये द्रष्टुमपि तं नास्य ते शठाः ।
केपि राजप्रिया बाहू ग्रन्थिबद्धौ तदा व्यधुः ॥ ६०८ ॥

---

१ तमाक्षिप्तं इति तमाक्षिप्य इति वोचितः पाठः ।

श्रीसंग्राममठाभ्यर्णमन्दिरस्था नृपे स्वयम् ।
संग्रामे प्राङ्गनं[1] युद्धात्कल्याणाद्या व्यरंसिषुः ॥ ६०९ ॥
जीवन्तं पितरं श्रुत्वा विदेहो गर्गनन्दनः ।
सान्त्व्यमानः स्वयं राज्ञा कृच्छ्राच्छस्त्रं समार्पयत् ॥ ६१० ॥
गर्गः सदारतनयो राजौकस्येव भूभुजा ।
उपाचर्यत दाक्षिण्याद्वद्धो भोगैर्निजोचितैः ॥ ६११ ॥
गार्गिः पलाय्य यातोपि चतुष्कं निजमन्दिरात् ।
अवर्णभाजा कर्णेन दृष्ट्वा राज्ञः समर्पितः ॥ ६१२ ॥
रूढच्छन्नप्रकोपस्य प्रसादस्य महीभुजः ।
अन्तःशुद्धिविहीनस्य व्रणस्येव न निश्चयः ॥ ६१३ ॥
दरद्राजे मणिधरे दिदृक्षावागते नृपः ।
तत्संगमाय निर्यातो गर्गे भृत्यैरघातयत् ॥ ६१४ ॥
द्वित्रान्मासान्सोनुभूतकारागारस्थितिर्निशि ।
सत्रा त्रिभिः सुतैः कण्ठबद्धरज्जुर्न्यपात्यत ॥ ६१५ ॥
निष्ठां बिम्बमुखान्निन्ये यथैव स नृपानुगैः ।
तथैव कण्ठबद्धाश्मा सपुत्रोक्षिप्यताम्भसि ॥ ६१६ ॥
तं चतुर्नवते वर्षे हत्वा भाद्रपदे नृपः ।
सुखेच्छुः प्रत्युत प्राप दुःखमुद्भूतविप्लवः ॥ ६१७ ॥
कल्हे कालिंजराधीशे महादेव्याश्च मातरि ।
मल्लाभिधायां शान्तायां स ततोभूत्सुदुःखितः ॥ ६१८ ॥
तन्मध्ये नागपालाख्यः सोमपालस्य सोदरः ।
तेन प्रतापपालाख्ये हते द्वैमातुरेऽग्रजे ॥ ६१९ ॥

---

१ संप्राप्ते प्राङ्गणं इति स्यात् ।

शङ्कितस्तन्निहन्तारं हत्वामात्यं पलायितः ।
त्यक्तस्वदेशः शरणं ययौ सुस्सलभूभुजम् ॥ ६२० ॥
युग्मम् ॥
क्रुद्धः स कारणात्तस्मात्प्रणयं वशवर्तिनः ।
अगृह्णन्सोमपालस्य निश्चिकायाभिषेणनम् ॥ ६२१ ॥
निश्चित्य सर्वोपायानामसाध्यं विधुरं नृपम् ।
स भिक्षाचरमानिन्ये तस्य वल्लापुराद्रिपुम् ॥ ६२२ ॥
निशम्यानीतदायादं तं प्रकोपाकुलो नृपः ।
दत्तास्कन्दोविशत्तीव्रतेजा राजपुरीं ततः ॥ ६२३ ॥
दत्त्वा राज्ये नागपालं सोमपाले पलायिते ।
सप्त मासान्स तत्रासीत्तांस्तान्संत्रासयन्रिपून् ॥ ६२४ ॥
राज्ञां वज्रधरादीनां राजा वज्रधरोपमः ।
सेवावसरदानेन प्रसादविवशोभवत् ॥ ६२५ ॥
भ्रमतां चन्द्रभागादिसरित्तीरेषु सर्वतः ।
तत्सैन्यानां मुखमपि द्रष्टुं शेकुर्न वैरिणः ॥ ६२६ ॥
अग्रगाम्यभवत्तस्य तिलकः कम्पनापतिः ।
पृथ्वीहरो डामरश्च मार्गरक्षणदीक्षितः ॥ ६२७ ॥
धार्मिको नृपतिर्ब्रह्मपुरीं देवगृहांश्च सः ।
मण्डलं[1] द्विषतो रक्षन्प्रपेदे मौलिकं फलम् ॥ ६२८ ॥
तस्येन्द्रविभवस्यान्यत्सामग्र्यं वर्ण्यते कियत् ।
आययावश्वघासोपि सैन्ये यस्य स्वमण्डलात् ॥ ६२९ ॥
तत्र प्रसङ्गे तेन[2] त्रासीभवन्सुजनवर्धनः ।
दूरस्थस्यानयद्रूढिं गौरकस्योपरि क्रुधम् ॥ ६३० ॥

---

१ मण्डले इत्युचितम् । २ तस्य इत्युचितम् ।

राष्ट्रगुप्त्यै स्वयं राज्ञा स्थापितः स स्वमण्डले ।
अज्ञायि पैशुनाशुद्धबुद्धिना निखिलार्थहृत् ॥ ६३१ ॥
तत्संबन्धेन जनकं स निन्दन्नगराधिपम् ।
मनस्तिलकसिंहस्य तद्भ्रातुरुदवेजयत् ॥ ६३२ ॥
हृत्वाधिकारं त्वस्याथ क्रुद्धः पर्णोत्ससंभवम् ।
अनन्ताधिपमानन्दाभिधं द्वाराधिपं व्यधात् ॥ ६३३ ॥
सोमपालादयः श्लाघ्यास्तदा प्रकृतयोभवन् ।
राज्ञस्तथास्थितस्यापि न याः सविधमाययुः ॥ ६३४ ॥
स पञ्चनवते वर्षे वैशाखेथ स्वमण्डलम् ।
[1]प्राविशन्नागपालोपि राज्यभ्रष्टस्तमन्वगात् ॥ ६३५ ॥
दुःसहातङ्कदूतेन लोभेन [2]क्षोभतस्ततः ।
अदण्डयच्च वास्तव्याननयच्चाल्पतां व्ययम् ॥ ६३६ ॥
निवार्य गौरकं कार्यात्कार्यिणस्तत्समाश्रितान् ।
तस्य दण्डयतः सर्वे विरागं मन्त्रिणो ययुः ॥ ६३७ ॥
अकाण्डे व्यवहारेषु स विपर्यासितेष्वभूत् ।
अवसन्नधनो गाढमप्रौढ्यान्नवमन्त्रिणाम् ॥ ६३८ ॥
सौवर्णीरिष्टिकाः कृत्वा प्राहिणोल्लोहरान्तरे ।
काञ्चनाद्रिप्रतीकाशान्स्वर्णराशीनढौकयत् ॥ ६३९ ॥
अथ दण्डयितुं गर्गभृत्यान्[3]दण्डाधिकारिणाम् ।
लहरेकृत गर्गस्य मन्त्रिणं गज्जकाभिधम् ॥ ६४० ॥
तं दण्डभीतैर्गर्गस्य सेवकैराश्रितस्ततः ।
विश्वस्तमवधीत्क्रुध्यञ्छन्ना मल्लकोष्टकः ॥ ६४१ ॥
लहरे विप्लुते राजा द्वैमातुरमथाग्रजम् ।
मल्लकोष्टस्यार्जुनाख्यं बबन्ध सविधस्थितम् ॥ ६४२ ॥

---

१ प्रविशन् इत्युचितम् । २ क्षोभितः इत्युचितम् । ३ दण्डाधिकारिणम् इत्युचितम् ।

हस्तं च सङ्गचन्द्रस्य पुत्रं गोत्रिणमप्यसौ ।
बद्ध्वा व्यधाद्विद्दकाख्यं तस्य तद्भ्रातरं हितम् ॥ ६४३ ॥
पूर्ववैरं स्मरन्सूर्यं सपुत्रं तं परांस्तथा ।
बबन्धानन्दचन्द्रादीन्नीत्युल्लङ्घनमाचरन् ॥ ६४४ ॥
निर्गते लहरं मल्लकोष्टके विद्रुते ततः ।
आरोप्यार्जुनकोष्टं तं शूले कोपाद्व्यपादयत् ॥ ६४५ ॥
निवेश्य सैन्यं तत्राथ प्रविष्टस्य पुरं ययुः ।
डामरा निखिलास्तस्य वैरं विश्वस्तघातिनः ॥ ६४६ ॥
क्रुध्यन्पृथ्वीहरायापि कृतसेवाय मन्त्रिभिः ।
आदिष्टैः कम्पनेशाद्यैरवस्कन्दमदापयत् ॥ ६४७ ॥
कथंचित्स तु निस्तीर्णो जयन्तीविषयौकसः ।
बन्धोः क्षीराभिधानस्य प्रविवेशोपवेशनम् ॥ ६४८ ॥
दिनेऽवन्तिपुरादीनां पुराणामन्तरेण तम् ।
व्रजन्तं विधुरं केचिन्नाशकन्बाधितुं द्विषः ॥ ६४९ ॥
तद्वैधुर्यविधानं तत्प्रजासंहारकार्यभूत् ।
प्रमादाद्भूपतेः क्रुद्धवेतालोत्थापनोपमम् ॥ ६५० ॥
क्षीरोथ तीक्ष्णधीर्वृद्धः सह पृथ्वीहरेण सः ।
अढौकयच्छमाङ्गासान्तरेष्टादश डामरान् ॥ ६५१ ॥
अभेद्यसंघांस्ताञ्जेतुं निर्यातो विजयेश्वरम् ।
न्ययुङ्क्त भूभृत्संभ्रान्तस्तिलकं कम्पनापतिम् ॥ ६५२ ॥
संग्रामैः खण्डशः कुर्वन् स तानतुलविक्रमः ।
विद्रावयामास रयैः पुरोवायुरिवाम्बुदान् ॥ ६५३ ॥
संमानावसरे तस्य जित्वायातस्य डामरान् ।
प्रवेशं प्रत्युत नृपो न प्रादादवमानकृत् ॥ ६५४ ॥

स भग्नमानो नगरं प्रविष्टे नृपतौ ततः ।
खिन्नः स्ववेश्मन्यवसत्स्वामिकार्ये निरुद्यमः ॥ ६५५ ॥
संप्राप्ताः समशीर्षिकां विसदृशैस्तुल्यैर्निरुद्धोदया
वैरे विद्विषतां कृता धुरि पदं संधौ बहिः स्थापिताः ।
कार्यान्तेऽद्भुतकर्मकौशलकृतावज्ञा विरागस्पृशः
सर्पाकीर्णमिवाशु वेश्म गृहिणो भृत्यास्त्यजन्ति प्रभुम् ६५६
त्यक्तकार्यानुसंधाने तस्मिन्सर्वत्र डामराः ।
संभृतिं विक्रियां निन्युः कृषिं क्षयघना इव ॥ ६५७ ॥
आतङ्कोद्वेजितैर्विप्रैः कृतप्रायैः पुरे पुरे ।
वह्नौ हुताग्निभिर्घोरा कुकीर्तिरुदपद्यत ॥ ६५८ ॥
उपसर्गेण तुरगाः करभाश्च क्षयं गताः ।
न्यवेदयन्मण्डलस्य प्रत्यासन्नमहाभयम् ॥ ६५९ ॥
प्रत्यासन्नाशुभा कम्पं भयेन जनता दधे ।
आसन्नवज्रपतना वातेनेव द्रुमावलिः ॥ ६६० ॥
अथ षण्णवताब्दस्य प्रारम्भे डामरावलिः ।
ऊष्मस्पृष्टा हिमानीव बभूवापतनोन्मुखी ॥ ६६१ ॥
प्रथमं देवसरसाद्विप्लवप्रसरस्ततः ।
मुख्यं व्यथावहो गण्ड इव पाकं व्यदर्शयत् ॥ ६६२ ॥
एककार्यत्वमानीय टिक्कादीन्गोत्रजान्बली ।
स्थामस्थं विजयोभ्येत्य राजानीकमवेष्टयत् ॥ ६६३ ॥
तत्र कायस्थपुत्रोपि स्थामस्थानीकनायकः ।
संरम्भं नागवट्टाख्यः सेहे तस्य चिरं युधि ॥ ६६४ ॥
कथंचिदथ भूपेन प्रार्थितः कम्पनापतिः ।
निर्ययौ स्वामिदौरात्म्यासंस्मृतिश्लथसौष्ठवः ॥ ६६५ ॥

---

१ हुतात्मभिः इत्युचितम् ।

विजयेन समं तस्य बद्धमूलेन संयुगे ।
संदेहं प्राणवृत्तिश्च जयश्रीश्चासकृद्ययौ ॥ ६६६ ॥
प्रवृद्धि मल्लकोष्टेपि प्रयाते लहरान्तरे ।
वैशाखे निर्ययौ राजा ग्रामं थल्योरकाभिधम् ॥ ६६७ ॥
सैनिकाः शत्रुभिस्तस्य भ्रामितास्तत्र रात्रिषु ।
अरतिं निन्यिरे घोरैः स्वप्नैरिव मुमूर्षवः ॥ ६६८ ॥
बाहुमात्रसहायेन सर्वशक्तिमतां वरः ।
येन हर्षनरेन्द्रोपि विधुरेणोदपाट्यत ॥ ६६९ ॥
भूरीन्वाराञ्जितवतो विक्रमेण महीमिमाम् ।
साहसानां न संख्यास्ति जामदग्न्यस्य यस्य वा ॥ ६७० ॥
स संकुचितविक्रान्तिः कालस्य बलवत्तया ।
तत्र भग्नबलोऽकस्माद्ययुज्यत जयश्रिया ॥ ६७१ ॥
ततः पलायिते तस्मिन्नकस्मादेत्य सज्जकम् ।
हाडिग्रामस्थितो वीरं भङ्गं पृथ्वीहरोनयत् ॥ ६७२ ॥
पलायितस्यानुसरंस्तस्य पृष्ठं स निष्ठुरः ।
प्रतापी नगराभ्यर्णे दग्ध्वा नागमठं ययौ ॥ ६७३ ॥
स चान्ये च ततः क्रूरा डामराः सर्वतोनयन् ।
राज्ञो राजाश्रितानां च चरकेभ्यस्तुरंगमान् ॥ ६७४ ॥
निस्त्रिंशतां तीव्रकोपस्ततो भूपः समाश्रयन् ।
अभाग्यभागिनां योग्यामाललम्बे कुपद्धतिम् ॥ ६७५ ॥
नीवीं पृथ्वीहरस्याथ हृत्वा डामरमन्तिकम् ।
पृष्ठन्यस्तार्धि संभोज्यमिव रात्रौ व्यसर्जयत् ॥ ६७६ ॥
विसृज्य भ्रातरं हम्बं विद्दकस्य तथैव सः ।
अन्येषां प्राहिणोत्पार्श्वं भ्रातॄन्पुत्रांश्च विप्लुतः ॥ ६७७ ॥

मातरं जयकाख्यस्य सिफिन्नाग्रामवासिनः ।
विच्छिन्नकर्णघ्राणां च कृत्वाभ्यर्णं व्यसर्जयत् ॥ ६७८ ॥
सपुत्रं सूर्यकं शूलेधिरोप्य नगरेपरान् ।
भूरीन्वध्यानवध्यांश्च क्रोधाक्रान्तो न्यपातयत् ॥ ६७९ ॥
कालस्येवोल्बणस्याथ तस्य सर्वेपि शङ्किताः ।
आभ्यन्तराश्च बाह्याश्च विरागं प्रतिपेदिरे ॥ ६८० ॥
येनैवानीतिमार्गेण हारितं हर्षभूभुजा ।
निन्दन्नप्यादधे तं स राज्ये व्यवहरन्स्वयम् ॥ ६८१ ॥
प्रविष्टानां युद्धे गहनकविकर्मप्रणयिनां
प्रसक्तानां द्यूते नरपतिधुरायां विहरताम् ।
तटस्थत्वे वक्तुं स्खलितमसकृत्सोर्हति परं
प्रयोगे वैकल्यं स्वयमविकलो यो न भजते ॥ ६८२ ॥
तीव्रप्रयत्नो नृपतिस्तत्रापि विहितोद्यमः ।
निनाय मल्लकोष्टादीन्किंचिन्मन्दप्रतापताम् ॥ ६८३ ॥
अथानिनाय विजयो विपलाटाध्वना शनैः ।
नप्तारं हर्षदेवस्य तं भिक्षाचरमन्तिकम् ॥ ६८४ ॥
विविक्षन्देवसरसं कम्पनापतिना ततः ।
विद्राव्यमाणः श्वभ्राग्रात्प्रधावन्सोपतत्क्षितौ ॥ ६८५ ॥
परिज्ञाय हतस्याथ स तस्य विजयी शिरः ।
विससर्जान्तिकं राज्ञः फलं जयतरोरिव ॥ ६८६ ॥
तदप्यत्यद्भुतं कर्म भजन्भूभृत्कृतघ्नताम् ।
न तस्य तुष्टस्तुष्टाव न चकार च सत्क्रियाम् ॥ ६८७ ॥
अवजानञ्जघानामुं शुभ्राख्यः कम्पनापतिः ।
तत्र कस्मात्तवोत्सेक इति तं संदिदेश च ॥ ६८८ ॥

सर्वप्रकारं तिलकः कृतघ्नं नृपतिं विदन् ।
अथ जातविरागः स द्रोहौन्मुख्यं समादधे ॥ ६८९ ॥
सतां स्यादनुपालभ्यो भजेद्वैमुख्यमेव चेत् ।
द्रोहेच्छया स तु तया ययावग्राह्यनामताम् ॥ ६९० ॥
नेयाशयित्वमथवोचितकृत्यकृत्त्वं
नीतिप्रियाः प्रतिपदं समुदाहरन्तु ।
मानोन्नतास्तु विहितस्तुतयः कृतज्ञै-
स्त्यक्त्वाप्यसून्परहितं घटयन्ति सन्तः ॥ ६९१ ॥
पटं वह्निस्पर्शज्वलितमहिदष्टां त्वचमरेः
श्रुतिं यातं मन्त्रं पतननिरतां जीर्णवसतिम् ।
असेवाज्ञं भूपं व्यसनविमुखं स्निग्धमजह-
न्न धीरोप्युत्थानोपहतमहिमा शर्म लभते ॥ ६९२ ॥
इत्युपायं परित्यज्य न्याय्यं ये प्रभवे क्रुधि ।
द्रोग्धारः कथितास्तेभ्यः केन्ये पापीयसां धुरि ॥ ६९३ ॥
[1]जन्मन्येकोपकारित्वं पित्रोः सर्वत्र च प्रभोः ।
अधिकाः पितृघातिभ्यः पापिनः स्वप्रभुद्रुहः ॥ ६९४ ॥
निहते विजये शान्तप्रभावेष्वपरेष्वपि ।
नाशायि कस्यचित्स्वास्थ्यं तत्त्वज्ञेनान्तरात्मनः[2] ॥ ६९५ ॥
कंचित्क्षणं सोपसृतः प्रत्युतोग्रोपतापकृत् ।
विप्लवप्रसरो ज्ञातः सर्वैर्हुड इवोन्मदः ॥ ६९६ ॥
आनिनीषुस्ततो मल्लकोष्ठं[3] भिक्षाचरं पुनः ।
विषलाटां तस्य पार्श्वे निजं सैन्यं व्यसर्जयत् ॥ ६९७ ॥

---

१ जन्मन्येवोपकारित्वं इत्युचितम् । २ अन्तरात्मना इत्युचितम् । ३ मल्लकोष्ठो इति स्यात् ।

कम्पनेशस्तमायान्तं द्रोग्धाप्यावेदयंस्ततः ।
राज्ञा न्यषेधि तद्रोषादेवं च समदिश्यत ॥ ६९८ ॥
एनं वर्त्मन्यनुद्धाते त्यज हन्यामहं ततः ।
पुरोगतं मृगव्यान्तः सृगालमिव वाजिभिः ॥ ६९९ ॥
द्वैराज्यकार्यमर्मज्ञभावेपि विधिचोदितः ।
कर्तव्ये तत्र शाठ्यं स नृपतिः प्रत्यपद्यत ॥ ७०० ॥
मर्मराजमुखादेवं लब्ध्वा द्रोग्धाथ डामरान् ।
तिलकोकारयच्छैलमार्गैर्भिक्षाचरानुगान् ॥ ७०१ ॥
स्थाने स्थाने ततः प्राप ततः कर्णोपकर्णिका ।
जनानां या ख्यातिहेतुर्भिक्षो राज्ञस्तु भीतिदा ॥ ७०२ ॥
नासंस्कृतं वक्ति शिला भिनत्त्येकेषुणा दश ।
अश्रान्तो योजनशतं यात्यायाति च संचरन् ॥ ७०३ ॥
इत्यादि तादृङ्माहात्म्यभिक्षुस्तुत्यानयज्ञनः ।
निखिलान्पलितश्वेतलम्बकूर्चोपि कौतुकम् ॥ ७०४ ॥
भविष्यन्निव साम्राज्यस्यैक एकोर्धभागभाक् ।
वार्तामव्यवहर्तापि भिक्षोरूचेन्वियेष च ॥ ७०५ ॥
सरित्स्नानगृहे स्नान्तो वृद्धाः क्षीणनियोगिनः ।
राजवेश्मन्यगणिता नाममात्रं नृपात्मजाः ॥ ७०६ ॥
स्वभावदुर्जनाः केचिद्योधाश्चोच्चाश्वकाङ्क्षिणः ।
कारयन्तोप्युपाध्यायाः शिष्यान्स्फिक्कषणं नखैः ॥ ७०७ ॥
वृद्धाः सुरौकोनर्तक्यो देवप्रासादपालकाः ।
वणिजो भुक्तनिक्षेपाः पुस्तकश्रुतितत्पराः ॥ ७०८ ॥
प्रायोपवेशकुशलाः पारिषद्यद्विजातयः ।
शस्त्रिणः कार्षकप्राया नगरोपान्तडामराः ॥ ७०९ ॥

सुखयन्तः स्वमन्यांश्च किमप्युत्पिञ्जवार्तया ।
एते प्रायेण देशेस्मिन्पार्थिवोपप्लवप्रियाः ॥ ७१० ॥
कुलकम् ।

प्रवर्धमानया भिक्षाचरागमनवार्तया ।
वेपमानोभवल्लोको ययौ चिन्तां च भूपतिः ॥ ७११ ॥
पृथ्वीहरस्तरुच्छन्ने गिरिकच्छे वसन्नथ ।
राजानीकं बभञ्जाजौ निर्गत्यातुलविक्रमः ॥ ७१२ ॥
अनन्तकाकयोर्वश्यावानन्दद्वारनायकौ ।
चक्रे तिलकसिंहं च मन्त्रिणस्त्रीन्पलायिनः ॥ ७१३ ॥
निहते विजये ज्येष्ठे शुक्लपष्ठ्यां पराभवम् ।
तमाषाढस्य नृपतिः प्राप्याभूद्विवशः पुनः ॥ ७१४ ॥
उट्टीकितैर्गवां वृक्षमूर्धारोहेण भोगिनाम् ।
पिपीलककुलस्याण्डोपसंक्रान्त्येव वर्षणम् ॥ ७१५ ॥
प्रत्यासन्नं स राजाथ दुर्निमित्तैरुपद्रवम् ।
विचिन्त्यायातमुचितं कर्तव्यं प्रत्यपद्यत ॥ ७१६ ॥
तृतीयेह्नि शुचेः शुक्ले ततः प्रास्थापयत्सुतम् ।
देवीमन्यत्कुटुम्बं च स कोटं लोहरं पटुः ॥ ७१७ ॥
ताननुव्रजतस्तस्य सेतुभङ्गात्परिच्युताः ।
लोष्टद्विंजानयो विप्रा वितस्तायां विपेदिरे ॥ ७१८ ॥
स तेन दुर्निमित्तेन खिन्नो हुष्कपुरान्तिकम् ।
अनुगम्याथ तान्द्वित्रैर्दिनैर्भूयोविशत्पुरम् ॥ ७१९ ॥
विना पुत्रेण देव्या च स ततः प्रत्यपद्यत ।
प्रतापेन च लक्ष्म्या च परित्यक्त इवान्यताम् ॥ ७२० ॥

---

१ द्विजातयो इति स्यात् ।

स मन्त्रो व्यापदि शुभः प्रत्यभात्तस्य तद्वशात् ।
अभ्यन्तरप्रकोपेपि सर्वाभ्युदयभागभूत् ॥ ७२१ ॥
स्वयमुत्थापितानर्थः सोपि हर्षनरेन्द्रवत् ।
अद्यापि सान्वयो नीत्या तया साम्राज्यभोगभाक् ॥७२२॥
श्रावणे लाहरैर्योधैरानीय बलशालिनाम् ।
भिक्षुर्मडवराज्यानां डामराणामथार्प्यत ॥ ७२३ ॥
तेपि जन्या इव वरं श्वशुरालयसंनिभम् ।
प्रावेशयंस्तं लहरमनुयान्तः ससैनिकाः ॥ ७२४ ॥
सभाजयित्वा तान्मल्लकोष्टमुख्या निजां भुवम् ।
व्यसर्जयन्कम्पनेशप्रमाथाय पृथुश्रियः ॥ ७२५ ॥
सर्वतः परचक्रेथ पर्यापतति पार्थिवः ।
संग्रहीतुं प्रववृते पदातीनतुलव्ययः ॥ ७२६ ॥
तस्मिन्दुर्व्यसने राज्ञि वसुवर्षिणि सर्वतः ।
अकारि शस्त्रग्रहणं शिल्पिशाकटिकैरपि ॥ ७२७ ॥
नगरे सैन्यपतयः प्रतिमार्गमकारयन् ।
तुरगान्न्यस्तसंनाहान्व्यायामसमरोन्मुखाः[1] ॥ ७२८ ॥
मयग्रामस्थिते भिक्षावमरेश्वरवासिभिः ।
राजसैन्यैः समं युद्धमगृह्णन्नेत्य लाहराः ॥ ७२९ ॥
तैर्हिरण्यपुरोपान्ते प्रबन्धारब्धसंगरैः ।
श्रीविनायकदेवाद्या राजसेनाधिपा हताः ॥ ७३० ॥
आद्य एव रणे यातां राजानीकाद्विरोधिनः ।
लब्ध्वा वराश्वामायातामममन्यन्त नृपश्रियम् ॥ ७३१ ॥
राजधान्यन्तिके क्षिप्तिकाख्यायाः सरितस्तटे ।
पृथ्वीहरश्चकाराजावशेषसुभटक्षयम् ॥ ७३२ ॥

---

१ व्यायामं इत्युचितम् ।

तिलके विजयेशस्थेप्यगृह्णन्नेत्य डामराः ।
महत्सरित्तटे युद्धं खड्गवीहोलडौकसः ॥ ७३३ ॥
ते रुद्धनगरा दाहं क्वापि क्वापि च लुण्ठनम् ।
वास्तव्यानां विदधिरे विनदन्तो दिवानिशम् ॥ ७३४ ॥
निर्यत्सतूर्यपृतनाः प्रविशच्छस्त्रविक्षताः ।
क्रन्दद्धतार्तनिवहाः प्रधावद्भग्नसैनिकाः ॥ ७३५ ॥
प्रसरत्प्रेक्षिनिवहा वहदाशुगभारिकाः ।
संचार्यमाणसंनाहाः कृष्यमाणतुरंगमाः ॥ ७३६ ॥
आसन्नशान्तसंमर्दप्रसरत्पांसवोनिशम् ।
दिने दिने राजपथा उपप्लवविश्रृङ्खलाः ॥ ७३७ ॥
प्रतिप्रत्यूषमायात्सु सर्वारम्भेण वैरिषु ।
अद्य ध्रुवं जितो राजेत्यशायि प्रतिवासरम् ॥ ७३८ ॥
धीरः कः सुस्सलादन्यो न यः प्रत्यभियोगिनाम् ।
कृच्छ्रेणापि स्वराष्ट्रेण क्रष्टुं धैर्यादपार्यत ॥ ७३९ ॥
व्रणपट्टाञ्चनं शल्योद्धारं पथ्यधनार्पणम् ।
शस्त्रक्षतानां सततं कारयन्स व्यलोक्यत ॥ ७४० ॥
प्रवासवेतनप्रीतिदायभैषज्यदत्तिभिः ।
शस्त्रिलोके नरपतेर्निःसंख्योभूद्धनव्ययः ॥ ७४१ ॥
युद्ध एव विपन्नानां क्षतानां च स्ववेश्मसु ।
नित्यं नरतुरंगाणां सहस्राणि क्षयं ययुः ॥ ७४२ ॥
तुरंगबहलैर्हन्यमाना नृपबलैस्ततः ।
लाहरा मल्लकोष्टाद्या मन्दोद्रेकत्वमाययुः ॥ ७४३ ॥
भिन्नैराभ्यन्तरैरेव दत्तमन्त्राः सुरेश्वरीम् ।
ते निन्युर्भिक्षुमल्पेन तन्मार्गेण युयुत्सवः ॥ ७४४ ॥

सेतुना स्वल्पपार्श्वेन धन्विप्रायैः सरोन्तरे ।
अवापि तैर्जयोमोचि वाजिभ्यश्च भयं रणे ॥ ७४५ ॥
द्रोग्धाथ कम्पनेशः स निवसन्विजयेश्वरे ।
बलितां डामरान्निन्ये मन्द्रोद्रेकं स्फुरत्रणे ॥ ७४६ ॥
लवन्यलोको मा शासीदशक्तिं मेथ गच्छतः ।
पृष्ठे निपत्य मा कार्षीद्व्यथां चेति विचिन्तयन् ॥ ७४७ ॥
स प्रभावं दर्शयितुं प्राप्तस्य विजयेश्वरम् ।
अज्ञराजस्य सेनायां व्यावृत्य प्रस्थितोभवत् ॥ ७४८ ॥
सार्धां शतद्वयीं तस्य योधानां हृतवानपि ।
संत्यज्य विजयक्षेत्रं द्रोहकृन्नगरं ययौ ॥ ७४९ ॥
पथि नान्वसरन्भीत्या भयात्तं डामराः क्वचित् ।
नदन्तोद्रिशिरोरूढा मार्गान्सर्वांश्च तत्यजुः ॥ ७५० ॥
त्यक्त्वा मडवराज्यं स प्रविष्टो व्यसनातुरम् ।
पूर्वचेष्टां स्मरन्भूपं जहास कृतसत्क्रियम् ॥ ७५१ ॥
इतरामात्यवत्स्थामस्थितोथ न निजोचितम् ।
रणे प्रादर्शयत्किंचित्साक्षिभूत इव स्थितः ॥ ७५२ ॥
ततो मडवराज्यात्ते समस्ता एव डामराः ।
अभ्येत्य प्रत्यपद्यन्त तां महासरितस्तटीम् ॥ ७५३ ॥
उपायाः सामभेदाद्या रिपुचक्रे प्रयोजिताः ।
राज्ञो विफलतां जग्मुर्बहिरात्तैः प्रकाशिताः ॥ ७५४ ॥
क्रान्ततत्तन्महीपालमण्डलस्यापि भूपतेः ।
फलं दोर्विक्रमस्याग्र्यमासीन्नगररक्षणम् ॥ ७५५ ॥
अमरेशे द्वारपतिः सार्धं तस्थौ नृपात्मजैः ।
राजानवाटिकोपान्ते राजस्थानीयमन्त्रिणः ॥ ७५६ ॥

दूरद्वीपान्तरगता इव स्वीचक्रिरे नृपात् ।
ते प्रवासधनं भूरि न चायुध्यन्त कुत्रचित् ॥ ७५७ ॥
कटका विद्विषां सर्वे पर्यायेण जयाजयौ ।
लेभिरे विजयादन्यन्न तु पृथ्वीहरः क्वचित् ॥ ७५८ ॥
मधुमत्तेन तेनाजौ वेतालेनैव वल्गता ।
प्रायो वरावराः सर्वे ग्रस्ता नृपचमूभटाः ॥ ७५९ ॥
उदयस्येच्छटिकुलोद्भूतस्यैकस्य पप्रथे ।
युवदेश्यस्यापि शौर्यमेकस्मिंस्तु तदाहवे ॥ ७६० ॥
पृथ्वीहरस्यापजह्रे द्वन्द्वयुद्धाभिमानिना ।
प्रहृत्य कृष्टकूर्चेन कराद्येनासिवल्लरी ॥ ७६१ ॥
युद्धे पुरोपकण्ठेषु वर्तमाने शराहताः ।
स्त्रीबालाद्या अपि वधं प्रमादात्प्रतिपेदिरे ॥ ७६२ ॥
एवं जनक्षये घोरे वर्धमाने किमप्यभूत् ।
अनुत्साहान्नृपो गेहादपि निर्गन्तुमक्षमः ॥ ७६३ ॥
तस्मिन्निरुद्धसंचारे सोमपालस्तदन्तरे ।
अलुण्ठयच्चाटलिकां लब्धरन्ध्रो ददाह च ॥ ७६४ ॥
सिंहे गजाहवव्यग्रे तद्बुहाग्रपरिग्रहे ।
समयो ग्रामगोमायोः पौरुषस्यापरोस्तु कः ॥ ७६५ ॥
राष्ट्रद्वयोपमर्देन राजा निःसदृशेन सः ।
तेन त्रपाविधेयोभूत्स्वमपि द्रष्टुमक्षमः ॥ ७६६ ॥
सर्वानौचित्यबहलः सर्वव्यसनदुःसहः ।
सर्वदुःखमयः कालस्तस्यावर्तत कोपि सः ॥ ७६७ ॥
तथाप्यस्खलिते तस्मिन्हितव्याजाद्धितापहः ।
राजानवाटिकाविप्रैः प्रायश्चक्रे विरागिभिः ॥ ७६८ ॥

प्रार्थयन्ते स्म ते युद्धे तटस्थास्तव मन्त्रिणः ।
गृहीत्वा नीविरेतेभ्यो लोहराद्रौ विसृज्यताम् ॥ ७६९ ॥
न चेद्याप्य[1] इवैतस्मिन्व्यसने स्थायितां गते ।
को दध्यान्न[2] परैर्नीतं प्रत्यासन्नं शरत्फलम् ॥ ७७० ॥
न प्रत्यभैत्सीत्ताटस्थ्यं यत्कालापेक्षया नृपः ।
तस्मिंस्तैर्दर्शिते शङ्कां निखिला मन्त्रिणो दधुः ॥ ७७१ ॥
शक्तिस्तृणं कुब्जयितुं न यस्य[3] स तदार्थिभिः ।
विसूत्रव्यवहारत्वं निन्ये राजा शठद्विजैः ॥ ७७२ ॥
कर्मस्थानोपजीव्युग्रपारिषद्यादिसंकुला ।
तत्पार्श्वात्प्रययौ वृद्धिमन्या सेनेव वैरिणाम् ॥ ७७३ ॥
तत्सान्त्वनक्षणे तैस्तैः प्रमादैरुत्थितैरगात् ।
देशो व्याकुलतां कृच्छ्रं लुण्ठिश्चाघटतोत्कटा ॥ ७७४ ॥
अदृष्टपार्थिवास्थानैः शठैरव्यवहारिभिः ।
ऊचे तैः सान्त्वयन्राजा दुःस्थितस्तत्तदप्रियम् ॥ ७७५ ॥
लवन्यविप्लवाद्राज्ञः सोधिको विप्लवोभवत् ।
गलरोगः पादरोगादिव तीव्रव्यथावहः ॥ ७७६ ॥
काञ्चनोत्कोचदानेन तन्मध्येधिकचक्रिकाम् ।
कांचित्स्वीकृत्य स प्रायं कथंचिद्भिन्यवीवरत् ॥ ७७७ ॥
विजयो वर्णसोमादिशस्त्रिवंश्यो हठात्पुरम् ।
प्रविशन्भिक्षुसेनानीरश्वारोहैरहन्यत ॥ ७७८ ॥
तेनातिरभसात्स्थानं भित्त्वा प्रविशता पुरम् ।
प्रायशः कृत एवाभूत्तदा राज्यविपर्ययः ॥ ७७९ ॥

---

१ चेद्याप्य इति स्यात् । २ दद्यान्नः इत्युचितम् । ३ येषां इति स्यात् ।

ईषन्मन्दप्रतापेन नवन्येष्वपि[1] भूपतेः ।
पृथ्वीहरेण संधित्सा भेदेच्छोः संप्रकाशिता ॥ ७८० ॥
तस्मिन्धुर्ये जिगीषूणां संधित्सौ भूभुजा समम् ।
द्वयेपि सैनिकाः शान्तं तममन्यन्त विप्लवम् ॥ ७८१ ॥
राज्ञा नागमठोपान्तमानेतुं प्रहितांस्ततः ।
त्रीनमात्यान्स विश्वस्तानागच्छञ्छद्मनावधीत् ॥ ७८२ ॥
धात्रेयो मम्मको गुङ्गो द्विजो रामश्च वारिकः ।
तेषां तिलकसिंहस्य पार्श्वे भृत्यास्त्रयो हताः ॥ ७८३ ॥
नीविर्दत्तो गौरकस्तु हतो भूतपतिं स्मरन् ।
इष्टे त्वाक्रन्दिनि परैः प्रहृतं करुणोज्झितैः ॥ ७८४ ॥
तद्वैशसं श्रुतवतो देशः सर्वो विरागकृत् ।
राजधान्यन्तरे राज्ञो दुरुक्तिमुखरोभवत् ॥ ७८५ ॥
इषे शुक्लचतुर्दश्यां तद्विपर्यस्तमण्डलम् ।
अतिवाहयितुं कष्टं दिनमासीन्महीपतेः ॥ ७८६ ॥
अथ संजातवैक्लव्यो नेदमस्तीति चिन्तयन् ।
किं कृत्यमित्यसद्दशानपि पप्रच्छ भूपतिः ॥ ७८७ ॥
विषमे वर्तमानस्य तस्य कश्चित्स नाभवत् ।
अन्तर्जहास यो नान्त·····न तुतोष वा ॥ ७८८ ॥
तमपि व्यसनापातं तस्य सोढवतस्ततः ।
अभजन्त क्रमाद्भृत्याः प्रतिपक्षसमाश्रयम् ॥ ७८९ ॥
कम्पनेशस्य बिम्बाख्यो भ्राता द्वैमातुरो हि तान् ।
समाश्रयद्वारकार्यं तद्दत्तं प्रत्यपद्यत ॥ ७९० ॥
गूढं जनकसिंहेन दूतान्प्रेषयतानिशम् ।
भिक्षवे भ्रातृतनया वाग्दत्ता निरवर्त्यत ॥ ७९१ ॥

---

१ लवन्येष्वपि इति स्यात् ।

असिवाजितनुत्रादि हृत्वा भिक्षाचरान्तिकम्।
अश्ववारा व्यभाव्यन्त प्रयान्तः प्रतिवासरम् ॥ ७९२ ॥
किमन्यद्व्यक्तमेवाद्धि येवसन्पार्थिवान्तिके।
अलक्ष्यन्ताग्रतो भिक्षोस्ते निशायां गतत्रपाः ॥ ७९३ ॥
इतो याति ततश्चैति लोको व्यक्तमतन्त्रितः।
इति राजनि कुण्ठाशे कोप्यजृम्भत विप्लवः ॥ ७९४ ॥
डामरैः शरदुत्पत्तौ नीतायां सर्वतस्ततः।
कांदिशीकोभवल्लोकः कृत्स्नो धनजनोज्झितः ॥ ७९५ ॥
प्रयाते सुस्सलनृपे स्वर्णपूर्णामिमां महीम्।
भिक्षुः कुर्यादिति मृषा लोकस्यासीद्विनिश्चयः ॥ ७९६ ॥
क्व दृष्टा त्यागिता भिक्षोः कुतो वा तस्य संपदः।
परामर्ष नैवेति गतानुगतिको जनः ॥ ७९७ ॥
संदृश्यते परिवृता चिरमम्बरेण
रेखा स्वयं न खलु या शशिनो नवस्य।
तस्यां जनः प्रकुरुते नतिमम्बरार्थी
धिग्लुब्धतामपसरत्सदसद्विचाराम् ॥ ७९८ ॥
विजये राजवर्ग्याणां भुग्नग्रीव इवाभवत्।
भिक्षुपक्षजये लोको हृष्यन्नासीद्विशृङ्खलः ॥ ७९९ ॥
द्विजकौलेयकन्यायो राजडामरसंश्रयोः।
ततोन्योन्यभयभ्रश्यद्धैर्योरुदजृम्भत ॥ ८०० ॥
राजाभ्यन्तरभेदेन राज्ञः स्थैर्येण चारयः।
ऐच्छन्पलायितुं भीता अज्ञातान्योन्यनिश्चयाः ॥ ८०१ ॥
बान्धवानपि दुर्भुक्षूनविश्वस्तो विदन्नृपः।
स्थितौ पलायने वापि श्रद्दधे न स्वजीवितम् ॥ ८०२ ॥

तं महाव्यसने वासःस्वर्णरत्नादिवर्षिणम् ।
नाभ्यनन्दन्गृहीतार्था निनिन्दुः शस्त्रिणः परम् ॥ ८०३ ॥
नष्टोयं नैष भवितेत्यभीतेर्जल्पतो जनात् ।
वचो रोगी भिषक्त्यक्त इव शृण्वन्स विव्यथे ॥ ८०४ ॥
अप्यग्रोपस्थितं किंचित्तदादेशेन ढौकयन् ।
सविलासं सगर्वं च तमैक्षिष्टानुगव्रजः ॥ ८०५ ॥
सोन्य एवाभवत्तस्मिन्क्षणे साहसिकोप्यहो ।
स्वगृहादपि निर्गन्तुं नाशकद्यद्भयाकुलः ॥ ८०६ ॥
यावदैच्छन्संघभेदाच्चलितुं डामरव्रजाः ।
स्वैरेव शस्त्रिभिस्तावन्निन्ये भूभृद्विसूत्रताम् ॥ ८०७ ॥
ते कृष्टशस्त्रा द्वाराणि रुन्धन्तो नृपमन्दिरे ।
प्रवासवित्ते लब्धव्ये प्रायं चक्रुः पदे पदे ॥ ८०८ ॥
ददद्धनं धनेशश्रीर्दैयादप्यधिकं नृपः ।
तेषामभिमतो नाभूदवमानाभिलाषिणाम् ॥ ८०९ ॥
मर्तुं चिचलिषुस्तीर्थमृणिकैरिव सामयः ।
स रुद्ध्वा निखिलैर्देयं दापितोथ गतत्रपैः ॥ ८१० ॥
स्थानपालैरपि प्रायकृद्भिराक्रम्य दापितः ।
धनं सुवर्णभाण्डादि चूर्णीकृत्य विश्रब्धलैः ॥ ८११ ॥
सवृद्धबालं नगरं ततः क्षुभ्यत्क्षणे क्षणे ।
सोभूदब्धिमिवोद्वृत्तं न संस्थापयितुं क्षमः ॥ ८१२ ॥
एकदा प्रातरेवान्यै रुद्धद्वारः स शस्त्रिभिः ।
सर्वतः क्षोभमागच्छन्नगरं स व्यलोकयत् ॥ ८१३ ॥
ततः क्षोभं शमयितुं जनकं नगराधिपम् ।
पुरभ्रमार्थमादिश्य चलितुं क्षणमैक्षत ॥ ८१४ ॥

कथंचिद्दानमानाभ्यां तानावर्ज्यापि शस्त्रिणः।
सावरोधः स संनद्धो राजधान्या विनिर्ययौ ॥ ८१५ ॥
अङ्गनात्तुरगारूढो बहिर्यावन्न निर्ययौ।
राजधान्यन्तरे लुण्ठिस्तावत्प्रारम्भि तस्करैः ॥ ८१६ ॥
अरुदन्केपि केप्युच्चैरनदन्केप्यलुण्ठयन्।
तद्भृत्याब्राज्यमुत्सृज्य तस्मिन्व्रजति शस्त्रिणः ॥ ८१७ ॥
विश्रृङ्खलस्त्रपाकोपशङ्काभिः शस्त्रिणां नृपः।
सहस्रैः पञ्चषैरासीद्व्रजन्ननुगतोध्वनि ॥ ८१८ ॥
वर्षे षण्नवते कृष्णषष्ठ्यां मार्गे विनिर्गतः।
याममात्रावशेषेहि सभृत्यो द्रोहविह्वलः ॥ ८१९ ॥
निजैर्हरद्भिरश्वादि त्यज्यमानः पदे पदे।
स प्रतापपुरं प्राप क्षपायामल्पसैनिकः ॥ ८२० ॥
तिलकस्य पुरो गत्वा प्राप्तस्याग्रं च विश्वसन्।
तत्र बन्धोरिवास्रूणि चिरं दुःखोल्बणोमुचत् ॥ ८२१ ॥
द्रोहं न कुर्यादेवं मे चिन्तयित्वेति सत्वरम्।
वेश्म हुष्कपुरेन्येद्युस्तस्य च प्राविशत्स्वयम् ॥ ८२२ ॥
तद्गौरवेण स्नानादि कृत्वैच्छत्सैन्यसंग्रहम्।
प्रविश्य क्रमराज्यं स कर्तुं भूयो[1] जनोत्सुकः ॥ ८२३ ॥
गूढं युयुत्सून्कल्याणवाडादीनथ डामरान्।
आनीय स पुरस्तस्य धैर्यभ्रंशमकारयत् ॥ ८२४ ॥
गृहात्तेन तया युक्त्या निष्कृष्टः स ततो ययौ।
स्वीकुर्वन्स्वर्णदानेन दस्यून्मार्गविरोधिनः ॥ ८२५ ॥
प्रयान्तं तत एवौज्झीत्तिलकस्तत्सहोदरः।
प्रयाणमेकमानन्दो दाक्षिण्यादन्वगात्तु तम् ॥ ८२६ ॥

---

१ भूयोर्जनोत्सुकः इति स्यात्।

भृत्यत्यक्तः स दानेन विक्रमेण च तस्करान् ।
अगान्मार्गेण शमयन्नायुःशेषेण रक्षितः ॥ ८२७ ॥
त्राणं सिंहनखा द्रमाद्रिगहनस्यारादरण्यस्य ये
तेषां बालगलाश्रयादपि भवेत्कालातिवाहः क्रमात् ।
ये दन्ताः करिणां रणप्रहरणं तेप्याप्नुयुर्दीव्यतां
क्रीडायां करताडनानि न दृढा शौर्यस्य रूढिः क्वचित् ८२८
जन्तूनां विक्रमत्यागयशःप्रज्ञादयो गुणाः ।
भवे चित्रस्वभावेस्मिन्न भवेयुरभङ्गुराः ॥ ८२९ ॥
भास्वानप्यौग्र्यमृदुतां भिन्नोवस्थां[1] दिने दिने ।
तां तामायाति जन्तूनां कः प्रभावेषु निश्चयः ॥ ८३० ॥
अशक्नुवन्नट्टलिकामरिप्लुष्टां निरीक्षितुम् ।
मन्युनिःशब्दसैन्योद्रिमारुरोह स लोहरम् ॥ ८३१ ॥
स्वं कलत्रमपि द्रष्टुं तत्रातित्रपयाक्षमः ।
शयनीयविमुक्ताङ्गस्तप्यते स्म दिवानिशम् ॥ ८३२ ॥
दत्तदीपादनिर्गच्छन्नन्तर्गेहाद्दिनेष्वपि ।
दाक्षिण्याद्दर्शनं प्रादाद्भृत्यानां भोजनक्षणे ॥ ८३३ ॥
विलेपनानि नास्प्राक्षीन्नारुरोह तुरंगमान् ।
गीतनृत्तादि नैक्षिष्ट सुखगोष्ठीर्न चादधे ॥ ८३४ ॥
ताम्यंस्ताटस्थ्यमौखर्यतैक्ष्ण्यद्रोहादि दर्शितम् ।
एकेनैकेन च स्मृत्वी स्मृत्वा देव्यै न्यवेदयत् ॥ ८३५ ॥
अन्वगात्स्वां भुवं त्यक्त्वा मामेतेन्वगुरित्यपि ।
निन्ये वृद्धिं परार्ध्यश्रीः स दाक्षिण्याद्धनार्पणैः ॥ ८३६ ॥
कश्मीरेषु गते तस्मिंस्तदैवाखिलमन्त्रिणः ।
पुराणिराजधान्यग्रे[2] ससैन्याः समगंसत ॥ ८३७ ॥

---

१ भिन्नावस्थां इति स्यात् । २ पुराणराजधान्यग्रे इति स्यात् ।

मन्त्र्यश्वारोहसामन्ततन्त्रिपौरादिसंमतः।
तेषां जनकसिंहोभूदग्रणीर्नगराधिपः ॥ ८३८ ॥
स भिक्षोर्मल्लकोष्ट्याद्यैरातैः कृतगतागतैः।
विश्वासाय सुतभ्रातृसुतौ नीवि प्रदापितः ॥ ८३९ ॥
प्रावर्तत भयभ्रश्यत्स्त्रीबालाद्यावृते पुरे।
अराजकाथ रजनी सर्वभूतभयावहा ॥ ८४० ॥
निहताः केपि मुषिताः केपि केप्यरिभिः पुरे।
दग्धागारा व्यधीयन्त दुर्बला राजवर्जिते ॥ ८४१ ॥
सैन्यैरन्येद्युरुन्नादैर्निरुद्धाखिलदिक्पथः।
सिन्दूरारुणपुण्ड्राश्वसादिमण्डलमध्यगः ॥ ८४२ ॥
विकोशशस्त्रकदलीषण्डदुर्लक्ष्यविग्रहः।
मृगेन्द्र इव लोकस्य भयकौतूहलावहः ॥ ८४३ ॥
वीरपट्टाञ्चलश्लिष्टैर्यौवनोद्रेचितैः कचैः।
अबद्धैः शोभितः पृष्ठे जयश्रीबन्धशृङ्खलैः ॥ ८४४ ॥
कुण्डलद्योतिना स्निग्धधवलायतदृष्टिना।
प्रत्यग्रश्मश्रुणा चारु चन्दनोल्लेखशोभिना ॥ ८४५ ॥
ताम्राधरेण वक्त्रेण श्रीसांनिध्याधिकत्विषा।
पक्षपाति विपक्षाणामपि संपादयन्मनः ॥ ८४६ ॥
असेर्विकोशस्यान्तःस्थां श्रियमश्वेन वलगता।
केसरच्छटया……चामरेणेव वीजयन् ॥ ८४७ ॥
पदे पदे निवृत्ताश्वः सामन्तैरुपपादिताम्।
स्वीकुर्वन्नर्हणां भिक्षुः प्राविशन्नगरं ततः ॥ ८४८ ॥
कुलकम् ॥
तस्यार्भकस्य धात्रीव पृष्ठस्थो मल्लकोष्टकः।
प्रययावप्रगल्भस्य सर्वकार्योपदेष्टृताम् ॥ ८४९ ॥

अयं पितुः प्रियस्तेभूत्त्वमस्याङ्के विवर्धितः ।
राज्यस्यायं मूलमिति प्रत्येकं समदर्शयत् ॥ ८५० ॥
गृहं जनकसिंहस्य प्राक्कन्यावाप्तयेविशत् ।
राजलक्ष्मीं स संप्राप्तुं राजधानीं ततः परम् ॥ ८५१ ॥
दूरनष्टे कुले तेन पुनरुद्रेचिते ययौ ।
बद्धास्थो गर्भगेपत्ये स्त्रीजनोनवहास्यताम् ॥ ८५२ ॥
दृष्टेन तादृशा भिक्षोरितिवृत्तेन शत्रुषु ।
चित्रस्थेष्वपि साशङ्का नोपहास्या जिगीषवः ॥ ८५३ ॥
प्रावर्तन्त धनाधीशश्रियः सुस्सलभूपतेः ।
कोषेण नीतशेषेण विलासा नवभूपतेः ॥ ८५४ ॥
वाजिवर्मासिभूयिष्ठां राजलक्ष्मीं विभेजिरे ।
राजडामरलुण्ठाकमन्त्रिणो यत्रणोज्झिताः ॥ ८५५ ॥
पुरे स्वर्ग इवास्वादं भोगानामुपलेभिरे ।
दस्यवो ग्रामभोगार्हाः पिशाचा इव गह्वराः ॥ ८५६ ॥
आस्थाने न बभौ भूभृद्भ्रामीणैः सर्वतो वसन् ।
प्रलम्बकम्बलप्रायविलासावरणैः समम् ॥ ८५७ ॥
भिक्षाचरस्यासंभाव्यप्रादुर्भावतया प्रथाम् ।
डामरा अवतारोयमित्यन्यां निन्यिरे प्रथाम् ॥ ८५८ ॥
राज्यस्यानन्यदृष्टस्य कर्तव्येषु मुमोह सः ।
अदृष्टकर्मेव भिषग्भैषज्यस्य पदे पदे ॥ ८५९ ॥
शनैर्जनकसिंहेन कृतभ्रातृसुतार्पणम् ।
कम्पनाधिपतिर्दत्तकन्योपि तमशिश्रियत् ॥ ८६० ॥
जुङ्गो राजपुरीयस्य राज्ञः कटकवारिकः ।
पादाग्राधिकृतोद्राक्षीत्स्वार्थमर्थं न तु प्रभोः ॥ ८६१ ॥

सर्वाधिकारिणं राजलक्ष्मीर्विम्बमशिश्रियत् ।
राजशब्दस्यैव पात्रमभूद्भिक्षाचरः परम् ॥ ८६२ ॥
वेश्यायत्तीकृतैश्वर्यः प्राकृताचारभागपि ।
अन्तरङ्गः[1] सदसतां किंचिद्विम्बस्तदाभवत् ॥ ८६३ ॥
द्वैमातुरो दर्यकस्य भ्राता साश्चर्यशौर्यभूः ।
नृपान्तरङ्गज्येष्ठत्वं ज्येष्ठपालोप्यशिश्रियत् ॥ ८६४ ॥
मन्त्रिणो भूतविश्शाद्यास्तस्य पैतामहा अपि ।
लक्ष्मीसरोजिनीभृङ्गा बहवोन्ये जजृम्भिरे ॥ ८६५ ॥
मुग्धे राज्ञि प्रमत्तेषु मन्त्रिषूग्रेषु दस्युषु ।
उत्थानोपहतं राज्यं नवत्वेपि बभूव तत् ॥ ८६६ ॥
स्त्रीभिर्नवनवाभिश्च भोज्यैः प्राज्यैश्च रञ्जितः ।
भिक्षुर्नैक्षिष्ट कर्तव्यं सुखानुभवमोहितः ॥ ८६७ ॥
स सुखानुभवप्रावृण्निद्रान्धो विजयोद्यमे ।
स्वैः प्रेरितः सभामध्ये स्वप्नुमैच्छन्मदालसः ॥ ८६८ ॥
दर्पेण सचिवे वाचं कथयत्यनुकम्पिकाम् ।
न स चुक्रोध मुग्धस्तु पितरीवान्वरज्यत ॥ ८६९ ॥
निष्प्रतिष्ठैः सेव्यमानो वेश्योच्छिष्टैरशिष्टवत् ।
अट्टचेटोचिताश्चेष्टा विटैः प्रैर्यत सेवितुम् ॥ ८७० ॥
पानीयरेखाप्रतिमस्थैर्यस्याखिलवस्तुषु ।
तस्याप्रमाणवचसः सेवां प्रणयिनो जहुः ॥ ८७१ ॥
यदूचुः सचिवास्तत्तानन्ववोचन्न भूभृतः ।
वचः सुषिरगर्भस्य तस्य किंचित्समुद्ययौ ॥ ८७२ ॥
सचिवैः स्वगृहान्नीत्वा दत्तभोज्यः स मुग्धधीः ।
धनी विपन्नपितृक इव प्रमुषितो विटैः ॥ ८७३ ॥

---

१. अन्तरङ्गः इत्युचितम् ।

आहारमुष्टिं बिम्बस्य गृहे बिम्बनितम्बिनी ।
तस्याश्वस्येव वडवा रागिणोग्रगताहरत् ॥ ८७४ ॥
वञ्चयित्वा दृशौ पत्युर्दर्शितैः स्मेरया तया ।
कुचकक्षकटाक्षैः स लुप्तधैर्यो व्यधीयत ॥ ८७५ ॥
पृथ्वीहरो मल्लकोष्टश्चान्योन्योद्भूतमत्सरौ ।
क्षोभं व्यधत्तां संरब्धौ राजधान्याः क्षणे क्षणे ॥ ८७६ ॥
स्वयं राज्ञा सुतोद्वाहं गृहान्गत्वापि कारितौ ।
तावन्योन्यमुपेक्षेतां न मन्युं विक्रमोन्मदौ ॥ ८७७ ॥
अथ पृथ्वीहरगृहात्कृतोद्वाहः स्वयं नृपः ।
जातामर्षेण सुस्पष्टं मल्लकोष्टेन तत्यजे ॥ ८७८ ॥
द्रुह्यञ्जनककाणोपि संबन्धापेक्षयोज्झितः ।
विरागमोजानन्दादीन्निन्ये ब्राह्मणमन्त्रिणः ॥ ८७९ ॥
तटस्थो द्रोग्धृदुर्बुद्धिप्रायभृत्यविधेयधीः ।
विसूत्रव्यवहारत्वं निन्द्यत्वं च ययौ नृपः ॥ ८८० ॥
डामरस्वामिके लोके प्राभवत्को न विप्लवः ।
ब्राह्मण्यो धर्षणं यत्र श्वपाकेभ्योपि लेभिरे ॥ ८८१ ॥
अराजकेथवा भूरिराजके मण्डले तदा ।
समस्तव्यवहाराणां स्फुटं तुत्रोट पद्धतिः ॥ ८८२ ॥
दीन्नारा भैक्षवे राज्ये निष्प्रचाराः पुरातनाः ।
तच्छतेन तु नव्यानामशीतेरभवत्क्रयः ॥ ८८३ ॥
राजपुर्यध्वना बिम्बं ससैन्यमथ पार्थिवः ।
लोहरं प्राहिणोत्कर्तुं सुस्सलास्कन्दमुन्मदः ॥ ८८४ ॥
तुरुष्कसैन्यमानिन्ये सोमपालेन सोन्वितः ।
साहायकाय सल्लारे विस्मये मित्रतां गते ॥ ८८५ ॥

संदर्श्य पाशमेतेन बद्ध्वा[1] द्रक्ष्यामि सुस्सलम् ।
इत्येक एकोश्वारोहस्तुरुष्कैः समकथ्यत ॥ ८८६ ॥
काश्मीरकखशम्लेच्छयोधव्यतिकरोभवत् ।
न केषां नाम संभाव्यो विश्वोत्पाटनपाटवः ॥ ८८७ ॥
भिक्षाचरः प्रयाते तु बिम्बे विगलिताङ्कुशः ।
न कासामव्यवस्थानां मूढः स्थानमजायत ॥ ८८८ ॥
स निमन्त्र्य निजं नीतो गृहं बिम्बावरुद्धया ।
भोगसंभोगदानेन धर्षण्या पर्यतोष्यत ॥ ८८९ ॥
कार्यापेक्षापि तस्यासीन्न मन्त्रिस्त्रीसमागमे ।
कौलीनभीतेरासन्ननिपातस्य कथैव का ॥ ८९० ॥
आद्यूनानुगुणं भोज्यं कुम्भकांस्यादिवादनम् ।
तत्र प्राकृतकामीव न स जिह्राय शीलयन् ॥ ८९१ ॥
शनैः शनैस्ततो नष्टावष्टम्भस्य महीपतेः ।
काले भोज्यमपि प्राप्यं नासीद्गलितसंपदः ॥ ८९२ ॥
तादृक्प्रलोभकौर्यादिक्रान्तो यः प्रागगर्ह्यत ।
स सुस्सलोथ लोकानामभिनन्द्यत्वमाययौ ॥ ८९३ ॥
धनमानादिनाशं या विरक्तास्तस्य चक्रिरे ।
काङ्क्षन्ति स्म घनोत्कण्ठास्ता एवागमनं प्रजाः ॥ ८९४ ॥
प्रत्यक्षदर्शिनोद्यापि साश्चर्या वयमस्य यत् ।
ताः प्रजाः कोपिताः केन केन भूयः प्रसादिताः ॥ ८९५ ॥
क्षणाद्वैमुख्यमायान्ति सांमुख्यं यान्ति च क्षणात् ।
न हेतुं कंचिदीक्षन्ते पशुप्रायाः पृथग्जनाः ॥ ८९६ ॥
ते मल्लकोष्टजनकादयो दूतैर्विसर्जितैः ।
त्यक्तराज्यं पुनर्भूपं जयोद्यममजिग्रहन् ॥ ८९७ ॥

---

१ बद्ध्वाक्रक्ष्यामि इति स्यात् ।

अक्षोसुवाग्रहारेथ लोकैष्टिक्कस्य लुण्ठिते ।
तत्रत्या ब्राह्मणाः प्रायं नृपमुद्दिश्य चक्रिरे ॥ ८९८ ॥
तैश्चान्यैश्चाग्रहारैश्च संश्रितैर्विजयेश्वरे ।
राजानवाटिकाप्रायो नगरेपि न्यविक्षत ॥ ८९९ ॥
ओजनन्दादिभिर्मुख्यद्विजैरुत्तेजितास्ततः ।
गोकुलेपि व्यधुः प्रायं त्रिदशालयपर्षदः ॥ ९०० ॥
युग्यार्पितैः सितच्छत्रवस्त्रचामरशोभिभिः ।
विबुधप्रतिमावृन्दैः सर्वतश्छादिताङ्गनः ॥ ९०१ ॥
काहलाकांस्यतालादिवाद्यक्षोभितदिङ्मुखः ।
अदृष्टपूर्वो ददृशे पारिषद्यसमागमः ॥ ९०२ ॥
ते सान्त्व्यमाना भूभर्तुर्दूतैरुत्सेकवादिनः ।
न विना लाम्बकूर्चं नो गतिरित्यब्रुवन्वचः ॥ ९०३ ॥
ते हेलया लम्बकूर्चाख्यया सुस्सलभूपतिम् ।
तं निर्दिशन्तोमन्यन्त क्रीडापुत्रकसंनिभम् ॥ ९०४ ॥
प्रायं प्रेक्षितुमायातैः पौरैः सह दिने दिने ।
अमन्त्रयत कां कां न व्यवस्थां पर्षदां गणः ॥ ९०५ ॥
नृपापातभयात्क्षोभं मुहुर्मुहुरुपागतैः ।
पारिषद्यैश्च पौरैश्च योद्धुमास्थीयतोद्धतम् ॥ ९०६ ॥
वश्यं जनकसिंहस्य नगरं तन्मतेन तत् ।
सज्जं सुस्सलदेवस्य कृत्स्नमानयनेभवत् ॥ ९०७ ॥
प्रायाद्धारयितुं पूर्वमग्रहारद्विजान्नृपः ।
प्रययौ विजयक्षेत्रं तत्रासीच्च हतोद्यमः ॥ ९०८ ॥
तन्मध्ये निखिलांस्तत्र डामरांस्तिलकोब्रवीत् ।
व्यापादयेति तं तच्च सत्त्वैकाग्रो न सोग्रहीत् ॥ ९०९ ॥

राज्ञ एव मुखाद्बुद्ध्वा लवन्यास्तद्विशश्वसुः ।
तस्मिन्पृथ्वीहरमुखास्तत्रसुस्तिलकात्पुनः ॥ ९१० ॥
भागिनेयं प्रयागस्य क्षत्तारं लक्ष्मकाभिधम् ।
बन्द्धुमैच्छन्नृपोस्निग्धं प्रययौ स तु सुस्सलम् ॥ ९११ ॥
ततः प्रविश्य नगरं [1]संनिपत्याखिलं जनम् ।
अकारणविरक्तानां पौराणां प्रददौ सभाम् ॥ ९१२ ॥
युक्तमप्युक्तवांस्तत्र हतोक्तिः शठबुद्धिभिः ।
पौरैः स चक्रे नास्त्येव भेषजं विप्लवस्पृशाम् ॥ ९१३ ॥
अत्रान्तरे सोमपालबिम्बाद्या लहरे स्थिताः ।
योद्धुं सुस्सलभूपं ते सर्वे पर्णोत्समाययुः ॥ ९१४ ॥
तं च पद्मरथो नाम राजा कालिंजरेश्वरः ।
मैत्रीं संस्मृत्य कह्लाद्यैराययौ तत्कुलोद्भवः ॥ ९१५ ॥
सोथ शुक्लत्रयोदश्यां वैशाखे बलिभिः समम् ।
तैर्मानी सुस्सलो राजा संग्रामं प्रत्यपद्यत ॥ ९१६ ॥
प्रेक्षकैर्वर्ण्यतेद्यापि स पर्णोत्सान्तिके रणः ।
तस्याद्भुतोवमानाग्निक्षालनप्रथमक्षणः ॥ ९१७ ॥
कुतोप्येत्य निजस्फारस्ततः प्रभृति भूपतिम् ।
तमशून्यं पुनश्चक्रे मृगेन्द्र इव काननम् ॥ ९१८ ॥
भयस्खलितपाशानां कालपाशैः समागमम् ।
स चकार तुरुष्काणां क्षणात्पुष्कलविक्रमः ॥ ९१९ ॥
मातुलं सोमपालस्य निन्ये कवलतां बली ।
रणे तत्कोपवेतालो वितोलासरितस्तटे ॥ ९२० ॥
किमन्यदल्पसैन्यः स बहूनपि स तान्व्यधात् ।
हतविद्रुतविध्वस्तयथात्मपरिपन्थिनः ॥ ९२१ ॥

---

१. संनिपात्य इत्युचितम् ।

काश्मीरकाणामौचित्यं किं नाभूत्स्वामिनो ददुः ।
एकस्य ये रणं नष्टाः कुकीर्तिमपरस्य च ॥ ९२२ ॥
तुरुष्कैः सह यातेथ सोमपाले गतत्रपाः ।
बिम्बं काश्मीरकास्त्यक्त्वा राजान्तिकमशिश्रियन् ॥ ९२३ ॥
ह्यो धनूंषि शिरांस्यद्य नमयन्तोद्धुताशयाः ।
कुलप्रभोः पुरः स्पष्टं न ते धृष्टा ललज्जिरे ॥ ९२४ ॥
आगच्छद्भिस्ततः पौरैर्डामरैश्च समं नृपः ।
प्रतस्थे दिवसैर्द्वित्रैः कश्मीराभिमुखः पुनः ॥ ९२५ ॥
राजपुत्रः साहदेविः कह्लणो विशतः प्रभोः ।
डामरान्क्रमराज्यस्थान्संगृह्याग्रेसरोभवत् ॥ ९२६ ॥
य एव प्रथमं राजसैन्याद्भिक्षुमशिश्रियत् ।
स एव बिम्बो राजानं तमुत्सृज्य समाययौ ॥ ९२७ ॥
अन्ये जनकसिंहस्य संमता मन्त्रितन्त्रिणः ।
प्रत्युद्यान्तो व्यलोक्यन्त नृपतिं निरपत्रपाः ॥ ९२८ ॥
काण्डिलेत्राभिधग्रामजन्मा शस्त्री सुलक्षणः ।
भाङ्गिले कश्चिदभवच्छून्ये क्रान्तोपवेशनः ॥ ९२९ ॥
भिक्षुर्वितीर्णमार्गं तं सुस्सलान्तिकगामिनः ।
लोकस्यात्रान्तरे जेतुं सह पृथ्वीहरो ययौ ॥ ९३० ॥
जितवांस्तं बबन्धेच्छां निहन्तुं सुस्सलोन्मुखम् ।
क्रोधाज्जनकसिंहं च वार्तां तां संविवेद सः ॥ ९३१ ॥
नगरस्थेन तेनाथ पौराश्वारोहतन्त्रिणः ।
संघट्य्याखिलान्भिक्षोः प्रातिपक्ष्यमगृह्यत ॥ ९३२ ॥
जानंस्तेनावृतं राज्यं ततो भिक्षाचरो नृपः ।
पृथ्वीहरेणानुयातो नगरं सहसाविशत् ॥ ९३३ ॥

सेतौ सदाशिवाग्रस्थे तत्सैन्यैः सह संगरम्।
दृप्यञ्जनकसिंहोथ सान्त्व्यमानोपि सोग्रहीत् ॥ ९३४ ॥
दृष्टं जनकसिंहस्य योधानां वल्गतां मदात्।
अविशङ्कथ पराभूतिं मुहूर्तं सुभटायितम् ॥ ९३५ ॥
अलकेन समं पृथ्वीहरस्तद्भ्रातृसूनुना।
अन्येन सेतुना तीर्त्वा तस्य सैन्यमनाशयत् ॥ ९३६ ॥
तत्रयश्वारोहपौरेषु विद्रुतेषु सबान्धवः।
नक्तं जनकसिंहोथ पलाय्य लहरं ययौ ॥ ९३७ ॥
भिक्षुपृथ्वीहरौ प्रातस्तत्पृष्ठग्रहणोद्यतौ।
तत्पश्चात्तेश्ववाराद्याः पृष्ठा भूयोप्यशिश्रियन् ॥ ९३८ ॥
क्षिप्त्वा क्षिप्रं स्वकक्ष्यान्तर्विबुधप्रतिमा भयात्[1]।
ते पारिषद्यविप्राद्याः प्रायमृत्सृज्य विद्रुताः ॥ ९३९ ॥
शून्यानि सुरयुग्यानि रक्षन्तः केपि भिक्षुणा।
प्रायान्निवृत्ता वयमित्युक्तवन्तो न बाधिताः ॥ ९४० ॥
ह्यो जानके भैक्षवेऽद्य वल्गत्तुङ्गतुरंगमान्।
दृष्टवन्तो वयं सैन्ये सादिनोद्यापि साद्भुताः ॥ ९४१ ॥
भिक्षुराजप्रदीपेन द्योतितः क्षणभङ्गिना।
पितृव्येनाधिकारेण स्यालस्तिलकसिंहजः ॥ ९४२ ॥
गते जनकसिंहेथ प्रतिपक्षानुसारिणाम्।
विधातुं वेश्मभङ्गादि लब्धं भिक्षुमहीभुजा ॥ ९४३ ॥
अत्रान्तरे हुष्कपुरे नीतेषु तिलकादिषु।
भङ्गं सुलहणसिम्बाद्यैः समेतानन्तसैनिकैः ॥ ९४४ ॥
अग्रायातैर्मल्लकोष्टजनकाद्यैः ससैनिकैः।
अपरैरपि सामन्तैर्बलबाहुल्यशालिभिः ॥ ९४५ ॥

---

१ स्वकक्षान्तः इत्युचितम्।

अन्वीयमानो दिवसैर्द्वित्रैराक्रान्तमण्डलः ।
विशँल्लहरमार्गेण विपक्षालक्षितोपतत् ॥ ९४६ ॥
नगरापणवीथ्यन्तर्हयारोहमुखान्पुरः ।
द्रोहयोधानुपायातांस्तदैवोज्झितसाध्वसः ॥ ९४७ ॥
वेष्टितालम्बकूर्चेन वक्रेण भ्रुकुटीभृता ।
कोपकम्पिततारेण फुल्लनासापुटस्पृशा ॥ ९४८ ॥
कांश्चित्संतर्जयन्निन्दन्नन्यान्मग्नांस्तथापरान् ।
तीव्रातपश्यामवपुस्ताम्यत्काल इवोल्बणः ॥ ९४९ ॥
आशीर्घोषकृतां पुष्पवर्षिणां पुरवासिनाम् ।
पूर्वापकारिणां श्रेणीष्ववज्ञान्यस्तलोचनः ॥ ९५० ॥
स्कन्धमात्रोपरिन्यस्तं कवचं हेलया दधत् ।
केशानन्तशिरस्त्रान्तनिःसृतान्धूलिधूसरान् ॥ ९५१ ॥
पक्ष्ममालां च बिभ्राणः सकोशासिस्तुरंगिणाम् ।
आकृष्टखड्गमालानामन्तर्वलत्तुरंगमः ॥ ९५२ ॥
ससिंहनादैरुद्दामैर्भेरीभांकारनिर्भरैः ।
बलैर्भरितदिक्कोशः सुस्सलः प्राविशत्पुरम् ॥ ९५३ ॥
कुलकम् ॥
षड्भिः सद्वादशदिनैर्मासैर्ज्यैष्ठे सितेहनि ।
स सप्तनवताब्दस्य तृतीये पुनराययौ ॥ ९५४ ॥
राजधानीमप्रविष्टो भिक्षुं पूर्वपलायितम् ।
अन्विष्यन्क्षत्रिकातीरे सलवन्यो व्यलोकयत् ॥ ९५५ ॥
सरित्पारं रिपौ प्राप्ते स सपृथ्वीहरो गतः ।
मार्गे लवन्यैर्मिलितैरन्यैः साकं न्यवर्तत ॥ ९५६ ॥
तं विद्राव्य रणे राजा बद्ध्वा प्रहृतिविक्षतम् ।
सिंहं पृथ्वीहरज्ञातिं राजधानीमथाविशत् ॥ ९५७ ॥

उपभोगैः सपत्नस्य तत्कालनिसृतस्य सा।
अङ्किता मानिनस्तस्य वेश्येवोद्वेगदाभवत् ॥ ९५८ ॥
भिक्षुः संत्यज्य कश्मीरान्सह पृथ्वीहरादिभिः।
ग्रामं पुष्पाणनाडाख्यं सोमपालाश्रयं ययौ ॥ ९५९ ॥
प्रस्थिते डामरान्सर्वान्राजा स्वीकृत्य तु व्यधात्।
खेर्यो वट्टात्मजं मल्लं हर्षमित्रं च कम्पने ॥ ९६० ॥
पूर्वापकारं स्मरतो देशकालानपेक्षिणः।
पूर्वविद्वेषिणस्तस्य न कृपां प्रतिपेदिरे ॥ ९६१ ॥
भिक्षुसंपर्कजं गन्धमपि सोढुमशक्नुवन्।
भृत्येभ्यः खण्डशः कृत्वा द्वेषार्तिंसहासनं ददौ ॥ ९६२ ॥
अनयोपार्जितां त्यक्तुमनीशा डामराः श्रियम्।
समन्योश्च नृपाद्भीता नात्यजन्विप्लवोद्यमम् ॥ ९६३ ॥
भिक्षुस्तु राज्यविभ्रष्टः सुहृदो विषये वसन्।
उत्साहं सोमपालस्य दानमानैः पुनर्ययौ ॥ ९६४ ॥
बिम्बः साहायकप्रार्थी विस्मयस्यान्तिकं गतः।
तस्मिन्विरोधिभिर्बद्धै[1] रणे धीरस्तनुं जहौ ॥ ९६५ ॥
भिक्षाचरो बिम्बशून्यो भजन्दुर्नयपात्रताम्।
अनैषीदवरुद्धात्वं तत्प्रियां तां गतत्रपः ॥ ९६६ ॥
निपत्य स्वल्पसैन्योपि ततः शूरपुरे बली।
जित्वा पृथ्वीहरो वट्टात्मजं व्यद्रावयद्रणात् ॥ ९६७ ॥
तस्मिन्पलायिते भिक्षुं पुनरानीय सोविशत्।
भुवं मडवराज्यानां दस्यूनां स्वचिकीर्षया ॥ ९६८ ॥
तत्रत्यैर्मङ्गजय्याद्यैर्डामरैः स्वीकृतैः समम्।
जगाम विजयक्षेत्रं विजेतुं कम्पनापतिम् ॥ ९६९ ॥

---

१ बद्धो इति स्यात्।

जितस्तेनाहवे हर्षमित्रो निहतसैनिकः ।
विजयेश्वरमुत्सृज्य भीतोवन्तिपुरे ययौ ॥ ९७० ॥
विजयक्षेत्रजास्तत्तत्पुरग्रामोद्भवा अपि ।
जना भयेन प्राविक्षन्नथ चक्रधरान्तिकम् ॥ ९७१ ॥
योषिच्छिशुपशुव्रीहिधनोपेतैरपूर्यत ।
स्थानं तत्तैश्च राज्ञश्च योधैः सायुधवाजिभिः ॥ ९७२ ॥
अन्वारूढैरथ स्पष्टं लोकोल्लुण्ठनलालसैः ।
तैर्भैक्षवैरवेष्ट्यन्त कटकैर्व्याप्तदिक्तटैः[1] ॥ ९७३ ॥
तान्दारुमयवप्रौघद्वारगुप्ते सुरौकसः ।
अङ्गने तिष्ठतो हन्तुं बन्द्धुं वा नाशकन्द्विषः ॥ ९७४ ॥
तदन्तरास्थितं दग्धुं कर्पूराख्यं स्ववैरिणम् ।
कश्चित्कतिस्थलीग्रामजन्मा निर्गुटडामरः ॥ ९७५ ॥
पापो जनकराजाख्यस्तत्राग्निमुददीदिपत् ।
मूढस्तादृगपर्यन्तजन्तुसंहारनिर्घृणः ॥ ९७६ ॥
तमापतन्तं ज्वलितं ज्वलनं वीक्ष्य सर्वतः ।
भूतग्रामस्य सुमहान्हाहाकारः समुद्ययौ ॥ ९७७ ॥
विशत्कृतान्तवाहारिभियेव छिन्नबन्धनैः ।
अश्वैरसूचीसंचारा भ्रमद्भिर्जघ्निरे जनाः ॥ ९७८ ॥
प्राच्छाद्यत वलज्ज्वालाकरालैर्धूमराशिभिः ।
व्योम पिङ्गकचश्मश्रुज्वालैर्नक्तंचरैरिव ॥ ९७९ ॥
निर्धूमस्य विसारिण्यो ज्वाला हव्यभुजो दधुः ।
संतापद्रुतहेमाभ्रसुवर्णलहरीभ्रमम् ॥ ९८० ॥
संतापविद्रुतव्योमचारिमौलिपरिच्युताः ।
रक्तोष्णीषा इव भ्रेमुर्ज्वालाभङ्गा नभोङ्गने ॥ ९८१ ॥

---

१ ते भैक्षवैः इति स्यात् ।

दीर्घदारुग्रन्थिभङ्गजन्मा चटचटारवः ।
तापप्रक्काथ्यमानाभ्रगङ्गाघोष इवोद्ययौ ॥ ९८२ ॥
स्फुलिङ्गैः प्लोषवित्रस्तजन्तुजीवितसंनिभैः ।
अग्राहि गहनव्योममार्गभ्रमणसंभ्रमः ॥ ९८३ ॥
शकुनैः शावसंचारशोकादाक्रन्दिभिर्नभः ।
मानुषैर्दह्यमानैश्च भूमिर्मुखरिताभवत् ॥ ९८४ ॥
भ्रातॄन्भर्तॄन्पितॄन्पुत्रानालिङ्ग्याक्रन्दनिर्भराः ।
भीमीलितदृशो नार्यो निरदह्यन्त वह्निना ॥ ९८५ ॥
तदन्तरात्साहसिका ये केचिन्निरयासिषुः ।
बहिस्ते निहताः क्रूरैर्डामरैर्मृत्युचोदितैः ॥ ९८६ ॥
तावन्तो जन्तवस्तत्र व्यपद्यन्त तदा क्षणात् ।
स्विन्ना एव न ये दग्धास्तावतापि कृशानुना ॥ ९८७ ॥
अन्तःशान्तेषु सर्वेषु बहिःशान्तेषु हन्तृषु ।
क्षणादेव प्रदेशः स निःशब्दः समजायत ॥ ९८८ ॥
वह्नेः कहकहाशब्दो ह्रस्वीभूतार्चिषः परम् ।
स्विद्यतश्च शवौघस्य श्रुतः सिमसिमाध्वनिः ॥ ९८९ ॥
विलीनासृग्वसामेदोनिःष्यन्दाः सरणीशतैः ।
प्रसस्रुर्विस्रगन्धश्च योजनानि बहून्यगात् ॥ ९९० ॥
एकः सुश्रवसः कोपाद्द्वितीयो दस्युविप्लवात् ।
ईदृग्घुतवहाबाधो घोरश्चक्रधरे भवत् ॥ ९९१ ॥
भूतग्रामस्य संहारः संवर्त इव वह्निना ।
तादृक्त्रिपुरदाहे वा खाण्डवे तत्र वाभवत् ॥ ९९२ ॥
पुण्येह्नि शुक्लद्वादश्यां नभसः कुकृतं महत् ।
तद्भिक्षुः कृतवात्राज्यलक्ष्म्या भाग्यैश्च तत्यजे ॥ ९९३ ॥

सकुटुम्बेषु दग्धेषु तदानीं गृहमेधिषु ।
पुरग्रामसहस्रेषु गृहाः शून्यत्वमाययुः ॥ ९९४ ॥
मङ्खाख्यो डामरश्चिन्वञ्शवान्नौनागरोद्भवः ।
प्रीतिं प्राप्तैस्तदीयार्थैः कापालिक इवाययौ ॥ ९९५ ॥
अवरूढोथ विजयक्षेत्रं भिक्षाचरस्ततः ।
लब्ध्वा नागेश्वरं पापं यातनाभिरमीमरत् ॥ ९९६ ॥
गर्ह्ये पैतामहे देशे किं नासीत्तस्य चेष्टितम् ।
पितृद्रुहः स तु वधः सर्वप्रीतिकरोभवत् ॥ ९९७ ॥
गृहिणी हर्षमित्रस्य पत्यौ त्यक्ता पलायिते ।
पृथ्वीहरेण संप्राप्ता विजयेशाङ्गनान्तरात् ॥ ९९८ ॥
निमित्तभूतमेतादृक्प्रजासंहारवैशसम्[1] ।
स्वं निन्दन्सुस्सलो राजा ततो योद्धुं विनिर्ययौ ॥ ९९९ ॥
संवेगात्पाप्मनः शीघ्रं निरयक्लेशभुक्तये ।
प्राप्तो जनकराजेन वधोवन्तिपुरान्तिके ॥ १००० ॥
यत्कृते क्रियते कर्म लोकान्तरसुखान्तकम् ।
स मूढैः सुलभापायः कायश्चित्रं न गण्यते ॥ १००१ ॥
कम्पनाधिपतिं सिम्बं कृत्वा डामरमण्डलम् ।
चकर्ष विजयक्षेत्रादन्यतोपि ततो नृपः ॥ १००२ ॥
शमालां प्रययौ पृथ्वीहरो मडवराज्यतः ।
विजित्य मल्लकोष्टेन त्याजितो निजमण्डलम् ॥ १००३ ॥
क्षिप्ताः केचिद्धितस्तायां केचिच्चक्रधराङ्गने ।
अक्रियन्ताग्निसात्कृष्टुमशक्या बहवः शवाः ॥ १००४ ॥
क्रमराज्येथ कल्याणवाङ्यादीत्रल्हणोजयत् ।
आनन्दोनन्तजस्तत्र ततो द्वाराधिपोभवत् ॥ १००५ ॥

---

१ वैशसे इत्युचितम् ।

शूले प्रमापितं सिंहं नयन्पृथ्वीहरो बली ।
सार्धं जनकसिंहाद्यैरयुध्यत्क्षितिकातटे ॥ १००६ ॥
तीर्थे प्रस्थाप्यमानेषु विपन्नास्थिष्विहास्त्यहः ।
भाद्रे मास्येकमबलाक्रन्दिताक्रान्तदिक्पथम् ॥ १००७ ॥
हतवीराबलाक्रान्तमुखरे[1] नगरान्तरे ।
पृथ्वीहराहवे सर्वैर्दिवसैरन्वकारि तत् ॥ १००८ ॥
युग्मम् ।
अथ[2] यातो यशोराजश्यालः शूरो दिगन्तरात् ।
श्रीबको विदधे राज्ञा खेरीकार्याधिकारभाक् ॥ १००९ ॥
अप्रियं स लवन्यानां तेपि वा तस्य नाचरन् ।
कालं तु गूढसौहार्दैरन्योन्यस्य न्यवीवहन् ॥ १०१० ॥
पुनराश्वयुजे राजा शमालां निर्गतस्ततः ।
परैर्मनीमुषग्रामे युधि भङ्गमनीयत ॥ १०११ ॥
नित्याभ्यासेन युद्धानां लब्धोत्कर्षो न्यदर्शयत् ।
सर्ववीराग्रणीर्भिक्षुस्तत्पूर्वं तत्र विक्रमम् ॥ १०१२ ॥
तुक्कद्विजादयो मुख्या भिक्षुपृथ्वीहरादिभिः ।
आसारापातविवशा निहताः सौस्सले बले ॥ १०१३ ॥
प्रधानवीरभूयिष्ठे सैन्यद्वन्द्वे न कोप्यभूत् ।
स वीरश्चरतः संख्ये भिक्षोरैक्षिष्ट यो मुखम् ॥ १०१४ ॥
पृथ्वीहरस्य भिक्षोश्च संग्रामे भूरिवार्षिके ।
कादम्बरीपताकाख्ये द्वे अश्वे पीतपाण्डुरे ॥ १०१५ ॥
आस्तामत्यद्भुते याभ्यामनेकतुरगक्षये ।
न विपन्नं प्रहृतिभिर्नान्वभाव्यथवा क्रमः ॥ १०१६ ॥

---

१ क्रन्दमुखरे इति स्यात् । २ अथायातो इत्युचितम् ।

सैन्यानां संकटे त्राणमश्रान्तिरविकत्थनः ।
अभूत्क्लेशसहो वीरो नान्यो भिक्षाचरात्कचित् ॥ १०१७ ॥
योधानां सौस्सले सैन्ये विद्रवेषु न कश्चन ।
त्राणं बभूव तेनैते बहवो बहुधा हताः ॥ १०१८ ॥
नवेषु [1]डामरानीकाः केचिद्भङ्गेषु सैनिकाः ।
भिक्षाचरगजेन्द्रेण कलभा इव पालिताः ॥ १०१९ ॥
नान्यस्योत्थानशीलत्वं दृष्टं पृथ्वीहरात्तदा ।
स्वयं यो भैक्षवे द्वारे जजागार प्रतिक्षपम् ॥ १०२० ॥
ततः प्रभृत्यभूद्धोत्ता पुरः पश्चाच्च सर्वदा ।
विश्वेदेव इव श्राद्धे युद्धे भिक्षुर्महाभटः ॥ १०२१ ॥
आहवे साहसं कुर्वन्सर्वतः सोभ्यधान्निजान् ।
एवमस्खलितस्थैर्यमुपपत्तिमसंत्यजन् ॥ १०२२ ॥
न मे राज्याय यत्नोयं पर्याप्तं दुर्यशः पुनः ।
कृत्ये प्रसक्तं पूर्वेषां व्यवसायं व्यपोहितुम् ॥ १०२३ ॥
अनाथा इव ते नाथा विशां व्यापादनक्षणे ।
ज्ञात्वा नष्टं कुलं नाथवद्भ्यो नूनं स्पृहां दधुः ॥ १०२४ ॥
इति मत्वा सोढकष्टश्चेष्टे सुदृढनिश्चयः ।
दूयमानोस्मि दायाददुःखदायी दिने दिने ॥ १०२५ ॥
नास्त्येवाप्राप्तकालस्य विपत्तिरिति जानतः ।
कस्य साहसवैमुख्यमुत्पद्येत यशोर्थिनः ॥ १०२६ ॥
किं कार्यगतिकौटिल्यैरुक्तैस्तान्यथवा कथम् ।
न वदामः प्रतिज्ञाय स्वयमार्षेध्वनि स्थितिम् ॥ १०२७ ॥
सोत्कर्षपौरुषाद्भिक्षोरशङ्किषत डामराः ।
ततो दायादविच्छेदं नास्याकृषत जातुचित् ॥ १०२८ ॥

---

१ डामरानीकात् इति स्यात् ।

प्राग्राज्याधिगमाद्राज्ञामन्येषां राजबीजिनः।
चिन्तयन्तो व्यवहृतिं व्युत्पद्यन्ते शनैः शनैः ॥ १०२९ ॥
पितुः पितामहस्याथ न दृष्टं तेन किंचन।
अत एवाभजन्मोहं राज्यं संप्राप्तवान्पुरा ॥ १०३० ॥
तत्स भूयोपि चेदीक्षेत्कैव वार्ता विपाटने।
सापेक्षं वीक्षितुं जाने न दैवेनाप्यशक्यत ॥ १०३१ ॥
जानँल्लवन्यकौटिल्यं प्रमादात्स हृतेहिते।
प्रामुषां राज्यमित्याशां बद्ध्वाहान्यत्यवाहयत् ॥ १०३२ ॥
दस्यूनां सुस्सलो राजा मेने तत्स्वहितं मतम्।
जिगीषोर्नीतिविक्रान्त्योः प्रयुक्तो लिप्तरन्तरम् ॥ १०३३ ॥
युद्धे स्वान्स स्मरन्वैरं नापासीत्तेन तेभजन्।
नास्मिन्विश्वासमेतस्माद्धेतोर्नास्याभवज्जयः ॥ १०३४ ॥
इत्थं नानामतैः पक्षप्रतिपक्षैरुपेक्षितम्।
राष्ट्रं निखिलमेवागात्सर्वतः शोचनीयताम् ॥ १०३५ ॥
यत्संबन्धाद्विटपिनिवहैर्निग्रहव्यग्रवन्य-
व्याधप्रत्तानलपरिभवः कोपि नन्वन्वभावि।
हा धिग्दन्ती विघटनपरः सोपि माद्यन्नमीषां
लभ्यं श्रेयोविधिविधुरितैर्नान्यतो न स्वतोपि ॥१०३६ ॥
द्वैराज्ये प्रभवत्येवमकाण्डापतितैर्हिमैः।
विवशं सुस्सलक्ष्माभृदजयद्भैक्षवं बलम् ॥ १०३७ ॥
पुष्पाणनाडं भूयोपि भिक्षुपृथ्वीहरौ गतौ।
अन्यैर्लवन्यैर्भूभर्तुर्नतिर्दत्तकरैः कृता ॥ १०३८ ॥
सिम्बोपि कम्पनाधीशो व्यधाद्विजितडामरः।
सर्वां मडवराज्योर्वीं वीरः शमितविप्लवाम् ॥ १०३९ ॥

तावत्यापि विपक्षाणां शान्त्या शीतलतां गतः ।
पूर्ववैरं स्वपक्षाणां प्रादुश्चक्रे स भूपतिः ॥ १०४० ॥
जिघांसौ कथिते राजन्युल्हणेन पलायितः ।
मल्लकोष्टः सोपि कोपाद्राज्ञा राष्ट्रात्प्रवासितः ॥ १०४१ ॥
अनन्तात्मजमानन्दं बद्ध्वा द्वाराधिकारिणम् ।
व्यधत्त सैन्धवं प्रज्ञिनामानं राजबीजिनम् ॥ १०४२ ॥
गतोथ विजयक्षेत्रं सिम्बेन सहितोविशत् ।
नगरं तं च विश्वस्तं बद्ध्वा कारागृहेक्षिपत् ॥ १०४३ ॥
अनुस्मृतिमहावात्याप्रेरितोमर्षपावकः ।
आचचाम क्षमावारि तस्य भृत्यान्दिधक्षतः ॥ १०४४ ॥
सिंहथक्कनसिंहाभ्यामनुजाभ्यां सहावधीत् ।
शूलेधिरोप्य सिम्बं स रोषावेशविलुप्तधीः ॥ १०४५ ॥
कम्पने श्रीवकं चक्रे सुज्जि प्रज्ञेः सहोदरम् ।
बद्ध्वा जनकसिंहं च राजस्थाने न्ययोजयत् ॥ १०४६ ॥
आप्ताश्च मन्त्रिणश्चासंस्तस्य वैदेशिकास्ततः ।
स्वदेशजस्तु सोभूद्यो लोहरस्थं तमन्वगात् ॥ १०४७ ॥
अथ सर्वेपि साशङ्कास्तं त्यक्त्वाशिश्रियन्निपून् ।
शतैकीयः कश्चिदासीद्राजधान्यां नृपाश्रितः ॥ १०४८ ॥
तेनाप्रतिसमाधेयो भूयः शान्तेप्युपद्रवे ।
इत्थमुत्थापितोनर्थो न पुनर्यः शमं ययौ ॥ १०४९ ॥
एकाक्षेपेपरेपि स्युर्यत्र भृत्या विशङ्किताः ।
तत्रापराधे प्राज्ञस्य राज्ञोवश्यैव शस्यते ॥ १०५० ॥
माघेथ मल्लकोष्टाद्यैराहूताः पुनराययुः ।
ते शूरपुरमार्गेण भिक्षुपृथ्वीहरादयः ॥ १०५१ ॥

वितस्तापरिखाक्षिप्ता भूरगम्या द्विषामियम्।
इति प्रायान्नवमठं त्यक्त्वा राजगृहं नृपः ॥ १०५२ ॥
वर्षेष्टानवते चैत्रे डामरेषु युयुत्सुषु।
अभ्येत्य मल्लकोष्टेन प्रागेवाग्राहि संगरः ॥ १०५३ ॥
सोश्ववारैः सह रणं चकार नगरान्तरे।
नृपावरोधैः सौधाग्रादालोकितमथाकुलैः ॥ १०५४ ॥
भिक्षुणा क्षितिकातीरे स्कन्धावारो न्यवध्यत।
..... ॥ १०५५ ॥
नृपोद्यानाद्रुमान्निन्युरिन्धनाय महानसे।
दूर्वाङ्कुरान्मन्दुराभ्यो वाहभोज्याय डामराः ॥ १०५६ ॥
पृथ्वीहरस्तु संगृह्णन्दस्यून्मडवराज्यजान्।
चकार विजयक्षेत्रे यावत्कटकसंग्रहम् ॥ १०५७ ॥
तावत्प्राज्ञिमुखान्मल्लकोष्टयुद्धाय भूपतिः।
आदिश्यादादवस्कन्दं वैशाखे साहसोन्मुखः ॥ १०५८ ॥
अकस्मात्पतिते तस्मिन्हतावष्टम्भविक्षताः।
प्रययुः सेतुमुल्लङ्घ्य जीवश्वस्ताः कथंचन ॥ १०५९ ॥
नगरं मल्लकोष्टाजिव्यग्रे प्रज्ञावथाविशत्।
पृथ्वीहरानुजः सुज्ञि निर्जित्य मनुजेश्वरः ॥ १०६० ॥
परं पारं वितस्तायाः सेतुच्छेदादनाप्नुवन्।
अर्वाचि तीरे स गृहान्दग्ध्वागात्क्षितिकां ततः ॥ १०६१ ॥
लवन्यैर्नगरं प्राप्तं मत्वा सुस्सलभूपतिः।
आययौ विजयक्षेत्रात्सैन्यमुत्थाप्य विह्वलः ॥ १०६२ ॥
अहंपूर्विकयारातिशङ्कार्तैश्च निजैर्बलैः।
पीडितस्तस्य गम्भीरासिन्धुसेतुरभज्यत ॥ १०६३ ॥

स कृष्णषष्ठ्यां ज्यैष्ठस्य तस्यासंख्यश्चमूचयः ।
यथाग्निना चक्रधरे तथा तत्राम्भसा मृतः ॥ १०६४ ॥
भुजमुद्यम्य शमयन्सैन्यानां संभ्रमं नृपः ।
त्रस्तैर्भ्रष्टैस्तथा पृष्ठे पतितः सरिदन्तरे ॥ १०६५ ॥
अनभ्यस्ताम्बुतरणैराश्लिष्य ब्रुडितोसकृत् ।
तरदायुधविद्धाङ्गः स निस्तीर्णः कथंचन ॥ १०६६ ॥
अनुत्तीर्णं बलं त्यक्त्वा पारे सामन्तसंकुलम् ।
सहस्रांशेन सैन्यस्य तीर्णेनानुगतो ययौ ॥ १०६७ ॥
संत्यक्तानन्तसैन्योपि सोवष्टम्भमयो ययौ ।
प्रविश्य नगरं मल्लकोष्टमुख्यात्रणेग्रहीत् ॥ १०६८ ॥
विजयस्याथ जननी सिल्लाख्या स्वामिनोज्झितम् ।
निनाय देवसरसं सैन्यं तद्विजयेश्वरात् ॥ १०६९ ॥
साथ पृथ्वीहरेणैत्य हता तत्रोपवेशने ।
टिक्कश्च दत्तो भूपालसैन्यं विद्रावितं च तत् ॥ १०७० ॥
परं व्यायामविद्याविद्विद्रुते निखिले बले ।
द्विजः कल्याणराजाख्यः समरेभिमुखो हतः ॥ १०७१ ॥
मन्त्रिडामरसामन्तसंकुलात्सौस्सलाद्बलात् ।
पृथ्वीहरेणागृह्यन्त बद्ध्वा वृन्दानि शस्त्रिणाम् ॥ १०७२ ॥
अन्वगात्स वितस्तान्तं यावत्तान्विद्रुतान्बलात् ।
ओजानन्दद्विजादींश्च बद्ध्वा शूले व्यपादयत् ॥ १०७३ ॥
मन्त्रिणो जनकश्रीबकाद्या राजात्मजास्तथा ।
तीर्त्वाद्रिं विषलाटायां शरणं प्रययुः खशान् ॥ १०७४ ॥
इत्थं पृथ्वीहरो लब्धजयः संगृह्य डामरान् ।
जिगीषुर्भिक्षुणा साकं नगरोपान्तमाययौ ॥ १०७५ ॥

भूयोपि मानुषाश्वौघसंहर्ता सर्वतस्ततः।
रणः प्रववृते प्राग्वत्पुरे रुद्धस्य भूपतेः ॥ १०७६ ॥
निर्निरोधः पथानेन नृपावसथ इत्यभूत्।
सैन्ये मडवराज्यानां स्वयं पृथ्वीहरोग्रणीः ॥ १०७७ ॥
तत्तत्सामन्तकुलजैर्वीरैः काश्मीरकैर्भटैः।
समेतं डामरकुलं दुर्जयं सर्वतोभवत् ॥ १०७८ ॥
काश्मीरकाः शोभकाद्याः काकवंश्याः सहस्रशः।
प्रख्याता भैक्षवे पक्षे रत्नाद्याश्चापरेस्फुरन् ॥ १०७९ ॥
नदतः स्वबलाद्घातुमुलं शृण्वतोन्मिषत्।
पृथ्वीहरेणागण्यन्त वाद्यभाण्डानि कौतुकात् ॥ १०८० ॥
हित्वा भूर्यथ तूर्यादि परिच्छेत्तुं स कौतुकी।
श्वपाकदुन्दुभीभाण्डशतानि द्वादशाशकत् ॥ १०८१ ॥
तथा विनष्टसैन्योपि त्रिंशद्भिंशैर्नृपात्मजैः।
मितैः स्वदेशजैश्चारीन्प्रतिजग्राह सुस्सलः ॥ १०८२ ॥
राजन्यावच्छटिकुलोद्भूतावुदयधन्यकौ।
चम्पावल्लापुराधीशावुदयब्रह्मजज्जलौ ॥ १०८३ ॥
तेजोमल्हणहंसानां धुर्यो हरिहडौकसः।
क्षत्रिकाभिञ्जिकास्थानसव्यराजादयस्तथा ॥ १०८४ ॥
विडालपुत्रा नीलाद्या भावुकान्वयसंभवाः।
रामपालः सहजिको युवा तस्य च नन्दनः ॥ १०८५ ॥
नानावंश्याः परेप्युग्रसंग्रामव्यग्रताजुषः।
पुरोपरोधसंनद्धानरुन्धन्सर्वतो रिपून् ॥ १०८६ ॥
तनूजनिर्विशेषेण रिल्हणेन महीभुजः।
रणाग्रेसरताग्राहि विजयाद्यैश्च सादिभिः ॥ १०८७ ॥

स्वयमुद्यमिना राज्ञा वर्मणेव निजौ भुजौ ।
सुज्जिप्रज्जी पाल्यमानावभूतां रणकर्मठौ ॥ १०८८ ॥
ताभ्यां साधारणीकुर्वन्राज्योत्पत्तिं महीपतिः ।
स महाव्यसने तस्मिन्सम्यगूढधुरोभवत् ॥ १०८९ ॥
तत्पक्षा भागिकशरद्धासिमुम्मुनिमुङ्गटाः ।
कलशाद्याश्च कुशला विपक्षक्षोभणेभवन् ॥ १०९० ॥
भूभर्तुष्टक्कविषये लवराजस्य नन्दनः ।
आसीत्कमलियश्चास्य संग्रामाग्रेसरः प्रभोः ॥ १०९१ ॥
प्रहारं बलिनस्तस्य चामरध्वजशोभिनः ।
प्रभिन्नस्येव नागस्य हयारोहा न सेहिरे ॥ १०९२ ॥
अनुजः सङ्गिकः पृथ्वीपालो भ्रातुः सुतोस्य च ।
पाञ्चालौ फाल्गुनस्येव पार्श्वरक्षित्वमाययुः ॥ १०९३ ॥
एतावद्भिर्भृत्यरत्नै राष्ट्रेपि कुपितेजयत् ।
भूरिस्वर्णार्पणोपात्तैर्वाजिभिश्च महीपतिः ॥ १०९४ ॥
तत्र तत्राहवे सोपि बभ्रामासंभ्रमो नृपः ।
उत्सवे गृहमेधीव मण्डपे मण्डपे स्वयम् ॥ १०९५ ॥
तस्य हि व्यसनं त्रासहेतुः प्राभूदुपक्रमे ।
प्रवृद्धिं प्राप्तमभवद्धैर्यादाय्यथ धीमतः ॥ १०९६ ॥
क्लैब्यकृद्भयमापाते मध्यपाते न तादृशम् ।
करक्षिप्तं यथा शीतं मज्जने न तथा पयः ॥ १०९७ ॥
वैरिसैन्यतमो यत्र यत्र ज्योत्स्नेव निर्ययौ ।
सितासिता च भूभर्तुस्तत्र तत्रास्य वाहिनी ॥ १०९८ ॥
एकदा कृतसंकेतास्तुल्यमाहवमेलके ।
महासरितमुत्तीर्य डामरा नगरेपतन् ॥ १०९९ ॥

असीमनगरस्थानविभक्तकटको नृपः ।
परिमेयाश्ववारस्तान्विशतः स्वयमाद्रवत् ॥ ११०० ॥
नाभजद्डामरानीकस्तेन विद्रावितो धृतिम् ।
हेमन्तमरुता कीर्णपर्णराशिरिवेरितः ॥ ११०१ ॥
आनन्दः काककुलजो लोष्टशाह्यनलादयः ।
अन्ये च डामरानीके ख्याता भूभृद्भटैर्हताः ॥ ११०२ ॥
लग्नाभिघातानानीताग्राशः क्रूरस्य दृक्पथम् ।
बहून्निजघ्नुश्चण्डाला इव राजोपजीविनः ॥ ११०३ ॥
भयाद्गोपाद्रिमारूढाश्चापरे भैक्षवास्ततः ।
आसन्नमृत्यवोभूवन्कटकैर्वेष्टिता द्विषाम् ॥ ११०४ ॥
यो मार्गो दुर्गमः पत्रिणोपि त्रातुं ततः स तान् ।
तत्र व्यापारयामास भिक्षुर्मानी तुरंगमान् ॥ ११०५ ॥
कथंचित्पत्रिणा विद्धग्रीवस्तस्याग्रहीन्मुहुः ।
पार्श्वे पृथ्वीहरो रूढिं द्वित्राश्चान्ये महाभटाः ॥ ११०६ ॥
वेलाद्रिभिरिवोद्भूतैः सिन्धौ तैर्द्विषतां बले ।
रुद्धे गोपाचलं त्यक्त्वा तेन्यानारुरुहुर्गिरीन् ॥ ११०७ ॥
[1]अथोदतिष्ठ···मेन राजानीकस्य वाहिनी ।
मल्लकोष्टस्य पत्यश्वक्षोभिताशेषदिक्तटा ॥ ११०८ ॥
अरिपृष्ठग्रहव्यग्रैस्तिष्ठन्स्वैर्वर्जितो बलैः ।
तदाज्ञाय्यखिलैरेष हतो राजेत्यसंशयम् ॥ ११०९ ॥
आपातं सुस्सलो राजा यावत्तस्था विसोढवान् ।
तावत्सावरजः प्रज्ञिराजगाम रणाङ्गनम् ॥ १११० ॥
आषाढबहुलाष्टम्यां स हयारोहमेलकः ।
निजशस्त्रध्वनिप्रत्तसाधुवादो महानभूत् ॥ ११११ ॥

---

१ अथोदतिष्ठद्वामेन इति स्यात् ।

ताभ्यां स शमितो युद्धे ससूनुः ससमीरणः ।
दावो नभोनमस्याभ्यामिव प्रापाम्बुवृष्टिभिः ॥ १११२ ॥
संग्रामबहले काले तादृगन्यो न कोऽप्यभूत् ।
यादृक्स दिवसो वीर्यशौटीर्यनिकषोपलः ॥ १११३ ॥
अनीकिनी लाहरी सा विलम्बेनाययाविति ।
तेषामुत्पाटनेच्छूनां नाभवद्धस्तमेलकः ॥ १११४ ॥
अन्योन्यस्य परिज्ञाता दिवसे तत्र संकटे ।
भिक्षोर्भूमिभृता शक्तिर्भूमिभर्तुश्च भिक्षुणा ॥ १११५ ॥
ततो मडवराज्यांस्तान्योद्धुं तत्रैव निर्दिशन् ।
क्षितिकारोधसा युद्धमेत्य पृथ्वीहरोग्रहीत् ॥ १११६ ॥
दिगन्तरादथायातो यशोराजो महीभुजा ।
मण्डलेश्वरतां निन्ये रिपून्प्रति जिहीर्षुणा[1] ॥ १११७ ॥
खेरीकार्ये पुरा तस्य लवन्या दृष्टविक्रमाः ।
रणेषु मुखमालोक्य शतशः प्रचकम्पिरे ॥ १११८ ॥
कुङ्कुमालेपनच्छत्रहयादिप्रतिपत्तिदः ।
सर्वेषामभिनन्द्यत्वं तं राजा स्वमिवानयत् ॥ १११९ ॥
दीर्घोपप्लवयाप्येन दुःस्थितः स्वास्थ्यलिप्सया ।
जनो बबन्ध तत्रास्थां नववैद्य इवातुरः ॥ ११२० ॥
ज्यायांसं पञ्चचन्द्राख्यं शेषाणां गर्गजन्मनाम् ।
नृपतिर्मल्लकोष्टस्य प्रातिपक्ष्ये न्ययोजयत् ॥ ११२१ ॥
शिशुश्छुड्डाख्यया मात्रा पालितः स शनैः शनैः ।
आश्रीयमाणोनुचरैः पित्र्यैः किंचित्प्रथां ययौ ॥ ११२२ ॥
यशोराजानुयातेन राज्ञा जन्येषु निर्जिताः ।
केचित्तत्पक्षमभजन्भग्नाः केचिच्च डामराः ॥ ११२३ ॥

---

१ जिगीषुणा इति स्यात् ।

स भिक्षुः प्रययौ पृथ्वीहरः स्वमुपवेशनम् ।
मल्लकोष्ठोन्मुखो राजा निर्जगामामरेश्वरम् ॥ ११२४ ॥
अत्रान्तरे मल्लकोष्ठो विसृज्य निशि तस्करान् ।
सदाशिवान्तिके शून्यां राजधानीमदाहयत् ॥ ११२५ ॥
पृथ्वीहरेण भूयोपि योद्धुमागच्छतासकृत् ।
प्रज्जिसुज्जिमुखा युद्धमकुर्वन्क्षत्रिकातटे ॥ ११२६ ॥
वारं वारं लवन्यः स नगरे निर्दहन्गृहान् ।
प्रायः शून्यत्वमनयद्वितस्तातीरमुत्तमम् ॥ ११२७ ॥
तत्र तत्र रणान्कुर्वन्प्राणसंदेहदायिनः ।
आचक्रामाथ नृपतिर्लहरं बहलैर्बलैः ॥ ११२८ ॥
सिन्धुं तरन्तो निःसेतुं हतिभङ्गाद्ययुर्जले ।
मन्दिरं कन्दराजाद्यास्तदीयाः समवर्तिनः ॥ ११२९ ॥
दरद्देशं ययौ मल्लकोष्ठो राज्ञा निराकृतः ।
सपुत्राप्यभजच्छुङ्ग प्रारोहं लहरान्तरे ॥ ११३० ॥
आनिन्यिरे जय्यकेन लवन्येन नृपान्तिकम् ।
विषलाटान्तरात्तेथ जनकश्रीबकादयः ॥ ११३१ ॥
लहरारब्ध्यतिक्रान्तनिदाघः शरदागमे ।
शमालां निर्ययौ राजा यशोराजान्वितस्ततः ॥ ११३२ ॥
भग्नं पृथ्वीहरत्रासात्सैन्यं रक्षन्मनीमुषे ।
आजौ सज्ञात्मजो डोम्बनामा राजसुतो हतः ॥ ११३३ ॥
युद्धं सुवर्णसानूरग्रामशूरपुरादिषु ।
कुर्वञ्शश्वन्नृपः प्राप पर्यायेण जयाजयौ ॥ ११३४ ॥
श्रीकल्याणपुराद्भङ्गं नीते पृथ्वीहरादिभिः ।
श्रीबके नागवट्टाद्या युधि प्रापुः प्रमापणम् ॥ ११३५ ॥

पौषे सुवर्णसानूरान्निहन्तुं मातुरन्तिकम् ।
टिक्कं स देवसरसं व्यसृजद्गर्गवल्लभाम् ॥ ११३६ ॥
स्वेन राज्ञश्च सैन्येन सहिता सा जिताहिता ।
अकस्मात्तत्र टिक्केन निपत्य निहता युधि ॥ ११३७ ॥
स स्त्रीवधं व्यधात्पापी द्वितीयमपि निर्घृणः ।
विशेषः कोथवा तिर्यङ्म्लेच्छतस्कररक्षसाम् ॥ ११३८ ॥
अबलां स्वामिनीं हन्यमानां त्यक्त्वा पलायिताः ।
चित्रं पशूपमाः शस्त्रं स्वीचक्रुर्लाहराः पुनः ॥ ११३९ ॥
ईषत्प्रागागतं शय्यां भूय एवोल्बणं नृपः ।
ज्ञात्वा मडवराज्यं स प्रययौ विजयेश्वरम् ॥ ११४० ॥
मल्लराजतनूजानां निजा जिह्वैव दुर्जना ।
बभूव प्रभविष्णुत्वे व्यापदापातदूतिका ॥ ११४१ ॥
प्रायश्चाद्यतने काले भृत्यास्तितउवृत्तयः ।
दर्शयन्ति समुत्सार्य सारं दोषतुषग्रहम् ॥ ११४२ ॥
आबाल्यात्संस्तुताश्लीलवचःपरुषभाषितैः ।
निर्गौरवैर्यशोराजो राज्ञि तस्मिन्व्यरज्यत ॥ ११४३ ॥
स दुर्जातिर्महासैन्ययुतोवन्तिपुरस्थितः ।
अभजत्तत उत्थाय प्रतिपक्षसमाश्रयम् ॥ ११४४ ॥
वैरिपक्षगते तस्मिन्बलैः सर्वोत्तमैः समम् ।
विह्वलो विजयक्षेत्रात्पलायिष्ट महीपतिः ॥ ११४५ ॥
धिग्राज्यं यत्कृते सोपि सेहे प्राणान्निरक्षिषुः ।
मुष्णद्भिश्चौरचण्डालप्रायैः परिभवं पथि ॥ ११४६ ॥
माघे पलाय्य नगरं प्रविष्टः स वथाभिधे ।
भृत्ये द्रोग्धर्यशङ्किष्ट स्वेषामपि तनूरुहाम् ॥ ११४७ ॥

काश्मीरिके जनेशेषे निराशे नितरां ततः।
अङ्कन्यस्तोत्तमाङ्गोभूत्प्रज्ञिपक्षे क्षमापतिः॥ ११४८॥
मुद्रिता रुद्रपालादिपूर्वराजात्मजप्रथा।
प्रज्ञिना विक्रमत्यागनयाद्रोहादिभिर्गुणैः॥ ११४९॥
तेनैव वर्धितामुत्र देशे विशदकीर्तिना।
कालदौरात्म्यलुठिता प्रतिष्ठा शस्त्रशास्त्रयोः॥ ११५०॥
अमन्त्रयत संगम्य यशोराजस्तु भिक्षुणा।
नेच्छन्ति डामरा राज्यं तव विक्रमशङ्किताः॥ ११५१॥
उत्पाद्य पुनरुत्पिञ्जं साधिष्ठानबला वयम्।
राज्यं स्वयं ग्रहीष्यामो यास्यामो वा दिगन्तरम्॥ ११५२॥
इति तैर्मन्त्रिते छुड्डां हतां श्रुत्वा दरत्पुरात्।
आगत्य मल्लकोष्टोपि प्राविशत्स्वोपवेशनम्॥ ११५३॥
वर्षोथ दुस्तरः ख्यात एकान्नशतसंख्यया।
सर्वभूतान्तकृल्लोके प्रावर्तत सुदारुणः॥ ११५४॥
वसन्ते डामराः सर्वे प्राग्वन्मार्गैर्निजैर्निजैः।
आगत्य भूयो भूपालं नगरस्थमवेष्टयन्॥ ११५५॥
धीरः सुस्सलदेवोपि पुनरासीद्दिवानिशम्।
निःसीमसमरस्तोमारम्भसंरम्भभाजनम्॥ ११५६॥
दाहलुण्ठनसंग्रामकर्मशौण्डैः स डामरैः।
प्राग्विप्लवेभ्योप्यधिको विप्लवः पर्यवर्धत॥ ११५७॥
महासरित्पथे निर्निरोधे तस्थुर्विविक्षवः।
नगरं ते यशोराजभिक्षुपृथ्वीहरादयः॥ ११५८॥
ततः कतिषुचिद्युद्धाहेषु यातेषु संगरे।
निजेनैव यशोराजः परकीयभ्रमाद्धतः॥ ११५९॥

कय्यात्मजेन हि समं विजयाख्येन सादिना ।
सौस्सले न तु संग्रामे परावृत्तीः प्रदर्शयन् ॥ ११६० ॥
विप्रलब्धैः स वर्णाश्वकवचावेक्षणान्निजैः ।
शूलायुधिभिरुद्दामैः शूलाघातैरहन्यत ॥ ११६१ ॥
भिक्षो राज्यं समर्थोयं दातुं हर्तुं ततश्च नः ।
भीत्या तैर्डामरैरेव स घातित इति श्रुतिः ॥ ११६२ ॥
यथैव तेन विश्वस्तः स्वामी द्रोहेण वञ्चितः ।
तथैव प्राप विश्वस्तः क्षिप्रमेव वधं मृधे ॥ ११६३ ॥
पृथ्वीहरस्तत्र तत्र योधयित्वाथ डामरान् ।
क्षितिकारोधसा भूयोभ्येत्य संग्राममग्रहीत् ॥ ११६४ ॥
तत्राधिष्ठानयोधानां भिक्षुपक्षोपजीविनाम् ।
पौरुषं स्वपरोत्कर्षपरिभावि व्यभाव्यत ॥ ११६५ ॥
वह्निदानमहायोधसंहाराद्यैरुपद्रवैः ।
एकमेकमहस्तत्रानेहस्यासीद्भयावहम् ॥ ११६६ ॥
अतपत्तरणिस्तीक्ष्णमभीक्ष्णं भूरकम्पत ।
ववुर्द्रुमादीन्भञ्जन्तो महोत्पातप्रभञ्जनाः ॥ ११६७ ॥
पवनोत्थापितैः पांसुकूटैर्दध्रे महोद्धतैः ।
व्योम्नि प्रोत्तम्भनस्तम्भभङ्गिर्निर्घातदारिते ॥ ११६८ ॥
ज्येष्ठस्य शुक्लैकादश्यां प्रवृत्तेथ महारणे ।
काष्ठीले डामरा वह्निमेकस्मिन्प्रददुर्गृहे ॥ ११६९ ॥
सोग्निर्वा मारुतोद्धूतः प्रसरन्वैद्युतोथ वा ।
जज्वालैकपदे कृत्स्नं नगरं निरवग्रहः ॥ ११७० ॥
दृष्टस्तदानीमेतावद्गजव्यूह इवापतत् ।
माक्षिकस्वामिनो धूमो बृहत्सेतौ यदुत्थितः ॥ ११७१ ॥

अथेन्द्रदेवीभवनविहारं सहसागमत् ।
ततो नगरमुज्ज्वालं क्षणात्सर्वमदृश्यत ॥ ११७२ ॥
न भूमिर्न दिशो न द्यौर्धूमध्वान्ते व्यभाव्यत ।
हुडुक्कामुखचर्माभो दृश्यादृश्योभवद्रविः ॥ ११७३ ॥
धूमान्धकारसंछन्नास्ततः प्रज्वलताग्निना ।
अपुनर्दर्शनायेव मुहुराविष्कृता गृहाः ॥ ११७४ ॥
वितस्तादृश्यतोज्ज्वालवेश्माश्लिष्टतटद्वया ।
रक्ताक्तोभयधारेव कृतान्तस्यासिवल्लरी ॥ ११७५ ॥
ब्रह्माण्डोर्ध्वकवाटान्तसंस्पर्शात्पतितोन्नतैः ।
ज्वालाकलापैः संवृद्धैर्हेमच्छत्रवनायितम् ॥ ११७६ ॥
उच्चावचैर्युतो ज्वालाश्चट्टकैर्हेमाद्रिसंनिभः ।
वह्निर्धूमच्छलान्मूर्ध्नि बभाराम्बुधरावलिम् ॥ ११७७ ॥
आविर्भवन्तो ज्वालाभ्यो गृहाश्चक्रुर्मुहुर्मुहुः ।
अदग्धायत इत्याशां विमुग्धगृहमेधिनाम् ॥ ११७८ ॥
ज्वलितैस्तापितजला वितस्ता पतितैर्गृहैः ।
और्वोष्मवेदनाक्लेशं विवेद सरितां प्रभोः ॥ ११७९ ॥
दीप्तपक्षैः खगैः साकं ज्वलिता बालपल्लवाः ।
उद्यानद्रुमषण्डानां व्योमोड्डयनमादधुः ॥ ११८० ॥
सुधासिताः सुरगृहा ज्वालासंवलिता व्यधुः ।
क्षयसंध्याम्बुदाश्लिष्टहिमाद्रिशिखरभ्रमम् ॥ ११८१ ॥
मज्जनावासनौसेतुकदम्बैः प्लोपशङ्कया ।
अपास्तैर्नगरस्यान्तर्ययुर्नद्योपि शून्यताम् ॥ ११८२ ॥
किमन्यन्मठदेवौकोगृहाट्टादिविवर्जितम् ।
नगरं क्षणमात्रेण दग्धारण्यमजायत ॥ ११८३ ॥

लोष्टावशेषे नगरे धूमश्यामो निरास्पदः ।
उच्चैरेको बृहद्बुद्धो दृष्टो दग्धद्रुमोपमः ॥ ११८४ ॥
सैन्येषु ज्वलितावासत्राणाय चलितेष्वथ ।
शतमात्रेण योधानां युतो भूभृदजायत ॥ ११८५ ॥
पारं गन्तुं वितस्तायाश्छिन्नसेतुं तमक्षमम् ।
लब्धरन्ध्रा द्विषोनन्ता निहन्तुं पर्यवारयन् ॥ ११८६ ॥
पुरं दग्धं समुत्पन्नं प्रजा नष्टाश्च चिन्तयन् ।
आसन्नं मरणं राजा निर्विण्णो बह्वमन्यत ॥ ११८७ ॥
प्रस्थास्नुमथ तं प्रत्यङ्मुखमाशङ्क्य विद्रुतम् ।
संज्ञितोन्यैः कमलियः क्व देवेत्यब्रवीद्वचः ॥ ११८८ ॥
संरम्भस्मितविद्योतिचन्दनोल्लेखमाननम् ।
परिवर्त्य निरुद्धाश्वो धीरः स तमभाषत ॥ ११८९ ॥
तदद्य करवै भूमेः कृते हम्मीरसंगरे ।
चकार राजा भिज्ञो यत्सोभिमानी पितामहः ॥ ११९० ॥
कुतस्त्योप्येष दायादो यद्भ्रातास्माकमस्मि वा ।
स हर्षदेवोपश्यन्नः कार्यशेषं पलायितः ॥ ११९१ ॥
को नाम मानिनां पङ्क्तौ प्रविष्टोऽन्ते निजां भुवम् ।
असिक्तां स्वाङ्गरक्तां···व्याघ्रः कृत्तिमिवोज्झति ॥ ११९२ ॥
इत्युक्त्वोदश्वयन्वल्गामुत्क्षिप्ताग्रमुखं हयम् ।
संप्रष्टुमिच्छुः पाणिभ्यां कृपाणमुदनामयत् ॥ ११९३ ॥
ततो निर्गृह्य वल्गायां वाजिनं लवराजजः ।
ऊचे भृत्येषु सत्स्वग्रे प्रवेशार्हो न भूभुजः ॥ ११९४ ॥
प्रहारविक्लवास्तिष्ठन्गृहादेकोभ्युपाययौ ।
संकटे तत्र भूभर्तुः पृथ्वीपालोऽन्तिकं परम् ॥ ११९५ ॥

कौलपुत्र्यं स्तुवंस्तस्य वात्सल्यादेष भूपतिः।
स्वस्यात्तनिष्क्रियां मेने सेवाविष्कृत्युपक्रियाम् ॥ ११९६ ॥
अथ स्थितास्त्रिभिर्व्यूहै रहितास्तेकिरञ्शरान्।
हन्तुं वामेन ते योधाः सर्वे वाहनदुर्मदाः ॥ ११९७ ॥
स प्रेरयंश्च तुरगं दैवात्तस्य च तादृशः।
सहस्राण्यपि भूरीणि व्यधीयन्त विरोधिनाम् ॥ ११९८ ॥
अल्पसैन्यो द्विषत्खड्गमण्डलप्रतिबिम्बितः।
नृपः साहायकायातविश्वरूप इवाबभौ ॥ ११९९ ॥
कलविङ्कानिव श्येनः कुरङ्गानिव केसरी।
एको व्यद्रावयद्भूरीनरीन्सुस्सलभूपतिः ॥ १२०० ॥
निपत्य पत्तीन्व्रुन्धानान्खुराग्राण्यपि वाजिनाम्।
प्राहरंस्ते हयारोहा व्यूहव्याहतरंहसः ॥ १२०१ ॥
बिम्बितज्वलनज्वालाः सर्व एव महाभटाः।
हन्तव्याश्च हताश्चासन्नस्रस्रोतोरुणा इव ॥ १२०२ ॥
स द्विषां कदनं कृत्वा दिनस्यान्ते न्यवर्तत।
बाष्पायमाणस्तोकाशं हव्याशेनोज्झितं पुरम् ॥ १२०३ ॥
तादृशेप्यजिते तस्मिञ्जयाशागौरवं द्विषः।
स चौज्झीद्रमणीयस्य विनाशाज्जीवितादरम् ॥ १२०४ ॥
जाग्रत्स्वपंश्चलंस्तिष्ठन्स्नानश्नन्नथ सोरिभिः।
निर्गच्छन्नित्यमाहूतो न कैरुद्वाष्पमीक्षितः ॥ १२०५ ॥
वह्निनिर्दग्धसर्वान्नसंभारे मण्डलेखिले।
दुःसहः सहसैवाथ घोरो दुर्भिक्ष आययौ ॥ १२०६ ॥
दीर्घविप्लवसंक्षीणसंचया डामरैर्बहिः।
उत्तब्धोत्पत्तयो रुद्धसंचारा दग्धमन्दिराः ॥ १२०७ ॥

अनाप्नुवन्तो विधुरे राज्ञि राजकुलाद्धनम् ।
दुर्भिक्षे तत्र सामन्ता अपि क्षिप्रं प्रपेदिरे ॥ १२०८ ॥
वह्निनिष्ठ्यूतशेषाणि वेश्मान्यन्नाभिलाषिभिः ।
बुभुक्षार्तैर्जनैर्दत्तो ददाहाग्निर्दिने दिने ॥ १२०९ ॥
सरितां सेतवो वारिसंसेकोच्छ्वनविग्रहैः ।
दुर्गन्धाः कुणपै रुद्धघ्राणैस्तीर्णास्तदा जनैः ॥ १२१० ॥
निर्मांसनरकङ्कालकपालशकलाकुला ।
उवाह सर्वतः श्वेता क्षितिः कापालिकव्रतम् ॥ १२११ ॥
कृच्छ्रसंचारिणोर्कोशुश्यामक्षामोच्चविग्रहाः ।
व्यभाव्यन्त बुभुक्षार्ता दग्धस्थाणुनिभा जनाः ॥ १२१२ ॥
अथ प्रबन्धयुद्धेन दिनैः कापीषुणा क्षतः ।
पृथ्वीहरो मृत इति श्रुतिर्मिथ्यैव पप्रथे ॥ १२१३ ॥
गाढप्रहारविवशे तस्मिन्प्रच्छादिते जनैः ।
तां वार्तां श्रुतवान्राजा ननन्दायुद्ध चोद्धतम् ॥ १२१४ ॥
धीरेव पुंश्चली व्याजौत्सुक्यसंदर्शनेन तम् ।
जयश्रीर्लोभयन्त्यासीन्न तु भेजे समुत्सुकम् ॥ १२१५ ॥
एकान्तवामहृदयो विधिरानुकूल्यं
मिथ्या प्रदर्श्य विशिनष्ट्यनुबन्धि दुःखम् ।
अन्धीकरोति भृशमभ्रमगं ज्वलन्तं
भास्वन्महौषधिभिदे प्रकटय्य वज्रम् ॥ १२१६ ॥
दीर्घदुःखानुभूत्यन्ते यदीयागमनोत्सवम् ।
तपःफलमिव क्ष्माभृत्काङ्क्षन्नासीन्मनोरथैः ॥ १२१७ ॥
वात्सल्येनान्वितं प्रेम गौरवेण प्रियं वचः ।
औचित्येन च दाक्षिण्यं सापत्यमिव या दधे ॥ १२१८ ॥

तस्योपकरणीभूतविभूतिर्गृहिणी प्रिया ।
तस्मिन्काले महादेवी विपेदे मेघमञ्जरी ॥ १२१९ ॥
विनोदशून्यनिर्विण्णलोकयात्रं जगद्विदन् ।
प्राणै राज्येन वा कृत्यं न स किंचिन्निरैक्षत ॥ १२२० ॥
सा भर्तुर्व्यसनोदन्तैः कृशा काश्मीरसंमुखी ।
औत्सुक्याद्दत्तयात्रासीच्छान्ता फुल्लपुरान्तिके ॥ १२२१ ॥
पूर्वं तद्दर्शनाशाया दुर्वार्तायास्ततोतिथिः ।
भवन्नतोधिकं राजा दुःखावेगेन पस्पृशे ॥ १२२२ ॥
राज्ञीमज्ञातपारुष्यतयादूषितभक्तयः ।
अनुसस्रुश्चतस्रस्ताः परिवारवरस्त्रियः ॥ १२२३ ॥
अप्रत्यक्षे क्षयेप्यस्या भक्त्युद्रिक्तत्वमत्यजन् ।
तेजो नामाभवत्सूदो वन्द्यो भृत्यान्तरेधिकम् ॥ १२२४ ॥
स ह्यसंनिहितोन्यस्मिन्नह्ययातो निजं शिरः ।
तच्चितोपान्तरूढेन भङ्क्त्वा ग्राव्णाविशन्नदीम् ॥ १२२५ ॥
आहवाह्वानसंरम्भैः शोकविस्मृतिकारिणः ।
राज्ञो द्विषः कार्यवशादुपकारित्वमाययुः ॥ १२२६ ॥
स राज्यमथ निक्षेतुकामो निर्विण्णमानसः ।
व्युत्क्रान्तशैशवं पुत्रमानिन्ये लोहराचलात् ॥ १२२७ ॥
मण्डलेश्वरतां प्रज्ञेर्भ्रातृव्यं भागिकाभिधम् ।
नीत्वा च गुप्तिमकरोल्लोहरे कोषदेशयोः ॥ १२२८ ॥
वराहमूलं संप्राप्तमग्रायातः प्रियं सुतम् ।
आश्लिष्य विषयो राजा बभूवानन्दशोकयोः ॥ १२२९ ॥
राजसूनुस्त्रिभिर्वर्षैः प्रत्यायातः स्वमण्डलम् ।
स पश्यन्पितरं चान्तरसुस्थितमतप्यत ॥ १२३० ॥

खेदनम्राननो लोष्टावशेषं सोविशत्पुरम् ।
अम्बुलम्बोम्बुदो दावनिर्दग्धमिव काननम् ॥ १२३१ ॥
राज्येभ्यषिञ्चदाषाढस्याद्येहि जनकोथ तम् ।
अवादीद्राज्यतन्त्रं च कृत्स्नमुक्त्वास्रुगद्गदः ॥ १२३२ ॥
श्रान्ताः पितृपितृव्यास्ते न यां वोढुमशक्नुवन् ।
धुरमुद्वह तां वीर त्वयि भारोयमर्पितः ॥ १२३३ ॥
साम्राज्यप्रक्रियामात्रपात्रं पुत्रं नृपो व्यधात् ।
न त्वार्पिपदधीकारं तस्मिन्दैवविमोहितः ॥ १२३४ ॥
अभिषेकविधावेव राजसूनोः शमं ययुः ।
पुरोपरोधावग्राहव्याधिचौराद्युपद्रवाः ॥ १२३५ ॥
संपन्नसस्या च तथा देवी संववृते मही ।
दुर्भिक्षं श्रावणे मासि यथावत्प्रशमं ययौ ॥ १२३६ ॥
अत्रान्तरे सिंहदेवो रणे कुर्वन्नरिक्षयम् ।
कर्णेजपैर्जनयितुर्द्रोग्धायमिति सूचितः ॥ १२३७ ॥
कोपादविमृषंस्तत्त्वं स बन्धुं तं व्यसर्जयत् ।
कय्यात्मजं राजसूनुस्तत्तु प्रागेव बुद्धवान् ॥ १२३८ ॥
कोपस्मितोत्कटस्याग्रे स तस्याप्रतिभोभवत् ।
निनाय रक्षामात्रेण पार्थिवाज्ञाममोघताम् ॥ १२३९ ॥
अभुक्तवान्मनस्तापात्प्रत्ययोत्पत्तये पितुः ।
साकं तेन सुतोन्येद्युर्गन्तुं प्रावर्ततान्तिकम् ॥ १२४० ॥
आक्षेप्तुं शङ्कितोशक्य इति मत्वा स मन्त्रिभिः ।
मार्गाच्यवर्तयत तं पिता मिथ्या प्रसादयन् ॥ १२४१ ॥
अन्तस्तु निश्चिकायेति प्रविश्यातर्कितागमः ।
बद्ध्वैनं स्थापयिष्यामि कारायामिति सोनिशम् ॥ १२४२ ॥

धिग्राज्यं यत्कृते पुत्राः पितरश्चेतरेतरम् ।
शङ्कमाना न कुत्रापि सुखं रात्रिषु शेरते ॥ १२४३ ॥
पुत्रपत्नीसुहृद्भृत्या येषां शङ्कानिकेतनम् ।
विस्रम्भभूर्भूपतीनां कस्तेषामिति वेत्ति कः ॥ १२४४ ॥
साह्याभिधानप्रख्यातकुग्रामोपान्तवासिनः ।
खलपालस्य तनयः स्थानकाख्यस्य कस्यचित् ॥ १२४५ ॥
शैशवे पाशुपाल्येन वर्धितो डामरोद्भवैः ।
गृहीतशस्त्रं तन्नित्यं क्रमाट्टिक्कस्य लब्धवान् ॥ १२४६ ॥
प्रथमाब्दात्प्रभृत्यात्तदूत्यो भूभर्तुरातताम् ।
प्रययावुत्पलो नाम वैरिविच्छेदमिच्छतः ॥ १२४७ ॥
स हि भिक्षाचरं टिक्कमथ व्यापादयेत्यमुम् ।
जगादाङ्गीकृतैश्वर्यदानष्टिक्कोपवेशने ॥ १२४८ ॥
कृतप्रतिश्रवं तस्मिन्नर्थे तं च महर्द्धिभिः ।
दानैरुपाचरद्भूपतिनाश्वाप्ययोजयत् ॥ १२४९ ॥
भोगलोभप्रभुद्रोहचिन्तादोलायमानधीः ।
स कार्यं परिहार्यं वा न कृत्यं निश्चिकाय तत् ॥ १२५० ॥
प्रासोष्टापत्यमत्रान्तस्तद्बधूः कार्यतो नृपः ।
ततश्च प्राहिणोत्तस्यै पितेव प्रसवोचितम् ॥ १२५१ ॥
सा तस्यात्युपचारस्य कारणं परिशङ्किता ।
पतिं पप्रच्छ निर्बन्धात्सोपि तस्यै व्यवर्णयत् ॥ १२५२ ॥
न कार्यः स्वामिनो द्रोहः कृते वास्मिन्स सुस्सलः ।
त्वामेव शनकैर्हन्याद्रोग्धायमिति चिन्तयन् ॥ १२५३ ॥
वरं स एव विश्वास्य व्यापाद्यस्तत्र चेदधः ।
भवेत्ते स्वामिपुत्रादिकुटुम्बं स्याद्विभूतिभाक् ॥ १२५४ ॥

भार्ययेति प्रेर्यमाणः स निश्चयविपर्यये ।
टिक्कं विहितवृत्तान्तं कृत्वा बद्धोद्यमः कृतः ॥ १२५५ ॥
गतागतानि कुर्वाणे दुर्भुक्षावथ पार्थिवः ।
स पुत्र इव विश्वासं ययौ दैवविमोहितः ॥ १२५६ ॥
विपर्यस्ता मतिः पुत्रे विश्वासो वैरिसंश्रिते ।
जायते क्षीणभाग्यानां को नाम न विपर्ययः ॥ १२५७ ॥
वैधेयैः स्वार्थलोभान्धैर्यद्वानर्थसमागमः ।
सरघोपद्रवः क्षौद्रलुब्धैरिव न चिन्त्यते ॥ १२५८ ॥
तं पीडितं प्रज्ञिना च राज्ञा चावनतिं ततः ।
उत्पलोकारयट्टिक्कं नीवीं चादापयत्सुतम् ॥ १२५९ ॥
राजाथ देवसरसं जितं संत्यज्य कार्तिके ।
वाष्ट्रकाख्यमगाद्ग्रामं खेरीविषयवर्तिनम् ॥ १२६० ॥
स कल्याणपुराभ्यर्णे रणैस्तैस्तैर्विलक्षताम् ।
भिक्षुकोष्टेश्वरमुखानपि निन्ये महाभटान् ॥ १२६१ ॥
मध्याद्भिक्षाचरादीनां सुज्जि[1] काककुलोद्भवम् ।
जीवग्राहं महावीरं युधि जग्राह शोभकम् ॥ १२६२ ॥
भवकीयस्य कृत्वादौ विजयस्य पराभवम् ।
भूभुजा तद्वृहा दग्धाः कल्याणपुरवर्तिनः ॥ १२६३ ॥
दग्धे वडौसके भिक्षाचरो नष्टाश्रयो व्यधात् ।
त्यक्त्वा तां क्षमां शमालायां ग्रामे काकरुहे स्थितिम्॥१२६४॥
अनुजो भवकीयस्य विजयस्य भयान्नृपम् ।
संश्रितस्तेन तूग्रेण बद्ध्वा कारागृहेर्पितः ॥ १२६५ ॥
भूरिसैन्यानुगं शूरपुरे विन्यस्य रिल्हणम् ।
आस्कन्दाशङ्किनीं राजा चक्रे राजपुरीमपि ॥ १२६६ ॥

---

१ सुज्जिः इत्युचितम् ।

इत्थमुद्दण्डया वृत्त्या खण्डितोच्चण्डडामरः ।
स्तोकावशेषं सोपश्यत्कर्तव्यमरिनिर्जयम् ॥ १२६७ ॥
भिक्षाचरो लवन्याश्च शक्तिक्षयमुपागताः ।
विदेशगमनं भीता रिपौ बलिनि मेनिरे ॥ १२६८ ॥
किमप्यभाग्यावतारैर्भिक्षुपक्षजुषां यतः ।
जीवतामप्यनुल्लासान्निर्जीवत्वमिवाययौ ॥ १२६९ ॥
स सोमपालकौटिल्यं स्मरन्कुर्यां हिमात्यये ।
श्मशानोर्वीं राजपुरीमिति ध्यायन्न्यवर्तत ॥ १२७० ॥
शान्तप्रायस्वदेशोर्वीविप्लवस्य महीपतेः ।
तस्यार्णवान्तक्रमणप्रतीतिः समभाव्यत ॥ १२७१ ॥
शतैकीयो योवशिष्टो विप्लवक्षयिते जने ।
वर्षे वर्षे स तद्राज्ये युगदीर्घं त्वमन्यत ॥ १२७२ ॥
असुखत्रासदारिद्र्यप्रियनाशादि वैशसैः ।
स राज्यकालः सर्वस्य परितापावहो ह्यभूत् ॥ १२७३ ॥
नरः पौरुषनैष्ठुर्यशठत्वेन करोति किम् ।
विधातृवृत्तिवैचित्र्यपराधीनासु सिद्धिषु ॥ १२७४ ॥
पुरोभूतं कंचित्परिहरति राशिं तम इव
व्यतीते कस्मिंश्चिद्धरिरिव विवृत्यास्यति दृशम् ।
समुल्लङ्घ्यासन्नं कचन नृपतिं दर्दुर इव
क्रमेत्स्रष्टुर्दृष्टः स्फुटमिति गतीनामनियमः ॥ १२७५ ॥
विश्वासनिहतान्निन्दन्नुच्चलादीन्पुरावसत् ।
नित्यं विकोशशस्त्रो यः पुराविद्भ्यो निशम्य च ॥१२७६॥
विदूरथादिवृत्तान्तं नादात्कोलिक्षणे ब्रुवन् ।
स्त्रीषु संभुज्यमानासु विश्वासविशदां दृशम् ॥ १२७७ ॥

स बन्धाविव निर्बन्धाद्विशश्वास यदुत्पले ।
तत्र संभाव्यते केन दैवादन्यो विमोहकृत् ॥ १२७८ ॥
टिक्कादयो भूमिपतेः सुज्ञेर्वान्यतमे[1] हते ।
त्वां तुल्यकार्यकर्तारं विद्म इत्यूचुरुत्पलम् ॥ १२७९ ॥
सुज्ञिर्न व्यश्वसीत्तस्मिन्स जिघांसुस्तु भूभुजम् ।
तत्र तत्राभवत्सज्ञः प्रसङ्गं नासदत्पुनः ॥ १२८० ॥
प्रतिश्रुतविलम्बेन समन्योरथ भूपतेः ।
प्रत्ययोत्पत्तये देवसरसान्नीविमात्मजम् ॥ १२८१ ॥
व्याघ्रप्रशस्तराजादींस्तीक्ष्णांश्चात्मसरान्परान् ।
आदाय कार्यमेतैर्मे सिध्येदित्युक्तवान्नृपम् ॥ १२८२ ॥
उच्चित्योच्चित्य सेनाभ्यो गृहीतैः साहसक्षमैः ।
शतैः समं त्रिचतुरैः पत्तीनामेकदाययौ ॥ १२८३ ॥
समयान्वेषिणो हन्तुस्तस्यासन्नस्य सर्वदा ।
प्रियाहारादिदानेन हन्तान्तःप्रीतिकार्यभूत् ॥ १२८४ ॥
तुरंगं मन्दुराचक्रवर्त्याख्यं नगरस्थितम् ।
अस्वस्थमुल्लाघयितुं तुरगव्यसनी नृपः ॥ १२८५ ॥
स लक्ष्मकप्रतीहारकय्यात्मजमुखान्निजान् ।
पार्श्वाद्विसृष्टवानासीत्क्षणे तस्मिन्मितानुगः ॥ १२८६ ॥
शृङ्गारो लक्ष्मकापत्यं निशम्यान्तैर्निवेदितम् ।
व्यधाच्छ्रुतिपथे राज्ञस्तदुत्पलचिकीर्षितम् ॥ १२८७ ॥
विरुद्धे बन्धुधीर्दृष्टहिंसारम्भेपि संभवेत् ।
आसन्नजीवितान्तस्य जन्तोः सूनापशोरिव ॥ १२८८ ॥
स शापो गान्धार्यास्तदपि सरुषो भाषितमृषे-
स्त उत्पाताश्चक्षुः स्वमपि तदभौमं प्रकटयन् ।

---

१ अन्यतरे इत्युचितम् ।

कुलान्ते तन्त्राणाक्षममकृत वैकुण्ठमपि त-
द्विदन्नप्यन्यत्वं क इव भवितव्यस्य कुरुताम् ॥ १२८९ ॥
मिथ्यैतदित्यधिक्षिप्य क्षितिपालः प्रदर्शयन्।
तमङ्गुल्योत्पलादींस्तानग्रस्थानेवमब्रवीत् ॥ १२९० ॥
द्रोग्धुः सुतोभवद्योगादनिच्छन्स्वास्थ्यमेष मे।
त्वां दुष्टमुत्पलाचष्टे स्वेनान्यैर्वाथ चोदितः ॥ १२९१ ॥
ते छादयन्तः स्मेरास्या धार्ष्ट्येन भयवैकृतम्।
वक्ति देवो यदस्माभिर्वाच्यमित्येवमूचिरे ॥ १२९२ ॥
निर्यातेष्वथ तेष्वीषत्साशङ्क इव निश्चलान्।
द्वास्थेनाकारयद्वित्रानन्तिके मुख्यशस्त्रिणः ॥ १२९३ ॥
उन्मनाश्च किमप्यासीद्विनिःश्वस्य स चिन्तयन्।
सान्नुश्च न रतिं लेभे नृत्तगीतादिदर्शने ॥ १२९४ ॥
मेने वैदेशिकप्रायानाप्तानपि धृतभ्रमः।
पुण्यक्षये पिपतिषुर्वैमानिक इवाम्बरात् ॥ १२९५ ॥
राजान्तरङ्गाः साशङ्काः प्रभौ शाठ्येन मोहिते।
पूत्कारमैच्छन्दातारमन्यं केचिदचेतनाः ॥ १२९६ ॥
अयमेव स कालस्य बलात्कवलनग्रहः।
विदन्तोपि यदायान्ति जन्तवः कृत्यमूढताम् ॥ १२९७ ॥
सर्वान्तरक्षणेष्वस्तचक्षुषो दिवसद्वयम्।
उत्पलाद्याश्च साशङ्काः कथमप्यत्यवाहयन् ॥ १२९८ ॥
रहःक्षणप्रार्थिनस्तांस्तृतीयेह्यब्रवीन्नृपः।
स्नात्वा प्रत्यूषे तद्यूयं भोक्तुं यात मुहुर्गृहम् ॥ १२९९ ॥
देवतार्चनपर्यन्तमवसायाह्निकं विधिम्।
आजुहावोत्पलं दूतैर्मध्याह्नेथ रहःस्थितः ॥ १३०० ॥

कार्यसिद्धिं श्रद्दधानो वैजन्याद्राजसद्मनः ।
राज्ञोभ्यर्णं स साशङ्कद्वास्थरुद्धानुगोविशत् ॥ १३०१ ॥
प्रावेशयद्बारि रुद्धं व्याघ्रं तदनुजं नृपः ।
शेषाणामपि भृत्यानामादिदेश बहिःस्थितिम् ॥ १३०२ ॥
विलम्बमानेष्वासेषु केषुचित्सरुषो वचः ।
सत्यं तस्योद्यमावास्तां सोत्र द्रोग्धा य इत्यपि ॥ १३०३ ॥
ताम्बूलदायकः प्रौढवयास्तेनावशेषितः ।
सांधिविग्रहिको विद्वान्राहिलाश्चान्तिके परम् ॥ १३०४ ॥
दूतौ टिक्कस्याघदेवतिष्टवैश्याभिधावुभौ ।
तत्र प्रसङ्गादासातामज्ञातोत्पलसंविदौ ॥ १३०५ ॥
वाडौत्सः सुखराजाख्यो डामरो भिक्षुसंमतः ।
प्रयास्यति प्रभोर्दृष्ट्वा पादौ तत्कार्यसिद्धये ॥ १३०६ ॥
इत्युक्तवांस्तेष्वहःसु तं नृपं नातिदूरगम् ।
ससैन्यं डामरं चक्रे स्वस्य त्राणार्थमुत्पलः ॥ १३०७ ॥
तथाचैनं तस्थिवांसं कृत्यमस्त्यमुनेति च ।
उक्त्वा प्रशस्तराजं तं पार्श्वं प्रावेशयद्द्रुतम् ॥ १३०८ ॥
प्रविष्टो निर्जनं बाह्यमाकलय्य स मण्डपम् ।
अलक्ष्यमाणव्यापारो द्वारमर्गलितं व्यधात् ॥ १३०९ ॥
स्नानार्द्रकेशं शीतालुतया प्रावारवेष्टितम् ।
कृत्वा कृत्स्नं वपुः कृष्टशस्त्रीकं विष्टरोपरि ॥ १३१० ॥
आसीनं वीक्ष्य नृपतिं प्रसङ्गो नेदृशो भवेत् ।
विज्ञप्तिं कुरु भूभर्तुरित्यूचे व्याघ्र उत्पलम् ॥ १३११ ॥
स तया संज्ञया व्यग्रः पादप्रणतिकैतवात् ।
राज्ञोग्रमेत्य तच्छस्त्रीं विष्टरस्थामपाहरत् ॥ १३१२ ॥

विकोशां चाकरोत्पश्यंस्तां तथोद्भ्रान्तलोचनः ।
प्राह स्म हा धिक्किं द्रोह इति यावद्वचो नृपः ॥ १३१३ ॥
प्राहरत्प्रथमं तावत्सव्ये पार्श्वे तयैव सः ।
तस्य प्रशस्तराजेन मूर्धनि प्रहृतं ततः ॥ १३१४ ॥
व्याघ्रेणाथ क्षतं वक्षस्ताभ्यामेवासकृत्तदा ।
प्रहृतं तत्र स पुनः प्राहरन्न द्विरुत्पलः ॥ १३१५ ॥
पूर्वयैव प्रहृत्या हि च्छिन्नपार्श्वास्थिमालया ।
मेने कृष्टान्त्रतन्त्रीकं स तं प्रोषितजीवितम् ॥ १३१६ ॥
गत्वा तमोरिं पूत्कर्तुमिच्छन्व्याघ्रेण राहिलः ।
पृष्ठे कृताहतिर्द्वित्रा नालिका नोज्झितोसुभिः ॥ १३१७ ॥
ताम्बूलदायकस्त्यक्त्वा कङ्कालाद्यज्जको[1] व्रजन् ।
दीनो निजेभ्यः कारुण्यादुत्पलेनैव रक्षितः ॥ १३१८ ॥
अन्तःसमुत्थिते क्षोभे बाह्यमण्डपवर्तिभिः ।
टिक्ककाद्यैः कृता लुण्ठिर्द्रोहगृह्यैरुदायुधैः ॥ १३१९ ॥
उत्पलो निहतो राज्ञेत्यवेत्य कटकस्थितैः ।
बहिःस्थान्हन्यमानान्स्वान्समाश्वासयितुं ततः ॥ १३२० ॥
रक्तार्द्रशस्त्रं संदर्श्य तमोरेर्वपुरुत्पलः ।
ऊचे मया हतो राजा न त्याज्यातश्चमूरिति ॥ १३२१ ॥
तच्छ्रुत्वा दुःश्रवं राजभृत्याः क्वापि भयाद्ययुः ।
द्रोहानुगास्त्वङ्गनान्तर्लब्धोल्लासा व्यधुः स्थितिम् ॥ १३२२ ॥
निर्यान्तो मण्डपात्तीक्ष्णा निजघ्नुर्नागकाभिधम् ।
द्वारात्प्रविष्टं निष्कृष्टकृपाणीकं नृपानुगम् ॥ १३२३ ॥
भूपालशक्यापालस्य त्रैलोक्याख्यस्य सेवकः ।
निन्दन्द्रोहं टिक्ककाद्यैर्द्वास्थश्चैको व्यपादितः ॥ १३२४ ॥

---

१ करङ्काद्यज्जको इति स्यात् ।

उत्कृष्टं नष्टसत्त्वानां मध्ये राजानुजीविनाम् ।
सखेटकासिं धावन्तं भावुकान्वयभूषणम् ॥ १३२५ ॥
दृष्ट्वा सहजपालाख्यं पार्श्वद्वारेण निर्ययुः ।
तीक्ष्णाः स त्वपतद्भूमौ तद्भृत्यप्रहृतिक्षतः ॥ १३२६ ॥
जाते कुकीर्तिकालुष्यपात्रे राजात्मजव्रजे ।
वैलक्ष्यक्षालनं सिद्धं तस्य स्वक्षतजैः परम् ॥ १३२७ ॥
हृतदैशिकसंवादिदेहो[1] राजात्मजभ्रमात् ।
विद्वान्द्विजन्मा नोनाख्यस्तीक्ष्णपक्षैः पुरो गतः ॥ १३२८॥
अक्षतान्व्रजतो वीक्ष्य तीक्ष्णान्ग्रामान्तरोन्मुखान् ।
चित्रार्पिता इव क्रोधान्नाधावन्केपि शस्त्रिणः ॥ १३२९ ॥
राजवंश्या महीपालप्रीतिपात्रपथा ययुः ।
स्थगयन्तोङ्गनं स्थूलकाया जनविवर्जितम् ॥ १३३० ॥
तांस्तान्कापुरुषान्हर्षदेवोदन्तात्प्रभृत्यलम् ।
स्मृत्वा च कीर्तयित्वा च कृतभारग्रहा इव ॥ १३३१ ॥
जातदुष्कृतसंस्पर्शाः खेदात्कर्तुं न शक्नुमः ।
पापात्पापीयसां येषां नामग्रहणसाहसम् ॥ १३३२ ॥
अङ्गनान्मण्डपारूढिं मन्वानाः पौरुषं महत् ।
पापिनः केपि तन्मुख्या ददृशुः स्वामिनं हतम् ॥१३३३॥
अधरेणास्रसंस्कारलेशावेशप्रकम्पिना ।
वदन्तं दन्तदष्टेन स्वान्तस्यान्तेनुतप्ततम् ॥ १३३४ ॥
वञ्चितः कथमेषोहमिति नामेति चिन्तया ।
निःस्पन्दे जीवितान्तेपि तथैव दधतं दृशौ ॥ १३३५ ॥
श्यामायमानं बाष्पेण व्रणवक्त्रैरुदञ्चता ।
अन्तःप्रशान्तामर्षाग्निशेषधूमलतात्विषा ॥ १३३६ ॥

---

१ हतो इति स्यात् ।

आननस्यास्फुटीभूतचन्दनोल्लेखकुङ्कुमम्।
सक्तया लिखितस्येव घनक्षतजलाक्षया ॥ १३३७ ॥
आश्यानास्रजटीभूतकेशं नग्नं भुवि च्युतम्।
पर्यस्तपाणिचरणं स्कन्धाग्रालम्बिकंधरम् ॥ १३३८ ॥
कुलकम् ॥
तं वीक्ष्य नोचितं किंचिदाचेरुस्ते नराधमाः।
वैजन्यस्य फलं भुङ्क्ष्वेत्यावेगादधिचिक्षिपुः ॥ १३३९ ॥
बद्ध्वा तुरङ्गे युग्ये वा न तैर्नीतश्चिताग्निसात् ॥
कर्तुं न वा पारितः स प्राणत्राणाय धावितैः ॥ १३४० ॥
आस्तां विलम्बसाध्यं वा कर्मैतद्भ्राष्ट्रदारुसात्।
सज्जाग्नि चाग्निसाद्देहमपि कश्चिच्च नाकरोत् ॥ १३४१ ॥
राजवाजिनमेकैकं तेध्यारुह्य पलायिताः।
निर्लुण्ठितस्तु कटको व्रजन्ग्रामेषु डामरैः ॥ १३४२ ॥
न पुत्रः पितरं पुत्रं पिता वा प्रत्यपालयत्।
मृतं हतं लुण्ठितं वा प्रचलन्सहिमेध्वनि ॥ १३४३ ॥
न कोपि शस्त्रभृत्सोभूत्स्मृत्वा मानोन्नतिं पथि।
परैराक्षिप्यमाणो यः शस्त्रं वस्त्रं च नात्यजत् ॥ १३४४ ॥
लवराजयशोराजद्विजौ व्यायामवेदिनौ।
कान्दश्च राजा निहता वीरवृत्त्या त्रयः परम् ॥ १३४५ ॥
अदूरादुत्पलाद्यास्तु कटकं वीक्ष्य विद्रुतम्।
प्रविष्टावाष्टुवं छित्त्वा शिरो निन्युर्महीपतेः ॥ १३४६ ॥
गतेषु देवसरसं तेषु छिन्नशिरा नृपः।
हतश्चौर इव प्राप ग्राम्याणां प्रेक्षणीयताम् ॥ १३४७ ॥
एवं द्रोहैस्तृतीयाब्दामावास्यायां स फाल्गुने।
पञ्चपञ्चाशतं वर्षानायुषोतीतवान्हतः ॥ १३४८ ॥

विलासशयनस्थस्य सिंहदेवस्य सा श्रुतौ ।
प्रेमाख्येनैत्य दुर्वार्ता धात्रीयेण व्यधीयत ॥ १३४९ ॥
संभाव्यते योनुभावः सशस्त्रस्याप्रियश्रुतौ ।
हृतशस्त्रोपि तं प्राप स तदा पितृवत्सलः ॥ १३५० ॥
मोहलुप्तस्मृतिः स्मृत्वा चिरादुद्गतचेतनः ।
तत्तद्दुःखाहतधृतिर्विललाप स्फुटास्फुटम् ॥ १३५१ ॥
मदर्थं कुर्वता राज्यं प्रयत्नादपकण्टकम् ।
अधमे किं महाराज त्वयात्मा परिभावितः ॥ १३५२ ॥
अहेतेः पश्यतः शत्रूनन्ते वैरविशुद्धये ।
अपि ते मानिनोगच्छंस्तात संभावनाभुवम् ॥ १३५३ ॥
त्वया निषेधिते वैरे पिता भ्राता च ते दिवि ।
निर्मन्युः संप्रति त्वं तु वर्तसे मन्युदुःस्थितः ॥ १३५४ ॥
अनरण्यकृपद्रोणजामदग्न्यादिषु स्पृहाम् ।
कुल्यक्षालितवैरेषु मा कार्षीः कांचन क्षणम् ॥ १३५५ ॥
शोच्यस्त्वदाश्रयो मन्युरहं शोधयिता नृप ।
दूये न तत्र यातं यत्रैलोक्यमभियोज्यताम् ॥ १३५६ ॥
वात्सल्योत्पुलकस्मेरं स्निग्धोक्तिमधुरं मुखम् ।
मद्दर्शने यदासीत्ते तन्मे पुर इवाधुना ॥ १३५७ ॥
इति चान्यच्च विलपन्गाम्भीर्यालक्ष्यवैकृतः ।
ह्रीशोकभयमूकान्स ददर्शाप्तान्पितुः पुरः ॥ १३५८ ॥
अशिक्षयत यन्मन्युर्दाक्षिण्यं निरुरोध तत् ।
तथाप्येवं स तानूचे किंचिदाक्षेपकर्कशम् ॥ १३५९ ॥
कोशैः सद्वंशतां वीक्ष्य कुरुतः सत्क्रियां गताः ।
धिग्भवन्तश्च शस्त्रं च तातस्यान्ते विपर्ययम् ॥ १३६० ॥

यन्मत्पितृव्ये निहते कृतमुच्छिष्टजीविभिः।
मान्यानां भवतां सिद्धं हा धिक्तदपि नाधुना ॥ १३६१ ॥
इत्युपालम्भमानस्तान्द्वित्रैरन्तिकमागतैः।
स्वकैरमात्यैः कर्तव्यश्रुतयेवहितः कृतः ॥ १३६२ ॥
प्रस्थानं लोहरे केचिदूचुः संत्यज्य मण्डलम्।
त्वरां च तत्र रात्र्यन्ते वदन्तो भैक्षवं भयम् ॥ १३६३ ॥
गर्गात्मजं पञ्चचन्द्रमालम्ब्य लहरस्थितम्।
द्वैराज्याचरणायान्ये धीरप्राया बभाषिरे ॥ १३६४ ॥
नहि स्वगृहवद्भिक्षोर्विविक्षोर्नगरान्तरम्।
अज्ञायि प्रत्यवस्थानं केनाप्यसति सुस्सले ॥ १३६५ ॥
आत्मन्यसंभावनया तादृशां मन्त्रिणां नृपः।
सान्तःखेदं श्वो विधेयं द्रक्ष्यथेत्यब्रवीद्वचः ॥ १३६६ ॥
कालापेक्षापरित्यक्तपितृव्यापत्तिदुःस्थितः।
स कोशादिष्वथादिक्षद्रक्षिणस्त्राणदीक्षितान् ॥ १३६७ ॥
इतश्चेतश्च बम्भ्रम्यमाणैः प्रोद्यत्प्लुतस्वरम्।
अन्योन्याख्यायिभिर्लोकैः पुरं मुखरतामगात् ॥ १३६८ ॥
मत्तवेतालमालेव कालरात्र्याकुलेव च।
बभूव सा यामवती सर्वभूतभयावहा ॥ १३६९ ॥
दीपैर्निर्वातनिष्कम्पैश्चिन्तास्पन्दैश्च मन्त्रिभिः।
तिष्ठन्परिवृतो राजा त्वन्तरेवमचिन्तयत् ॥ १३७० ॥
निर्द्वारे सतमस्युग्रमारुते शून्यवेश्मनि।
तातोपि निहतः शून्ये मयि जीवत्यनाथवत् ॥ १३७१ ॥
कष्टमेतादृशासह्यवैशसक्षालनावधि।
कथं गोष्ठीषु शक्ष्यामि द्रष्टुं मानवतां मुखम् ॥ १३७२ ॥

विरोधिवशवर्तिभ्यो देशेभ्यः सैन्यनायकः ।
स हिमैरेव दुर्लङ्घ्यैः कथमेष्यति वर्त्मभिः ॥ १३७३ ॥
इत्थं विमृषतस्तस्य तत्तत्तीव्राभिषङ्गिणः ।
ययौ भीतिमतो भीमा कथंचित्सा निशीथिनी ॥ १३७४ ॥
प्रातश्चतुष्किकां पौरसमाश्वासाय निर्गतः ।
नष्टं कटकमन्वेष्टुं सोश्वारूढान्व्यसर्जयत् ॥ १३७५ ॥
मार्गानसूचीसंचारैस्तुषारैर्विवरोज्झितान् ।
आश्लिष्टवसुधामेघाः कर्तुं प्रारेभिरे ततः ॥ १३७६ ॥
नामाप्यलब्ध्वा सैन्यस्य मोघसैन्येषु दूरतः ।
निवृत्तेषु नियुक्तेषु विमृष्य नृपतिः क्षणम् ॥ १३७७ ॥
यद्यद्येनाहृतं तत्तत्परित्यक्तं मयाधुना ।
दत्तं चारीञ्श्रितवतामभयं सागसामपि ॥ १३७८ ॥
इत्याज्ञां भ्रमयामास पटहोद्घोषणैः पुरे ।
साशीर्घोषास्ततः पौरास्तत्रारज्यन्त सर्वतः ॥ १३७९ ॥

तिलकम् ॥

अनन्तरनृपाचारवैधर्म्यौंकारकल्पया ।
तया सोनघया वृत्त्या फलं सद्योनुभावितः ॥ १३८० ॥
शतादप्यूनसंख्यैर्यः स्थितवाननुगैः समम् ।
अनुरागहृतैर्लोकैस्तत्कालं पर्यवार्यत ॥ १३८१ ॥
प्रियोक्त्यावेदनं प्रीतिदायोपायः प्रभोः पुरः ।
भजँल्लोकस्याभ्यमन्त्रिपदवीं लक्ष्मकोग्रहीत् ॥ १३८२ ॥
राज्यं शय्यां नयत्येवं प्राज्ञे राज्ञि नयक्रमैः ।
याति मध्यंदिने भिक्षुर्विविक्षुः पुरमाययौ ॥ १३८३ ॥
तस्य डामरपौराश्ववारलुण्ठाकसंकुलः ।
अदृष्टपूर्वो ददृशे सैन्यव्यतिकरस्तदा ॥ १३८४ ॥

हतं श्रुत्वा रिपुं राज्योत्सुकः स नगरं व्रजन्।
राजा काकात्मजेनेति तिलकेनाभ्यधीयत ॥ १३८५ ॥
हतः समस्तविद्वेष्यः स दैवाद्यदि सुस्सलः।
कथं प्रकृतयो जह्युर्गुणवन्तं तदात्मजम् ॥ १३८६ ॥
पुरप्रवेशे का राजंस्तस्मादेकमहस्त्वरा।
एहि पद्मपुरं यामो मार्गं रोद्धुं विरोधिनाम् ॥ १३८७ ॥
आगच्छन्तो नष्टसैन्याः सुज्जिमुख्या महाभटाः।
निहता यदि वा रुद्धास्तत्र सायुधवाहनाः ॥ १३८८ ॥
प्रविष्टोसि ततो न्यस्तशस्त्रो द्वित्रैर्दिनैर्ध्रुवम्।
नगरं नगरौकोभिः स्वयमभ्यर्थितागमः ॥ १३८९ ॥
युग्मम् ॥
अलमेतैर्जरन्मत्रैर्वदन्त इति चक्रिरे।
स च कोष्टेश्वराद्याश्च स्सेरास्तस्यावधीरणाम् ॥ १३९० ॥
राज्यं विदद्भिः संप्राप्तांस्तांस्ताञ्शासनपट्टकान्।
द्रुतमर्थयमानैश्च विलम्बं कारितो निजैः ॥ १३९१ ॥
अतो बहुहिमापातविवशाशेषसैनिकः।
आसदन्नगरोपान्तं समयेन स तावता ॥ १३९२ ॥
एतस्मिन्नन्तरे लब्धे निःसैन्यस्य ससैनिकः।
गर्गात्मजः पञ्चचन्द्रो नृपतेः पार्श्वमाययौ ॥ १३९३ ॥
हतस्वामिपरित्यागमन्युक्षालनकाङ्क्षिभिः।
राजपुत्रैः समं सोथ वीरो योद्धुं विनिर्ययौ ॥ १३९४ ॥
असंभावनसंग्रामान्वीक्ष्य तान्भिक्षुसैनिकाः।
यावत्प्रारेभिरे योद्धुं तावत्किमपि सर्वतः ॥ १३९५ ॥

---

१ संप्राप्तं इत्युचितम्।

क्षणेनैव ययुर्भङ्गं तांस्तान्वीक्ष्य हतान्निजान् ।
न संस्तम्भयितुं शेकुः स्वचमूश्च पलायिनीः ॥ १३९६ ॥
सेनानाथाश्च ये मुख्या भिक्षुपृथ्वीहरादयः ।
अदृष्टपूर्वं संत्रासं तेप्यशस्त्रिवदाययुः ॥ १३९७ ॥
विद्रवन्तोनुयाताः स्युस्ते चेद्दूरं नृपानुगैः ।
तन्नूनमवशिष्येत क्षणादेव न किंचन ॥ १३९८ ॥
वैमुख्यं तेषु यातेषु चिरात्सांमुख्यमाययौ ।
नवभूभृत्प्रभावेण नगरे विधुरे विधिः ॥ १३९९ ॥
अन्यथा कलितो लोकैरन्यथा दैवयोगतः ।
इत्थं राज्ञोर्द्वयोरासीद्विजयावजयक्रमः १४०० ॥
कंचिन्निपातयति बद्धपदं क्षणेन
कंचित्परं पिपतिषुं नयति प्ररूढिम् ।
संकल्पनिर्विषयचित्रतरानुभाव
ओघोम्भसामिव तटं पुरुषं विधाता ॥ १४०१ ॥
अथ तत्तद्भयस्थानशान्तः सुज्जिर्दिनात्यये ।
दावव्याप्ताद्रिनिष्क्रान्तो निःसहोहिरिवाययौ ॥ १४०२ ॥
मेधाचक्रपुरग्रामस्थितः श्रुत्वा हतं नृपम् ।
स हि संमन्त्र्य राज्यन्तर्नोत्तस्थाववसत्परम् ॥ १४०३ ॥
रिल्हणादीन्स्थिताञ्शूरपुरादौ सैन्यनायकान् ।
प्रतीक्षमाणस्तैः साकं निर्बाधं नगरेविशत् ॥ १४०४ ॥
तमिस्रायां प्रत्यभिज्ञाकृते तेषामनश्वरान् ।
स्वावासपृष्ठे ज्वलतो दीपानास्थापयत्ततः ॥ १४०५ ॥
वैमत्यात्ते तु पत्तीनां विद्रुतानां पृथक् पृथक् ।
निशि क्वापि परिभ्रष्टा न तत्कटकमाययुः ॥ १४०६ ॥

प्रत्यूषे प्रचलंस्तैस्तैः पृष्ठलग्नैः स डामरैः ।
न मुहूर्तमपि त्यक्तः प्रहरद्भिरितस्ततः ॥ १४०७ ॥
वृद्धस्त्रीबालभूयिष्ठान्सहप्रस्थायिनो जनान् ।
ययौ रक्षन्पुरः कृत्वा पशुपालः पशूनिव ॥ १४०८ ॥
पञ्चशत्या हयारोहैः सह व्यावृत्य तिष्ठता ।
कंचित्क्षणं तेन रक्षा तेषां कर्तुमशक्यत ॥ १४०९ ॥
द्राक्षाषण्डद्रुमव्यूहसंबाधेध्वन्यसाध्वसैः ।
बाध्यमानोरिभिर्लोकं सोत्याक्षीत्तु पदे पदे ॥ १४१० ॥
हतस्य स्वामिनः स्वामिसूनोश्च व्यसनस्थितेः ।
आनृण्यकाङ्क्षिणा तेन तत्र ह्यात्मैव रक्षितः ॥ १४११ ॥
येषां प्राणपरित्यागे निश्चयं बध्नतामपि ।
न योग्यकालापेक्षास्ति किं तैर्हिंस्रपशूपमैः ॥ १४१२ ॥
हन्तुं तन्नष्टमायान्तं रुद्ध्वा पद्मपुरान्तिकम् ।
अवसण्डामराः क्रूराः खड्वीविषयौकसः ॥ १४१३ ॥
खेरीतलालशाग्रामादुत्थाय पृथुसैनिकः ।
व्रजंस्तेनाययौ तत्र प्रसङ्गे श्रीवकः पथा ॥ १४१४ ॥
तमनष्टानुगं सुज्ञिरसाविति विशङ्किताः ।
निपत्य ते विदधिरे हतलुण्ठितसैनिकम् ॥ १४१५ ॥
मेरुश्च सज्जनश्चाश्ववारौ तत्राहवे हतौ ।
क्षतो वट्टात्मजो मल्लो दिवसैर्यो व्यपद्यत ॥ १४१६ ॥
उदीपविहतश्वभ्रवहत्सलिलसंकटम् ।
उदीपपूरवालाख्यं स्थानं तत्र क्षणेभवत् ॥ १४१७ ॥
युद्ध्वा युद्ध्वा प्रचलतस्तत्र पद्मपुराद्बहिः ।
रुद्धसैन्यस्य विशिखः श्रीवकस्याविशद्बलम् ॥ १४१८ ॥

प्रहारविवशो नासौ सुज्जिर्ज्ञात्वेति डामरैः ।
स निर्लुण्ठ्य परित्यक्तः पूर्वमैक्ष्यनुरोधतः ॥ १४१९ ॥
लुण्ठितश्रीवकानीककोशभारग्रहानतैः ।
तैः कैश्चिच्चलितैरासीत्सुज्जेर्मार्गोनुपद्रवः ॥ १४२० ॥
प्रस्थिते पथिकेकस्माद्यत्रेषूत्सादयन्वने ।
आयुःशेषो मृगेन्द्रस्य विदध्यादध्वशोधनम् ॥ १४२१ ॥
निःशब्दसैन्यो निर्यातः सुज्जिः पद्मपुरान्तरे ।
उदीपश्वभ्रसविधं संप्राप्तोज्ञायि डामरैः ॥ १४२२ ॥
पदातिकोशशस्त्रादि मुष्णतः सोनवेक्ष्य तान् ।
तीर्त्वा श्वभ्रं वाजिगम्यां साश्ववारो भुवं ययौ ॥ १४२३ ॥
ततः पुरं प्रशान्तारिभयं दूराद्विरोधिनः ।
भ्रूभङ्गतर्जनीकम्परूक्षालापैरतर्जयत् ॥ १४२४ ॥
संत्रस्तैश्छत्रमात्रं तैस्त्यक्तमादाय च द्रुतम् ।
प्रविश्य नगरं सास्रुर्नृपतेः पार्श्वमाययौ ॥ १४२५ ॥
ज्यायसि भ्रातरीवाग्रं तस्मिन्प्राप्ते जहौ नृपः ।
दुःखोष्णैरस्रुभिः सार्धं वैरिव्यापातसाध्वसम् ॥ १४२६ ॥
महत्तमोनन्तसूनुरानन्दस्तत्र वासरे ।
लोचनोड्डारकग्रामे डामरैः प्रचलन्हतः ॥ १४२७ ॥
तत्तन्मङ्गल्यदण्डादिदुःसहायासकारणात् ।
स विपत्पतितो नाभूत्कस्यापि करुणावहः ॥ १४२८ ॥
भासाभिधः सुज्जिभृत्यो लोकपुण्यात्पलायितः ।
श्रान्तोवन्तिपुरेविक्षदवन्तिस्वामिनोङ्गनम् ॥ १४२९ ॥
कम्पनोद्ग्राहकः क्षेमानन्दः स च तदन्तरे ।
अमर्षणैरवेष्ट्येत डामरैर्हौलडोद्भवैः ॥ १४३० ॥

इन्दुराजोपि सेनानीः कुलराजकुलोद्भवः।
टिक्कं तद्चेष्टितो ध्यानोड्डारं व्याजादशिश्रियत् ॥ १४३१ ॥
पिञ्चदेवादयोन्येपि बहवः सैन्यनायकाः।
अत्यजन्क्रमराज्यान्तर्डामरैः कृतवेष्टनाः ॥ १४३२ ॥
पाते वनस्पतेः शावा इव तन्नीडविच्युताः।
इत्थं हताः क्षताश्चासंस्तत्र तत्र नृपानुगाः ॥ १४३३ ॥
निष्पादत्रा हिमप्लुष्टचरणा नग्नविग्रहाः।
क्षुत्क्षामा बहवोभूवन्मार्गेषु गलितासवः ॥ १४३४ ॥
न व्यलोक्यत मार्गेषु तदा नगरगामिषु।
पलालच्छन्नदेहेभ्यो मानुषेभ्यः परः क्वचित् ॥ १४३५ ॥
घासं विलासवासत्वं तेपि चित्ररथादयः।
निन्युर्यैरचिरेणैव महामात्यैर्भविष्यते ॥ १४३६ ॥
द्वितीयेपि दिने रुद्धसंचाराः पत्त्रिणामपि।
तुषारवर्षिणो मेघा न मुहूर्तं व्यरंसिषुः ॥ १४३७ ॥
वनपूर्वाभिधग्रामस्थितस्य कटकान्निजान्।
भिक्षोर्निक्षिप्य धन्योथ सिंहदेवमशिश्रियत् ॥ १४३८ ॥
निशम्य कृतसत्कारं नृपं तदनुयायिनम्।
सर्वेपि भैक्षवास्तस्थुः सैनिका नगरोन्मुखाः ॥ १४३९ ॥
मन्दप्रतापे दायादे संप्राप्तावसरास्ततः।
राज्यश्चतस्रो राजानमनुमर्तुं विनिर्ययुः ॥ १४४० ॥
परापातभयाच्छीतापाताच्च विवशैर्जनैः।
न ता नेतुमशक्यन्त दूरस्थं पितृकाननम् ॥ १४४१ ॥
चक्रिरे स्कन्दभवनोपान्ते देहांश्चिताग्निसात्।
ते सत्वरं ततस्तासामदूरे राजसद्मनः ॥ ११४२ ॥

राज्ञी चम्पोद्भवा देवलेखा तरललेखया ।
स्वस्रा सहाविशद्वह्निं रूपोल्लेखावधिर्विधेः ॥ १४४३ ॥
गुणोज्ज्वला जज्जला सा मृता वल्लापुरोद्भवा ।
गग्गात्मजा राजलक्ष्मीरपि वह्नौ व्यलीयत ॥ १४४४ ॥
मत्वा हिमव्यपायान्तं राज्यरोधं निजप्रभोः ।
डामरा नवभूभर्तुर्हिमराजाभिधां व्यधुः ॥ १४४५ ॥
ददर्श सौस्सलं मुण्डमथ भिक्षुरुपागतम् ।
गाढामर्षाग्निसंदीप्तैर्दृक्पातैर्निर्दहन्निव ॥ १४४६ ॥
कोष्टेश्वरज्येष्ठपालादयस्तत्सत्क्रियोद्यताः ।
असहासन्नतां वैराद्भजता तेन वारिताः ॥ १४४७ ॥
नगरं हिमवृष्ट्यन्ते स यियासुर्युयुत्सया ।
तटस्थ्येनाहिताकृष्टान्भृत्याञ्ज्ञात्वाब्रवीद्वचः ॥ १४४८ ॥
प्रसह्य प्राप्नुयां राज्यमिति पृथ्वीहरे सति ।
हृते तु तस्मिन्दायादे विपन्नां स्यां पतिर्भुवः ॥ १४४९ ॥
इत्यचिन्तयमेतत्तु दैवात्संजातमन्यथा ।
राज्यस्याशापि विरता हते प्रत्युत यद्रिपौ ॥ १४५० ॥
किं राज्येनाथ वा कृत्यं भोगमात्रोपयोगिना ।
जिगीषोरुचितं कस्य ममेवान्यस्य सेत्स्यति ॥ १४५१ ॥
मुण्डं न्यपातयद्भूमौ यः पूर्वेषां पुरा मम ।
सिंहद्वारे मदीयेद्य तन्मुण्डं वर्तते लुठत् ॥ १४५२ ॥
दशमासान्मदाद्यानां सुखच्छेदं व्यधत्त यः ।
तत्तद्दुःखं स तु मया दशाब्दाननुभावितः ॥ १४५३ ॥
एवं निर्व्यूढकर्तव्यतया नेष्याम्यवन्ध्यताम् ।
उपशान्तमनस्तापः सुस्थित्या शेषमायुषः ॥ १४५४ ॥

इत्याद्युक्त्वा गतष्टिक्काभ्यर्णं तं प्रणतं व्यधात् ।
प्रीत्या सहेमघटिकश्वेतच्छत्रादिभाजनम् ॥ १४५५ ॥
तद्विस्रम्भेण राज्याशापिशाच्योदितया पुनः ।
गृहीतोभ्येत्य शीतार्तस्तस्थावन्तर्विचिन्तयन् ॥ १४५६ ॥
अत्यन्तानुचितं चान्यल्लुवन्यैः संविधित्सुभिः ।
रक्षितं रक्षिणो न्यस्य हतक्ष्माभृत्कलेवरम् ॥ १४५७ ॥
विपक्षाश्रयणेप्यस्मिन्स्वामिनोन्ते किमीदृशी ।
दशा शरीरस्येत्यन्तः कृतज्ञत्वेन चिन्तयन् ॥ १४५८ ॥
दिदृक्षाव्याजतः सज्जकाख्यो नगरशस्त्रभृत् ।
आयातो वाष्टुकां गोप्तृन्युद्धैर्जित्वाग्निसाद्यधात् ॥ १४५९ ॥

तिलकम् ॥

स चतुर्नवताद्वर्षादारभ्यासादितच्छलैः ।
भूतैरधिष्ठितस्तिष्ठन्प्रजासंहारकार्यकृत् ॥ १४६० ॥
देवताधिष्ठिताविष्टदेहिवाक्यादिति श्रुतिः ।
भावितद्वधसंवादजनितप्रत्ययोद्ययौ ॥ १४६१ ॥
तदीयानन्यथात्वेन च्छेत्ता भ्रामयिता च यः ।
तन्मुण्डस्यास्य स पुमांल्लुब्धः सुप्तो मृतस्तथा ॥ १४६२ ॥

तिलकम् ॥

भिक्षुः कापुरुषाचारहतौचित्यो व्यसर्जयत् ।
प्राचण्ड्याख्यातये मुण्डमथ राजपुरीं रिपोः ॥ १४६३ ॥
उच्चलात्मजया तत्र देव्या सौभाग्यलेखया ।
नेतृन्पितृव्यमुण्डस्य जिघांसन्त्या निजानुगैः ॥ १४६४ ॥
राजपुर्यामाकुलत्वं नीतायामाससाद तत् ।
तद्भर्तुः सोमपालस्य दूरस्थस्यान्तिकं चिरात् ॥ १४६५ ॥

युग्मम् ॥

आदीनास्यमधुक्षैव्यग्राम्यधर्मादिकर्मसु ।
तिरश्च इव शोच्यस्य नेयबुद्धेः खशप्रभोः ॥ १४६६ ॥
सभ्यैरुच्चावचं तत्र कर्तव्यं परिचिन्तितम् ।
स्वोचितं व्यञ्जितौचित्यानौचित्यं निरवग्रहैः ॥ १४६७ ॥
नागपालस्तु सौभ्रात्रं लब्ध्वा भ्रातुः स्थितोन्तिके ।
सेहे मुण्डावशेषस्य नोपकर्तुर्विमाननाम् ॥ १४६८ ॥
सुदीर्घदर्शिनोप्यन्ते कश्मीरेभ्यः पराभवम् ।
विशङ्कयोचुः सर्वथेदं सत्कार्यं वः शिरः प्रभोः ॥१४६९ ॥
क्रियते ये तु नियतेरन्यथात्वं सनाथताम् ।
विनिहस्य हरेर्दृष्टाः कुर्वन्तो यत्र जम्बुकाः ॥ १४७० ॥
तद्गोपालपुरे कालागुरुचन्दनदारुभिः ।
काष्ठैर्निष्टां शिरो निन्ये वीतिहोत्रेथ शत्रुभिः ॥ १४७१ ॥
यथा प्राप्तिभ्रंशा धरणिपतिभावस्य विविधा
यथा ह्रासोल्लासा अपि समरसीमासु बहुशः ।
यथा तत्तद्दीर्घव्यसनविनिपातानुभवनं
तथा दृष्टस्तस्य प्रमयसमयोप्यद्भुततरः ॥ १४७२ ॥
कस्यापरस्य तस्येव लेभिरे वह्निसत्क्रियाम् ।
एकत्रेतरगात्राणि मुण्डमन्यत्र मण्डले ॥ १४७३ ॥
टिक्कादयोथ नगरं यान्तोवन्तिपुराध्वना ।
तत्र हन्तुं व्यलम्बन्त भासादीन्पूर्ववेष्टितान् ॥ १४७४ ॥
युद्धाश्युद्दीपनग्रावप्रहारच्छेदकारिभिः ।
न ते जेतुमशक्यन्त तैः प्रयत्नपरैरपि ॥ १४७५ ॥
स्थितैर्महाश्मप्राकारगुप्ते सुरगृहाङ्गने ।
तैर्हन्यमानास्ते स्थातुं गन्तुं वा नाभवन्क्षमाः ॥ १४७६ ॥

एवं प्राप्तविलम्बेषु तेषु लब्धान्तरः सुधीः ।
स्वीचकार प्रदानेन खड्गवीडामरान्नृपः ॥ १४७७ ॥
गृहीतनीविना तेषां सुज्जिः प्रायोजि सत्वरम् ।
तेन भासादिमोक्षाय पञ्चचन्द्रादिभिः समम् ॥ १४७८ ॥
प्रापावन्तिपुरं यावन्न स तावत्तदग्रगान् ।
कय्यात्मजादीनालोक्य भङ्गं टिक्कादयो ययुः ॥ १४७९ ॥
देवागाराद्विनिर्याता भासाद्यास्ते च विद्विषाम् ।
भग्नानामनुगान्हत्वा सुज्जेरन्तिकमाययुः ॥ १४८० ॥
लब्धप्रतापे नगरं प्रविष्टे कम्पनापतौ ।
आययाविन्दुराजोपि टिक्कं संत्यज्य सानुगः ॥ १४८१ ॥
चक्रे चित्ररथश्रीवभासादीनपि भूपतिः ।
पादाग्रद्वारखेर्यादिकर्मस्थानाधिकारिणः ॥ १४८२ ॥
यथा पूर्वमधीकारानजहत्सुज्जिरप्यभूत् ।
प्रतीहारमुखप्रेक्षी का कथेतरमन्त्रिणाम् ॥ १४८३ ॥
प्रतीहारोपि निःसीमडामरग्रामसंमतः ।
तद्भेदचक्रिकां कुर्वन्नगाद्राज्ञः प्रतीक्ष्यताम् ॥ १४८४ ॥
स नासीदसुहृद्व्यूहे कोपि तत्प्रेरणेन यः ।
नाशिश्रियन्नृपं नो वा बभूवाश्रयणोन्मुखः ॥ १४८५ ॥
निह्नुतेशित्वसदृशस्फूर्तिर्धूर्तो महीपतिः ।
आहारमप्यनासाद्य तन्मतं न न्यषेवत ॥ १४८६ ॥
इत्थं नगरमात्रान्तर्लब्धपादप्रसारिकः ।
सोवर्तिष्ट समासन्नफलं कन्दलयन्नयम् ॥ १४८७ ॥
संघट्य्याखिलान्भिक्षुर्डामरान्विजयेश्वरे ।
अथातिष्ठदधिष्ठानं जिघृक्षुः शिशिरात्यये ॥ १४८८ ॥

अदृष्टपूर्वं स्वचमूचक्रैक्यं वीक्ष्य डामराः ।
भिक्षोर्हस्तगतं राज्यं मत्वाशङ्किषताथ ते ॥ १४८९ ॥
एकैकस्येष धीशौर्यमित्रामित्रादि दृष्टवान् ।
नोत्तिष्ठेत्प्राप्तराज्यः किमास्कन्देषु गृहान्तरात् ॥ १४९० ॥
इति संमन्त्र्य ते राज्यं सोमपालाय दित्सवः ।
दूतान्निगूढं प्राहिण्वन्सोपि दूतं व्यसर्जयत् ॥ १४९१ ॥
आकारचारवैक्लव्यैः पशुतुल्यस्य तस्य तैः ।
राज्यभोगा अभङ्गा नो भविष्यन्तीत्यचिन्त्यत ॥ १४९२ ॥
भोगलोभोजितौचित्यदस्युसंघचिकीर्षितम् ।
देशेत्र पापात्पापीये दैवान्न समपादि तत् ॥ १४९३ ॥
दास्येप्ययोग्यो यो राज्ये स इत्यास्तां त्रपान्यतः ।
शक्येत पातुं देशोयं किमीषदपि तादृशा ॥ १४९४ ॥
शालीन्पलालपुरुषोवति यः कृशानु-
दग्धाननश्चटकपेटकभीतिदानैः ।
त्रातुं स काननतरून्विहितो विदध्या-
त्किं तत्र भञ्जनकृतां वनकुञ्जराणाम् ॥ १४९५ ॥
भिक्षोर्नेदिष्ठतां दिष्टवृद्धिव्याजात्ततो भजन् ।
तद्दूतो डामरान्गूढं नीविदानोद्यतान्व्यधात् ॥ १४९६ ॥
वैशाखेथ कृतारम्भस्तदा संभावितत्वरः ।
निर्गत्य नगरात्सुज्जिर्गम्भीरातीरमाययौ ॥ १४९७ ॥
तस्याभियोगः श्लाघ्योभूद्योद्धुं यत्समवायिनः ।
एकाकी तावतो वीरानूरीकृत्य स निर्ययौ ॥ १४९८ ॥
अन्तःपाते साहसानां नाद्भुतं तद्विधेर्वशात् ।
जीयते लक्षमेकेन लक्षेणैकोथवा युधि ॥ १४९९ ॥

पारं तरीतुं निःसेतोः सरितोपारयन्नसौ ।
पारे परस्मिन्नहितानपश्यच्छरवर्षिणः ॥ १५०० ॥
द्वित्रा निशाः स ते चासंस्तस्याः सिन्धोस्तटद्वये ।
रुद्धाः संनाहिनोन्योन्यरन्ध्रावेक्षणदीक्षिताः ॥ १५०१ ॥
अथावन्तिपुरान्नौभिरानीताभिरबन्धयत् ।
सेतुं साश्वोतरत्सुज्जिरारुह्य तरणीं स्वयम् ॥ १५०२ ॥
तरन्तमेव तं दृष्ट्वा योधैः कतिपयैः समम् ।
द्विषच्चमूर्मरुल्लोला द्रुमालीवाभवच्चला ॥ १५०३ ॥
दृष्टं मुहूर्तादेतावदारूढः स च यत्तटम् ।
बद्धश्च सेतुस्तीर्णाश्च योधा भग्नाश्च विद्विषः ॥ १५०४ ॥
न खड्गी न हयारोहो नापि शूली न चापभृत् ।
व्यावृत्य प्रेक्षितुं कश्चिदशकद्विद्रुताद्बलात् ॥ १५०५ ॥
निबद्धबध्रशैथिल्याल्लोलपल्ययने हये ।
कोष्टेश्वरस्याश्ववारा व्यलम्बन्तान्तरे क्षणम् ॥ १५०६ ॥
निर्यन्त्र्य तेपि पर्याणं सुज्जौ पश्चात्प्रधाविते ।
वातोद्धूतं रजश्चक्रमिव क्षिप्रं तिरोदधुः ॥ १५०७ ॥
हृतलुण्ठितविध्वस्तध्वजिनीका विरोधिनः ।
ध्यानोड्डारादिषु ग्रामेष्वमिलन्खण्डशो गताः ॥ १५०८ ॥
विजयेशाग्रगं तीर्त्वा वितस्तासेतुमागतः ।
भासोपि दस्यून्विदधे पलायनपरायणान् ॥ १५०९ ॥
उषित्वा विजयक्षेत्रे तदान्येद्युरुपागते ।
कम्पनेशे ययुस्त्यक्त्वा ध्यानोड्डारं विरोधिनः ॥ १५१० ॥
तत्र स्थित्वा दिनैः कैश्चित्स देवसरसोन्मुखः ।
शिश्रिये भेदनिर्यातैरेत्य टिक्कस्य गोत्रिभिः ॥ १५११ ॥

जयराजयशोराजौ तन्मुख्यौ भोजकात्मजौ ।
प्रविश्य देवसरसं व्यधाट्टिक्कोपवेशने ॥ १५१२ ॥
ययुर्विनष्टसंघातास्तस्मिन्पश्चात्प्रधाविते ।
भिक्ष्वादयः शूरपुरं स्वोर्वीं कोष्टेश्वरादयः ॥ १५१३ ॥
गर्हां महाभये सोमपालदूतः पलायितः ।
दास्याः सुतेन प्रहितः कुत्रास्मीति प्रभोर्व्यधात् ॥ १५१४ ॥
स हि तादङ्महारम्भक्षोभसाध्योन्नतीच्छुताम् ।
तस्य सिंहीस्पृहाक्रान्तगोमायुवदमन्यत ॥ १५१५ ॥
प्रमादात्स्वामिनो राज्यं चिरं नष्टं मितैर्दिनैः ।
सुज्जिः प्रसाध्य प्रददावेवं स स्वामिसूनवे ॥ १५१६ ॥
शमालादीनपि व्यूढान्दानोपायेन डामरान् ।
पौरांश्च भिक्ष्वाश्रयिणो राजा भेत्तुं प्रचक्रमे ॥ १५१७ ॥
राज्ञः परीक्ष्य सामर्थ्यमथ कुर्मो यथोचितम् ।
इति सर्वाभिसारेण ते संमन्त्र्य रणं ददुः ॥ १५१८ ॥
रजोजवनिकालक्ष्यभटौघनटताण्डवः ।
दामोदरेभूत्संग्रामः स वीरग्रामघस्मरः ॥ १५१९ ॥
कोष्टेश्वरवशं यातं रक्षता पितरं क्षतम् ।
लब्धाः सहजपालेन श्लाघाः प्रकृतिभिः समम् ॥ १५२० ॥
श्रमस्तत्राविशेषोभूद्राज्ञो भिक्षाचरस्य च ।
भिक्षुस्त्वनन्यसंवेद्यं विवेदात्मपराजयम् ॥ १५२१ ॥
ततः प्रभृति यः प्रातः स न सायमदृश्यत ।
योद्य वा न परेद्युः स सैनिको भैक्षवे बले ॥ १५२२ ॥
एवं त्यक्त्वा परान्पौरडामरेषु नृपान्तिकम् ।
प्रयात्सु लाभसत्कारानुचितान्प्राप्नुवत्सु च ॥ १५२३ ॥

काप्यहंपूर्विकोत्तस्थौ मनुजेश्वरकोष्टयोः ।
प्रयातुं पार्थिवाभ्यर्णं लाभसौख्याभिलाषिणोः ॥ १५२४ ॥
ज्ञात्वाथ तत्काकरुहाद्गृहीतस्वपरिच्छदः ।
देशान्तरोन्मुखो भिक्षुराषाढे मास्यवाचलत् ॥ १५२५ ॥
अनुयाद्भिः स दाक्षिण्यशेषाद्विहितसान्त्वनैः ।
तदाद्यैर्डामरैः क्रुध्यन्न निरोद्धुमपार्यत ॥ १५२६ ॥
अकरोत्स्वैरिणीसूनुतया शीलबहिष्कृतः ।
अतिरूपेषु दारेषु तस्य कोष्टेश्वरः स्पृहाम् ॥ १५२७ ॥
सटां हरेः फणारत्नमहेर्ज्वालां हविर्भुजः ।
बालां च तस्य संस्प्रष्टुं कोप्रशान्तस्य शक्नुयात् ॥ १५२८ ॥
समं सौस्सलिना बद्धसंधिराश्रयकाङ्क्षिणः ।
सोमपालः स्वविषये नादात्तस्य प्रतिश्रयम् ॥ १५२९ ॥
उद्विजेतः प्राणहरैः प्रयत्नैस्तस्य सर्वतः ।
तद्देशदुर्गममहीसीमान्तं सुल्हरीं ययौ ॥ १५३० ॥
त्रिगर्तेषु दया शीलं चम्पायां मद्रमण्डले ।
त्यागो दार्वाभिसारेषु मैत्री नामर्त्यधर्मिणाम् ॥ १५३१ ॥
पीडयेत्यक्तभीर्भूभृद्दूरस्थे त्वयि डामरान् ।
त्वामेवाभ्यर्थ्य राजानं ततः कुर्युः क्रमेण ते ॥ १५३२ ॥
क्ष्मां तद्भ्रजामोर्थयितुं सांप्रतं नरवर्मणः ।
मन्त्रिभिर्युक्तमित्युक्तमापि मन्त्रं न चाग्रहीत् ॥ १५३३ ॥
वसाल्पपरिवारोस्मद्गृह इत्यप्यगृह्णतः ।
श्वशुरप्रार्थनां तस्य भृत्याः पार्श्वादवाचलन् ॥ १५३४ ॥
प्रावर्तताथ नगरे विशद्भिर्विभवोज्ज्वलैः ।
सुलग्नसुलभे काले वरयात्रेव डामरैः ॥ १५३५ ॥

वीक्ष्याश्वच्छत्रतुरगैरेकैकं पार्थिवाधिकम् ।
सुस्सलक्ष्मापतेर्धैर्यनैष्ठुर्यं तुष्टुवुर्जनाः ॥ १५३६ ॥
औदार्याकारतारुण्यवेषसौन्दर्यमन्दिरम् ।
कोष्टेश्वरोधिकं स्त्रीणां प्रययौ प्रेक्षणीयताम् ॥ १५३७ ॥
प्रशान्तविप्लवे देशे ययावुत्सववाद्यताम् ।
विशद्भूरिलवन्यौघतूर्यघोषो दिवानिशम् ॥ १५३८ ॥
क्षीराद्या लक्ष्मकेणापि सर्वे मडवराज्यतः ।
आनीताः पार्थिवाभ्यर्णं सैन्यार्णवभयंकराः ॥ १५३९ ॥
अपि भूपालवाल्लभ्यादभूद्राजोपजीविनाम् ।
प्रतीहारगृहद्वारप्रवेशो बहुमानकृत् ॥ १५४० ॥
लवन्यलुण्ठितग्रामतया दुर्भिक्षदुःसहः ।
व्ययोत्तरङ्गः कालोभूत्स राज्ञो धनदश्रियः ॥ १५४१ ॥
डामरेभ्यो नृपः पारात्संगृह्णन्कृतवेतनः ।
निनायाभ्यन्तरं वृद्धिं बाह्यं चापचयं जनम् ॥ १५४२ ॥
तिष्यवैश्यार्घदेवाद्या ज्ञातयो जनकद्रुहाम् ।
राजद्रोहोचितां राज्ञा विपत्तिमनुभाविताः ॥ १५४३ ॥
मासैश्चतुर्भिः स पितृप्रमयाहादनन्तरम् ।
अनन्यशासनं राष्ट्रं स्वमेव समपादयत् ॥ १५४४ ॥
निवासनगरं पौराः सर्वसामर्थ्यवर्जिताः ।
अनन्तै राष्ट्रमाकीर्णं डामरैः पार्थिवोपमैः ॥ १५४५ ॥
बद्धमूलो नातिदूरे सर्वभारसहो रिपुः ।
सबाह्याभ्यन्तरा मन्त्रिसामन्ता वैरिसंश्रिताः ॥ १५४६ ॥
सत्तोपदेशवृद्धस्य नैकस्यापि नृपास्पदे ।
अधर्मबहुलाः सर्वे भृत्या द्रोहैकवृत्तयः ॥ १५४७ ॥

राज्यारम्भे बभूवेयं या सामग्र्यस्य भूपतेः ।
सा स्मर्तव्यान्तरा ज्ञातुं प्रत्युदन्तं विवेक्तृभिः ॥ १५४८ ॥
प्राप्तप्रसङ्गात्तदिदं गुणग्रामोपवर्णनम् ।
वक्ष्यमाणं सुबहुशोप्यत्र लेशात्प्रदर्श्यते ॥ १५४९ ॥
पूर्वापरानुसंधानबन्ध्यैर्दृष्टान्तवत्कथाः ।
नावुद्धातिगभीराणां शक्या रसयितुं गुणाः ॥ १५५० ॥
प्रत्यक्षस्य गुणान्राज्ञो विचिन्वन्तो यथास्थितान् ।
अनीर्ष्यस्य भविष्यामो विवेकस्यानृणा वयम् ॥ १५५१ ॥
स्थितस्य तत्त्वविज्ञाने नान्यस्य हि पटुर्जनः ।
अमानुष्यानुभावस्य राज्ञः किं पुनरीदृशः ॥ १५५२ ॥
हितानां दाराणां सदृशसुखदुःखस्य सुहृदः
कवेः सोल्लेखस्य प्रियसकललोकस्य नृपतेः ।
स्थितानां कोप्यत्र व्यवहितविवेकः स्वकुकृतै-
रसामान्यं ज्ञातुं सुभगमनुभावं न कुशलः ॥ १५५३ ॥
भवेत्प्राप्तप्रसरणा परिणामेथवा मतिः ।
कथं सर्वस्याद्भुतायां निष्ठायां गुणदोषयोः ॥ १५५४ ॥
सन्त्येवास्यापि विषमाः स्वभावा दोषतां जनः ।
येषां विपाकभव्यत्वमजानन्गणयत्ययम् ॥ १५५५ ॥
विकासः केषांचिन्नयनविषमैर्विद्युदुदयैः
परेषामुद्भूतिः श्रवणकटुभिर्दीर्घरसितैः ।
न चेष्टा काप्यन्योपकृतिपरिहीना जलमुचो
जडो वर्षादन्यं गणयति गुणं नास्य तु जनः ॥ १५५६ ॥
गुणाल्लोकोत्तराञ्शृण्वन्नस्यानुभवगोचरान् ।
भविता पूर्वभूपालकृत्ये सप्रत्ययो जनः ॥ १५५७ ॥

अनुच्चलन्नपि स्थानाद्भ्रूभङ्गेन चकार सः।
विलोलांल्लोमकम्पेन दिङ्नाग इव भूधरान् ॥ १५५८ ॥
विरुद्धाहिनीवृन्दा गूढं यद्भयसंभवम् ।
वहन्ति तापं भूपाला और्वाग्निमिव सिन्धवः ॥ १५५९ ॥
भूमिभृद्भास्वतस्तस्य तेजसाप्यायितो गतः ।
पूर्वराजयशश्चन्द्रो भुवनेषु प्रकाशताम् ॥ १५६० ॥
यो यस्तं पश्यति स्वात्मसंमुखं स स सर्वतः ।
जानात्यवक्रोल्लिखितं देवबिम्बमिवेश्वरम् ॥ १५६१ ॥
स्थिरप्रसादो दत्ते यत्तदादत्ते न स क्वचित् ।
भयं पुनः प्रणमतां दत्तं हरति विद्विषाम् ॥ १५६२ ॥
कृष्टासेः प्रतिबिम्बं स्वं हित्वा नान्योस्य संमुखः ।
नापरः प्रतिशब्दाच्च गर्जतः प्रतिगर्जति ॥ १५६३ ॥
तस्य नातिशितं कोपे प्रसादे निशितं पुनः ।
धत्ते तीक्ष्णैकधारस्य तरवारेस्तुलां वचः ॥ १५६४ ॥
तस्याकुजन्मनो नित्याम्लानलक्ष्मीविकासिनः ।
प्रभवन्त्याश्रिताः कल्पशाखिनः पल्लवा इव ॥ १५६५ ॥
राज्ञि गाम्भीर्यदुर्लक्ष्यमाहात्म्यप्रभविष्णुताम् ।
विवेद मन्त्रिणां लोकः सिषेवे तांश्च सर्वतः ॥ १५६६ ॥
प्ररूढस्तु प्रतीहारो न विषेहेन्यमन्त्रिणाम् ।
पार्श्वद्रुमाणामेषाख्यौषधिस्तम्भ इवोद्गतिम् ॥ १५६७ ॥
तस्योत्पाटयतः सर्वांस्तृणानीवावहेलया ।
स्फूर्जज्जनकसिंहोभूदशक्योन्मूलनः परम् ॥ १५६८ ॥
आबाल्यात्संस्तुतो राज्ञः स कृत्स्नव्यवहारवित् ।
अधृष्यस्तरुणीभूततनयो ह्यास्त सर्वतः ॥ १५६९ ॥

अद्वैधं यौनसंबन्धादिच्छतस्तत्सुतो मदात् ।
छुङ्गाभिधस्तस्य ततः कृतावज्ञोतनोन्नपाम् ॥ १५७० ॥
रन्ध्रान्वेषी स तद्दोषादुपजापैः क्षणे क्षणे ।
ससूनौ जनके यत्नान्नृपो द्वेषमजिग्रहत् ॥ १५७१ ॥
राज्ञस्तुल्यवयःस्थौ हि जननीगाढसंस्तवात् ।
राज्यकाले हि सोत्सेकावास्तां तदवकाशदौ ॥ १५७२ ॥
तुरंगयोग्योपस्कारस्नानाहारादि राजवत् ।
अकालज्ञावकुरुतां राजधान्यन्तरेव तौ ॥ १५७३ ॥
सह स्ववृद्धैः समशीर्षिका प्रभो-
र्न युज्यते प्राप्तसमुन्नतेः क्वचित् ।
श्रितोन्नतेर्दर्दुरवृन्दलङ्घनं
सरोजषण्डस्य महाविडम्बना ॥ १५७४ ॥
तद्भित्तिलाभसंरूढपैशुनालेख्यकल्पनाः ।
तद्वर्गेप्यखिले चक्रुस्तद्विषः कलुषं नृपम् ॥ १५७५ ॥
अथ राजा विजयिनं सत्कर्तुं कम्पनापतिम् ।
कृतज्ञः श्रावणे मासि जगाम विजयेश्वरम् ॥ १५७६ ॥
अत्रान्तरे पिञ्चदेवादागच्छन्गिरिगह्वरे ।
प्राप शूरपुरद्रङ्गाधीश्वरादुत्पलो वधम् ॥ १५७७ ॥
पुष्पाणनाडादुत्पिञ्चकृतये पुनरागतः ।
द्रङ्गाधिपेनागुटिकान्वेषिणा स ह्यवाप्यत ॥ १५७८ ॥
क्षितौ निपतितः पार्श्वप्राप्तमेकं द्विषद्भटम् ।
मुमूर्षुर्विशिखाविद्धजानुमर्मापि सोवधीत् ॥ १५७९ ॥
प्रत्यावृत्तस्य सत्कृत्य कम्पनेशं महीपतेः ।
द्वार्यवन्तिपुरस्थस्य द्रङ्गेशोरिशिरो व्यधात् ॥ १५८० ॥

स दृढद्राढिकामुष्टिरसुहृन्मुण्डमुद्गरः ।
चक्रे तस्य दृढामर्षशोकशङ्कुविपाटनम् ॥ १५८१ ॥
आद्यायामेव यात्रायां जातारातिक्षयो जनैः ।
स निःशेषयिताशेषकण्टकानामगण्यत ॥ १५८२ ॥
तस्मिन्प्रविष्टे नगरं विद्रुताः केपि सागसः ।
प्रापुर्जनकसिंहाद्याः केपि कारागृहस्थितिम् ॥ १५८३ ॥
कैश्चित्पलायितैः शङ्कां ग्राहिताः पृथिवीपतेः ।
ततः कोष्टेश्वरमुखाः प्रातिलोम्यं प्रपेदिरे ॥ १५८४ ॥
शमालां निर्गतः श्रीमान्कार्तिकेऽथ कृती नृपः ।
तत्र तत्रासुहृद्ग्रामं संग्रामोग्रमबाधत ॥ १५८५ ॥
यत्र सुस्सलभूपाद्याः प्रापुर्भग्नप्रतापताम् ।
तं हाडिग्राममदहत्सुज्जिरूर्जितविक्रमः ॥ १५८६ ॥
महीभुजा पीड्यमानैराहूतः कोष्टकादिभिः ।
अथ भिक्षाचरो राज्यगृध्नुर्भूयोप्युपाययौ ॥ १५८७ ॥
एकेनाह्ना योजनानि प्रोल्लङ्घ्य दश पञ्च च ।
शिलिकाकोष्टनामानं गिरिग्राममवाप सः ॥ १५८८ ॥
क्षुत्पिपासाक्लमारातिभीतिमार्गभ्रमोद्भवम् ।
क्लेशं नाजीगणन्मानी धावितः स जिगीषया ॥ १५८९ ॥
कार्यमायाति वैमुख्यं जिगीषोर्विधुरे विधौ ।
प्रस्थितस्य पुरोवाते रथस्येव ध्वजांशुकम् ॥ १५९० ॥
आरम्भमात्रमपि कस्यचिदेव सिद्ध्यै
कश्चित्प्रयत्नपरमोप्यफलप्रयासः ।
मन्थाद्रिणामृतमवाप्युदधेर्मुहूर्ता-
सक्ति चिराद्विदधता न हिमाद्रिजेन ॥ १५९१ ॥

भ्रष्टा सरित्स्ववसतेर्जलधिप्रवेशे
वेलोर्मिवेल्लनवशेन विवर्तमाना ।
मिथ्यैव यच्छति धियं पुनरुद्गतेति
नोत्थानमस्ति तु विधिव्यपरोपितानाम् ॥ १५९२ ॥
तस्य तावन्महायत्नकठोरस्योदयक्षणे ।
सिद्धेर्विबन्धो विधिना विधुरेण व्यधीयत ॥ १५९३ ॥
आयातं तमबुद्ध्वा तु तस्मिन्नेव क्षणेश्रयत् ।
पृथ्वीहरानुजः प्राप्तभङ्गः कृत्ताङ्गुलिर्नृपम् ॥ १५९४ ॥
कोष्टेश्वरः स चावेत्य संप्राप्तं तमतिष्ठताम् ।
कृत्याक्षमौ हतः सर्पाविव मन्त्रनियन्त्रितौ ॥ १५९५ ॥
ताभ्यां स्थानेथ सोन्यस्मिंस्त्याजितोध्वपरिश्रमम् ।
कार्कोटद्रङ्गमार्गेण निर्गतः सुह्वरीं ययौ ॥ १५९६ ॥
आसीच्च तत्र प्रोच्चण्डदर्पकण्डूलदोर्द्रुमः ।
उष्मायमाणः कश्मीराक्रान्तिसंततचिन्तया ॥ १५९७ ॥
उदीपसलिलस्येव तस्य रन्ध्रगवेषिणः ।
पुरं प्रविष्टो राजापि प्रतीकारमचिन्तयत् ॥ १५९८ ॥
अद्वितीयस्त्वमात्येषु प्रतीहारो मदोग्रताम् ।
सुज्जेरसहमानोभूच्छलान्वेषणतत्परः ॥ १५९९ ॥
आययावथ विस्रम्भावष्टम्भं वलगतः प्रभोः ।
धन्याग्रजः पूतमूर्तिर्जाह्नवीजलमज्जनात् ॥ १६०० ॥
तदाद्याः संस्तुता राज्ञश्चिरसंभावितास्ततः ।
अनाप्नुवन्तोधीकारान्पर्यतप्यन्त चिन्तया ॥ १६०१ ॥
कुर्वाणे कार्यतस्तस्मिन्भरं पित्र्येषु मन्त्रिषु ।
कालप्रतीक्षाक्षमतां मुहुस्ते गहनाशयाः ॥ १६०२ ॥

प्रतीहारस्तु दुर्लक्ष्यसुज्जिनिर्लोठनोद्यतः ।
अप्रियानपि तान्प्रीत्या जग्राहोग्रोपयोगिनः ॥ १६०३ ॥
व्यतीतेष्वथ मासेषु केषुचिद्दैवयोगतः ।
अकस्मादभवद्भूभृत्स्फीतलूतामयातुरः ॥ १६०४ ॥
विस्फोटशोफातीसारवह्निमान्द्याद्युपद्रवैः ।
संदिग्धाभ्युदये तस्मिन्देशः पर्याकुलोभवत् ॥ १६०५ ॥
इत्थं स्थितः कुलस्यैकभर्तुः स्वामी बली रिपुः ।
तत्पक्षा डामरा राष्ट्रं दुष्टमेव व्यचिन्तयन् ॥ १६०६ ॥
आयत्यां च तदात्वे च हितकृत्यं विचारयन् ।
राज्ञः श्रीगुणलेखाया जातमेकं सुतं शिशुम् ॥ १६०७ ॥
पञ्चाब्ददेश्यं पर्माण्डिं सुज्जिर्भूमिपतिं तदा ।
चिकीषुर्मन्त्रयामास मातुलेनास्य गार्गिणा ॥ १६०८ ॥
इत्थंभूतस्य दुध्रुक्षुः ससूनुः सुज्जिरद्य ते ।
पञ्चचन्द्रादिभिः सार्धं युक्त्या मन्त्रयतेनिशम् ॥ १६०९ ॥
लब्धरन्ध्रः प्रतीहारो धन्याद्याश्च तदीरिताः ।
इत्यवोचंस्ततो भूपं स तथेत्यग्रहीच्च तत् ॥ १६१० ॥
पूर्वप्रजास्रज इवाद्भुतवस्तुतत्व-
व्यावर्णनेन कुतुकं जनयन्ति तज्ज्ञाः ।
बाला इवाल्पमतिहार्यधियश्च सन्ति
प्रायो नृपा नियमशून्यमनोनुभावाः ॥ १६११ ॥
शौचस्थाने कृतवसतिभिः स्त्रीव्यवायालये वा
निःशस्त्रो यच्छलनकुशलैर्मानसं संप्रविश्य ।
नीतो भूतैरिव विवशतां निर्भरं गर्भचेटै-
र्भद्रं भूपात्कथमिव ततः स्यादवष्टब्धचेष्टात् ॥ १६१२ ॥

निर्हेतु प्रहसन्विटः प्रविशति क्षोणीपतेरन्तिकं
प्रीत्युत्फुल्लदृगेष किं किमिति तं पृच्छत्यनच्छाशयम् ।
ब्रूते किंचिदसौ कचानथ कषन्सर्वंकषं मानिनां
मानप्राणगुणेषु यत्सरभसं दम्भोलिपातायते ॥ १६१३ ॥
सविभ्रमगतागतः किमपि भाषमाणः श्रुतौ
प्रभोर्वलितलोचनं जगदवज्ञयालोकयन् ।
निजस्य मुखविक्रियाप्रणयताडनाद्यैर्विद-
न्ननुग्रहमिवाहितं नृपतिवल्लभो दुःसहः ॥ १६१४ ॥
अपि जातु स दृश्येत निःसंक्षोभमतिर्नृपः ।
यो यन्त्रपुत्रक इव व्यक्तं धूर्तैर्न नर्त्यते ॥ १६१५ ॥
यतो भृत्यान्तराज्ञानाज्जातः सर्वस्वसंक्षयः ।
तत्प्रजादुष्कृतै राज्ञां हा धिङ्नाद्यापि शाम्यति ॥ १६१६ ॥
सुज्ञिरारोग्यमन्वेष्टुमागच्छन्पूर्ववत्प्रभोः ।
विन्यस्तरक्षिणः पश्यन्नविश्वासमखिद्यत ॥ १६१७ ॥
दाक्षिण्यं वामतां यातमाशये प्रतिबिम्बितम् ।
दर्पणस्येव राज्ञः स विभाव्याभूत्पराङ्मुखः ॥ १६१८ ॥
तस्मिन्राजगृहे खेदान्मन्दीकृतगतागते ।
नृपतेस्तद्गतां प्रीतिं निःशेषां जह्रिरे खलाः ॥ १६१९ ॥
भृत्यः सुज्ञेश्चित्ररथोप्यास्थानद्विजभूः शठः ।
प्रातिलोम्यावहैर्भर्तुर्मन्त्रैरासीच्छ्रियोन्तकृत् ॥ १६२० ॥
नीरोगे राज्ञि दृष्टः स दिष्टवृद्ध्यै नृपास्पदे ।
वसुवर्षी विनिर्याय प्रार्थनार्थी गृहान्ययौ ॥ १६२१ ॥
न तं प्रासादयद्राजा विशालबलवाहनः ।
आक्रम्यासौ कथं नः स्यादित्युपायं त्वचिन्तयत् ॥ १६२२ ॥

त्यज्येत हृतकार्योसौ निराशैरनुजीविभिः ।
मत्वेति तदधीकारानन्येभ्यस्तूर्णमार्पयत् ॥ १६२३ ॥
राजस्थानात्स्रजं धन्यमुदयं कम्पनादपि ।
अजिग्रहन्नरपतिः खेरीकार्यं च रिह्मणम् ॥ १६२४ ॥
हृताधिकारे प्रव्यक्तवैकृते नृपतौ ततः ।
अल्पावशेषानुचरः सुज्जिरासीद्विशङ्कितः ॥ १६२५ ॥
विमानितः पुराद्रङ्गायात्रामुद्दिश्य मानवान् ।
सोथ सुस्सलभूभर्तुरस्थीन्यादाय निर्ययौ ॥ १६२६ ॥
औत्सुक्यात्प्रार्थनाकाङ्क्षी राजधान्यन्तिकेन सः ।
निर्गच्छद्राजपुरुषैर्न राज्ञा वान्वरुध्यत ॥ १६२७ ॥
तन्निर्वासनगर्वस्य स्थापनायानुयात्रिके ।
प्रतीहारस्तस्य गुप्त्यै कोशादेः स्वात्मजं व्यधात् ॥ १६२८ ॥
निग्रहानुग्रहावस्मदायत्ताविति रक्षिणम् ।
पुत्रं प्रादाल्लक्ष्मकोष इति ध्यायन्स विव्यथे ॥ १६२९ ॥
निवृत्तो लक्ष्मको द्वारात्पर्णोत्सं शनकैर्गतः ।
अवारोपयदद्रोहो भागिकं लोहराचलात् ॥ १६३० ॥
प्रतीहारविसृष्टाय धात्रेयाय महीभुजः ।
प्रेमाभिधाय तत्कोट्टाधीकारं च समार्पयत् ॥ १६३१ ॥
उत्खाय लोहरत्यागाच्छङ्काशङ्कुं महीपतेः ।
स ग्रीष्मविषमं कालं राजपुर्यामलङ्घयत् ॥ १६३२ ॥
अमात्यकन्दुकव्रातपातनोत्पातनक्षमः ।
आयत्तडामरः प्राप प्रथां कामपि लक्ष्मकः ॥ १६३३ ॥
द्वारेथाकारयत्सुज्जिप्रतिमल्लविधित्सया ।
कृष्यमाणो राजवंशपौरुषं राजमङ्गलम् ॥ १६३४ ॥

अनन्यदेशजः सुज्ञिः शूरो मत्कोशपोषितः ।
कीर्तिमेष हरेद्ध्याविती‌र्ष्याकलुषो हि सः ॥ १६३५ ॥
खड्गग्राहिसहायः स क्षुण्णः पर्यटितुं पथि ।
निःसुखश्चोपहास्यश्च तेन कार्यार्पणात्कृतः ॥ १६३६ ॥
कर्तुं पदव्यां योग्यानामयोग्यान्प्रभवेन्न कः ।
तेषां गुणैस्तान्संयोक्तुं न शक्यं कारणैरपि ॥ १६३७ ॥
पदे श्रीखण्डस्यानुचितमुचिते वर्ष्मणि निजे
वृषाङ्कः प्रक्षेतुं प्रभवति चिताभस्म रभसात् ।
न तत्स्वेच्छायत्तत्रिजगदुदयापायघटनो-
प्यसौ तद्बन्धेन स्फुटमिह पटुः संघटयितुम् ॥ १६३८ ॥
तस्मिन्सुज्ञिप्रतिस्पर्धामप्रौढे वोढुमक्षमे ।
दूतानसृजदानेतुं सज्ञपालं दिगन्तरात् ॥ १६३९ ॥
निर्वीरे मण्डले द्वेष्योप्यवापत्कार्यगौरवात् ।
कोष्टेश्वरो नरपतेर्नितरामन्तरङ्गताम् ॥ १६४० ॥
प्रीतिदायैस्तोष्यमाणस्तैस्तैस्तुष्टेन भूभुजा ।
विस्रब्धो नगरे तस्थौ सोपि लूतामयातुरः ॥ १६४१ ॥
एवं दमकदम्बैक्यं राज्ञि कुर्वति कार्यतः ।
चालकैः सोमपालाद्यैः सुज्ञिर्निन्येथ वैकृतम् ॥ १६४२ ॥
प्रतिज्ञाय लतामात्रसाध्यं कश्मीरनिर्जयम् ।
सोमपालाय तद्राज्यं सोङ्गीचक्रेवमानितः ॥ १६४३ ॥
प्रतिशुश्राव तस्मै च भागिनेयीं स कन्यकाम् ।
धीमानत्रान्तरे सामदाने प्रयुयुजे नृपः ॥ १६४४ ॥
द्वौ तावल्पाशयौ राजकन्ययोः स्वीक्रियां तदा ।
रभसाद्यावकुर्वाणावदातामन्तरं विषाम् ॥ १६४५ ॥

उपायैर्जयसिंहस्य शकुनैश्च निरीक्षितैः ।
प्रेरितः सोमपालोथ सुज्ञेर्मन्दादरोभवत् ॥ १६४६ ॥
स्वयमेत्य प्रतीहारस्तत्र राजपुरीपतिम् ।
सीमान्तभुवमानिन्ये कन्यकोद्वाहसिद्धये ॥ १६४७ ॥
जातां कह्लनिकाख्यायां महादेव्यां महीपतेः ।
उपयेमे नृपसुतां सोमोम्बापुत्रिकाभिधाम् ॥ १६४८ ॥
याते तस्मिन्कृतोद्वाहे नागलेखाभिधां सुधीः ।
तत्स्वस्रेयीं प्रतीहारो भूभुजे प्रत्यपादयत् ॥ १६४९ ॥
इत्थं राष्ट्रद्वये बद्धसंधौ निरवकाशताम् ।
प्राप्तः प्रतस्थे हेमन्ते सुज्ञिस्त्रिपथगोन्मुखः ॥ १६५० ॥
जालंधरे संघटितो ज्येष्ठपालो निनाय तम् ।
गाढावमाननिर्नष्टसौष्ठवं भिक्षुपक्षताम् ॥ १६५१ ॥
त्वयि भिक्षाचरे चैकसैन्यनायकतां गते ।
नोपेन्द्रो वा महेन्द्रो वा समर्थौ प्रत्यवस्थितौ ॥ १६५२ ॥
राज्यप्रदस्य ते यश्च चक्रे राजा विमाननाम् ।
तस्थुषो यश्च विषये प्रतिकुर्मस्तयोर्द्वयोः ॥ १६५३ ॥
इति संप्रेरितस्तेन देङ्गपालान्तिकस्थितेः ।
ययासुः सोन्तिकं भिक्षोर्भागिकेन न्यषिध्यत ॥ १६५४ ॥
अनिक्षिप्तवतोस्थीनि स्वामिनो जाह्नवीजले ।
न युक्तमेतत्ते कृत्यमित्यावेगादशाधि च ॥ १६५५ ॥
स्नात्वा द्युनद्यामेष्यामि पार्श्वं व इति निश्चयम् ।
स पीतकोशः कृत्वास्य ययौ प्रस्तुतसिद्धये ॥ १६५६ ॥
प्रतीहारकरन्यस्तसर्वभारस्तु भूपतिः ।
मन्दाक्रान्ततया राज्यमसुस्थितममन्यत ॥ १६५७ ॥

यो यो हि व्यग्रहीत्तं तं संधाय सविधस्थितः।
तमन्वहं प्रतीहारः सानुग्रहमिवैक्षत ॥ १६५८ ॥
प्रगल्भमाने शास्त्येवमुदयः कम्पनापतिः।
अवधीच्छद्मना दृप्तं प्रकटं कालियात्मजम् ॥ १६५९ ॥
अविश्वासोल्बणान्सर्वलवन्यानथ लक्ष्मकः।
निर्मर्यादान्कम्पनेशमीषत्सान्त्वमजिग्रहत् ॥ १६६० ॥
स्नात्वाभ्येष्यति गङ्गायां यावत्सुज्जिर्विसूत्रताम्।
तावत्कथं मया नेयाः कश्मीरा इति चिन्तयन् ॥ १६६१ ॥
तावन्मात्रान्तरव्याप्त्या राज्ञो विज्ञाय डामरान्।
भिन्नान्भिक्षाचरोविक्षद्विषलाटां हिमागमे ॥ १६६२ ॥
मण्डलस्यान्तरे तस्य विविक्षो रुद्धडामरः।
प्रतीहारो हिमर्तुश्च निषेद्धा समपद्यत ॥ १६६३ ॥
स टिक्केन पितृद्रोहादेकान्तद्वेषिणा रिपोः।
आनीतः संमतैर्दत्ताप्यायः सर्वैश्च डामरैः ॥ १६६४ ॥
प्रतीक्षमाणो राज्याप्तिहेतुं सुज्जिसमागमम्।
निर्भयष्टिक्कजामातुर्भागिकस्य खशप्रभोः ॥ १६६५ ॥
बाणशालाभिधे दुर्गे वसन्नल्पोच्छ्रितावपि।
दूतैर्विभेदमनयत्सर्वडामरमण्डलम् ॥ १६६६ ॥
प्रमोदं सुहृदां त्रासं द्विषां च विसृजन्पुरः।
व्यावर्तताथ गङ्गायाः सुज्जिर्विहितमज्जनः ॥ १६६७ ॥
पूर्वविप्रकृते भिक्षावर्त्मिश्चाभेदमागते।
यथामुष्य महीभर्तुस्तथास्माकं भयं भवेत् ॥ १६६८ ॥
ध्यात्वेति सिंहदेवेन प्रार्थितो व्याजमाददे।
सुज्जिस्वीकरणोद्योगे सोमपालो भयाकुलः ॥ १६६९ ॥

सुज्जिर्जालंधरं प्राप्तः प्रातर्भिक्षाचरान्तिकम् ।
यावद्यास्यति तं सायं तद्दूतस्तावदासदत् ॥ १६७० ॥
प्रेरितो ज्येष्ठपालेन निषिद्धो भागिकेन च ।
विरराम स तस्योक्त्या विपक्षाश्रयणग्रहात् ॥ १६७१ ॥
ऋणं देशान्तरोपात्तं तव भूपोपनेष्यति ।
स्वं च दास्यत्यधीकारं मन्मुखप्रहितार्थनः ॥ १६७२ ॥
इति दूतमुखेनोक्तः सोमपालेन चान्वहम् ।
विपक्षौत्सुक्यमुत्सार्य तद्देशाभिमुखो ययौ ॥ १६७३ ॥
उदयः कम्पनाधीशो वैशाखे तीर्णसंकटः ।
खशान्वितेन संग्रामं प्रत्यपद्यत भिक्षुणा ॥ १६७४ ॥
प्राक्तस्थुष्यल्पपृतने जाते पृथुबले ततः ।
तस्मिन्कोट्टान्तरं भिक्षुः प्राविशत्प्राप्तवेष्टनः ॥ १६७५ ॥
राजाथ विजयक्षेत्रं निर्यातः प्रत्यपूरयत् ।
कम्पनेशस्य कटकं तास्ताः संप्रेषयंश्चमूः ॥ १६७६ ॥
यत्रोपलशरासारविविधायुधवर्षिणी ।
दुर्गस्थितैर्नृपचमूः प्रत्ययोध्यश्मवर्षिभिः ॥ १६७७ ॥
पतत्स्वश्मसु भिक्षोश्च नामलक्ष्मसु पत्रिषु ।
ग्रहीतुं दुर्गजान्राजसेना दीर्घापि नाशकत् ॥ १६७८ ॥
दिनैरभ्यधिके मासमात्रे यातेग्रहीत्ततः ।
विदार्य मूलं दुर्गस्य धान्यं खाताम्बु संभृतम् ॥ १६७९ ॥
दुर्गभाजो बलासाध्या राज्युपायपरे धियम् ।
जाततद्वैरिबाधेच्छां धनलुब्धामदर्शयन् ॥ १६८० ॥
विससर्ज प्रतीहारमथ तद्धस्तुसिद्धये ।
राजा डामरसामन्तमन्त्रिराजात्मजैः समम् ॥ १६८१ ॥

कोष्टेश्वरत्रिल्लकाद्याः कृच्छ्रस्थस्य विमोक्षणम् ।
करिष्यामो वयं भिक्षोरिति बुद्ध्या तमन्वयुः ॥ १६८२ ॥
पश्यन्संकटशैलाग्रादधः कोट्टं मितोन्नति ।
जितं मेने प्रतीहारो वीक्ष्यानन्ताः स्ववाहिनीः ॥ १६८३ ॥
पूर्वस्थितैः प्रतीहारानुगैश्चान्यत्र वासरे ।
अयोधि सर्वसैन्यस्य बलात्कोट्टं जिघृक्षुभिः ॥ १६८४ ॥
ते तावन्तोप्यश्मवृष्ट्या तथा तैः प्रतिचक्रिरे ।
नास्तीदं विक्रमेणेति यथागृह्णन्विनिश्चयम् ॥ १६८५ ॥
वीरदेहद्रुमाग्रेभ्यो न्यपतन्नश्मभिर्हताः ।
निर्यदस्रौघसरघाः शीर्षभ्रमरगोलकाः ॥ १६८६ ॥
कोष्टेश्वरस्य मूढत्वं निर्व्यूढं तत्र किंचन ।
स्वस्य भिक्षोर्लवन्यानामन्येषां च विनाशकृत् ॥ १६८७ ॥
नास्त्यत्र मत्समो वीर इत्येतावत्प्रसिद्धये ।
स ह्ययुद्धोद्धतं भिक्षोर्यत्प्राणक्षयकार्यभूत् ॥ १६८८ ॥
दुध्रुक्षूणां खशानां च संकटे धैर्यमादधे ।
कोष्टेश्वरोस्मि चाभिन्नौ तद्वश्या डामराः परे ॥ १६८९ ॥
यदेतद्दृश्यते भूरि सैन्यमस्मद्धिताय तत् ।
पर्यवस्येदिति वदन्समभाव्यन्यथा च तत् ॥ १६९० ॥
विस्रम्भभूरमुष्यार्य्यत्र कोष्टेश्वरोप्यसौ ।
अन्येषु तत्र केवास्थेत्यथ ते निश्चयं दधुः ॥ १६९१ ॥
भूभृत्पितृद्रुहः कार्यवशेन स्वोपवेशने ।
अङ्गीकृताधिकारस्तु धीमांष्टिक्कस्य लक्ष्मकः ॥ १६९२ ॥
खशाधीशं महाग्रामस्वर्णादित्यागसंश्रयात् ।
स्वीकृत्य भिक्षुदुध्रुक्षुबद्धकक्ष्यमकारयत् ॥ १६९३ ॥

---

१ भिक्षुदुध्रुक्षाबद्ध इति स्यात् ।

आनन्दाख्यः खशाधीशस्यालः कृतगतागतः ।
नीत्वा टिक्कं प्रतीहाराभ्यर्णं भूयोप्यरोपयत् ॥ १६९४ ॥
प्रतीहारस्य टिक्केन सहैक्यं वीक्ष्य डामरैः ।
निःसंशयं हतोज्ञायि भिक्षुः कोष्टेश्वरादिभिः ॥ १६९५ ॥
संरब्धास्तद्विमोक्षाय प्राहिण्वंस्ते खशान्तिकम् ।
दूतानूरीकृतस्वर्णदाना भूरिधनैः समम् ॥ १६९६ ॥
खशस्तु दध्यावुत्कोचं गृहीत्वास्माभिरुज्झितः ।
जानाति रक्षितान्प्राणान्भिक्षुः कोष्टेश्वरादिभिः ॥ १६९७ ॥
समन्युः प्राप्तराज्योथ देङ्गपालोथ'दूरगः ।
हन्यान्मां जयसिंहस्तद्रक्ष्यः पक्षः प्रयत्नतः ॥ १६९८ ॥
मत्वेति तेन प्रत्युक्ता भिक्षुं शौचस्थितं गृहात् ।
विपाट्यान्तः फलहकं निर्गच्छेत्यूचिरेपि ते ॥ १६९९ ॥
स त्वमेध्योपलिप्ताङ्गः श्वेवावस्करवर्त्मना ।
यात इत्ययशो लोके ध्यायन्मानी न निर्ययौ ॥ १७०० ॥
कोष्टेश्वरो व्यक्तकृत्यः सैन्यक्षोभेच्छया क्षिपन् ।
रूक्षं कालविदा प्राह्ये प्रतीहारेण सान्त्वितः ॥ १७०१ ॥
नीवौ खशाद्यैर्दत्तायामाप्रत्यूषादगृह्यत ।
व्यवसायः प्रतीहारमुख्यैर्भिक्षुप्रमापणे ॥ १७०२ ॥
गच्छद्भिरागच्छद्भिश्च राजा दूतैः प्रतिक्षणम् ।
अन्विष्यन्विजयक्षेत्रे वार्तां पर्याकुलोभवत् ॥ १७०३ ॥
तावद्भिराहवैस्तैस्तैः साहसे दश वत्सरान् ।
कृतयत्नस्य साध्योभून्न यो वृद्धमहीभुजः ॥ १७०४ ॥
डिम्बो राजानुगा डिम्बास्तस्य भिक्षोः प्रमापणम् ।
साध्यमेते हि मन्यन्ते हन्त किं केन संगतम् ॥ १७०५ ॥

विहस्य नीयते वित्तं स्वशैरेत्य क्षणादमी।
भग्ना नूनं प्रयास्यन्ति मुषिताश्चाखिलाः परैः ॥ १७०६ ॥
पृथग्भूतः कोष्टकोयं त्रिल्लकस्यैव बान्धवः।
एते भिक्षाचरोच्छिष्टपुष्टा आभ्यन्तरा अपि ॥ १७०७ ॥
को नूतनोत्र संप्राप्तो यो राज्ञः साधयेद्धितम्।
सामग्री नूनमायाता सेयमस्यैव सिद्धये ॥ १७०८ ॥
इत्यूचुः शिबिरे यावज्जनास्तावदवेष्ठत।
कटकैर्मन्त्रिणां दुर्गं विकोशायुधवाहिभिः ॥ १७०९ ॥
एकाकी चिरसंक्लिष्टो हन्तव्यस्तत्कृतेखिलैः।
हा धिक्परिकरो बद्धो निर्लज्जैः सर्वशस्त्रिभिः ॥ १७१० ॥
त एवेत्यूचुरासीच्च कचच्छस्त्रोर्मिनिर्मलः।
स्फुरद्योधाक्षिशफरो निःशब्दः सैन्यसागरः ॥ १७११ ॥
व्योम्नोड्डीयेत वा सैन्यं लङ्घयेद्वा मृगप्लुतैः।
दुष्टाभ्रवृष्टिरिव वा निखिलांस्ताडयेत्समम् ॥ १७१२ ॥
साश्चर्यशौर्यः पर्यन्ते स्वीकुर्वन्भिक्षुरायुधम्।
संभ्रान्तश्चकितश्चासीदित्यन्तश्चिन्तयञ्जनः ॥ १७१३ ॥
एतावन्मन्त्रिणां सिद्धमथ प्रत्यूहसंभवः।
तच्छान्तिः कार्यसिद्धिश्च प्रतापैर्नृपतेरभूत् ॥ १७१४ ॥
सैन्ये भिक्षाचरापातं पश्यत्यूर्ध्वार्पितेक्षणे।
कोट्टान्निष्कृष्टशस्त्रीकः पुमानेको विनिययौ ॥ १७१५ ॥
रुदतीभिः परीतस्य नारीभिस्तस्य चिक्षिपुः।
पृष्ठे केपि वपुर्लोलकौसुम्भाधरवाससः ॥ १७१६ ॥
बद्धः पलायमानोत्र सोयं भिक्षुरिति ब्रुवन्।
उन्मुखः स जनोश्रौषीट्टिकं तमथ निर्गतम् ॥ १७१७ ॥

स हि भिक्षोः कृतद्रोहतुमुले प्रस्तुतो वधम् ।
तस्माद्राजानुगेभ्यो वा स्वस्याशङ्क्य विनिर्ययौ ॥ १७१८ ॥
अद्रोहोस्मीति लोकस्य प्रत्ययाय चकर्ष च ।
कृपाणीमुदरं हन्तुं रक्ष्यमाणो निजानुगैः ॥ १७१९ ॥
सानुगस्त्यक्तमार्गो स विलङ्घ्य नृपवाहिनीम् ।
अद्रिप्रस्रवणोपान्ते नातिदूरेभ्युपाविशत् ॥ १७२० ॥
उच्छ्वसंश्चिरसंप्राप्तैरम्भोभिर्दुर्गनिर्गतः ।
मायां प्रयोक्तुं प्रारेभे प्रेरितः सोन्यडामरैः ॥ १७२१ ॥
संजातं लम्बमानार्कमहस्तद्रक्ष्यतां क्षणम् ।
भिक्षुः क्षपायामास्कन्दमपनेष्यन्ति डामराः ॥ १७२२ ॥
इति तद्वाचिकात्तीक्ष्णान्नीविभिर्मन्त्रिणां समम् ।
खशैस्त्यजद्भिर्द्विषतो न्यरुध्यन्तारुरुक्षवः ॥ १७२३ ॥
ततः किलकिलारावमुखरैः करतालिकाः ।
यौधैर्ददद्भिः सचिवा व्यगृह्यन्ताकुलाशयाः ॥ १७२४ ॥
मुक्ताः स्वामिद्रुहः कृच्छ्रगता राज्यं प्रसाधितुम् ।
द्विषतो मन्त्रिभिः स्वार्थो दत्त्वार्थान्को नु साधितः ॥ १७२५ ॥
राजकार्ये च भानौ च लम्बमानेथ लक्ष्मकः ।
किमेतदिति तं नीविं खशस्यालमभाषत ॥ १७२६ ॥
सोभ्यधात्कुम्भदास्यापि रोद्धुं शक्यं चिकीर्षितम् ।
खशानां प्रत्यवस्थाता कथं तत्रास्य संनिधिः ॥ १७२७ ॥
स हन्तुं वैपरीत्यं तं खशानां त्वं व्रजेत्यथ ।
उक्त्वा व्यसृजदानन्दं जहसे चान्यमन्त्रिभिः ॥ १७२८ ॥
सुदूरदर्शिना राज्ञा विषलाटाध्वपाततः ।
देङ्गपालगृहा·····दारम्भः समभाव्यत ॥ १७२९ ॥

अतः प्रधानकोट्टेशस्यालः स समगृह्यत ।
प्रागेवार्थैरेतदर्थं ग्रथ्नता दीर्घवागुराम् ॥ १७३० ॥
संक्षोभावसरे क्षत्ता ततो निःसंभ्रमोभवत् ।
शिक्षितं पक्षिणमिव त्यक्तं प्राप्यं विवेद तम् ॥ १७३१ ॥
स तानूचे न हास्यं मे नष्टे कार्यैत्र साहसम् ।
सर्वनाशे हतेमुष्मिन्खशस्यालेपि किं भवेत् ॥ १७३२ ॥
अकुण्ठया भाग्यशक्त्या राज्ञः स्यालः खशस्य सः ।
सर्वान्नियन्त्र्य दुर्गाग्रात्तीक्ष्णादीनाजुहाव तान् ॥ १७३३ ॥
दस्यूनामसवः कण्ठे संदेहं मन्त्रिणां धियः ।
स्वस्त्रीणां प्रीतयः काष्ठां तीक्ष्णाश्चारुरुहुर्गिरिम् ॥ १७३४ ॥
स चर्मकौपीनपटीबद्धस्तत्स्वाभिधाङ्कितैः[1] ।
इषुभिः स्वामिवत्स्वस्य ख्यापनं सर्वतो युधि ॥ १७३५ ॥
स ताम्बूलादरः सक्तिः सा केशश्मश्रुयोजने ।
याभूदनुमुमूर्षूणां भिक्षुराजोपजीविनाम् ॥ १७३६ ॥
निश्चितान्ते ततस्तस्मिन्स तेषामन्ववर्तत ।
कोट्टेश्वरादिशिबिरं तूर्णं शरणमीयुषाम् ॥ १७३७ ॥

तिलकम् ॥

एकैकशो लक्ष्मकेण युक्ताः स्वैः प्रेरितैर्भटैः ।
टिक्कः स्वं वीक्ष्य वलितं निचकर्ताङ्गुलिं भयात् ॥ १७३८ ॥
खशैरस्मिन्नवसरे स पलायनशङ्किभिः ।
रक्ष्यमाणस्तेष्वहःसु मनस्तापादभुक्तवान् ॥ १७३९ ॥
वीरस्ताम्यन्विलम्बेन तीक्ष्णानामाहवोत्सुकः ।
तस्थौ भिक्षाचरः स्वान्तमक्षवत्या विनोदयन् ॥ १७४० ॥

---

१. बन्धः इत्युचितम् ।

हर्म्यप्राङ्गनमायाते तीक्ष्णलोके युयुत्सया।
उत्तिष्ठता तेन दायः स्तोकशेषः समाप्यत ॥ १७४१ ॥
दीव्यतः कान्तया-साकं कामिनः सुहृदागमे ।
प्रत्युत्थास्नोरिव क्षोभो नान्तस्तस्य व्यजृम्भत ॥ १७४२ ॥
किमद्यापि वधेन स्याद्बहूनामिति चिन्तयन् ।
स विहाय शरावापं सासिधेनुर्विनिर्ययौ ॥ १७४३ ॥
सुदीर्घचिन्तागलितायामश्यामलिभिः कचैः ।
चञ्चच्चित्रपताकाङ्कमिव वीरपटाञ्चलैः ॥ १७४४ ॥
गण्डताण्डविनाच्छिद्रशङ्खताडङ्करोचिषा ।
चन्दनोल्लेखकान्त्या च द्योतिताहंक्रियास्मितम् ॥ १७४५ ॥
वितीर्णं चित्रचार्यन्ते विपर्यस्ताङ्घ्रिताडनम् ।
द्योतयन्तमिवालातैः शस्त्रीनेत्राधरांशुकैः ॥ १७४६ ॥
कौसुम्भाधरवासोग्रबद्धधौताधराञ्चलैः ।
लोलैर्वीरहरिं बद्धसटाटोपमिवांसयोः ॥ १७४७ ॥
दृङ्मनःपाणिपादैक्यचारुप्रचुरचारिभिः ।
चरन्तं मण्डलैश्चित्रैर्लघुचित्रस्थिरक्रमैः ॥ १७४८ ॥
औचित्यस्योचितां चर्यामलंकारमहंकृतेः ।
अभिमानविभूतीनां नित्योत्सेकमनत्ययम् ॥ १७४९ ॥
अलक्षितक्षिप्रपातं स सर्वोप्युन्मुखो जनः ।
विचरन्तं तमैक्षिष्ट भिक्षुमग्रे विरोधिनाम् ॥ १७५० ॥
कुलकम् ॥
राजबीजी मधोर्नप्ता तं प्रवीरः कुमारियः ।
भ्रातापि ज्येष्ठपालस्य निर्यातो रक्तिकोन्वगात् ॥ १७५१ ॥
हर्म्यैर्निम्नोन्नतैस्तैस्तैर्विशतः परिपन्थिनः ।
रुरोधैकः शरासारैर्गार्गिको भिक्षुसंश्रितः ॥ १७५२ ॥

ते धावन्तो व्यभाव्यन्त शरैस्तच्चापनिर्गतैः।
वर्षोपलैः पुरोवातप्रेरितैरिव दन्तिनः ॥ १७५३ ॥
स रोद्धा प्रतियोधानां पापैः क्षिप्ताश्मभिः खशैः।
क्षताङ्गो भग्नचापश्च चिरेण विमुखीकृतः ॥ १७५४ ॥
तस्मिन्प्रचलिते मार्गैः प्रविश्योच्चावचैर्भटाः।
ते च भिक्षाचरादीनां सर्वे गोचरमाययुः ॥ १७५५ ॥
भिक्षोरेकं क्षणालक्ष्यधैर्यं पार्श्वधृतायुधम्।
अधावत्तूर्णमादाय शूलमेको बृहद्भटः ॥ १७५६ ॥
तस्य प्रहरतः शूलं भिक्षुराश्रितवत्सलः।
क्षिप्त्वापहस्तेनावेगात्केशाञ्जग्राह धावितः ॥ १७५७ ॥
प्रजहार कृपाण्या च निर्यत्प्राणे पतिष्यति।
तस्मिन्प्रहरतो भूयस्तौ कुमारियरक्तिकौ ॥ १७५८ ॥
निर्विभागैर्हते तस्मिन्विविधायुधवाहिभिः।
विरोधियोधैः संनद्धैस्त्रयो युयुधिरेथ ते ॥ १७५९ ॥
अजायन्त विविक्ताश्च शस्त्रसंत्रासिताहिताः।
कोटराजगरापास्तसरघौघा इव द्रुमाः ॥ १७६० ॥
अशक्नुवन्तस्तान्हन्तुं खड्गशूलादिभिर्द्विषः।
अपसृत्य शरासारैस्ततो दूरादवाकिरन् ॥ १७६१ ॥
भिक्षाचरमृगेन्द्रस्य भञ्जतः शरपञ्जरान्।
ततो हर्म्यात्खशैर्मुक्ताः पुष्टाः पाषाणवृष्टयः ॥ १७६२ ॥
धावतस्तस्य घोराश्मवृष्टिकुण्ठितवर्ष्मणः।
निममज्ज यकृत्पिण्डं भञ्जन् पार्श्वे शिलीमुखः ॥ १७६३ ॥
क्रान्त्वा त्रीणि पदान्याशु स पपात दिशान्क्षितेः।
ततश्चिरप्ररूढं तु कम्पं विद्विषतां हरन् ॥ १७६४ ॥

कुमारियोऽपि बाणेन विद्धवङ्क्षणवर्त्मना ।
व्रणितोप्यपतद्भर्तुः पादोपान्तोपजीवितः ॥ १७६५ ॥
रक्तिकस्तु शरेणैव विद्धो मर्मणि विह्वलः ।
सजीवितोपि निर्जीव इव भूमावुपाविशत् ॥ १७६६ ॥
महाकुलीनैः सहितो हतो भिक्षुरशोभत ।
वज्रावभग्नः शिखरी पुष्पितैरिव पादपैः ॥ १७६७ ॥
इयतो राजचक्रस्य मध्ये हर्षनृपात्मनः[1] ।
नावमानस्य मानस्य त्वभूद्भिक्षोः परं पदम् ॥ १७६८ ॥
विधाता नित्यविधुरस्तेजोधैर्याभिमानितः ।
अकुण्ठेन ध्रुवं चक्रे गृहीतात्मपराजयः ॥ १७६९ ॥
को वराको महर्धीनां सोग्रे पूर्वमहीभृताम् ।
उदात्तेनात्तकृत्येन[2] ते त्वस्याग्रे न किंचन ॥ १७७० ॥
आहोपुरुषिकाग्रस्तैरारोहद्भिर्द्विषद्भटैः ।
तदवस्थस्तदात्तोपि शख्यायुद्ध कुमारियः ॥ १७७१ ॥
स्फुरन्योद्धव्यमित्येव स प्रहारावशस्तथा ।
विज्ञाततत्त्वैररिभिर्वितत्य बहुशो हतः ॥ १७७२ ॥
विपन्नेस्मिन्नलं मूढाः प्रहारैरिति[3] निन्दिताः ।
खशैः प्रजह्रुर्बहुशो हते भिक्षौ द्विषद्भटाः ॥ १७७३ ॥
अविधेयायुधस्तीव्रव्रणवेदनयाधमैः ।
कैश्चिन्निर्जीवितप्रायो रक्तिकः शस्त्रिभिर्हतः ॥ १७७४ ॥
वयसस्त्रिंशतं वर्षान्नव मासांश्च भुक्तवान् ।
स षष्ठाब्दासितज्येष्ठदशम्यां नृपतिर्हतः ॥ १७७५ ॥

---

१ हर्षनृपात्परः इति स्यात् । २ उदात्तेन तु कृत्येन इति स्यात् । ३ प्रहारैरतिनिन्दिता इत्युचितम् ।

निदानं विप्लवे दीर्घे सर्वनाशेपि कारणम् ।
येषां बभूव तेप्येवं तुष्टुवुः सत्त्वविस्मिताः ॥ १७७६ ॥
नेत्रस्पन्दं भ्रुवोः कम्पं स्मेरास्यत्वं च नामुचत् ।
सजीवमिव तन्मुण्डं कियतीरपि नालिकाः ॥ १७७७ ॥
एकं व्योम्न्यविशच्चित्रभानुं भूमौ पुनः परम् ।
तद्देहमप्सरःसङ्गं धाराम्बु च विदज्जडम् ॥ १७७८ ॥
सचिवा विजयक्षेत्रस्थितस्याग्रे महीपतेः ।
तेषां त्रयाणां मुण्डानि ततोन्येद्युरुपाहरन् ॥ १७७९ ॥
श्रीसुधारत्नदन्त्यश्वशशाङ्कादिप्रकाशने ।
दृष्टचित्रस्वभावोब्धिर्यथायं पार्थिवस्तथा ॥ १७८० ॥
तत्र तत्राद्भुतं भावं दर्शयन्भुवनाद्भुतम् ।
परिच्छेद्यानुभावत्वं न केषामपि गच्छति ॥ १७८१ ॥
नाद्यप्यन्निहतोसाध्यः पितुर्मे योप्यभूदिति ।
न जहर्ष विनष्टोयं राजकण्टक इत्यपि ॥ १७८२ ॥
नाकुप्यत्स पितुर्मुण्डमेष भ्रमितवानिति ।
वीक्ष्य भिक्षोः शिरोव्याजभावादायस्त्वचिन्तयत् ॥१७८३ ॥
युग्मम् ॥
आकारस्यास्य संभाव्यं सत्त्वं न द्वेषवैकृतम् ।
वैशद्यं स्फटिकस्येव नार्कालोकोपतप्तताम् ॥ १७८४ ॥
उत्कर्षात्प्रभृति व्यक्तममुं यावन्महीभुजम् ।
हा धिक्सुमृत्युना दृष्टं नेह देहविसर्जनम् ॥ १७८५ ॥
प्रसादवित्ता येप्यासन्पूर्वमस्योर्वराभुजः ।
तटस्था इव वीक्षन्ते तेद्य मुण्डावशेषताम् ॥ १७८६ ॥
इति क्षितीशोसामान्यसौजन्योन्तर्विचारयन् ।
आदिदेश रिपोः शीघ्रं तादृशस्यान्तसत्क्रियाम् ॥ १७८७ ॥

निद्राच्छेदे च निशि···ध्यायंस्तस्योदयात्ययौ ।
भवस्वभाववैचित्र्यं मुहुर्मुहुरचिन्तयत् ॥ १७८८ ॥
अपि वर्षसहस्रेण देशे दायाददुःस्थितिः ।
नूनं न भविता भूय इति लोकोप्यमन्यत ॥ १७८९ ॥
दग्ध्वा तृणं तनु घनं प्रतनोति शष्पं
वृष्टिं सृजत्युपचितोष्मदिनं प्रदर्श्य ।
वैचित्र्यसंस्पृशि विधेर्नियमेन कृत्ये
न प्रत्ययः क्वचन चञ्चलनिश्चयस्य ॥ १७९० ॥
कृत्यं निर्वर्त्य विश्रान्त्यै धीरस्याबध्नतो मनः ।
विधिर्विधत्ते दीर्घान्यकार्यभारसमर्पणम् ॥ १७९१ ॥
आरोढुं[1] प्रथमस्य दीर्घमदन[2]प्रत्तक्लमस्याङ्घ्रिणा
नो संत्यज्यत एव पादकटको यावद्द्वितीयोखिलः ।
वाहस्यासनरक्षिणः कलयतो भारावतारात्सुखा-
न्यारोहेण परेण तावदसहाधिष्ठीयते पृष्ठभूः ॥ १७९२ ॥
एवमेव क्षपामात्रं राज्ये निःशत्रुतां गते ।
शोकमूको नृपस्याग्रं प्राविशल्लेखहारकः ॥ १७९३ ॥
पृष्टः सभ्यैः स संभ्रान्तैर्यस्मिन्नेवाह्नि भूपतेः ।
यातो भिक्षाचरः शान्तिमरातिर्दत्तदुःस्थितिः ॥ १७९४ ॥
भ्रातरौ लोहरगिरौ बद्धौ द्वैमातुरौ पुरा ।
न्यस्तौ सुस्सलभूपेन यौ तौ सल्हणलोठनौ ॥ १७९५ ॥
ज्येष्ठे मृते कोट्टभृत्यैः कनिष्ठं लोठनं हठात् ।
तमिहाद्य त्रियामायामभिषिक्तमभाषत ॥ १७९६ ॥
सुतभ्रातृसुतैर्दत्तै राज्यार्हैः सह पञ्चभिः ।
निर्यातं बन्धनादूचे कोशेषु स तमीश्वरम् ॥ १७९७ ॥

---

१ आरोढुः इत्युचितम् । २ दीर्घदमन इति स्यात् ।

दूयेत मुह्येदाक्रन्देत्प्रसारितभुजः पतेत् ।
स्वप्याद्विसूत्रो निःस्पन्दद्दक्कं गच्छेदथ ध्रुवम् ॥ १७९८ ॥
दीर्घदौस्थ्यशमक्षिप्रमृदूकृतमना नृपः ।
असौ तत्कालनिपतद्दुर्वार्तावज्रचूर्णितः ॥ १७९९ ॥
इति संभाव्य दिक्पालैरपि साकूतमीक्षितः ।
नाकाराचारचेष्टाभिः प्रागवस्थां जहौ नृपः ॥ १८०० ॥
नह्यनन्याभिभूतेन सर्वतोसह्यवर्तिना ।
तादृशा वैशसेनान्यः सृष्टपूर्वो हि भूपतिः ॥ १८०१ ॥
पित्रास्य यद्बलान्नष्टं राज्यं भूयः प्रसाधितम् ।
अनेनापि हतारांति विहितं पैतृकं पदम् ॥ १८०२ ॥
हारितौ दुर्गकोशौ तौ नष्टनामापि दारकः ।
दायादशेषो यत्रैको निर्धनो वीतबान्धवः ॥ १८०३ ॥
धनमानान्तकृद्भूरिवर्षान्व्यसनमादधे ।
उपप्लवप्रिये देशे तत्रैकस्मिन्हतेहिते ॥ १८०४ ॥
मित्रदुर्गार्थसंपन्नाः प्रोद्भूताः षड्विरोधिनः ।
भिन्नप्रकृतिकं कोशशून्यमेतच्च मण्डलम् ॥ १८०५ ॥
तादङ्निकषनिस्तीर्णमाहात्म्यस्य महीपतेः ।
धैर्येण स्पर्धितुं जाने राघवोपि सलाघवः ॥ १८०६ ॥
प्राक्पोषितं हि साम्राज्यदाने निर्वासने च तम् ।
तुल्यानुभावमस्मार्षीत्पितैवं गणयन्गुणान् ॥ १८०७ ॥
आहूतस्याभिषेकाय विसृष्टस्य वनाय वा ।
न मया लक्षितस्तस्य स्वल्पोप्याकारविप्लवः ॥ १८०८ ॥
कान्तेषु काननान्तेषु सकान्तं सानुजं च तम् ।
भूयः श्रियं प्रतिश्रुत्य स्थातुं सावधि सोभ्यधात् ॥ १८०९ ॥

एकक्षणानुभूतेस्मिन्संघट्टे सुखदुःखयोः ।
ईदृक्तत्तद्दशाभेदादनयोरन्तरं महत् ॥ १८१० ॥
नियतं निरुपादानां शक्तिं दर्शयितुं जने ।
नानोपकरणग्रामं संनद्धोस्याच्छिनद्धिधिः ॥ १८११ ॥
अत्यद्भुतानि कृत्यानि वक्ष्यमाणानि भूपतेः ।
कोमुष्य बहु मन्येत सामग्र्ये सति संपदाम् ॥ १८१२ ॥
धैर्याब्धिना कार्यशेषं ज्ञातुं राज्ञा सविस्तरम् ।
पृष्टोथ कोट्टवृत्तान्तमाचख्यौ लेखहारकः ॥ १८१३ ॥
उत्सृज्य भागिके कोट्टं प्रयाते मण्डलेश्वरः ।
लुप्तोद्योगोभवद्तस्मौ प्रेमा संपत्प्रमत्तधीः ॥ १८१४ ॥
मण्डनाभ्यवहारस्त्रीभोगैकाग्रो मदोग्रया ।
स वृत्त्या भयवैमुख्याधात्र्याभव्यं व्यवाहरत् ॥ १८१५ ॥
कुल्यानुकम्पिना दृष्ट्युत्पाटनादेः स वारितः ।
देवेन नादाद्धद्धानां कांचिद्रक्षाक्षमां क्रियाम् ॥ १८१६ ॥
मायाव्युदयनो नाम कायस्थः स्थूलवाञ्छितः ।
माञ्जिकश्च प्रतीहारो बद्धमूलस्य मन्त्रिणः ॥ १८१७ ॥
पुत्रो भीमाकरस्येन्द्राकरश्चात्रान्तरे समम् ।
दुध्रुक्षवस्तत्र तत्र वधं प्रेम्णो व्यचिन्तयन् ॥ १८१८ ॥
अलब्धो हन्तुमप्राप्तावसरैस्तैः कदाचन ।
कोट्टादट्टालिकां कार्यवशादवरुरोह सः ॥ १८१९ ॥
कश्मीरेभ्यो नृपेणाल्पावशेषप्राणवृत्तिना ।
प्रैषि शासनमेतादृगिति प्रत्ययसिद्धये ॥ १८२० ॥
कोट्टौकसामशेषाणां गूढलेखान्विधाय ते ।
निबद्धसंविदः पूर्वमभिषेच्यस्य भार्यया ॥ १८२१ ॥

दृष्ट्वा दुर्गाग्निर्निगडं कृत्वा च निशि लोठनम् ।
सिंहराजस्वामिविष्णुप्रासादाग्रेभ्यषेचयन् ॥ १८२२ ॥
शारदाख्या वधूरेका कापि सुस्सलभूपतेः ।
तत्र स्थिताभवत्क्षुद्रा तेषामनुमतप्रदा ॥ १८२३ ॥
तदर्पितैरयोयन्त्रभञ्जनैरर्गलानि ते ।
कोशान्निवार्य पर्याप्तं कोशरत्नादि जह्रिरे ॥ १८२४ ॥
सभृत्यैः सप्तभिस्तत्तत्साहसं सुमहत्कृतम् ।
दानेन त्याजितायामा चण्डालैः प्रतिकूलता ॥ १८२५ ॥
भेरीतूर्यादिनिर्घोषैर्निर्निद्राः कोट्टवासिनः ।
कृतराजोचिताकल्पमपश्यन्नथ लोठनम् ॥ १८२६ ॥
अदृष्टपूर्वतादृक्षोदात्तवेषः स विस्मयम् ।
निन्ये जनान्नृपामात्ययोगो दीपैः प्रकाशितः ॥ १८२७ ॥
प्रेम्णः पार्श्वस्थितस्ताभ्यामानयेद्वारकोन्तिकम् ।
ससैन्यौ स्वभुवश्चर्मपासिकाख्यौ च ठक्कुरौ ॥ १८२८ ॥
तदास्थयाहितास्कन्दभङ्गस्तेषामशेषतः ।
रात्रिशेषश्च चन्द्रांशुस्पर्शपाण्डुरशीर्यत ॥ १८२९ ॥
प्रातः प्रेमाथ दुर्वार्ताश्रवणेनोष्णदारुणः ।
संताप्यमानश्चोष्णांशुकरै[1]रोद्धुमुपाययौ ॥ १८३० ॥
तं प्रतोलीतलप्राप्तं निर्यातैर्वैरिसैनिकैः ।
पराङ्मुखीकृतं वीक्ष्य चलितोस्म्यन्तिकं प्रभोः ॥ १८३१ ॥
श्रुत्वेति भूभृत्त्वरया लुलुं लोहरमन्त्रिणम् ।
विससर्जोदयद्वारपतिमानन्दवर्धनम् ॥ १८३२ ॥
भूमिज्ञौ तौ हि कोट्टस्य विवेदानन्यदेशजौ ।
सोल्पान्नत्वादिरन्ध्राणां लक्षणाङ्गहणक्षमौ ॥ १८३३ ॥

---

१ योद्धुमाययौ इति स्यात् ।

प्रविष्टश्च पुरं दृष्ट्वा प्रीतिदायार्थिभिः शिरः ।
भ्राम्यमाणं भटैर्भिक्षोराक्षिप्यैतानदाहयत् ॥ १८३४ ॥
राजादेशादसंरुद्धैः स्त्रीभूयिष्ठैरसौ जनैः ।
नष्टा पैतामहे देशे दह्यमानोन्वशोच्यत ॥ १८३५ ॥
काले ग्रीष्मोदयोद्रिक्तभानौ स्वविषये नृपः ।
सिद्धिमश्रद्दधानोपि प्रहिणोति स्म रिल्हणम् ॥ १८३६ ॥
स शौर्यस्वामिभक्त्यर्थनैःस्पृह्यादिगुणोज्ज्वलः ।
तेन ह्यमोघप्रारम्भः समभावि जिगीषुणा ॥ १८३७ ॥
भवितव्यतया दत्तव्यामोहः प्रेरितोथवा ।
शठामात्यैरभूद्भूभृत्स व्यक्तायुक्तमन्त्रितः ॥ १८३८ ॥
हीनोर्थदुर्गामात्यैर्यन्निर्वैक्लव्यस्य वैरिणः ।
अनुमेने कृतारब्धीन्भृत्यान्ग्रीष्मोल्बणे क्षणे ॥ १८३९ ॥
उदयः कम्पनाधीशो राज्ञोग्रे पर्यशिष्यत ।
सर्वामात्याः प्रतीहारमन्वगच्छन्पुनः परे ॥ १८४० ॥
राजात्मजहयारोहडामरामात्यमिश्रया ।
दैर्घ्यं तत्सेनयावापि सर्वसामग्र्युदग्रया ॥ १८४१ ॥
संवेष्टयन्नट्टलिकानिविष्टकटको दिशः ।
संग्रहीतुं प्रववृते सर्वोपायविरोधिनः ॥ १८४२ ॥
लुल्लादयः फुल्लपुरे कोट्टोपान्ताश्रये स्थिताः ।
भयभेदाहवव्यग्रान्प्रकम्पमनयन्रिपून् ॥ १८४३ ॥
सुस्सलक्ष्मापतिर्बद्धे लोठने तत्सुतामदात् ।
यस्मै प्राक्पद्मलेखाख्यां बहुस्थलधराभुजे ॥ १८४४ ॥
साहायकाय प्राप्तस्य तस्य सैन्यैर्द्विषच्चमूः ।
शूराभिधस्य युद्धेषु प्रत्यग्राहि प्रतिक्षणम् ॥ १८४५ ॥

तेषूपरुद्धराष्ट्रेषु भयदोलायमानधीः।
अङ्गीचक्रे नरपतेर्नतिं दण्डं च लोठनः॥ १८४६॥
एतावत्सिद्धमफलारब्धीनामत्र दुःसहे।
काले व्यावृत्तिरस्माकमुचितास्मिन्न लाघवः॥ १८४७॥
शारदारम्भसुभगे क्रमात्काले बलोर्जिताः।
अथारब्धि विधास्यामः सर्वारम्भेण शोभनाम्॥ १८४८॥
प्रत्यन्वहं[1] लक्ष्मकेण प्रहितं नादधे नृपः।
अन्ये च मन्त्रिणो मत्रं शाठ्यादभ्यर्णवर्तिनः॥ १८४९॥
तिलकम्॥
सर्वाधिकार्युदयनः प्रतिश्रुत्य धनं बहु।
साहायकार्थमानिन्ये सोमपालमपि प्रभोः॥ १८५०॥
अपाङ्क्तेयः स संबन्धबद्धोपि धनलुब्धधीः।
द्रुह्यति स्म महाव्यापन्निमग्नाय महीभुजे॥ १८५१॥
बह्वर्थदो लोठनश्चेत्किं मे संबन्ध्यपेक्षया।
अन्यथा भवतामस्मीत्यन्यान्वक्ष्यामि कैतवात्॥ १८५२॥
दम्भमित्यभिसंधाय सोमपालोभ्युपाययौ।
समर्थने हेतुरासीत्सुज्ञेर्व्याजे कियानपि॥ १८५३॥
युग्मम्॥
स हि भिक्षाचरौन्मुख्यान्निवार्यानायितो यदा।
सोमपालमुखेनोर्वीभुजा राजविसर्जितः॥ १८५४॥
दूतः प्रार्थयमानस्या·····र्थान्प्राक्प्रतिश्रुतान्।
ऋणिकस्योत्तमर्णेभ्यः प्रदातुमनुबध्नतः॥ १८५५॥
तदा भिक्षाचरं जानन्हतकल्पमनेन नः।
व्यसनप्रशमे कोर्थ इत्यवज्ञां प्रकाशयन्॥ १८५६॥

---

१ इत्यन्वहं इति स्यात्।

मदेन न ददौ किंचित्सोथ भिक्षाचरं हतम् ।
श्रुत्वा निरुपयोगं स्वं राज्ञो ज्ञात्वा सशोकताम् ॥ १८५७ ॥
यावदेकाहमभजल्लोहरव्यसने भयम् ।
तावन्निशम्य संप्राप्तोत्सेको भूयोपि मन्युभाक् ॥ १८५८ ॥
लोठनं बद्धसंधिं वः करिष्यामीति भूभुजः ।
उक्त्वा दूतं लोठनेन दापयिष्यामि काञ्चनम् ॥ १८५९ ॥
युष्मभ्यं कथयित्वेति सोमपालं चिकीर्षितम् ।
बलितामबलत्वं च सर्वेषां स्वार्थसिद्धये ॥ १८६० ॥
समं सोमेन तत्सैन्यमन्यप्रस्थित्यलक्षितैः ।
मितैरनुगतो भृत्यैर्घोरमूलकमासदत् ॥ १८६१ ॥
कुलकम् ॥
यद्धानौचित्यदुष्पांसुवर्षदूषितकीर्तिना ।
भोगलुब्धतया तेन हता विततसत्त्वता ॥ १८६२ ॥
तुषारशर्कराशुक्लजलपानाददुर्जरम् ।
त्यक्तुं भोज्यं मृदु स्निग्धं काश्मीरं न शशाक सः ॥ १८६३ ॥
सतुषं शुष्कसक्तादि बहिर्भोक्तुमपारयन् ।
यैस्तैरुपायैः कश्मीरान्प्रविविक्षुरतोभवत् ॥ १८६४ ॥
काश्मीरकाः कार्यशेषमदृष्ट्वा ग्रीष्मशोषिताः ।
आकर्ण्य च तदापातमाकुलत्वमशिश्रियन् ॥ १८६५ ॥
भुञ्जानैर्भृष्टमांसानि पिबद्भिः पुष्पगन्धि च ।
प्रतीहाराग्रतो हारि माद्वीकं लघु शीतलम् ॥ १८६६ ॥
आनेष्यामो जवात्सुज्जिमाकृष्य श्मश्रुसंयुगे ।
इत्थं विकत्थनैस्तैस्तैराहोपुरुषिकाः कृताः ॥ १८६७ ॥
काश्मीरकैर्मितैर्युक्तं खशैः सैन्धवकैरपि ।
अभिषेणयितुं शेकुर्न तेप्युद्यमिनोपि तम् ॥ १८६८ ॥

भ्रातृव्याय च मुख्याय भूभुजां च करार्पणम् ।
विदध्यां जयसिंहाय वरमित्यभिमानिना ॥ १८६९ ॥
बह्वर्थमर्थ्यमानेन लोठनेन तिरस्कृतः ।
सोमपालः प्रियं किंचिद्राजपक्षे न्यदर्शयत् ॥ १८७० ॥
मयि श्वशुरसैन्यानां व्यग्राणां वैरविग्रहे ।
सुज्ञेर्हिताय त्वं रन्ध्रमन्विष्यसि किमाश्रितः ॥ १८७१ ॥
इति निर्भर्त्सितस्तेन सुज्ञिः स्वाहंक्रियोचितः ।
सर्वानुल्लङ्घ्य संनद्धो राजसैन्यग्रहेभवत् ॥ १८७२ ॥
जरढाषाढसंजातशीतज्वरमहाभयः ।
वरूथिनीमथोत्थाप्य विदद्रौ निशि लक्ष्मकः ॥ १८७३ ॥
विसृष्टदूताः कटकं नष्टं वक्तुं प्रभोर्द्रुतम् ।
केचिदन्वसरन्सुज्ञिं सैनिकास्ते जिघांसवः ॥ १८७४ ॥
पारेणैकेन भूपालसैन्यमन्येन वैरिणः ।
वर्त्मनः श्वभ्रदुर्गस्य तुल्यमेव प्रतस्थिरे ॥ १८७५ ॥
शारम्बरपथं वैरिवश्यं त्यक्त्वा यियासवः ।
स्वोर्वीं कालेननाख्येन संकटेन तदन्तिके ॥ १८७६ ॥
तस्मिन्नह्न्यस्खलिता वनिकावासनामनि ।
ग्रामे सैन्या न्यविक्षन्त लोकैरुच्चावचैः समम् ॥ १८७७ ॥
युग्मम् ॥
अनुप्रस्थायिनोभ्यर्णग्रामकेष्वपि दुद्रुवुः ।
भुक्त्वा पीत्वाथ ते निन्युर्निशार्धमकुतोभयाः ॥ १८७८ ॥
अथापातं विद्विषद्भिः स्वस्य श्रावयितुं द्रुतम् ।
क्षोभभृत्सुज्ञिरभ्येत्य तूर्यघोषमकारयत् ॥ १८७९ ॥
क्षणदाशेष एवाशु पलायांचक्रिरे ततः ।
तैस्तैः शैलपथैः सेना निरवष्टम्भनायकाः ॥ १८८० ॥

चित्राम्बराणि मुष्णद्भिः प्राहेत्यज्यन्त मन्त्रिणः ।
भूप्रकम्पैर्गण्डशैला नानाधातुद्रवैरिव ॥ १८८१ ॥
लुण्ठ्यमानाश्चमूस्त्रातुं नाददे कश्चिदायुधम् ।
तदान्वयेन वा तेन स्वात्मनान्यस्तु रक्षितः ॥ १८८२ ॥
उत्प्लुत्य लघयन्तोऽद्रीन्केपि शोणाधरांशुकाः ।
रक्तस्फिजो गतौ प्रापुर्मर्कटा इव पाटवम् ॥ १८८३ ॥
केप्यम्बरपरित्यागविकचद्गौरविग्रहाः ।
हरितालशिलाखण्डा इव वातेरिता ययुः ॥ १८८४ ॥
शूलवेणुवनाकीर्णैः शैलैरकृशविग्रहाः ।
केपि श्वासोत्थपूत्काराः करिपोता इवाव्रजन् ॥ १८८५ ॥
किं नामोदीरणैर्मन्त्री स नासीत्तत्र कश्चन ।
तिरश्चेव विपर्यस्तधैर्यैर्यैर्न पलायितम् ॥ १८८६ ॥
भृत्यस्कन्धाधिरूढोथ गच्छन्मूढः प्रधावितुम् ।
प्रतीहारो द्विषद्योधैर्दूरात्कैश्चिद्यलोक्यत ॥ १८८७ ॥
निरंशुकः स सूर्यांशुकचत्केयूरकुण्डलः ।
प्रतिज्ञायानुसस्रे तैः सर्वप्राणप्रधावितैः ॥ १८८८ ॥
अश्माहतेन भृत्येन त्यक्तः स्कन्धाद्दृषत्क्षतः ।
स निःस्पन्दवपुस्तिष्ठंस्तैरग्राहि महाजवैः ॥ १८८९ ॥
नवबन्धनशोकार्तशारिकाकृशविग्रहः ।
स गग्गलिरिव व्यञ्जद्विषः संकुचितेक्षणः ॥ १८९० ॥
बद्धस्य मे मानधनप्रहर्तुर्वैशसान्तरम् ।
इतोधिकं ध्रुवं सुज्ञिर्विदध्यादिति चिन्तयन् ॥ १८९१ ॥
स्कन्धेधिरोप्य निःशेषीकृतप्रावारभूषणः ।
नदद्भिः सोपहासं तैः सुज्ञेरग्रं व्यनीयत ॥ १८९२ ॥

तिलकम् ॥

प्रच्छाद्य सत्त्ववान्वक्त्रं सोंशुकेनैष नोर्चितः।
बृहद्राज इवेत्युक्त्वा तस्मै स्वान्यंशुकान्यदात् ॥ १८९३ ॥
प्रावारिताम्बरं कृत्वा हयारूढं च तं पुनः।
धैर्येणायोजयत्स्निग्धैर्वचोभिः परिसान्त्वयन् ॥ १८९४ ॥
निर्लुण्ठिततुरंगासिकोशैः परिवृतः स्वशैः।
ततो गृहीत्वा तं श्रीमान्सोमपालान्तिकं ययौ ॥ १८९५ ॥
इमा व्योमाङ्गनक्रीडत्तडित्तरलविभ्रमाः।
भाग्यमेघानुयायिन्यः स्थायिन्यः कस्य संपदः ॥ १८९६ ॥
आराधनधिया स्वैरं यस्याग्रेभोजि भृत्यवत्।
गात्राणि कुङ्कुमालेपैरुपाचर्यन्त च स्वयम् ॥ १८९७ ॥
सोमपालादिभिः प्रह्वैः स मासैरेव पञ्चषैः।
तेषामग्रे तथाभूतस्तिष्ठंल्लोकैर्व्यभाव्यत ॥ १८९८ ॥
लुल्लोपि पलितश्वेतोपान्तश्यामाननः परैः।
वनौका इव बद्धोभूच्छोकमूको वनान्तरे ॥ १८९९ ॥
अर्पितं सुज्ञिना सोमपालः स्वीकृत्य लक्ष्मकम्।
जानन्गृहीतान्कश्मीरान्निजराष्ट्रं न्यवर्तत ॥ १९०० ॥
लोठनस्यान्तिकादेत्य स शूरैर्मांत्रिकादिभिः।
प्रतिश्रुतप्रभूतार्थैः प्रतीहारमयाच्यत ॥ १९०१ ॥
कश्मीरादिप्रतीहारशिक्षापक्षानुयायिभिः।
तदा न कैरमन्यन्त संप्राप्या डामराण्डजैः ॥ १९०२ ॥
लुब्धेनापि प्रतीहारायत्तं राष्ट्रं जिघृक्षुणा।
भूरि चादित्सुना वित्तं राज्ञोकारि न तेन तत् ॥ १९०३ ॥
भग्नमानेष्वमात्येषु प्राप्तेषु नगरं नृपः।
हारिते च प्रतीहारे न धैर्यात्पर्यहीयत ॥ १९०४ ॥

यैः सैन्यसारैर्द्वैराज्यं पुरा भिक्षाचरोकरोत् ।
यैश्चाप्युत्कुपिते राष्ट्रे वृत्त्यावर्तिष्ट सुस्सलः ॥ १९०५ ॥
भूभृता संगृहीतानां शीतज्वररुजा ततः ।
तेषां दशसहस्राणि योधानां निधनं ययुः ॥ १९०६ ॥
विरराम तदा देशे न मुहूर्तमपि क्वचित् ।
बान्धवाक्रन्दतुमुलं प्रेतवाद्यमहर्निशम् ॥ १९०७ ॥
घोरघर्मघृणिश्रान्ताशेषव्यवहृतिस्थितिः ।
सोनुत्साहहतः कालो नष्टराज्य इवाभवत् ॥ १९०८ ॥
नानादिगन्तरायातैः प्राप्तैः काश्मीरकैरपि ।
लोहरेथ प्रवृद्धर्द्धि राजद्वारमजायत ॥ १९०९ ॥
काकतालीयसंप्राप्तलोकोत्तरनृपश्रियः ।
अकुण्ठा लोठनस्यासीत्स्फूर्तिर्वित्तपतेरिव ॥ १९१० ॥
तस्याकारपरिक्लेशवैशसाभिन्नवृत्तयः ।
भोगेष्वबाह्या भ्रातृव्यभृत्यपुत्रादयोभवन् ॥ १९११ ॥
नास्थानवर्षी स्थाने वा बद्धमुष्टिर्विभूतिमान् ।
स वयःपाकनिष्कर्मव्यवहारो व्यभाव्यत ॥ १९१२ ॥
छायानिरङ्कुशगतिः स्वयमातपस्तु
च्छायान्वितः शतश एव निजप्रसङ्गम् ।
दुःखं सुखेन पृथगेवमनन्तदुःख-
पीडानुबोधविधुरा तु सुखस्य वृत्तिः ॥ १९१३ ॥
तादृगभ्युदयावाप्तेर्मासे न्यूनेधिके गते ।
एकसूनोः सुतो दिल्हो लोठनस्य व्यपद्यत ॥ १९१४ ॥
तमेकपुत्रा शोचन्ती शोकशङ्कुहताशया ।
ततः प्रपेदे प्रलयं मल्ला लोठनवल्लभा ॥ १९१५ ॥

पद्म्यामभिन्नभावायां गुणज्येष्ठे तथात्मजे।
विपन्ने स तया लक्ष्म्या न कृत्यं किंचिदैक्षत ॥ १९१६ ॥
निःस्नेहत्वस्य भूपालसुलभस्य विजृम्भितम्।
मोहनी वा श्रियः शक्तिर्यदज्ञासीत्पुनः सुखम् ॥ १९१७ ॥
अकारयन्निर्धनोपि तथा वृद्धस्य कालवित्।
लक्षैः षट्त्रिंशता मोक्षं लक्ष्मकस्य क्षमापतिः ॥ १९१८ ॥
दिष्टवृद्धिपरिक्षिप्तपुष्पवृष्टौ जनैः पथि।
तस्मिन्प्राप्ते न कोज्ञासीद्राज्ञा प्रत्याहृतां श्रियम् ॥ १९१९ ॥
स लक्ष्मीमहिमक्षिप्रविस्मृताभिभवप्रथः।
प्रभवन्पुनरेवासीन्निग्रहानुग्रहक्षमः ॥ १९२० ॥
धनप्रलोभनिर्नष्टसर्वावष्टम्भपाटवः।
सुज्ञिः साचिव्यमव्याजं भेजे लोठनभूपतेः ॥ १९२१ ॥
दत्तवान्भागिकसुतामविश्वासमपाहरत्।
स तस्याद्यप्रियापायदुःस्थितिव्यथया समम् ॥ १९२२ ॥
अभ्यर्थ्य पार्थिवं पद्मरथं चानीतवान्कृती।
तस्य सोमलदेव्याख्यामुद्वाहाय तदात्मजाम् ॥ १९२३ ॥
एवं प्रधानसंबन्धैर्बद्धमूलं विधाय तम्।
सोव्याहृतस्य साचिव्यग्रहस्यानृण्यमाययौ ॥ १९२४ ॥
अचिन्तयच्च कश्मीरप्रवेशं डामरादिभिः।
बहुशः प्रार्थ्यमानेन प्रेरितो नवभूभुजा ॥ १९२५ ॥
इत्थंभूतं कृतैक्यं च समं सीमान्तभूमिपैः।
अथ च्छलयितुं शत्रुं नीतिं प्रायुङ्क्त सौस्सलिः ॥ १९२६ ॥
तत्रोदयद्वारपतिस्तस्यारम्भे गभीरधीः।
अलुप्तसत्त्वः स्तुत्यत्वं सारेतरविदामगात् ॥ १९२७ ॥

तत्रत्यः स हि निर्नष्टसर्वस्वोप्यर्थितोहितैः ।
दानमानादिभिः स्वामिकृत्ये नित्योदितोभवत् ॥ १९२८ ॥
वनप्रस्थाभिधे स्थाने लोहरादूरगे स्थितः ।
अखिन्नोच्छिन्नसंग्रामैर्भेदं निन्ये द्विषद्बलम् ॥ १९२९ ॥
कटाक्षिताभिप्रायेस्मिन्मिथ्या तथ्येन वा दधुः ।
भयं लोठनभूपालान्माञ्जिकेदारकादयः ॥ १९३० ॥
हन्तव्यांश्चाक्रिकानस्मान्सुज्ञौ न्यस्ताशयो नृपः ।
वेत्ति तत्प्रेरणेनासौ तदाशङ्कितेति ते ॥ १९३१ ॥
संजातं सहजाख्यायां राज्ञ्यां सुस्सलभूपतेः ।
कुर्मो मल्लार्जुनं भूपं लोहरेस्मिन्हिताय वः ॥ १९३२ ॥
तत्प्रेमाणमिवाकस्मादभिसंधत्त लोठनम् ।
संदिदेशाथ तान्धीमाञ्जयसिंहो महीपतिः ॥ १९३३ ॥
व्याजेन राज्ञा संदिष्टं तत्कोट्टं स्वीचिकीर्षुणा ।
प्रतिश्रुतमविश्वस्तैस्तस्मिंस्तैश्च तथैव तत् ॥ १९३४ ॥
मल्लार्जुनं लोठनोथ ज्ञात्वा प्रारब्ध चाक्रिकम् ।
तदाद्यान्भ्रातृसूनूंस्तांश्चाक्रिकानप्यबन्धयत् ॥ १९३५ ॥
अवरुद्धतनूजेन शङ्कां सौस्सलिना भजन् ।
परं विग्रहराजेन प्रातिहार्यमजिग्रहत् ॥ १९३६ ॥
राजा व्याजात्पितृव्येण बद्धसंधिरुपायवित् ।
तत्वरे हारितं राज्यं तैस्तैः स्वीकर्तुमुद्यमैः ॥ १९३७ ॥
विसृज्य शूरं निष्कम्पराज्यः सुज्ञेः परिश्रमात् ।
मासान्कांश्चिदसंक्षोभो वृत्त्यावर्तिष्ट लोठनः ॥ १९३८ ॥
सुज्ञिः पद्मरथापत्यं प्राक्कन्यामानिनाय याम् ।
अनूढाया विवाहाय तस्या मातरमागताम् ॥ १९३९ ॥

आकर्ण्य तेजलादीनां प्रसङ्गेऽस्मिन्सगौरवाम् ।
सामात्यो दर्पितपुरं कृतप्रत्युद्गतो ययौ ॥ १९४० ॥
माञ्जिकाद्यैरथ प्राप्तरन्ध्रैर्निर्गत्य बन्धनात् ।
मल्लार्जुनः कोट्टराज्ये संहृतैरभ्यषिच्यत ॥ १९४१ ॥
ठक्कुरैः प्राग्वदानीतैः प्रतोलीतलमागतान् ।
भृत्यांस्ते सिंहभूभर्तुः प्रविविक्षून्यवारयन् ॥ १९४२ ॥
षष्ठेब्दे लोठनः शुक्लत्रयोदश्यां स फाल्गुने ।
यथायुज्यत राज्येन तथैवाशु व्ययुज्यत ॥ १९४३ ॥
अनूढां कन्यकां मूढः संपदं चाव्ययीकृताम् ।
प्राप्तां परस्य भोग्यत्वं भाग्यहीनः शुशोच सः ॥ १९४४ ॥
अटित्वा टिल्लिकादिभ्यो देशेभ्यो नष्टशक्तिना ।
तेन सुज्जिबलात्कोशशेषः कश्चिदवाप्यत ॥ १९४५ ॥
पूर्वाहूतान्सिंहभूभृद्भृत्यान्व्यकृत्य माञ्जिकः ।
निनायाप्रतिमल्लत्वं मल्लार्जुनमहीभुजम् ॥ १९४६ ॥
तेनातिव्ययिना नव्यवयसा भूभुजा कृतम् ।
मौक्तिकैः पूगविच्छेदे ताम्बूलार्पणमेकदा ॥ १९४७ ॥
वर्षतो विषयौत्सुक्याद्भाटकं कुट्टनादिषु ।
त्यागित्वं तस्य तत्त्वज्ञैः सदोषमुदघोष्यत ॥ १९४८ ॥
प्रजोपतापोपचितः कोशः सुस्सलभूपतेः ।
तेनातिव्ययिना स्वैरमनुरूपव्ययः कृतः ॥ १९४९ ॥
गणिकाचारणद्रोग्धृविटचेटादिपेटकम् ।
साधून्विधूय सोपुष्णाद्धर्मोष्णः कुमतिर्यतः ॥ १९५० ॥
सपल्लसादहितसाद्यदि वा वह्निसाद्भवेत् ।
द्रविणं क्षोणिपालानां जनतोपद्रवार्जितम् ॥ १९५१ ॥

प्रजापीडनजं वित्तं जयापीडमहीभुजः ।
दास्याः पुत्रैरुत्पलाद्यैर्विलुप्तं नप्तुरन्तकैः ॥ १९५२ ॥
लोकसंक्लेशनोद्भूतः कोशः शंकरवर्मणः ।
प्रभाकरादिभिः स्वैरं जायाजारैरभुज्यत ॥ १९५३ ॥
अनङ्गवशगाः पङ्गोरङ्गना वृजिनार्जितम् ।
ददुः सुगन्धादित्याय धनं संभोगभागिने ॥ १९५४ ॥
राज्ञो यशस्करस्यार्थान्व्ययीचक्रेतिसंचितान् ।
अङ्गनानङ्गवैवश्यादालिङ्गितजनंगमा ॥ १९५५ ॥
पूर्वराजार्जितं पार्वगुप्तिः प्राप्य धनं मृतः ।
दाता जायौपपत्येन तुङ्गादीनामजायत ॥ १९५६ ॥
संग्रामराजः श्रीलेखामुखाब्जमधुपैर्धनी ।
मुषितो व्यङ्गसूहाद्यैर्निबिडोपार्जनस्पृहः ॥ १९५७ ॥
अप्रत्यवेक्षाक्षपितप्रजस्य जगदूर्जिता ।
अन्तेनन्तमहीभर्तुर्विभूतिर्भस्मसादभूत् ॥ १९५८ ॥
पुत्रेणापात्रसान्नार्या जारसात्तरसा कृतः ।
कुकलाकौशलोद्भूतः कोशः कलशभूपतेः ॥ १९५९ ॥
सह गेहैः समं स्त्रीभिः सत्रा पुत्रैरभूद्धनम् ।
अश्रान्तार्जनतर्षस्य हर्षदेवस्य वह्निसात् ॥ १९६० ॥
चन्द्रापीडोच्चलावन्तिवर्माद्यैर्धर्मनिष्ठुरैः ।
निष्ठा न्याय्यस्य कोशस्य नावाप्यनुचिता क्वचित् ॥ १९६१ ॥
चौरचाक्रिकसीमान्तभूभृद्धेश्याविटादयः ।
लुण्ठिं प्रारेभिरे पुष्टां नवे मल्लार्जुनोदये ॥ १९६२ ॥
वञ्चयित्वाप्यरीन्भूभृत्ताम्यन्विघटितेप्सितः ।
अथ चित्ररथं तूर्णमास्कन्दाय व्यसर्जयत् ॥ १९६३ ॥

द्वारपादाग्रयोस्तुल्याधीकारेण प्रवर्धितः।
सोऽनन्तसामन्तयुतः पदं फुल्लपुरे व्यधात् ॥ १९६४ ॥
उत्सेहिरे न विततता अपि दुर्गसमाश्रयात्।
मल्लार्जुनचमूर्जन्ये जेतुं तदनुजीविनः ॥ १९६५ ॥
भेदाय कोट्टमारूढस्तद्भृत्यो राजसंमतः।
मल्लार्जुनानुगै रात्रौ हतः संवर्धनाभिधः ॥ १९६६ ॥
युद्धासाध्येपि तिष्ठन्तः कोट्टे भयविधेयताम्।
कोष्टेश्वरेन्वगायाते तत्रामित्राः प्रपेदिरे ॥ १९६७ ॥
प्रतिश्रुतकरो बद्धसंधिः स व्यसृजत्ततः।
सभाजनाय जननीं तेषां मल्लार्जुनोन्तिकम् ॥ १९६८ ॥
सा वैधव्यविविक्तेन वेषेणैश्वर्यशोभिना।
कोष्टेश्वरादीन्सोत्कण्ठांश्चक्रे चपलचेतसः ॥ १९६९ ॥
तस्यां गृहीतविस्रम्भं व्यावृत्तायां तदन्तिकात्।
द्वारेशाय ददावूरीकृतं मल्लार्जुनः करम् ॥ १९७० ॥
आकृष्टो राजजननीचक्षूरागेण कोष्टकः।
दिदृक्षाकपटात्कोट्टमारुरोह मितानुगः ॥ १९७१ ॥
अर्धरूढेन सहितस्तेन चित्ररथस्ततः।
संभूत[1]प्राभृतो भूमिभर्तुः सविधमाययौ ॥ १९७२ ॥
राजा तु संमन्त्र्य ततः प्रायुङ्क्ताहृतिशालिना।
उदयद्वारपतिना नीतिं जेतुमरीन्पुनः ॥ १९७३ ॥
वीतास्कन्दो लोठनेपि गते पद्मरथान्तिकम्।
लेभेभिनवभूपालः किंचित्पादप्रसारिकाम् ॥ १९७४ ॥
उदूढवान्सोमलाख्यां तां पद्मरथकन्यकाम्।
उपयेमे धृतायामो नागपालात्मजामपि ॥ १९७५ ॥

---

१ संभृत इति स्यात्।

तस्मादहंक्रियामूढाल्लेभिरे गूढकैतवाः ।
भूभुजः सोमपालाद्या भृत्यभावेन वेतनम् ॥ १९७६ ॥
कविगायनजल्पाकयोधचारणचेष्टितैः ।
बहवो मुमुषुर्धूर्तास्तेपि तं राजबीजिनः ॥ १९७७ ॥
स बाल्यान्निष्परीपाकप्रज्ञो दृष्टो रटन् बहु ।
जज्ञे वाक्प्रौढिमात्रेण बालिशैः कुशलाशयः ॥ १९७८ ॥
केतोरिवाभद्रहेतोः प्रदीप्तं वदनं विना ।
अनिष्ठुराकृतेर्दृष्टं तस्यान्यत्र न सौष्ठवम् ॥ १९७९ ॥
अत्रान्तरे नृपः सुञ्जि संजग्राहोग्रविक्रमम् ।
मा भून्मल्लार्जुनेनापि श्रितोसाविति चिन्तयन् ॥ १९८० ॥
निर्वासने प्रवेशे च प्रभुः सुञ्जेस्ततोधिकम् ।
तात्कालिकीं प्रतीहारः शक्तिं कांचिददर्शयत् ॥ १९८१ ॥
स कम्पनाद्यधीकारस्रजं राजविसर्जिताम् ।
वितरन्सुञ्जये राजस्थानकार्यस्रजं विना ॥ १९८२ ॥
निस्तोषाय गृहायातसोमपालानुरोधतः ।
प्रसीदन्वामहस्तेन निजजूटस्रजं मदात् ॥ १९८३ ॥
आकृष्य प्रददौ तस्य तत्प्राप्तिपरितोषिणः ।
आप्यायमार्द्रया दृष्ट्या यत्संपद्वीरुधो व्यधात् ॥ १९८४ ॥
[2]चक्कलकम् ॥
भर्त्रे हिताय सौहार्दं विधूयोदयधन्ययोः ।
अभजद्विल्हणः सुञ्जेः प्रवेशे प्रतिलोमताम् ॥ १९८५ ॥
प्रत्युद्गमेन संमान्य सुञ्जि प्रावेशयन्नृपः ।
देशान्निरास्थद्धन्यादीन्मानसान्न तु तद्गिरा ॥ १९८६ ॥

---

१ तिलकम् इत्युचितम् ।

कृतागाः क्ष्मापतौ लब्धक्षणे तीक्ष्णैर्जिघांसति ।
कोष्टेश्वरः पलायिष्ट ज्ञातोदन्तस्तदन्तिकात् ॥ १९८७ ॥
आस्कन्दायागते राज्ञि गृहीतमनुजेश्वरे ।
स्वपक्षभेदोपहतः सोथ देशान्तरं ययौ ॥ १९८८ ॥
लोठनस्तु निजग्राह कांश्चिदालम्ब्य ठक्कुरान् ।
बप्पनीलाभिधे स्थाने वसन्मल्लार्जुनं बलात् ॥ १९८९ ॥
तत्र दृष्टमसंभाव्यमेवास्य खलु पौरुषम् ।
परिभ्रष्टोपि यद्बद्धपदं तमजयत्सदा[1] ॥ १९९० ॥
जहार तुरगांल्लुण्ठि चकाराट्टिलिकापणे ।
मार्गद्रङ्गादिभङ्गं च·····सर्वत्र सोकरोत् ॥ १९९१ ॥
राजराजाभिधानेन डामरेणार्थितस्ततः ।
कश्मीरराजसंप्राप्त्यै क्रमराज्यमगाहत ॥ १९९२ ॥
तदवेत्य समीपस्थे हते चित्ररथेन सः ।
तस्मिल्लँवन्ये प्रययौ बप्पनीलभुवं पुनः ॥ १९९३ ॥
तस्मिन्नास्कन्दमसकृद्दत्त्वट्टिलिकामपि ।
अवरोद्धुमशक्तोभूत्कोट्टे मल्लार्जुनो वसन् ॥ १९९४ ॥
भ्रातृव्येण पितृव्यस्य दापयित्वा धनं बहु ।
ततः कोष्टेश्वरो यात्रासज्जः संधिं न्यबन्धयत् ॥ १९९५ ॥
लोहरे विहितस्थैर्ये गृहीत्वा लोठनं ततः ।
कश्मीरोर्व्यां पपातासौ विजिघृक्षुः क्षमाभुजा ॥ १९९६ ॥
गिरीनुल्लङ्घ्य कार्कोटद्रङ्गे विहितवान्पदम् ।
निपत्य मार्गेनुद्धाते यावदन्यैश्च डामरैः ॥ १९९७ ॥
नावाप योगं निर्गत्य क्षिप्रकारी क्षमापतिः ।
सर्वोद्योगेन तं तावदुत्थानोपहतं व्यधात् ॥ १९९८ ॥

---

१ तदा इत्युचितम् ।

अत्रान्तरे प्रतीहारः प्रापास्तमयपीडया ।
न संपत्स्वल्पपुण्यानामनपायित्वमायुषः ॥ १९९९ ॥
उत्सारणप्रियतया परिरुद्धसर्व-
द्वारे गृहे निरनुरोधतया वसन्तः ।
संपल्लघूकृतधियोप्रतिघप्रवृत्ते-
र्धिग्जानते न रभसान्नियतेर्निपातम् ॥ २००० ॥
कुर्वाणोत्सारणं तस्य गृहजा[1] सततं नृणाम् ।
नाज्ञासीत्सुखसुप्तस्य पृष्ठे पतितमन्तकम् ॥ २००१ ॥
ज्वरितः स हि निष्च्यूतज्वरः स्वपिति विज्वरः ।
विदित्वेति न विज्ञातः स्वपन्नेव मृतस्तदा ॥ २००२ ॥
सलोठने कोष्टकेथ प्रयाते नृपतिः पुनः ।
न स मल्लार्जुनो नापि कोष्टको न स लोठनः ॥ २००३ ॥
छद्मनोदयनं पार्श्वस्थितं मल्लार्जुनोवधीत् ।
तस्मै चुक्रोध माध्यस्थ्ये स्थापितस्तेन कोष्टकः ॥ २००४ ॥
अनुनिन्ये न तं खिन्नं स संभृतबलस्ततः ।
अभिषेणयितुं क्रोधादधावत्सह लोठनम् ॥ २००५ ॥
कोष्टको मल्लकोष्टाद्यैर्मितैर्युक्तोपि सादिभिः ।
तीर्त्वा परोष्णीं तत्सेनां निर्ममाथाप्रमाथिनीम् ॥ २००६ ॥
हतेषु तेषु संग्रामे खशसैन्धवकादिषु ।
वधं प्राप्तः सिंहभूभृद्द्वेषान्न स नृपो हतः ॥ २००७ ॥
आरूढः कोट्टमूर्धानं मानमूर्ध्नः परिच्युतः ।
भग्नप्रतापो भूयोऽपि समधत्त स कोष्टकम् ॥ २००८ ॥
विसृज्य लोठनं तिष्ठन्निर्वैरमगमत्पुनः ।
अनिर्वाहितदेयेन तेन द्वैधं स डामरः ॥ २००९ ॥

---

१ गृहिणी इति स्यात् ।

बद्ध्वाधिकारिणः शुल्कं गृह्णताकारि राजवत्।
तेन स्वनाम्ना भाण्डेषु द्रङ्गे सिन्दूरमुद्रणम् ॥ २०१० ॥
जतुसंहतयोः काचकलशीदलयोरिव।
क्षणे क्षणे संधिभङ्गस्तयोः समुदपद्यत ॥ २०११ ॥
निर्व्यूढिशून्यैर्वाग्रौक्ष्यैर्विरागं लोहरेश्वरः।
निन्ये लवन्यं सोप्येनं स्पर्धाबन्धैरनङ्कुशैः ॥ २०१२ ॥
डामरेण ततो दत्त्वास्कन्दं तत्कटकान्तरम्।
पराध्यायुधधुर्याश्वहरणात्सु···रं कृतम् ॥ २०१३ ॥
दत्त्वात्व·····रायत्यां विषमैर्हठपौरुषैः।
एवं तं कोष्टको मूढः सुखोच्छेदं व्यधाद्द्विषाम् ॥ २०१४ ॥
तनयादानसंबन्धाच्छ्वशुरं मुख्यमन्त्रिणम्।
अत्रान्तरे नृपो हन्तुं माञ्जिकं स व्यचिन्तयत् ॥ २०१५ ॥
आसीत्कठोरतारुण्यतरङ्गितमनोभवः।
सुव्यक्तं स हि तन्मातुरौपपत्येन संमतः ॥ २०१६ ॥
आहारावसरे तीक्ष्णाः कृतसंज्ञाः क्षमाभुजा।
दत्तप्रहरणाः प्राणैर्भुञ्जानं तं व्ययोजयन् ॥ २०१७ ॥
धुन्वन्नसिपटं बद्धवीरपट्टो रटन्बहु।
निर्लुण्ठयन्स तत्सेनां तां तामारभटीं व्यधात् ॥ २०१८ ॥
अवाशिष्यत न द्रोहमध्यादिन्दारकोप्यहो।
राज्ञा विशमितस्तेन रसदानेन स स्वयम् ॥ २०१९ ॥
दैवेनोत्सारितारातिस्ततः सिंहमहीपतिः।
संदधे कोष्टकं सुञ्जि प्राहिणोद्विजयाय च ॥ २०२० ॥
मार्गस्य याममात्रेण गम्यस्यान्तिकमाप सः।
यावत्तुरंगहरणात्कोष्टकेनाकुलीकृतः ॥ २०२१ ॥

अन्तर्भेदाकुलस्तावत्प्रत्यवस्थातुमक्षमः ।
गृहीतकोशः संत्यज्य कोट्टं मल्लार्जुनो ययौ ॥ २०२२ ॥
राज्यभ्रष्टः स निर्लुण्ठ्यमानो मार्गेषु तस्करैः ।
अवनाहोन्मुखो रक्षन्कोशशेषं कथंचन ॥ २०२३ ॥
भ्रष्टमष्टादशशरद्देश्यश्चाष्टमवत्सरे[1] ।
राज्यात्तेन द्वितीयस्यां वैशाखस्यासितेहनि ॥ २०२४ ॥
दाता शिखामृतरुचेरमृतं विलम्ब-
कार्पण्यकृत्समिति लूनशिराः कृतश्च ।
ईशेन यत्र तदकार्युपकर्तुरस्तु
तत्रापरः क इव संनिहितद्विजिह्वः ॥ २०२५ ॥
मुक्ता इमा इति जलं नलिनेषु लीनं
ज्ञातृत्वमेतदिति जाड्यमिनेषु लग्नम् ।
यज्ज्ञायते किमपि हन्त विमोहनी सा
शक्तिः श्रियः स्फुरति कापि तदाश्रयायाः ॥ २०२६ ॥
घ्नन्त्यद्भुतप्रहरणा विपिनेषु केपि
घ्राणेन केचन दृशाथ रसज्ञयान्ये ।
ते केपि सन्ति तु नरेन्द्रगृहेषु हिंस्रा
वाचैव ये विरचयन्ति किलोपघातम् ॥ २०२७ ॥
ज्योतीरसाश्मन इवाश्रितमीश्वरस्य
निर्दग्धुमिन्धनमिवाग्रगतं न शक्ताः ।
पश्चाद्भवेद्यदि स तत्प्रसृतावकाशाः
कुर्युः खला रविकरा इव भस्मशेषम् ॥ २०२८ ॥
कापिलं हर्षटं कोट्टं नीतवान्मण्डलेशिताम् ।
उदयैः कोट्टभृत्यानां संग्रहं कम्पनाधिपः ॥ २०२९ ॥

---

१ शरद्देश्येनाष्टम इत्युचितम् ।

कुर्वञ्शय्यां पुनर्नेतुं मण्डलं तद्यलम्बत ।
दिनानि कतिचित्तत्र यावत्प्रकृतिदुर्जनैः ॥ २०३० ॥
विटैरसूयाविषमैः प्रसादावसरो नृपः ।
तावत्कलुषतां तस्मिन्नुपजापैरनीयत ॥ २०३१ ॥

चक्कलकम् ॥

राजा भवन्परः कोस्तु सुविचारदृढक्रियः ।
एषोपि शिशुवद्भूभृद्यत्र धूर्तैः प्रनर्त्यते ॥ २०३२ ॥
शैशवे बालिशप्रायैः संस्तुतैर्जाड्यमर्पितम् ।
प्रौढावपि न वा यायाद्राज्ञः कार्ष्ण्यं मणेरिव ॥ २०३३ ॥
भृत्यान्तरापरिज्ञानमात्रेण जगतीभुजाम् ।
निरागसो वज्रपातः कष्टं राष्ट्रस्य जायते ॥ २०३४ ॥
कृत्येव्यवसितेसाध्ये हास्यः स्याल्लक्ष्मकादिवत् ।
सुज्ञिः प्रायोजि राजान्नैर्निर्जेतुमिति लोहरम् ॥ २०३५ ॥
निर्व्यूढाद्भुतकार्येथ तस्मिन्ब्रह्मास्त्रतुल्यया ।
अमोघया प्रजह्रुस्ते पापाः पैशुन्यविद्यया ॥ २०३६ ॥
गाम्भीर्यालक्ष्यविकृतैः[1] प्रीत्यालापैर्महीपतेः ।
प्रत्यायातः कलुषतां नाज्ञासीत्कम्पनापतिः ॥ २०३७ ॥
प्रकृत्या तस्य निर्द्रोहतया शङ्कास्य तादृशम् ।
प्रियं कृतवतश्च स्यादविश्वासोथवा कथम् ॥ २०३८ ॥
प्रीतिरासीन्न नृपतेस्तत्कृत्यैरुचितैरपि ।
अप्रियप्रमदालापैर्विरक्तस्येव कामिनः ॥ २०३९ ॥
जित्वा राष्ट्रद्वयं प्रादां हारितं नृपतेरिति ।
बहुमानेन दर्पाच्च स्वच्छन्दं स व्यवाहरत् ॥ २०४० ॥

---

१ विकृतेः इत्युचितम् ।

पौरानगारहरणाद्यपकारैर्निरङ्कुशाः ।
तद्बन्धवो बाधमाना विरागमनयज्जनम् ॥ २०४१ ॥
निजागःस्मरणात्कोष्टेश्वरो न व्यश्वसीन्नृपे ।
न पितृव्येपि भूपालकोपाविष्कृतविक्रिये ॥ २०४२ ॥
कोशं प्रजोपतापेन संचिन्वन्सुज्जिना समम् ।
संबन्धकृच्चित्ररथो नाभूदभिमतः प्रभोः ॥ २०४३ ॥
धन्योदयौ नृपः सुज्जिदाक्षिण्यालक्ष्यसौहृदः ।
अपुष्णाद्भविणैर्गूढं राजपुर्यां कृतस्थिती ॥ २०४४ ॥
तौ चावालगतौ शीतज्वरनष्टपरिच्छदौ ।
मल्लार्जुनस्य साम्राज्यभ्रंशेपि विपुलश्रियः ॥ २०४५ ॥
सुज्जिद्वेषात्पुरा दूतैराहूतो लक्ष्मकेण यः ।
आगच्छत्सञ्जपालः स प्राप राजपुरीं तदा ॥ २०४६ ॥
सुज्जिचित्ररथाभ्यां तं रुद्धचेष्टेन भूभुजा ।
अविसृष्टप्रवेशाशं दूतैर्मल्लार्जुनोभजत् ॥ २०४७ ॥
तन्निमित्तं स केनापि सामन्तेन सहाध्वनि ।
संजातकलहे शस्त्रक्षतो लक्ष्म्या व्ययुज्यत ॥ २०४८ ॥
तथाभूतमपि स्वर्णं भूर्युरीकृत्य नाशकत् ।
यत्तं मल्लार्जुनो नेतुं कार्यज्ञैस्तदपूज्यत ॥ २०४९ ॥
सोस्वतन्त्रेण राज्ञा च सौजन्याद्रिल्हणेन च ।
दूतैः प्रच्छन्नमाहूतो रभसादाययौ ततः ॥ २०५० ॥
न न्यग्न···त्र चेद्धन्युर्माममुत्रेति चिन्तयन् ।
अमित्रविषमे मार्गे पुरं साहसिकोविशत् ॥ २०५१ ॥
स कन्यकुब्जगौडादिमण्डलेषु महीभुजाम् ।
स्पर्धया लब्धसत्कारो भूपतेर्मन्त्रियन्त्रिताम् ॥ २०५२ ॥

अनवाप्य निजे देशे सत्क्रियां दुःखितोभवत् ।
राजधान्यन्तिकैः[1] पौरैः प्रस्तुतास्तु व्यलोक्यत[2] ॥ २०५३ ॥
भूपालोगणयित्वाथ मन्त्रिणो दत्तदर्शनः ।
भेजे स्वहस्ताताम्बूलदानप्रक्रिययैव तम् ॥ २०५४ ॥
निष्किंचनोपि सत्ख्यातिमात्रेणानुगतो जनैः ।
यातायातं नृपगृहे कुर्वञ्शत्रूनकम्पयत् ॥ २०५५ ॥
व्याहारव्यवहारादि व्यालोक्यालौकिकाकृतेः ।
पुरुषान्तरवित्सुज्जिस्तस्य स्वैरमवेपत ॥ २०५६ ॥
दध्यौ सोथ ध्रुवं राष्ट्रेखर्वसर्वंकषक्रियम् ।
नैवमेवाद्भुतं भूतमेतादृक्शान्तिमेष्यति ॥ २०५७ ॥
तांस्तान्देशान्तरे वीरानुत्सिक्तान्दृष्टवान्स च ।
तं पर्यालोच्य विश्रान्ति सोत्सेकानाममन्यत ॥ २०५८ ॥
भवितव्यतया दर्पेणाथ नीतः स्वतन्त्रताम् ।
परिवादावहं सुज्जिस्ततो यत्तद्यवाहरत् ॥ २०५९ ॥
स्वानुगैर्लुण्ठितं रूक्षमाचक्षाणं रुषा द्विजम् ।
प्रासैर्मंडवराज्यस्थः स सृगालमिवावधीत् ॥ २०६० ॥
बाह्ये कुकर्मणा तेन विप्लाव्य जनमागतम् ।
तं प्रत्युग्रक्रियं लोको विरागं नगरेप्यगात् ॥ २०६१ ॥
अत्रान्तरे बन्धुमेकं व्यधुः कमलियादयः ।
अगण्यप्रायमुत्सेकादुत्तमप्रक्रियास्पदम् ॥ २०६२ ॥
मयि सत्यपरोपि स्यात्किमनुग्राहकः स्वयात् ।
अकारि चारणप्रायस्तादृक्कोपीति सुज्जिना ॥ २०६३ ॥
संजातयौनसंबन्धबन्धः कमलियादिभिः ।
अथास्याक्षिगतोत्यर्थं सामर्थ्याद्विल्हणोप्यभूत् ॥ २०६४ ॥

---

१ राजधान्यन्तिके इति स्यात् । २ विलोकितः इति स्यात् ।

अल्पेन हेतुनोद्भूतं द्वैतं तेषां च तस्य च ।
खलपैशुनसेकैस्तत्प्रापाशु शतशाखताम् ॥ २०६५ ॥
प्रकृत्योत्सिक्तमुत्सेकावहैः समुददीपिपत् ।
दुर्मन्त्रैर्विग्रहैश्चाग्रे साहदेविस्तमुल्हणः ॥ २०६६ ॥
असमानां सहास्माभिः क्षमते समशीर्षिकाम् ।
कृतघ्नोयमिति स्वैरं मन्युं राज्ञ्यपि सोग्रहीत् ॥ २०६७ ॥
बिभ्यत्तु भूपतिस्तस्माद्विल्हणं बाह्यभृत्यवत् ।
मन्त्रस्वैरकथाद्येषु विस्रम्भेषु व्यवर्जयत् ॥ २०६८ ॥
स तु धूर्तत्वदुर्लक्ष्यताद्दक्षस्वामिवैकृतः ।
स्वेषां धैर्यं परेषां तु संत्रासं माययातनोत् ॥ २०६९ ॥
समग्रशक्तिराकाङ्क्ष्यसंस्तवः पक्षयोर्द्वयोः ।
तस्य तु प्रययौ सज्जपालो दानेन मित्रताम् ॥ २०७० ॥
संनद्धयोः प्रविशतोरन्योन्यस्पर्धया तयोः ।
क्षणे क्षणे राजधानी ययौ संभ्रमलोलताम् ॥ २०७१ ॥
सुज्ञिः स भूपानाक्षेप्तुं प्रतिपक्षान्युयुत्सया ।
महीमानोत्सवास्थाने संक्षोभमुदपादयत् ॥ २०७२ ॥
कृकाटिकान्यस्तहस्तो द्वाःस्थेनावेदितो हि सः ।
तं निर्भर्त्स्य शिलाक्षेपं क्रोधरूक्षाक्षरोकरोत् ॥ २०७३ ॥
लिखितैरिव तान्सर्वैः सोढुं रक्षणमीशितुः ।
मिथ्या तथ्यमिवोदीर्य संग्रश्नद्भिः समर्थताम् ॥ २०७४ ॥
उपावेशयदभ्यर्णे भूपतिः परिसान्त्व्य तम् ।
सत्यस्मिन्नास्ति नः किंचिदित्यन्तस्तु व्यचिन्तयत् ॥२०७५॥
चक्रे मडवराज्यस्थैरथ प्रायो द्विजातिभिः ।
न सुज्ञेः कम्पनेशत्वमिच्छाम इति वादिभिः ॥ २०७६ ॥

अन्विष्य विद्विषः शङ्कां मन्त्रविन्निशि रिल्हणः।
संनद्धसैन्यमानिन्ये पञ्चचन्द्रं तदप्रियम् ॥ २०७७ ॥
शशङ्के सज्जपालाच्च तस्माच्च बहुसैनिकात्।
सुज्जिरन्यानगणयन्नबुद्धास्य च तद्रिपुः ॥ २०७८ ॥
आस्कन्दभीत्या निर्गत्य हयारोहैः समं गृहात्।
व्यूढानीको निरुद्धातो जजागाराथ सोध्वनि ॥ २०७९ ॥
भूपतिप्रातिलोम्येन वर्तमानस्तदाभवत्।
कोष्टेश्वरोपि संनद्धः सुज्जिना बद्धसौहृदः ॥ २०८० ॥
स्थितमप्रातिलोम्येन सोवधीन्मनुजेश्वरम्।
इति द्वेष्योपि नितरां द्वेष्यतां नृपतेरगात् ॥ २०८१ ॥
तथा स्थिते निशीथिन्यामाचख्युस्तस्य विद्विषः।
दुर्भुक्षाहेतुतां राज्ञः स्वगुप्त्यै तेन या कृता ॥ २०८२ ॥
अतथ्यं तथ्यवद्वस्तु तथ्यं वातथ्यवन्नृपः।
यः पश्येन्मूढवत्सोर्थैस्त्यक्तोनर्थैः कदर्थ्यते ॥ २०८३ ॥
रत्नज्योतिर्हुतवहधिया त्यज्यते दृष्टिपातः
श्यावाक्षाणामितरविषयः स्वस्य संभाव्यते च।
वस्त्वेकैकं यदिह न मृषा तन्मृषा यन्मृषा त-
त्तथ्येनेत्थं किमिव न जनैर्दृश्यते तत्त्वशून्यैः ॥ २०८४ ॥
राजाथ तद्बधादन्यदजानन्दौस्थ्यभेषजम्।
न्ययुङ्क्त तस्य तीक्ष्णत्वे सज्जपालं महौजसः ॥ २०८५ ॥
स कापुरुषवद्धीरः प्रहर्तुं छद्मनाक्षमः।
काङ्क्षन्नाक्षिप्य तं हन्तुं तत्र तत्रैक्षत क्षणम् ॥ २०८६ ॥
मायाप्रयोगानन्योन्यमुद्दिश्य स्पृशतोर्द्वयोः।
क्षणे क्षणेभजद्राष्ट्रं त्रासोल्लासविलोलताम् ॥ २०८७ ॥

प्रत्याशङ्क्योदयं रात्रौ सुज्जौ जाग्रति पूर्ववत् ।
अव्यग्रयामिकग्रामं राजधामाप्यजायत ॥ २०८८ ॥
राष्ट्रान्निर्वासने रिल्हणस्य सुज्जेरभीप्सिते ।
पार्थिवोप्यनुमन्ताभूदनीशः प्रत्यवस्थितौ ॥ २०८९ ॥
स निर्यियासुरामन्त्र्य तत्खेदात्क्षुभिताः प्रजाः ।
संदर्श्य द्वारपतिना राज्ञो युक्त्या समर्थितः ॥ २०९० ॥
संमन्त्र्य नृपतिं मैत्रीप्रार्थिना सुज्जिना समम् ।
पीत्वा कोशं सज्जपालः प्राप्तो राज्ञो व्यजिज्ञपत् ॥ २०९१॥
प्रेरणादुल्हणादीनां स्वोत्सेकाच्चैष वर्तते ।
राजन्सुज्जेरभिप्रायः स्पर्धिनोन्याननिच्छतः ॥ २०९२ ॥
निर्द्रोहस्योपकर्तुश्च मते स्याद्यदि मे नृपः ।
निर्वास्य रिल्हणं चित्ररथं बद्ध्वा महाधनम् ॥ २०९३ ॥
लोहरारब्धिनिर्नष्टानश्वान्कोशं च भूपतेः ।
नयेयं संभृतो हन्यां दुर्वृत्तमपि कोष्टकम् ॥ २०९४ ॥
कार्योपरोधान्निर्बन्धः संबन्धेष्वेव नास्ति मे ।
दाक्षिण्यं स्वामिनः कृत्ये यस्य प्राणास्तृणोपमाः ॥२०९५॥
मध्येथ[1] प्रतिराजादिनिर्जयस्वीकृतोद्यमे ।
युवा विश्रान्तचित्तोयं नृपश्रीभोगभाग्भवेत् ॥ २०९६ ॥
साहायकाय द्वारेशमुल्हणं रिल्हणाश्रये ।
कार्यव्राते च मामीशमाकारयितुमिच्छति ॥ २०९७ ॥
ब्रूते च मामुल्हणं च त्वं चाहं चाविभेदिनः ।
मिलिता यत्र तत्रास्ति गण्यः को नु नृपास्पदे ॥ २०९८ ॥

---

१ मध्येव इति स्यात् ।

इहस्था नवदायादमेकमानीय कंचन ।
निदध्मोस्य पदे राज्ञो नानुतिष्ठेदिदं यदि ॥ २०९९ ॥
गुणान्प्रसरणत्रासाद्बन्धायेव गिरां सृजन् ।
द्विजांशुभङ्ग्या राजाथ विनिःश्वस्याब्रवीद्वचः ॥ २१०० ॥
यथाह स तथैवैतन्न द्रोहो नासमर्थता ।
नौदासीन्यमथैतस्मिन्संभाव्यमभिमानिनि ॥ २१०१ ॥
निष्प्रतिद्वन्द्वभावोस्य दुरुच्छेदो भवेदिति ।
इयमप्यन्यतस्तावदस्त्वपायधियः कथा ॥ २१०२ ॥
किं तु दूये य आकोपप्राथम्यात्तथ्यतोपि वा ।
निर्द्रोहस्य वधो ध्यातो योस्यासौ कार्य एव तत् ॥२१०३॥
अर्थोयमल्पसत्त्वानामग्रेस्माभिर्हि मन्त्रितः ।
नूनं तेनोपलभ्येत तानावर्जयता धनैः ॥ २१०४ ॥
पुण्यैरपरिहार्यैः स्वैर्जाड्यैर्वा मादृशाममी ।
जानतामपि जायन्ते निर्गुणा भोगभागिनः ॥ २१०५ ॥
बालिशान्गृह्णतां प्रायश्चित्तमेतन्महीभुजाम् ।
तन्मौर्ख्यस्य फलं मूढैरेतैर्यदनुभूयते ॥ २१०६ ॥
दुर्गमो भूमिभृन्मार्गो विटैर्हट्टवृषैरिव ।
..... ॥ २१०७ ॥
तन्वाना व्रतवैमुख्यं रसनालौल्यशालिनः ।
परपिण्डोपहर्तारः खलाः कौलेयका अपि ॥ २१०८ ॥
इत्थं खलोपतापेन प्रयुक्तं तद्भयात्पुनः ।
असंहार्यं कुकर्मेदं पश्चात्तापाय नो भवेत् ॥ २१०९ ॥
इत्युदीर्य नृपः सुज्ञैः सज्ञो व्यापादसिद्धये ।
तमजागारयच्छश्वज्जागरं चाग्रहीत्स्वयम् ॥ २११० ॥

बिभ्रन्मत्रस्रुतेः शङ्कां जिघांसुः सुज्जिरित्यपि ।
तथ्यं भृत्यवचो जानंस्तस्थौ दौस्थ्येन पार्थिवः ॥ २११९ ॥
गत्वा स्वयं गृहान्यौनसंबन्धं कुरुतां युवाम् ।
इत्युक्त्वा रिल्हणेनाथ स सुज्जिं समयोजयत् ॥ २११२ ॥
विश्वास्यापि तथा हन्तुं तं प्रसङ्गमनाप्नुवन् ।
उदताम्यद्दिवारात्रं तल्पोपर्यवशं लुठन् ॥ २११३ ॥
सज्जपाले गृहाद्बन्धुनाशदुःखिन्यनागते ।
आशङ्क्य साहसासिद्धिमधिकं पर्यतप्यत ॥ २११४ ॥
निपत्य वीरशयने सुस्सलक्ष्मापसत्क्रियाम् ।
भ्रातरो यस्य कल्याणराजाद्या व्यस्मरन्युधि ॥ २११५ ॥
सेनानीः कुलराजः स ख्यातो व्यायामविद्यया ।
प्राणैरानृण्यमिच्छंस्तमपृच्छच्छोककारणम् ॥ २११६ ॥
युग्मम् ॥
स संस्थापयितुं हन्तुं वाप्यशक्यं न्यवेदयत् ।
तस्याप्रतिसमाधेयं कम्पनाधीश्वराद्भयम् ॥ २११७ ॥
कियदेतन्निजप्राणमात्रलभ्यं महीभुजाम् ।
इत्याभाष्य स जग्राह साहसाध्यवसायताम् ॥ २११८ ॥
दिनद्वयमनायातो गृहेभ्यः कम्पनापतिः ।
न प्रातिभाव्यमभजत्तस्य मृत्योः श्रियोथवा ॥ २११९ ॥
विस्रम्भभृत्यः शृङ्गारनामा चाप्यब्रवीत्प्रभोः ।
तं दृष्टवांस्तृतीयेह्नि शयनेवगणं स्थितम् ॥ २१२० ॥
शोभोपयोगिनो भर्तुर्नित्यं सततसेवकाः ।
कर्तुं साहससाचिव्यं विदूरेण तु पार्यते ॥ २१२१ ॥

करे पिनाको मकराङ्कशत्रोः
शोभाविशेषाय सदानुषक्तः।
पुराहवे कार्मुककर्म तस्य
तत्कालमात्रेन तु मन्दरेण ॥ २१२२ ॥
ताम्बूलहारकव्याजात्ततो राजा व्यसर्जयत्।
कुलराजं तमव्याजधैर्यासंलक्ष्यविक्रियम् ॥ २१२३ ॥
ध्रुवं मृत्युः पुनर्नाहमागन्ता तत्ततोस्य कः।
आरेभेति स निन्ये न ताम्बूलं स्वर्णभाजने ॥ २१२४ ॥
व्यसनप्रशमं राज्ञः स्वदेहत्यागतोनुगाः।
एवं कर्तुं यतन्तेन्ये निर्व्यूढौ स्खलिताः पुनः ॥ २१२५ ॥
सगणो वागणो वास्तु निहतो नियतं मया।
जानात्वतः परं देव इत्युदीर्य विनिर्ययौ ॥ २१२६ ॥
गतस्य साहसासिद्धौ शक्यं शङ्कयं पलायनम्।
..... ॥ २१२७ ॥
व्रजन्स्वामिहितं कृत्वा पुनः पश्चान्निनाय सः।
शस्त्रिणौ द्वौ मिषाच्छस्त्रौ बन्धस्थाने परामृषन् ॥२१२८॥
स्वयं गृहीत्वा ताम्बूलं राज्ञा प्रहित इत्यथ।
द्वाःस्थेनावेदितः सुज्ञेः पार्श्वं रुद्धानुगोविशत् ॥ २१२९ ॥
ददर्शोच्चावचैस्तं च मितैः परिजनैर्युतम्।
यूथनाथमिवात्यलपैर्द्विपैररहितान्तिकम् ॥ २१३० ॥
गृहीतवन्दितस्वामिताम्बूलः सस्मितं स तम्।
दृष्ट्वा[1] कृत्यादि नृपतेः सत्कृत्य व्यसृजत्क्षणात् ॥ २१३१ ॥

---

१ पृष्ट्वा इति स्यात्।

जनप्रवेशाशङ्की स त्वरमाणस्तमब्रवीत् ।
कृतागाः कोपि कैवर्तशस्त्रभृन्मत्समाश्रितः ॥ २१३२ ॥
तस्याक्षेपपरान्भृत्यान्स्वान्निवार्याधुना तव ।
संमान्या वयमित्यग्रे लक्षयन्प्रकृतिक्षणम् ॥ २१३३ ॥
सोत्सेकामिव तां वाचं स दर्पादवधीरयन् ।
तस्य रूक्षाक्षरं नाहं कुर्यामित्यब्रवीद्वचः ॥ २१३४ ॥
स रोषादिव निर्गच्छन्मान्योसाविति वादिभिः ।
तं सान्त्वयित्वा तद्भृत्यै रुद्ध्वा व्यावर्तितः पुनः ॥ २१३५ ॥
तेनावादि ततः कर्तुं विश्रम्भं वस्तुनोमुतः ।
सज्ञयोरादिश द्वारप्रवेशं भृत्ययोर्मम ॥ २१३६ ॥
अवशेनेव तेनाथ वीक्ष्य तौ संप्रवेशितौ ।
सहायलाभाद्दुध्रुक्षुः प्रजिहीर्षुरवर्तत ॥ २१३७ ॥
याताद्य कुर्या प्रातर्वो विधेयमिति तान्वदन् ।
दत्तपृष्ठो विशिश्वसुस्तल्पे सुज्जिर्जहौ वपुः ॥ २१३८ ॥
गत्वाथ किंचिद्व्यावृत्तो निष्कृष्टक्षुरिको जवात् ।
प्राहरत्कुलराजोस्य वामे पार्श्वे कृतत्वरः ॥ २१३९ ॥
तस्य धिक्कुर्वतो द्रोहमधावत्क्षुरिकां प्रति ।
यावत्पाणिः प्रहरणं तावत्सर्वेपि ते व्यधुः ॥ २१४० ॥
विमर्षः पश्यतां यावदाशङ्क्ये तत्र नोद्ययौ ।
स तावदेव सुचिरापेतश्वास इवाभवत् ॥ २१४१ ॥
भयत्यक्ताभिमानेषु विद्रुतेष्वनुजीविषु ।
चकर्ष शस्त्रं तत्रैकः पञ्चदेवः परं तदा ॥ २१४२ ॥
प्रहरंस्तैस्त्रिभिस्तुल्यप्रतिप्रहृतिभिः क्षतः ।
भ्राम्यन्स्रुतासृक्कस्मात्स मण्डपान्निरवास्यत ॥ २१४३ ॥

स्थितान्दत्तार्गले धाम्नि रुद्धद्वारतमोरयः ।
जिघांसवः सुज्जिभृत्यास्ततस्तान्पर्यवारयन् ॥ २१४४ ॥
तमोरिप्रतिकुर्वाणा भज्यमानेरिभिर्व्यधुः ।
ते द्वारे तूलशय्यां तां प्रोत्सार्य शवमुद्धृतम् ॥ २१४५ ॥
खड्गेषुशूलपरशुक्षुरिकाश्माभिवर्षिणः ।
तान्स संभ्रमयन्मार्गैरनेकैस्ते विविक्षवः ॥ २१४६ ॥
नैराश्यहेतोर्विशतां तेषां संकटवर्तिभिः ।
पृष्ठाच्छित्त्वा शिरः सुज्ञेरङ्गनेक्षिप्यताथ तैः ॥ २१४७ ॥
अस्रनिःसरणाभीक्ष्णशुक्लेक्षणपुटश्रुति ।
उत्तरौष्ठकचच्छन्नसन्नघ्राणपुटद्वयम् ॥ २१४८ ॥
अक्ष्णोर्वम्भ्रम्यमाणस्य लोकस्य प्रतिबिम्बकैः ।
संभाव्यमानसंस्पन्दस्तोकप्रव्यक्ततारकम् ॥ २१४९ ॥
स्थपुटस्याक्रमच्छेदाद्गलमांसस्य संधिषु ।
हरिद्रार्द्रैरिवाश्यानमेदोग्रन्थिभिरुल्बणम् ॥ २१५० ॥
धूलिध्वस्तकचश्मश्रु तदेतदिति निश्चयम् ।
परं भालतलस्थेन ददत्कुङ्कुमविन्दुना ॥ २१५१ ॥
तद्वीक्ष्य तिर्यक्पतनव्यक्तसंध्यन्तरद्विजम् ।
उच्चलत्तुमुलाक्रन्दा भृत्याः क्वापि विदुद्रुवुः ॥ २१५२ ॥
कुलकम् ॥
तीक्ष्णान्प्रयुज्य क्ष्मापस्तु तिष्ठन्व्याकुलधीस्तदा ।
बहिर्वीक्ष्य जनक्षोभं साहसं निश्चिकाय तम् ॥ २१५३ ॥
सुज्ञौ हते क्षते वापि कार्यमेतदिति द्रुतम् ।
संनह्य सैन्यस्यादिक्षत्स तन्मन्दिरवेष्टनम् ॥ २१५४ ॥
मिथ्यैव सुज्ञिर्निस्तीर्ण इति श्रुतवता जनात् ।
स्वयमग्राहि भूपेन ततः समरसंभ्रमः ॥ २१५५ ॥

निःसंशयं हतं ज्ञात्वा सुञ्जि राजोपजीविनः ।
तत्र स्थितं शिवरथं सर्वद्वेष्यमबन्धयन् ॥ २१५६ ॥
हिल्लात्मजन्मनः सुञ्जिभ्रातृस्यालस्य कौशलम् ।
कलहस्याद्य निर्वर्ण्य वाणीयं पुण्यभागिनी ॥ २१५७ ॥
आक्षिप्यमाणैर्भिक्ष्वाद्यैरन्ते वीरोचितं कृतम् ।
तेन त्वसंशयस्थेन सदाचारान्न विच्युतम् ॥ २१५८ ॥
राजौकस्येव तां वार्तां श्रुत्वा स ह्यपलायितः ।
हतस्य स्वामिनोभ्यर्णं जिहासुर्जीवितं ययौ ॥ २१५९ ॥
द्वारं पदप्रहृतिभिर्भञ्जन्तं राजसैनिकाः ।
अपसार्य कथंचित्तं तीक्ष्णाः कृच्छ्रादरक्षिषुः ॥ २१६० ॥
प्रविष्टेस्मिन्ननिर्व्यूढपीडिते मण्डपान्तरम् ।
लब्धप्राणा नृपाभ्यर्णं कुलराजादयो ययुः ॥ २१६१ ॥
हठप्रविष्टो हतवान्स तत्रैकं महाभटम् ।
शरैरेव हतो दूरात्कथंचित्परिपन्थिभिः ॥ २१६२ ॥
आयातं क्षुभिते देशे सज्जपालं महीपतिः ।
रिल्हणं चोल्हणं हन्तुं प्राहिणोद्धिहितत्वरः ॥ २१६३ ॥
यातो मार्गात्पलाय्यायं परिशङ्कथेति रिल्हणः ।
क्षितिकातटपर्यन्तमटित्वा यावदाययौ ॥ २१६४ ॥
पूर्वायातः सज्जपालो गृहद्वाराद्विनिर्यतः ।
उल्हणस्य पथो रुन्धन्सुबहून्प्रहरत्रणे ॥ २१६५ ॥
तावदेकस्य खड्गेन निकृत्ते दोष्णि दक्षिणे ।
त्वङ्मात्रशेषे च्छिन्नास्थिस्नायुग्रन्थिरजायत ॥ २१६६ ॥

तिलकम् ॥

अगण्यप्रायतां प्राप्ते वंशे यत्कौशलादसौ ।
दिगन्तरेषु स्वस्मिंश्च देशे प्राप प्रथां पुनः ॥ २१६७ ॥

फलकाले समासन्ने शौर्यप्रतिभुवाभजत्।
स तेन दोष्णा वैकल्यं धिगिच्छां विधुरां विधेः ॥ २१६८ ॥
स प्राग्वदुदयावाप्तौ भवेदविकलो यदि।
फलेन तस्य जानीयादिच्छां लोकोयमद्भुताम् ॥ २१६९ ॥
पीतामृतस्य क्षतविग्रहत्वं
न प्राभविष्यद्यदि नाम राहोः।
अज्ञास्यदिच्छां तदमुष्य लोकः
सामर्थ्यभाजः सुचिरप्ररूढाम् ॥ २१७० ॥
दृष्टः शीलाभिधो वृद्धः पितृव्यः साहदेविना।
सस्पृहं निहतः संख्ये साधुर्जातव्रणार्तिना ॥ २१७१ ॥
तस्यार्या विशतो वेश्म जज्ञलाख्योग्रगो हतः।
मान्योनुगो भटो द्वौ च यामिकश्च जनंगमः ॥ २१७२ ॥
बालं तनयमालोक्य निषण्णस्याङ्गनास्थितेः।
तस्यानिर्गच्छतो गेहे रिल्हणोग्निमदापयत् ॥ २१७३ ॥
आनीयमानो धूमान्धो बद्ध्वा मुख्यैः स सैनिकैः।
गृहद्वारे हतः कैश्चित्प्राकृतैर्व्रणविक्लवः ॥ २१७४ ॥
तस्य प्रधानप्रकृतिक्षयहेतोर्महीपतिः।
मुण्डमप्यवलोक्यासीदशान्तक्रोधविक्रियः ॥ २१७५ ॥
व्यापाद्यमानाः साकोपं भूपतिप्रेरितैर्भटैः।
उच्चावचाः सुज्जिभृत्याः कृत्यं सत्त्वोचितं व्यधुः ॥ २१७६ ॥
अनुजो लक्ष्मकः सुज्जेर्बद्ध्वानीतः स विक्रियाम्।
नृपं वीक्ष्यादयैः कैश्चिद्राजधान्यङ्गने हतः ॥ २१७७ ॥
भ्राता पितृव्यजस्तस्य सङ्कटाख्यो नृपाङ्गने।
खुटन्नट इव प्राणानौचित्येनामुचत्कृती ॥ २१७८ ॥

प्रविष्टः शरणं बाणवंश्यैः पापैः प्रमापितः ।
उन्मत्तो मुम्मुनिस्तस्य भ्राता कैश्चित्स्वमन्दिरे ॥ २१७९ ॥
सुज्जिस्यालस्तु शृङ्गारवृत्त्याभङ्गुरया हतः ।
महाकुलीनो विचरन्नौचित्येन च चित्रियः ॥ २१८० ॥
सङ्गिकाख्यः प्रतीहारो व्रणितः शनकैर्हतः ।
अन्येपि संश्रिताः सुज्जेस्तत्र तत्र प्रमिम्यिरे ॥ २१८१ ॥
जात्यवाजिजवप्राप्तप्राणाः कोष्टेश्वरान्तिकम् ।
आसाद्य वीरपालाद्या द्वित्रा मृत्युभयं जहुः ॥ २१८२ ॥
व्रजञ्शरदि यो दुष्टोत्थानरुद्धतुरंगमः ।
प्रपेदे सङ्कटभ्राता बन्धनं सुभटामठे ॥ २१८३ ॥
सूनुश्च सज्जलः सुज्जेः श्वेतिकश्चाग्रजात्मजः ।
उल्हणस्य तनूजश्च कारागारं प्रपेदिरे ॥ २१८४ ॥
इत्थं राजन्यमात्ये च प्राप्ते पिशुनवश्यताम् ।
नवमेब्दे शुचेः शुक्लपञ्चम्यां विप्लवोभवत् ॥ २१८५ ॥
कार्ये क्वापि[1] विपर्यस्तसत्त्वं संस्मृत्य मन्त्रिणम् ।
तमद्यापि नृपस्तादृग्भृत्योपेतोनुतप्यते ॥ २१८६ ॥
वेतालोत्थापनाच्छ्वभ्रलङ्घनाद्विषचर्वणात् ।
व्यालाश्लेषाच्च विषमं सत्यं राजोपसेवनम् ॥ २१८७ ॥
अनात्मायत्तनिस्तीर्णगुणानां चक्रवर्तिनाम् ।
शकटानामिवाग्रस्थो विश्वस्तः को न भज्यते ॥ २१८८ ॥
अयुक्तं नृपतिः सुज्जिवधं मेने प्रजाः पुनः ।
युक्तं ज्ञात्वा तमुद्रिक्तशक्तितां विविदुः प्रजाः[2] ॥ २१८९ ॥
भेजे राजा सज्जपालं कम्पनाधिपतिं ददत् ।
कुलराजे च नगराधीकारित्वं समार्पयत् ॥ २१९० ॥

---

१ क्वाप्यविपर्यस्त इति स्यात् । २ प्रभोः इति स्यात् ।

त्यक्त्वा मल्लार्जुनं धन्योदयौ नगरमागतौ ।
प्राग्वत्पुनर्जजृम्भाते प्रियौ विश्वंभराभुजः ॥ २१९१ ॥
इतराश्रयविच्छेदा[1] वीतपारिप्लवस्थितिः ।
श्रीः सर्वाकारमकरोत्स्थिरं चित्ररथे पदम् ॥ २१९२ ॥
अद्भुतैश्वर्यधुर्योपि राष्ट्रं दण्डेन पीडयन् ।
शमं नेतुमशक्योभूत्स भूपस्याप्यनङ्कुशः ॥ २१९३ ॥
गन्धर्वानाभिधे ग्रामे टिक्कं हत्वा व्यसर्जयत् ।
पारेविशोकं कोट्टेशस्तच्छिरः पार्थिवान्तिकम् ॥ २१९४ ॥
निसर्गद्वेषिणा प्राप्तप्रतापे नितरां नृपे ।
तदानीं तप्यमानेन दूतेनाप्यायितोसकृत् ॥ २१९५ ॥
कोष्टेश्वरेण रभसादल्पैः परिजनैर्युतः ।
निशि लोठनदेवः स हाडिग्रामं ततोविशत् ॥ २१९६ ॥
महाकथितकन्थोन्यैः संरब्धे राज्ञि सर्वतः ।
बद्धसंधिर्लवन्यस्तं विससर्ज यथागतम् ॥ २१९७ ॥
उच्चलादिवदादातुं राज्यं स रभसं भजन् ।
निर्व्यूढिशून्यदार्ढ्योगान्मूढो लोकस्य हास्यताम् ॥ २१९८ ॥
तीक्ष्णप्रयुक्तिभिः सैन्यभेदैरन्यैश्च कोष्टकम् ।
उपायैर्नृपतिस्तैस्तैस्ततो हन्तुं व्यचिन्तयत् ॥ २१९९ ॥
प्रतिद्वन्द्वीव तीक्ष्णानां पाटिताक्षः क्षमाभुजाम् ।
न संप्रसादयत्[2]क्रुद्धः प्रतियोद्धुं त्वचिन्तयत् ॥ २२०० ॥
स्वैः स्वैः प्रदेशैरादिश्य प्रवेष्टुं पृतनापतीन् ।
स्वयमुच्चावचैः सैन्यैरवचस्कन्द तं पुनः ॥ २२०१ ॥
स भूपं रभसायातं ज्ञात्वाल्पपृतनं बली ।
प्राप्तश्छलयितुं तस्थौ प्रतापैः परिहारितः ॥ २२०२ ॥

१ विच्छेदात् इति स्यात्। २ संप्रासादयत् इति स्यात्।

लग्ने रणे चित्ररथः पृथुसैन्योपि दैवतः ।
तस्य सैन्येकदेशेन निन्ये जयविपर्ययम् ॥ २२०३ ॥
भङ्गना[1] मङ्गलोंकारकल्पेन किल तेन सः ।
ततः प्रभृत्यभूद्भ्रश्यदवष्टम्भो दिने दिने ॥ २२०४ ॥
रिल्हणादीन्योधयित्वा व्यूढव्यस्ताखिलानुगः ।
लवन्यो न्यपतत्सायं कम्पनाधिपतेर्बली ॥ २२०५ ॥
ऊनैः शतादपि भटैर्युतो विद्रुतसैनिकः ।
सेह[2] तत्सैन्यरोषं स गजक्षोभमिवाचलः ॥ २२०६ ॥
किं वाच्यः स नरव्याघ्रः प्रवृद्धिं याति संगरे ।
निजवर्मतनुत्रादि यस्य माति न वर्ष्मणि ॥ २२०७ ॥
मन्दीकृतारिसंरम्भमवष्टम्भेन तादृशा ।
तं त्रिल्लकादयः प्रापुर्लवन्याः सैन्यशालिनः ॥ २२०८ ॥
तैः सजातीयदाक्षिण्यात्तटस्थैरपि संकटे ।
तस्येषदुपयोगोभूत्स्ववीर्यापास्तविद्विषः ॥ २२०९ ॥
काले संनहनं रात्रिजागरः सामतो बलैः ।
समये ग्रहणत्यागतत्तद्युक्तिविकल्पनम् ॥ २२१० ॥
लब्धभूम्यपरित्यागो जिगीषोरीदृशैर्गुणैः ।
चलेयुररयोप्यस्य का वैर्याक्रमणे स्तुतिः ॥ २२११ ॥
अविश्वसन्भिन्नभृत्यस्तादृक्संरम्भपीडितः ।
पलायनोन्मुखः शैलात्कोष्टकोथ व्यगाहत ॥ २२१२ ॥
मार्गेष्वकालप्रालेयपातरुद्धेषु वाजिनाम् ।
गन्तुं तस्योद्यमं जघ्नुः पृष्ठलग्ना विरोधिनः ॥ २२१३ ॥
अवमानोपतप्तोथ परिमेयपरिच्छदः ।
स ययौ जाह्नवीं स्नातुं राज्ञा राष्ट्रादपाकृतः ॥ २२१४ ॥

---

१ भङ्गानां इति स्यात् । २ सेहे इत्युचितम् ।

सोमपालोथ भूपालनाम्ना पुत्रेण खेदितः ।
दीर्घद्वैराज्यदुःखार्तः शरणं नृपतिं ययौ ॥ २२१५ ॥
पुत्रौ दत्तवतो नीवीं नागपालस्य तस्य च ।
अभयं प्रतिशुश्राव भूभृदाश्रितवत्सलः ॥ २२१६ ॥
बृहद्राजस्य जिह्मोयं दौःस्थ्यहेतुरभूदिति ।
स तदापदि नास्मार्षीदव्याजौदार्यधुर्यधीः ॥ २२१७ ॥
साहायकाय स्वं सैन्यं दत्तवांस्तं महीपतिः ।
भूयः प्रतिष्ठामनयद्दर्पप्रशमनाद्विषाम् ॥ २२१८ ॥
स्नात्वा द्युनद्यां व्यावृत्तः कोष्टकोत्रान्तरे पुनः ।
मल्लार्जुनं गृहीत्वाभूद्वैराज्योत्थापनोद्यतः ॥ २२१९ ॥
अर्कोपरागे प्राप्तः स कुरुक्षेत्रमवाप तम् ।
लवन्यं कार्यतस्त्यक्तपूर्ववैरो नृपात्मजः ॥ २२२० ॥
आहूतो लोठनः पूर्वमायातस्तेन डामरम् ।
निशम्य तं संघटितं खिन्नः प्रायाद्यथागतम् ॥ २२२१ ॥
विजयेशाग्रतः पीतकोशोपि नृपतिद्विषः ।
प्रविविक्षूनुपैक्षिष्ट सोमपालो दुराशयः ॥ २२२२ ॥
आराधनाय भूभर्तुस्तत्पुत्रः कोष्टकं पुनः ।
प्राप्तं स्वविषयैस्तैस्तैष्टक्कुरैर्निरलुण्ठयत् ॥ २२२३ ॥
अत्रान्तरे चित्ररथं संवृद्धायासदुर्ग्रहम् ।
अनिच्छन्तोवन्तिपुरे प्रायं चक्रुर्द्विजातयः ॥ २२२४ ॥
उपेक्ष्यमाणास्ते दर्पात्तेनागणितभूभुजा ।
ज्वलिते ज्वलने देहान्बहवो जुहुवुः शुचा ॥ २२२५ ॥
चरके धर्मधेनूनामुत्तब्धेपि तदाश्रितैः ।
वह्निं गोपालकोप्येकः कारुण्यप्रवणोविशत् ॥ २२२६ ॥

---

१ स्वविषये इत्युचितम् ।

भट्टस्योद्भटवंशस्य पृथ्वीराजस्य नन्दनः ।
युवा विजयराजाख्यः सानुजो गाढदुर्गतः ॥ २२२७ ॥
देशान्तरं जिगमिषुर्विषमं वीक्ष्य तत्र तत् ।
व्याजहारानुजन्मानं कारुण्यास्रुकणान्किरन् ॥ २२२८ ॥
उपेक्ष्यमाणा दाक्षिण्यस्तस्मिंतेन महीभुजा ।
विशः सचिवपाशेन विवशाः पश्य नाशिताः ॥ २२२९ ॥
छन्दानुवृत्त्यामात्यानां यत्र क्ष्माभृदुपेक्षते ।
कस्तत्रान्यस्तु दीनानामापच्छमयिता विशाम् ॥ २२३० ॥
यद्वा न्यायोयमन्योन्यस्पर्धया यदुपप्लुतम् ।
शमिता दण्डयेच्छाम्यं शमितारं परोथवा ॥ २२३१ ॥
विशृङ्खलं नयेच्छय्यां दार्ढ्यसारं विघट्टनैः ।
कदाचिल्लोहमश्मानमश्मा लोहं कदाचन ॥ २२३२ ॥
दोषेणैकेन न द्वेष्यो राजा सर्वगुणोज्ज्वलः ।
वधाच्चित्ररथस्यान्यद्विधेयं नावभाति मे ॥ २२३३ ॥
धर्मः सर्वोपकार्येकक्षुद्रक्षपणमुच्यते ।
जघानाजगरं सोपि जन्तूनामन्तकं जिनः ॥ २२३४ ॥
दुर्वृत्तदमनेस्माभिः कृते तेजस्विनो जनात् ।
भूयोप्यधिकृतो विभ्यन्न कश्चित्पीडयेत्प्रजाः ॥ २२३५ ॥
कायस्यास्य परित्यागादनन्ता जन्तवो यदि ।
सुखिनः स्युरसौ भ्रातर्वणिज्या ज्यायसी न किम्॥२२३६॥
संशुश्रुवांसं स तथेत्यथ तं कोशपीथिनम् ।
विधायानुससारैत्य हन्तुं चित्ररथं तदा ॥ २२३७ ॥
कालेऽस्मिन्धर्मदौर्बल्यकलुषेपि कलेः किल ।
प्रभावो भूमिदेवानां द्योततेद्याप्यभङ्गुरः ॥ २२३८ ॥

ब्राह्मणैरपरिक्षीणपूर्णपुण्यो न कश्चन ।
धैर्यमारभते भ्रष्टदुष्टोत्पाटनपाटवैः ॥ २२३९ ॥
द्विजानुद्वेजयन्सुज्जिर्द्विजादेवासदद्धधम् ।
विप्रेणैव हतश्चित्ररथो विप्रावमानकृत् ॥ २२४० ॥
द्विजोत्थापितया क्रान्तचित्तोसौ कृत्यया ध्रुवम् ।
दध्यौ तस्य वधं प्राणान्विना कारणमुत्सृजन् ॥ २२४१ ॥
कृशानुसादकृषत विप्रा देहान्यदैव ते ।
तद्वेषस्तुल्यसंघर्षे तदैवासीद्धतानुगः ॥ २२४२ ॥
अनासादयतश्चित्ररथं पृथुबलान्वितम् ।
गणरात्रमभूद्धन्तुर्दिवारात्रं प्रजागरः ॥ २२४३ ॥
स ह्यपर्यन्तसामन्तसीमन्तितपथो व्रजन् ।
अभूददृश्यो दृश्यश्च जनसंबाधमध्यगः ॥ २२४४ ॥
तेन साश्चर्यनैश्चल्यनिष्ठुरेणैकदा जवात् ।
सोनुसस्रे व्यतिक्रान्तनिःश्रेणिर्नृपवेश्मनि ॥ २२४५ ॥
विलम्बितस्य [1]स्तम्बाग्रे कृपाण्या मूर्ध्न्यथास्य सः ।
सामन्तमध्यगस्यैव प्राहरत्तीव्रसाहसः ॥ २२४६ ॥
मुमूर्षोरिव तत्रास्य वैह्वल्यगलितस्मृतेः ।
उद्भ्रान्तचक्षुषो वर्चश्च्यवनं समपद्यत ॥ २२४७ ॥
प्रमापितोयं राज्ञेति ज्ञात्वा सत्त्वबहिष्कृताः ।
वित्रस्तास्तं तथाभूतमत्यजन्ननुजीविनः ॥ २२४८ ॥
तं वीतजीवितं ज्ञात्वा न तीक्ष्णः प्राहरत्पुनः ।
प्राप्तं द्वितीयनिःश्रेण्या भ्रातरं निषिषेध च ॥ २२४९ ॥
न पलायिष्ट निर्विघ्नसर्वमार्गोपि घातितः ।
राज्ञा चित्ररथः शश्वदित्युच्चैः प्रोच्चकार सः ॥ २२५० ॥

---

१ स्तम्भाग्रे इति स्यात् ।

प्र[1]...ष्टं भृष्टमांसादिराज्यभोगपुरःसरैः ।
सर्वैः कापुरुषैस्त्रासादथ चित्ररथानुगैः ॥ २२५१ ॥
ज्यायाँल्लोठरथस्तस्य भ्राता भीत्या पलायितः ।
शरणं नर्तकीमेकां ययौ वक्षार्पितस्तनः ॥ २२५२ ॥
तादृक्प्रवेशितश्चित्ररथोभ्यर्णं महीभुजा ।
मा भैषीः प्राहरत्कस्त्वामित्युक्त्वाश्वासितः स्वयम्॥२२५३॥
नृपाज्ञया को निहन्ता द्वारेशस्येति वादिभिः ।
तीक्ष्णोन्विष्टो भटैः सोहमित्युक्त्वा स्वं न्यदर्शयत् ॥२२५४॥
धीरो योधान्स्वधैर्यात्तु लङ्घनं[3] श्लाघ्यविक्रमः ।
त्रिंशद्त्रिंशान्स हत्वाथ प्रहृत्य च रणे हतः ॥ २२५५ ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ २२५६ ॥
लब्धा लिखिततत्कृत्यकारणात्पत्रिका करात् ।
तस्यान्तसमयाशंसा श्लोकेनानेन पावनी ॥ २२५७ ॥
अरुच्युन्माददीनत्वयुतश्चित्ररथस्ततः ।
रूढव्रणोपि लालाटसंधिवेधादजायत ॥ २२५८ ॥
स मासान्पञ्चषान्याप्य निराप्यायकृशाकृतिः ।
विवेष्टमानोवर्तिष्ट शयनीयतलेन्वहम् ॥ २२५९ ॥
मल्लार्जुनं पुरस्कृत्य कोष्टको विप्लवोन्मुखः ।
तन्मध्ये तरुसंबाधं गिरिदुर्गमगाहत ॥ २२६० ॥
मा मामभ्रमयं भ्राम्यन्स्वयूथ्यग्रसनोद्यमात् ।
अविस्मृतापदं लोकं पुनर्द्वैराज्यशङ्कितम् ॥ २२६१ ॥
अकाण्डाम्बुदजाड्येन पीडिताङ्ग इवाभजत् ।
परचक्रोदयेनाशु लोकः शिथिलशक्तिताम् ॥ २२६२ ॥

---

१ प्रणष्टं इति स्यात् । ३ लङ्घयन् इति स्यात् ।

तरुदुर्गे तदकृशक्रोशव्याप्यथ सर्वतः।
व्याप्तोपान्तवनग्रामैः सचिवैः स न्यरोधयत् ॥ २२६३ ॥
सज्जपाले यवनकैः स्कन्धावारं निबध्नति।
अनुचक्रुर्द्विषोस्पन्दान्निवातस्तिमितांस्तरून् ॥ २२६४ ॥
धन्योपि शिलकाकोष्टपर्यस्तकटकोभवत्।
गन्धद्वेषी गजरिपुः सिन्धुरस्येव वैरिणः ॥ २२६५ ॥
आवासितबलो राज्ञा गोवासे रिल्हणोकरोत्।
अटवीं पर्यटन्धूकानिवार्को द्रुडितानरीन् ॥ २२६६ ॥
तीव्रशक्तेर्नृपस्यैवमारम्भैः स्तम्भितोभजत्।
कोष्टेश्वरस्त्रिचतुरान्मासान्संचारशून्यताम् ॥ २२६७ ॥
क्लिष्टो देशान्तरे राष्ट्रानन्तरैर्न्यकृतो नृपैः।
भिन्नस्ववर्गो भूभर्तृभृत्यव्यर्थीकृतोद्यमः ॥ २२६८ ॥
बालिशत्वादकुशलो ज्ञातुं वृत्तिं महीभुजाम्।
स विस्मृतागाः संधातुमैच्छच्छिन्नपदो नृपम् ॥ २२६९ ॥
उज्जिहीर्षोः प्रभोर्मन्युं वाच्यं तद्भञ्जनाद्विदन्।
भक्त्येकाग्रः सज्जपालस्तस्येच्छां तामपूरयत् ॥ २२७० ॥
तथार्त्तोपि रिपुं राज्ञः संधित्सुर्व्यग्रहीन्न सः।
पृथ्वीहरप्रसूतानां निर्द्रोहत्वं न कौतुकम् ॥ २२७१ ॥
तेन प्रहिण्वता राजवैरिणं स्वकराङ्गुलिम्।
छिन्दतापि महीभर्तुर्मन्युश्छेत्तुं न पारितः ॥ २२७२ ॥
कण्ठबद्धशिरःशाटः शीर्षेणोपानहं वहन्।
भुक्तवेलोपि भूपालं कर्तुं नाशकदक्रुधम् ॥ २२७३ ॥
अस्वीकृतद्वित्रभूभृल्लाञ्छनः स हि राजवत्।
तत्तत्प्रत्युक्तभूपाज्ञः सर्वं गर्वाद्यवाहरत् ॥ २२७४ ॥

शुश्राव बद्धं तन्मध्ये यातं मल्लार्जुनं नृपः ।
अनुबध्नाति भव्यानामुदयेभ्युदयान्तरम् ॥ २२७५ ॥
नीयमानः स हि स्कन्धमधिरोप्यानुजीविभिः ।
अजाङ्गिकतया मार्गोल्लङ्घनाय स निःसहः ॥ २२७६ ॥
ततस्ततो भयस्थानान्निस्तीर्णो लोहराश्रितम् ।
सावर्णिकाभिधं ग्रामं प्राप्तो विन्यस्तरक्षिणा ॥ २२७७ ॥
निरुद्धो जग्गिकाख्येन ठक्कुरेण महीपतिः ।
प्रियंकरं तं च भृत्यं शुश्रावान्तिकमागतम् ॥ २२७८ ॥
बद्धप्रायोरिणा दुर्गान्निर्गतः स कथंचन ।
बद्धस्तेन पुनः शक्तिः कस्य भाव्यर्थलङ्घने ॥ २२७९ ॥
गङ्गा द्युमार्गलुठिता जठरात्कथंचि-
देकस्य संहृतवतो निसृता महर्षेः ।
अस्तापरेण कृतसागरगर्तपूर्तिः
शक्तो न कोपि भवितव्यविलङ्घनायाम् ॥ २२८० ॥
जग्गिके बद्धसंप्राप्तिपर्यन्तोपान्तरक्षिणि ।
राज्ञोदयद्वारपतिः प्रायोजि प्राज्यबुद्धिना ॥ २२८१ ॥
तं विना धैर्यगाम्भीर्यशौर्यधुर्यं महाधियम् ।
संकटे नह्यवष्टम्भो राज्ञाज्ञाय्यन्यमन्त्रिणाम् ॥ २२८२ ॥
स ह्यतिक्रम्य साबाधान्मार्गानुभयवैतनैः ।
तमोरिस्थितमद्राक्षीत्तं क्षमापतिविद्विषम् ॥ २२८३ ॥
निष्ठाशून्येन धैर्येण शौर्यसंभावनावहः ।
स्तुवन्स तं बहिःप्राप्तं तत्तदुक्त्वाब्रवीत्पुनः ॥ २२८४ ॥
सर्वतो ज्यायसीं भर्तृभक्तिं यो बहु मन्यते ।
भवान्धुर्यो मतिमतामहृतो लोभनान्तरैः ॥ २२८५ ॥

कृता रक्षामणिसमं सहायं त्वादृशं विना।
हानिर्मे दुर्नरेन्द्रस्य बाल्ये राज्ये बहुच्छलैः ॥ २२८६ ॥
दुष्प्रेक्ष्याणां भवत्येव नियमाद्राजभास्वताम्।
भाग्यान्तहेमन्तदिने जननेत्रविलङ्घता ॥ २२८७ ॥
शोभते रुधिराताम्रमण्डलाग्रो यथोदये।
तथा योस्तमये भास्वानिव वन्द्यः स भूपतिः ॥ २२८८ ॥
धन्योवतारो यस्यासीत्क्षुभ्यत्पौराङ्गनाजनः।
उदयेस्तमयेप्युग्रे रागव्यग्राप्सरोगणः ॥ २२८९ ॥
पदे प्रयोगं लब्ध्वार्थं किंचित्कृत्वा कुलीनवत्।
अहं कविरिव प्रौढ[1]ः प्राप्तो निर्व्यूढिमूढताम् ॥ २२९० ॥
सत्यंकारोधुना भूत्वा विधत्तां स्वान्तसुस्थितिम्।
साध्यत्वानतिवृत्तेन वरेणैकेन मे भवान् ॥ २२९१ ॥
इत्युक्त्वा प्रत्ययोत्पत्त्यै संस्प्रष्टुं स्फाटिकं ततः।
स पीठं पुरतो द्वारपतेर्लिङ्गमुपानयत् ॥ २२९२ ॥
अच्छलाहवसंमर्दप्रासशूलेषुवर्षिणः।
योधान्योद्धुं वरं सायं मानवान्नूनमिच्छति ॥ २२९३ ॥
इति संभाव्य संस्पृष्टशिवलिङ्गः स वाञ्छितम्।
वरं तस्योररीचक्रे स च भूयो जगाद तम् ॥ २२९४ ॥
अकृष्टदृष्टिरहतः क्षमाभुजोन्तिकमक्षतः।
यथेदृगेव प्राप्नोषि[2] तथा त्वामर्थयेधुना ॥ २२९५ ॥
कार्पण्योपहतं तस्य वचः श्रुत्वा त्रपाजडाः।
सर्वेप्युर्वीमुखास्तस्थुर्वृष्ट्यार्द्राः पल्लवा इव ॥ २२९६ ॥
अन्तक्षणस्ततो भिक्षोः स्मर्यमाणः स चेतसाम्।
विकासहेतुतां प्राप स्वस्थस्य मनसः पुनः ॥ २२९७ ॥

---

१. अप्रौढः इति स्यात्। २. प्राप्नोमि इति स्यात्।

मनुष्यवाह्यमारूढः पत्रं निन्ये स निस्त्रपः ।
तेन स्वपालिताल्लोकानापि पश्यन्नविक्रियम् ॥ २२९८ ॥
अहीनाहारनिद्रादिवैवश्यः पशुवत्पथि ।
कृष्यमाणः स केनापि न विकल्पेन पस्पृशे ॥ २२९९ ॥
पश्यन्नानीयमानं तं गोप्तृभिस्तादृशं जनः ।
दयार्द्रहृदयश्चासीन्नाभ्यनन्दच्च भूभुजम् ॥ २३०० ॥
उवाच चानुकम्प्येस्मिञ्जन्मज्येष्ठस्य भूपतेः ।
नैतावद्भाति नैर्घृण्यमनुजे पितृवर्जिते ॥ २३०१ ॥
आसेचनकमेतस्य मेचकाञ्जदृशो वपुः ।
क्लेशगर्ह्यमनिर्स्त्रिंशचेताः कः कर्तुमर्हति ॥ २३०२ ॥
पूर्वापरानुसंधानवन्ध्यस्तं दृष्टवांस्तदा ।
विस्मृतागा नृपं तत्तदित्युपालभताध्वनि ॥ २३०३ ॥
गणना काथ वा बालबालिशादौ विधीयते ।
न चित्तवृत्तेरैकाग्र्यं महतामपि सर्वदा ॥ २३०४ ॥
श्रोतृणां द्यूतपाञ्चालीकेशकृष्ट्यादि शृण्वताम् ।
पाण्डवेभ्योधिकः क्रोधो धार्तराष्ट्रेषु जायते ॥ २३०५ ॥
कुरूणां क्षतजापाने भग्नोरोर्मूर्धताडने ।
श्रुते पाण्डवविद्वेषस्तेषामेव च दृश्यते ॥ २३०६ ॥
परावरज्ञः कार्याणां न कश्चिन्मध्यमं विना ।
तटस्थेनुभवाभेदस्तत्र तत्र कथं भवेत् ॥ २३०७ ॥
स पौरान्प्रोदयन्नङ्के च्छिन्नाङ्गुल्यङ्कमुद्वहन् ।
युग्याधिरूढो मृत्पात्रं सायं नगरमासदत् ॥ २३०८ ॥
न्यधत्ताश्वयुजा शुक्लपञ्चदश्यां महीपतिः ।
एकादशेब्दे तं रक्षियुतं नवमठान्तरे ॥ २३०९ ॥

त्यक्ताहारस्य च निशाः पञ्चषास्तस्य ताम्यतः।
पार्श्वं जगाम कारुण्याच्चरणस्पर्शनार्थिनः॥ २३१०॥
अवादीदर्थितं तस्मै प्रतिशुश्रुवुषेभयम्।
द्रोहावेकान्ततो वध्यौ स चित्ररथकोष्टकौ॥ २३११॥
राजा निर्जग्मुषः स्वोर्वीं कोष्टकस्याथ बन्धनम्।
विधित्सुः पञ्चषानाप्तान्रिल्हणादीनचूचुदत्॥ २३१२॥
सर्वेषु गलितौजःसु स्वयं राज्युद्यमस्पृशि।
अथ तं रिल्हणो दोर्भ्यां झषं ग्राह इवाग्रहीत्॥ २३१३॥
हृतशस्त्रः स बलिनस्तस्य दोष्पञ्जरान्तरे।
तस्थावचेष्टो निद्रान्धो भूतेनेवासमीकृतः॥ २३१४॥
भ्रातृव्यो भिःखराजाख्यः कुलराजस्य कोपनः।
भूभृद्भक्त्या कृपाण्यास्य निर्बिभेद कृकाटिकाम्॥ २३१५॥
परश्वधेन मूर्ध्नेनं पृथ्वीपालश्च ताडयन्।
राजबीजी स च क्रोधान्न्यषिध्यत महीभुजा॥ २३१६॥
कृकाटिकास्थसंजातमर्मवेधोपचेष्टितः।
विवेष्टमानोवर्तिष्ट क्षितौ स रुधिरोक्षितः॥ २३१७॥
महाबलैः कमलियप्रमुखैस्तस्य सोदरः।
चतुष्कः पातितोप्युर्व्यां गण्डशैल इव द्विपैः॥ २३१८॥
विलोक्य वैकल्यहतौ बद्धौ तौ स्वामिनौ तथा।
कृष्टासिधेनुरुत्तस्थौ द्विजन्मा मल्लकाभिधः॥ २३१९॥
उच्चावचेषु प्रहरन्स भूपालोपजीविषु।
अतर्क्यमाणस्तुमुलं राज्ञैवालक्ष्यतापतन्॥ २३२०॥
नृपान्तिकादापततस्तांस्तान्घ्नन्तं महाभटान्।
अधावत्सासिधेनुस्तं कुलराजो महौजसम्॥ २३२१॥

प्रतिप्रहृतिषु क्षिप्रापतत्पाणिमपारयन् ।
निहन्तुं संरुरोधेव भित्तौ व्यायामवित्स तम् ॥ २३२२ ॥
अपयातुमवस्थातुं प्रहर्तुं वाप्यशक्नुवन् ।
तस्थौ च बहुसंधानः संस्तभ्यैनमविक्षतम् ॥ २३२३ ॥
चरणास्फालनोत्फालदोःशब्दमुखरोन्तिकम् ।
धाविते पद्मराजेथ मल्लाकोक्षिपदीक्षणम् ॥ २३२४ ॥
प्राहरत्कुलराजोस्य लब्धरन्ध्रोथ वक्षसि ।
प्रहृत्य गच्छतः पाणेः स तस्याङ्गुष्ठमक्षिणोत् ॥ २३२५ ॥
तौ विज्जराजो दर्पोष्णनिबिडं प्रहरत्युभौ ।
तस्मिन्प्रतिप्रहरति क्षिप्रं प्राहरतां ततः ॥ २३२६ ॥
स त्रीनप्यभियोक्तॄंस्तांस्त्यक्त्वा दृक्पथमागतम् ।
चतुष्किकाद्वारगतं राजानं समुपाद्रवत् ॥ २३२७ ॥
लक्ष्यीभूते नृपे शीघ्रमनुधावन्ससंभ्रमम् ।
चकार कुलराजस्तं स्फिगस्थिक्षतिनिर्जवम् ॥ २३२८ ॥
ततः सर्वैर्वृतो योधैः क्लीबाक्लीबान्स सत्वरम् ।
हत्वाभजद्वीरशय्यां रक्तस्यन्दोत्तरच्छदाम् ॥ २३२९ ॥
जीवद्यापद्गतस्वामिवीक्षितः श्लाघ्यविक्रमः ।
स एव स्पृहणीयान्तक्षणो वीरेष्वगण्यत ॥ २३३० ॥
बहिः कोष्टकभृत्येषु विद्रुतेष्वदरिद्रताम् ।
परं जनकचन्द्राख्यो धैर्येणोवाह डामरः ॥ २३३१ ॥
निरायुधो राजभृत्याद्वृत्वैकस्मात्परश्वधम् ।
स ह्ययुद्धाग्रदूतत्वं नयन्भूरीन्यमान्तिके ॥ २३३२ ॥
ययासोस्तस्य चण्डांशुमण्डलं परशुः करे ।
सुषुम्णासंविभागार्थी शशिखण्ड इवाविशत् ॥ २३३३ ॥

नाद्राक्ष्म नाश्रौष्म वापि बद्धे भर्तरि यत्तदा ।
कोष्टकस्य वधूरन्वतिष्ठन्मानवती सती ॥ २३३४ ॥
जीवन्भूयोपि लभ्येत त्वया स पतिरित्यसौ ।
बन्धूनामवधीर्योक्तिं प्राविशद्यद्धुताशनम् ॥ २३३५ ॥
सप्तर्षियोषिदाश्लेषपतर्षकिल्बिषदूषितः ।
तस्या सतीलोकगायाः पादाभ्यां पावितोनलः ॥ २३३६ ॥
वसन्तस्य सुता धन्योदयभ्रातुः पुपोष सा ।
शुचिवंशाभिमानेन न डामरवधूव्रतम् ॥ २३३७ ॥
लवन्यललनाः कुर्युर्वैधव्येपि धनेच्छया ।
ग्रामकार्यिकुटुम्ब्यादीन्नितम्बाभोगभागिनः ॥ २३३८ ॥
मतिव्यामोहनिर्व्यूढवैक्लव्यस्याभिमानिनः ।
तयानुगाभ्यां च कृतं कोष्टकस्योच्चकैः शिरः ॥ २३३९ ॥
रूढव्रणोपि क्रिमिसाद्भूतः कैरपि किल्बिषैः ।
निष्प्राणो गणरात्रेण कारायां कोष्टकोभवत् ॥ २३४० ॥
अथ चित्ररथः शोषकृशः कलुषितं नृपम् ।
श्रुत्वा मल्लार्जुनेनाभूद्भयादत्यन्तदुःखितः ॥ २३४१ ॥
पत्नी तस्यैकभार्यस्य प्रिया सूर्यमती सती ।
परलोकातिथिः पूर्वं विभवप्रतिभूरभूत् ॥ २३४२ ॥
देहे याप्यहताप्याये गेहे गतपरिग्रहे ।
पत्यौ वैमत्यकलुषे नेषदप्येष पिप्रिये ॥ २३४३ ॥
तीर्थस्थितस्य न स्यान्मे सागसोप्यप्रियं नृपात् ।
इति संचिन्त्य स प्रायान्मिषान्मर्तुं सुरेश्वरीम् ॥ २३४४ ॥
अथ नानार्थभूयिष्ठां धनाधीशाधिकश्रियः ।
स्थानात्ततस्ततस्तस्य पार्थिवोपाहरच्छ्रियम् ॥ २३४५ ॥

कनकांशुकसंनाहवाजिरत्नायुधादिभिः ।
स्वा स्वा प्रकाशिता लक्ष्मीः स्पर्धयेवाधिकाधिका ॥२३४६॥
लोहरद्रोहघर्मोष्मशोषितो राजपादपः ।
तल्लक्ष्मीशैलतटिनीसेकेनाप्यायितोभवत् ॥ २३४७ ॥
विप्लवे चिरनष्टेपि श्रीकल्याणपुरं न यः ।
वनवासोचितत्रासः साल्वः सौ····मिवात्यजत् ॥ २३४८ ॥[1]
श्वेतच्छत्रांशुपृक्तेव चिन्तापाण्डुरवर्तत ।
बन्दीकृता नरेन्द्रश्रीर्निर्निद्रा यस्य मन्दिरे ॥ २३४९ ॥
राज्ञा प्रयुक्तं विज्ञाय विजयः स भवोद्भवः ।
तीक्ष्णमानन्दनामानमवधीत्तेन चावधि ॥ २३५० ॥
तिलकम् ॥
इत्थं स पप्रथे तादृक्प्रजापालनशालिनः ।
सर्वोत्साहमयोनेहा जयसिंहमहीभुजः ॥ २३५१ ॥
तीर्थस्थिते चित्ररथे पादाग्रग्रहणैषिणौ ।
शृङ्गारजनकावास्तां तद्भृत्यौ व्यक्तचाक्रिकौ ॥ २३५२ ॥
प्रचुरोत्कोचदानेन स्वीकृत्य नृपतिं ययौ ।
शृङ्गारो भग्नजनकः स्वामिश्रीभोगभागिताम् ॥ २३५३ ॥
चिरप्रचलितं द्वारमुदये निदधे पुनः ।
मेघकालः सरित्पूरं प्रतीर इव पार्थिवः ॥ २३५४ ॥
अवश्यभोग्यदुष्कर्मदत्तमर्मव्यथश्चिरम् ।
कथाशेषोभवच्चित्ररथो मासैरथाष्टभिः ॥ २३५५ ॥
हास्यावहोप्यविकृतो विकृतोनपास्यो
दुर्गन्धिरप्यतिजडोपि गृहीतवाक्यः ।

---

१. साल्वः सौभमिव इति स्यात् ।

पूर्वानुभावजयिनो भवति प्रभावा-
द्यस्य स्तुमस्तमतिसंस्तवमप्रतर्क्यम् ॥ २३५६ ॥
निन्द्यैराद्यूतनाद्यैर्यश्चेष्टितैः प्रागभीष्टताम् ।
बाल्ये दुर्ललितस्यागाद्भूभर्तुश्चित्रचेतसः ॥ २३५७ ॥
विसृज्यमानः संप्राप्तसाम्राज्येन दिवानिशम् ।
क्रमात्स्वीकृत्य ताम्बूलं तेन चित्ररथान्तिकम् ॥ २३५८ ॥
दूत्यैः कृत्यान्तरज्ञत्वं प्राप्तवानाप्ततां गतः ।
तदन्ते घटयन्नाज्ञस्तद्भृत्यान्कोशदर्शकान् ॥ २३५९ ॥
तदा सर्वोन्नताशेषमन्त्रिशून्ये नृपास्पदे ।
सञ्जकस्यात्मजः प्राप शृङ्गारो मुख्यमन्त्रिताम् ॥ २३६० ॥

चक्कलकम् ॥

तस्य वैधेयताभ्यस्तकुदृष्टेरपि दुष्कृताम् ।
नातः पात्रार्पणात्तुच्छत्यागित्वेनापि संपदः ॥ २३६१ ॥
योषित्कशिपुभोग्येन धन्यंमन्योपि सोभवत् ।
धान्यदानवदन्यत्वं गुरूणामाजगाम यत् ॥ २३६२ ॥
पीठं कृतवतो रूप्यं संयोज्य रजतैर्निजैः ।
विद्यमानं सुरेश्वर्यां सायुज्यं तस्य युज्यते ॥ २३६३ ॥
उर्वीशैरपि नार्वाग्भिर्योनुगन्तुमशक्यत ।
आषाढ्यामाढ्यसंभारो निबिडद्रविणव्ययः ॥ २३६४ ॥
नन्दिक्षेत्रे स तत्राद्यैः प्रणीतश्चण्पकादिभिः ।
तेन कालानुसारेण पोषितः पञ्चषाः समाः ॥ २३६५ ॥
नर्माङ्गतायां निःसारो ज्ञातो यः सोधिकारभाक् ।
अचिन्त्यकृत्यकार्यासीत्स्वामिस्नेहप्रभावतः ॥ २३६६ ॥

---

१ आद्यूनताद्यैः इति स्यात् ।

केलीसज्ञैर्युवतिकरजैः कण्ठभूषादशायां
यस्याज्ञायि त्रुटनमसकृत्क्ष्माधरेष्वासकृष्टौ ।
सोप्यादिष्टस्त्रिपुररिपुणा प्राप भङ्गं न भोगी
शक्त्याधायी क्वचन न परो भर्तुराज्ञाप्रभावात् ॥ २३६७
तं च रिल्हणधन्यौ च समाश्रित्येतरेतरम् ।
कार्यं जनकश्टङ्कारावुत्कोचेनापजह्नतुः ॥ २३६८ ॥
कदाचिज्जनकं बद्ध्वा सार्धं भूषणमौक्तिकैः ।
सपुत्रदारं शृङ्गारं बाष्पबिन्दूनमोचयत् ॥ २३६९ ॥
स तं च जातु निर्विद्य मानहीनमकारयत् ।
रूक्षरक्ष्यर्पितोत्कोचधनाभ्यर्थितमैथुनः ॥ २३७० ॥
अङ्गुष्ठनखनिर्घर्षनर्तितानामिकोर्मिकः ।
वदन्वामोत्तरौष्ठाग्रोदञ्चनैः कुरुतेक्षणः ॥ २३७१ ॥
भ्रुभङ्गोद्वेल्लितवलीनिम्नोन्नतललाटभूः ।
पुनरेकस्तयोर्लब्धकार्यो लोकमहासयत् ॥ २३७२ ॥

तिलकम् ॥

अव्यक्ताक्षरवाग्रौक्ष्यमीलिताक्षो रटन्बहु ।
हसन्सकरतालं च संपद्यन्यो व्यभाव्यत ॥ २३७३ ॥
सोल्लेखप्रतिभोन्नीततत्त्वरां[1] हास्यवस्तुनि ।
कथाशरीरं पर्याप्तं न दृशां किमचेतसाम् ॥ २३७४ ॥
सर्वस्मिन्वस्तुतो[2] वाचि काले विगतयोग्यते ।
जाने तृणनृणां तुल्ये शृङ्गारोर्हत्यगर्ह्यताम् ॥ २३७५ ॥
यः सर्वंकषनिष्कम्पशेमुषीकः क्षमापतिः ।
धुर्यतां धर्मचर्याभिर्गतः सुकृतशालिनाम् ॥ २३७६ ॥

---

१ तत्त्वानां इति स्यात् । २ वस्तुतोर्वाचि इति स्यात् ।

लब्धबोधिरिवारेर्यश्चक्रे व्यापद्युपक्रियाम् ।
दावप्रदस्य दग्धाङ्गोल्लाघत्वमिव चन्दनः ॥ २३७७ ॥
गुरुसूरिद्विजानाथप्रभृत्युचितयापि यः ।
प्रतिपत्त्या संविभेजे संविभाज्य कुटुम्बकम् ॥ २३७८ ॥
प्रासादान्विजयेशादिदेवव्रातस्य शुद्धधीः ।
सुधादानेन निन्ये च धन्यः कैलासतुल्यताम् ॥ २३७९ ॥
मठदेवगृहारामह्रदकुल्यादियोजने ।
जीर्णोद्धृतिव्यसनिनस्तस्य चिन्ता निरन्तरा ॥ २३८० ॥
सकृद्दर्शितविद्वेषकार्यसब्रह्मचारिणा ।
स क्रौर्यधाम पर्याप्तमीदृगप्युच्यते जडैः ॥ २३८१ ॥
विश्वाप्यायनसप्तसिन्धुभरणब्रह्मादिसंप्रीणन-
प्रायं कृत्यमुदात्तमेकसमयोपात्तेन दुष्कर्मणा ।
स्वःसिन्धोर्लघुतां गतं सुरगजश्रेणीचितास्पर्शना
...ता येन जनाः श्मशानमिव सा योग्या किलास्थां स्थितौ॥
तदन्तरं शिवरथो द्विजः प्रचुरचाक्रिकः ।
कायस्थपाशः पाशेन गलं बद्ध्वा व्यपद्यत ॥ २३८३ ॥
इत्थं पृथ्वीपतिः कृत्वा तत्तत्कण्टकपाटनम् ।
अपेतविघ्नं सौजन्यविघ्नो व्यधित मण्डलम् ॥ २३८४ ॥
विपक्षावरणापाये प्रायेण पृथिवीभुजः ।
तैक्ष्ण्यमायान्ति जीमूतमुक्ता रविकरा इव ॥ २३८५ ॥
परिणाममनोज्ञत्वं राजरत्नं त्वयं नृपः ।
माधुर्याधिक्यमुत्पाको द्राक्षाद्रुम इवाययौ ॥ २३८६ ॥
प्रावर्तयत सातत्यात्क्रतून्वितदक्षिणान् ।
विवाहतीर्थयात्रादीन्महितांश्च महोत्सवान् ॥ २३८७ ॥

संविभेजे स्वसंभारैः स क्रियाधर्मचारिणाम् ।
तेजोभिः कुलशैलानामोषधीरिव चन्द्रमाः ॥ २३८८ ॥
प्रतिज्ञातं सुतोद्वाहप्रतिष्ठादौ पुरौकसाम् ।
तेनौपयिकसामग्रीदानमव्यग्रचेतसा ॥ २३८९ ॥
दारूणामाकराः कोशवृद्धये ये धराभुजाम् ।
नवीचक्रे पुरं सर्वे स्वाधीनान्स विधाय तान् ॥ २३९० ॥
मज्जतो राजकार्येषु तत्त्वविद्भिर्हरार्चने ।
विस्मितैर्वीक्ष्यते तस्य निष्ठाकाष्ठा मुनेरिव ॥ २३९१ ॥
प्राह्णादारभ्य सायाह्नपर्यन्तं चास्य दृश्यते ।
न तत्कृत्यं गता यत्र नाध्यक्षत्वं विचक्षणाः ॥ २३९२ ॥
अविचारान्धतमसे विद्या व्यद्योततान्तरा ।
जयापीडादिमेघश्रीसौदामन्या विलोलया ॥ २३९३ ॥
तेन श्रियं तु विश्राण्य स्थास्नुं रत्नप्रभामिव ।
गुणवैचित्र्यचित्रस्य प्रकाशोनश्वरः कृतः ॥ २३९४ ॥
सूरयो येन·····विक्षतक्षेत्रसंपदाम् ।
ग्रामाणामाग्रहाः कर्म सान्वयाः स्वामिनः कृताः ॥२३९५॥
विदुषां विततोत्सेधसौधास्तद्विहिता गृहाः ।
व्याप्ताः सप्तर्षिभिर्द्रष्टुमुत्कर्षमिव मूर्धसु ॥ २३९६ ॥
प्रतिभाप्रभवे प्रज्ञोपज्ञे च पथि पान्थता ।
सार्थवाहं तमालम्ब्य निर्दोषा विदुषां स्थिता ॥ २३९७ ॥
आसीद्यथार्यराजस्य शयानस्याप्यतिश्रियः[1] ।
कामं लिङ्गाभिषेकाम्भःसंक्षोभप्रभवो ध्वनिः ॥ २३९८ ॥
निद्राणस्य तथा वेणुवीणादिपरिहारिणः ।
दयितं तस्य निर्द्वेषविद्वज्जल्पविकल्पनम् ॥ २३९९ ॥

---

१ अतिप्रियः इत्युचितम् ।

काले श्रीललितादित्यावन्तिवर्मादिभूभुजाम् ।
सिद्धं न यत्प्रतिष्ठादि निष्ठां तदधुना गतम् ॥ २४०० ॥
मठदेवगृहेष्वेव स्वकालप्रभवेषु यत् ।
सर्वेष्वेव कृता तेन निर्व्यपाया व्यवस्थितिः ॥ २४०१ ॥
रत्नादेव्या दृढारूढभर्तृवल्लभताभुवः ।
सर्वप्रतिष्ठाप्रष्ठत्वं विहारः प्रथमं गतः ॥ २४०२ ॥
रिल्हणोथ गुणग्रामबान्धवो धर्मपद्धतौ ।
बभूव पूर्वपथिकः समस्तामात्यसंततेः ॥ २४०३ ॥
तपोधनाँल्लुब्धवर्णान्धर्मवृद्धांश्च शुद्धधीः ।
विस्रम्भभवनस्थोपि शक्तस्त्यक्तुं न यः क्वचित् ॥ २४०४ ॥
कृष्णाजिनोभयमुखीदानमुख्यैः सुकर्मभिः ।
धर्मकन्याविवाहैश्च यस्याशून्यत्वमायुषः ॥ २४०५ ॥
सर्वेषामाहिताग्नीनां निष्प्रत्यूहा महात्मना ।
सर्वयागोपकरणैर्येन विश्राणितैः क्रियाः ॥ २४०६ ॥
भोगान्बुभुजिरे भव्यान्सत्रे सूत्रितविस्मये ।
यस्य वर्णाश्चतुःषष्टिः कुदृष्ट्यस्पृष्टचेतसः ॥ २४०७ ॥
अग्रहारगणोदग्रैर्विततैर्मठसेतुभिः ।
पुरे परिष्कृते येन द्वयोः प्रवरसेनयोः ॥ २४०८ ॥
आद्ये प्रवरभूभर्तुः पत्तने प्रत्तविस्मयः ।
प्राप्तः प्रतिष्ठाप्रष्ठत्वं यत्कृतो रिल्हणेश्वरः ॥ २४०९ ॥
लोकान्तरगतां कान्तां कृतिनोद्दिश्य सुस्सलाम् ।
भलेरकप्रपास्थाने विहारस्तेन कारितः ॥ २४१० ॥
मार्जार्यास्तिर्यगुचितस्नेहविस्मृत्यपोहतः ।
मृतामनुमृतायास्तन्नाम्ना यः ख्यातिमागतः ॥ २४११ ॥

---

१ गुणिग्राम इत्युचितम् ।

तद्भर्तुरीर्ष्याकालुष्ये तस्यादूराग्रगा पुरः ।
प्रदेशे मानुषीवासीत्प्रिया क्रीडाबिडालिका ॥ २४१२ ॥
तीर्थप्रस्थानदिवसादारभ्यास्याविरावणी ।
उत्सृजन्त्याहृतं भोज्यं सा शुचा जीवितं जहौ ॥ २४१३ ॥
आरोहति परां काष्ठां प्रतिष्ठाविविधाधुना[1] ।
दिद्दा नृपतिपत्नीषु मन्त्रिस्त्रीषु तु सुस्सला ॥ २४१४ ॥
श्रीचङ्कुणविहारं या यातं नामावशेषताम् ।
अश्मप्रासादवेश्मादिकर्मणा निर्ममेधुना ॥ २४१५ ॥
अरघट्टप्रबन्धान्धुच्छात्रशालादिकर्मभिः ।
तस्याः संपूर्णतां पुण्यप्रकारा निखिला गताः ॥ २४१६ ॥
पूर्वराजकुलाखण्डस्थण्डिलव्यापिनाखिलम् ।
तद्विहारेण नगरं नीतं नेत्राभिरामताम् ॥ २४१७ ॥
प्रापि प्रतिष्ठयेवाशु यक्ष्मक्षपितया तया ।
विपत्तिः श्रीसुरेश्वर्यां प्राज्यसायुज्यदूतिका ॥ २४१८ ॥
मठाग्रहारा धन्येन वल्लभाभिधया कृताः ।
नाभीष्टं लेभिरे नाम ख्यातिः पुण्यैर्विना कुतः ॥ २४१९ ॥
अग्रहारमठांस्तद्वदुदयः कम्पनापतिः ।
कृत्वापि स्वाभिधामेव तत्संबद्धां सदाश्नुणोत् ॥ २४२० ॥
उदयद्वारपतिना सह ब्रह्मपुरीगणैः ।
कृते प्रष्ठे मठे शोभां लेभे पद्मसरस्तटः ॥ २४२१ ॥
शृङ्गारतन्त्रपतिना श्रीद्वारेण्यन्यजन्मना ।
प्रतिष्ठापि[2] मठोद्यानदीर्घिकाद्यनघात्मना ॥ २४२२ ॥
स्नानकोष्ठमठब्रह्मपुरीसेत्वादिकर्मणा ।
सोलंचकारालंकारो वृहद्वज्ञाधिपो धराम् ॥ २४२३ ॥

---

१ विविधाध्वना इति स्यात् । २ प्रत्यष्ठापि इत्युचितम् ।

बुधः सदोषधीशान्तिहेतोर्जातः कलावतः।
यः कविर्दानवत्त्वे च ख्यातस्त्यागेन योजयत्॥ २४२४॥
नृसिंहसेवी निर्हिंसहिरण्यकशिपुच्छिदः।
वराहसमये दत्तगौश्च योपूर्ववैष्णवः॥ २४२५॥
भट्टारकमठाभ्यर्णे पूर्णवार्धाविव ग्रहिः।
मठः शृङ्गारभट्टस्य ख्यात्यानौचित्ययोज्झितः॥ २४२६॥
सांधिविग्रहिको दार्वाभिसारोर्वीभुजोकरोत्।
अष्टमूर्तेर्जट्टनामा प्रतिष्ठां पुण्यकर्मठः॥ २४२७॥
पुष्पाकरप्रणयभूः सुभगा विभूति-
रेकस्य हन्त करवीरतरोर्द्रुमेषु।
पुष्पाणि यस्य सफलीकुरुते स्वयं त-
त्प्रादुर्भवत्किमपि लिङ्गमनङ्गशत्रोः॥ २४२८॥
विभूत्या संविभक्तेषु भूभुजाखिलमन्त्रिषु।
[1]उत्कट्टकोटिं भुट्टाख्यः परं जह्नानुजोर्हति॥ २४२९॥
स्वयंभूः प्रकटीभूय पूजां स्वीकुरुते स्वयम्।
ज्येष्ठरुद्रो वसिष्ठस्य यस्य वा बालकेश्वरः॥ २४३०॥
सविहारमठोदग्रवेश्मभिः [2]कलुषोज्झितः।
तेन तत्र कृतं भुट्टपुराख्यं पुटभेदनम्॥ २४३१॥
नगरेपि हरः प्रत्यष्ठापि भुट्टेश्वराभिधः।
सरश्च मडवग्रामे धर्मविभ्रमदर्पणः॥ २४३२॥
नीत्वा प्रतिष्ठां वैकुण्ठमठादि स्वविहारभूः।
रत्नादेव्या दृढं चक्रे स्वार्थग्रथनसुस्थिरा॥ २४३३॥
रत्नापुरे बहुद्वारमहार्घे निरघो मठः।
धत्ते सुकृतहंसस्य स्फीतवीतंसविभ्रमम्॥ २४३४॥

---

१ उत्कर्षकोटिं इति स्यात्। २ कलुषोज्झितम् इति स्यात्।

मृत्युंजयो राजतेस्याः सुधाधौतान्भजन्गृहान् ।
जनस्यानित्यतोच्छित्त्यै श्वेतद्वीपं सृजन्निव ॥ २४३५ ॥
गोकुलानां विधातारो गोकुले विहिते तया ।
गणिताः शूरवर्माद्याः सतृणाभ्यवहारिणः ॥ २४३६ ॥
गवामव्याहतस्वैरसंचारचरकाञ्चिते ।
तत्र वैतस्ततोयाढ्ये यदपोढामयं वपुः ॥ २४३७ ॥
मुकुन्दस्तत्र साश्चर्यसौन्दर्यौदार्यमन्दिरम् ।
अश्वाविवर्धनधरः सिद्धो नाविश्वकर्मणः ॥ २४३८ ॥
मठ.....कृत्वा सा नन्दिक्षेत्रेकरोत्क्षितिम् ।
.....जयवनाद्येषु स्थानेषु च मनोरमान् ॥ २४३९ ॥
दार्वाभिसारेप्युर्वीशसौन्दर्यौदार्यमन्दिरम् ।
स्वनामाङ्कं पुरं चक्रे तया शक्रपुरोपमम् ॥ २४४० ॥
उद्दिश्योपरतान्मान्यमहत्तरमुखानपि ।
प्रतिष्ठा विविधाश्चक्रे सा राज्याश्रितवत्सला ॥ २४४१ ॥
एवं सर्वाङ्गमामुक्तालंकृतेरथ स क्षितेः ।
विशेषकामं भूभर्तृवृषा स्वमकरोन्मठम् ॥ २४४२ ॥
अनुत्सिक्तेन यो दत्तभूरिग्रामो महीभुजा ।
तज्ज्ञैरारोपितः ख्यातिं मुख्यः सिंहपुराख्यया ॥ २४४३ ॥
व्यधात्कारपथेशस्य दौहित्रः सिन्धुजान्द्विजान् ।
निविडान्द्राविडांश्चात्र प्राक्सिद्धच्छत्रमध्यगान् ॥ २४४४ ॥
किं वा मठादिनिर्माणस्तुत्या तस्य व्यधत्त यः ।
भूयः सग्रामनगरं कृत्स्नं कश्मीरमण्डलम् ॥ २४४५ ॥
जीर्णारण्यसधर्मायं कालदौरात्म्यतो भवन् ।
देशो धनजनावासैस्तेन भूयोपि योजितः ॥ २४४६ ॥

आरम्भात्प्रभृति क्ष्मापे दीक्षितेभीष्टदत्तिषु ।
शिल्पिप्रायैरपि प्रायो मठदेवगृहाः कृताः ॥ २४४७ ॥
सत्कोशांशुकरत्नादौ निरसूयेन भूभुजा ।
साधारणीकृते पौरास्तांस्तांश्चक्रुर्महोत्सवान् ॥ २४४८ ॥
अकाण्डतुहिनापातोदीपाद्यैरप्युपद्रवैः ।
नष्टेषु [1]शालिष्वक्षीणं सुभिक्षं तत्र न क्षणे ॥ २४४९ ॥
अद्भुतं चाभवद्वाचः श्रुता यन्निशि रक्षसाम् ।
केत्वाद्युत्पातजातं च दृष्टं नष्टाश्च न प्रजाः ॥ २४५० ॥
कोष्टेश्वरानुजच्छुङ्गनामा विहितविप्लवः ।
आहवैर्गूढदण्डैश्च राज्ञा निन्येन्तकान्तिकम् ॥ २४५१ ॥
चक्रे विक्रमराजादीन्भूपानुन्मथ्य पार्थिवः ।
प्ररोहं गुल्हणादीनां राज्ञां वल्लापुरादिषु ॥ २४५२ ॥
[2]प्रजेशाः कान्यकुब्जादावजर्येण नृपार्यमा ।
स व्यधाद्भव्यभूभोगवैभवानभिमानिनः ॥ २४५३ ॥
विद्योतमाने निश्शोद्यैर्मन्त्रैस्तत्रैवमेकदा ।
भेजे जीवितदारिद्र्यं दरद्राजो यशोधरः ॥ २४५४ ॥
स भूम्यनन्तरोप्यन्तरज्ञो राज्ञोतिसेवया ।
विपत्तौ प्रकृतिक्रान्तसंतानश्चिन्त्यतामगात् ॥ २४५५ ॥
निकृत्यास्य निजामात्यो विड्डसीहाभिधो यतः ।
संभुज्य दयितां राज्यमप्रौढतनयेग्रहीत् ॥ २४५६ ॥
वशीकृत्य शनैर्देशं [3]नाममात्रशिशुं नृपम् ।
उच्छेत्तुमैच्छद्यावत्तं स जिघृक्षुः स्वयं क्षितिम् ॥ २४५७ ॥

---

१ शालिषु क्षीणं इत्युचितम् । २ प्रजेशान् इति स्यात् । ३ नाममात्रनृपं शिशुम् इति स्यात् ।

अन्योमात्यः पुरस्कृत्य यशोधरसुतं परम् ।
तावत्तेन समं भेजे पर्युकाख्यो विपर्ययम् ॥ २४५८ ॥
युग्मम् ॥
कश्मीरान्पृष्ठतः कृत्वा द्वैराज्यं तत्र कुर्वति ।
उत्सृज्य सज्जपालादीन्सर्वकार्यभरक्षमान् ॥ २४५९ ॥
हेवाकप्रतिपत्त्यान्याभिधमौग्ध्यनिरुद्धधीः ।
सर्वाधिकाराद्यारोपान्मन्यमानोभिमानिताम् ॥ २४६० ॥
पर्युकाजर्यतः सुज्ञेरप्रौढमनुजं निजम् ।
प्रहिण्वानोनुमन्त्रित्वं मन्त्रज्ञोऽप्यभजन्नृपः ॥ २४६१ ॥
तिलकम् ॥
अपूर्वमण्डलारब्धावाटोपाढ्यामशालिनः ।
क्व सर्वकषनिष्कम्पप्रतिभाः कार्यवेदिनः ॥ २४६२ ॥
क्व बालबालिशप्रायो नष्टव्यवहृतिर्जनः ।
धिक्परीपाकविषमं स्वाच्छन्द्यं मेदिनीभुजाम् ॥ २४६३ ॥
युग्मम् ॥
कार्यापेक्षविपक्षैस्तैरिच्छन्त्युद्रिक्ताछिदाम् ।
सैन्यक्ष्मादुर्गकोशादेर्न···[1]ईयन्त्यन्तरज्ञताम् ॥ २४६४ ॥
प्रक्रियामात्रतो मन्त्रं गृह्णन्ति क्षित्यनन्तराः ।
कृतसाहायकैरेव चिन्त्या मित्रमुखा द्विषः ॥ २४६५ ॥
युक्त्यारब्धविधौ तत्र वैरिसाहायकग्रहे ।
क्व वैधेयान्वकप्रायान्कार्यसंदर्भवेदिनः ॥ २४६६ ॥
दरद्राजद्रुमोन्योन्यभेदकूलक्षयाच्युतः ।
क्रष्टुं नाशक्यताप्रौढैः स्रोतोभिरिव मध्यगः ॥ २४६७ ॥

---

१ पश्यन्त्यन्तरज्ञताम् इति स्यात् ।

पर्युकात्संकटे कार्ये तं तमुत्कोचमिच्छतः।
स दुग्धघातमादातुमप्यासीदलसक्रमः॥ २४६८॥
पर्युकेण समं विडुसीहः संधिं निबद्धवान्।
यथागतं गते सुज्ञौ कश्मीरेन्द्रेग्रहीद्रुषम्॥ २४६९॥
सर्वाधिकारप्रवराचिरसंचारभूरुहः।
प्रसङ्गे तत्र शृङ्गारो मृत्युसौहित्यकार्यभूत्॥ २४७०॥
आलक्ष्मकान्तात्सर्वाधिकारोस्थादद्वितीयया।
वृत्त्या ततस्तु शतधा निर्झराम्भ इवाभवत्॥ २४७१॥
अन्येप्यमात्याः सांमत्याद्धर्तुर्माहात्म्यभागिनः।
प्रमयं समये तस्मिन्दैवात्किमपि लेभिरे॥ २४७२॥
प्रशंसामानृशंसस्य किं विदध्मो धराभुजः।
मृतामात्यार्भकापत्यं निधत्ते यः पितुः पदे॥ २४७३॥
प्रवर्तिता त्वमात्यानां भृत्यैः पद्धतिरद्भुता।
निर्वैलक्ष्याः प्रभोर्लक्ष्मीं जहुः स्वगृहिणीमिव॥ २४७४॥
भूभर्तुः प्राभृतीकृत्य मृतस्य स्वामिनः श्रियम्।
संतानस्य विभूत्यर्थं कृत्वा कार्यं हि तेहरन्॥ २४७५॥
गञ्जाधिपे विश्वनाम्नि विपन्ने रक्षिता परम्।
एकेन सहजाख्येन सहायानां महार्घता॥ २४७६॥
नाध्यारुरोहाधिकारं पार्थिवेनार्थितोपि यः।
स्वामिसूनोष्टिष्टनाम्नो बुद्ध्यै[1] साहायकं व्यधात्॥ २४७७॥
निष्ठायामप्रतिष्ठत्वं दृष्ट्वापि प्रभविष्णुभिः।
धिक्परम्परया भृत्याः प्रवर्ध्यन्तेधिकाधिकम्॥ २४७८॥
आसीदाचमनोपयोगि कलशे स्रष्टुर्जगल्लङ्घन-
क्लान्ताङ्घ्रिक्लमहार्यथासुररिपोस्त्रैस्रोतसं यत्पयः।

---

१ वृद्ध्यै इत्युचितम्।

शंभुस्तन्निदधे स्वमूर्धनि जडेप्येकप्रयुक्ताद्दतौ
स्युः सर्वेप्यवशा गतानुगतया गाढादराः स्वामिनः॥२४७९॥
सुज्जिनिर्वासनप्राप्तप्ररोहो दुर्नयद्रुमः ।
[1]साज्जिजाड्यकृताप्यायः क्रमेणासीत्फलोन्मुखः ॥ २४८० ॥
द्वित्राः समाः समन्युः स विड्डसीहस्ततोभवत् ।
अकुण्ठराज्याद्युत्कण्ठं दूतैरकृत लोठनम् ॥ २४८१ ॥
दूरादाखण्डितोत्थानः शूरमाश्रित्य भूपतिम् ।
जीवन्कृषिवणिज्यादिकर्मणा स सबान्धवः ॥ २४८२ ॥
दरदां मन्त्रिणां जातज्ञातेयैरभियोगभाक् ।
चक्रेलंकारचक्राद्यैर्डामरैः सह चक्रिकाम् ॥ २४८३ ॥
युग्मम् ॥
सोप्यद्रिदुर्गस्वाम्यस्य प्रथमप्रस्थितौ सुहृत् ।
क्षुद्रो जनकभद्राख्यः पार्श्वं लिप्सोर्व्यपद्यत ॥ २४८४ ॥
कर्णाटकादावभवत्स्थाने स्थाने विलोक्य तम् ।
प्रस्थितं कस्यचिद्द्रोहे बुद्धिः कस्यापि साधुता ॥ २४८५ ॥
तं तथा विपुलारम्भमपि शाठ्यादसंभ्रमम् ।
प्रविविक्षुमुपैक्षिष्ट कौसीद्यानुद्यमो नृपः ॥ २४८६ ॥
पोषिते प्रेषितश्रीकैरुत्पिञ्जे विप्लवैषिभिः ।
अथोदयद्वारपतिः प्रैषि विश्वंभराभुजा ॥ २४८७ ॥
संगृह्णता [2]चे मूर्तेन पुरे शंकरवर्मणः ।
प्राप्तोलंकारचक्रस्य पार्श्वमश्रावि लोठनः ॥ २४८८ ॥
अपि विग्रहराजाख्यः सूनुः सुस्सलभूपतेः ।
भोजः सुल्हणजन्मा च श्रुतौ तेन सहागतौ ॥ २४८९ ॥

---

१ सौज्जिजाड्य इति स्यात् । २ चमूस्तेन इति स्यात् ।

अथोपह·····थान एव तेषां स सत्वरः।
मार्गं बहुदिनोल्लङ्घ्यमेकेनाह्ना व्यलङ्घयत् ॥ २४९० ॥
सयूथ्यकन्थाग्रथनासिद्धेर्यातो विधेयताम्।
तदास्कन्दहतस्पन्दः स पलायिष्ट डामरः ॥ २४९१ ॥
सिन्धोर्मधुमतीमुक्ताश्रियमन्तःस्थितं ततः।
शिरःशिलाभिधं कोट्टमथ तैरधिशिश्रिये ॥ २४९२ ॥
गहने ब्रुडितः कोट्टे स्थितः किं वा स इत्यसौ।
न निश्चिकाय द्वारेशो भ्राम्यन्दीर्घासु भूमिषु ॥ २४९३ ॥
अथोपालब्धतद्दुर्गारोहणेस्मिन्नशक्यत।
दैवेनापि न भूभर्तुः प्रभावो निष्पराभवः ॥ २४९४ ॥
उत्थानोन्मुखतां सर्वेप्युत्पिञ्जे तत्र दस्यवः।
पाल्वलास्तिमयो वर्षपृथक्कृत इवाभवन्[1] ॥ २४९५ ॥
तैस्त्रिल्लकादिभिर्गूढवैकृतैरथ लोठनः।
पा···हरिः पुनश्चक्रे मायाचतुरचाक्रिकैः ॥ २४९६ ॥
पुरग्रामादिदग्ध्वारमसाध्यमथ धावताम्।
पदे पदे कृच्छ्रगतं स्वपक्षास्तमरक्षिषुः ॥ २४९७ ॥
दिक्चक्रेनियते भ्राम्यन्दृश्यादृश्यः स सर्वतः।
कलपात्ययोदयी ब्रह्मपुत्रः केतुरिवाभवत् ॥ २४९८ ॥
श्रान्तैरमात्यैर्निर्बन्धे[2] संधौ कालानुरोधतः।
मेने मडवराज्योर्वी हारितेवाखिला जनैः ॥ २४९९ ॥
असंवृत्तप्रतीकारतया रोहत्सु वैरिषु।
तदन्तरेथ संमन्त्र्य धन्यं प्रास्थापयन्नृपः ॥ २५०० ॥
तत्स्कन्धारोपिते कार्ये व्रीडां गच्छेत्तटस्थताम्।
विपर्यासमथ द्वाराधीश इत्यभ्यधाज्जनः ॥ २५०१ ॥

---

१. इवाभजत् इति स्यात्। २. निर्बद्धे इति स्यात्।

भिक्षुर्मल्लार्जुनस्त्वासीदेक एव त्रयस्त्वमी ।
संहता हन्त दुःसाधा दध्युश्चेत्यखिलाः प्रजाः ॥ २५०२ ॥
द्वाराधिपस्त्वहेवाकव्यवहारो महीपतेः ।
सिद्धिं स्वस्याप्रसिद्ध्यापि वाञ्छन्हृद्योद्यमोभवत् ॥२५०३॥
एकाकी यः किल न भजते मूढतां भर्तृकार्ये
नौदासीन्यं श्रयति च रुषा बह्वधीने च तस्मिन् ।
निर्हेवाकव्यवहृतितया साध्यसिद्धिं किलेच्छं-
स्तादृङ्मन्त्री प्रभवति परं नाल्पपुण्यस्य राज्ञः ॥ २५०४ ॥
पञ्चचन्द्रे मृते तस्यानुजं राजोपवेशने ।
न्यधाद्यं षष्ठचन्द्राख्यं सोप्यारब्ध्यै विनिर्ययौ ॥ २५०५ ॥
द्विबाहुकादयो मुख्या·····सह गायकैः ।
धन्यमेवान्वयुर्बाह्याश्चान्ये राजोपजीविनः ॥ २५०६ ॥
धन्यादिषु तिलग्रामं कोटिसिन्धुतटाश्रयम् ।
श्रय·····द्वारेशो द्रङ्गस्थः पृष्ठपद्धतीः ॥ २५०७ ॥
हठप्रवेशायोग्याजिमुख्यहेवाकवर्जितः ।
शोषयन्द्विषतो धैर्यगम्भीरं स व्यवाहरत् ॥ २५०८ ॥
कुठारिकादिभिः कारुवृन्दैर्मन्दिरपद्धतीः ।
धन्यो मधुमतीतीरे नगरस्पर्धिनीर्व्यधात् ॥ २५०९ ॥
निर्ध्वान्तं द्रुमसंबाधं सनिकेता वनस्थलीः ।
कटकं सर्वभोगाढ्यं शक्तः परिवृढोकरोत् ॥ २५१० ॥
देशे भूरितुषारोग्रहिमर्तौ भाग्यसंपदा ।
भूभर्तुरभियोग्यैव भूरभूद्भानुभूषिता ॥ २५११ ॥
भुवनाद्भुतसंभारप्रेषणं विजयैषिणः ।
द्वैराज्यमीलिताशेपि काले राज्ञो न खण्डितम् ॥ २५१२ ॥

उत्थान एवोपहतभये यास्यत्यगात्परम् ।
भारोढिपीडितग्राम्याक्रन्दं क्षान्तिचरूपमाम् ॥ २५१३ ॥
दीर्घप्रवासनिर्वेदाच्चलितान्दर्शयन्नृषम् ।
स्थास्नूंश्च तोषयन्दायैः स्थैर्यं निन्ये नृपश्चमूः ॥ २५१४ ॥
इत्थं त्रिचतुरान्मासांस्तिष्ठद्भिरपि निष्ठुरैः ।
नैवादातुमशक्यन्त कटकैः कोट्टसंश्रयाः ॥ २५१५ ॥
तेषां हि वीवधासारनिरोधादीनि दृप्यताम् ।
अप्रियाणि न जातानि दैन्यदायीनि कानिचित् ॥ २५१६ ॥
चिकीर्षवस्तुषारान्ते स्वविभूतिप्रकाशनम् ।
तस्थुरङ्कुरितोल्लासाः पर्वता इव डामराः ॥ २५१७ ॥
कृषिं कृषीवलैर्वेदपाठमुत्सृज्य च द्विजैः ।
उत्पिञ्जसज्जैर्ग्रामेषु सर्वतः शस्त्रमाददे ॥ २५१८ ॥
प्रतीक्षमाणाः प्रालेयप्रलयं मार्गभूभृताम् ।
दारदास्तुरगानीकैः सज्जैस्तस्थुर्जिगीषवः ॥ २५१९ ॥
हिमिकासंहतेः कालतूलतल्पाकृतेर्दधत् ।
पातभीतिं जनो राजसेना शश्वदवेपत ॥ २५२० ॥
इत्थं प्रत्यर्थिसामर्थ्यपरमार्थापरीक्षणात् ।
क्षमाभृन्मिथ्यैवमारेभे संदेहं च जयेभजत् ॥ २५२१ ॥
वैदग्ध्यदिग्धमनसामयमेक एव
कोप्यस्ति वञ्चनविधेरुचितः प्रकारः ।
येनात्मना किल विशङ्कितशक्तयस्ते
मुग्धेपि वैरिणि विचारहतोद्यमाः स्युः ॥ २५२२ ॥
प्रवादमात्रसाराद्यस्त्रसेत्परिकरादरेः ।
स्वयैव तस्य विघ्येत सिद्धिश्चिन्तान्धया धिया ॥ २५२३ ॥

विध्येदाशु शिलीमुखैः प्रवितरेत्पत्त्रैरवस्कन्दनं
बध्नीयात्तदिदं गुणैः परिकरैर्मिथ्याप्रसिद्धैरिति ।
स्याच्चेदम्बुरुहं द्विपस्य भयकृच्चिन्तासहैः साहसं
प्रत्यूहेत ततो निजैरपघनैरप्येतदुन्मूलने ॥ २५२४ ॥
लोठनाद्यैर्हि कर्णाहान्निस्तीर्णैस्तैः कथंचन ।
प्राप्तेलंकारचक्रेऽग्रे राज्यमज्ञायि निर्जितम् ॥ २५२५ ॥
मिथ्यैव ग्रथिता कन्था स्वयूथ्यैः कथमन्यथा ।
तस्मिन्नमन्दमास्कन्दं धावन्द्वाराधिपो ददौ ॥ २५२६ ॥
प्रत्यवस्थित्यसामर्थ्यात्ततः कोट्टं व्यसर्जयत् ।
स राजबीजिनस्तांश्च परेद्युः स्वयमन्वगात् ॥ २५२७ ॥
कोट्टाद्रिः सलिलस्यान्तः कृशोधः पृष्ठदैर्घ्यभाक् ।
स तैर्वैसारिणग्रासव्यग्रो बक इवैक्ष्यत ॥ २५२८ ॥
निःसामर्थ्यं तद्विलोक्य गजागारमिवागजम् ।
तत्यजुर्विजयाशंसां भयं चोदवहन्हृदि ॥ २५२९ ॥
ततः शरैर्द्दषद्भर्वैर्बाध्याश्चेतोविरोधिनः ।
अर्णसो रक्षणमितो रक्ष्या यत्रोपला इतः ॥ २५३० ॥
इत्थं स तैरभिरुद्धैर्या···दादाय डामरः ।
मेने स्वगुप्तिमात्रार्थी न युद्धे बद्धनिश्चयः ॥ २५३१ ॥
युग्मम् ॥
ततः कन्दलितास्कन्दे तिलग्रामे द्विषद्बले ।
प्रतीकाराक्षमे दस्यौ ते चिन्ताक्षमतां दधुः ॥ २५३२ ॥
विस्रवापि स्रुतप्रज्ञासौष्ठवौ लोठनः पुनः ।
डामरं कृत्यसंपूर्णमगूढं तमगर्हत ॥ २५३३ ॥
भोजं तूद्विजितं यन्नो द्रोहो रोहेदिति ब्रुवन् ।
रुद्ध्वा पितृव्यं तं व्याजस्तुत्या नित्यमुपाचरत् ॥ २५३४ ॥

विमुखे लोठने कुण्ठशाठ्यस्तस्य तु सान्त्वने।
मेने मन्त्रज्ञतां किंचित्संवार्तिष्ट च संविदि ॥ २५३५ ॥
हन्यान्मां भूभृदित्येष यातेष्वेतेषु संत्यजेत्।
नास्मानुक्त्वेत्यरौत्सीत्स पितृव्यं गमनार्थनात् ॥ २५३६ ॥
त्वय्यस्मासु च सर्वेषु वेष्टितेषूत्कटा द्विषः।
पृष्ठकोपमसंभाव्य कुतश्चिन्निश्चलोद्यमाः ॥ २५३७ ॥
यद्यद्विदध्युः सिध्येत्तत्तदेकं त्यज मामितः।
अन्याल्लँवन्यानानीय दरदोवायवेन वः ॥ २५३८ ॥
बन्धनं व्यपनेष्यामि युक्तमित्युक्तवांश्च तम्।
डामरं विदधे किंचिदिव सांमत्यमाश्रितम् ॥ २५३९ ॥
विमोक्ष्यामि क्षपायां त्वामद्य श्वो वेति तं ब्रुवन्।
सत्त्वसंक्षीणदाक्षिण्यो विप्रलेभे प्रतिक्षणम् ॥ २५४० ॥
अध्वरोधे सुदूरस्थैर्यथावदकृतेरिभिः।
बाह्यग्रामाहृतै रत्नैस्ते त्वहान्यत्यवाहयन् ॥ २५४१ ॥
दुरुदर्कमथाशङ्क्य समयं ते व्यजिज्ञपन्।
धन्यादयो हि तैः संधिर्विधेय इति भूपतिम् ॥ २५४२ ॥
तैस्तैर्निमित्तैः संधानमविधेयं विदन्नृपः।
तानादिदेश कर्तव्यं कोट्टाट्टालकवेष्टनम् ॥ २५४३ ॥
संदिदेश च दायादा वञ्चयेरन्ख्यातिमागताः।
निजास्पदे ताञ्जहति दत्तोत्कोचेथ डामरे ॥ २५४४ ॥
भूत्वा कठो···प्यारम्भान्निष्ठा निःसौष्ठवा ध्रुवम्।
क्रियातिपत्त्युपालम्भैर्यास्यामोसंशयं विशाम् ॥ २५४५ ॥
नात्यक्ष्यद्धर्षदेवश्चेत्सप्ताहान्युद्यमं ततः।
दुग्धप्रवाहं प्राप्स्यन्स श्रुत्वेत्यन्योपि तप्यते ॥ २५४६ ॥

प्राप्तव्यं प्राप्तवान्सर्वो निजैः कृत्यैः शुभाशुभैः ।
क्रियातिपत्तेर्लोकेन त्रैलोक्यं तु मुखेर्प्यते ॥ २५४७ ॥
पादेषु पक्षेषु च सत्सु नोर्व्यां
न व्योम्नि वा पक्षपिपीलकस्य ।
पङ्ग्वन्धवच्चङ्क्रमणं तु गर्भे
किं संपदा स्यान्नियमे गतीनाम् ॥ २५४८ ॥
सहस्रपादस्य गते निमित्त-
मनूरुभावेप्यरुणः प्रजातः ।
तस्याभविष्यद्यदि पादयुग्मं
ततोधिकं तत्किमिवाकरिष्यत् ॥ २५४९ ॥
उपेक्ष्य साक्षितां तस्मात्कृत्स्नं कोट्टं विवेष्ट्यताम् ।
प्रयातु तत्रैवास्माकं तेषां च पुरुषायुषम् ॥ २५५० ॥
अविश्रान्तो वातो दहन इव सोयं जनयति
प्रसक्तिं सातत्याद्दलयति कुलाद्रीनपि जलम् ।
प्रसूते कृत्येषु व्यवसितिरनिर्व्यूढसुदृढा
फलावाप्तिं लोके प्रतिकलमसंभाव्यविभवाम् ॥ २५५१ ॥
क्रूरां नरपतेराज्ञां श्रुत्वा धन्यादयस्ततः ।
कोट्टप्रतोलीं कूलं तं त्यक्त्वाप्यारुरुहुर्जवात् ॥ २५५२ ॥
कथं युद्धं विधास्यन्ति कथं स्थास्यन्ति वेति तान् ।
शरान्किरन्तः कोट्टस्था यावत्प्रैक्षन्त कौतुकात् ॥ २५५३ ॥
अधः सोप्यूर्ध्वगान्युद्धैर्निष्पीड्य निबिडैर्व्यधात् ।
धन्यः प्रदेशं तावत्तं निकेतैः पत्तनोपमम् ॥ २५५४ ॥
युग्मम् ॥
अविश्रान्तैस्ततः संख्यैरसंख्येयश्चमूक्षयः ।
प्रतिक्षणं प्रववृते सैन्ययोरुभयोरपि ॥ २५५५ ॥

परेद्युः शारदां दृष्ट्वा संप्राप्तो गर्गनन्दनः ।
संक्रन्दनपुरीपौरयोधैर्वृद्धिं हतैर्व्यधात् ॥ २५५६ ॥
अलंकाराभिधो बाह्यराजस्थानाधिकारभाक् ।
अधृष्यो मानुषैर्युद्धैर्विरुद्धान्बहुधावधीत् ॥ २५५७ ॥
क्व भूधरचरैः स्पर्धा वसुधातलचारिणाम् ।
तथापि पृतनायत्रानन्त्यं चिन्त्यमचिन्त्यकृत् ॥ २५५८ ॥
अल्पीयांसः कोट्टनिष्ठा भूयिष्ठाः कटकाश्रयाः ।
अतः पूर्वे बहून्घ्नन्तोप्यासन्कृत्यालपया क्षताः ॥ २५५९ ॥
श्लिष्टद्वारारिपुटं द्वित्रैः पीडितमाहवैः ।
मीलिताक्षमिव त्रासात्ततो दुर्गमजायत ॥ २५६० ॥
गोप्तृभेदान्तरद्वैधमुखच्छिद्रानुसारिणः ।
धन्यादीन्वीक्ष्य विश्वासं कोट्टस्था नोपलेभिरे ॥ २५६१ ॥
निद्राछेदार्थमन्योन्यं क्रोशन्तो नास्वपन्निशि ।
स्वपन्तोह्हि तु निःशब्दशून्यं कोट्टमदीदृशन् ॥ २५६२ ॥
निशासु तत्तत्पृतनायामतूर्यरवैरपि ।
चटकाः कोटरगता मेघशब्दैरिवात्रसन् ॥ २५६३ ॥
अहर्निशं भ्रमन्तीभिर्नौभिः संरुद्धपाथसः ।
तान्समभ्रमयन्सर्वप्रकारं राजसैनिकाः ॥ २५६४ ॥
ते रुद्धपाथसस्तर्षशोषं केचिद्विषेहिरे ।
निःसंचारास्तु संक्षीणे भोक्तव्ये क्लैब्यमाययुः ॥ २५६५ ॥
बुभुक्षवः क्षमापयोग्यान्भोगान्भाग्योर्जितांस्ततः ।
कदन्नैर्नृपदायादा अशनाशंसनैर्व्यधुः ॥ २५६६ ॥
दूरे स्पर्धास्तु निस्तीर्णाः क्षुधितास्तेधिकं व्यधुः ।
भूभर्तुभोगभागिभ्यो भृत्येभ्योप्यन्वहं स्पृहाम् ॥ २५६७ ॥

---

१ पुरीपौरवृद्धिं योधैः इत्युचितम् ।

व्यूहेष्वस्मासु पर्याप्तमकार्यमिति भाषिणम् ।
भोजं व्यधान्मध्यशृङ्गे दुर्गस्याथ स तं पृथक् ॥ २५६८ ॥
एकस्य वार्धकाद्वेश्यापुत्रत्वादपरस्य च ।
जानन्नयोग्यतां मेने द्वैराज्यार्हं तमेव सः ॥ २५६९ ॥
विनामुं चानयोः सम्यक्संरम्भेरन्न वैरिणः ।
इति मिथ्या प्रथां निन्ये तद्विनिःसरणं बहिः ॥ २५७० ॥
कान्तालंकारचक्रस्य काङ्क्षन्ती क्षयमित्वरी ।
चक्षूरागात्षष्ठचन्द्रे सान्द्रस्नेहार्द्रतां गता ॥ २५७१ ॥
बहिराभ्यन्तरं भेदं नयन्ती मन्त्रमाययौ ।
साल्हणेः कर्णसरणिं सर्वमन्विष्यतोन्वहम् ॥ २५७२ ॥

युग्मम् ॥

रागध्वान्तान्वितधियः प्रतिभेदभयेन सः ।
तस्य प्रकाशयन्नैनां गन्तुं तु प्रार्थनां व्यधात् ॥ २५७३ ॥
क्षमावाञ्शिक्षितोपेक्षो मैत्रीस्थैर्यै मुदं भजन् ।
नागः सागस्यपि दधे बोधिसत्त्व इव क्रुधम् ॥ २५७४ ॥
प्रियामन्युः सरागेण मृत्युहेतुर्महानपि ।
हृदि विस्मर्यते पृष्ठे शरभेणेव वारणः ॥ २५७५ ॥
अथ प्रस्थापितो भोजः सुप्तारिशिबिरान्तरात् ।
यातप्रायोप्यलंकारतनयेनानुयायिना ॥ २५७६ ॥
द्रोहेच्छया भयाद्वापि ध्वस्तसत्त्वेन सत्वरम् ।
व्यावृत्त्यारोपितो भूयः कोट्टस्थस्यान्तिकं पितुः ॥ २५७७ ॥

युग्मम् ॥

निर्भर्त्स्य पुत्रं गन्तासि श्वो निशीत्यभिधाय तम् ।
छन्नमस्थापयत्सोह्नि यात इत्यखिलान्वदन् ॥ २५७८ ॥

प्रोच्चल्यानिश्चयादेकः प्रायाद्धौ श्वः प्रयास्यतः।
बोधितैरथ धन्याद्यैरजागार्यखिलैर्निशि ॥ २५७९ ॥
प्रस्थास्नुः स निशीथेथ कोट्टाट्टालाद्यलोकयत्।
जाग्रतः कटके सर्वान्परितो दीपितानले ॥ २५८० ॥
प्रकाश्य वह्निना दुर्गं प्रतोलीनिर्गतो यथा।
पिपीलकोप्यलक्ष्यत्वं नोन्मुखानां द्विषां व्रजेत् ॥ २५८१ ॥
ज्वालाप्रकाशं[1] चाञ्चल्याद्विलोला इव रक्षिताः।
न्यषेधन्मूर्धकम्पेन साल्हणिं साहसाद्गृहाः ॥ २५८२ ॥
तद्गन्तुमक्षमः क्षिप्तं क्षमाप्राङ्गे स डामरः।
अधोवातीतरच्छ्वभ्रमालिङ्गितवटाकरम् ॥ २५८३ ॥
क्षेमराजाभिधानेन डामरेशेन सोन्वितः।
शिलां वैतर्दिकातुल्यामध्यास्त श्वभ्रमध्यगाम्[2] ॥ २५८४ ॥
आरुह्यासनमात्रे तां पर्याप्तां पातभीतितः।
निर्निद्रौ पञ्च रात्रीस्तावत्यवाहयतावुभौ ॥ २५८५ ॥
निर्वर्तितप्राणयात्रौ करस्थैः सक्तुपिण्डकैः।
तत एव व्यजहतां विष्ठां नीडादिवाण्डजौ ॥ २५८६ ॥
अव्यक्तव्याकृती चित्रासूत्रिताविव तौ स्थितौ।
वीक्ष्यारिकटके लक्ष्मीं पृष्ठाद्धिस्मयमीयतुः ॥ २५८७ ॥
तयोराश्रीयत स्फीतशीतविस्मृतिकारिणा।
जयसिंहप्रतापाग्निसंतापेनोपकारिता ॥ २५८८ ॥
षष्ठेह्नि तत्र निःशेषीभूतभोक्तव्ययोरथ।
क्षतक्षार इवारम्भि तुषारं वर्षितुं घनैः ॥ २५८९ ॥
अगृह्यतोचिते दन्तवीणावाद्योद्यमे तदा[3]।
शीतासादितसादेन पाणिपादेन सुप्तता ॥ २५९० ॥

---

१ प्रकाशचाञ्चल्यात् इति स्यात्। २ वितर्दिका इत्युचितम्। ३ तदा इत्युचितम्।

तावचिन्तयतामद्य क्षुच्छीताभिहतौ ध्रुवम् ।
पतिष्यावोरिकटके पाशबद्धाविवाण्डजौ ॥ २५९१ ॥
कं पूत्कुर्वः कस्य वावां विदितौ यो विनिर्हरेत् ।
ततः[1] पङ्क्तान्तरामन्नौ यूथपः कलभाविव ॥ २५९२ ॥
विषमस्थावथेत्थं तौ नक्तमभ्यर्थ्य डामरः ।
आरोप्य रज्ज्वावसथे शून्ये स्थापयति स्म सः ॥ २५९३ ॥
कृतशीतप्रतीकारौ पलालानलसेवनैः ।
दुःखं व्यस्मरतां तत्र निद्रया चिरलब्धया ॥ २५९४ ॥
ततोप्यभ्यधिका व्यापद्भेजे लोठनविग्रहौ ।
अचक्षुष्यौ जनात्स्निग्धां गिरमप्यापतुर्न यौ ॥ २५९५ ॥
यवकोद्रवपूपादि तयोः सतुषमश्नतोः ।
गात्रैर्वस्त्रैश्च वैवर्ण्यं शुद्धिवन्ध्यतया दधे ॥ २५९६ ॥
धन्योलंकारचक्रस्य क्षीणभोज्यस्य सर्वतः ।
स्वीचकारान्नदानेन तुल्यौ होलयशस्करौ ॥ २५९७ ॥
ततः स दूतैर्विक्रेतुमङ्गीचक्रे नृपद्विषः ।
बुभुक्षाक्षुभितो भृत्यभेदभीतश्च डामरः ॥ २५९८ ॥
दुस्तरव्यापदुद्रेकद्रुतसत्त्वतयात्यजत् ।
पापोपलिप्ततच्चित्तमधर्माकीर्तिसाध्वसम् ॥ २५९९ ॥
भूपतेर्विद्विषच्छेषस्थापनात्स्वस्य रक्षणम् ।
ख्यातिशुद्ध्यै चिकीर्षुं च कुशकाशावलम्बनम् ॥ २६०० ॥
भृत्यस्योदयनाख्यस्य धिया प्रच्छादितं तथा ।
ररक्ष सालहणिं भोजं द्वौ तु दातुं स तत्वरे ॥ २६०१ ॥
तं विना च तयोर्भूपाद्दण्डं जानन्नसांप्रतम् ।
अबाधं स्वस्य चाशेषकृत्यं युक्तममन्यत ॥ २६०२ ॥

---

१ इतः इत्युचितम् ।

भोज्याभावकृतां तस्य व्यापदं तच्च मन्त्रितम् ।
तदा नाशासिषुर्धन्यादयः संधिं विधित्सवः ॥ २६०३ ॥
मिषाच्चिचलिषा तेषां कस्माच्चिदभवत्ततः ।
किं पुनस्तेन दायादद्वये दातुं प्रतिश्रुते ॥ २६०४ ॥
देयविश्राणनानीकोत्थानादिपणसिद्धये ।
भ्रातृव्यमनयद्धन्यः कल्याणमवकल्पताम् ॥ २६०५ ॥
प्रबन्धं निर्बध्नन्नरिमुपचरंश्छादितरुषं
महाहिं संगृह्णन्नयकुटिलचेष्टं व्यवहरन् ।
स भूमिः सिद्धीनां दधदुचितकर्तव्यपरतां
भवेद्यो निर्व्यूढावपि सुदृढसंरम्भरभसः ॥ २६०६ ॥
दुःखैर्दीर्घप्रवासोत्थैरपसारितसौष्ठवाः ।
तदा संरम्भशैथिल्यं भूभृद्भृत्याः प्रपेदिरे ॥ २६०७ ॥
स सत्यं सचिवोप्राप्यः संग्रहीतुं प्रगल्भते ।
कथाशरीरमिव यो निर्व्यूढौ कार्यमाकुलम् ॥ २६०८ ॥
संधिं निबद्धं विज्ञाय सैनिकाः स्वगृहोन्मुखाः ।
उपेक्ष्य स्वामिदाक्षिण्यं क्षणादेव प्रतस्थिरे ॥ २६०९ ॥
तद्विक्रीतमवाप्यान्नं लवन्यः कार्यमन्थरः ।
धन्याद्याः स्वल्पसैन्यत्वादासन्कृच्छ्रागतासवः ॥ २६१० ॥
प्रतोलीकेलितदृशः[1] प्रार्थितागमनाशया ।
तदहः सोभियोक्तृंस्तानददत्तावतापयत् ॥ २६११ ॥
रथाङ्गाक्रन्दिनी रात्रिस्तेषां कृच्छ्रेण सागमत् ।
विना जीवितसंन्यासमन्यत्कार्यमपश्यताम् ॥ २६१२ ॥
प्रयत्नसंभृते कृत्ये नष्टे मन्दतया धियः ।
अस्मत्संभावनादूरीकृतवाक्यादरं प्रभुम् ॥ २६१३ ॥

१ कीलितदृशः इत्युचितम् ।

नष्टानुशोचनव्याजात्तत्तद्युक्त्युपहासिनः ।
सदयं नो ध्रुवं दुःस्थीकरिष्यन्त्यन्यमन्त्रिणः ॥ २६१४ ॥
सद्यो यात्रातारतम्यात्ताम्यन्तो नस्त्रपार्पणम् ।
कार्यनिष्ठामपश्यन्तः कुर्युर्वैत्यपरेब्रुवन् ॥ २६१५ ॥
मायामेतां विहितवांस्तैः संमन्त्र्य नृपाहितैः ।
सिद्धसाध्योधुना दस्युर्हसन्नस्मान्ध्रुवं स्थितः ॥ २६१६ ॥
अल्पेतरांस्तु संकल्पानेवं तेषां वितन्वताम् ।
दत्तानन्ततनुज्यानिः प्रभाता सा विभावरी ॥ २६१७ ॥
कुलकम् ॥
प्राह्णेथ राजस्थानीयोलंकारः साहसोन्मुखः ।
डामरं कोट्टमारुह्य निन्ये नयभयैर्वशम् ॥ २६१८ ॥
एकाहं गमने सोढविलम्बस्तत्र वासरे ।
लोठने क्षीणदाक्षिण्यः स गच्छेत्यब्रवीत्स्फुटम् ॥ २६१९ ॥
उपन्यस्यंस्ततस्तस्य म्लानिप्रक्षालनक्षमम् ।
मानिनः केपि कर्तव्यं कीर्तिव्ययनिबर्हणम् ॥ २६२० ॥
कालः सोयं सकलजनतालोचनध्वान्तदायी
नित्यालोकप्रकटनपटुः किंतु सत्क्षत्रियाणाम् ।
अभ्रश्यामाद्भुतमसिलतास्वर्वधूसंगतापि
व्यक्तं सक्तिं दिशति रभसान्मण्डलेनोष्णभानोः ॥ २६२१ ॥
संप्राप्नुवन्ति ननु मण्डलमेकमेव
क्ष्मापाजये समरसीम्नि वपुस्तु हित्वा ।
चण्डांशुमण्डलमथाभिमतानि कामं
प्रेमार्द्रनिर्जरवधूकुचमण्डलानि ॥ २६२२ ॥
नास्मिन्संततवेष्टनोल्बणतलैस्तल्पैरुदेति व्यथा
ग्रन्थिभ्यश्चलितैर्न चालमसुभिर्मर्मव्यथा जन्यते ।

क्रन्दद्बन्धुजनार्तनादचकितस्वान्तं न वा स्थीयते
नन्वेतन्मरणं सुखस्य सुभगा काप्येव संप्राप्तिभूः ॥ २६२३ ॥
मार्गैः खड्गलतावितानगहनैर्यातः पिता ते दिवं
भ्रातृभ्यामसिधेनुकण्टकवने भ्रान्त्वार्जिता सद्गतिः ।
वंशक्षुण्णमिमं निषेव्य रभसादध्वानमुन्नद्धया
वृत्त्या व्योम्नि विशार्कमण्डलमिह स्वान्तं च तेजस्विनाम् ॥
साम्राज्यं विधिनोपनीतमसकृत्क्लैब्येन यद्धारितं
तत्रापि प्रशमोचिते वयसि यत्संचेष्टितं बालवत् ।
प्रायश्चित्तममुष्य लब्धमधुना तद्वेधसापादितं
मा भूद्राज्यमिवैतदप्यसुलभं कर्तव्यमूढ[1]स्य ते ॥ २६२५ ॥
राज्यं प्राप्तमपि प्रनष्टमसमोच्छिष्टाशनैर्यापितः
कालः सर्वजनक्षयस्य विषये याता स्थितिर्हेतुताम् ।
इत्यासीत्किमिवोचितं प्रभवतो भिक्षाचरक्ष्मापते-
र्निर्व्यूढं तु तदस्य देहविरतौ येनैष सर्वोन्नतः ॥ २६२६ ॥
स तथोत्तेजितोप्योजो नाददे तेजसोज्झितः ।
न ज्वलत्यग्निसङ्गेपि निर्वीर्यं वानरेन्धनम् ॥ २६२७ ॥
शान्ताहन्तस्तु संवृत्तनिद्राभङ्ग इवार्भकः ।
ऐच्छदुद्यद्भयोद्वेगो रोदितुं प्रसृताधरम् ॥ २६२८ ॥
डामरेणार्पितं नेतुं प्रवृत्तास्तं नृपाश्रिताः ।
तादृशं वीक्ष्य कारुण्याद्धैर्याधानार्थमभ्यधुः ॥ २६२९ ॥
मा विषीद न देवस्य दयाचन्द्रोदयोज्ज्वले ।
हृदि प्ररोहति स्वैरं विकारतिमिरान्धता ॥ २६३० ॥
स सौजन्यसुधासिन्धुः स स्थिरत्वसुराचलः ।
स प्रपन्नार्तिसंतापच्छेदचन्दनपादपः ॥ २६३१ ॥

---

१ मूढस्य इत्युचितम् ।

पुण्यां शुद्धां च संलक्ष्य शरदीव द्युवाहिनीम् ।
मूर्तिं तस्योल्बणं चेतः समाधास्यत एव ते ॥ २६३२ ॥
निष्कलङ्कैर्वंशपूर्वैर्निर्विशेषं सभाजयन् ।
चारित्रं लाघवभुवोप्रियस्त्वां सोपनेष्यति ॥ २६३३ ॥
अपकर्तॄन्विपन्मग्नान्दयमानः परानपि ।
क्षमापरीक्षाहेतुत्वात्स वेत्ति ह्युपकारिणः ॥ २६३४ ॥
उक्त्वेति हृष्टस्तैर्लोलस्थूलकूर्चो गृहात्ततः ।
व्यालम्बकम्बलो गोष्ठाद्वृद्धोक्ष इव निर्ययौ ॥ २६३५ ॥
निर्भूषणं म्लानजीर्णवस्त्रशस्त्रं निरीक्ष्य तम् ।
युग्याधिरूढमायान्तं धन्यो ह्रीनम्रतां दधे ॥ २६३६ ॥
दीर्घास्पन्देक्षणं रूक्षघनकूर्चं सविग्रहम् ।
व्यलोकयदथोलूकमिव नष्टं गुहागृहात् ॥ २६३७ ॥
रेजे शैलश्चलद्भिस्तैः शिबिरोद्दीपितानलः ।
भूपप्रतापस्वर्णस्य कषाश्मत्वमिवागतः ॥ २६३८ ॥
स्कन्धावारे गते वर्षत्तुषारं प्रसभं नभः ।
अमर्त्यभावे भूभर्तुर्विशां चिच्छेद संशयम् ॥ २६३९ ॥
प्राञ्चत्पतेद्धिमं तावन्म्रियेरन्ब्रुडिताः क्षणात् ।
पिष्टातकान्तर्गर्ताटाः प्रविष्टा इव सैनिकाः ॥ २६४० ॥
एवमेकान्नविंशेब्दे दशम्यां शुक्लफाल्गुने ।
न्यूनाब्दषष्टिदेशीयो निबद्धो लोठनः पुनः ॥ २६४१ ॥
दीर्घप्रवासादायातं सत्कर्तुं कटकं पुनः ।
निर्ममो हर्म्यमुत्तुङ्गमारुरोह महीपतिः ॥ २६४२ ॥
यथोचितं दानमानसंभाषणविलोकनैः ।
संतोष्य विसृजन्सैन्यं धन्यादीन्प्रैक्षतागतान् ॥ २६४३ ॥

---

१ प्राक्चेत् इति स्यात् ।

तेषां पुनश्च दोर्द्वन्द्वमूले क्षिप्तकरं भटैः।
न्यस्तेनानासिकं वासःप्रान्तेनाच्छादिताननम् ॥ २६४४ ॥
निर्भूषणश्रोत्रपालिप्रविष्टैः श्मश्रुलोमभिः।
वलक्षरूक्षैः प्रव्यक्तकार्श्यक्लेशं कपोलयोः ॥ २६४५ ॥
उच्चावचोक्तिमुखरे पौरलोकेन्तरान्तरा।
व्यापारयन्तं नेत्रान्तौ दीनस्तिमिततारकौ ॥ २६४६ ॥
कातर्यदैन्यभीक्लान्तिक्षुदलक्ष्मीकटाक्षितम्।
वेपमानविनिद्राङ्गं गां शीतेनार्दितामिव ॥ २६४७ ॥
भ्रान्तामिव क्ष्मां पर्यस्तानिवाद्रीन्पतितानिव।
विदन्तं च दिवं शोष.....रदच्छदम् ॥ २६४८ ॥
दैविको वान्तरायोस्तु ध्वान्तं वोग्रं प्रवर्तताम्।
राजौकोभ्यर्णतां यातं वाता वा जरयन्त्विदम् ॥ २६४९ ॥
सर्वोपकारकृद्राज्ञः स्थास्यामि पुरतः कथम्।
पदानि संनिरुन्धानं निर्ध्यायेति पदे पदे ॥ २६५० ॥
अन्तर्युगलम् ॥
बहुलोकावृततया स्तोकसंलक्ष्यमैक्षत।
प्रतीहारैरथावेद्यमानं लोठनमङ्गने ॥ २६५१ ॥
कुलकम् ॥
भ्रूसंज्ञया वितीर्णाज्ञो राज्ञा तामारुरोह सः।
सभां पारिप्लवाम्भोजामिव प्रेक्षकलोचनैः ॥ २६५२ ॥
दृष्ट्वा निर्दिष्टपार्श्वोर्वीस्थितिः पृथ्वीभुजस्ततः।
अस्प्राक्षीत्क्षितिनिक्षिप्तजानुर्मूर्ध्नाङ्घ्रिपङ्कजे ॥ २६५३ ॥
हस्ताम्बुजाभ्यामालम्ब्य ललाटतटमानतम्।
सम्राट् संभ्रमनम्रस्य तस्योदनमयच्छिरः ॥ २६५४ ॥

रत्नौषधीजुषोः स्पर्शः पाण्योस्तापं स चेतसः ।
दौर्भाग्यमहरद्देहं[1]श्चास्य श्रीखण्डशीतलः ॥ २६५५ ॥
पुण्यानुभावात्कारुण्यभाजो भूभर्तुरञ्जसा ।
विस्रम्भसंभावनया स क्षणात्पस्पृशे हृदि ॥ २६५६ ॥
मा भैषीरिति दृप्तोक्तिः सुखं संप्राप्स्यतीति वाक् ।
अगाम्भीर्येण भग्नेव मन्युना[2] त्वयि साधुना ॥ २६५७ ॥
इत्युक्ते पूर्ववैराणां भवेदुद्घाटनं कृतम् ।
बान्धवो नस्त्वमित्यस्मिन्परीहास इव क्षणे ॥ २६५८ ॥
क्लिष्टोसीति स्वप्रतापप्रभावाभाषणं भवेत् ।
ध्यात्वेति भूभृदृष्ट्वास्य नाप्यायं तु गिराकरोत् ॥ २६५९ ॥

तिलकम् ॥

अभयार्थनया पादौ स्प्रष्टुं नमयतः शिरः ।
संस्पर्शी मौलिषु पुनर्विग्रहस्याङ्घ्रिणाकरोत् ॥ २६६० ॥
का योग्यता सत्क्रियायां ममेति वदता बलात् ।
अजिग्रहत्पितृव्येण ताम्बूलं स्वकरार्पितम् ॥ २६६१ ॥
नम्रं द्वारेशमूचेभूच्छ्रमो व इति सस्मितम् ।
धन्यं षष्ठं च पस्पर्श प्रष्टुं सव्येन बाहुना ॥ २६६२ ॥
दाक्ष्यदाक्षिण्यगाम्भीर्यविनयाद्यैर्विभाव्य तम् ।
भूभृद्गुणैः परीतं स्वं लोठनोमन्यतावरम् ॥ २६६३ ॥
आदिश्य सान्त्वनं धन्यमुखेनाथ त्रपानतम् ।
पितृव्यं प्राहिणोद्वेश्म भ्राजिष्णुविनयाञ्जलिः ॥ २६६४ ॥
अभियोगे य एवास्य नीतौ विन्यस्यतो दृशम् ।
मुखरागः स एवाभूत्फलावाप्तावविप्लुतः ॥ २६६५ ॥

---

१ देहाच्चास्य इति स्यात् । २ मन्युर्मे त्वयि नाधुना इति स्यात् ।

नायाति वाडवशिखिकथनेन तापं
शैत्यं हिमाद्रिपयसा विशता न चाब्धिः ।
कश्चिद्गभीरमनसां सततं विषाद-
काले प्रमोदसमये च समोनुभावः ॥ २६६६ ॥
प्रीतिस्थैर्यैर्ज्ञातियोग्यैश्चोपचारैरकृत्रिमः[1] ।
क्रमाद्राजाहरल्लज्जां पौरुषभ्रंशजीवयोः ॥ २६६७ ॥
दायादोष्ठद्वयादेव राष्ट्रे कृष्टेपि मन्त्रवित् ।
भोजेनो[2]त्पिञ्जसर्पस्य दन्तं सोन्तरचिन्तयत् ॥ २६६८ ॥
प्रवासायासभीत्या स्वैस्त्यक्तसंरम्भसंभ्रमैः ।
जिगीषुर्विद्विषच्छेषैश्चक्रे यन्निष्प्रजागरः ॥ २६६९ ॥
सल्हणः स तु विस्तीर्णच्छभ्राच्छून्यगृहे वसन् ।
पितृव्यविग्रहोदन्तमुपलेभे न कंचन ॥ २६७० ॥
राजा गृहीत्वालंकारडामरान्तिकमागतम् ।
पृष्ठाद्वीक्ष्याभवद्रोहद्रोहसंभावनस्तदा ॥ २६७१ ॥
ददर्श च क्रमाद्दूरतया दुर्लक्ष्यविस्मृ[3]ति ।
स्कन्धावारं बद्धमालं मार्गे नगरगामिनि ॥ २६७२ ॥
अज्ञातेन विदूरत्वात्पितृव्येणाश्रितं ततः ।
युग्यं चासौ धन्यषष्ठयुग्ययोरन्तरैक्षत ॥ २६७३ ॥
अचिन्तयच्च को हेतुः कटकप्रस्थितेरितः ।
युग्यारूढश्च कोथ स्यात्तृतीयो धन्यषष्ठयोः ॥ २६७४ ॥
पृष्टस्तेनावदत्कश्चित्पामरोथ प्रमोदभाक् ।
संधिर्निबद्धो नगरं गतौ लोठनविग्रहौ ॥ २६७५ ॥
संदेहोजहतद्रोहो भयमुन्मुखतां व्रजेत् ।
ज्ञातिस्नेहेन तस्यासीन्मुहूर्तमपहस्तितम् ॥ २६७६ ॥

---

१ अकृत्रिमैः इति स्यात् । २ भोजेन इति स्यात् । ३ विस्मृति इत्युचितम् ।

सैन्ये गते शून्यतया मिलितैर्विहगैः सरित् ।
रुवद्भिस्तेन तौ नीतौ क्रन्दतीव व्यकल्पत ॥ २६७७ ॥
लवन्य एव मे दध्याद्ध्यात्वेहस्थमवेत्य ते ।
पुनर्नयेयुर्धन्याद्याः क्रमाद्ध्यावथेति सः ॥ २६७८ ॥
स्वं नेतुं पार्थिवचमूं प्रत्यावृत्तां निनादिनीम् ।
श्रुतेन्तरान्तरा घोषे निर्झराणामशङ्कत ॥ २६७९ ॥
अथाजायत जीमूतवितीर्णतिमिरं जगत् ।
वन्ध्यमध्यंदिनेनेव निशीथव्ययितश्रिया ॥ २६८० ॥
राधमासावधि दधुस्ततः प्रभृति वारिदाः ।
दीक्षां क्षोण्यां तुषारौघसत्रासूत्रणकर्मणि ॥ २६८१ ॥
विस्रब्धघात्यभव्योहं निर्ब्रह्मण्यो ह्रियोज्झितः ।
निन्दन्स्वमिति भोजाग्रे ततो दस्युरुपाविशत् २६८२ ॥
समयापेक्षयाक्षोभो मन्युं संस्तभ्य साल्हणिः ।
सान्त्वयन्निव नास्त्यागस्तवात्रेति जगाद तम् २६८३ ॥
ऊचे च संश्रितापत्यज्ञात्याद्यापद्गतं त्वया ।
त्रातुमेतत्कृतं तत्र गर्हो नार्हसि कस्यचित् ॥ २६८४ ॥
तव द्रोहस्पृहा स्याच्चेन्नानृशंस्यं भवेन्मयि ।
परकृत्ताभवत्तस्मादियं कालानुरोधतः ॥ २६८५ ॥
राज्ञश्च हर्षभूभर्तृवंश्या इव न वा वयम् ।
उच्छेद्याः किंतु संयम्या राजधर्मानुरोधिनः ॥ २६८६ ॥
स्वस्याख्यातिस्तयोर्बाधा राज्ञश्चामार्गगामिता ।
शेषं मां रक्षता हन्त निषिद्धा धीमता त्वया ॥ २६८७ ॥
इत्युक्तवन्तं तं त्यक्तलज्जाभार इवावदत् ।
साक्षी त्वमेव सर्वत्र ममेति सततं स्तुवन् ॥ २६८८ ॥

क्षणेन च प्रहिणु मामधुनेत्यभिधायिनम् ।
तमेव हिमवृष्ट्यन्ते कर्तास्मीत्युक्तवान्ययौ ॥ २६८९ ॥
त्वयि दस्युर्विपर्यस्येन्मन्युं जानन्नभोजनम् ।
भोजस्तत्रेति केनापि कथितो व्यधिताशनम् ॥ २६९० ॥
स्पृशंश्चान्नं चिरात्प्राप्तमिदं विक्रीयतामिति ।
ध्यायञ्ज्ञात्योर्देहमांसं तयोर्भुक्तममन्यत ॥ २६९१ ॥
दस्युस्तु हिमवृष्ट्यन्ते त्वां प्रहेष्यामि निश्चयात् ।
श्वो वाद्य वेति कथयन्द्वौ मासौ न मुमोच तम् ॥२६९२॥
मां ज्ञात्वेह स्थितं राज्ञा कृतारब्धेर्हिमात्यये ।
विक्रीणात्येष मत्वेति भोजोधाद्गमने त्वराम् ॥ २६९३ ॥
मिषं यं यं निषेधाय गमनायोदपादयत् ।
दस्युस्तं तं समुच्छेद्य सापराधं व्यधत्त तम् ॥ २६९४ ॥
ओजोनाम्नो बलहरात्संजातं भाद्रमातुरः ।
अभ्यधाद्बाल्यमाशास्य लम्बकम्बलकावृतः ॥ २६९५ ॥
तेजोविस्फूर्जितांस्तत्तद्वीरोत्कर्षकषोपले ।
द्वैराज्ये सौस्सले सैन्ये पङ्क्तिपावनतां गतः ॥ २६९६ ॥
पितुराप्ततया राज्ञा वर्धितस्तदनन्तरम् ।
एवेनकादिविषयाधीकारित्वं क्रमाद्भजन् ॥ २६९७ ॥
विमुखे राज्ञि नागेन खूयाश्रमभुवा कृते ।
तं राजवदनो नाम विजिघृक्षू ररक्ष तम् ॥ २६९८ ॥

चक्कलकम् ॥

आनृशंस्यं भृत्यभावादलवन्यतयास्य च ।
प्रत्यवस्थित्यसामर्थ्यं राज्ञि सर्वे शशङ्किरे ॥ २६९९ ॥

अतोलंकारचक्रेण कुर्वतात्यर्थमर्थनाम् ।
द्वैराज्येच्छो राजबीजी तदा न स समर्प्यत ॥ २७०० ॥
युग्मम् ॥
नीतः प्रत्यक्षतां दूरस्थितेप्युदयने स तम् ।
विसृष्टवति दुर्भुक्षुस्त्यक्तुमेनं न सोशकत् ॥ २७०१ ॥
राज्ञा कर्तुं विनिमयं भोजस्य प्रहितो धनैः ।
प्राप्य द्रङ्गामलंकारो विषयाधिकृतस्ततः ॥ २७०२ ॥
तत्पार्श्वमुद्यतं गन्तुं मां समुत्सृज्य यासि चेत् ।
त्यक्ष्यामि तदसूनेवमूचे भोजस्तु डामरम् ॥ २७०३ ॥
श्वस्त्वां प्रभाते द्रक्ष्यामीत्येतावत्तत्र जल्पति ।
कोट्टादनुक्त्वैव निशस्तुर्ययामे विनिर्ययौ ॥ २७०४ ॥
घनवर्षेप्यमर्षेण मार्गान्वेषी गवेषणम् ।
यावच्चक्रे क्षपान्ते तं तावच्छुश्राव निर्गतम् ॥ २७०५ ॥
असाध्यप्रतिषेधोथ तमन्ह्यनुजगाम सः ।
प्रस्थितं शारदादेवीस्थानं यावन्मितानुगः ॥ २७०६ ॥
एकसार्थगतौ ज्ञाती विना तौ ज्ञातियोषिताम् ।
दाक्षिण्यादक्षमः स्थातुमग्रे सागा भवन्निव ॥ २७०७ ॥
प्रवयाः पञ्चषान्वारान्व्यधादारब्धिमेष तु ।
युवाप्यकल्पः कौलीनमिति स्वस्य च चिन्तयन् ॥ २७०८॥
दुराण्डगमने खण्डितेच्छः संश्रित्य दारदान् ।
संयुयुत्सुर्मधुमतीरोधसा मार्गमग्रहीत् ॥ २७०९ ॥
तिलकम् ॥
क्वापि श्यानाश्मसूच्यश्रिमृत्युदंष्ट्राङ्कुरोत्कटान् ।
क्वचिद्रुद्धप्रकाशाभ्रकालपाशान्धकारितान् ॥ २७१० ॥

प्रभ्रश्यद्धिमसंघातगजव्यूहोल्बणान्क्वचित् ।
क्वापि निर्झरफूत्कारनाराचक्षतविग्रहान् ॥ २७११ ॥
क्वचित्[1]सुस्पर्शपवनस्पष्टस्फुटदसृग्धरान् ।
क्वाप्यातपक्षतहिमज्योतिर्निहतदक्पथान् ॥ २७१२ ॥
दूरावरोहे प्रसृते स्फुटमप्रसृते विदन् ।
ऊर्ध्वावरोहमसकृन्मन्यमानोप्यधोगतेः ॥ २७१३ ॥
तुषारकालविषमान्षट्सप्तान्पथि वासरान् ।
उल्लङ्घ्य स दरद्राष्ट्रसीमान्तग्राममासदत् ॥ २७१४ ॥
कुलकम् ॥
गूढार्पितात्मसामग्रीहृता किंचन्यलाघवम् ।
तं दुग्धघाट्टकोट्टेशः प्रणम्यानयदर्घ्यताम् ॥ २७१५ ॥
दूरस्थितो विडुसीहस्तदूतोक्ततदागमम्[2] ।
प्रक्रियां प्राहिणोच्छत्रवादित्राद्यां नृपोचिताम् ॥ २७१६ ॥
आदिष्टदिष्टवृद्धिश्च राष्ट्रे कोट्टाधिपेन सः ।
अवारयत्[3]स्वकोशस्य स्वामित्वं राजबीजिनः ॥ २७१७ ॥
राजायमानो भोजोथ राजवासगतोचितम् ।
आनिन्ये राजवदनापत्येनाभ्येत्य पक्षताम् ॥ २७१८ ॥
स पित्रैकान्ततो राज्ञोभिन्नेन प्रहितोन्तिकम् ।
तेनाज्ञाय्यरिनीत्युग्रपाशाग्रस्थापनोपमः ॥ २७१९ ॥
कार्यगौरवविश्वासाभावव्यतिकरोचितम् ।
संदिश्य प्राहिणोत्तं स न स्वीकुर्वन्न चोत्सृजन् ॥ २७२० ॥
किमाप्तोहं किमेकान्तभिन्नो राज्ञः शनैरिति ।
मां ज्ञास्यसीति तं दूतैः स राजवदनोवदत् ॥ २७२१ ॥

---

१ क्वचिद्दुःस्पर्श इति स्यात् । २ तदागमः इत्युचितम् । ३ अकारयत् इति स्यात् ।

तस्य दार्ढ्यं दर्शयितुं गोत्रिवैरिमिषान्नृपे ।
ब्रुवाणेथ विदोषत्वं नागाद्यैरग्रहीद्रणे ॥ २७२२ ॥
सामग्री नः शनैः स्थैर्यं ततः साम्यमथ क्रमात् ।
आधिक्यं चादधे तेषां विग्रहैर्धैर्यनिष्ठुरः ॥ २७२३ ॥
तथा प्रतिष्ठां स प्राप तस्यापूर्वस्य भूमिजाः ।
दास्यमेत्य यथा व्रीडां नागुर्नागस्य बान्धवाः ॥ २७२४ ॥
स हि त्यागक्षमास्तम्भालोभादिगुणभूषिताम् ।
अभिगम्योभवन्नित्याभ्यस्तभूतिरिवोन्मिषन् ॥ २७२५ ॥
स्थैर्यं पृथ्वीहरादीनां साश्रयाणां न कौतुकम् ।
आडम्बरो निरालम्बस्यास्य स्तुत्यस्तु विस्तृतः ॥ २७२६ ॥
ग्रथयन्पृथुलान्व्यूहांश्चौराटविकघोषिकैः ।
क्रान्तग्रामोथ तस्थौ स भोजादीन्प्रतिपालयन् ॥ २७२७ ॥
जहुरन्योन्यसंघर्षसेर्ष्यामात्यमतेन वैः ।
ततो लुण्ठिप्रियत्वाद्वा नीतिमन्येपि डामराः ॥ २७२८ ॥
उद्घातध्वंसिनां विप्लवेच्छा लोठनबन्धने ।
याधात्तेषां तदानीं सा जगाम शतशाखताम् ॥ २७२९ ॥
त्रिल्लको जयराजश्च राज्ञा संवर्धितावपि ।
अकार्ष्टां नैव तपसा विवशौ चक्रमीलनात् ॥ २७३० ॥
यो घूकानामिव श्वभ्रमामयानामिव क्षयः ।
दैत्यानामिव पातालं यादसामिव सागरः ॥ २७३१ ॥
आश्रयः सर्वदस्यूनां त्रिल्लको माययोल्बणः ।
स देवसरसाधीशं संबभ्नन्विप्लवं व्यधात् ॥ २७३२ ॥
युग्मम् ॥

---

१ भूषितः इत्युचितम् । २ वा इति स्यात् ।

काङ्क्षन्तोथ तदाक्षेपं क्षोणीत्राणार्थिनो द्विजाः ।
प्रायं नृपतिमुद्दिश्य चक्रिरे विजयेश्वरे ॥ २७३३ ॥
अकालदस्युनिर्मार्थं जानतेभ्यर्थनां न ते ।
राज्ञो गृह्णंस्ततः सोभूद्दाक्षिण्यात्तत्सभानुगः ॥ २७३४ ॥
प्रस्थातुं पार्थिवे सज्जे ज्यायान्यो विप्लुतेष्वभूत् ।
स जातोत्पातपिटको जयराजो व्यपद्यत ॥ २७३५ ॥
भाग्यवानेकतो जातदस्युवैवित्त्यमीशिता ।
ततो मडवराज्यं स विप्रप्रीत्यै विनिर्ययौ ॥ २७३६ ॥
अमात्यदत्तवैमात्यैः[1] सशाढ्यं मठरैरथ ।
द्विजैर्निषिद्धोलंकारो मन्त्री राज्ञोज्झितोन्तिकात् ॥२७३७॥
स व्यवस्थापने दुःस्थदस्यूनां सोद्यमः सदा ।
सेर्ष्याणां प्रत्यभात्तेषां तद्दोषपरिपोषकः ॥ २७३८ ॥
त्रिल्लकोन्मूलनं कुर्यां कृत्वा द्वैराज्यभञ्जनम् ।
प्रतिज्ञायेति नृपतिर्विप्रान्प्रायाच्यवीवरत् ॥ २७३९ ॥
त्रस्तोथ त्रिल्लकस्तैस्तैरप्रियैरुदवेजयत् ।
अनुद्भिन्नमुखो गूढामयो रोगान्तरैरिव ॥ २७४० ॥
जयराजानुजं राज्ञा यशोराजं निवेशितम् ।
तन्मतेनावचस्कन्द भ्रातृव्यं राजकाभिधः ॥ २७४१ ॥
त्रातुं तं देवसरसं दत्तारात्याश्रितं गतः ।
सज्जपालोल्पसैन्यत्वात्संदिग्धविजयोभवत् ॥ २७४२ ॥
ज्ञातोदन्तस्ततोभ्येत्य रिह्लणो रणमुल्बणम् ।
जयलक्ष्मीकटाक्षाणां प्रथमातिथितामगात् ॥ २७४३ ॥
मन्दरेणाथ तेनारिवारिराशौ विलोडिते ।
कल्पोभूत्सज्जपालाब्धिस्तुच्छारातिजलाहृतौ ॥ २७४४ ॥

---

१ वैयात्यैः इति स्यात् ।

जितेपि राजके स्वोर्व्यां विनानुग्राहकं क्षमः ।
न बभूव यशोराजः शून्ये बाल इवासितुम् ॥ २७४५ ॥
प्रतीक्षमाणो द्वैराज्यपर्याप्तिं क्ष्माभुजेकरोत् ।
त्रिल्लकः कालहरणं तैस्तैर्मायानतिक्रमैः ॥ २७४६ ॥
यथाकालं ततो गूढोपोढान्मण्डलकण्टकान् ।
स्वपक्षसूचीविशिखान्दिक्षु श्वाविदिवाक्षिपत् ॥ २७४७ ॥
अथ पार्थ्वीहरिर्योभूच्चतुष्कः कोष्टकानुजः ।
राज्ञा भ्रात्रा समं बद्धः कारागारात्पलायितः ॥ २७४८ ॥
स तेन निजजामात्रा रक्षितः स्वोपवेशने ।
असंख्यडामरयुतः शमालां संप्रवेशितः ॥ २७४९ ॥

युग्मम् ॥

आकर्ण्य कुररस्येव निनादं तस्य भेजिरे ।
व्यक्ततां दस्यवो गूढा ह्रदस्थाः शफरा इव ॥ २७५० ॥
दृप्यन्तं राजवदनं षष्ठचन्द्रोथ गर्गजः ।
रुरोध प्रलयोद्वृत्तं वेलाद्रिरिव वारिधिम् ॥ २७५१ ॥
वर्धमानक्षीयमाणसंहती तौ त्वजायताम् ।
घर्मे सजम्बालहिमौ तुषाराद्रितटाविव ॥ २७५२ ॥
षष्ठस्य जयचन्द्रश्च श्रीचन्द्रश्चानुजौ ततः ।
दूरविप्रकृतौ राजमन्दिरावाप्तवेतनौ ॥ २७५३ ॥
ज्ञातनिर्वृत्त्यपर्याप्ती धुर्यकार्यवशप्रियात् ।
प्रतीक्ष्यादग्रजाद्राज्ञः शङ्कितावशुभागमम् ॥ २७५४ ॥
कटकाद्विद्रुतौ राजवदनान्तिकमागतौ ।
श्वशुर्यावपि भूभर्तुरागतौ प्रतियोग्यताम् ॥ २७५५ ॥

तिलकम् ॥

शैलप्रस्थानपथिकैरसंख्यैरथ खाशकैः ।
स पूर्वराजकोशार्थी भूतेश्वरमलुण्ठयत् ॥ २७५६ ॥
तस्कराक्रान्तशरणं बलवन्निहताबलम् ।
अराजकमिवाशेषं राष्ट्रं कष्टां दशामगात् ॥ २७५७ ॥
उदयं कम्पनाधीशं रिल्हणं च ततो नृपः ।
चतुष्कयुद्धमादिश्य नगरं विवशोविशत् ॥ २७५८ ॥
पार्थ्वीहरिस्तु दुःसाध्यो महाव्याधिरिवौषधैः ।
स्तम्भितोभूत्तयोः सैन्यैः संहर्तुं न त्वशक्यत ॥ २७५९ ॥
कालापेक्षां स्वपक्ष्याणां दुर्बुद्धिं वानुरुन्धतः ।
आसीन्मन्दप्रतापत्वं रिल्हणस्यापि तत्क्षणम् ॥ २७६० ॥
विड्डसीहस्तु विज्ञातभोजोदन्तो व्यसर्जयत् ।
दूतानानेतुमुर्वीशान्सुबहूनुत्तरापथे ॥ २७६१ ॥
अपि वित्तेशवनितारहोवैयात्यवेदिभिः ।
अपि किंमानुषपुरीगीतोद्गारिदरीगृहैः ॥ २७६२ ॥
अप्यौष्ण्याद्वालुकाम्भोधेः शीतावेदिभिरेकतः ।
अपि शृङ्गानिलैः प्रीतान्कुर्वाणैरुत्तरान्कुरून् ॥ २७६३ ॥
हिमाद्रिकच्छैर्म्लेच्छेशाः प्रधावन्तोधिशिश्रियुः ।
दिशस्तुरंगै रुन्धन्तः स्कन्धावारं दरत्पतेः ॥ २७६४ ॥
तिलकम् ॥
राज्ञां संघटनं यावद्व्यधादेवं दरन्नृपः ।
दिग्भ्यो भोजान्तिकं तावत्तत्सामन्ताः प्रपेदिरे ॥ २७६५ ॥
स पिप्रिये तानज्ञातालापान्वीक्ष्य गिरिव्रजान् ।
प्रीतिप्ररूढप्रणयानवरूढान्कपीनिव ॥ २७६६ ॥
जयचन्द्रादयो राजवदनप्रहिता अपि ।
कीराः काश्मीरिकाः पार्श्वमभजन्राजबीजिनः ॥ २७६७ ॥

अभ्यर्णस्थान्बलहरप्रमुखांश्च विदूरगान् ।
अपुष्णात्साल्हणिः स्वर्णैः परां कोशेशतां भजन् ॥ २७६८ ॥
ततः स्वजनितोत्पिञ्जतया निश्चोद्यचाक्रिकः ।
भोजेन राजवदनः समगंस्तापसाध्वसम् ॥ २७६९ ॥
तयोरकृतकर्तव्यविशेषेणेतरेतरम् ।
जातसौष्ठवयोः क्षिप्रमविश्वासो व्यशीर्यत ॥ २७७० ॥
अभ्यमित्रीणतां तस्यानिच्छतो दरदं विना ।
मदात्साहायकायैच्छन्मितानेव स तान्हयान् ॥ २७७१ ॥
स्युश्चेत्सोढाग्रिमाटोपाः कटकस्यास्य नो द्विषः ।
तत्साम्यमुन्मिषेद्यद्वा भङ्गो भूयोपि योगभित् ॥ २७७२ ॥
तस्मात्सर्वाभिसारेण रणमेकं ममेच्छतः ।
विजयावजयावाप्तिरेकाहान्तरिता मता ॥ २७७३ ॥
व्याजहारेति यद्भोजस्तदेषोथ हसन्स्मयात् ।
निन्ये तद्दारदं सैन्यमुपेक्ष्यागमिनीश्चमूः ॥ २७७४ ॥
तिलकम् ॥
संकटान्ते वितीर्णानुयात्रस्तेषां प्रसर्पताम् ।
स राजबीजी शुश्राव दरद्राजमथागतम् ॥ २७७५ ॥
तत्संगमाय व्यावृत्ते तस्मिन्कोट्टान्तिकं पुनः ।
प्रावेशयद्बलहरो मातृग्रामं स तद्बलम् ॥ २७७६ ॥
दिशस्ततो वीक्ष्य वाहैर्भ्रान्तवातमृगा इव ।
निसर्गधीरधीर्गार्गिर्न धैर्यात्पर्यहीयत ॥ २७७७ ॥
तस्य सर्वेपि नीलाश्वडामराः स्वे च सैनिकाः ।
विपक्षैः सह बद्धैक्याः सैन्यान्दुध्रुक्षवो ययुः ॥ २७७८ ॥
स तथा विषमस्थोपि प्रस्थित्यै प्रार्थितो निजैः ।
म्लाननानः प्रभुं द्रष्टुं न क्षमोस्मीत्यभाषत ॥ २७७९ ॥

स सूर्यवर्मचन्द्रस्य न जातः कश्चिदन्वये ।
उपयोगाय यो नागान्मल्लाभिजनजन्मनाम् ॥ २७८० ॥
भोजं सभाजयित्वाथ विड्डसीहः सपार्थिवः ।
सारैः समं स सामन्तैर्विजयाय व्यसर्जयत् ॥ २७८१ ॥
ततो म्लेच्छगणाकीर्णा व्रजन्संवाहयंश्चमूः ।
प्रयाणमात्रान्तरितः पृष्ठे तस्य बभूव च ॥ २७८२ ॥
प्रादुष्कृतजगत्क्षोभे बले तत्रानुयायिनि ।
उत्साहात्साल्हणिर्मेने कृत्स्नां हस्तगतां महीम् ॥ २७८३ ॥
वाजिभिस्तर्जितो म्लेच्छराजैश्च बलमूर्जितम् ।
स्थाने समुद्रधाराख्ये निर्बबन्धाथ तत्पदम् ॥ २७८४ ॥
स राजवदनस्तादृग्दुर्जयाग्र्यबलोज्ज्वलः ।
मृत्युदन्तान्तरे दिष्टं षष्ठचन्द्रं स्वमन्यत ॥ २७८५ ॥
ततः प्रावृट्पयोवाहकृतोदीपपरिप्लुता ।
संजायते स्म वसुधा समीभूतजलस्थला ॥ २७८६ ॥
धरित्रीपानपात्रेभ्यःशीधुपूर्णे दधुर्द्रुमाः ।
मग्ना लक्ष्यशिखामात्रा वलन्नीलोत्पलोपमाम् ॥ २७८७ ॥
षष्ठस्य संकटं जानन्भूभृच्छेषैर्बलैः समम् ।
अथोदयद्वारपतिं तं च धन्यं व्यसर्जयत् ॥ २७८८ ॥
वाहिनीरुद्धमार्गौ तौ पदवीमनुसस्रतुः ।
मार्गे धनंजयस्येव शैनेयपवनात्मजौ ॥ २७८९ ॥
लम्बाम्बुदेम्बरे दूरं वारिपूर्णे च भूतले ।
स्यूतेव विद्युद्दृशेभिन्नद्योतननिःस्वना ॥ २७९० ॥
शोभामात्रोदितागर्हपरिबर्हावहिष्कृतः ।
तत्राविभक्तकटकः पार्थिवः समजायत ॥ २७९१ ॥

अनास्थो राजवदने सत्त्वावष्टम्भयोः पुरा ।
अत्रापरो न निक्षेप्यो राजबीजीति दारदान् ॥ २७९२ ॥
त्रिल्लकः संदिशन्दूतैर्वृद्धिं पार्थ्वीहरिं नयन् ।
तयोरेकस्य सामर्थ्यादैच्छत्तं हस्तपातिनम् ॥ २७९३ ॥
युग्मम् ॥
अभित्तिलिखितालेख्यकल्पं बलहरस्य तत् ।
तादृग्विलोक्य सामर्थ्यमथ राज्ञश्च सर्वतः ॥ २७९४ ॥
विभक्ताशेषसैन्यस्य तत्र तत्रारिसंकटे ।
ज्ञात्वाप्रतिसमाधेयच्छिद्रमुन्मुद्रदुर्नयः ॥ २७९५ ॥
अकृशश्वाविदाचारश्चिरं स्वाङ्गैः स गोपितम् ।
बहिर्दुर्धर्षमत्याक्षीद्द्वितीयमपि कण्टकम् ॥ २७९६ ॥
तिलकम् ॥
ध्वान्तेम्बुधरजालान्ध्यमहावाते रजोभरः ।
स्वपक्षभेदयोर्ज्ञातकर्णेजपमहोद्यमः ॥ २७९७ ॥
कुलच्छेदकृतो राज्ञस्तत्र तत्रातिसंकटे ।
अशान्तजागरोत्यर्थमनर्थपरिपोषकः ॥ २७९८ ॥
सोथ शूरपुरेकस्माद्बहुभिः सह डामरैः ।
तेन संपूरितः पृथ्वीहरजो लोठकोपतत् ॥ २७९९ ॥
तिलकम् ॥
तस्य संघटतः कन्थां प्रयातं वैकृतं चिरात् ।
पालीभङ्गे तटस्येव प्रावृट्पूर्णस्य लक्ष्यताम् ॥ २८०० ॥
निद्राणोपेन्द्रजठरप्रमादनिसृतं जगत् ।
समेतमिव तत्सैन्यं प्रत्यभाज्जलदागमे ॥ २८०१ ॥
यावद्भिः पार्यते नेदृक्संख्यातुमपि तद्बलम् ।
त्यक्तव्यकल्पैः सुस्वल्पयोधमध्यगतैरपि ॥ २८०२ ॥

तावद्भिरनुगैः पिञ्छदेव इङ्गाधिपो युधि ।
तद्योधान्याम्यहरितः सरितश्चातिथीन्व्यधात् ॥ २८०३ ॥
युग्मम् ॥
तदोज्ज्वलैश्चिताचक्रैर्बिम्बितैस्तटिनीजले ।
मृतानामपि संस्कारः क्रियमाण इवाभवत् ॥ २८०४ ॥
इति विस्मृतमृत्युः स कुर्वन्नेकाहमाहवम् ।
कथंचिदाप्तैरन्येद्युर्भग्नसारोपसारितः ॥ २८०५ ॥
पुरे स शून्ये सैन्यानि संगृह्णंस्तत्र सर्वतः ।
द्वित्रैरहोभिर्नगरं सुखग्राह्यममन्यत ॥ २८०६ ॥
इच्छां पद्मपुरास्कन्दे मन्दत्वं त्रिल्लकोनयत् ।
पृष्ठस्थयोर्यशोराजकम्पनाधीशयोर्भयात् ॥ २८०७ ॥
न भृत्यैस्तद्विधः सिद्धश्चास्यैकस्मिन्नसंमते ।
विधेयान्यलवन्यस्य डामरे होलडौकसि ॥ २८०८ ॥
द्वैराज्ये सुस्सलस्यापि नैवादृश्यत तादृशः ।
अनर्थो यादृगुत्तस्थौ तत्सुतस्य समन्ततः ॥ २८०९ ॥
चतुष्कमवधीर्याथ राज्ञा पादगदोपमम् ।
रिल्हणप्रेषितं ग्रीवागण्डतुल्यं व्यपोहितुम् ॥ २८१० ॥
प्रस्थितस्तत्प्रमाथाय शमालैः सोन्ववध्यत ।
व्रजन्प्राग्ज्योतिषं हन्तुं पार्थः संशप्तकैरिव ॥ २८११ ॥
अधावच्चाभ्यमित्रीणस्तान्व्यावृत्त्य निपातयन् ।
पद्माकरोन्मुखः पृष्ठलग्नान्भृङ्गानिव द्विपः ॥ २८१२ ॥
रणश्रान्तेन गमिता त्रियामा तेन रामुशे[1] ।
गर्जन्कुल्यार्पितारातिपृतनानाशसंस्क्रिये ॥ २८१३ ॥

---

१ रामुषे इति स्यात् ।

तत्कल्याणपुरं प्राह्णे विशन्तं सोग्रमागतः ।
रुरोधाभ्येत्य भूयोपि बलैर्भरितदिङ्मुखः ॥ २८१४ ॥
आपतन्नेव चारातिपदातीन्संमुखागतान् ।
दृष्टनष्टान्व्यधाच्छागानिवाग्रेऽजगलो गिलन् ॥ २८१५ ॥
उद्भृत्तमारुतस्येव तस्यापाते पदातिभिः ।
तत्यजे रिल्हणः पर्णैर्हेमन्त इव पादपः ॥ २८१६ ॥
पश्यतस्तस्य ते विद्रवन्तो जिह्मा न जिह्रियुः ।
देहस्पृहापारमित्यै कस्यौचित्यमनत्ययम् ॥ २८१७ ॥
आप्तैरथापसृत्य स्वैरर्थितो रिल्हणोब्रवीत् ।
नयन्प्रजासृजा साम्यं स्वामिभक्तिस्मृतेः स्मितम् ॥२८१८॥
ह्री····वाविशेषेपि जन्तोर्जन्तोर्यदीशिता ।
भृत्यभावेपि यो लुप्तकृत्यो धिक्तस्य जीवितम् ॥ २८१९ ॥
जातं वक्रसरः श्मश्रुराजिनीलान्नभोजनम्[1] ।
जराकैरवगौरं च राज्ञः पादान्प्रपद्य यान् ॥ २८२० ॥
म्लायत्सु तेषु भ्रूभङ्गभृङ्गभ्राजिष्णुभिर्भवेत् ।
कथं लक्ष्मीविलासैस्तदखण्डैरविडम्बितम् ॥ २८२१ ॥
युग्मम् ॥
एषा कापुरुषासेव्या धीराणां नैव पद्धतिः ।
यदायासलवत्रासात्सौख्यवैमुख्यभागिता ॥ २८२२ ॥
वस्त्रापासन एव शीतजनितस्त्रासोथ तीर्थाम्बुभिः
स्नाने ह्लादसुखोपलब्धिरसमब्रह्मानुभावोपमा ।
वैह्वल्यं समरे वपुर्विजहतामेवं किलोपक्रमे
कैवल्याख्यसुखोपलम्भपरमा पश्चात्पुनर्निर्वृतिः ॥ २८२३ ॥

---

१ भोज्यलम् इति स्यात् ।

एवमुक्त्वा परानीकमेकाकी स व्यगाहत ।
गृह्णञ्शरान्हरिप्रोथश्वाससंदिग्धशूत्कृतान् ॥ २८२४ ॥
स्वर्णत्सरुप्रभाजालहरितालोज्ज्वलोभजत् ।
खड्गपट्टनटस्तस्य रणरङ्गोत्तरङ्गताम् ॥ २८२५ ॥
तत्खड्गस्य घ्नतः खड्गाञ्जीवैर्जालच्छलाद्भुवम् ।
उत्थाय लग्नं शत्रूणां तृणैस्तृणमणेरिव ॥ २८२६ ॥
आजौ तमनुजग्मुस्ते यैरगण्यन्त वैरिणः ।
तिर्यञ्चो लक्ष्यतां यातास्तेषां प्राणास्तृणान्यपि ॥ २८२७ ॥
संप्रविष्टो मुखान्मृत्योः कैश्चिन्मार्गैः स निर्गतः ।
तिमेः संमीलितास्यस्य श्रोत्ररन्ध्रैरिवोदकम् ॥ २८२८ ॥
शश्वत्कुर्वन्परावृत्तीः श्रमशान्त्यै विनिर्गतः ।
प्रक्षीणभूयिष्ठबलो लब्धोत्सेको रिपावभूत् ॥ २८२९ ॥
पृष्ठतः स पपाताथ चतुष्कः पुष्कलैर्बलैः ।
साहायकागतं प्राक्स यं स्वं कंचिदमन्यत ॥ २८३० ॥
तस्योभयमुखस्यारिसैन्यस्याहेरिवेक्षणात् ।
न संरम्भे शिखण्डीव परं ताण्डवितोभवत् ॥ २८३१ ॥
तौ व्यूहावथ पर्यायैर्मुखपृष्ठं प्रदर्शयन् ।
सोक्षिणोद्युधि मन्थाद्रिर्मथनेब्धितटाविव ॥ २८३२ ॥
कीलनिश्चलयोर्भ्राम्यन्नसकृद्धान्तरे द्वयोः ।
कुविन्द इव·····तुरंगमतुरान्वितः ॥ २८३३ ॥
भासः प्रत्यग्रहीत्तस्य तमेकपृतनावयम्[1] ।
एकतोम्भोधरं द्वीपस्येव कूलबिलोद्गमः ॥ २८३४ ॥
तेन वैरिचमूश्चक्रे लुलितायुधकुण्डला ।
क्रीडता चण्डवेगेन पुरुषायितुमक्षमा ॥ २८३५ ॥

---

१ रयम् इति स्यात् ।

त्रासपाण्डून्द्विषां वक्त्रकुम्भान्स्वेदाम्भसा चितान् ।
स कुर्वन्भूभुजं जाने भूयो राज्येभ्यषेचयत् ॥ २८३६ ॥
स च पार्थ्वीहरिश्चास्तामन्योन्यस्य क्षपाक्षणे ।
सज्जौ मात्रिकवेतालाविव रन्ध्रगवेषिणौ ॥ २८३७ ॥
साहायकागतान्साक्षी[1]कृतक्ष्मापतिसैनिकान् ।
अन्येद्युः सोकरोच्छत्रं वनमार्गावगाहिनम् ॥ २८३८ ॥
पर्यस्तशौचान्संचिन्त्य त्रिलुकादीनथाययौ ।
सज्जपालस्तृतीयस्मिन्दिवसे रिल्हणान्तिकम् ॥ २८३९ ॥
नृपप्रतापग्लपितः स ताभ्यां पर्यशोष्यत ।
वनान्तः शुचिशुक्लाभ्यां घुणक्षीण इव द्रुमः ॥ २८४० ॥
चितानल इवासारैर्युद्धैः शममनाश्रितः ।
उदयेन शनैर्निन्ये चतुष्कोपि मितोष्मताम् ॥ २८४१ ॥
दारदं ····[2]वेलं दृप्येद्धेमसंनाहवाहिभिः ।
हयैरवरुरोहाद्रिकुहरादाहवोन्मुखम् ॥ २८४२ ॥
तुरुष्कलोकेनाक्रान्तान्देशांस्तद्वशमीयुषः ।
शङ्कमानैर्जनैर्ज्ञाता कृत्स्ना म्लेच्छावृतेव भूः ॥ २८४३ ॥
प्रयाणमात्रान्तरिते धन्ये द्वारपतावपि ।
साहसं निःसहायस्य तत्खड्गैरग्रतोभवत् ॥ २८४४ ॥
ज्वलत्कनकसंनाहं तत्सैन्यं स द्विषोरुधत् ।
कचज्ज्वालावलिं दावं सनिर्झर इवाचलः ॥ २८४५ ॥
विधूय जयचन्द्रादीनग्रप्रस्थानरोधिनः ।
बलवाहुल्यदीप्तास्ते व्यगाहन्ताहवावनिम् ॥ २८४६ ॥
तेषां हयसहस्राणि त्रिंशद्विंशतुरंगमैः ।
रंहसा प्रतिजग्राह निजग्राह च गर्गजः ॥ २८४७ ॥

---

१ साक्षीकृत्य इति स्यात् । २ तद्बलं दृप्यत् इति स्यात् ।

तस्यासुहृद्भिर्ददृशे पौरुषं तदमानुषम्।
एकैकस्याग्रतो यत्स वैश्वरूप्यमिवादधे ॥ २८४८ ॥
अश्ववङ्काग्रविन्यस्तवक्त्रास्ते विद्रुताः क्षणात्।
जगाहिरे कापुरुषा गिरीन्किंपुरुषा इव ॥ २८४९ ॥
अभूमिज्ञतया शाठ्याच्चैष जातः पराभवः।
श्वस्तदस्मान्पुरस्कृत्य जयं प्रत्याहरिष्यथ ॥ २८५० ॥
इत्युक्ता राजवदनजयचन्द्रादिभिर्निशि।
तथेति मिथ्याकथयन्दारदा विद्रवोन्मुखाः ॥ २८५१ ॥
युग्मम् ॥
प्रवेश्य धन्यद्वारेशौ दूरं बलहरो बली।
ऐच्छत्सन्नभिसंधातुं रुद्ध्वा पाश्चात्यपद्धतीः ॥ २८५२ ॥
स्कन्धावारेण सार्धं च दरदां राजवीजिनाम्।
विधातुं विदधे बुद्धिं तं ततस्तारमूलके ॥ २८५३ ॥
चिकीर्षति ततस्तस्मिन्मत्तेष्वन्धेषु दस्युषु।
उत्सेहे साल्हणिः कृत्स्नं राज्यं निश्चितनिर्जितम् ॥२८५४॥
जयाभावेप्यनन्तेदृक्सामन्तसंहितांस्ततः[1]।
भव्योस्मि भवितेत्येवं विचिन्त्योत्सिषिचे च सः ॥ २८५५ ॥
पद्मोन्माथाद्विरदरदनैरप्रियैः पद्मबन्धो-
रिन्दौ स्पर्धिन्युदयति वपुः खण्डशः स्वं भ्रियेत।
तापस्त्यज्येत च रुचिरमाभागिभिः सूर्यकान्तै-
र्भद्राभद्रं व्यसनसमये संभवेदप्रतर्क्यम् ॥ २८५६ ॥
यो डामरतया भिक्षोः शश्वत्कृच्छ्रेप्युपेक्षणम्।
टिक्कादीनां च कौटुम्ब्याद्भूभर्तुर्द्रोग्धृमूर्धनि ॥ २८५७ ॥

---

१ सहितं इति स्यात्।

अलवन्यतयानन्यसामान्याश्चर्यवर्धनात् ।
ततः कृच्छ्रोपयोगाच्च विश्वासस्येव मूर्धनि ॥ २८५८ ॥
तौ नागराजवदनौ व्यसनावसरे तदा ।
चित्रं स्वकार्यतात्पर्यादद्भुतादरतां गतौ ॥ २८५९ ॥

तिलकम् ॥

स्वयं विधेयं नागोन्यकृतं तं वीक्ष्य विप्लवम् ।
अदूरमर्थमन्येन कृतं कविरिवाशुचत् ॥ २८६० ॥
क्ष्माभृद्विपक्षं स्वं पक्षीकर्तुं कृष्णाननं ततः ।
संत्यज्य राजवदनं मां भजस्वेत्यभाषत ॥ २८६१ ॥
संप्राप्तं वः प्रतीक्षध्वं तेजो बलहरात्मजम् ।
युग्याधिरूढं किं नारीमेव तां यामिको यथा ॥ २८६२ ॥
इति ते संदिशन्तं च व्यहसन्संविहाय तम् ।
कामधेनुसमं नागं छागाश्लेषाद्विधि····यत् ॥ २८६३ ॥
सर्वः स्वकार्यतात्पर्यात्प्रवर्तेत प्रियाप्रिये ।
स्नेहवैरेन्यदीये तु न किंचिदधिगच्छति ॥ २८६४ ॥
ज्योतिस्तर्जितकान्ति दन्तयुगलं बाध्यं सुधादीधिते-
र्दानास्वादधिया प्रिया मधुलिहां कुम्भस्थली कुम्भिनः ।
वा····स्यैष विरोधभाक्सरसिजस्येत्यत्र नेन्दौ रति-
स्तस्याप्यायकृतो हितोयमिति नाप्यस्य द्विरेफा द्विषः२८६५
प्रतिष्ठालोठनं कर्तुं ततो बलहरस्य सः ।
आजन्म वैरं संरेभे तेन भूभृद्धितेच्छया ॥ २८६६ ॥
स तथा दारदान्मन्नान्नभिन्नो भूभुजैष वः ।
सभोजात्राजवदनो हन्यादित्यभ्यधान्निजैः ॥ २८६७ ॥
दरद्राजानकानीतनेतारौ कम्पनापती ।
प्रख्यातक्षेमवदनमशु····भिधावुभौ ॥ २८६८ ॥

त्रस्यन्नोजसनामा च कोट्टेशो मन्त्रितं रहः ।
ब्रुवाणास्तद्यहस्यन्त भोजेनान्तरवेदिना ॥ २८६९ ॥
स्फाटिकेनेव सैन्येन तेनाग्रे रुद्धमप्यथ ।
दिधक्षुराजार्कमहो विड्डसीहेन्धनेपतत् ॥ २८७० ॥
पार्थिवानर्थदुश्चिन्तामययक्ष्मपरिक्षतः ।
स यत्कृष्णक्षपाक्षीणसोमसाम्यं समाययौ ॥ २८७१ ॥
रोगग्रस्ते रणप्रष्ठे पृष्ठगोप्तरि भर्तरि ।
तथाभियोज्ये स्थाने च भयजर्जरतां गते ॥ २८७२ ॥
आहारस्थं बलहरं विहाय निखिलास्ततः ।
पलाय्यत[1] तैरन्येद्युर्विगाह्य हरिभिर्गिरीन् ॥ २८७३ ॥
युग्मम् ॥
दृष्ट्वा बहुमतं प्रातरागन्तारः पुनर्वयम् ।
कथयित्वेति संप्रार्थ्य साल्हणिं सह तेनयन् ॥ २८७४ ॥
प्राक्पीतकोशो वैवश्यात्स तेषामनुगोभवत् ।
भ्रष्टकार्यस्तु वैह्वल्यं श्वभ्रे मज्जन्निवादधे ॥ २८७५ ॥
मुहुः सर्वशिरोद्रिक्तरक्तपूर्णमिव ज्वलन् ।
अवरोहदनच्छाम्बुसोपानाश्मनिभं मुहुः ॥ २८७६ ॥
ज्ञातेन पतितेनैव मुहुर्व्योम्ना महीसमम् ।
व्रजतस्तस्य वैलक्ष्यादलक्ष्याक्षमभून्मुखम् ॥ २८७७ ॥
दध्यौ च धिङ्मे ये शश्वत्प्रभावं वयमीदृशम् ।
राज्ञो दृष्ट्वाप्यनात्मज्ञा जानीमो मर्त्यधर्मताम् ॥ २८७८ ॥
प्रतिभाप्रौढ[2]निर्भाततत्त्वानां नान्यथा शिर[3]ः ।
महाकवीनामेतादृक्प्रतापानलवर्णने ॥ २८७९ ॥

---

१ पलायिषत तेन्येद्युः इति स्यात् । २ प्रौढि इत्युचितम् । ३ गिरः इत्युचितम् ।

राज्ञः प्रतापशिखिनः कणाः क्षोणौ न सन्ति चेत् ।
तत्कस्माद्भयमायाताः पदन्यासेप्यधीरताम् ॥ २८८० ॥
अनेकशोङ्गैर्वीराणां पीतधाराम्बुडम्बरे ।
शोषः प्रादुष्कृतो न स्यात्तज्ज्वालासंज्वरं विना ॥२८८१॥
किमन्तरेण तद्धूममालान्ध्यं प्रोन्मिषद्दृशः ।
मार्गामार्गविभागस्य परिज्ञाने विमूढता ॥ २८८२ ॥
मधुमत्यास्तटेन्यस्मिन्विवर्ज्य दरदः स्थितान् ।
वीचीजवनिकाच्छन्नः सोवाप्याथ तटेवसत् ॥ २८८३ ॥
क्रमादुत्खातखेदस्तैर्नीत्वा स्वशिबिरान्तरम् ।
तत्रैष्यतेति संधातुं रोहद्रोहैः[1] स्पृहान्तरैः ॥ २८८४ ॥
नृपं तेषां ह्यगण्यार्थवर्षिणं नयनैपुणात् ।
उपजीवितुमिच्छाभूत्तद्रक्षणवाणिज्यया ॥ २८८५ ॥
नानेहा विग्रहस्यायं प्रत्यासन्नो हिमागमः ।
मधुमासि विधास्यामः पुनरारब्धिमुत्तमाम् ॥ २८८६ ॥
कालक्षेपेक्षमत्वं चेद्भुट्टराष्ट्राध्वनाधुना ।
त्वान्तर्निदध्मो बलिनस्त्रिलुकस्योपवेशने ॥ २८८७ ॥
राजानं राजवदनः श्रितस्तैरित्यसावतः ।
उक्त्वैष्यतः स्वराष्ट्रान्तर्युक्त्या बन्धुं नराधमैः ॥ २८८८ ॥

तिलकम् ॥

अपि राजपुरीयाणां कौटिल्यं तैर्हि जीयते ।
दैर्घ्यं निदाघदस्राणां[2] वियोगदिवसैरिव ॥ २८८९ ॥
तथायातमुपालेभे दूतैर्बलहरोथ तम् ।
प्रहौ निहितवांस्त्वस्मीति त्रोटितवटाकरः २८९० ॥

---

१ द्रोहस्पृहातुरैः इति स्यात् । २ घस्राणां इत्युचितम् ।

उत्साहादाहवस्थोपि स तथा गार्गिमग्रिमम् ।
आयान्तं च नृपानीकमु····हान्न व्यचिन्तयत् ॥ २८९१ ॥
अकस्माद्विद्रुतदरद्राजभोजादिवार्तया ।
न व्यदीर्यत यद्धैर्यपर्याप्तेस्तत्किलाङ्कनम् ॥ २८९२ ॥
आडम्बरालम्बनस्य भेदेप्यच्छिन्नविग्रहः ।
यदयुद्धोद्धतं सिध्येत्तत्कस्यामानुषं विना ॥ २८९३ ॥
कालानुरोधात्संधित्सू धन्यद्वाराधिपावथ ।
सोयोजयद्विलम्बेन भोजप्रत्यागमाशया ॥ २८९४ ॥
ततोलंकारचक्रः स नेतुं साल्हणिमाययौ ।
ज्ञातेयाद्दारदावेत्य प्रार्थितापरिपन्थिनीः ॥ २८९५ ॥
बुद्ध्वा तदनुबन्धेपि द्रोहनिर्बन्धिनीः सभाः ।
अग्रहीन्मार्गसेत्वग्रे निधनाद्यवसायिताम् ॥ २८९६ ॥
भृत्यैः सह युवप्रायैर्वीक्ष्य तं मर्तुमुद्यतम् ।
दरातुरं दरद्राजसैन्यं तद्दैन्यमाययौ ॥ २८९७ ॥
व्यपोहन्तीव लहरीबाहुभिः कलहं सरित् ।
कल्लोलास्फालनोल्लापैर्निनिन्देव दरद्वलम् ॥ २८९८ ॥
ह्रेपितः स्वावरोधैश्च सेर्ष्यैश्च म्लेच्छपार्थिवैः ।
सैन्यैः कदनभीतैश्च विड्डसीहोथ तं जहौ ॥ २८९९ ॥
पुरःसरैर्भग्नसेतुपालैः पारं परं ततः ।
विद्राविताानि स प्राप भिन्दंस्तूर्यरवैर्दिशः ॥ २९०० ॥
असामर्थ्ये वरूथिन्या स्वस्य चार्थितसंधिना ।
आनीतो विड्डसीहेन दूतः प्रोक्तोथ भूपतेः ॥ २९०१ ॥
अमानुषानुभावेन तावत्तत्स्वामिना भवेत् ।
प्रातिसीमिकसामन्तबुद्ध्या स्पर्धासु धीवरः ॥ २९०२ ॥

अश्रद्धेयानुसंधान एव यान्तो यमान्तिकम् ।
जयराजोस्मि वामुष्य प्रभावावेदकौ दिवि ॥ २९०३ ॥
तेन दिव्यानुभावेन निर्जयोपि जयो मम ।
पान्थस्य कूलविभ्रंशात्तीर्थे पतनमुन्नतिः ॥ २९०४ ॥
अथायातः पुरे स्थित्वा कंचित्कालं निजेविशत् ।
यमराष्ट्रमसत्कीर्तिलसद्वन्दनमालिकम् ॥ २९०५ ॥
अबुद्ध्वा भोजमायान्तं संधिं तत्रैव वासरे ।
सार्धं द्वारेशधन्याभ्यां स राजवदनोप्यगात् ॥ २९०६ ॥
अश्वागतं तं व्यावृत्य षष्ठं प्रष्ठं मनस्विनाम् ।
आदाय तावताभ्यर्णं प्राविक्षातां क्षमापतेः ॥ २९०७ ॥
अहंकाराद्विमोहाद्वा विमर्षेण बहिष्कृतौ ।
उपेक्षामक्षते भोजे भजते राजवीजिनि ॥ २९०८ ॥
आहूतस्तु हृतोत्कण्ठाभाजापि प्रभुणासकृत् ।
अनिःशेषीकृतारातिर्न व्यावर्तत रिल्हणः ॥ २९०९ ॥
प्रभोः पुरस्तात्कार्यान्ते तेन स्थातुमशक्यत ।
प्रसादाकाङ्क्षिणा सूदेनेव भोक्तुं नहि क्वचित् ॥ २९१० ॥
द्विधा कृता येन युद्धे पृथ्वीहरसुतद्वयी ।
मगधेन्द्राकृतिर्भीमेनेव कार्याक्षमाभवत् ॥ २९११ ॥
मातृकुक्षिमिव स्वोर्वीं तेनाजौ लोष्टकः क्षतः[1] ।
खाण्डवे खण्डितः सर्प इव गाण्डीविनाविशत् ॥ २९१२ ॥
भजंश्चतुष्कः संकोचं दुर्भेदं त्रिल्लकालयम् ।
स्वकायकर्परं दर्पोज्झितः कूर्म इवाविशत् ॥ २९१३ ॥
निःशेषीकृतकार्यः स शौर्येणैव महीपतेः ।
पार्श्वं पादनखज्योतिःपट्टबन्धास्तये ययौ ॥ २९१४ ॥

---

१. क्षतः इत्युचितम् ।

प्रतापैर्नृपतेरित्थं विप्लवः शोषितोप्यभूत्।
अमात्यमतिदोषेण भूयः प्रादुष्कृताङ्कुरः॥ २९१५॥
दण्डार्हो राजवदनो दानेनाप्यायितो यतः।
निर्भयं भोजमायान्तं प्रतिजग्राह तं पुनः॥ २९१६॥
उत्कोचपरिणामान्तं सोथ स्थापयति स्म तम्।
दिन्नाग्रामाभिधे स्थाने खाशकानां निवेशने॥ २९१७॥
इत्येनमब्रवीच्छ्वश्चेदायास्यो नानुगामिनः।
मितानुयायी द्वारेशः प्रायास्यद्गोचरान्मम॥ २९१८॥
सोत्कम्पः साहसस्रोतःपातेनीयत नौरिव।
त्रिल्लकेनापि स स्थैर्यं नीतिरज्जुप्रसारणात्॥ २९१९॥
व्यसनोल्लासवैवश्यं विशांपत्युर्व्यचिन्तयत्।
येनाव्यवस्थाप्राथम्यं स जाल्मः पुनरग्रहीत्॥ २९२०॥
अलंकारादिभिः स्वास्थ्ये स्थाप्यमानोपि मन्त्रिभिः।
अत्यजन्नैव कौटिल्यमजितात्मेव दुर्ग्रहम्॥ २९२१॥
गण्डं वैद्य इवापाकं तमवज्ञाय पार्थिवः।
पक्वगण्डानिवारेभे रिपून्पाटयितुं परान्॥ २९२२॥
आगन्तव्यं त्वया पश्चाद्यात्स्वस्मासु प्रकम्पताम्।
भोजमुक्त्वेत्यलंकारचक्रोगाद्विप्लवोद्यतः॥ २९२३॥
तं जयानन्दवाडाख्यो दस्युरानन्दवाडजः।
अन्वयुर्विक्रमोदग्राः परेपि क्रमराज्यजाः॥ २९२४॥
अग्रस्थितो राजगृह्योलंकारः स्वल्पसैनिकः।
वालुकासेतुकल्पस्तं जज्ञे सिन्धुरयैरिव॥ २९२५॥
स तु राम····राद्याजिक्षोभसंभावनां विशाम्।
उदपादयदेकाकी कुर्वन्बहुभिराहवम्॥ २९२६॥

आपानरभसक्षुभ्यद्रक्षःसंभ्रमदक्षिणम् ।
रणं जगाम गञ्जात्वमञ्जसास्रपरिप्लुतः ॥ २९२७ ॥
स तूलकूटमिव तत्कटकं विकटं द्विषाम् ।
किमन्यत्प्रैरयत्कापि प्रभञ्जन इवाञ्जसा ॥ २९२८ ॥
ग्रासाय गृध्रकङ्कादिपत्रिव्रातस्य तत्यजे ।
आनन्दवाडसूनुः स हत्वा तेनेषुणा रणे ॥ २९२९ ॥
भोजस्योत्थातुकामस्य जिघृक्षोः क्ष्माभुजश्च तत् ।
पङ्कप्रधावत्ककरव्याधन्यायो व्यवर्धत ॥ २९३० ॥
अनुड्डयनसामर्थ्यः श्राम्यति ककरो यथा ।
धावन्पङ्के पतन्व्याधोप्यनुधावन्पथान्वहम् ॥ २९३१ ॥
प्रसङ्गे साहसस्यैवं भोजः क्लैब्यमगात्सदा ।
तत्प्राप्तुमिच्छुर्भूपोपि मतिमोहं मुहुर्मुहुः ॥ २९३२ ॥
युग्मम् ॥
दिन्नाग्रामस्थिते भोजे स राजवदनोप्यगात् ।
पुनः किं चौरचण्डालाः श्रेयसीत्युक्तिमीशितुः ॥ २९३३ ॥
डामरा भग्नसंघाता भूयः पूर्वाधिकां ततः ।
कन्थां ते ग्रथयामासुर्मुहुर्यो शौर्यशालिनः ॥ २९३४ ॥
ते द्वारपतिमायातं सोढुं शेकुर्न केवलम् ।
अशक्यैराहवैर्यावत्तात्पर्यादुदवेजयन् ॥ २९३५ ॥
तेषां त्राणार्थमन्येषामुत्थानार्थमथाययौ ।
कृष्टोलंकारचक्रेण नीविं दत्त्वा स साल्हणिः ॥ २९३६ ॥
तेषां परेद्युः पार्श्वं स यियासुरसकृद्यदा ।
हायाश्रमं श्रान्तसैन्यो द्वारेशोबुद्ध तं तदा ॥ २९३७ ॥
अजानन्निव तेषां स व्याजसंधिं निबद्धवान् ।
मिषात्कुतोप्यगात्तिर्यक्स्थितं संतारमूलकम् ॥ २९३८ ॥

तस्मिंस्तत्र स्थिते दूरात्कुतस्त्यामपि पूत्कृतिम्।
श्रुत्वा भोजोवदत्सायं किमपि व्याकुलीभवन् ॥ २९३९ ॥
निजैर्विहस्यमानोपि त्रासात्तस्मादहेतुकात्।
व्यरंसीत्संभ्रमान्नासौ चक्रे सज्जांस्तु वाजिनः ॥ २९४० ॥
त्रस्तोलंकारचक्रोथ दशग्राम्यग्रतो द्रुतम्।
क्व राजपुत्र इत्येवं कथयित्वा पलायितः ॥ २९४१ ॥
उदतिष्ठत्ततो ग्राममध्यात्तूर्यध्वनिर्महान्।
आस्कन्दावेदकः सेनानिनादश्च क्षपामुखे ॥ २९४२ ॥
अलक्षितो ध्वान्तमध्ये भेजे भोजः पलायनम्।
श्वःकर्तव्येष्वलंकारचक्रो युद्धाय संदधे ॥ २९४३ ॥
दत्तो द्वाराधिपेनाग्निर्गिरिवर्त्म प्रकाशयन्।
ध्वान्तध्वस्तात्मनां तेषां तदाभूदुपकारकः ॥ २९४४ ॥
द्वाराधिपस्य क्षाम्यन्तः संधिं भोजप्रतीक्षया।
श्रुत्वा तमथ वृत्तान्तं भङ्गं ते डामरा ययुः ॥ २९४५ ॥
असंत्यजन्नपत्यादिबन्धं धीरोच्चलाश्रयात्।
आजिं स भोजोलंकारचक्रेणामङ्गलावहम् ॥ २९४६ ॥
..... ।
भोजस्तत्राप्यभूत्तर्षान्नाहारादिसुखान्वितः ॥ २९४७ ॥
बाणाग्निजस्त्रिपुरनिर्दहने प्रतापः
पाथोनिधेः प्रमथने वडवाग्निजन्मा।
आसाद्य मन्दरनगेन समागमं हि
न क्वापि पन्नगपतेः सुखसख्यमासीत् ॥ २९४८ ॥
क्षुत्पिपासाश्रमं हन्तुं प्राप्तः स्वविषयावनौ।
अलंकारात्मजैर्भूयो बन्द्धुं भोजोभ्यलष्यत ॥ २९४९ ॥

पितुर्मतेन बुद्ध्या वा स्वया तत्तद्विधित्सतः ।
सोसिसंधाय निर्यातः प्रापाथ विषयान्तरम् ॥ २९५० ॥
ततो बलहरेणैव कृत्यं निश्चित्य कार्यवित् ।
अनास्थोन्यलवन्येषु दिन्नाग्रामं पुनर्ययौ ॥ २९५१ ॥
द्वाराधिपोहितोद्धारधीरोप्यत्रान्तरे क्षमः ।
चक्षूरोगेण भग्नाभियोगोकस्माद्यधीयत ॥ २९५२ ॥
भोजाय दातुमैच्छद्यो डामरस्ते सुते ददौ ।
पर्माण्डये गुल्हणाय राजजाय च निर्जितः ॥ २९५३ ॥
रोगोच्चण्डतया दण्डप्रयोगावसरे कृते ।
तत्र साम प्रयोज्यैव द्वारेशो विवशोविशत् ॥ २९५४ ॥
अभियोगक्षणे तस्मिन्ययौ भारसहः क्षयम् ।
दुर्नामकामयक्षामः षष्ठचन्द्रोपि गर्गजः ॥ २९५५ ॥
तत्रामयाविन्येवात्तोद्रेकौ तमनुजं निजम् ।
चक्राते वसुधां दुःस्थामास्कन्दाद्यैरुपद्रवैः ॥ २९५६ ॥
त्रिल्लकः प्रबलैरन्यैः सहाभेदं प्रवर्धयन् ।
नाग्रहीद्विग्रहैकाग्रः सान्त्वनामपि भूपतेः ॥ २९५७ ॥
षष्ठे निष्ठां गते रोगमग्ने द्वारपतावपि ।
नियुक्तः क्ष्माभुजा धन्यो निरगात्तारमूलकम् ॥ २९५८ ॥
भोजश्च्युतोमुतोन्येषां बलिनां गोचरे पतेत् ।
प्राप्तप्रतिष्ठो निस्तीर्णो देशाद्वासाध्यतां व्रजेत् ॥ २९५९ ॥
इति संचिन्त्य सामाद्यैरुपायैस्तं जिघृक्षुणा ।
क्ष्माभुजा मर्मसंरम्भो विदधे सोभियोगभाक् ॥ २९६० ॥
युग्मम् ॥
अज्ञातोदर्कवैषम्या दुर्नीतिः सा महीभुजाम् ।
व्यावृत्त्यावाधत च्छिन्नपुच्छाकृष्टेव पन्नगी ॥ २९६१ ॥

वलिनं राजवदनं नृपं चावेत्य निर्बलम् ।
आभ्यन्तराश्च बाह्याश्च विक्रियां यत्क्रमाद्ययुः ॥ २९६२ ॥
छिद्रान्तराणि सुलभानि सदैव हन्त
पातालरन्ध्रसरणेरिव दण्डनीतेः ।
बह्वीभवन्प्रसरमन्तरसंप्रविष्टो
यात्यप्रतर्क्यनियमात्पतनं भजेद्वा ॥ २९६३ ॥
भोगत्यागोर्जितो राज्ञा क्षीणार्थोसौ व्रजेदितः ।
उक्त्वेत्यमुं बलहरस्तस्य वृत्तिमकारयत् ॥ २९६४ ॥
तां लब्धप्रसरां मायां राजपक्षे विलोक्य सः ।
युक्तयन्तराणि संलेभे प्रयोक्तुं नीतिकौशलात् ॥ २९६५ ॥
संधिं पदे पदे बद्ध्वा सार्धं बलहरादिभिः ।
कुर्वन्गतागतं धन्यो जनस्यावाप हास्यताम् ॥ २९६६ ॥
शश्वद्विवर्तमानस्य राजकार्यस्य नावधिम् ।
अरघट्टघटीयन्त्रगुणस्येवाससाद सः ॥ २९६७ ॥
तस्य चक्र इवोद्भ्रान्ते कर्तव्ये तैक्ष्ण्यभागपि ।
भेत्तुं प्ररोढुं वाप्यासीन्नयो बाण इवाक्षमः ॥ २९६८ ॥
नीतराजद्वयोव्यग्रः शेषस्यैकस्य विग्रहे ।
चतुरङ्ग इव क्रीडन्विवशोभूद्विशांपतिः ॥ २९६९ ॥
बद्धलक्ष्यः प्रदानार्थं ततश्च च्छद्मना परान् ।
भञ्जतो वाजिपत्त्यादि नाप्यासीन्नाप्यजीगणत् ॥ २९७० ॥
दस्युष्वुद्यतसङ्गेषु शीतापायप्रतीक्षिषु ।
नागाद्बलहरः स्वेषामुन्मूलनमशङ्कत ॥ २९७१ ॥
सामर्थ्याशिथिलामित्रो[1] भावे सूत्रितविप्रिये ।
तस्मिन्धावति धन्ये च शश्वत्सोवेपताकुलः ॥ २९७२ ॥

---

१ मित्रभावे इति स्यात् ।

संमन्त्र्य सार्धं भोजेन धन्यं समदिशत्ततः ।
बद्ध्वार्पयत नागं मे भोजं दास्यामि वस्ततः ॥ २९७३ ॥
भूरिकार्यकृतं स्वस्य बन्धनार्थावहं[1] रिपोः ।
धन्यो व्यसनवैवश्याद्धियं नाबुद्ध तस्य ताम् ॥ २९७४ ॥
पार्थिवाः स्वार्थसंसिद्धित्वराविरतसत्त्वया ।
धियाविशुद्धं यत्किंचित्कुर्वन्तीति न नूतनम् ॥ २९७५ ॥
काकुत्स्थोपि प्रियाप्रार्थी व्यग्रः सुग्रीवसंग्रहे ।
वीरोविधेयं स्वार्थान्ध्याद्वधं व्यधित वालिनः ॥ २९७६ ॥
संहृत्य सत्यनित्यत्वं राज्यगर्वाविशुद्धधीः ।
आचार्यं पाण्डवो राजा धर्मनिघ्नोप्यघातयत् ॥ २९७७ ॥
आ भिक्षुविग्रहान्नित्यद्रोग्धुर्नागस्य विग्रहः ।
स्वार्थापेक्षी तटस्थस्य तत्कालं न विगर्हितः ॥ २९७८ ॥
अगृहीत्वा तु भूभर्त्रा कंचिद्भोजार्पणे पणम् ।
सोवष्टम्भीत्यभूत्तस्मिन्मन्युर्मतिमतां मनाक् ॥ २९७९ ॥
यथा तत्कृत्यमायत्यां हितं जातं तथैव चेत् ।
विचार्याकारि राज्ञा तच्छेमुषीयममानुषी ॥ २९८० ॥
विभिन्न इव भोजस्तु नागं समदिशद्यथा ।
दित्सुर्बलहरं राज्ञे त्वदर्पणपणेन माम् ॥ २९८१ ॥
बन्धमश्रद्दधानोस्य राज्ञस्त्रासादसौ श्रयेत् ।
स विदन्नथ माध्यस्थ्यमिति तं हि तथावदत् ॥ २९८२ ॥
षष्टचन्द्रे गते निष्ठां जयचन्द्रेण पार्थिवः ।
संगृहीतेन तं नागं पार्श्वं प्रावेशयत्ततः ॥ २९८३ ॥
पक्षीकृतः क्षमाभुजायं हन्यादस्मान्भयादिति ।
चलन्तमपि तं भोजस्तन्मन्त्रिणमरोधयत् ॥ २९८४ ॥

---

१ वहां इति स्यात् ।

तथेति जानन्नपि तं कृष्टोस्म्येतैरनीशताम् ।
यातः किमपि हन्तेति दूतैर्नागोप्यभाषत ॥ २९८५ ॥
नियतं नियतिस्रोतोगर्भे जन्तोर्निमज्जतः ।
कथ्यमानं तटस्थेन श्रोतुं न श्रवणौ[1] क्षमौ ॥ २९८६ ॥
नागे बद्धे तत्कुटुम्बैर्भीतैरेत्य समाश्रितः ।
मायाशाली बलहरो दुर्दर्शः[2] समपद्यत ॥ २९८७ ॥
भोजनिष्क्रयविक्रेयं तमादाय ययौ ततः ।
रिल्हणेन समं धन्यो धावन्बलहरान्तिकम् ॥ २९८८ ॥
सान्तर्हासो मोहयंस्तौ प्राङ्नागं दत्त मे ततः ।
भोजं दास्यामि व इति ब्रुवन्भ्रामयति स्म सः ॥ २९८९ ॥
बद्धमूलतया दूरं दुर्धर्षो योद्धुमागतम् ।
सर्वं तच्च तयोः सैन्यं निन्ये कृत्यविधेयताम् ॥ २९९० ॥
वर्षयुद्धापकर्षादि····खिन्नौ तौ ततोभ्यधात् ।
इतोपसृतयोः कुर्यां युवयोर्मतमित्यसौ ॥ २९९१ ॥
एकप्रयाणान्तरिते स्थितयोः पथि चाकरोत् ।
कार्यान्तःपातवैवश्ये तयोर्मतिविमोहनम् ॥ २९९२ ॥
काचिद्बलहरस्यासीत्पर्याप्तिर्धैर्यसत्त्वयोः ।
निश्चोद्याद्यतने काले वीराणां विरलैव या ॥ २९९३ ॥
तथा हारितमार्गाय साहसात्पार्श्वमीयुषे ।
द्रुह्यति स्म न धन्याय लोभाद्भोजाय नापि यः ॥ २९९४ ॥
मतिमोहेन नागं चेद्द्युर्मे सचिवास्ततः ।
कुर्यां तं स्वपदेभ्यर्थ्य चकारेति च चेतसि ॥ २९९५ ॥
नागासांनिध्यलब्धर्द्धिदार्ढ्यार्थं गूढवैकृतः ।
भ्रातृव्योपातयन्नागं धन्याद्यैर्लोष्टकाभिधः ॥ २९९६ ॥

---

१ श्रवणे क्षमे इत्युचितम् । २ दुर्धर्षः इति स्यात् ।

सचिवैर्निहते नागे निर्हेत्वहितमोहितैः ।
दुर्मन्त्रितं नरपतेः स्वैः परैश्च व्यगर्ह्यत ॥ २९९७ ॥
स्वजातीयवधक्रोधाद्विरुद्धैः सर्वडामरैः ।
नागानुगैश्चाश्रितोभूत्ततो बलहरो बली ॥ २९९८ ॥
देहिनो व्यसनापातवैवश्याद्भ्रमतोपथि ।
अकार्यं कुर्वतः कार्यं सिद्धः संसाधयेद्विधिः ॥ २९९९ ॥
उद्यद्दुःसहवित्ततानवतया बद्धावधाने मन-
स्युन्मार्गभ्रमणेवशस्य रभसाच्छ्वभ्रे परिभ्राम्यतः ।
अन्योपाहितकोशपृष्ठलुठनात्संदर्शिताङ्गक्षते-
र्जन्तोर्हन्त तनोति दुर्गतिशमं रम्यानुलोम्यो विधिः ॥३०००॥
तथा निरनुसंधानं नागं धीसचिवैर्हतम् ।
नाबुद्ध भोजः संजातत्रासस्त्वेवं व्यकल्पयत् ॥ ३००१ ॥
लब्धवर्णस्य नावर्णावहं कर्मेदमीशितुः ।
अलब्धपणबन्धस्य वाञ्छितास्यै विशङ्कयते ॥ ३००२ ॥
यश्च युद्धमिति व्यग्रं हर्षादाद्यामवापि यः ।
भोजमन्यकरस्थोयमशक्यो ह्यन्यथा मम ॥ ३००३ ॥
उक्त्वेति मोहयन्धन्यमुख्या·····स्मि संदिशेत् ।
इति मां राजवदनः स्थितस्तन्नूनमन्यथा ॥ ३००४ ॥
युग्मम् ॥
आ भिक्षुविप्लवाद्द्रोहसुभिक्षस्यानुवन्धिनः ।
किं राजवदनोप्येष लोभात्संभाव्यते न भूः ॥ ३००५ ॥
अथाविशङ्किनस्त्रासव्युदासायास्य खाशकाः ।
रक्तार्द्रकृत्तिन्यस्ताङ्घ्रि कोशपानं प्रचक्रिरे ॥ ३००६ ॥
प्रादुष्कृतभियः क्षिप्तरक्षिणोमुष्य तिष्ठतः ।
विश्वासार्थं बलहरो विरलः पार्श्वमाययौ ॥ ३००७ ॥

अमात्यमतिजाड्येन नष्टे कृत्येथ कृत्यवित्।
स्वयमुत्तम्भने[1] नीतः संरेभेसंभ्रमो नृपः॥ ३००८॥
चैत्रः पादपमण्डलस्य तटिनीतोयस्य वर्षागमः
सत्कारो गुणगौरवस्य नयनप्रेम्णोन्तिकासेवनम्।
ऐश्वर्यस्य महोद्यमो जयविधेर्गाढाविषादग्रहः
कर्तव्यस्य च सिंहदेवनृपतिर्म्लानौ न तत्त्वावहः॥३००९॥
प्रवाहेणेव कृत्यस्य हठेन हरतोन्तरे।
प्रातिलोम्यं श्रितवता पारं गन्तुं न पार्यते॥ ३०१०॥
अतो धूर्तो नृपो मुग्ध इति ज्ञातोरिभिर्मुधा।
मौग्ध्यं प्रदर्शयंस्तेषां यतते स्माभिसंधये॥ ३०११॥
स हि यत्तत्प्रदानेन भजन्भोजान्तिकस्थितीन्।
तस्याविश्वासपात्रत्वं संत्रस्तस्याभितोनयत्॥ ३०१२॥
गन्धेन वासितोत्सङ्गाः कुरङ्गार्यङ्गजन्मना।
प्रज्वलन्त्यो विभाव्यन्ते तटिन्योपि कवाटिभिः॥ ३०१३॥
नीडस्यान्तः सरन्ध्रस्य सर्वतोहिभयं स्पृशन्।
जाले द्वाराग्रबद्धे च निर्गमे पतनं विदन्॥ ३०१४॥
ताम्येद्यथा खगो भोजस्तथान्तःस्थेष्वविश्वसन्।
बहिर्भूपेन रुद्धाध्वा प्रस्थानेप्यभजद्भयम्॥ ३०१५॥
युग्मम्॥
तदा स दौःस्थ्यातिथितां प्राप्तः प्रैक्षत न क्षणम्।
मनोविनोदनं किंचित्कृत्यं लोकद्वयोचितम्॥ ३०१६॥

---

१ उत्तम्भनं नीतेः इति स्यात्।

उग्राभिषङ्गमनुषङ्गि परस्य दुःखं
हन्ताश्लथं व्यथयति प्रसभार्द्रभावम् ।
बद्धः सरोजकुहरे विरहार्तनादै-
श्चक्राभिधस्य मधुपोधिकमेति दैन्यम् ॥ ३०१७ ॥
रणे पूर्णव्रणाश्यानशोणितो लूनकुन्तलः ।
फेनोद्गार्याननः क्रन्दंस्तेनैकः प्रैक्ष्यत द्विजः ॥ ३०१८ ॥
स पृष्टो विप्लुतैर्नीतः[1] सर्वस्वं विक्षतं तथा ।
स्वं डामरैर्निवेद्यैनं निनिन्द त्रातुमक्षमम् ॥ ३०१९ ॥
स्वदौःस्थ्यार्तमनास्तस्य दुःखेन व्यथितोन्वहम् ।
घट्टितार्द्रव्रण इव प्राह स्मेति स सान्त्वयन् ॥ ३०२० ॥
गर्ह्यहोंस्मि न ते ब्रह्मन्योनुग्राह्योहमीदृशः ।
विषमे वर्तमानश्चेत्यथ सोपि तमब्रवीत् ॥ ३०२१ ॥
दुर्ग्रहेणामुना ब्रूहि कोर्थः पार्थिवपुत्र ते ।
सारासारविदो यूनः कुले जातस्य मानिनः ॥ ३०२२ ॥
प्राणान्संदेहमारोप्य प्रणम्य प्राक्तनाशयान् ।
पीडयित्वा विशः क्लेशैः कार्यं किमिव पश्यसि ॥ ३०२३ ॥
यश्च ते प्रतिभात्येव जेतव्यो विदितो न किम् ।
अग्निशौचः स सारङ्गः परशौर्याग्निमज्जने ॥ ३०२४ ॥
यत्र शस्त्रशलाकापि विकला तद्विधीयते ।
इन्दीवरदलद्रोण्या घटनं स्फाटिकाश्मनः ॥ ३०२५ ॥
पृथ्वीहरावतारादिप्रत्यनीकिजितः परे ।
के नामास्य न संघर्षे क्षुद्रप्राया दरिद्रति ॥ ३०२६ ॥
किं दृप्य एव बुद्धापि कृत्यं द्वैराज्यजीविनाम् ।
भृत्याशयाः फणिग्राहिगृहीता इव भोगिनः ॥ ३०२७ ॥

---

१ नीतसर्वस्वं इति स्यात् ।

जातैः क्ष्मावलयोद्बहे फणिकुलैर्धिग्भोगिडिम्बैर्मुधा
व्यालग्राहिविकासितस्य कुहरैर्ग्रामस्य हा गृह्यते।
एतान्भिक्षयितुं न तु प्रथयितुं ते जीविकायै जन-
त्रासार्थं ननु कारयन्ति हि दृतेर्निर्मज्जनोन्मज्जनम्॥३०२८॥
इत्युक्तवन्तं तं सान्त्वयित्वा भोजो व्यसर्जयत्।
तदेव[1] चाशु व्याकोशविवेकः समपद्यत॥ ३०२९॥
भव्यात्मत्वं प्रशममहिमोल्लासने हन्त हेतु-
र्भावानां तु ध्रुवमपरथा मार्दवं क्रूरता वा।
स्पृष्टं पादैरमृतमहसः स्यात्कठोरं हिमांशो-
र्याति ग्रावाप्यहह रभसादार्द्रतां चन्द्रकान्तः॥ ३०३०॥
राजन्याभिजने जातोऽप्यलज्जत्वमशिक्षितः।
सोन्तरं स्वस्य राज्ञश्च मुहुर्महदचिन्तयत्॥ ३०३१॥
गुणैः शौर्यनयत्यागसत्यसत्त्वादिभिः प्रभोः।
पूर्वेप्युर्वीभुजः खर्वा क्षुद्राः स्पर्धासु के वयम्॥ ३०३२॥
तस्य प्रभावदीप्तेपि समये क्षान्तिशीतला।
शक्तिः क्षयजडत्वेपि मुग्धानां नो महोष्मता॥ ३०३३॥
क्ष्वेडाग्नितापनिबिडोरगसंगमेपि
तुङ्गस्य चन्दनतरोरपि[2] शीतलत्वम्।
काले हिमर्तुपरिपिञ्जरसंज्वरेपि
निम्नस्य कूपकुहरस्य महोष्मयोगः॥ ३०३४॥
कुतोपि पर्ययात्कार्यं सुप्तं नृपममुं विना।
प्राप्य कस्य पुनः प्राप्यमप्यशुद्ध्या न बाधितुम्॥ ३०३५॥

---

१ तदैव इत्युचितम्। २ अतिशीतलत्वम् इत्युचितम्।

भ्रष्टं निर्झरवारि शुभ्रमचलैः स्वीयेन भूयः क्वचि-
ल्लभ्यं लभ्यमथाभ्रतः कलुषतादुष्टं प्रकृष्टं न तत् ।
निर्यन्निर्भरनिम्नगाम्बु नभसः प्राप्येत नित्यं दध-
त्प्रालेयत्वमुपेत्य शुद्धिमधिकां नाद्रेर्हिमाद्रेर्नगैः ॥ ३०३६ ॥
तदर्थमेव ग्रथितो योनर्थो ग्रथितात्मनः ।
स तेन स्वस्थतां नेतुमर्थितो न स्पृशेद्रुषम् ॥ ३०३७ ॥
प्लोषाय योस्य दववह्निमदादमुष्मि-
न्स्वस्थे स तेन शिखिना ग्लपितः समीपम् ।
अभ्येति चन्दनतरोर्दववह्निदाह-
शान्त्यै यदि प्रियकृदेष न तस्य किं स्यात् ॥ ३०३८ ॥
समग्रो दुर्गतावर्हदपकर्तेव भूपतिम् ।
लोकनाथं तमुद्धर्तुं धीरं धन्यः पुनः पुनः ॥ ३०३९ ॥
राजप्रसादनोपायान्वेषी बलहरान्तिकम् ।
राजदूतमथायान्तमेकमेकं व्यलोकयत् ॥ ३०४० ॥
दरद्देशं व्रजन्दृष्ट्वाक्प्राक्प्रज्ञातुमन्तिकम् ।
स नमन्तं तमानीय ततः स्मेर इवाब्रवीत् ॥ ३०४१ ॥
राज्ञः किमन्यसंधानैः संधिबन्धात्त्वसौ मया ।
प्राज्ञैर्हि भिषजा भोज्यमातुराय समर्प्यते ॥ ३०४२ ॥
तत्तस्याश्रद्दधानस्य नर्मस्मेरस्य जानतः ।
प्रत्ययोत्पादनं तैस्तैरालापैः किंचन व्यधात् ॥ ३०४३ ॥
निर्दम्भभाषितै रूढविस्रम्भः स कथान्तरे ।
अथाभिगम्य राजानं स्तुवन्भोजमभाषत ॥ ३०४४ ॥
राजपुत्राभिजातस्य पादच्छायास्य लभ्यते ।
स्वर्णाद्रेरिव कल्याणप्रकृतेः पुण्यभागिभिः ॥ ३०४५ ॥

अनुवृत्त्यातिमृद्यापि तस्यापोह्यत वैकृतम् ।
ज्योत्स्नयेव शरद्भानुपरितापौष्ण्यमम्भसः ॥ ३०४६ ॥
अपि स्मरसि चारुत्वे[1] नियुक्तोऽस्मि महीभुजा ।
विशतस्ते दरद्देशमभूवं पुरतः पुरा ॥ ३०४७ ॥
ततो निवृत्तो वृत्तान्तं मुख्यमाख्याय तावकम् ।
कालं क्षेप्तुं कथादैर्घ्यं नयन्मध्ये तमभ्यधाम् ॥ ३०४८ ॥
क्षुत्तृडध्वक्लामश्रान्तान्देव तानवलोक्य माम् ।
निन्दतः स्वानुगान्भोजो निर्भर्त्स्यैवं तदाब्रवीत् ॥ ३०४९ ॥
स दैवतमिवास्माकं कुलालंकरणं प्रभोः ।
वयं त्वसुकृतो यस्य नाप्नुमः पादसेवनम् ॥ ३०५० ॥
गण्याः पर्यन्तनिःसारास्तत्संबन्धादिमे वयम् ।
चन्दनभ्रान्तिकृत्काष्ठं यत्स्यात्तद्गन्धवासितम् ॥ ३०५१ ॥
तच्छ्रुत्वैव दयार्द्रत्वं त्वयि यातः स लक्षितः ।
पृच्छन्निपतेव किं गर्भरूपो वक्तीति मां पुनः ॥ ३०५२ ॥
तन्निशम्यैव भोजस्य द्रवीभूतमभून्मनः ।
सोन्तर्बाष्पोप्यपश्यत्तं सान्त्वयन्तमिवाग्रतः ॥ ३०५३ ॥
सुव्यक्तमात्रासंबोधमुग्धत्वेन विहीयते ।
तत्त्ववित्कारणज्ञानादन्तःकरणवेदनम् ॥ ३०५४ ॥
अश्रद्दधानस्तामिच्छां भोजस्याकृच्छ्रवर्तिनः ।
प्रतिदूतीकृते तस्मिन्धन्यो न प्रत्ययं दधे ॥ ३०५५ ॥
देविताभूद्यथा नागवृत्तान्तेन भवेत्तथा ।
महीभुजं मोहयितुं मायया दीव्यते मया ॥ ३०५६ ॥

---

१ चारत्वे इत्युचितम् ।

मा भूद्भिन्नोयमित्येवमुक्त्वा बलहरं रहः ।
व्याजार्जवेन भोजस्तु संधिबन्धाय तत्वरे ॥ ३०५७ ॥
युग्मम् ॥
तत्कालयोग्यसांचिव्यश्चक्रिकाचतुरस्तथा ।
तेनाशु दैशिकापत्यमेको दूत्ये न्ययोज्यत ॥ ३०५८ ॥
स बालकतया नित्यस्वतन्त्रश्चक्रिकां स्वयम् ।
आचरेदिति नाशङ्कां भोजे बलहरोभजत् ॥ ३०५९ ॥
पार्थिवः प्रार्थितः संधिं दूतमाप्तं प्रतीक्षते ।
प्रत्यागतेन तेनेति ततो भोजोभ्यधीयत ॥ ३०६० ॥
तत्रासन्निहितान्याप्तः स्त्रीत्वादप्रतिभामपि ।
धात्रीं नोनाभिधानां स्वां राज्ञोभ्यर्णं व्यसर्जयत् ॥३०६१॥
मृतेन पित्रा मात्रा च हीने तमनुयातया ।
मातृकृत्यं ययात्रासीच्छैशवे माननीयया ॥ ३०६२ ॥
पत्युः प्रीत्यै विसंधानध्वंसाकल्पादिकल्पनात् ।
सखीकृत्यं सपत्नीनां यया शान्तेर्ष्यया कृतम् ॥ ३०६३ ॥
[1]ह्रासोल्लासो हि कार्याणां योग्यकृत्याप्तनिश्चयात् ।
न यां सुक्षत्रियां क्षमाभृत्संभ्रान्तां जातु वीक्षते ॥ ३०६४ ॥
श्वशुरेण प्रजाभिश्च कृतं राज्ञोभिषेचने ।
आशास्यं वा महादेवी पट्टबन्धं समादधे ॥ ३०६५ ॥
अपत्यप्रियताभोगलोभभर्तृप्रसादनैः ।
प्रेर्यमाणाप्यकार्येषु बुद्धिर्यस्या न धावति ॥ ३०६६ ॥
[2]स्वत्रान्यत्र च संधाने जाते भर्तुरभिन्नधीः ।
भाग्योदयेष्वनुत्सिक्ता या चाखण्डितसद्व्रता ॥ ३०६७ ॥

---

१ ह्रासोल्लासे इत्युचितम् । २ स्वस्यान्यस्य इति स्यात् ।

आबाल्याद्भावविद्भर्तुः कुसृत्यनुसृतौ न सा ।
कार्यमध्यं विगाहेत मानाभिजनरक्षिणी ॥ ३०६८ ॥
इति कल्हणिकादेव्या माध्यस्थ्ये स धियं व्यधात् ।
प्रस्थानपदयात्रां सा सीमन्ताप्रापणावधि ॥ ३०६९ ॥

कुलकम् ॥

गुप्त्यै लग्नकवित्तादिपरार्ध्यं मध्यपातिनम् ।
पाथेयार्थं पृथुस्वर्णभाजि कोशादि चात्मनः ॥ ३०७० ॥
प्रापयामास किंचाष्टौ प्रकृष्टाभिजनोद्भवान् ।
पालनार्थं राजपुत्रान्देवीवत्सर्वसंविदम् ॥ ३०७१ ॥

युग्मम् ॥

[1]वाचकं तद्गृहीत्वा तामागमत्पार्थिवेव सः ।
धात्रीं स कारयन्धन्यो बद्धेच्छासिद्धिनिश्चयाम् ॥३०७२॥
विहितप्रत्ययस्तस्याः सद्यः स्यात्तु महीपतिः ।
राजधर्मस्य च वसन्नासीद्दोलाकुलाशयः ॥ ३०७३ ॥
स हि दध्यौ निर्विरोधो वैराग्येणाथ मायया ।
संकटान्मोचितव्यासौ यायात्कालेन विक्रियाम् ॥ ३०७४ ॥
अनिःशेषितजीमूतजालमाविर्भवन्नविः ।
अनूनक्लेशशेषं च विवेको न स्फुरेच्चिरम् ॥ ३०७५ ॥
मुग्धान्निरनुसंधाननागबाधादवेत्य नः ।
[2]स्वस्थस्य सिद्धये माया तेनेयं निरमायि वा ॥ ३०७६ ॥
लब्धलक्षेपरिक्षीणे शक्ते यूनि गणाश्रिते ।
क्षत्रधर्मस्थिते नेदृग्विवेकः क्वापि लक्ष्यते ॥ ३०७७ ॥
अवल्लि कौङ्कुमं पुष्पमपुष्पं क्षीरिणः फलम् ।
अकालपर्ययापेक्षं वैराग्यं वा महात्मनाम् ॥ ३०७८ ॥

---

१ वाचिकं इत्युचितम् । २ स्वार्थस्य इति स्यात् ।

न त्याज्यो राजपुत्रोसावेवं मायानिधिर्यदि ।
एवं विवर्तश्चेत्तस्मिन्नदृष्टे किं दृशोः फलम् ॥ ३०७९ ॥
राज्ञी राजात्मजाश्चैते प्रतिष्ठाभङ्गशंसिनः ।
ऋजुप्रभावात्सुस्पष्टमन्यत्कार्यं न मन्यते ॥ ३०८० ॥
अटिलं कुटिलं स्पष्टं शरत्सर्वैर्न लक्ष्यते ।
कान्ताकुन्तलनिःस्यन्दी तोयबिन्दुरिवाक्रमः ॥ ३०८१ ॥
इति ध्यात्वा राजधर्मं सत्यप्रज्ञोचितं व्यधात् ।
धन्यरिल्हणयोः कार्यं श्रुतावन्यान्विसर्जयन् ॥ ३०८२ ॥
स्वस्यैवार्थस्य दार्ढ्याय साल्हणिस्त्वां दिदृक्षते ।
समागमायेत्युक्त्वाथ धन्यो दूतैरनीयत ॥ ३०८३ ॥
मा भैषीरेष संधित्सुः सैन्यादिति मितानुगः ।
अवर्तिष्ट तटिन्याः स द्वीपान्तस्तत्प्रतीक्षया ॥ ३०८४ ॥
सरित्सा जानुदघ्नाम्भा भूत्वा घर्मद्रुते हिमे ।
गगनालिङ्गिभिर्भीमा तरङ्गैः समपद्यत ॥ ३०८५ ॥
अवाप्तयैर्ष्ययालङ्घ्यभावं यान्त्यपि दन्तिनाम् ।
रुद्धः सिन्धावभूत्सोथ द्विषां रन्ध्रैषिणां वशे ॥ ३०८६ ॥
सिन्धोरुभयतस्तोयैर्व्याप्ततीरभुवोन्तरे ।
ते दिण्डीरोपमां[1] प्रापुः पिण्डिताः पाण्डुवाससः ॥ ३०८७ ॥
खशकानां सहस्राणि भोजस्य पतिते बले ।
स्थितवन्ति निहन्तुं तं तथास्थितमचिन्तयत् ॥ ३०८८ ॥
दृग्भ्यां संभ्रमदीनाभ्यामघशान्त्यै स्पृशन्निव ।
कर्णे सल्हणसूनुस्तान्संतर्ज्य वृजिनोब्रवीत् ॥ ३०८९ ॥
निर्दम्भमस्य विस्रम्भाद्धावतो विहिते [2]विधेः ।
निरत्ययो निपातः स्यान्नियतं निरये पुनः ॥ ३०९० ॥

---

१ डिण्डीरोपमां इत्युचितम् । २ वधे इति स्यात् ।

हतेस्मिन्बहुभृत्यस्य न च शक्तिक्षयः प्रभोः ।
नैकपक्षक्षये तार्क्ष्यरंहः संहारमर्हति ॥ ३०९१ ॥
अपिवा वाच्यता राज्ञामेवं विस्रब्धबोधनात्[1] ।
तुल्यस्तुल्येन कर्तव्यं किमनुध्याय बध्यते ॥ ३०९२ ॥
यथायं वृत्तयेनन्यकर्मा रूपं[2] निषेवते ।
तथा ममापि यत्नोयं तत्सेवासादने यतः ॥ ३०९३ ॥
युक्तमित्यादि तेनोक्ता अपि निश्चलनिश्चयाः ।
ते न्यषिध्यन्त निर्बन्धात्प्रतिज्ञायात्मनो वधम् ॥ ३०९४ ॥
रात्रौ तथैवादारिद्र्याच्छिद्रं तद्रक्षितुं ततः ।
कारिताः कोशपानं ते तमर्थं सोपि बोधितः ॥ ३०९५ ॥
तेनावेदितनिर्व्याजतया धीरो महीपतिः ।
अनुध्यायाथ संदिग्धं संधिसिद्धिममुग्धधीः ॥ ३०९६ ॥
अज्ञातनिश्चयासिद्धेर्विनान्तःकरणं परैः ।
अथ प्रास्थापयद्देवीं सामात्यां तारमूलकम् ॥ ३०९७ ॥
राजधर्मविधेयत्वादवार्यक्रूरशङ्किनी[3] ।
प्रस्थानप्रार्थनां भर्तुः सा स्वीकृत्य ततोब्रवीत् ॥ ३०९८ ॥
असामान्येष्वमात्येषु कुसृत्यालोकनात्सकृत् ।
आर्यपुत्र विचार्योसि विसृम्भः किं विरोधिनाम् ॥ ३०९९ ॥
यद्वा निर्मानुषोन्मेषां शेमुषीं त्वं विगाहितुम् ।
प्रथते नु कथंकारं मूर्तत्वं मर्त्यधर्मिणाम् ॥ ३१०० ॥
देहोपकरणत्वं ते प्राणैर्मम विचिन्त्यते ।
सतीधर्मस्तु सहते राजधर्मस्य नोचितम् ॥ ३१०१ ॥
व्यञ्जितास्य सदाचारं कलिकृत्यं द्विषि त्वयि ।
प्रारब्धो देव भोजेन हिमाद्रौ हिमविक्रयः ॥ ३१०२ ॥

---

१ बन्धनात् इति स्यात् । २ भूपं इति स्यात् । ३ क्रौर्य इति स्यात् ।

न गृह्णाति शमं वेत्ति स्वस्यान्यस्य न चान्तरम् ।
निर्व्यूढमददोषोद्य प्रायेण प्राकृतो जनः ॥ ३१०३ ॥
पुत्रमन्त्र्यविरोधादिबुद्ध्यशुद्ध्या प्रधावति ।
साध्वाचारोपि भूपालः क्रुध्यन्विस्रब्धबाधने ॥ ३१०४ ॥
समयालङ्घनामोघगिरा देवेन पीयते ।
लोकत्रयैकपात्रेस्मिन्यशो नूनं मया सह ॥ ३१०५ ॥
त्रातव्यसंक्षयोपेक्ष्यप्राणायास्त्वन्यदाशयः ।
ममैवास्वादयन्त्यादादात्मंभरिपुरास्थितिः ॥ ३१०६ ॥
इत्युक्त्वा विरतां सत्यसंधः साध्वीं धरापतिः ।
शान्तशङ्कामकृत्वा तां मातामन्त्र्यान्ययोजयत् ॥ ३१०७ ॥
भङ्गं सर्वानयं त्रातुं प्रयोक्तुं वेदनं नृपः ।
संरम्भे किमयं ध्यायत्यन्तः सर्वोप्यचिन्तयत् ॥ ३१०८ ॥
उपायेषु प्रयुक्तेषु देवीसंप्रेषणावधि ।
नान्यदस्य प्रयोक्तव्यं यदवाशिष्यत क्वचित् ॥ ३१०९ ॥
सपक्षभेदाद्भूभर्तुः सबलत्वाबलत्वयोः ।
परीक्षकत्वाद्ये केचिन्माध्यस्थ्येनावसन्क्वचित् ॥ ३११० ॥
तेप्यल्पे वा महान्तो वा क्षीणदाक्षिण्यशृङ्खलाः ।
भोजगृह्यैः सहाबध्नन्कन्थां सर्वेपि डामराः ॥ ३१११ ॥
ते ह्यच्छिन्नतटस्थत्वाद्वैराज्येस्माभिरीदृशः ।
भोजः संजात इत्याशु माध्यस्थ्यं परिजह्रिरे ॥ ३११२ ॥
त्रिल्लको भोजसविधं तनूजं प्राहिणोद्भृतम् ।
प्रावेशयच्छमालां च चतुष्कं पुष्कलैर्बलैः ॥ ३११३ ॥
ये भिक्षुविप्लवेप्यासन्राजदाक्षिण्यरक्षिणः ।
विरोधिसविधं प्रापुस्तेपि नीलाश्वडामराः ॥ ३११४ ॥

लहराद्देवसरसाद्धोलाडातश्च डामराः ।
त्रयो नीलाश्वतश्चैका डामरी पर्यशिष्यत ॥ ३११५ ॥
न व्यरंसीद्धिमं तत्तल्लवन्ये साल्हणेर्बले ।
पतत्प्रावृट्प्रमत्तौघघोषोम्भोधाविवोद्गतः ॥ ३११६ ॥
भोजस्तु देवीमायान्तीं श्रुत्वा बलहरस्ततः ।
ध्रुवं संधित्सया बद्ध इति सुव्यक्तमभ्यधात् ॥ ३११७ ॥
एतावन्ति दिनान्यासीत्पुंसो भ्रमयिता पुमान् ।
संबन्धिनीनां माध्यस्थ्ये स्वकुल्यात्कोन्यथा भवेत् ॥३११८॥
कुलचूडामणिः प्रेम्णा स यत्रैवं प्रवर्तते ।
किं स्यादगण्यप्रायाणां कार्कश्यं तत्र मादृशाम् ॥ ३११९ ॥
यच्च मायामिमां ब्रूथ तत्तथास्त्वस्मि वञ्चितः ।
विश्वास्यैव भविष्यामि नाकीर्तीनां निकेतनम् ॥ ३१२० ॥
मा च भूद्विजयाशा वः समेता निखिला इति ।
अद्राक्ष्म चेदृशां व्यूहामवरुक्ष्याम वोन्नतेः ॥ ३१२१ ॥
युक्तियुक्तमिदं चान्यच्चोक्तवान्बहु निश्चयात् ।
नाशक्यतान्यथा कर्तुं भोजो बलहरादिभिः ॥ ३१२२ ॥
द्वित्राहान्तरितेमित्रप्रमाथेपरथा कथम् ।
फलकालेसि संवृत्त इति तं चावदन्नृपाः ॥ ३१२३ ॥
तारमूलस्थिते राज्ञि ससैन्यौ धन्यरिल्हणौ ।
राजपुत्रैः सह ततः पाञ्चिग्राममवापतुः ॥ ३१२४ ॥
प्राप्ताववेत्य तौ नद्यास्तीरेवाचि कृतस्थिती ।
परस्मिन्कूलगहने भोजोप्येतावुपाविशत् ॥ ३१२५ ॥
अश्रान्तं विशतो दिङ्मुखेभ्यस्तत्कटकं भटान् ।
पश्यन्तः केपि संधिं न श्रद्दधुर्नृपतेर्बले ॥ ३१२६ ॥

हठप्रविष्टान्निर्यातुमक्षमानल्पसैनिकान् ।
धन्यादीन्राजवदनो हन्तुं शश्वदचिन्तयत् ॥ ३१२७ ॥
छित्त्वा सुय्यपुरात्सेतुं राज्ञः सैन्यं जिघांसवः ।
महापद्मसरोनौषु निभृतं केचनावसन् ॥ ३१२८ ॥
अन्ये तत्साहसोदन्तान्वेषिणः पतनोन्मुखाः ।
स्वैः स्वैर्मार्गैस्तत्र तत्र तस्थुर्भूभृदसंमताः ॥ ३१२९ ॥
आस्कन्दं भाङ्गिलेयाद्याः पुरे शंकरवर्मणः ।
शमालाक्षिप्तिकावार्त्तिं डामराः समचिन्तयन् ॥ ३१३० ॥
प्राप्यं महासरित्कूलं त्रिल्लकाद्यैरगण्यत ।
नीलाश्वडामरैर्वींशा कार्या च नगरान्तरे ॥ ३१३१ ॥
किमन्यद्राजगृह्याणां समं सर्वे जिघांसवः ।
कारण्डवानां तोयान्तर्वेष्टितानामिवाभवन् ॥ ३१३२ ॥
संदिग्धशिक्षितं कार्यं सर्वतः समतां तदा ।
प्राप वृष्टेरवग्राहग्रहयोगान्तरस्थितेः ॥ ३१३३ ॥
पदे पदे राजचमूपथायोत्थानमिच्छतः ।
च्छिन्दन्बलहरस्येच्छां भोजो व्यग्रत्वमग्रहीत् ॥ ३१३४ ॥
क्षणे क्षणे विसंधानध्यायिना तेन कश्चन ।
बाध्यमानस्वान्तरायः संविधासु व्यचीर्यत ॥ ३१३५ ॥
घटनामुद्ययौ यो यो विरोधः कटकद्वयात् ।
सत्त्वैकाग्रः स्वयं भोजस्तं तं त्वरितमच्छिनत् ॥ ३१३६ ॥
दूत्ये च कल्पकत्वे वा येरुवत्राजरञ्जकाः ।
भयेन प्रययुस्ते यद्वैकल्यं कार्यसंकटे ॥ ३१३७ ॥
कर्णे तत्कथयन्ति दुन्दुभिरवै राष्ट्रे यदुद्घोषितं
तन्नम्राङ्गतया वदन्ति करुणं यस्मात्रपावान्भवेत् ।

---

१ येभवन् इति स्यात् ।

श्लाघन्ते तदुदीर्यते यदरिणाप्युग्रेण मर्मान्तकृ-
द्ये केचिन्ननु शाठ्यमौग्ध्यनिधयस्ते भूभृतो रञ्जकाः ॥३१३८॥
भाण्डस्ताण्डवमण्डपे कटुकथावीचीषु कन्थाकवि-
र्गोष्ठश्वा स्वगृहाङ्गने शिखरिभूगर्भे खटाकुः स्फुटम्।
पिण्डीशूरतया विटश्च पटुतां भूभृद्गृहे गाहते
गच्छन्ति ह्रदकृष्टकच्छपतुलां चित्रं ततोन्यत्र ते ॥ ३१३९ ॥
शूरोद्रेकविपर्यासाच्छान्तोष्मा क्ष्माभृतस्ततः।
वासरः शरणीचक्रे तुङ्गस्योत्तुङ्गमञ्जसा ॥ ३१४० ॥
भानुर्दत्तपदोनूरोर्भ्रातुर्गोवलयान्तरे।
क्ष्माभृच्छिरोर्पितकरो रक्तमण्डलतां दधे ॥ ३१४१ ॥
अहस्त्रियामामुखयोरपि मध्यस्थया दधे।
संध्यया वन्दनीयत्वं जनस्य व्यञ्जिताञ्जलेः ॥ ३१४२ ॥
कवाटिदन्तैर्विस्फोटाश्चन्द्रकान्तैः शिरोद्रुमः।
श्वयथुः पयसां पत्या दधे राज्युदयोन्मुखे ॥ ३१४३ ॥
सदैन्येष्वरविन्देषु हीनद्वन्द्वोपजीवनैः।
कवाटिनां कटेष्वेव षट्पदैर्घटितं पदम् ॥ ३१४४ ॥
अदृष्टकार्यपर्यन्तास्ततस्ते विषमस्थिताः।
सरित्तटे सकटकाः पर्यतप्यन्त मन्त्रिणः ॥ ३१४५ ॥
न किंचित्प्रत्यभा···त्स्वं लघु भ्रान्तं च जानताम्।
ओघेन ह्रियमाणानामिवैषामवलम्बनम् ॥ ३१४६ ॥
तीरे परस्मिन्सरितो वसन्वलहरः पुनः।
रुद्धः कन्दलितास्कन्दो[1] बुद्धिः साल्हणिनासकृत् ॥३१४७॥
कार्यातिपातादायातं मन्त्रिणां तन्मितं बलम्।
तस्य प्रवर्धमानस्य सुखोच्छेदं बभूव यत् ॥ ३१४८ ॥

---

१ स्कन्दबुद्धिः इत्युचितम्।

वितस्तासिन्धुसंभेदयात्रायां नगरे यथा ।
तथा तथापतद्रात्रौ लोकः श्रान्तो व्यवर्तत ॥ ३१४९ ॥
लेखैर्डामरसंहारखण्डनाय विसर्जितैः ।
सान्तरैर्ग्रथिताबाह्यैर्नानाग्रै राजवीजिनः ॥ ३१५० ॥
शाठ्यान्वितैरनुसरैस्तुमुलोत्पादनैरपि ।
धीरो धैर्यान्निश्चयाद्वा स्वैः स क्रष्टुं न पारितः ॥ ३१५१ ॥
सामन्तानामागतानामविस्रम्भादसंभ्रमम् ।
न्यक्कृतोयं निपत्याशु कुर्यादत्याहितं रुषा ॥ ३१५२ ॥
कृते च कदनोंकारेनेन सर्वे समुन्मिषेत् ।
द्विजानामिव दस्यूनां समूहस्तेन सर्वतः ॥ ३१५३ ॥
इति निर्ध्याय दुघ्रक्षुरिव भोजः क्षपात्यये ।
कुर्मः साहसमित्युक्त्वा निन्ये बलहरं समम् ॥ ३१५४ ॥
तिलकम् ॥
तेषां तदर्थायातानां सामन्तानामभोजने ।
दाक्षिण्यादिति नाभोजि तेनाप्यभिजनस्पृशा ॥ ३१५५ ॥
तथा स मत्या वैमत्यं तमज्ञात्वा तु मन्त्रिणः ।
निष्प्रत्ययास्तेन जातममन्यन्त नयात्ययम् ॥ ३१५६ ॥
पक्षिपक्षस्फुटास्फालशफरस्फुरितेप्यधात् ।
तेषामासविधास्कन्दं प्रधावदहितभ्रमम् ॥ ३१५७ ॥
कूले परस्मिन्कूलिन्याः स्वाभिसंधाननिर्वृतैः ।
समभाव्यत तैर्नान्यो रथाङ्गेभ्योभिषङ्गभाक् ॥ ३१५८ ॥
मरुत्काकुत्स्थदूतस्य कपेस्तीर्णाम्बुधेः पिता ।
ततान तेषां दूतानां सरित्पारगतौ बलम् ॥ ३१५९ ॥
कीर्णकर्णज्वरांश्चारीन्पीत्कृतैस्तीरभूरुहाम् ।
आश्रित्योन्निद्रकेणेत्थं निन्युस्ते तां निशीथिनीम् ॥ ३१६० ॥

क्षपान्ते क्ष्माधरोत्तंसहेमतामरसभ्रमम्।
उद्गच्छतो रवेर्यावच्चिच्छिदुर्न करच्छटाः ॥ ३१६१ ॥
चक्राह्वविरहालोकसशोकानामिवागलत्।
कुट्मलाक्षिपुटाद्यावन्नैशं नाम्भश्च वीरुधाम् ॥ ३१६२ ॥
मितपत्तियुतस्तावत्तरुकच्छाद्विनिर्गतः।
स वीरस्त्वरयन्युद्धवाहान्मूर्ध्न्यङ्घ्रिणा स्पृशन् ॥ ३१६३ ॥
रोद्धुकामाण्डामरीयान्वीरान्दृष्टेर्विलोकितैः।
सर्वतो धावतः कुर्वन्योधान्प्रतिहतौजसः ॥ ३१६४ ॥
पारश्वधी चारुवेषो युवा संमुखमापतन्।
युग्याधिरूढस्तैः प्रैक्षि संप्राप्तः सरितस्तटम् ॥ ३१६५ ॥
कुलकम् ॥
अदृष्टपूर्वं तं दृष्ट्वा श्रीखण्डोल्लिखितालकम्।
कुङ्कुमालेपिनं चैते भोजोयमिति मेनिरे ॥ ३१६६ ॥
अतिवाह्य निशां राजवदनं तं विमोहयन्।
प्रातश्च तरसामत्र्य स तथा संमुखो ह्यभूत् ॥ ३१६७ ॥
प्रविष्टयुग्यं तोयान्तः पाराद्धावितवाजिनः।
धन्यादयस्तमभ्येत्य मुदिताः पर्यवारयन् ॥ ३१६८ ॥
उदभूत्तुमुलः शब्दस्ततः कटकयोर्द्वयोः।
एकत्राक्रान्तिमुखरः परत्रानन्दनिर्भरः ॥ ३१६९ ॥
नादमाकर्ण्य संग्रामबुद्ध्या दिग्भ्यः प्रधावितैः।
तं परैर्मिलितं वीक्ष्य मूर्ध्न्यताड्यत डामरैः ॥ ३१७० ॥
तस्याभिनन्दनालापप्रमुखा प्रक्रियाभवत्।
अदैन्यशुद्धधन्यादिष्वनुज्झितनिजक्रमा ॥ ३१७१ ॥

---

१ अदैन्यशुद्धा इति स्यात्।

प्लवमानं मनोहर्षं वेगात्संस्तम्भ्य सर्वतः ।
अथेत्थं स्तुवता तत्तत्स धन्येनाभ्यधीयत ॥ ३१७२ ॥
राजपुत्र पवित्रेयं पृथिवी स्थैर्यशालिना ।
त्वया धाम्ना सुमनसां मेरुणा वा महीभृता ॥ ३१७३ ॥
गर्वाञ्चयति सर्वासां निर्विकारतया वसन् ।
विक्रियोपहतं गौस्ते क्षीरं तं क्षीरवारिधेः ॥ ३१७४ ॥
कस्य पुंस्कोकिलस्येव त्वां विनाधममध्यतः ।
निर्गत्य निजकुल्यानां सिद्धं मध्यावगाहनम् ॥ ३१७५ ॥
सदाचारस्य भवता प्रथमं प्रहते पथि ।
न तच्चित्रं संचरामश्चरमं चेत्ततोधिकम् ॥ ३१७६ ॥
इत्यादि प्रसृतालापदत्तोल्लापोधिरोह्य सः ।
जयोत्तरङ्गं तुरगं स्तुवद्भिस्तैरनीयत ॥ ३१७७ ॥
लवन्याः कतिचित्क्रोधाद्धिक्रोशन्तस्तदा ययुः ।
स्वकुल्यैर्नीयमानं तं काका इव पिकान्तिकम् ॥ ३१७८ ॥
स एवमेकविंशेब्दे ज्येष्ठस्य दशमेहनि ।
त्रयस्त्रिंशद्धर्षदेश्यः समगृह्यत भूभुजा ॥ ३१७९ ॥
राज्ञी कृतप्रणामं तं प्रियं पुत्रमिवागतम् ।
अभ्यनन्दच्छ्रान्तभृत्यमस्याहारमकल्पयत् ॥ ३१८० ॥
इन्दुवंशाविसंवादिगुणग्राममवेक्ष्य तम् ।
प्रागदृष्टवती मेने वञ्चिते सा विलोचने ॥ ३१८१ ॥
गुणैरशाठ्यदाक्षिण्यमाधुर्याद्यैरकृत्रिमैः ।
तस्याविशदशीलं स क्षमापतिरमन्यत ॥ ३१८२ ॥
मुखरागं[1] मनोवृत्तेर्द्वारौज्ज्वल्यं गृहश्रियः ।
भर्तुस्वभावस्याचारो योषितामनुमापकः ॥ ३१८३ ॥

---

१ मुखरागो इति स्यात् ।

दिनक्षयव्यञ्जिताध्वक्रमं प्रस्थातुमुत्सुकम् ।
राज्ञोभ्यर्णं विशेत्येनं दाक्षिण्यात्कोपि नाब्रवीत् ॥ ३१८४ ॥
कथंचिद्रुद्धमाध्यस्थ्यवैमत्यैः सचिवैरथ ।
स त्वादिक्षुर्नरपतिरशान्तेभ्योभ्यधीयत ॥ ३१८५ ॥
राज्ञोभ्यर्णं विशेत्युक्तेरुपोद्घातोपमं वचः ।
तत्तस्य श्रोत्रशष्कुल्यां तदा शङ्कुक्रियां व्यधात् ॥ ३१८६ ॥
चिरात्ताडितमर्मेव समाश्वास्यैक्षताथ सः ।
मध्यस्थानां स्थितं स्थैर्यं दाक्षिण्यादोष्ठयोः परम् ॥३१८७॥
प्राणान्मुमुक्षोस्तेरूक्षभाषणास्तस्य सान्त्वनैः ।
मन्दत्वं विक्रियां निन्युर्विनयानतमौलयः ॥ ३१८८ ॥
आचारं चैनमस्निग्धमपि न्याय्यं वचस्विनम् ।
न कोपि प्रतिवाक्येन शक्यं जेतुममन्यत ॥ ३१८९ ॥
अथ स्वान्तस्थितस्वामिवैवश्यं दर्शयन्निव ।
दशनांशुवनैर्धन्यो वीरः स्निग्धमभाषत ॥ ३१९० ॥
पद्धती राजधर्माणां सदाचारे स्थिं[1]तां च ते ।
जानतोपि कथं मोहः क्रमायातेषु वस्तुषु ॥ ३१९१ ॥
किं संधिः सोभिधीयेत यत्र संधेयदर्शनम् ।
अकृत्वा गम्यत इति प्राङ्नो कथमजीगणः ॥ ३१९२ ॥
अनद्यतनभूभर्तृसु[2]लभे भूभुजां तव ।
ज्ञात्वा सत्त्वोज्ज्वलं ज्ञातिधर्मजातप्रवर्तनम् ॥ ३१९३ ॥
नास्य दम्भस्मयस्तम्भः प्रीतिस्थैर्यखलोक्तयः ।
आदरादर्शवैषद्ये निःश्वासस्यापि काः श्रियः ॥ ३१९४ ॥
अस्योपजीवनाद्या श्रीः साम्राज्यासादनान्न सं[3]ः ।
प्रकाशो बिम्बितो योर्काद्दीपात्स्याज्ज्वलतः स किम् ॥३१९५

१ स्थितिं इति स्यात् । २ सुलभं इति स्यात् । ३ सा इत्युचितम् ।

निर्वाणगोष्ठीनिष्ठत्वं शमिनामाश्रयेषु यत् ।
तत्पर्षद्यस्य राजर्षेर्जनान्वृन्दानुबन्धिनः ॥ ३१९६ ॥
एवं स्वगृहसंप्राप्यप्रायोनिःश्रेयसस्य ते ।
स्थानैः श्रियः समाप्याथ किं स्यादन्यैर्महीधरैः ॥ ३१९७ ॥
मुग्धा न केचन परे गणिताः फणिभ्यः
कालानुकूलनिजकुण्डजलत्यजो ये ।
श्लिष्यन्ति चन्दनतरूञ्शिशिरान्निदाघे
माघेप्यशीतमनवं विवरं विशन्ति ॥ ३१९८ ॥
प्राणोपकरणं राज्ञो राज्ञी राजात्मजाश्च ये ।
तद्धिते यदनौचित्यं तेषामौचित्यमेव तत् ॥ ३१९९ ॥
त्यक्तोष्मवैकृतं पाथ इव क्वथितशीतलम् ।
अनुतापेन ते कृत्यं भूयो वैरस्यमेष्यति ॥ ३२०० ॥
तथा समर्थासामर्थ्यान्न प्रत्याख्याय भारतीम् ।
कुण्ठशाब्यलवस्तस्थौ प्रस्थानार्थं स मन्थरः ॥ ३२०१ ॥
पथि संग्रथितस्तोत्रान्वास्तव्यान्वीक्ष्य सर्वतः ।
अजायताथ संरूढकृत्यसाधुत्वदार्ढ्यधीः ॥ ३२०२ ॥
पदातिचरणक्षुण्णरेणुव्याजाद्दश्यत ।
वसुंधरातलं बद्धसंधीव नभसा समम् ॥ ३२०३ ॥
दध्यौ विज्ञतरो भोजः कच्चित्संप्राप्नुयां नृपम् ।
कंचिदमुष्य विघ्येत दर्शनं विप्रलम्भकैः ॥ ३२०४ ॥
आराधयन्प्रभुं धाम्नि नान्तरान्तरितो विटैः ।
स्वामिनां क इवाप्नोति गुणाविष्करणक्षणम् ॥ ३२०५ ॥
शीतोपचारकरणाद्दयितो भवेय-
मौर्वार्दितस्य जलधेः प्रसृतं धियेति ।

---

१ कंचिन्नामुष्य इति स्यात् ।

स्रोतो हिमाद्रिपयसो विनिपात एव
ग्रासीकृतं तिमिभिराहृतमेव तत्स्यात् ॥ ३२०६ ॥
इत्यादिचिन्तास्तैमित्यात्पुरक्षोभाद्यलक्षयन् ।
सैन्यस्य रुद्धाश्वतयाबुद्धासन्नं नृपास्पदम् ॥ ३२०७ ॥
नातिप्रांशुं नातिकृशं सूर्यांशुश्यामलाननम् ।
सरोजकर्णिकागौरं शिथिलश्लथविग्रहम् ॥ ३२०८ ॥
ककुद्मत्ककुदोत्सेधिस्कन्धमायतवक्षसम् ।
श्मश्रुणानतिदीर्घेण व्यक्तगण्डगलोन्नतिम् ॥ ३२०९ ॥
उन्नसं पक्वबिम्बोष्ठं विस्तीर्णानुल्बणालिकम् ।
तिर्यग्विप्रेक्ष·····धीरमन्थरगामिनम् ॥ ३२१० ॥
समाहितांशुकोष्णीषमौलिं श्रीखण्डवक्षसम् ।
सीमन्तस्थानचुम्बिन्या रेखया चन्द्रगौरया ॥ ३२११ ॥
अश्वावरूढं हर्म्यस्थसचिवैः[1] परिवारितम् ।
अनङ्गतुल्यमायान्तं तमवैक्षत पार्थिवम्[2] ॥ ३२१२ ॥
कुलकम् ॥
प्रीतिविस्फारितदृशा राज्ञा पृष्टस्ततः सभाम् ।
सोध्यारुरोह संबाधां कौतुकोत्कंधरैर्जनैः ॥ ३२१३ ॥
स्पृष्ट्वा पादौ निषण्णोग्रे नृपस्यानीय पाणिना ।
खड्गधेनुं पाणिबद्धामासनाग्रे समार्पयत् ॥ ३२१४ ॥
पाणिं सफणिवल्लीकं विवृताग्राङ्गुलिद्वयम् ।
ततोस्य चिबुकोपान्ते विन्यस्यन्पार्थिवोब्रवीत् ॥ ३२१५ ॥
न विगृह्य गृहीतोसि नाधुनापि न[3] बध्यसे ।
तदङ्ग कस्माद्गृह्णीमः शस्त्रमेतत्त्वयार्पितम् ॥ ३२१६ ॥

---

१ हर्म्यस्थः इति स्यात् । २ पार्थिवः इति स्यात् । ३ निबध्यसे इति स्यात् ।

व्यजिज्ञपत्स भूपालं देव शस्त्रस्य धारणम् ।
स्वामिसंरक्षणं स्वस्य परित्राणस्य कारणम् ॥ ३२१७ ॥
देवे निजप्रतापाग्निगुप्तसप्तसरित्पतौ ।
सेवावकाशो विरलः स्वशस्त्रस्यापि दृश्यते ॥ ३२१८ ॥
लोकान्तरेपि शरणं चरणाश्रयणं प्रभोः ।
तत्रात्र लोके किं कार्यं त्राणोपकरणैः परैः ॥ ३२१९ ॥
राजा जगाद तं सत्त्वस्पर्धाबन्धेधुना भवान् ।
निर्व्यूढकृत्यो वादीव कृत्यं नो वर्तते परम् ॥ ३२२० ॥
भोजो बभाषे दाक्षिण्यजननायाधुना प्रभोः ।
सृष्टादृते[1] मया किंचिन्नोपचारार्थमुच्यते ॥ ३२२१ ॥
किं ते न चिन्तितं दुष्टं किं किं न कृतमप्रियम् ।
यदसिद्धं न तद्यक्तिमगादित्यवधार्यताम् ॥ ३२२२ ॥
किं न मल्लान्वये कश्चित्कारणेषूदितो भवान् ।
विद्मः स्माननुकूलं प्राग्यं वयं चर्मचक्षुषः ॥ ३२२३ ॥
यदा यदा देव वाञ्छामकार्ष्म भवदप्रिये ।
भूमिस्तदा तदा भूता पात्रं कम्पस्य भूयसः ॥ ३२२४ ॥
यावत्कवीनां निर्भाति प्रतिभानेन भास्वरः ।
देवाभवन्नः प्रत्यक्षः प्रतापस्तादृशस्तव ॥ ३२२५ ॥
न शेखरे न प्रदरे न दरेष्युज्झितो मया ।
प्रालेये[2] भूभृतः कुञ्जे संज्वरस्त्वत्प्रतापजः ॥ ३२२६ ॥
ततः प्रभृत्यवनतिप्रणयः शरणैषिणः ।
सिद्धः संध्यायि वन्ध्यत्वाद्देव दूरस्थितेन मे ॥ ३२२७ ॥
अथाभेदाभिलाषेण पापाद्यत्किल चेष्टितम् ।
स्फुरत्तामात्रकव्यक्त्यै न तु तद्विग्रहाग्रहात् ॥ ३२२८ ॥

---

१ दृष्टादृते इति स्यात् । २ प्रालेयभूभृतः इति स्यात् ।

त्वत्संबन्धादिमे दिक्षु प्रतीक्ष्याः क्ष्माभुजां वयम् ।
सङ्गाद्रङ्गाम्भसः काचकुम्भसंभावना भुवि ॥ ३२२९ ॥
अद्यापि द्योतते शाहेवाह्वयेन दिगन्तरे ।
तत्संतानभवोनन्तः समूहः क्षत्रजन्मनाम् ॥ ३२३० ॥
त्वय्यर्पिते पार्वतीयभूभृत्सङ्गेन्यदादिनः ।
कदन्नाशनदुर्भोगासुस्थैः खेदोन्मुखैरभूत् ॥ ३२३१ ॥
इतीदृशीभिः स्तुतिभिः प्रमाणमथवा प्रभुः ।
इत्युक्त्वा भूपतेर्मूर्ध्ना सोगृह्णाच्चरणौ पुनः ॥ ३२३२ ॥
प्रणामसंभ्रमस्रस्तोष्णीषशीर्षं ततो नृपः ।
तस्योत्थितस्य स्वशिरोवाससा समवस्रयत् ॥ ३२३३ ॥
स्वां तां च शर्ङ्गीं तन्न्यस्तामुत्सङ्गे सान्त्वयन्व्यधात् ।
तस्यासंक्षोभगाम्भीर्यस्तमूचे च निषेधिनम् ॥ ३२३४ ॥
दत्तं[1] मया बिभृहि वा त्वमेते पूजयाथ वा ।
न शस्त्रग्रहवैमुख्यं कार्यं मच्छासनं त्वया ॥ ३२३५ ॥
अवन्ध्यशासनो मानीत्यनुबध्नाति ते व्यधात् ।
शस्त्रौ[2] राजानुगत्यैव वन्दित्वा कामकालवित् ॥ ३२३६ ॥
ततो निर्यन्त्रणत्वस्य नर्मणः सान्त्वनस्य च ।
चिरसेवीव तत्कालं राज्ञो जायत भाजनम् ॥ ३२३७ ॥
अन्यत्प्रविष्टो धन्योथ स्वार्वामकथयत्कृती ।
कृतप्रणामो भूपाल त्वद्गुणाकर्णनं विना ॥ ३२३८ ॥
न प्राणा द्रविणं नाद्य गण्यं निर्विक्रिया पुनः ।
सत्क्रिया स्वामिनोप्यर्थे तस्मात्पार्थिव चिन्त्यताम्॥३२३९॥
तथापि कथ्यमानं तन्न स्यात्संभावनाभुवि ।
यदास्मिञ्श्चिन्त्यतेस्माभिरिति भूपोप्यभाषत ॥ ३२४० ॥

---

१ दत्ते इति स्यात् । २ शस्त्र्यौ इति स्यात् ।

क्षणमुच्चावचां चर्चां विरचय्य विशांपतिः ।
भोजेन सार्धं शुद्धान्तं रङ्गादेव्यास्ततो ययौ ॥ ३२४१ ॥
कृतप्रणामस्तां वीक्ष्य सौजन्यादिगुणोज्ज्वलाम् ।
स राजपारिजातं तं मेने कल्पलतायुतम् ॥ ३२४२ ॥
मान्योयं देवि सौजन्यज्ञातेयाभ्यामिहागतः ।
विशिष्यतेसौ पुत्रेषु क्ष्माभृद्योषेत्यभाषत ॥ ३२४३ ॥
सभाजनाय सौजन्यनिधिर्भोजान्वितस्ततः ।
उदूढकार्यभाराणां दाराणामप्यगाद्गृहान् ॥ ३२४४ ॥
अभाणीन्निपुणा राज्ञी भोजं राज्ञा सहागतम् ।
अधुनैव नृपस्याप्तः संवृत्तोसीति सस्मितम् ॥ ३२४५ ॥
लज्जास्मितमुखी पत्युः प्रणत्या स्वागतोक्तिषु ।
ददत्येवोत्तरं भोजं निर्दिशन्त्यप्यभाषत ॥ ३२४६ ॥
आर्यपुत्र न विस्मार्यं प्रत्याख्याताप्तमन्त्रितम् ।
मानैकशरणस्यास्य ज्ञातिप्रीतिप्रवर्तनम् ॥ ३२४७ ॥
पूर्वोपकर्तृ सलिलं वृद्धावस्पृशतोन्वहम् ।
पद्मान्सुकुलपद्मानां युक्तं जेतुं भवादृशाम् ॥ ३२४८ ॥
कार्यकृच्छ्रेवसन्नानाममुष्यागमनं विना ।
सिध्येदौन्नत्यसंरक्षा नेह प्रत्यागमश्च नः ॥ ३२४९ ॥
उदीपे रक्षतस्तीरं शरीराश्रयिणी भवेत् ।
ध्रुवं वनस्पतेर्वीरुत्तन्निपातानुपातिनी ॥ ३२५० ॥
पतिगत्यनुगामित्वं प्राणानां परिचिन्तितम् ।
तथा कार्यं यथा न स्यात्रातव्यस्यान्यथात्मनः ॥ ३२५१ ॥
राजा जगाद तां देवि सर्वकर्तव्यसाक्षिणी ।
अन्यथा प्रतिपत्तिं मे त्वमप्यस्य न मन्यसे ॥ ३२५२ ॥

निगृहीतवतो दुष्टौ सुज्जिमल्लार्जुनावपि ।
निस्तापं मम नाद्यापि प्राप्तानुशयमाशयम् ॥ ३२५३ ॥
अथ राज्ञार्थितः स्थातुं पराध्यें धाम्नि सानुगः ।
भोजो नामन्यतान्यत्र राजधान्यां स्थिरां स्थितिम् ॥३२५४
विदूराश्रयनिर्गोप्तृभावाप्रचुरदर्शनैः ।
आराधनं धराभर्तुरसाध्यं ध्यातवान्हि सः ॥ ३२५५ ॥
रक्षितृनग्रहीत्क्ष्मापान्स्थिरं च समकल्पयत् ।
अनयातां नृपं कार्यान सुराराधनागमे ॥ ३२५६ ॥
विज्ञाय भावं प्रीतेन राज्ञा दत्तं ततो गृहम् ।
सर्वोपकरणापूर्णं राजधान्यन्तरेभजत् ॥ ३२५७ ॥
राजापि ममतास्फीतप्रीतिभिः स्वैः परैस्तथा ।
उपासितस्तत्र रतिं चिराश्रित इवाययौ ॥ ३२५८ ॥
भोगवेलोचिताश्चर्यदर्शनादौ नृपोपि तम् ।
प्रियं पुत्रमिवास्मार्षीद्दूतैः पार्श्वं निनाय च ॥ ३२५९ ॥
जग्राह दक्षिणे पार्श्वे भुञ्जानं ज्ञातिगौरवात् ।
स्पर्शास्वादितभोज्यादिदानेनैव व्यसर्जयत् ॥ ३२६० ॥
अकृत्रिमं तथा स्नेहमुवाह जनको यथा ।
लडितं ज्ञातिवत्तस्मिंस्तद्बालापत्यकैः समम् ॥ ३२६१ ॥
तमेवालम्बत व्यक्तिं सोपि वृत्तिं यथा यथा ।
राजा सपरिबर्होपि विस्रम्भमविगर्हितम् ॥ ३२६२ ॥
आसन्नाभ्यन्तराभिन्ना ये द्वैधे तानदर्शयत् ।
राज्ञां विरक्तिं स्वस्यारिबाहुल्यं च व्यसर्जयत् ॥ ३२६३ ॥
अकृत्रिमात्समाधानात्कारणानां सभान्तरे ।
न प्रत्यभाज्जडो नापि धृष्टो नापि बकव्रतः ॥ ३२६४ ॥

प्रमादस्खलिते हीनातिरिक्तत्वे च भूपतेः ।
कार्ये नावदधे क्षुद्रः कवितेव महाकवेः ॥ ३२६५ ॥
न विक्रमकथासत्रदानाद्यैः स्वं व्यकत्थत ।
प्राग्वृत्तमन्तरा पृष्टः सोपस्कारं च नाभ्यधात् ॥ ३२६६ ॥
विचारकात्प्रभोः साम्यसकुल्यत्वादिचाटुभिः ।
धीराधृष्टैर्दृष्टिपातैरपुनर्भाषिणो व्यधात् ॥ ३२६७ ॥
तथा स्पृष्टोप्यनुत्तानाशयोभूदवगाहितुम् ।
न शेकुस्तं यथा जाल्मनर्मावित्पिशुनादयः ॥ ३२६८ ॥
क्षणेष्ववसितालोकक्षोभादिविशरारुषु ।
प्रायेणावसथं गच्छञ्छङ्कां कामपि नातनोत् ॥ ३२६९ ॥
यथा यथास्य विस्रम्भाद्भूपोभूच्छिथिलाग्रहः ।
तथा तथैव सिद्धोश्व इव नाधावदुद्धतम् ॥ ३२७० ॥
सदैवाग्रेसरोन्यत्र पश्चाद्वुद्धपदोभवत् ।
अनिषिद्धोपि शुद्धान्तमत्रागारावगाहने ॥ ३२७१ ॥
विज्ञप्यौपयिकावाप्तिप्रार्थन···दरत्स्वयम् ।
दूरीचक्रे परापेक्षां शश्वत्संशयिताशयः ॥ ३२७२ ॥
अनाप्तसमये तस्य न ययुः पथि रक्षिणः ।
न स्वप्नवृत्तमप्यासीदनावेद्यं महीभुजे ॥ ३२७३ ॥
मन्त्र्यन्तःपुरिकादीनां परस्परविगर्हणम् ।
नावर्णयद्विस्मृतिं च दुष्टस्वप्नमिवानयत् ॥ ३२७४ ॥
सचेतनोपि दुर्नर्मगोष्ठीष्वनुरणन्वचः ।
अवदत्स्फुरदप्यन्तर्विटानां नाम लाघवम् ॥ ३२७५ ॥
एवं शुद्धानुभावस्य तस्य कृत्येन कृत्यवित् ।
पुत्रेभ्योप्यधिकां प्रीतिं स्निह्यन्भेजे क्रमान्नृपः ॥ ३२७६ ॥

कलिकालमहीपालदुस्तरः सिंहभूभुजा ।
सोयं गोत्रपरित्राणे नवः सेतुः प्रवर्तितः ॥ ३२७७ ॥
इत्थं विद्रावितशेषोपद्रवस्त्रिल्लकस्ततः ।
अग्निप्रोषमपि स्वास्थ्यहेतुं भूभृदचिन्तयत् ॥ ३२७८ ॥
असौ हि निर्हिमोर्वीभृन्मार्गे काले पलायनम् ।
शाठ्यं सत्त्वस्य दुःसाध्यं बद्धं ध्यायन्व्यलम्बत ॥ ३२७९ ॥
अतः सुमेधा यात्रायां यावत्क्षणमपैक्षत ।
सज्जपालेनाविचारात्तावत्प्रारम्भि धावनम् ॥ ३२८० ॥
अल्पाधिष्ठानसुभटः स देवसरसोद्भवैः ।
बहुभिः सहितः सैन्यैर्मार्ताण्डे विदधे पदम् ॥ ३२८१ ॥
निर्निरोधप्रवेशः स प्रदेशः परिपन्थिनाम् ।
बाह्याश्च योधा निःसारा दर्पान्नेति विवेद सः ॥ ३२८२ ॥
त्रिल्लकानुचरा युद्धमसंनिहितसायकाः ।
तेन सार्धं विदधिरे न चाहीयन्त पौरुषम् ॥ ३२८३ ॥
निःसीमसैन्यसहितो लवन्योन्यत्र डामरे ।
तत्र सर्वाभिसारेण धावतो युयुधे क्रुधा ॥ ३२८४ ॥
लुण्ठितद्रविणापूर्णास्ते देवसरसौकसः ।
सर्वे ततः सज्जपालं विद्रुताः परिजह्रिरे ॥ ३२८५ ॥
द्विषत्संवर्तवर्षाद्याः सर्वत्र ब्रुडितेभवन् ।
अधिष्ठाने भटा एव कुलशैला इवोद्धताः ॥ ३२८६ ॥
ते तीक्ष्णतीक्ष्णतरणौ सोढारातिरुषश्चिरम् ।
बह्वन्निहतवन्तोन्यांस्तत्र तत्राहवे हताः ॥ ३२८७ ॥
क्षतेषु युधि सर्वेषु भिन्दानैर्मण्डलं निजैः ।
शूरेषु तत्र मार्ताण्डोप्यासीदविरलव्रणः ॥ ३२८८ ॥

रराजाजौ साज्जपालिर्गयपालो हतेषु यः ।
त्रिषु वाजिषु चातुर्यात्पदातिर्नोपलक्षितः ॥ ३२८९ ॥
तत्प्राथम्योपलब्धाजिर्जर्जस्तदनुजः शिशुः ।
निनाय विस्मयं वीरान्दृष्टासंख्यमहाहवान् ॥ ३२९० ॥
दक्षिणं दोर्न तच्चक्रे यद्धामं कम्पनापतेः ।
महेभांस्तापयत्यर्कः कुर्याद्धन्नरदान्विधुः ॥ ३२९१ ॥
स धावन्वाजिना राजदेकदोःस्फुरितायुधः ।
सधूमदण्डो दावाग्निः सपक्षेद्राविव स्थितः ॥ ३२९२ ॥
तं वैरितुमुले बाणव्रणभङ्गेष्वसौ पुनः ।
पृष्ठादलोठयद्वाजी तदन्वाबद्धपद्धतिः ॥ ३२९३ ॥
वर्मगौरवभूपृष्ठकाठिन्याघातपीडितः ।
स विसंज्ञो द्विषन्मध्यात्तनयाभ्यां विनिर्हृतः ॥ ३२९४ ॥
कटके सर्वतो नष्टे मार्तण्डप्राङ्गनान्तरे ।
विरोध्यसाक्षि क्षिप्त्वा तं तावपासरतां ततः ॥ ३२९५ ॥
तत्रस्थं·····नाक्ष्माभृत्प्रस्थितः पृथुलैर्बलैः ।
तावद्भिः प्राप्यमप्याशु डामरं पिण्डितं व्यधात् ॥३२९६॥
क्ष्मापाले विजयक्षेत्रं प्राप्ते त्रोटितवेश्मनः ।
सज्जपालो लवन्यस्य वसतीर्निरदाहयत् ॥ ३२९७ ॥
स तादृगपि भूपाले क्रुद्धे वक्रीकृतभ्रुवि ।
अदरिद्रो गिरिद्रोणीश्रेणिभूसुलभाशनः ॥ ३२९८ ॥
संवृत्तो निःसहायश्च परिग्रहबहिष्कृतः ।
आपत्सुलभपाण्डित्यभृत्योपालम्भभाजनम् ॥ ३२९९ ॥
निकृत्तकरशाखोथ क्ष्मापकोपकपेर्व्यधात् ।
निरालम्भतया तस्य स स्वशीर्षफलार्थनाम् ॥ ३३०० ॥

रङ्गादेवीतनूजानां ज्यायांसं गुल्हणाभिधम्।
श्रीमांल्लोहरराज्येथ क्ष्मावृषा सोभ्यषेचयत् ॥ ३३०१ ॥
षट्सप्तहायनो राजतनयः स वयोधिकान्।
चूताङ्कुरो जीर्णतरूनिवेशानजयद्गुणैः ॥ ३३०२ ॥
अभिषेक्तुं सुतं देव्या यातायाः क्ष्माभुजो व्यधुः।
शिरःशोणाश्मकिरणैश्चरणौ यावकारुणौ ॥ ३३०३ ॥
तत्राभिषिक्ते वसुधामुग्रावग्रहशोषिताम्।
देवीभावाभिषेकार्थमिवासिञ्चन्पयोमुचः ॥ ३३०४ ॥
भूयोपि राजवदनो विप्लवोत्पादनोत्सुकः।
अमन्दमवचस्कन्द जयचन्द्रं नृपाज्ञया ॥ ३३०५ ॥
नागभ्रातृव्यसहिता गार्गैरनुप्रवेशिनः।
पश्चात्प्रसर्पिणीः सेनाः सोवधीत्संकटेध्वनि ॥ ३३०६ ॥
गार्गिः परिभवम्लाननस्तिष्ठन्दिनैस्ततः।
नागभ्रातृसुताग्रस्थमबध्नाल्लोष्टकं मृधे ॥ ३३०७ ॥
दुर्गमत्वादनाक्रान्तमन्यैर्वैगात्प्रविश्य च।
दग्ध्वा स दिन्नाग्रामं तु निरगाल्लघुविक्रमः ॥ ३३०८ ॥
तथापि राजवदनो न शौर्यात्पर्यहीयत।
न संदधे न चुक्रोध शक्यमस्य विनिर्गमम् ॥ ३३०९ ॥
अहन्यहनि हीनाभिः सेनाभिर्न्यपतन्नृपे।
जयचन्द्रमुखाच्छश्वदसुखान्यवधीभवत् ॥ ३३१० ॥
क्ष्मानायकोथ निःसीमनखबाहुप्रसारणः।
रणान्तरेव तं तीक्ष्णैर्गूढं न्यस्तैरघातयत् ॥ ३३११ ॥
तन्मुण्डगण्डलेखेन लुठता खण्डशः कृतः।
झटिति त्रुटितः स्वास्थ्यमिवास्य स्फुरणोन्मुखः ॥ ३३१२ ॥

पृथ्वीहरकुलच्छेदस्वच्छद्मा मेदिनीपतिः ।
अवधील्लोठनमपि च्छन्नदण्डप्रयुक्तिभिः ॥ ३३१३ ॥
एकवारं वेष्टितोपि रक्षितस्त्रिल्लकेन सः ।
भूमिभृन्नीतिपाशस्य निपातेनाभिवर्तिना ॥ ३३१४ ॥
मल्लकोष्टक्षरजय्यमङ्गुचन्द्रादयोभवन् ।
जीवन्मृताश्च शान्ताश्च दारिद्रोपप्लवार्दिताः ॥ ३३१५ ॥
अविचिन्त्योच्चलक्ष्मोणिभृतः प्राणान्विनश्वरान् ।
ऐश्वर्यरूढिमूढत्वादनिर्व्यूढव्यवस्थितौ ॥ ३३१६ ॥
मठेनुमितकोशत्वं तत्तद्राजाश्रयाद्गते ।
कुलोद्वहो विहितवान्सिंहदेवो व्यवस्थितिम् ॥ ३३१७ ॥

युग्मम् ॥

सुल्लाविहारं पैतृव्यं पितुर्देवगृहत्रयम् ।
तच्चार्धसिद्धं प्रासादं परिपूर्णं व्यधान्नृपः ॥ ३३१८ ॥
स एव ग्रामसामग्रीमहापणसमर्पणैः ।
निर्दोषपारिषद्यादिद्वद्यान्निश्चोद्यधीर्व्यधात् ॥ ३३१९ ॥
अवरोधेन्दुवदनां मृतामुद्दिश्य चन्दलाम् ।
प्रत्यष्ठापि मठोनूनश्रीर्द्वारेवारितातिथिः ॥ ३३२० ॥
पुष्टो नगरनिर्मोहः सोपि सूर्यमतीमठः ।
पूर्वाधिकोपगर्वेण तेनैव निरमीयत ॥ ३३२१ ॥
संजाते सज्जपालस्य ततो लोकान्तराश्रये ।
कम्पने निदधे राज्ञा गयपालस्तदात्मजः ॥ ३३२२ ॥
विपाकसुकुमारोपि दुःसहः सूनुनाभवत् ।
विस्मारितः स सौम्येन शरद्भानुरिवेन्दुना ॥ ३३२३ ॥

ग्रीष्मोष्मदोषविषमेष्वविशेषवृत्ते-
र्मेघोदये तटतरोस्तटिनीप्रवाहः ।
पश्यन्नकाण्डतडिदापतनेन नाशं
नाशंसति स्वसलिलस्य विभूतिलाभम् ॥ ३३२४ ॥
आ भिक्षुक्षपणाद्भोजसञ्जनादपि भूभुजः ।
विधुरे कार्यभाराणां योभूद्दूढधुरः परम् ॥ ३३२५ ॥
तस्य तस्मिन्नृपरते क्षीणप्रक्षीणकण्टके ।
स धन्यो नान्यसामान्यप्रेमा प्रमयमाययौ ॥ ३३२६ ॥
ताम्बूलमायात्रिकतां नीत्वा सूनामयानिव ।
आर्पिपन्मधुरावट्टं जीवं यस्य निजः सुतः ॥ ३३२७ ॥
स जगज्जीवितेनापि रक्षणीयः क्षमापतिः ।
पदे पदे विपन्मग्नो प्रजोद्धरणधीरधीः ॥ ३३२८ ॥
व्याधितस्य विनिद्रोपि संसङ्गान्मङ्गलेच्छुभिः ।
नान्तक्षणे तस्य पार्श्वात्कृतशोवाचलन्नृपः ॥ ३३२९ ॥
प्रियप्रजस्यामात्यस्य स्वरूपविपरीतता ।
तस्य कंचित्क्षणं जाता जनजीवितदा भवेत् ॥ ३३३० ॥
भूभुजामपि मांधातृमुखानां निधने न याः ।
दुःखं ययुः प्रजास्तासां समभावि तदा सुखम् ॥ ३३३१ ॥
द्वैराज्योपप्लुते राष्ट्रे नवस्य नृपतेरभूत् ।
अप्याहृतं यत्साचिव्यं तस्य सर्वाभिषङ्गभित् ॥ ३३३२ ॥
कालो बली व्यवहृतेर्ननु तद्वशेन
पूर्वापराचरणविस्मरणेन कस्य ।
शक्तिः क्षितेर्वहनकर्मणि योग्यतायां
निर्दारणे मुरजितस्तु वराहतायाम् ॥ ३३३३ ॥

नगराधिकृतो भूत्वा सुज्ञौ निर्वापिते पुरा ।
चिरप्ररूढां यो देशस्याव्यवस्थां न्यवारयत् ॥ ३३३४ ॥

भ्रष्टः क्रयेषु दीन्नारव्यवहारो व्यवस्थया ।
निगृह्य तं भ्रंशकार्यनिर्वितण्डः प्रवर्तते ॥ ३३३५ ॥

परिणीताङ्गनाशीलभ्रंशे गृहपतेरभूत् ।
दण्डप्रवृत्तिर्या तेन सा विचार्य निवारिता ॥ ३३३६ ॥

एकान्ततो हितो भूत्वा विशामेवं पुनर्व्यधात् ।
नगराधिक्रियां लब्ध्वा स एव परिपीडयन् ॥ ३३३७ ॥

बद्धाभिर्नर्तकीभिश्च परिणीतगृहस्थितौ ।
संप्रयुक्तान्कथ्यमानान्हठेनादण्डयद्बहून् ॥ ३३३८ ॥

किं वो भवेद्बलेशानां तुषाणामिव चिन्तनैः ।
अद्रोहालोभयोर्भूमिर्न तादृगपरोभवत् ॥ ३३३९ ॥

भिक्षुमल्लार्जुनौ कालानुवृत्त्या श्रितवानपि ।
नासौ जहौ स्वामिहितं नतौ तावपि नावधीत् ॥ ३३४० ॥

अक्षीणत्यागहीनस्य विभूतिसमयेप्यभूत् ।
संस्कारौपयिकं नास्य पर्याप्तं निधने धनम् ॥ ३३४१ ॥

कृतज्ञतायां राज्ञोन्यत्पर्याप्तं किमुदीर्यताम् ।
यो जीवित इवानीतान्संविभेजेनुजीविनः ॥ ३३४२ ॥

लोकान्तरातिथिं विज्ञाभिधामुद्दिश्य वल्लभाम् ।
धन्यस्य विज्ञनामाख्यविहारारम्भकारिणः ॥ ३३४३ ॥

परलोकं प्रयातस्य निर्वाणप्रतिपूरणम् ।
स्थितं व्यवस्थितेः कं च विनियोगं चकार सः ॥ ३३४४ ॥

युग्मम् ॥

भूभृद्धार्मिकतावाससुकृतोत्सेकवासवैः[1]।
युद्धैकवृत्तिभिरपि प्रवृत्ते पुण्यकर्मणि ॥ ३३४५ ॥
विपक्षाणां सुभिक्षेण तुरुष्कविषयाश्रयात्।
जन्मभूमेर्वृत्तये यैः क्रौर्यादन्यन्न शिक्षितम् ॥ ३३४६ ॥
येपि वृत्तिं विरोध्याजिव्यग्रे सुस्सलभूभुजि।
कलहावसरेष्वेव कश्मीरेषु प्रपेदिरे ॥ ३३४७ ॥
गोत्रे तेषां क्षत्रियाणां जातः कमलियानुजः।
राजवीजी सङ्गियाख्यः प्रतिष्ठां स्वाख्ययाकरोत् ॥ ३३४८ ॥
वितस्तापुलिने बाणलिङ्गे तेन निवेशिते।
जायते स्वर्धुनीरोधःसंप्ररूढ[2]विमुक्तधीः ॥ ३३४९ ॥
तदीयं च मठं चैव तपोधनविभूषितम्।
दृष्ट्वा निवर्तते रुद्रलोकालोकनकौतुकम् ॥ ३३५० ॥
लोठनेन्यप्रतिष्ठानामधन्यद्रविणार्पणे।
न तेनाद्यतने काले संरब्धे शुद्धबुद्धिना ॥ ३३५१ ॥
उदयस्य प्रिया चिन्ताभिधाना कम्पनापतेः।
पुलिनोर्वीं वितस्ताया विहारेण व्यभूषयत् ॥ ३३५२ ॥
प्रासादपञ्चकव्याजात्तद्विहारस्थितः करः।
उदस्त इव धर्मेण प्रोत्तुङ्गाङ्गुलिपञ्चकः ॥ ३३५३ ॥
सांधिविग्रहिको मङ्खकाख्योलंकारसोदरः।
समठस्याभवत्प्रष्ठः श्रीकण्ठस्य प्रतिष्ठया ॥ ३३५४ ॥
मठाग्रहारदेवौकोजीर्णोद्धारादिकर्मभिः।
अनुजा सुमना नाम रिल्हणस्यासदत्तुलाम् ॥ ३३५५ ॥
भूतेश्वरे मठं कृत्वा त्रिग्राम्यामप्यपातयत्।
तोयं कनकवाहिन्या वितस्तायाश्च यः पितॄन् ॥ ३३५६ ॥

---

१ वासनैः इति स्यात्। २ संप्ररूढाविमुक्तधीः इति स्यात्।

प्रदेश्यकश्यपागाराभिधाने नीलभूः सरित् ।
जिगीषयेव जाह्नव्या यत्र पूर्वां दिशं गता ॥ ३३५७ ॥
उत्तराय गवादीनां यः सेतुं तत्र बन्धयन् ।
निर्ममे निर्मलं कर्म संसारोत्तरणक्षमम् ॥ ३३५८ ॥
नगरेपि स्वनामाङ्कवृषाङ्कागारकारिणा ।
मठो येन कृतोभ्रष्टजटाधरघटाश्रयः ॥ ३३५९ ॥
मम्मेश्वरं स सौवर्णमलसारं चकार यः ।
सोमतीर्थं तथा तोयोद्यानमुद्द्योतितान्तिकम् ॥ ३३६० ॥
अत्र क्षमाभुजो वंशे वंशौन्नत्यधनादिषु ।
सासूयत्वममात्यानां धनप्राणादिहारिणः ॥ ३३६१ ॥
क्रुध्यन्नवासनाध्यासासूयया वासवोपि वा ।
प्राभ्रंशयद्दिवो देवो मांधातारं धराभुजम् ॥ ३३६२ ॥
अविप्लुतमतिर्भृत्यान्कृत्यौन्नत्यवतोन्वहम् ।
दृष्ट्वा ध्यातस्वमाहात्म्यवृद्धिस्तु प्रीयते नृपः ॥ ३३६३ ॥
कलशक्ष्मापतेः प्राज्ञोपज्ञं भृत्योस्य रिल्हणः ।
कुर्वन्स्वर्णातपत्राणां प्रतिष्ठां प्रीतिकार्यभूत् ॥ ३३६४ ॥
स्वर्णपत्रां सुरेश्वर्यां शिवयोः समवेतयोः ।
सदीपारात्रिकामत्रमैत्रीमेति सघण्टिकम् ॥ ३३६५ ॥
बन्धोर्हिमाद्रेर्दयितः सुताजामातरौ शिवौ ।
स्वर्णच्छत्रच्छलान्मेरुर्मूर्ध्न्यार्घातुमुपागतः ॥ ३३६६ ॥
उद्दिश्य यद्विरुधदुद्यममात्मयोनि-
र्दग्धो मयाङ्गघटनं दयितेन गौर्याः ।
सिद्धं तदत्र करुणामुमयेति हेम-
च्छत्रच्छलाद्धरदृशश्चलितोग्निरूर्ध्वम् ॥ ३३६७ ॥

छत्रं तत्र च रिल्हणेन विहितं रौक्मं महद्रुक्मिणी-
प्रेयोमन्दिरमूर्ध्नि नद्धमधुनादभ्रं परिभ्राजते ।
क्षैब्येण क्षतजावपानजनुषा नष्टं ततः स्वामिना
प्राप्तं चक्रमवेक्षितुं सुरुचिरं भास्वानिवाभ्यागतः ॥३३६८॥
तीर्थे मन्मथजित्खगध्वजदृढाजर्योर्जिताचार्यके
साधाराभरणं क्रियापरिणतिस्वर्णातपत्रं प्रभोः ।
भात्येकस्य शिखाहिफूत्कृतिवलद्भङ्गाङ्गरेणूपमं
केशान्तस्थितमेघपार्श्वगतडित्पिण्डाभमन्यस्य च ॥३३६९॥
सौवर्णद्रुहिणाण्डकर्परपुरे[1] संसूत्रिताच्छत्रक-
व्याकोशस्य समुद्गकप्रतिकृतौ दीर्घार्घित· ··घने ।
सङ्गेनेन्दुकिरीटकैटभरिपुश्यामासितालंक्रिया
सद्रत्नाकरयोः पिधानकरणिं स्वर्णातपत्रं गतम् ॥ ३३७० ॥
तं लोहरमहीपालमन्वजायन्त भूभुजः ।
रङ्गादेव्या गुणोदाराश्चत्वारश्चतुराः सुताः ॥ ३३७१ ॥
गुल्हणेनापरादित्यो राघवेणेव लक्ष्मणः ।
अभिन्नभावः संवृद्धिं वर्तते लोहरे श्रयन् ॥ ३३७२ ॥
ललितादित्यदेवेन जयापीडो हि दारकः ।
भरतेनेव शत्रुघ्नः पाल्यमानः प्रवर्तते[2] ॥ ३३७३ ॥
पार्थिवाहस्कराच्चारुनमस्काराद्यशस्करः ।
पञ्चमः क्षितिभृद्धर्म्यो बालातप इवोदितः ॥ ३३७४ ॥
चपलैः शैशवाच्छुद्धानुभावत्वात्ससौष्ठवैः ।
लडितैर्ललितादित्यो भित्तीरप्यार्द्रयत्यहो ॥ ३३७५ ॥
दत्तरक्षाञ्जनं ताम्राधरं गौरं तदाननम् ।
सबालातपभृङ्गाङ्कस्वर्णपङ्केरुहायते ॥ ३२७६ ॥

---

१ पुटे इत्युचितम् । २ प्रवर्धते इति स्यात् ।

आलापास्तस्य माहात्म्यगर्भा बालास्फुटा अपि ।
अमृतार्द्रा भवोच्चारा मथ्यमानस्य वारिधेः ॥ ३३७७ ॥
महाभिजनसंजातो राजसूनुः स शैशवे ।
अभिधत्तेनुभावेन भव्येनागामि जृम्भितम् ॥ ३३७८ ॥
अत्यर्थमण्डनशिखण्डिशिखोपि तोय-
स्पर्शासहाञ्चितकलापिकलापभङ्ग्या ।
वापीं निपीतसलिलो वलितं प्रयाति
चेष्टोक्तभावमहिमा वरवर्णिभावः ॥ ३३७९ ॥
चतस्रो मेनिला राजलक्ष्मीः पद्मश्रिया समम् ।
संजाता कमला चास्य कन्याः सत्कृत्यवृत्तयः ॥ ३३८० ॥
विनोदलीलोद्यानैस्तैर्नित्यकान्तैरपत्यकैः ।
द्योतितावनवद्यौ तौ प्रावृट्पुष्पाकराविव ॥ ३३८१ ॥
तीर्थायतनपूतेस्मिन्मण्डलेखण्डितैर्व्ययैः ।
रङ्गादेव्या एव याता भाग्यभावं विभूतयः ॥ ३३८२ ॥
कृतानुयात्रा सा देवयात्रासु क्षितिपाङ्गना ।
राजलक्ष्मीरिवाभाति राजसामन्तमन्त्रिभिः ॥ ३३८३ ॥
सतीदेशे तीर्थसार्थास्त्यजन्त्यस्या निमज्जने ।
स्नानासक्तसतीमूर्तिस्पर्शनौत्सुक्यमञ्जसा ॥ ३३८४ ॥
चित्रे कालेत्र यात्रासु द्रष्टुं वृष्ट्युत्तरैः सदा ।
यत्प्रावृडिव·····यं जीमूतैरनुगम्यते ॥ ३३८५ ॥
सा पार्थिवेषु तीर्थेषु स्नानाय प्रस्थिता ध्रुवम् ।
दिव्यैर्वर्षमिषात्तीर्थैः प्राद्दश्येत तदीर्ष्यया ॥ ३३८६ ॥
अभ्रंलिहान्न च गिरीन्न च कूलंकषा नदीः ।
मृद्वङ्गी दुर्गमा मार्गे तीर्थौत्सुक्येन वेत्स्यसौ ॥ ३३८७ ॥

---

१ बाल्यास्फुटा इति स्यात् । २ अमृतार्द्रा इवोद्गारा इति स्यात् ।

सुवह्वीभिः प्रतिष्ठाभिर्जीर्णोद्धारैश्च धीरया।
तया चित्रं चतुरया पङ्गुर्दिद्दा विलङ्घिता ॥ ३३८८ ॥
अद्यापि विक्षरत्क्षीरार्णवकान्तिच्छटाच्छलात्।
यो भातीव सुधासूतिसितश्वेताश्मनिर्गतः ॥ ३३८९ ॥
उपमन्योरुदन्याया दारिद्र्योपद्रवापहः।
रुद्रो रुद्रेश्वरो नाम्ना श्रीमान्कश्मीरभूषणम् ॥ ३३९० ॥
जगत्सौन्दर्यसारं स सस्वर्णामलसारकः।
शान्तावसादप्रासादोद्धारश्च विहितस्तया ॥ ३३९१ ॥
सत्त्वानामिव भृत्यानां कोपौर्वविकृते नृपे।
उदन्वतीव शरणं सिन्धुर्हैमवतीव सा ॥ ३३९२ ॥
स्थिरप्रसादे भूपाले निग्रहानुग्रहौ क्षणात्।
भूभुजामपि संवृत्तावविच्छिन्नस्तदिच्छया[1] ॥ ३३९३ ॥
सोमपालात्मजो भूभृद्भूपालः प्रापितस्तया।
मानिन्या मेनिलादेव्या विवाहेन महार्हताम् ॥ ३३९४ ॥
उत्पत्तिभूमिसुलभानुभवो न भूम्ना
कस्याप्यहो व्यभिचरत्यनुभावभावः।
तेजस्तमोविलुठनव्रतमुष्णभानो-
श्छेदं तदुत्थमकरोत्तमसोपि चक्रम् ॥ ३३९५ ॥
भुवनाद्भुतसाम्राज्यमार्जनो भूभुजाभवत्।
प्रातिभाव्यं दृढं रत्नाक्रान्तसन्मण्डलावनिः ॥ ३३९६ ॥
ऊढायां मेनिलादेव्यां परिणेतुरभूदपि।
पिता वैमत्यमुत्सृज्य निर्व्याजं राज्यदायकः ॥ ३३९७ ॥
राज्ञा प्राजिधरस्याजौ तरसा भूभुजोनुजः।
वैरिभिर्निहतस्याग्रे वैरसंशोधनोद्यतः ॥ ३३९८ ॥

---

१ अविच्छिन्नौ इति स्यात्।

रङ्गां शरणमेत्योच्चैर्मानोत्कट्यो घटोत्कचः ।
भेजे राज्यश्रियं प्राप्य चित्रं राज्यश्रियं पराम् ॥ ३३९९ ॥
कुलकम् ॥

कृतसाहायकोमात्यै राज्ञः सप्रज्ञिमङ्गदम् ।
राज्यं प्राभ्रंशयद्भ्रातृद्रुहं पञ्चवटो नृपम् ॥ ३४०० ॥
अलङ्घ्यत्तत्प्रभावात्स्फारदानाम्बुनिर्भरात् ।
सरितं खड्गवल्लीं च कृष्णां विद्वेषिगोचराम् ॥ ३४०१ ॥
द्वितीयस्योरशाभर्तुरकीर्तिर्निर्जयासृजत् ।
देवप्रभावाद्योधाग्रमत्युग्रपुरमग्रहीत् ॥ ३४०२ ॥
[1]शीतोष्णवारणशशिद्योतकल्लोलितास्ततः ।
बहवो वाहिनीनाथाः प्रथामित्थं प्रपेदिरे ॥ ३४०३ ॥
समाद्वाविंशती राज्यावाप्तेः प्राग्भूभुजो गताः ।
तावत्येवाप्तराजस्य पञ्चविंशतिवत्सरे ॥ ३४०४ ॥
इयद्दृष्टमनन्यत्र प्रजापुण्यैर्महीभुजः ।
परिपाकमनोज्ञत्वं स्थेयाः कल्पातिगाः समाः ॥ ३४०५ ॥
अम्भोपि प्रवहत्स्वभावमशनै राश्यानमश्मायते
ग्रावोम्भः स्रवति द्रवत्वमुदितोद्रेकेषु चावेयुषः ।
कालस्यास्खलितप्रभावरभसं भाति प्रभुत्वेद्भुते
कस्यामुत्र विधातृशक्तिघटिते मार्गे निसर्गः स्थिरः॥३४०६॥

---

१ सितोष्ण इत्युचितम् ।

प्रयाते अधिकेप्यर्धसमाषट्कशते कलेः ।
कश्मीरेष्वास्त गोनन्दः पार्थानां सेवया नृपः ॥ १ ॥
सूनुर्दामोदरोस्याथ तस्य पत्नी यशोमती ।
गोनन्दोन्यस्तत्सुतोपि ततोतीत्य महीपतीन् ॥ २ ॥
पञ्चत्रिंशतमज्ञातानुग्रहाभिजनाभिधान् ।
राजाभवल्लवो नाम सूनुस्तस्य कुशस्ततः ॥ ३ ॥
द्वौ खगेन्द्रसुरेन्द्राख्यौ पुत्रपौत्रावमुष्य तु ।
गोधरोथान्यकुलजः सुवर्णाख्यस्तदात्मजः ॥ ४ ॥
तज्जन्मा जनकोप्यासीत्सूनुः शच्याः शचीनरः ।
अथाशोकोभवद्भूभृद्राज्ञोस्य प्रपितृव्यजः ॥ ५ ॥
तज्जौ जलौकाः संदिग्धवंशो दामोदरस्ततः ।
तुल्यं त्रयोथ हुष्काद्यास्तुरुष्काभिजनोद्भवाः ॥ ६ ॥
अभिमन्युस्तृतीयश्च गोनन्दोथ विभीषणः ।
ताविन्द्रजिद्रावणश्च पितापुत्रौ क्रमान्नृपौ ॥ ७ ॥
अन्यो बिभीषणः सिद्ध उत्पलाख्यश्च तत्सुतः ।
पश्चात्ततो हिरण्याक्षो हिरण्यकुल इत्यभूत् ॥ ८ ॥
राजा वसुकुलस्तस्य सूनुः ख्यातस्त्रिकोटिहा ।
.....॥ ९ ॥
क्षितिनन्दो बकात्मजो वसुनन्दस्तदात्मजः ।
नरोन्योक्षस्ततो गोपादित्यगोकर्णकौ क्रमात् ॥ १० ॥
तस्मान्नरेन्द्रादित्योभूत्तत्पुत्रोन्धयुधिष्ठिरः ।
तस्मिन्प्रभ्रंशिते भृत्यैरन्याभिजनसंभवः ॥ ११ ॥
भूपः प्रतापादित्योभूज्जलौकोपि तदात्मजः ।
तुङ्गीनो निःसुते तज्जो विजयोन्यकुलोद्भवः ॥ १२ ॥

जयेन्द्रस्तत्सुतोपुत्रः सचिवः संधिमानभूत् ।
युधिष्ठिरस्य पौत्रेण गोपादित्यात्मजन्मना ॥ १३ ॥
श्रीमेघवाहनेनाथ गोनन्दस्योदितं कुले ।
ततः प्रवरसेनोभूद्भूपः कश्मीरमण्डले ॥ १४ ॥
तत्सूनुश्च हिरण्योभूत्पालयन्क्षितिमण्डलम् ।
मातृगुप्तोभवद्दत्तराज्यस्तेन शकारिणा ॥ १५ ॥
ततः प्रवरसेनोन्यस्तोरमाणात्मजः क्षितिम् ।
लेभे हिरण्यभ्रातृव्यस्तस्य पुत्रो युधिष्ठिरः ॥ १६ ॥
ततो नरेन्द्रादित्यश्च रणादित्यश्च भूपतिः ।
क्रमादभूतां तत्पुत्रो विक्रमादित्यभूपतिः ॥ १७ ॥
बालादित्यश्चोदभवद्विक्रमादित्यनन्दनः ।
बालादित्यस्य जामाता ततो दुर्लभवर्धनः ॥ १८ ॥
सूनुर्दुर्लभकस्तस्य चन्द्रापीडोभवत्ततः ।
तारापीडोनुजन्मास्य मुक्तापीडोस्य चानुजः ॥ १९ ॥
भूपावास्तां कुवलयापीडो द्वैमातुरोस्य च ।
वज्रादित्यः सुतो राज्ञो मुक्तापीडस्य तत्सुतौ ॥ २० ॥
पृथिव्यापीडसंग्रामापीडावास्तां महीभुजौ ।
जयापीडोस्य मन्त्री च जज्ञः पुत्रावपि क्रमात् ॥ २१ ॥
ललितापीडसंग्रामापीडौ ज्येष्ठात्मजस्ततः ।
श्रीचिप्पटजयापीडः कलपपाल्युद्भवोभवत् ॥ २२ ॥
अभिचारेण तं हत्वा सांमत्यादितरेतरम् ।
उत्पलाद्यैरसंप्राप्तराज्यैस्तन्मातुलैः कृतः ॥ २३ ॥
भ्रातुः पुत्रोजितापीडो जयापीडस्य तत्पदे ।
अनङ्गापीडनामा च संग्रामापीडजस्ततः ॥ २४ ॥

तमुत्पाट्योत्पलापीडोस्याजितापीडनन्दनः।
अवन्तिवर्मा शूरेण तं निवार्याथ मन्त्रिणा ॥ २५ ॥
नप्तोत्पलस्य विदधे साम्राज्ये सुखवर्मजः।
सूनुः शंकरवर्मा स गोपालस्तस्य चात्मजः ॥ २६ ॥
रथ्यागृहीतः प्राभूच्च तद्भ्राता संकटाभिधः।
सुगन्धाख्या तयोर्माता तं विनाश्याथ भूभुजम् ॥ २७ ॥
शूरवर्मप्रनप्तारं पङ्गुं तत्त्रिपदातयः।
चक्रुर्निर्जितवर्माणं ततः पार्थस्ततः क्रमात् ॥ २८ ॥
चक्रवर्मा शूरवर्मा चेति निर्जितवर्मजः।
चक्रवर्मण्यतीतेथ पापी पार्थात्मजः क्रमात् ॥ २९ ॥
उन्मत्तावन्तिवर्मासीत्तत्पुत्रे शूरवर्मणि।
राज्याद्भ्रष्टे द्विजैश्चक्रे राज्ये मन्त्री यशस्करः ॥ ३० ॥
प्रपितृव्यात्मजस्तस्य वर्णटस्तनयोनु तम्।
राज्ये वक्राङ्घ्रिसङ्ग्रामस्तस्थौ निष्पाद्य तं ततः ॥ ३१ ॥
अमात्यः पर्वगुप्ताख्यो राज्यं द्रोहेण लब्धवान्।
क्षेमगुप्तः सुतोस्यासीदभिमन्यौ तदात्मजे ॥ ३२ ॥
शान्ते मात्रा पाल्यमाने नन्दिगुप्ते च तत्सुते।
ततस्त्रिभुवने भीमगुप्ते च क्रूरचेष्टया ॥ ३३ ॥
पौत्रे तयैव निहते स्वयं दिद्दाख्यया कृते।
राज्ये संग्रामराजोपि भ्रातृव्योन्ते नृपः कृतः ॥ ३४ ॥
हरिराजानन्तदेवावास्तां तस्यात्मजौ ततः।
कलशोनन्ततनयः क्रमाद्भूपौ तदात्मजौ ॥ ३५ ॥
उभावुत्कर्षहर्षाख्यावपि निष्पाट्य भूपतिम्।
हर्षदेवं तमुद्दामविक्रमोनन्यवंशजः ॥ ३६ ॥

भ्रातुः पुत्रस्य दिद्दाया जस्सराजस्य नप्तृतः ।
मल्लाभिधानादुद्भूतो भूपतामुच्चलोभजत् ॥ ३७ ॥
द्रोहेण तं हतवतां भृत्यानामग्रतस्ततः ।
शङ्खराजान्यनामाभूद्रङ्गाख्यः क्षणिको नृपः ॥ ३८ ॥
गग्गेन निहते तस्मिन्मल्लो द्वैमातुरोप्यभूत् ।
तस्योच्चलमहीभर्तुर्भ्राता निर्बध्य तं बली ॥ ३९ ॥
सुस्सलाख्योग्रहीद्राज्यं माल्लिरुच्चलसोदरः ।
विरक्तैः पाटिते तस्मिन्राज्याद्भृत्यैर्नृपः कृतः ॥ ४० ॥
षण्मासान्हर्षभूभर्तृनप्ता भिक्षाचराभिधः ।
पुनर्निर्वास्य तं प्राप्तराज्ये सुस्सलभूभृति ॥ ४१ ॥
क्रमाल्लवन्यैर्विश्वस्तैर्द्वैराज्योद्वेजिते हते ।
लवन्यान्निखिलांस्तं च हत्वा भिक्षाचरं नृपम् ॥ ४२ ॥
सुतः सुस्सलभूभर्तुः संप्रत्यप्रतिमक्षमः ।
नन्दयन्मेदिनीमास्ते जयसिंहो महीपतिः ॥ ४३ ॥
गोदावरी सरिदिवोत्तुमुलैस्तरङ्गै-
र्वक्रैः स्फुटं सपदि सप्तभिरापतन्ती ।
श्रीकान्तराजविपुलाभिजनाब्धिमध्यं
विश्रान्तये विशति राजतरङ्गिणीयम् ॥ ४४ ॥

BOMBAY SANSKRIT SERIES.

Edited under the superintendence of Dr. P. Peterson and Dr. R. G. Bhândârkar.

		Rs.	a.	p.
No. I.	—Pañchatantra, Books IV. and V. Edited, with Notes, by Dr. Bühler	0	4	0
No. II.	—Nâgojibhaṭṭa's Paribhâshendus'ekhara. Edited and explained by Dr. Kielhorn. The Sanskrit Text and various Readings, Part I.	0	8	0
No. III.	—Pañchatantra, Books II. and III. Edited, with Notes, by Dr. Bühler...	0	4	0
No. IV.	—Pañchatantra, Book I. Edited, with Notes, by Dr. F. Kielhorn	0	7	0
No. V.	—The Raghuvaṁs'a of Kâlidâsa, with the Commentary of Mallinâtha. Edited, with Notes, by S. P. Pandit, M. A. Part I., Cantos I.—VI.	1	0	0
No. VI.	—Mâlavikâgnimitra: a Sanskrit Play by Kâlidâsa. Edited, with Notes, by Shankar P. Pandit, M. A.	2	2	0
No. VII.	—Nâgojibhaṭṭa's Paribhâshendus'ekhara. Edited and explained by Dr. Kielhorn. Part II. (Translation and Notes), Paribhâshâs I.—XXXVII.	0	8	0
No. VIII.	—The Raghuvaṁs'a of Kâlidâsa, with the Commentary of Mallinâtha. Edited, with Notes, by S. P. Pandit, M. A. Part II., Cantos VII.—XIII	0	12	0
No. IX.	—Nâgojibhaṭṭa's Paribhâshendus'ekhara. Edited and explained by Dr. Kielhorn. Part II. (Translation and Notes), Paribhâshâs XXXVIII.—LXIX.	0	8	0
No. X.	—The Das'akumâracharita of Daṇḍin. Part I. Edited, with Critical and Explanatory Notes, by Dr. Bühler	0	8	0
No. XI.	—The Nîtis'ataka and Vairâgyas'ataka of Bhartṛihari, with extracts from two Sanskrit Commentaries. Edited, with Notes, by Kâshinâth Trimbak Telang, M. A. (copies not available.) ...			
No. XII.	—Nâgojibhaṭṭa's Paribhâshendus'ekhara. Edited and explained by Dr. Kielhorn. Part II. (Translation and Notes), Paribhâshâs LXX.—CXXII. ...	0	8	0
No. XIII.	—The Raghuvaṁs'a of Kâlidâsa, with the Commentary of Mallinâtha. Edited, with Notes,			

		Rs.	a.	p.
	by S. P. Pandit, M. A. Part III., Cantos XIV.—XIX	0	8	0
No.	XIV.—Vikramâṅkadeva-Charita. Life of king Vikramâditya Tribhuvanamalla of Kalyâṇa, composed by his Vidyâpati Bilhaṇa. Edited, with an Introduction, by Dr. G. Bühler (copies not available.)			
No.	XV.—Mâlatî-Mâdhava; a Drama by Bhavabhûti. Edited, with Critical and Explanatory Notes, by Dr. R. G. Bhândârkar, M. A. (second Ed. in the Press.)...			
No.	XVI.—Vikramorvas'î: a Drama by Kâlidâsa. Edited with Notes, by Shankar P. Pandit, M. A...	1	4	0
No.	XVII.—Hemachandra's Des'înâmamâlâ. Edited, with Critical Notes, a Glossary and a Historical Introduction, by Professor R. Pischel and Dr. G. Bühler, Part I. Text and Critical Notes, by Professor Pischel.	1	0	0
No.	XVIII.—Vyâkaraṇa-Mahâbhâshya of Patañjali. Edited by Dr. F. Kielhorn. Vol. I. complete. Parts I, II & III.	9	0	0
No.	XIX. Ditto ditto by ditto. Vol. I. Part. II.	1	0	0
No.	XX. Ditto ditto by ditto. Vol. I. Part. III.	1	0	0
No.	XXI. Ditto ditto by ditto. Vol. II. Part. I.	1	0	0
No.	XXII. Ditto ditto by ditto. Vol. II. Part. II.	1	0	0
No.	XXIII. Vâsishṭhadharmas'âstram. Edited, with Notes, by Dr. A. A. Führer	0	8	0
No.	XXIV.—Kâdambarî by Bâṇa and his son. Vol. I. Sanskrit Text, complete. Edited by Dr. P. Peterson. (copies not available.)			
	Do. Vol. II. Introduction and Notes, by do. ...	2	0	0
No.	XXV.—Kîrti-Kaumudî. Edited, with Notes, by Prof. A. V. Kâthavaté. (copies not available.) ...			
No.	XXVI.—Vyâkaraṇa-Mahâbhâshya of Patañjali. Edited by Dr. F. Kielhorn. Vol II. Part III. ...	1	0	0
No.	XXVII.—Mudrârâkshasa, by Vis'âkhadatta, with the Commentary of Dhuṇḍirâja. Edited, with Notes, by K. T. Telang. (Copies not available.)			
No.	XXVIII.—Vyâkaraṇa-Mahâbhâshya of Patañjali. Edited by Dr. F. Kielhorn. Vol. III. Part I. ...	1	0	0
No.	XXIX.—Do.-Do. of Do. by Do. Vol. III. Part II.	1	0	0
No.	XXX.—Ditto do. of do. by do. Vol. III. Part III.	1	0	0
No.	XXXI.—Subhâshitâvalî of Vallabhadeva. Edited by Dr. P. Peterson and Pandit Durgâprasâd ...	2	8	0

	Rs.	a.	p.
No. XXXII.—Tarka-Kaumudî of Laugakshi Bhâskara. Edited by Professor M. N. Dvivedi	0	12	0
No. XXXIII.—Hitopades'a of Nârâyaṇa. Edited by Dr. P. Peterson.	0	14	0
No. XXXIV.—The Gaudavaho, by Vâkpati. Edited by Shankar P. Pandit	3	0	0
No. XXXV.—Mahânârâyaṇa Upanishad. Edited by Colonel G. A. Jacob	0	7	0
No. XXXVI.—University Selections of Hymns from the Ṛigveda. Edited by Dr. P. Peterson ...	4	0	0
No. XXXVII.—S'ârṅgadharapaddhati. Edited by Dr. P. Peterson. Vol. I.	3	0	0
No. XXXVIII.—Naishakarmyasiddhi. Edited by Col. G. A. Jacob	2	0	0
No. XXXIX.—A Concordance to the principal Upanishads and Bhagavadgîtâ, by the same author.	8	0	0
No. XL.—Eleven Atharvaṇa Upanishads, with Dîpikâs, by the same author	2	8	0
No. XLI.—Handbook to the study of the Ṛigveda, by Dr. P. Peterson. Part I.	3	0	0
No. XLII.—The Das'akumâracharita of Daṇḍin, Part II. (completing Dr. Bühler's Edition). Edited with Critical and Explanatory Notes by Dr. P. Peterson.	0	8	0
No. XLIII.—Handbook to the study of the Ṛigveda, by Dr. P. Peterson. Part II. comprising the Seventh Maṇḍala with the commentary of Sâyana...	5	0	0
No. XLIV.—Aphorisms of the Sacred Law of the Hindus, an Index of the Sûtras and the various Readings of the Hiraṇyakeshî-Dharmasûtra, by Dr. G. Bühler Part I.	2	12	0
No. XLV.—Râjataraṅginî. Edited by Pandit Durgâprasâd, Part I. containing the first 7 (seven) Taraṇgas	3	0	0
No. XLVI.—Patañjali's Yogasûtras. Edited with the Scholium of Vyâsa and the Commentary of Vâchaspati, by Râjârâm Shâstrî Bodas	3	4	0
No. XLVII.—Pârâs'ara Dharma Saṁhitâ with the Commentary of Sâyana Mâdhavâchârya, Vol. I. Part I. Edited by Pandit Vâman Shâstrî Islâmpurkar ...	4	4	0
No. XLVIII.—Ditto do. of do. by do. Vol. I Part II.	4	0	0
No. XLIX.—Nyâyakos'a. 2nd Edition. Edited by Mahâmahopâdhyâya Bhîmâchârya Zaḷkîkar	12	0	0
No. L.—Âpastamba Dharmasûtra, Part II. Edited by Dr. G. Bühler	1	8	0

The Department of Public Instruction, Bombay.

THE RÂJATARAṄGIṆÎ

OF

KALHAṆA.

EDITED

BY

DURGÂPRASÂDA, SON OF VRAJALÂLA.

VOL. III.

CONTAINING THE SUPPLEMENTS TO THE WORK OF JONARÂJA, SRÎVARA AND PRÂJYABHAṬṬA.

EDITED

BY

P. PETERSON, M. A.

500 COPIES.

Registered for copy-right under Act XXV of 1867.

Bombay:
GOVERNMENT CENTRAL BOOK DEPÔT.

(*All rights reserved.*)

1896.

Price 2¼ *Rupees.*

Bombay Sanskrit Series No. LIV.

BOMBAY:

PRINTED AT "TATVA-VIVECHAKA" PRESS.

जोनराज श्रीवर प्राज्यभट्टकृताः

राजतरङ्गिण्यः

एल्फिन्स्तनविद्यालयस्थसंस्कृताध्यापकवरेण

डाक्टर पीटर् पीटर्सनाख्येन

संशोधिताः

ताश्च

राजानुशासनेन मुम्बापुरवर्तितत्त्वविवेचकाभिधाने मुद्रायन्त्रालये मुद्रिताः

अस्य च ग्रन्थस्य स्वामित्वं (१८६७) सप्तषष्ट्युत्तराष्टादशशतस्य
पञ्चविंशं स्वनियममनुसृत्य संगृहीतम्।

१८९६.

मूल्यं सपादं रूप्यकद्वयम्।

अथ

जोनराजकृता

द्वितीया राजतरङ्गिणी ।

सिद्धे यत्र सति त्रपाकुलमिव स्पर्धाभिलाषाहते-
रन्तर्धिं वहति त्रिलोकमहितं शेषं निजार्धद्वयम् ।
स्नेहैकीभवदाशयद्वयजयाकाङ्क्षीव गाढं मिल-
देहार्धद्वयमस्तु तद्भगवतोरद्वैतसंपत्तये ॥ १ ॥

दातुं भक्ताय कल्याणं गर्भे बिभ्रदिवान्वहम् ।
तुन्दिभो गणराजः स विघ्नशान्तिं करोतु नः ॥ २ ॥

श्रीगोनन्दमुखैर्धर्मसंमुखैरा कलेः किल ।
कश्मीरकाश्यपी भूपैरपालि गुणशालिभिः ॥ ३ ॥

तेषामभाग्यहेमन्तनिशातमसि तिष्ठति ।
नैव कश्चिदपश्यत्तान्काव्यार्कानुदयाच्चिरम् ॥ ४ ॥

रसमय्या गिरा वृद्धां नित्यतारुण्यमापिपत् ।
अथ श्रीजयसिंहान्तं तत्कीर्तिं कल्हणद्विजः ॥ ५ ॥

ततो देशादिदोषेण तदभाग्यैरथापि वा ।
कविर्वाक्सुधया कश्चिन्नाजिजीवत्परान्नृपान् ॥ ६ ॥

श्रीजैनोल्लाभदीने क्ष्मां संप्रत्यक्षति रक्षति ।
जोनराजाभिधस्तेषामुद्यतो वृत्तवर्णने ॥ ७ ॥

दर्पग्लानिभवां राजपान्थानां तापसंततिम् ।
हर्तुं संरोपितः काव्यद्रुमो भाविफलोदयः ॥ ८ ॥
उपस्काररसं क्षिप्त्वा विनयामृतशीतलैः ।
सज्जनैर्वर्धनीयोयमपि यत्नेन भूयसा ॥ ९ ॥
मग्नान्विस्मृतिपाथोधौ जयसिंहादिभूपतीन् ।
श्रीजैनोल्लाभदीनस्य कारुण्यादुज्जिहीर्षतः ॥ १० ॥
सर्वधर्माधिकारेषु नियुक्तस्य दयावतः ।
मुखाच्छ्रीशिर्यभट्टस्य प्राग्राज्ञामनवज्ञया ॥ ११ ॥
राजावलिं पूरयितुं संप्रति प्रतिभासमः ।
कवीनामाभिलाषेण न तु स्वस्मान्ममोद्यमः ॥ १२ ॥
क्व चुण्ठीजलवन्मद्वाक्क्व च काव्यं तरङ्गितम् ।
छायामात्रानुकारेण किं नडं पुण्ड्रकायते ॥ १३ ॥
अन्तःशून्यां लघुप्रज्ञां तुम्बीमेतां वहन्नहम् ।
पारं राजतरङ्गिण्या गन्तुं हन्तोद्यमं श्रितः ॥ १४ ॥
पृथ्वीनाथगुणाख्याने चापलं मे न दूषणम् ।
अलंकारैरहंकारात्कुरूपापि हि वल्गति ॥ १५ ॥
कवीनामुपभोग्या वा मद्वाक्स्वान्तरसिद्धये ।
गङ्गाजलं जलं तेषां यैर्न पीतं जलान्तरम् ॥ १६ ॥
राजोदन्तकथासूत्रपातमात्रं कृतं मया ।
कुर्वन्तु रचनामत्र चतुराः कविशिल्पिनः ॥ १७ ॥
मणीनां घर्षणायैव महाशाणस्य नैपुणम् ।
कान्तिप्रणयने तेषां मुखसारमणेस्तु तत् ॥ १८ ॥
विनैव प्रार्थनां काव्यं कवेः पश्यन्ति साधवः ।
किमर्थितः शशी विश्वं सुधासारेण सिञ्चति ॥ १९ ॥

अनुनीतोपि कालुष्यं खलः काव्ये न मुञ्चति।
सुधाधौतोपि नाङ्गारः शुभ्रतामेति जातुचित् ॥ २० ॥
पश्यन्तु मत्काव्यमिति चिरं दूरं गता कवेः।
अतः परं मुखप्रेक्षिभावदैन्यकदर्थना ॥ २१ ॥
समः स्यादप्रवीणानां गीतसंस्कृतयो रसः।
वानरा युञ्जते गुञ्जान् शीते वह्निकणभ्रमात् ॥ २२ ॥
काव्यं श्रुतमपि प्रीत्यै नाबोधोपहतात्मनाम्।
हीनदन्तबलस्येक्षुर्मुखे न्यस्तः करोति किम् ॥ २३ ॥
पदार्थसुन्दरे काव्ये दर्शिते निर्मलात्मनाम्।
दुर्वारं गुणिरत्नानां मत्सरप्रतिबिम्बनम् ॥ २४ ॥
लक्ष्मणा दूषयन्निन्दुं बुधं मत्सरयक्ष्मणा।
विधाता वाच्यतामेति परोद्रेकासहाग्रणीः ॥ २५ ॥
मद्वाक्कल्हणकाव्यान्तःप्रवेशादेतु चर्वणम्।
निर्गमाम्बु सरित्तोये पतितं पीयते न किम् ॥ २६ ॥
जगदानन्दनो देवद्विजातिकृतवन्दनः।
क्षितिसंक्रन्दनः साक्षादासीत्सुस्सलनन्दनः ॥ २७ ॥
गजराजैकवाहत्वप्रसिद्धिमपि बिभ्रती।
जयसिंहाभिधाने श्रीश्चित्रं यस्मिन्सदावसत् ॥ २८ ॥
वाग्देव्या लालिते मात्रा श्रियो भोक्तरि भूपतौ।
तयोः श्वश्रूस्नुषत्वेन नैवादर्शि विरोधिता ॥ २९ ॥
त्रिगर्ताधिपतेर्वैश्यं मल्लं जातु सुशर्मणः।
वैरिनिर्वासितं प्राप्तं वृत्तिकामं नृपोग्रहीत् ॥ ३० ॥
सर्वत्रौषधयस्तृणानि मणयो ग्रावाण एवाखिलै-
र्मन्यन्ते गुणिनो दिगन्तरगतास्तावज्जनाः प्राकृताः।

यावन्नैव नयन्ति कर्मभिरभिध्येयप्रकर्षप्रथै-
श्चित्रप्रायदशैश्च निर्मलमतिस्फारं जनं रञ्जनम् ॥ ३१ ॥
वसुधावासवे याते जेतुं यवनमेदिनीम् ।
सैन्यस्य वल्लभो मल्लः शौर्योद्रेकादथाभवत् ॥ ३२ ॥
हतशेषं तुरुष्केशसैन्यं तुलयितुं निशि ।
शिबिरं मल्लचन्द्रोगाद्रिपूणां साहसोर्जितः ॥ ३३ ॥
यत्र न प्राविशद्वायुर्भीत्येव सुभटैर्वृते ।
ध्रुवं मन्त्रौषधिबलात्प्रविश्यान्तर्बलान्तरे ॥ ३४ ॥
सुप्तद्रोहांहसो भीतेरनिघ्नन्यवनेश्वरम् ।
उपानहौ स्वनामाङ्के निनायास्य शिरस्त्रताम् ॥ ३५ ॥
उपानहौ परिज्ञाय गृहीत्वा चाथ सोप्यरिः ।
भूपतेः शिबिरं यातः श्रियं कीर्तिमिवादित ॥ ३६ ॥
द्वे मूर्ती तपनानलावथ तथा शंभोः शशाङ्काम्भसी
नेता हन्त मिथो गतानुगतिको लोकस्तुलां तां द्वयीम् ।
सूर्याचन्द्रमसोर्यथास्वमुपलैः कान्तैर्विशेषं परं
तेषां तत्स्तुतियोगिसंभविगुणैर्लब्ध्वा जनो रोचकी ॥ ३७ ॥
त्रिंशेब्दे फाल्गुने कृष्णद्वादश्यां भूमिवल्लभः ।
स्वसौभाग्येन दिव्यस्त्रीदृशमप्रीणयत्तराम् ॥ ३८ ॥
अथाभ्यषेचि तत्पुत्रो जडैः स परमाणुकः ।
अणीयःपत्रविस्फारः कुन्दो माघदिनैरिव ॥ ३९ ॥
अवधूय प्रजात्राणमवधीर्य च दिग्जयम् ।
कर्तुं प्रारभताखिन्नं राजा कोशस्य संचयम् ॥ ४० ॥
दातुं भोक्तुमनीशस्य श्रोत्रियस्येव संपदम् ।
प्रयागजनकौ धूर्तौ राज्ञो मुमुषतुः श्रियम् ॥ ४१ ॥

तौ हि स्वभृत्यैर्निःसत्त्वं कारितै राक्षसाकृतिम्।
तमत्रासयतां रात्रौ रात्रौ चित्रेण कर्मणा ॥ ४२ ॥

मिथ्यात्मनीनतां तस्य नाटयन्तौ कुमन्त्रिणौ।
रक्षासूनिति तं वित्तं त्याजयामासतुर्नृपम् ॥ ४३ ॥

स्थाने भिषायकस्यैतावादिश्य स्वानुजीविनम्।
तृणच्छन्नं महारत्नैश्चैत्र्यां पूजयतः स्म तौ ॥ ४४ ॥

स पुनः कृतसंकेतः पश्यत्स्वेव जनेष्वहो।
राज्ञः कृत्वाशिषं रात्रौ सालंकारो ययौ वनम् ॥ ४५ ॥

भिषायको बलिं यत्ते गृहीत्वा व्यधिताशिषः।
निर्विघ्नं भावि तद्राज्यमिति तौ भूपमूचतुः ॥ ४६ ॥

भिषायकदिने भृत्यं स्वं कृत्वा तौ भिषायकम्।
रत्नैरभ्यर्च्य विपिनं नीत्वाथ प्रत्यमुञ्चताम् ॥ ४७ ॥

कुबेरस्त्वयि तुष्टोद्य नानारत्नविभूषितः।
कृत्वा तवाशिषं लोकसमक्षमतिरोहितः ॥ ४८ ॥

इत्युक्ता भूपतेस्तस्य मुग्धस्य कृपणस्य च ॥
प्रयागजनकौ धूर्त्तौ प्रसादं प्रत्यदापिताम् ॥ ४९ ॥

एवं कदीश्वरस्यास्य बालस्येव विभीषिकाः।
संदर्श्य कोशं निःशेषं लुण्ठयां चक्रतुर्विटौ ॥ ५० ॥

राजा सार्धान्नवाब्दान्स क्ष्मां भुक्त्वा दिवसान्दश।
चत्वारिंशाब्दनाभस्यसिताष्टम्यां लयं ययौ ॥ ५१ ॥

वन्तिदेवाभिधः सप्तचत्वारिंशेथ वत्सरे।
भाद्रशुक्लदशम्यां स तस्य पुत्रो व्यपद्यत ॥ ५२ ॥

वुप्पदेवाभिधः पौरैर्योग्यालाभान्नृपः कृतः।
प्रापितो घासरचितः पूजामिव भिषायकः ॥ ५३ ।

दृष्ट्वा स्थूलशिलां हृष्टो मूढः सोथ स्वमन्त्रिणः ।
आदिशत्स्तन्यदानेन वर्ध्यन्तामितरा इति ॥ ५४ ॥
श्रुत्वा तत्स्थानमाहात्म्यं बालिशो मन्त्रिभिः सह ।
आगात्सुरेश्वरीक्षेत्रं नौपथेन स जातुचित् ॥ ५५ ॥
अप्सु स्वप्रतिबिम्बेस्य कुर्वतो मुखवैकृतम् ।
रुषा चपेटां ददतो न्यपतन्मणिमुद्रिका ॥ ५६ ॥
राज्ञः क्व मणिमुद्रेति पृच्छतः सोभ्यधादिति ।
पतिता सा जले रेखां तत्राभिज्ञानमाचरम् ॥ ५७ ॥
एवं निदर्शनीभूय मूर्खाणां नाम राजताम् ।
नवाब्दांश्चतुरो मासान्सार्धे द्वे च दिने व्यधात् ॥ ५८ ॥
तस्यानुजोथ भूभारमनिच्छन्नपि जस्सकः ।
स्ववृद्धिकामैरत्यज्ञो लवन्यैरभ्यषिच्यत ॥ ५९ ॥
बध्यन्ते न शुका इवोदितवचः संवादिनो वायसा
भूमिः शर्करिलोर्वरेव भजते नो कर्षकाक्षोदनम् ।
अश्मा सैन्धववन्न जातु गमितो निष्पिष्य चूर्णाकृतिं
केषांचिद्गुणवद्गुणाय महते दोषोपि संजायते ॥ ६० ॥
सोदरौ क्षुक्षभीमाख्यौ द्विजौ तस्य महीभुजः ।
धूर्तत्वेन प्रियावाज्ञामचिरादुदलङ्घताम् ॥ ६१ ॥
सहार्थौ समसामर्थ्यौ स कथं नौ सहिष्यते ।
भूपं मत्वापि सामर्षं नान्यं वव्रतुरित्यमू ॥ ६२ ॥
स्वयं यच्च न संभेजे तयोरेको नृपश्रियम् ।
लवन्योत्सिक्तता हेतुर्न त्वनौचित्यशङ्किता ।
तत्र हेतुर्लवन्येन्द्रभयं नानौचिती पुनः ॥ ६३ ॥
यान्त्यङ्गसंगममनङ्कुशमङ्कयन्ति
रागं प्रदर्श्य हृदि कम्पमुदश्चयन्ति ।

व्यापादयन्ति विषवेदनया विशेषा-
द्विश्वास्य दुष्टपिटिका युवतिश्च हा धिक् ॥ ६४ ॥
वार्धक्षीणशक्तित्वाद्विरक्ताम्बुवधूरपि।
हत्वा क्षुद्रं विषेणाशु भीमं भोगमकारयत् ॥ ६५ ॥
सा देवरस्य सङ्गेन श्वित्रसंचित्रिता सती
दानेन माधवादीनां स्वपापं पर्यणीनमत् ॥ ६६ ॥
सोष्टादशाब्दान्क्ष्मां भुक्त्वा सत्रयोदशवासरान्।
युगागाङ्काब्दमाघान्त्यदशम्यां प्रलयं ययौ ॥ ६७ ॥
ततः श्रीजगदेवस्तत्तनयो विनयोर्जितः।
ततान जनताहर्षं मधुमास इवाधिकम् ॥ ६८ ॥
परस्परविरुद्धानां भृत्यानां तुल्यवृत्तिता।
तत्राभूदुत्पलाब्जानामिव संध्याक्षणागमे ॥ ६९ ॥
उज्जहार महीनाथः पृथुविज्ञानकौशलः।
भूतले दुर्व्यवस्थानं शल्यं शल्यहरो यथा ॥ ७० ॥
मनःशल्यायमानः स निःसामान्यगुणो नृपः।
कुचक्रिकाबलादेशान्मन्त्रिभिर्निरवास्यत ॥ ७१ ॥
निग्रहानुग्रहाधायिमन्त्रज्ञं गुणराहुलम्।
स प्राप सचिवं मित्रं कपीन्द्रमिव राघवः ॥ ७२ ॥
उदयप्राप्तिलोभेन शूराद्विजपती समम्।
अगातामथ कश्मीरदेशं तौ विस्मयावहौ ॥ ७३ ॥
चिरं भुक्तां श्रियं त्यक्तुमनीशाः समरोद्यताः।
तन्मन्त्रौजोहुताशान्तः प्रापुः शलभतां द्विषः ॥ ७४ ॥
जित्वा क्ष्मां बुभुजे भूपश्छत्रचामरहासिनीम्।
लक्ष्मीमराजलक्ष्मां तु श्रीगुणाकरराहुलः ॥ ७५ ॥

राजा रज्जुपुरेराजद्राजतच्छत्रधारिणम् ।
हर्षेश्वरस्य प्रासादं निर्ममे निर्ममेहितः ॥ ७६ ॥

वाल्लभ्याद्वारपतितां पद्मेनामवता ततः ।
दुरात्मनावधि च्छन्नविषदानेन भूपतिः ॥ ७७ ॥

रक्षित्वा क्षितिमब्दान्स सञ्यहर्तूश्चतुर्दश ।
नन्दाष्टाङ्काब्दचैत्रान्त्यचतुर्दश्यां लयं ययौ ॥ ७८ ॥

तत्पुत्रो राजदेवोथ काष्ठवाटं भयाद्गतः ।
आनिन्ये वामपार्श्वस्थैर्द्वारेशस्य विरोधिभिः ॥ ७९ ॥

तं सल्हणाख्यदुर्गान्तःप्रविष्टं दुष्टचेष्टितः ।
अवेष्टयद्बलैः पद्मो मण्डलैरिव पन्नगम् ॥ ८० ॥

उपायनीकृतापूर्वपादुकालोककौतुकात् ।
प्रमत्तं कोपि चण्डालो द्वारेशमवधीद्रणे ॥ ८१ ॥

अभिषिक्तस्ततो भट्टैः सभेरीशङ्खनिःस्वनम् ।
प्रणतानन्तसामन्तः सेवकानन्वजिग्रहत् ॥ ८२ ॥

असामान्यो लवन्येन्द्रान्स वास्तव्यकुटुम्बितान् ।
निन्ये क्षोणीपरिवृढो रूढिभारोढिमादिशन् ॥ ८३ ॥

लवन्यवन्यकरिणां दर्पनिर्दलनं व्यधात् ।
नरसिंहो महातेजा वनानामिव पावकः ॥ ८४ ॥

माल्लैर्बलाढ्यचन्द्रस्य बलिनो लहरेशितुः ।
हरतो नगरार्धं स शक्तो नाभून्निवारणे ॥ ८५ ॥

पुण्यं राशीभवन्मूर्त्तमिवाथ स्वाभिधाङ्कितम् ।
बलाढ्यचन्द्रः सान्द्रौजा नगरान्तर्मठं व्यधात् ॥ ८६ ॥

अयं खशो मृदुः कश्चिदस्माभिरभिषिच्यते ।
अमन्त्रयन्निदं भट्टा राज्ञावगणितास्ततः ॥ ८७ ॥

न भट्टोहं न भट्टोहमित्यश्रावि पदेपदे।
भट्टेभ्यः क्रुध्यता तेन निर्दिष्टे भट्टलुण्ठने ॥ ८८ ॥

तदैव विमलाचार्यः शाके खेषुनवाङ्किते।
षडद्रिनन्दमासस्य मलभ्रममवारयत् ॥ ८९ ॥

निर्ममे निर्ममो राजपुरीं राजोलकं तथा।
राजदेवः स राजेन्दू राजन्मार्जितमङ्गलः ॥ ९० ॥

अहानि सप्तविंशानि त्रयोविंशांश्च वत्सरान्।
मासत्रयीं च राजा स क्ष्मां रक्षित्वा क्षयं ययौ ॥ ९१ ॥

संग्रामदेवस्तत्पुत्रो गोत्रसुत्रामतां भजन्।
त्रासमासूत्रयद्राजसिंहः शात्रवदन्तिनाम् ॥ ९२ ॥

विश्रम्भात्सूर्यमनुजं चक्रे प्रतिनिधिं स्वयम्।
कुचक्रिकः स भोगेभ्यो लुभ्यन्द्रोहमचिन्तयत् ॥ ९३ ॥

श्रुतद्रोहो महीभर्ता भीतः स लहरीशितुः।
चन्द्रस्य मण्डलं सूर्यः प्राविक्षदुदयेच्छया ॥ ९४ ॥

दारुणेरुणकाले स सूर्ये चन्द्रान्वितं तदा।
स्वर्भानुरिव भूभानुश्चित्रं सममिमीमिलत् ॥ ९५ ॥

शमालाधिपतिस्तुङ्गः सूर्ये पार्श्वं नयन्मदात्।
कृतयात्रेण राज्ञाथ नीचभावमनीयत ॥ ९६ ॥

मार्गैर्निरिन्दुरविभिश्चौरवद्रजनौ भ्रमन्।
विटत्यक्तस्ततः सूर्यो बद्धा राज्ञा व्यपाद्यत ॥ ९७ ॥

स्वलक्ष्मीं रक्षितुं साक्षात्तस्मिन्नात्तक्षणे प्रभौ।
अकारयन्नहिभयं स्तेनाः कल्हणनन्दनाः ॥ ९८ ॥

गोत्रजेषु बलिष्ठेषु नष्टाशः सोथ पार्थिवः।
शिष्टमिष्टं च शरणमगाद्राजपुरीपतिम् ॥ ९९ ॥

तस्मिन्दण्डधरे दूरं याते डामरफेरवः ।
अन्त्राण्यपि विशामाशुरशेषं रक्तपायिनः ॥ १०० ॥

राज्ञा सुमनसा त्यक्तं द्विजैश्च स्पर्शदूषितम् ।
भोज्यं डामरडोम्बानां तद्राज्यान्नमभूच्चिरम् ॥ १०१ ॥

स्वमण्डले विशीर्णेथ परमण्डलमाविशन् ।
न कैरनुमतो राजा प्रत्यासन्ननवोदयः ॥ १०२ ॥

प्रत्यागतो राजपुर्याः स रिपून्समरे जयन् ।
ब्राह्मणान्काल्हणी रक्षन्राज्यं पुण्यं च लब्धवान् ॥ १०३ ॥

एकविंशतिशालं स श्रीविशालं विशांपतिः ।
गोद्विजानां निवासाय चकार विजयेश्वरे ॥ १०४ ॥

काल्हणिप्रणिधीनां स द्विषां लुण्ठनकाङ्क्षिणाम् ।
चौराणामिव दीपोभूद्वेषणीयो महीपतिः ॥ १०५ ॥

शाखाक्रान्तदिगन्तः स सुदुराशैर्दुराशयैः ।
कविकल्पद्रुमो राजा विच्छिन्नः कल्हणात्मजैः ॥ १०६ ॥

नायकीकृत्य तं भूपं कविः पण्डितयःशकः ।
स्वोक्तिहारलतां विद्वत्कण्ठभूषात्वमानयत् ॥ १०७ ॥

षोडशाब्दान्दशाहानि स भुक्त्का क्ष्मां व्यपद्यत ।
जगद्भद्रोथ पञ्चम्यां भाद्रेष्टाविंशवत्सरे ॥ १०८ ॥

रामदेवोथ तत्पुत्रो हत्वा स्वपितृघातकान् ।
पृथ्वीराजे प्रजाभारं सर्वमेव समार्पिपत् ॥ १०९ ॥

लेदर्यां दक्षिणे पारे सल्लारे स महीपतिः ।
स्वनामाङ्कं व्यधात्कोट्टं यशोराशिमिवापरम् ॥ ११० ॥

प्रमादाद्भङ्गमानीतः शमालाविजयोद्यमे ।
तेनोत्पलपुरे विष्णोः प्रासादो नूतनीकृतः ॥ १११ ॥

वैशाखे मासि पक्षे शशधरविशदे त्रिंशदब्दे स भक्त्या
द्वादश्यां रामराजे क्षितिमवति निजप्रेयसीं सोमवारे।
पृथ्वीराजः शमालाविजयनसमये दस्युभग्नं मुरारिं
संपूर्णाङ्गं विधायोत्पलपुरनगरे स्वप्रतिष्ठां चकार ॥ ११२ ॥

पुष्पं चन्दनवृक्षस्य फलं चम्पकभूरुहः।
अपत्यं तस्य राज्ञश्च हन्त नाकारि वेधसा ॥ ११३ ॥

भिषायकपुरस्थस्य कस्यचिद्ब्राह्मणस्य सः।
पुत्रं लक्ष्मणनामानं पुत्रीयामास भूपतिः ॥ ११४ ॥

अकृत्रिमपिता पुत्रप्रीतिं प्रीतिः प्रथीयसी।
वस्त्ववोचितमालेख्यं तयोरतुलयत्तराम् ॥ ११५ ॥

श्रीसमुद्राभिधा देवी विमुद्रितसमुद्रजा।
वितस्तायां स्वनामाङ्कं नगरान्तर्मठं व्यधात् ॥ ११६ ॥

त्रयोदशदिनं मासं वत्सरांश्चैकविंशतिम्।
क्ष्मां भुक्त्वैकोनपञ्चाशे वर्षे स द्यामगादिषे ॥ ११७ ॥

कथंचिल्लक्ष्मदेवोथ पाट्यमानाङ्गविह्वलः।
नग्नः कण्टकिनीं वल्लीमिव क्षोणीं बभार सः ॥ ११८ ॥

क्षत्रीकृतोपि नामुञ्चत्स्वधर्मं धरणीपतिः।
न माणिक्यश्रियं धत्ते रञ्जितोश्मापि जातुचित् ॥ ११९ ॥

वितस्तायास्तटे श्वश्रूमठोपान्ते मठं नवम्।
निष्पङ्का निजनामाङ्कं महेला महिषी व्यधात् ॥ १२० ॥

कज्जलेन तुरुष्केण बहिरेत्यात्र मण्डले।
लुण्ठाकेन प्रजादृष्टिरुत्पाद्यास्रुवता हता ॥ १२१ ॥

त्रयोदशाब्दान्मासांस्त्रीन्द्वादशाहं च भूपतिः।
भुक्त्वा द्वाषष्टिवर्षेथ पौषान्ते स व्यपद्यत ॥ १२२ ॥

कज्जलोपद्रवात्तस्माल्लेदरीमात्रनायकः ।
सिंहदेवोथ संग्रामचन्द्रेणाक्षोभि भूपतिः ॥ १२३ ॥
नगरान्तर्मठं कृत्वा लहरेन्द्रे मृते सति ।
सिंहदेवो नृसिंहोथ क्ष्मां ररक्ष क्षयाकुलाम् ॥ १२४ ॥
सिंहदेवो नृसिंहस्य सिंहेन गुरुणान्वितः ।
प्रतिष्ठां सिंहलग्नेथ ध्यानोड्डारेकरोत्कृती ॥ १२५ ॥
कर्ता कार्यं च लग्नं च गुरुः सिंहश्च कोविदः ।
पतितेयं भवेत्तस्य बत सिंहपरम्परा ॥ १२६ ॥
स निष्कलक्षविक्रीतक्षीरेण विजयेश्वरम् ।
एकाह एव स्नपयन्वत शुद्धिं ययौ नृपः ॥ १२७ ॥
राज्ञा श्रीशंकरस्वामी गुरुर्मन्त्रोपदेशकृत् ।
अष्टादशमठैश्वर्यदक्षिणाभिरपूज्यत ॥ १२८ ॥
परलोकजयोपायं वाग्देवीप्राभृतं नृपः ।
आत्मोपज्ञमिमं श्लोकं शय्योत्थायं सदापठत् ॥ १२९ ॥
पावकनिर्मलदृष्टिं विबुधगणैरर्च्यमानपादमहम् ।
शशिशकलादर्शयुतं गौरीशं शंकरं वन्दे ॥ १३० ॥
पान्थानां तोयदानाय पितृणां तर्पणाय च ।
दंपत्योः पापनाशाय धर्मसंवर्धनाय च ॥ १३१ ॥
निजालंकारदानेन निपानं रचितं पथि ।
मडवाश्रमग्रामान्ते गौर्या शंकरभार्यया ॥ १३२ ॥
खोनमोषाधिपस्यासीत्कन्या प्रज्ञद्विजस्य सा ।
सत्यशीलान्विता भक्ता गौरी गौरीव शंकरे ॥ १३३ ॥
दुहितुर्दुश्चरित्रेण योभूद्दण्डः पितुः पतन् ।
इडागल्यार्थितो राजा नर्तक्या तं न्यवारयत् ॥ १३४ ॥

स दुर्जनपरिष्वङ्गादास्तिकप्रज्ञयोज्झितः।
धात्रीपुत्र्यां स्मरादर्शे स्वात्मानं प्रत्यबिम्बयत् ॥ १३५ ॥
दर्याख्यो गणानास्वामी कामसूहोपबृंहितः।
तं विरक्तप्रजं मुक्तविनयं छद्मनावधीत् ॥ १३६ ॥
चतुर्दशाब्दान्षण्मासांश्चयहन्यूनान्महीपतिः।
भूत्वा शुचौ दिवमगात्स वर्षे सप्तसप्ततेः ॥ १३७ ॥
तद्भ्राता सूहदेवोथ कामसूहोपबृंहितः।
जडोपि सकलामेव काश्मीरक्ष्मां वशे व्यधात् ॥ १३८ ॥
दिगन्तरादुपागत्य बहवो वृत्तिलिप्सया।
तमाश्रयन्महीपालं पुष्पद्रुममिवालयः ॥ १३९ ॥
वृत्त्यै लंकारचक्रोपि दरदेशात्तदाययौ।
संततेर्भाविसाम्राज्यः प्राज्यं काश्मीरमण्डलम् ॥ १४० ॥
क्रमराज्याभिधे राष्ट्रे त्राहग्रामं नृग्रामणीः।
ददौ वसतये तस्मै नियतेः स नियोगतः ॥ १४१ ॥
पार्थोन्य इव पार्थोभूत्पञ्चगह्वरसीमनि।
यो गह्वरपुरं चक्रे तत्पुत्रो बभ्रुवाहनः ॥ १४२ ॥
तद्वंश्यः कुरुशाहोभूद्यद्बाहूदयपर्वते।
ज्याकिणच्छद्मना भेजे यशःशुभ्रत्विषं निशा ॥ १४३ ॥
काश्मीराः पार्वती तत्र राजा ज्ञेयो हरांशजः।
इत्येतत्प्रत्ययायेव यस्यासीच्चक्षुषां त्रयम् ॥ १४४ ॥
काश्मीरेषु हि साम्राज्यं कुरुशाहस्य संततिः।
शंशदीनमुखीमुख्या ख्यातकीर्तिः करिष्यति ॥ १४५ ॥
ताहराजोजनिष्टास्माद्यस्य चापलताश्रिता।
मृदुर्मुहुरहो मौर्वी श्रुत्यन्तमगमत्तराम् ॥ १४६ ॥

शाहमेरः स शौर्योष्मा ग्रीष्मो भानुस्ततोजनि ।
यस्य वैरिवधूबाष्पैः प्रतापाग्निरदीप्यत ॥ १४७ ॥
वने विहरतस्तस्य शह्मेरस्य कदाचन ।
मृगया प्रथमं दृष्टिं पश्चान्निद्रा व्यलोभयत् ॥ १४८ ॥
राज्यमा संततेर्भावि कश्मीरेषु तवेति सः ।
स्वप्ने वाक्सुधया तत्र महादेव्याभ्यषिच्यत ॥ १४९ ॥
पञ्चाभ्यर्कमिते शाके नवाष्टाङ्कितवत्सरे ।
ततः सपरिवारः स कश्मीरानविशच्छनैः ॥ १५० ॥
सकुटुम्बं तमायान्तं वृत्तिदानेन भूपतिः ।
अनुजग्राह सोत्कर्षं चूतद्रम इवालिनम् ॥ १५१ ॥
डुलुचाख्यः कर्मसेनचक्रवर्तिचमूपतिः ।
कश्मीरान्स तदैवागात्सिंहो मृगगुहामिव ॥ १५२ ॥
षष्टिग्रामसहस्रेषु स्वाम्यं दातुमिवात्र सः ।
तावत्संख्यसहस्राणि स्वसैन्ये सादिनोवहत् ॥ १५३ ॥
डुल्चं धनप्रयोगेण निविवर्तयिषुर्नृपः ।
सर्वेषामेव वर्णानां दुर्वर्णो दण्डमक्षिपत् ॥ १५४ ॥
प्राणाहुत्या प्रभोः कोपे तत्प्रतिग्रहसांहसः ।
प्रायस्था ब्राह्मणाः प्रायश्चित्तीयांचक्रुरक्रमम् ॥ १५५ ॥
दण्डदुःखेन विप्रैर्यः शापो दत्तो महीभुजः ।
भविष्यन्वंशविच्छेदो ध्रुवं तस्यैव तत्फलम् ॥ १५६ ॥
तस्मिन्नवसरे कालमान्याख्यैर्भोट्टपार्थिवैः ।
स्वदेशे वकतन्याख्यो गोत्रजस्यात्मजो हतः ।
सबन्धुर्गोत्रजो व्याजाद्वकतन्यो व्यहन्यत ॥ १५७ ॥
मान्योसामान्यधीः कालमातृवंशदवानलः ।
अवाशिष्यत तत्पुत्रो दैवादेकः स रिञ्चनः ॥ १५८ ॥

व्यालदुक्कमुखैर्मन्त्रसूत्रसंयोजितैरथ ।
बद्ध्वा संहतिकन्थां स ताञ्जडाञ्जेतुमिष्टवान् ॥ १५९ ॥
निपास्यमानकोशं मा भृत्यत्वे वृणुतेति सः ।
तान्प्रत्यश्रावयद्दूतमुखेन स्वाततायिनः ॥ १६० ॥
नृसिंहः स नदीतीरे सिकतास्थगितायुधः ।
तान्प्रत्यैक्षत रक्तस्य न तु कोशस्य पीतये ॥ १६१ ॥
व्यालाद्यैरागतास्तत्र कालमान्या निरायुधाः ।
सिकतान्तर्निविष्टस्य परश्वग्नेस्तृणीकृताः ॥ १६२ ॥
प्रक्षाल्य वैरिरक्तेन पितृद्रोहरजोमलम् ।
शेषारिभयतो यातः कश्मीरान्बान्धवैः सह ॥ १६३ ॥
पूर्णस्य रामचन्द्रस्य रुचिहान्यै धरार्यमा ।
नीलाशाभ्रे रिञ्चराहोरुदयं सोथ सोढवान् ॥ १६४ ॥
हेतिभिस्तापयत्याशा डुलुचे कृष्णवर्त्मनि ।
काश्मीरकैर्जनैः सर्वैः शलभत्वमलभ्यत ॥ १६५ ॥
रुद्धयोर्डुल्चरिञ्चाभ्यां प्राच्युदीच्योर्बहुर्जनः ।
वसतेः पश्चिमामाशां प्राग्यमाशामथागमत् ॥ १६६ ॥
अधो डुल्चाम्बुपूराद्धीर्गिरौ रिञ्चनमारुतात् ।
छायाजुषां फलाढ्यानां पुंनागानामभूत्तदा ॥ १६७ ॥
पक्षिशावमिव स्थानच्युतं चिल्लोल्लसद्भया ।
बलश्री रैञ्चनी लोकं काश्मीरकमपाहरत् ॥ १६८ ॥
घनाम्बु प्राप्य भोट्टेभ्यः काश्मीरजनविक्रयात् ।
गर्जन्नाशाः प्यधात्सर्वास्तदा रिञ्चनवारिदः ॥ १६९ ॥
तुरुष्कताजिकम्लेच्छसैन्यच्छादितभूतलः ।
डुलुच्यो नगरं प्रापदथागस्त्य इवार्णवम् ॥ १७० ॥

मृगाः सिंहमिवोदग्रं गरुत्मन्तमिवाण्डजाः ।
तमापतन्तमालोक्य पलायन्त पुरौकसः ॥ १७१ ॥

बद्धाः पलायिनस्तेन मान्त्रिकेणैव पन्नगाः ।
केचित्पलायिता भीत्या प्रविष्टा गिरिगह्वरम् ॥ १७२ ॥

राजापि क्वापि संछन्नो भीत्या घूकवदास्त सः ।
इतरेषां तु लोकानां का कथा तत्र वासिनाम् ॥ १७३ ॥

विप्रशापो नरेन्द्राणां वृथा जातो न जातुचित् ।
सलक्ष्मा राजयक्ष्मा हि नाहत्वा विनिवर्त्तते ॥ १७४ ॥

गूढार्थं दापिताः पूर्वं गाढया बन्धपीडया ।
विक्रीता वाजिभिः पश्चात्तुरुष्कैर्हस्तगा जनाः ॥ १७५ ॥

विद्धाः केचित्परे बद्धा विराद्धास्तेन केचन ।
क्लेषं केचित्परे शोषं दोषं यान्त्यनला द्रुमाः ॥ १७६ ॥

जत्रुवेधेन बद्धानामेकया चर्मवध्रया ।
तेषां दुरापमप्यासीदन्योन्यमुखदर्शनम् ॥ १७७ ॥

घासेन्धनादिसंभारढौकनाय क्षणं क्षणम् ।
बद्धा म्लेच्छैरमुच्यन्त बिडालैरिव मूषकाः ॥ १७८ ॥

येषामन्ने जुगुप्साभूद्बिडालस्पर्शदोषतः ।
म्लेच्छोच्छिष्टं गवांश्चास्थि निबद्धैर्भक्षितं क्षुधा ॥ १७९ ॥

वैतस्तमपि ये वारि न पपुः पङ्कसंकुलम् ।
बद्धैर्मरुषु तैर्नीतैर्मूत्रं पीतं भृशं तृषा ॥ १८० ॥

क्व म्लेच्छान्नं क्व वंशो नो दुःसहा क्षुच्छुतेन किम् ।
निद्रा नाद्यापि मार्गेण तेन्तरेवमचिन्तयन् ॥ १८१ ॥

गच्छतां तिष्ठतां तेषामश्नतां जल्पतामपि ।
सोभून्नैव क्षणो यत्र न ते कार्यमसाधयन् ॥ १८२ ॥

म्लेच्छैः केचित्खशैः केचिद्दरद्भिरपरे तथा।
भोट्टैः केचित्तुरुष्कैश्च केचिद्बन्दीकृता जनाः ॥ १८३ ॥

अन्नं गृहे वने वित्तं मार्गे बन्धून्विहाय च।
पलायामासुरपरे तुरुष्कभयसंभ्रमात् ॥ १८४ ॥

करुणागौरवघृणा द्रुतं गन्तुमशक्तिषु।
बालवृद्धाबलास्वेते त्यक्तवन्तः पलायिनः ॥ १८५ ॥

न भुक्तं क्षुधितैर्मार्गे न पीतं तृषितैरपि।
किमन्यद्भयसंभ्रान्तैः पश्चात्तैर्नापि वीक्षितम् ॥ १८६ ॥

क्षुधा केचित्तृषा केचिद्भिया केचित्परे न्हिया।
भयाद्बिलदरीष्वेव प्रविश्यान्तर्विपेदिरे ॥ १८७ ॥

बिलप्रविष्टांस्ताञ्छ्रुत्वा ततो निष्कासनेच्छवः।
निष्कारुण्यास्तुरुष्कास्ते धूमं बिलमुखे ददुः ॥ १८८ ॥

धूमेनान्तर्विपन्नानां नराणामस्थिराशयः।
दृश्यन्तेद्यापि धूमोत्थं मालिन्यं च गुहामुखे ॥ १८९ ॥

राजापचारमकरोत्प्रजासु फलितस्तु सः।
नारीणां चपला दृष्टिर्दन्तैर्गण्डस्तु खण्ड्यते ॥ १९० ॥

नाशिताशेषदेशोथ हिमपातभयाकुलः।
डुल्चः कश्मीरंतस्तारबलमार्गेण निर्ययौ ॥ १९१ ॥

ओताविव गते तस्मिन्काश्मीरा मूषका इव।
मन्दं मन्दं विनिर्याता मृतशेषा बिलान्तरात् ॥ १९२ ॥

नालब्ध पितरं पुत्रः पिता तं च न कंचन।
भ्रातृंश्च भ्रातरो डुल्चराक्षसोपप्लवात्यये ॥ १९३ ॥

मितलोकाखिलक्षेत्रा निर्भोज्या दर्भनिर्भरा।
सर्गारम्भ इव प्रायस्तदा कश्मीरभूरभूत् ॥ १९४ ॥

सामर्थ्यान्न्यग्रहीड्डुल्चो रिञ्चनः प्राभवत्ततः ।
विश्वमन्धयति ध्वान्तं सुखभाजोभिसारिकाः ॥ १९५ ॥
डुल्चराहुविनिर्मुक्तं राजानं तुङ्गिमस्पृशा ।
अरुरुत्सत्स शृङ्गेण रिञ्चनास्ताचलस्ततः ॥ १९६ ॥
दृष्ट्वा गगनगिर्यग्रे भास्वन्तं रिञ्चनं स्थितम् ।
अशङ्कत न कै राज्ञः प्रत्यासन्नोस्तसंस्तवः ॥ १९७ ॥
रिञ्चनश्येनराजस्य जिहीर्षोर्नगरामिषम् ।
कुलचन्द्रो रामचन्द्रो विघ्नं चक्रे पदे पदे ॥ १९८ ॥
भोट्टाँल्लहरकोट्टान्तः पट्टविक्रयकैतवात् ।
प्रत्यहं वञ्चनोद्योगी रिञ्चनोथ विसृष्टवान् ॥ १९९ ॥
तथैव लहरस्यान्तर्भोट्टलोके प्रवेशिते ।
अपिप्यद्रामचन्द्रास्त्रमधु शस्त्राणि रिञ्चनः ॥ २०० ॥
रामचन्द्रकुलोद्यानकल्हवल्लीं स रिञ्चनः ।
वक्षःस्थले महाबाहुः कोटादेवीमरोपयत् ॥ २०१ ॥
श्रीरिञ्चनभयाद्राजा नगरं त्यक्तवांस्ततः ।
विप्रशापाग्निदग्धानां कुतः स्यादुदयाङ्कुरः ॥ २०२ ॥
प्रमण्डलगुहां राजजम्बुर्भीतोविशत्ततः ।
पापस्य तादृशो मृत्युः संमुखस्य रणे कथम् ॥ २०३ ॥
वैरिधाराधरश्चित्रं रणे राजास्त्रवर्षणैः ।
दण्डदानां द्विजातीनां चक्रे नेत्रेष्ववग्रहम् ॥ २०४ ॥
पञ्चाहोनांश्चतुर्मासान्वर्षांश्चैकोनविंशतिम् ।
स राजराक्षसो रक्षाव्याजात्क्षोणीमभक्षयत् ॥ २०५ ॥
श्रीरिञ्चनसुरत्राणो श्रान्तां यवनविप्लवैः ।
अनयद्विश्रमं तुङ्गे भुजवातायने महीम् ॥ २०६ ॥

पूर्वदृष्टमिवाशेषं तिमिरापगमे पुमान्।
कश्मीरमण्डलः पूर्वराजसौख्यं तदैक्षत ॥ २०७ ॥
दीपैरिव प्रतिस्थानं यैर्लवन्यैः स्थिरैः स्थितम्।
अकम्पन्त प्रभातस्य ते राज्ञो बलवायुना ॥ २०८ ॥
मन्त्रसूच्या कृते भेदे बाणसूत्रे प्रवेशिनि।
अभूलवन्यकन्थायाश्चित्रं विस्रथता तदा ॥ २०९ ॥
वने कण्टकिनीवाङ्गनग्नो यत्राकुलोभवत्।
तत्रैव व्योम्नि पत्रीव देशे समचरन्नृपः ॥ २१० ॥
तस्य दाक्षिण्यदक्षस्य प्रजानां हितहेतुना।
पुत्रे मन्त्रिणि मित्रे वा दुष्टे नालक्ष्यत क्षमा ॥ २११ ॥
छेदं यच्छन्नतुच्छानां वैरिणामुच्छलच्छ्रियाम्।
आच्छोदनमगच्छत्स च्छत्रशाली कदाचन ॥ २१२ ॥
टुक्कभ्राता तिमिर्नाम मार्गे संतापखेदतः।
गोपाल्याः कुत्रचिद्ग्रामे क्षीरं निष्पीतवान्हठात् ॥ २१३ ॥
राज्ञा विज्ञापितेनाथ सद्यो गोपालयोषिता।
अनुयुक्तस्तिमिर्भीत्या व्यधात्सर्वस्य निन्हवम् ॥ २१४ ॥
असत्ये भाविता गोपी यदा धैर्यान्न सास्खलत्।
पानाशयं तिमेरेव स सत्यैक्षी व्यदारयत् ॥ २१५ ॥
तस्य पानाशयाद्दीर्णान्निर्यान्त्या क्षीरधारया।
राज्ञः कीर्तिर्मुखश्रीश्च गोप्याः प्राप प्रसन्नताम् ॥ २१६ ॥
वानवाले निवसतोरसुवातां कयोश्चन।
अश्वे किशोरकौ तुल्यौ कस्मिन्नपि वनान्तरे ॥ २१७ ॥
सिंहसंज्ञापितापत्या तयोरन्यतमा वने।
अश्वसादृश्यवात्सल्यादपुपुत्रीयिषत्परम् ॥ २१८ ॥

मदीयोयं मदीयोयमित्यसंजातनिश्चयौ ।
वडवाधिपती क्षोभाद्राजान्तिकमगच्छताम् ॥ २१९ ॥
स विवादं तयोः श्रुत्वा स्वान्तिकं स्वीयमानुषैः ।
वडवे च किशोरं च राजाभ्यानाययत्ततः ॥ २२० ॥
तस्मिन्किशोरके बाल्याद्दूरं धावति लीलया ।
माता धात्री च नितरामस्निह्यच्चाप्यहेषयत् ॥ २२१ ॥
सभ्येष्वनेलमूकेषु वादिनोः क्षोभसज्ञयोः ।
अश्वे नावानयन्मध्येवितस्तं सकिशोरके ॥ २२२ ॥
बालाश्वं पातितं नद्यां नावो राज्ञा महाधिया ।
हठादन्वपतन्माता परा परमहेषयत् ॥ २२३ ॥
संदिग्धव्यवहाराणामेवं निश्चयकर्तरि ।
तस्मिन्नाज्ञि जनोमंस्त कृतं युगमिवागतम् ॥ २२४ ॥
श्रीदेवस्वामिनं शैवीं दीक्षां याचन्नराधिपः ।
नान्वग्राहि स भोट्टत्वात्तेनापात्रत्वशङ्कया ॥ २२५ ॥
अनुजस्तनुजो बन्धुर्मन्त्री सहचरः सखा ।
व्यालराजो नृपस्याभूत्सत्यैकव्रतनिष्ठया ॥ २२६ ॥
जहौ व्यालः कृतं राज्ञा न स व्यालकृतं पुनः ।
मनो हि कायिकं हन्ति तत्कृतं न वपुः पुनः ॥ २२७ ॥
कलानिधौ रसमये व्याले भूलोकभास्वतः ।
मूर्च्छिता रुचिरच्छैत्सीदच्छेद्यं जगतां तमः ॥ २२८ ॥
प्रवेष्टुकामं कश्मीरान्निवर्त्तयितुमञ्जसा ।
डुल्चं धनप्रयोगेण यो विसृष्टो महीभुजा ॥ २२९ ॥
अवमन्त्र्य प्रविष्टेथ डुलुच्ये भयतो गतः ।
गान्धारदेशमुद्यानदेवो लब्धान्तरस्ततः ॥ २३० ॥

श्रीमानुद्यानदेवोथ रन्ध्रप्रहरणोद्यतः।
समादिक्षत दुक्कादीनुपगान्धारमाश्रयन् ॥ २३१ ॥
जीवतामेव गन्तव्यं जाने तन्नरकान्तरम्।
यत्सेव्यते विशेषज्ञः स्वामी संमानलिप्सया ॥ २३२ ॥
भुङ्क्ते व्यालः श्रियं प्राणपणैर्युष्माभिरर्जिताम्।
करौ साधयतो यन्नाद्रसना भोगभागिनी ॥ २३३ ॥
ईश्वरो भूतिलिप्ताङ्गो व्यालं हारीचिकीर्षति।
अनास्थां तु सुवर्णेषु युष्मासु विदधाति सः ॥ २३४ ॥
क्षीरमात्रैकपायित्वं निमित्तीकृत्य भूपतिः।
युष्मच्छौर्याभिशङ्कित्वात्तिमिं तिमिमिवावधीत् ॥ २३५ ॥
एवं संदेशनिर्भिन्नाष्टुक्काद्याः शुक्कलङ्किताः।
विंशप्रस्थे कदाचित्ते प्रजन्हुरथ भूभुजम् ॥ २३६ ॥
तत्खड्गधारासंपातैर्व्यालस्तेषां हृदन्तरात्।
स्वैश्वर्यतापमनुदद्राजा मूर्च्छतु केवलम् ॥ २३७ ॥
तेथ लब्धजयंमन्यास्तद्वधापोढमन्यवः।
नगरान्तर्ययू राज्यग्रहणार्थमहंकृताः ॥ २३८ ॥
क्षणं मृत इव स्थित्वा भूयो घातभयान्नृपः।
दूरं गतान्निपून्दृष्ट्वा राज्ये राजोदतिष्ठत ॥ २३९ ॥
आरुक्षन्राजधानीं ते यावत्तावन्नराधिपम्।
अपेतमूर्च्छमायान्तमद्राक्षुः क्षुद्रबुद्धयः ॥ २४० ॥
त्वया किं न त्वया किं न हतो राजेत्यनीतयः।
परस्परविवादात्ते तत्कालं चुक्षुभुर्जडाः ॥ २४१ ॥
सान्योन्यमन्यवोन्योन्यलोठनाद्राजसद्मनः।
कर्तव्यं मरणं राज्ञो व्यधुः स्वस्य स्वयं जडाः ॥ २४२ ॥

शेषान्राजाथ दुःशीलाञ्छूलारोपेण केवलम् ।
उच्चैस्तामानयन्मानी सर्वथाधोगतिं ततः ॥ २४३ ॥
सगर्भा वैरिभोट्टस्त्री रोषवान्स व्यदीदरत् ।
असिभिर्भूपतिर्गर्भशालिशिम्बीर्नखैरिव ॥ २४४ ॥
तद्द्रोहरोषजा पीडा राज्ञस्तत्कुलमारणात् ।
चित्ते शान्तिमगात्खड्गघातोत्था न तु मूर्धनि ॥ २४५ ॥
दुःस्वप्नमिव तद्दृष्ट्वा टुक्कादिचरितं क्षणम् ।
प्रबुद्धेव पुनः प्रापदभयेन सुखं मही ॥ २४६ ॥
अद्रोहमध्यगे राजा शाहमेरे प्रसन्नधीः ।
सकोटामातृकं वृद्धचै स्वपुत्रं हैदरं ददौ ॥ २४७ ॥
वर्धितः कोटया देव्या प्रावृषीव महीरुहः ।
सच्छायत्वं स्फुरत्पत्रः शहमेरो न्यषेवत ॥ २४८ ॥
परिखाछलतोकीर्त्या स्वपराजयजातया ।
परितो वलितं राजा स्वनामाङ्कं पुरं व्यधात् ॥ २४९ ॥
पौषदुर्दिनमार्तण्डसंनिभो धरणीपतिः ।
मासांश्च कतिचिद्भूयः प्रकाशमकरोद्भुवः ॥ २५० ॥
हेमन्ते शैत्यपारुष्यदोषेण धरणीपतेः ।
मरुत्कोपेन नैविड्यं शिरःपीडाग्रहीत्तराम् ॥ २५१ ॥
सदानेकोत्तमाङ्गानां पीडाहरगुणश्रियः ।
भूपतेरुत्तमाङ्गस्य पीडा कष्टमवर्धत ॥ २५२ ॥
एकादश्यां ततः पौषे नवनन्दाङ्कवत्सरे ।
निरस्ता मृत्युवैद्येन भूपतेर्मूर्धवेदना ॥ २५३ ॥
एकादशदिनैरूनौ मासौ त्रीन्वत्सरानपि ।
क्षमा संरक्ष्य स स्वर्गं ययौ रिञ्चनभूपतिः ॥ २५४ ॥

पुत्रं हैदरनामानं बाल्यादनभिषिक्तवान्।
अतथाविधशक्तित्वाद्राज्यं स्वेनाप्यसंवहन् ॥ २५५ ॥
लवन्यैः कुलनाथत्वाद्रिञ्चने प्रतिघादपि।
अव्याहतप्रवेशाशो मतिमाञ्शाहमेरकः ॥ २५६ ॥
समं श्रीकोटया देव्या मूर्तयेव जयश्रिया।
तदोदयनदेवं तं कश्मीरक्ष्मामलम्भयत् ॥ २५७ ॥
राज्यलक्ष्मीमहादोला गुणबद्धा गरीयसी।
रिञ्चनोच्चैःपदं गत्वा राजाधःपदमाश्रयत् ॥ २५८ ॥
राजा शह्मेरपुत्रौ तौ ज्यंशराल्लेशरौ तदा।
क्रमराज्यादिदेशानां स्वाम्यदानादरञ्जयत् ॥ २५९ ॥
धीरिवासीत्तदा कोटा देवी सर्वाधिकारिणी।
राजा देह इवात्यर्थं तदादिष्टं समाचरत् ॥ २६० ॥
तेजसा पिहितान्यासन्यानि रिञ्चनभास्वतः।
लवन्यज्योतिषां राजप्रदोषेभूत्तदोदयः ॥ २६१ ॥
यस्याक्रम्यत सौम्यस्य गृहिण्या कोटया गृहम्।
विषयाक्रमणं तस्य लवन्यैः किं नु शोच्यते ॥ २६२ ॥
लवन्यदेशचण्डालगृहस्पर्शविवर्जकः।
स श्रोत्रिय इवानैषीत्कालं स्नानतपोजपैः ॥ २६३ ॥
आस्तिकत्वं कियत्तस्य वर्ण्यते वर्णधारिणः।
क्रिमिमर्दभयाद्घण्टां योबध्नाद्धाजिनो गले ॥ २६४ ॥
तावद्वणितामेव कोशालंकरणं दधत्।
कण्ठभूषां समौलिं स चक्रिणेदित काञ्चनीम् ॥ २६५ ॥
अथ मुग्धपुरस्वामिदत्तानीकिन्यहंकृतः।
कश्मीरानचलोविक्षद्बलाडुल्च इवापरः ॥ २६६ ॥

स्वपक्षैराक्षिपत्याशाबलेनाक्रम्य मेदिनीम् ।
नाचले गोत्रभित्त्वं स कर्तुमैष्ट महीवृषा ॥ २६७ ॥
प्राप्ते भीमानकं तस्मिन्ससैन्ये दैन्यमाश्रितः ।
भौट्टदेशमगात्तूर्णमुर्वीपरिवृढो भयात् ॥ २६८ ॥
निवर्तय चमूमन्यां किं मिथ्यादेशपीडया ।
अराजकास्त्वया पाल्याः कश्मीराः कुलनाथवत् ॥ २६९ ॥
इति श्रीकोटयामात्यैः प्रेरितैर्लेखधारिभिः ।
आसारसैन्यमचलः प्रत्यमुञ्चद्विमोहितः ॥ २७० ॥
प्रतिमुक्तनिजासारः सारहीनोचलः स तैः ।
मार्गोत्सवच्छलात्कंचित्कालं मार्गे विलम्बितः ॥ २७१ ॥
तावच्छ्रीकोटया देव्या तदा पालयितुं प्रजाः ।
भोट्टः खे रिञ्चनो नाम राजभावे न्ययुज्यत ॥ २७२ ॥
प्रमीतभर्तृकोत्पन्नमृतापत्येव सा तदा ।
अदूयत निजैः सर्वैश्चिरस्याचलशेमुषी ॥ २७३ ॥
तुषारलिङ्गपूजाभिः कृतार्थीकृत्य वासरान् ।
भोट्टदेशान्निजं देशमगच्छद्भीतभीर्नृपः ॥ २७४ ॥
उदयाद्रिभुवा पूर्णः शशीवाथ स कोटया ।
खे रिञ्चनतमोनाशी शिरसाधारि सादरम् ॥ २७५ ॥
यं कोटासूत जट्टाख्यं भिक्षणाख्यस्य मन्त्रिणः
वर्धनायात्मजं राजा स तं मृत्युमिवादित ॥ २७६ ॥
शहमेरः स वीरोथ परिपालितरैञ्चनिः ।
अचक्षुष्यः क्षमाभर्तुः पुत्रप्रेमभराद्भूत् ॥ २७७ ॥
देव्यास्तु समदृष्टित्वात्पुत्रयोरुभयोरपि ।
राज्ञो द्वेष्योपि शह्मेरो न भयेन स पस्पृशे ॥ २७८ ॥

अचलोपप्लवातङ्के भयाल्लोकैः समाश्रितः।
शह्लेरः स च राजानं न तृणायाप्यजीगणत् ॥ २७९ ॥
शह्लेरो हैदरश्येनं दर्शयित्वा मुहुर्मुहुः।
अभाययत्तरां राजपक्षिणं तं दिवानिशम् ॥ २८० ॥
रक्षंस्तटस्थानुद्वेगरहितो जलवर्जितः।
अल्लेश्वराम्बुपूरः स प्रजाश्चित्रमतापयत् ॥ २८१ ॥
शिरःशाटकहिन्दाख्यौ समभूषयतामुभौ।
चन्द्रार्काविव तस्याशां शूरौ पौत्रौ गुणोच्छ्रितौ ॥ २८२ ॥
द्वारैश्वर्यात्स्फुरद्दर्पो राजाज्ञालङ्घनोद्यतः।
शह्लेरः स विपद्द्वारमभूद्भूपतिसेविनाम् ॥ २८३ ॥
सोल्लेश्वरसुतां दत्त्वा लुस्तस्य तदधीशितुः।
श्रीशंकरपुरं जित्वा राज्ञः शङ्कामवर्धयत् ॥ २८४ ॥
वशेतेलाकशूरोस्य भाङ्गिलैश्वर्यभाजनम्।
ज्यंशरस्य सुतां हस्तेकृत्य कृत्यविदोभवत् ॥ २८५ ॥
बहुरूपजयी लक्ष्मीनिधिरच्युततापदम्।
शमालां स नृसिंहोथ दैत्यश्रियमिवादुनोत् ॥ २८६ ॥
मकरालयगाम्भीर्यः करालम्बो जयश्रियः।
कराले स करालौजाः करमालम्बयज्जनान् ॥ २८७ ॥
असिस्मरत्स्मेरयशा दह्यमानमितस्ततः।
राज्ञः कलशदेवस्य विजयेशपुरं ततः ॥ २८८ ॥
स्थित्यै प्रकल्प्य चक्रस्य स्वस्य चक्रधराचलम्।
शह्लेरोचलकार्याणि जनस्य समदर्शयत् ॥ २८९ ॥
कम्पनेश्वरलक्ष्मस्य लक्ष्मीमिव सुतां दधत्।
अल्लेशो लब्धवाञ् शुद्धं स्वदायमिव सद्यशः ॥ २९० ॥

नारिङ्गरङ्गशैलूषं कोटराजमथाग्रहीत् ।
शह्लेरस्तनया रत्नगुहरोन्मालिकेन सः ॥ २९१ ॥
साम्नः केचित्परे भेदाद्दानादन्ये परे भयात् ।
मान्यतामनयन्धन्या लवन्यास्तस्य शासनम् ॥ २९२ ॥
लवन्यलोकस्तत्पुत्रीर्माला इव बभार ताः ।
नाजानाद्भुजगीर्घोरविषाः प्राणहरीस्तु ताः ॥ २९३ ॥
राजबीजिविधेयत्वान्मन्त्राद्विक्रमतश्च कः ।
शहमेरहरेर्नाभूल्लवन्यद्विरदो वशे ॥ २९४ ॥
शहमेराम्बुपूरेण सर्वतः क्रान्तमण्डलः ।
भूपतिस्तुङ्गमृद्राशिस्थायिवृक्षतुलामगात् ॥ २९५ ॥
पुरमात्राधिपत्योत्थलज्जयेव महीपतेः ।
जीवितं दूरमगमच्छुद्धेन यशसा समम् ॥ २९६ ॥
शिवरात्रित्रयोदश्यां वर्षे राजा चतुर्दशे ।
क्षमावान्स क्षमामौज्झीच्छह्लेरस्पर्शदूषिताम् ॥ २९७ ॥
अब्दान्पञ्चदश द्वौ च मासौ द्वौ वासरावपि ।
कश्मीरकाश्यपीभोगमकार्षीत्स महीपतिः ॥ २९८ ॥
अथ शह्लेरभीत्या श्रीकोटा चत्वार्यहानि सा ।
गूढेङ्गितानयद्वृत्तिं भूपालप्रमयादिकम् ॥ २९९ ॥
शम्हेरो मत्सुतद्वारा साम्राज्यं स्वीकरोतु मा ।
इति ज्यायांसमुत्सृज्य बालत्वाच्च परं सुतम् ॥ ३०० ॥
पुत्रस्नेहेन वृद्धत्वदोषेण च विमोहिता ।
अवरुद्धमनिच्छन्ती श्रीकोटा महिषी ततः ॥ ३०१ ॥
स्त्रीभावाद्बन्धुभावाच्च लवन्यैरुपबृंहिता ।
असान्त्वयत्स्वयं भूमिं विधवां स्वां सखीमिव ॥ ३०२ ॥

सा राज्ञी शुक्लप्रतिपद्वीतभीता भवन्त्यथ ।
राजानं गुरुभिः स्वीयैश्चरमेष्टिमवापिपत् ॥ ३०३ ॥
पूर्वोपकारस्मरणाच्छाहमेरादयोखिलाः ।
तां प्राणमन्नमात्याः स्वाश्चान्द्रीमिव नवां कलाम् ॥ ३०४ ॥
शमयन्त्या रजः सर्वं तापापहृतिदक्षया ।
तया निदाघवृष्ट्येव लताः संवर्धिताः प्रजाः ॥ ३०५ ॥
शह्मेरात्स्वोदयभ्रंशशङ्किनो भट्टभिक्षणम् ।
तदुद्रेकविनाशार्थं मानं देवी निनाय सा ॥ ३०६ ॥
दुस्तरेषु महाभीतिजलपूरेषु सा ततः ।
तत्प्रज्ञानावमारुह्य कार्ये पारं परं ययौ ॥ ३०७ ॥
अन्तः सेहे न शह्मेरस्तद्दत्तं भिक्षणोदयम् ।
मानवन्तः सहन्ते हि च्छायासाम्यं कथंचन ॥ ३०८ ॥
वत्स्यतो धूमतापादि लक्षणं जातवेदसः ।
धीमतोस्य न किंचित्तु रोषलिङ्गमलक्ष्यत ॥ ३०९ ॥
छलाभिनीतरोगेण शहमेरेण धीमता ।
प्रत्यासन्नविनाशत्वमात्मनः समकथ्यत ॥ ३१० ॥
तस्यार्थप्रत्यवेक्षार्थमवतारादिभिः सह ।
व्यसर्जि कोटया देव्या स श्रीमान्भट्टभिक्षणः ॥ ३११ ॥
स्वेदः कुपितपित्तस्य हितो नैवेतिवादिभिः ।
संप्रवेशान्न्यषिध्यन्त द्वाःस्थैस्तदनुयायिनः ॥ ३१२ ॥
तौ भिक्षणावतारौ द्वौ तत्समीपमविक्षताम् ।
सांकट्यादिव तत्प्राणरक्षिण्यो देवता न तु ॥ ३१३ ॥
अनुयुक्तामयोदन्तः स कालेथ तयोर्निजैः ।
गात्रे न्यखानयच्छस्त्रीराधीन्स्वस्योदखानयत् ॥ ३१४ ॥

शिराभिः शोणितं बाष्पं दृशाङ्गैः सकलैरसून् ।
तौ द्वावमुञ्चतां सद्यस्तद्वेषं स च चेतसा ॥ ३१५ ॥

रक्तार्द्रव्रणदीपाङ्कपूर्णपात्राभतच्छिरः ।
रोगमोक्षोचितं स्नानं स तयोः शोणितैर्व्यधात् ॥ ३१६ ॥

भवन्नन्दनसंरक्षापरावेतावुभावपि ।
तयोरन्यतमं दूरीकृत्यान्यमहरद्विधिः ॥ ३१७ ॥

प्रमीतनिजशोकोत्थतापशान्त्यै जडः परम् ।
परप्राणान्रोषवह्नौ प्रदीप्ते जुहुयादिति ॥ ३१८ ॥

शह्लेरं रोद्धुकामां तां समर्थामपि दुर्धियः ।
कोटादेवीममात्याः स्वा नेयबुद्धिं न्यवारयन् ॥ ३१९ ॥

केदारमिव कुल्या सा पानीयेन महर्द्धिना ।
लोकमाप्याययामास साम्राज्योत्पलचन्द्रिका ॥ ३२० ॥

आज्ञाव्यतिक्रमाज्जातु कम्पनाधिपतिं प्रति ।
युयुत्सुरकरोद्यात्राममित्राब्जशशिप्रभा ॥ ३२१ ॥

संकटात्कम्पनेशस्तां कुलायादिव पक्षिणीम् ।
जीवग्राहं गृहीत्वाथ कारापञ्जरमानयत् ॥ ३२२ ॥

मन्त्री कुमारभट्टाख्यस्तस्याः सचिवपुंगवः ।
तन्मोक्षसिद्धयेकार्षीत्तदामात्यैश्छलात्कलिम् ॥ ३२३ ॥

राज्ञ्याः पुंभावमात्रेण भिन्नमाकारसंनिभम् ।
कमण्डलुकरं कंचित्सहादाय मनोरमम् ॥ ३२४ ॥

गत्वा स कम्पनाधीशं धीप्रशंसाविमण्डितः ।
सौष्ठवौदार्यसंपत्तिशालिनीं वाचमभ्यधात् ॥ ३२५ ॥

स्वशिरो मलिनीकृत्य जीवतां योषिदाज्ञया ।
पुरुषत्वं त्वया स्वामिन्कृतार्थीक्रियतेद्य नः ॥ ३२६ ॥

स्त्रीत्वात्कार चित्ताया दानभोगोत्सवद्विषः।
राज्ञ्या बन्धुषु सैन्यान्तर्द्रविणं वर्तते महत् ॥ ३२७ ॥
गत्वा त्वदाज्ञया कारां तस्यास्तर्जनसान्त्वनैः।
धनं जनस्त्वदीयोयं स्वामिसात्कर्तुमिच्छति ॥ ३२८ ॥
साध्यतां भवतास्मांश्च जानीयादुपकारिणः।
इत्युक्त्वा कम्पनाधीशो व्यसृजत्तत्र तं ततः ॥ ३२९ ॥
कारायां निर्गमिष्यन्तीं देवीं कोटामिवेक्षितुम्।
तत्कालमेव संध्यागाज्जगद्भ्रूनकोविदा ॥ ३३० ॥
संध्यावन्दनयोग्याम्बुवाहिना बटुना सह।
असौ कारामविक्षच्च राज्ञ्याश्च निरगुः शुचः ॥ ३३१ ॥
राज्ञीवेषभृतं तत्र स्थापयित्वा बटुं स तम्।
तद्वेषधारिणीं कोटामन्वादाय विनिर्ययौ ॥ ३३२ ॥
रक्षितारोपि नाजानंस्तद्यावत्तावदेव सा।
कम्पनाधिपतिं चक्रे स्वचक्रेभशकृत्करिम् ॥ ३३३ ॥
सान्वशेत कुमारेण मोचिता भट्टभिक्षणम्।
एकदन्तहतारेः किं नान्येनेभमुखाद्भयम् ॥ ३३४ ॥
तयानपोषितोप्यौज्झि शह्लेरो नैव शङ्कया।
कृतवैराः समर्थेन प्राज्ञा नैव ह्युदासते ॥ ३३५ ॥
न प्रासीदन्न चाकुप्यत्तस्मिन्सा बलशालिनि।
घृणा प्रमादसहिता विनाशप्रथमाङ्कुरः ॥ ३३६ ॥
देव्या वासं विमुञ्चन्त्यास्तस्या धनरसाश्रयम्।
शह्लेरे विषवल्लीव द्रोहधीरभ्यवर्धत ॥ ३३७ ॥
वर्धनोन्यतरस्याभूत्पक्षोन्यस्य क्षयावहः।
कोटाशह्लेरयोरस्ति क्षितिमारुतयोरिव ॥ ३३८ ॥

जयापीडपुरं यान्त्यां तस्यां कार्यानुरोधतः ।
शहमेरो बली जातु नगरं स्वीचकार सः ॥ ३३९ ॥
तस्मिल्लवन्यलोकेन गृहीताज्ञे बलीयसि ।
राज्ञी समवृणोत्कोट्टद्वारं सह जयाश्रिया ॥ ३४० ॥
निवृत्तनेत्रचारस्य चपलत्वैककारणम् ।
आखुर्बिलगतो वोतोः शहमेरस्य साभवत् ॥ ३४१ ॥
निरुद्धे बलिना कोट्टगुहाग्रे शौर्यशालिना ।
नृसिंहेनाभजत्कोटा शृगालीव मुहुर्भयम् ॥ ३४२ ॥
तुङ्गत्वं मङ्गलासङ्गमभङ्गुरतरश्रियम् ।
राज्याङ्गैश्च निजाङ्गैश्च दत्ते राज्ञी करोतु मे ॥ ३४३ ॥
अध्यशेततरां राज्ञी मत्पुत्राणां न केवलम् ।
प्राणानामपि चैश्वर्यं श्लाघ्या सुखपरंपरा ॥ ३४४ ॥
सिंहासने मया साकं श्रिया सार्धं ममोरसि ।
क्षमया सह चित्ते मे राज्ञी निविशतां स्वयम् ॥ ३४५ ॥
तामेवमादिसंदेशैर्मुग्धां संमोह्य यत्नतः ।
हस्ते चकार कोट्टक्ष्मां कोटादेवीं च बुद्धिमान् ॥ ३४६ ॥
एकस्मिञ्छयने रात्रिमतिवाह्य तया समम् ।
स प्रातरुत्थितो जातु तीक्ष्णैर्देवीमरोधयत् ॥ ३४७ ॥
वर्षे पञ्चदशे शुक्लदशम्यां नभसस्ततः ।
तारेव नभसो राज्याद्राज्ञी भ्रंशमलब्ध सा ॥ ३४८ ॥
तत्पुत्रावपि तौ द्वौ स करणीयविचक्षणः ।
बबन्ध बन्धुसंकल्पकल्पवृक्षो भटाग्रणीः ॥ ३४९ ॥
स्वं रूपं चिदचिद्भिरेभिरभितो व्यञ्जन्स्वयं निर्मितै—
र्यस्योन्मीलति देशकालकलनानिष्कीलितं तन्महः ।

आत्मा वास्तु शिवोस्तु वास्त्वथ हरिः सोप्यात्मभूरस्तु वा
बुद्धो वास्तु जिनोस्तु वास्त्वथ परस्तमै नमः कुर्महे ॥३५०॥
भियं लवन्यलोकेषु कीर्तिं दिक्षु महीभुजे ।
लक्ष्मीं वक्षसि कोटां च कारायां स ततो व्यधात् ॥ ३५१ ॥
नीत्वावस्थान्तरं दौःस्थ्यशमात्कश्मीरमण्डलम् ।
श्रीशंसदीन इत्याख्यामन्यां स्वस्य व्यधान्नृपः ॥ ३५२ ॥
राजा सतीसरःक्षोणिशुक्तिमुक्तामणिस्ततः ।
अर्थचिन्तामणिर्वैरिरत्नवज्रमणिर्बभौ ॥ ३५३ ॥
महावने भुजे तस्य काष्ठोद्दीपनशालिनः ।
मौर्वीकिणः प्रतापाग्नेरधूमायत संततम् ॥ ३५४ ॥
अहरन्मन्त्रिणां राजा संशयं न तु तस्य ते ।
भिनत्त्यन्यान्मणीन्वज्रो नान्यरत्नानि तं पुनः ॥ ३५५ ॥
राज्याधिकारानखिलान्स्त्रीभावाद्दुःसहात्स्वयम् ।
येषु विश्वासपात्रेषु श्रीकोटा स्वयमार्पिपत् ॥ ३५६ ॥
तेजोमहिम्नेव रविस्तमांसीव गुहान्तरात् ।
काष्ठवाटान्नृपो राजस्थानीयात्कष्टवाटगात् ।
भयात्ततोपि विद्राव्य श्लाघनीययशा बभौ ॥ ३५७ ॥
यत्र संध्यातपस्येव लवन्यैस्तिमिरैरिव ।
अरोधि रुचिसंचारः स्वामिनो बलशालिभिः ।
कश्मीरमण्डलं चण्डशौर्यदण्डितविद्विषा ।
क्रमागतमिवाशेषं क्षणात्तेन वशीकृतम् ॥ ३५८ ॥
हृत्वेव हृदयात्कम्पं संपदापि तदा स च ।
वामेतरेण लोकस्य बहुना नयनेन च ॥ ३५९ ॥
चिरं धुरं परिन्यस्य पुत्रयोः स्वादनूनयोः ।
नयोच्छ्रितयशा राज्यं सुखं भुङ्क्ते स्म भूपतिः ॥ ३६० ॥

स पञ्च वासरान्भुक्त्वा त्रीनब्दान्मेदिनीपतिः ।
अष्टादशेब्दे राकायामाषाढ्यां स व्यपद्यत ॥ ३६१ ॥

अथ प्रथमसामन्तसंमताज्ञः स ज्यंशरः ।
सतीसरःक्षिते रक्षामक्षामश्रीरटङ्कयत् ॥ ३६२ ॥

राज्यतोरणसंवाहस्तम्भाभ्यां धरणीपतेः ।
अनुजो बलबुद्धिभ्यामगमच्छङ्कनीयताम् ॥ ३६३ ॥

नैव दानं न चादानं निग्रहं नाप्यनुग्रहम् ।
विहारं न न चाहारं राज्ञो न्यूनं स हि व्यधात् ॥ ३६४ ॥

विद्याप्रणयविज्ञातप्रज्ञातिशयशालिनः ।
युवराजान्महाराजो वयसैवाधिकोभवत् ॥ ३६५ ॥

प्राग्वद्विश्वाससंपत्तिमकुर्वति महीभुजि ।
युवराजो मनाक्चक्रे निकटस्थैर्विरक्तधीः ॥ ३६६ ॥

तद्वैमनस्यवृत्तान्तश्रवणच्छिद्रलाभतः ।
युवराजं ततो राजस्थानीयाः प्रापुरञ्जसा ॥ ३६७ ॥

आगते विग्रहे व्यक्ति राजस्थानीयसंश्रयात् ।
सोगादवन्तिनगरं तन्मूलस्थानमुद्धतः ॥ ३६८ ॥

अथोत्पलपुरं राजा भटैः सह रणोद्भटैः ।
अशिश्रियदिदं भ्रातुर्वाचिकं च विसृष्टवान् ॥ ३६९ ॥

दुर्जनप्रेरणात्त्वं चेन्मत्स्नेहं नाभ्यजीगणः ।
लोकापवादज्वरतः कथं कम्पो न जायते ॥ ३७० ॥

अन्योन्यपालनायाज्ञां राज्ञस्त्रिदिवगामिनः ।
पालनीयामनुध्याय प्रत्यानय दयां मयि ॥ ३७१ ॥

इति संदिश्य दूतं च व्यसृजत्स नरेश्वरः ।
कम्पनाधिपतिं हन्तुं व्यसृजच्च निजात्मजम् ॥ ३७२ ॥

मृगयां युवराजोगादिति दूतं निरोधयन्।
भ्रातृपुत्रं निहन्तुं च श्रुतद्रोहोगमच्च सः ॥ ३७३ ॥
दूतः किमिति नायातः कालो हि सुचिरं गतः।
इति चिन्ताकुलो लक्ष्मभट्टो राजान्तिकं ययौ ॥ ३७४ ॥
ऊचे च जाने स द्रोहं लक्षयित्वा तवानुजः।
त्वत्पुत्रमारणायागाद्यद्दूतस्य चिरागमः ॥ ३७५ ॥
स्नाति भुङ्क्ते स्वपित्येव युवराज इति च्छलात्।
त्वदुद्योगनिषेधाय नूनं रुद्धो वचोहरः ॥ ३७६ ॥
तदवन्तिपुरं तस्मिन्छ्रीदेवसरसंगते।
सद्यो निःस्वामिकं हन्मो जयोस्माकं ततो ध्रुवः ॥ ३७७ ॥
अथावन्तिपुरं गत्वा सत्वातिशयशालिना।
राज्ञा युद्धं तथाकारि तद्भटैरुद्भटैः समम् ॥ ३७८ ॥
अल्लेश्वराय भृत्यानां वधं नूनं निवेदितुम्।
वितस्ता शवरुद्धौघा प्रतीपमगमद्यथा ॥ ३७९ ॥
भ्रातृपुत्रं पराभूय तावदल्लेश्वरे द्रुतम्।
व्यावृत्तरणखेदान्तः प्रापलायत ज्यंशरः ॥ ३८० ॥
दीपस्येव शिखाध्वान्ते यस्य धीरापदि स्फुरेत्।
स रत्नं रत्नजातेश्च पाषाणेभ्यः किमन्तरम् ॥ ३८१ ॥
समधित्सत भेदाय कंचित्कालं स वैरिणम्।
अमोघा दूरगा बुद्धिः शास्त्राण्यप्यतिवर्तते ॥ ३८२ ॥
आवयोर्नैव कर्तव्यः कलिर्मासद्वयीमिति।
राज्ञा समं विदांचक्रे धीमानल्लेश्वरस्ततः ॥ ३८३ ॥
प्रतिमोच्य निजान्योधानवन्तिपुरमुत्सृजन्।
अथ क्षीरीपथेनासावल्लेशोगमदीक्षिकाम् ॥ ३८४ ॥

नगरी रक्षतां न्यस्य सय्यराजे स्वमन्त्रिणि ।
क्रमराज्यं विराजच्छ्रीर्ज्यैशरश्चागमत्तदा ॥ ३८५ ॥
दानमानौ प्रतिश्रुत्य सय्यराजं विभिन्दता ।
युवराजेन नगरी स्वीकृता मन्त्रयुक्तिभिः ॥ ३८६ ॥
नामराजतया दुःखं भुक्त्वा कश्मीरमण्डले ।
मासद्वयोनौ द्वौ वर्षावसानमगान्नृपः ॥ ३८७ ॥
जानन्नलावदेनोथ तं कालं कलहाक्षमम् ।
द्वारैश्वर्यं ददौ भ्रातुस्ततो वैरनिवृत्तये ॥ ३८८ ॥
सलिलोत्तरणोपायं सेतुं सय्यपुरे व्यधात् ।
विपत्संतरणोपायं न पुनर्ज्यैशरोस्मरत् ॥ ३८९ ॥
पथिकानां निवासाय तेन पर्वतसीमनि ।
कक्ष्याविभागसहितः स्वनाम्ना रचितो मठः ॥ ३९० ॥
कपटापत्रपारोपाद्राज्ञः प्राप्तविभीषकः ।
स्वयं द्वारं त्यजन्सोगाद्ग्रामं ज्येष्ठेश्वराभिधम् ॥ ३९१ ॥
एवं विक्रमनीतिभ्यां देशं शोधयतो निजम् ।
श्रीशिरःशाटको राज्ञो द्वारैश्वर्यमवाप्तवान् ॥ ३९२ ॥
राजपुत्रः स वाक्पुष्टाटवीं लीलारसादटन् ।
योगिनीचक्रमद्राक्षीत्कदाचिद्गिरिगह्वरे ॥ ३९३ ॥
उदयश्रीस्तथा चन्द्रडामरश्चास्य वल्लभौ ।
अपश्यतां न किं लभ्यं महतामनुयानतः ॥ ३९४ ॥
अचलल्लाडनादण्डघण्टानां चण्डटांकृतम् ।
मनांसि न पुनस्तेषां वीराणां साहसस्पृशाम् ॥ ३९५ ॥
घटिताशातटं स्वाट्टहाससंवाहनादिभिः ।
योगिन्यो डमरुध्वानैर्भयादिव चलैर्बभुः ॥ ३९६ ॥

मान्तर्धासिषुरेवैताः प्रष्टुं द्रष्टुं च काङ्क्षिताः ।
इति तेश्वादवारोहन्प्रवीरा न तु तद्भयात् ॥ ३९७ ॥
शनैः शनैस्ततो यान्तो मौनपूर्वं महाशयाः ।
योगिनीनिकटं प्रापुर्विकटप्रकटौजसः ॥ ३९८ ॥
योगिनीनायिका दूरात्परिज्ञाय नृपात्मजम् ।
साशिषं सीधुचषकं प्राहिणोन्मन्त्रितं ततः ॥ ३९९ ॥
चन्द्रस्तदमृतं तृप्तिभाजा राज्ञावशेषितम् ।
उदयश्रीमुखापेक्षी न संतृप्तस्त्वशेषयत् ॥ ४०० ॥
भवितव्यबलादश्वपालं सपदि विस्मरन् ।
उदयश्रीरशेषं तत्पीत्वा तृप्तिं परामगात् ॥ ४०१ ॥
आश्चर्यातृप्तनेत्रेषु तेषु तृप्तेषु योगिनी ।
निमित्तज्ञावदद्राजपुत्रं बद्धाञ्जलिं ततः ॥ ४०२ ॥
अखण्डं भावि ते राज्यं चन्द्रस्त्वद्विभवांशभाक् ।
आजीवमुदयश्रीश्च मण्डितोखण्डया श्रिया ॥ ४०३ ॥
अश्वपालस्त्वसावस्मदनुग्रहविवर्जितः ।
अचिरेणैव कालेन नूनं प्राणैर्वियुज्यते ॥ ४०४ ॥
भविष्यत्सूचयित्वैवं योगिनीभिः समन्विता ।
सान्तर्दधे पुरः प्राणाः पश्चात्तुरगपालिनः ॥ ४०५ ॥
अविचारतमोमग्नाञ्जन्तूनुद्धर्तुमीश्वराः ।
संभवन्ति प्रजापुण्यैः प्रकाशोत्कर्षहेतवः ॥ ४०६ ॥
श्वशुराद्धर्तृभागं यदवीरा पुंश्चली वधूः ।
हरन्त्यासीत्स तं राजा दुराचारं न्यवारयत् ॥ ४०७ ॥
काष्ठवाटागतान्राजस्थानीयान्व्यूहतत्परान् ।
युक्त्यानीय महीपालो बद्ध्वा राज्यं सुखं व्यधात् ॥ ४०८ ॥

कोटराजस्य जामातुः कारावास्तव्यतां व्यधात् ।
भीत्या प्रत्यहमेवाथ जीवन्मृत्युमवारयत् ॥ ४०९ ॥

बुभुजे क्षेमराजश्रीस्वस्थां शस्त्रनखैः शतैः ।
विदार्य खटिकाभूमिं राजा सौकर्यभाजनम् ॥ ४१० ॥

जयापीडपुरे कृत्वा राजधानीं महामतिः ।
श्रीरिञ्चनपुरे चक्रे बोद्धा बुद्धगिराभिधम् ॥ ४११ ॥

एकोनविंशे वर्षेथ दुष्कृतोद्भवमद्भुतम् ।
दुर्भिक्षं क्षोभयामास लोकं शोकाकुलं महत् ॥ ४१२ ॥

मासानष्टौ द्वादशाब्दांस्त्रयोदश दिनानि च ।
क्ष्मां भुक्त्वा त्रिंशवर्षेथ चैत्रे राजा व्यपद्यत ॥ ४१३ ॥

मन्दराजकथाख्यानाज्ज्याड्यं मद्वाचि संस्तुतम् ।
तीक्ष्णप्रतापशाहावदीनाख्यानाद्विनश्यतु ॥ ४१४ ॥

राज्ञि शाहावदीनेथ स्मरणं क्षितिरत्यजत् ।
ललितादित्यसंपत्तिविपत्तिसुखदुःखयोः ॥ ४१५ ॥

श्रीमान् शाहावदीनोथ प्राज्यं साम्राज्यमग्रहीत् ।
येन राजन्वती भूर्द्यामहसत्तद्यशोमिषात् ॥ ४१६ ॥

ग्रीष्मार्के द्यौरिवान्यर्तून्नाज्ञोतीत्य बहून्मही ।
ध्रुवमापज्जयापीडमेतं न तु स किल्विषी ॥ ४१७ ॥

पूर्वे परे च भूपाला नायकेनैव भूषिताः ।
क्ष्मानायकेन तेनाथ मुक्तागुणलसच्छ्रिया ॥ ४१८ ॥

सिन्धौ वाडवतप्ताम्बुन्यपि बिम्बितमम्बरम् ।
यत्प्रतापाग्नितापार्तं मज्जतीव दिवानिशम् ॥ ४१९ ॥

तदीयो जयलक्ष्मीभिः प्रविष्टाभिः पदे पदे ।
न प्रतापानलोतृप्यत्सरिद्भिरिव सागरः ॥ ४२० ॥

जयं विना गणयतः क्षणमात्रं वृथा गतम्।
वृद्धस्य तरुणीवाभूद्यात्रा तस्यातिवल्लभा ॥ ४२१ ॥

न मृगाक्षी न वा सीधुपानलीला न चन्द्रिका।
यात्रैव केवलं तस्य भूमिभर्तुर्मनोहरत् ॥ ४२२ ॥

न तापो न हिमं तस्य न संध्या न निशा तथा।
न क्षुन्न वा पिपासा च राज्ञो यात्रामविघ्नयत् ॥ ४२३ ॥

न सरिद्दुस्तरतरा दुरारोहो न पर्वतः।
दुर्लङ्घ्यो न मरुश्चाभूद्यात्रायां मानिनः प्रभोः ॥ ४२४ ॥

अजितां पूर्वभूपालैः पारसीककुलाकुलाम्।
उत्तराशां विजेतुं स प्रस्थानं प्रथमं व्यधात् ॥ ४२५ ॥

जगतां विजये कामो मधुसीधुवधूरिव।
चन्द्रलौलकशूरान्स सहायत्वेवृणोत्प्रभुः ॥ ४२६ ॥

सैन्यचेतांसि सत्त्वेन तमसा स्वविरोधिनः।
अपूरयत्स रजसा दिगन्तानुद्धतान्तकः ॥ ४२७ ॥

प्रविष्टं तस्य गोविन्दखानपालनशालिनि।
उदभाण्डपुरे पूर्वं बाणैस्तदनु सैनिकैः ॥ ४२८ ॥

शैलशृङ्गं नृपानीके प्राप्ते तस्य विरोधिभिः।
भयातुरैरवारोहः शृङ्गात्तुङ्गाद्यधीयत ॥ ४२९ ॥

सदृशं प्राभृतं दातुमसमर्थोस्य सिन्धुपः।
उपधीकृतवान्कन्यारत्नं त्राणाय भूपतेः ॥ ४३० ॥

राज्ञस्तु गौरवं बाहौ गान्धाराणां भुवोढया।
चित्रं तु लाघवं तेषां भयभाराभिषङ्गतः ॥ ४३१ ॥

भङ्गस्तुङ्गस्य शृङ्गस्य खड्गानां नैव भूभुजा।
शितानामपि देशोस्मिन्विहितः शौर्यशालिना ॥ ४३२ ॥

आकर्ण्य राजसिंहस्य सिंहनादमयीं चमूम् ।
मदं तत्याज चस्खाल बिभाय गजिनी पुरी ॥ ४३३ ॥

स्नानं रक्तैर्द्विषां भुक्तं प्राणवातैर्महीतले ।
व्रतस्थाभिरिवास्वापि तस्याहो धीरहेतिभिः ॥ ४३४ ॥

श्रोत्रियक्षत्रियैरष्टनगरेरोदि शाम्यतोः ।
तरुणाग्निप्रतापाभ्योर्धूमेनेव भयातुरैः ॥ ४३५ ॥

यशसा सह संपत्ति तस्मिल्लुँण्ठयति प्रभौ ।
प्रापत्पुरुषवीराख्यदेशाख्या रूढिशब्दताम् ॥ ४३६ ॥

दत्तबाष्पनिवापाम्भोनगराग्रहरस्त्रियः ।
जीवतः स्वस्य पत्युश्च पिण्डौ स्तननिभाद्दुः ॥ ४३७ ॥

अश्वक्षोददलद्धिन्दुघोषधातुतटच्छलात् ।
उदक्पतितिरस्कारप्रशस्तिं स व्यधात्प्रभुः ॥ ४३८ ॥

ततो व्यावृत्य गच्छन्स दक्षिणाशां स्ववाजिनाम् ।
मार्गखेदोचितं तापं शतद्रुर्वारिणाहरत् ॥ ४३९ ॥

ढिल्लीमुल्लङ्घ्य तत्कालमुदक्पतिमुपागतम् ।
मार्गरोधेन नृपतिर्निनान्तमुदवेजयत् ॥ ४४० ॥

योगिनीपुरपौरान्यान्धाट्या नैषीदुक्पतिः ।
मार्गदानोपकारेण स तानादित भूभुजे ॥ ४४१ ॥

तुरङ्गवस्त्रदानेन स तान्संमान्य भूपतिः ।
स्वदेशं प्राहिणोत्कीर्तिराशीन्मूर्तान्वहूनिव ॥ ४४२ ॥

सुशर्मपुरराजेन तस्मात्स्वाशर्मशङ्किना ।
दुर्गाहंकारमुत्सृज्य देव्येव शरणीकृता ॥ ४४३ ॥

तत्प्रतापानलः पीत्वा केदाराश्रयिणां रसम् ।
जातानां शिवलिङ्गानां वत भङ्गमदर्शयत् ॥ ४४४ ॥

स्वयं नत्या नतून्नत्या भोट्टानामस्य भूपतेः।
अर्वतां पर्वतारोहदोहदो विनिवारितः ॥ ४४५ ॥

दुस्तरत्वात्तटस्थस्य देवताभिस्तनूकृतः।
सिन्ध्वोघो भूपतेरेवं पूर्वेभ्यः श्रुतमद्भुतम् ॥ ४४६ ॥

एवं नित्यजयोद्योगात्स्वदेशः परदेशवत्।
परदेशस्तु तस्यासीत्स्वदेश इव भूपतेः ॥ ४४७ ॥

प्रतापेनेति संपाद्य दिङ्मुखे तिलकश्रियम्।
व्यधात्प्रविश्य कश्मीरान्स पौरनयनोत्सवम् ॥ ४४८ ॥

तस्य वर्णयतां शौर्यं प्रसङ्गादतिमानुषम्।
अस्माकं चाटुकारित्वं ज्ञास्यते भाविभिर्जनैः ॥ ४४९ ॥

यात्रायातः कदाचित्स दूरदेशे महीपतिः।
अप्सरःसदृशीं कांचिच्छुतवान्हरिणेक्षणाम् ॥ ४५० ॥

निजानुगान्वञ्चयित्वा राजा युक्त्या कयाचन।
अथैकाकी स तं देशमविशद्भोगलालसः ॥ ४५१ ॥

नर्मणा मोहयित्वा तां द्वितीय इव मन्मथः।
मनोरथानसिञ्चत्स तदोष्ठामृतपानतः ॥ ४५२ ॥

अपश्यन्तस्तमालोक्य हतं केनापि वैरिणा।
अथ कोपत्रपावेशमुद्भटास्तद्भटा ययुः ॥ ४५३ ॥

अन्विष्यद्भिस्तमश्वेन निबद्धेनाङ्गनाद्बहिः।
समभाव्यत तै राज्ञो वैरिभिर्निर्जयः कृतः ॥ ४५४ ॥

शौर्यस्वाम्यनुरागाभ्यां विधातुं युद्धमुद्भटैः।
तद्भटैः सदनं रुद्धमबद्धकवचान्तरैः ॥ ४५५ ॥

त्रसद्भिरिह तत्सिंहनादपूर्णात्ततः पुरात्।
कृतास्कन्देषु शूरेषु शत्रुभिर्विपिनं गतम् ॥ ४५६ ॥

अथाश्वास्य प्रियां तां तु शत्रून्मत्वा समागतान् ।
स्वशौर्यं सफलीकर्तुं योद्धुं राजा विनिर्ययौ ॥ ४५७ ॥

शाहावदीनमालोक्य तं तेषामनुजीविनाम् ।
चित्तैः प्रीत्या मुखैर्भीत्या नीत्या मूर्धभिरानतम् ॥ ४५८ ॥

एवं समजयस्तम्भयूपाव्रणमखान्बहून् ।
हतवैरिपशूंश्चक्रे स्वप्रतापानलार्चिषः ॥ ४५९ ॥

स्वदेशे मन्त्रिणोस्तस्य कोट्टभट्टोदयश्रियोः ।
समरेषुभरस्त्वासीच्चन्द्रडामरलौलयोः ॥ ४६० ॥

देवशर्मान्वयोदन्वच्चन्द्रो राज्ञार्पितं मुहुः ।
वैराग्याद्भिभवं त्यक्त्वा कोट्टशर्मा वनं ययौ ॥ ४६१ ॥

श्रीवृष्ट्या कोट्टभट्टोर्थिसार्थान्संपोष्य यत्नतः ।
व्यलालयद्घनव्योम्नि स स्वं नियममारुतैः ॥ ४६२ ॥

कोट्टशर्मा तथा धर्मद्रुमं दानाम्भसासिचत् ।
न नाशामयो भूयो यथा तत्फलभोगिनः ॥ ४६३ ॥

तस्य दर्शयितुं राज्ञः स्वबलाधिकतां ध्रुवम् ।
कदाचित्तत्प्रजा दैवी व्यापद्गाढमपीडयत् ॥ ४६४ ॥

पुरीकैरविणीसूरः शूरः पादपविद्विषाम् ।
षट्त्रिंशेब्दे जलापूरः क्रूरो व्यप्लवत प्रजाः ॥ ४६५ ॥

तदन्तःप्रतिबिम्बस्थे स्वस्मिन्सद्मान्तरभ्रमात् ।
तद्वीक्षार्थमिवानीके तोये तुम्बीर्व्यधुर्गृहाः ॥ ४६६ ॥

नगरब्रुडनादस्तु मुञ्चन्तो निर्झरच्छलात् ।
तस्योद्द्वीपस्य महतः पर्वतास्तटतामगुः ॥ ४६७ ॥

न स वृक्षो न सा सीमा न स सेतुर्न तद्गृहम् ।
तटस्थमपि यन्नैव जलपूरो व्यनाशयत् ॥ ४६८ ॥

नाद्रिदुर्गाण्यपश्यत्स जातुचिद्वैरिभीतितः।
अम्बुपूरभयात्तेषु राजा समचरत्तराम् ॥ ४६९ ॥
पीते तत्तेजसेवाम्बुपूरे शान्ते मितैर्दिनैः।
भूयस्तद्विप्लवाशङ्की सोचिकीर्षद्विरौ पुरीम् ॥ ४७० ॥
नाम्ना लक्ष्म्या महिष्या स प्रसिद्धां नगरीं व्यधात्।
त्वराकृतनिजौदार्यन्यूननिर्माणदर्शनात् ॥ ४७१ ॥
शारिकां शैलराजस्य मूले पुण्यजनाश्रिताम्।
यामद्राक्षीत्तरां लोकः सुमेरोरलकामिव ॥ ४७२ ॥
वितस्तासिन्धुसंभेदे स्वनाम्ना नगरीं व्यधात्।
प्रतिबिम्बच्छलात्तोये त्रपया स्वर्निमज्जति ॥ ४७३ ॥
सौधोत्सेधमयीं राशीभूतां कीर्तिमिवामलाम्।
अलोलश्रीः पुरीं लौलडामरः स्वाभिधां व्यधात् ॥ ४७४ ॥
सुधाधौतैर्मठैर्लक्ष्मीं फलयद्भिः कृतैः पुरीम्।
कुलिशच्छिन्नकैलासशृङ्गभङ्गिमजीजनत् ॥ ४७५ ॥
आजन्मलोलता मह्याः स्वरसाम्याय वर्धिता।
निहन्ति च्छायया तस्या द्युमणिस्पर्शजं सुखम् ॥ ४७६ ॥
या लक्ष्म्या भागिनेयीत्वाद्बालापालि निजान्तिके।
लासाख्या सा समक्रामन्नृपतेश्चित्तदर्पणे ॥ ४७७ ॥
यश्चानुरोधतन्तुस्तं चिरं लक्ष्म्यां निबद्धवान्।
स च्छिन्नो रागवेगेन लासासौन्दर्यजन्मना ॥ ४७८ ॥
बलिजिन्मूर्तिना तेन वसन्त्या वक्षसि श्रियः।
प्रातिवेश्मिकतां नीता लासा सौभाग्यदायिनी ॥ ४७९ ॥
छाया तद्रचितोदयापि दिवसश्रीभोगमातन्वतः
सूर्यात्संमुखतां जहाति वहति श्रेयोहरीं कालताम्।

स्त्रीणामस्ति चतुर्गुणा मतिरिति स्थाने न हन्त श्रुति-
र्यद्वा दुर्विधिपाकमाकलयितुं शक्तो न कश्चिद्भुवम् ॥४८०॥

प्राकृतस्यावताराख्या वल्लुस्यापि सुता सती ।
लक्ष्मीर्लासानुरक्तेधादथ रोषं महीपतौ ॥ ४८१ ॥

रोषात्सिन्धुपतेर्देशं संबन्धित्वाद्गतां नृपः ।
प्रत्यानयन्नपोद्रेकान्न पुनः स्नेहगौरवात् ॥ ४८२ ॥

अलाब्वो न्यब्जुडन्नन्तरप्लवन्त जले शिलाः ।
लक्ष्मीपक्षः क्षयं वृद्धिं लासापक्षस्तु लब्धवान् ॥ ४८३ ॥

यावद्यावदगाद्दूरं लक्ष्मी रात्रिरिव क्रुधा ।
तावत्तावत्स तां लासां दिवं भास्वानिवाभजत् ॥ ४८४ ॥

अपनीय तापखेदं मरुकरिणी पद्मिनीतोयैः ।
तत्पद्मशैवलाम्भोनिर्माथे कर्मठीभवति ॥ ४८५ ॥

लक्ष्म्या मातृस्वसुः सर्वमातृकृत्यकृतोभवत् ।
राजप्रियाथ राकेव लासा पक्षक्षयोद्यता ॥ ४८६ ॥

सत्कर्मपाकसमयोस्य न चेद्विकाश-
शोभां न किं परिहरेत्कुमुदाकरस्य ।
विश्वप्रबोधहरणप्रवणा प्रियेण
कुस्त्री निशा च सहसैव सुधाकरेण ॥ ४८७ ॥

चिन्तासूचकनिश्वासम्लानौष्ठी तं कदाचन ।
अवोचद्भोगिनीवेति लासाख्या भोगिनी नृपम् ॥ ४८८ ॥

न चेद्विकाशयेद्भास्वान्पद्मिनीं स्वरुचा स्फुटम् ।
तस्याश्छेदाय शैवालवल्लुचा इव यतेत कः ॥ ४८९ ॥

पतन्तीं प्रेमभारार्द्रां मयि दृष्टिं तवासहा ।
मां निहन्तुमुपायेन क्रमते महिषी तव ॥ ४९० ॥

अभिचारे दुराचारमुपचारप्रियंकरम्।
सा चाराक्षी मम द्वेषादुदयश्रियमैरयत् ॥ ४९१ ॥
देव्यद्वेषपरे तस्मिन्नभिचारविनिर्मितिः।
असंभाव्येति तां राजा प्रत्युवाच विचक्षणः ॥ ४९२ ॥
निर्बन्धेनोपजल्पन्तीं तदेव वचनं ततः।
तां प्रत्याययितुं देवीमुदयश्रियमब्रवीत् ॥ ४९३ ॥
व्ययस्यातिशयेनाहो कोशो रिक्तत्वमागतः।
प्रार्थयन्ते जना राज्ञः सर्वे कल्पतरूनिव ॥ ४९४ ॥
द्रविणोत्पत्तये तस्मादुपायः प्रतिभात्ययम्।
प्रतिमा श्रीजयेश्वर्या यातिरीतिमयी पृथुः ॥ ४९५ ॥
तां खण्डयित्वा विहितैष्टङ्कैर्मन्नामचिह्नितैः।
व्ययनिर्वहणं कीर्तिस्थिरत्वं चोपजायते ॥ ४९६ ॥
साध्वेतत्किं तु तन्मूर्तिर्लघ्वी किं प्रभविष्यति।
बृहद्बुद्धेनमुद्रास्तु क्षुद्रस्तं सचिवोऽभ्यधात् ॥ ४९७ ॥
तत्रोपकरणं सज्जीकृत्यान्येद्युरुपागतम्।
राज्ञीं प्रत्याय्य भूपालो रहो मन्त्रिणमब्रवीत् ॥ ४९८ ॥
पुंनागव्रजमुन्मुमूलयिषति प्रायः कराकर्षणै-
रुद्दामं विजिहीर्षति प्रतिपदं कक्ष्याच्छिदां काङ्क्षति।
कां नैच्छन्नृपगन्धसिन्धुरपतिस्तीव्रां न वप्रक्रियां
तीक्ष्णाग्रप्रतिभाङ्कुशोस्य निकटे मन्त्री नियन्ता पुनः॥४९९॥
याः पूर्वैर्निरमीयन्त यशःसुकृतलब्धये।
अङ्गीकर्तासि मे देवप्रतिमास्ता विभङ्क्षत ॥ ५०० ॥
अमरप्रतिमा विधाय केचि-
त्परिपूज्याथ परे प्रसिद्धिमाप्ताः।

परिपाल्य यथोचितं तथान्ये
विदलय्याहमहो महद्दुरन्तम् ॥ ५०१ ॥
निर्माणाज्जलधेः समस्तसरितां कौमारशोकावधिः
प्रख्यातः सगरो भगीरथनृपो गङ्गावताराच्च सः ।
दुष्यन्तः स च विश्वविश्वविजयादिन्द्रस्य भीतिप्रदो
रामो हन्त दशाननेन विहितात्सीतापहारात्पुनः ॥ ५०२ ॥
राजा शाहावदीनाख्यः सुरमूर्तीरलोठयत् ।
इतीयं दुष्कथा विश्वं कथं न क्षोभयिष्यति ॥ ५०३ ॥
उदयश्रीर्नतशिरा राज्ञीत्युक्तवति स्वयम् ।
महीरन्ध्रमिवैक्षिष्ट द्रागधोगतिवाञ्छया ॥ ५०४ ॥
सर्वंसहा तदा क्ष्माभूदन्वर्था प्राग्वदेव यत् ।
लासानुरक्तमपि तं सा राजानमसेवत ॥ ५०५ ॥
भास्करो द्युपरीरम्भरसासादितकौतुकः ।
स्वपुत्रशनिमुख्यानां ग्रहाणां शान्तिमिच्छति ॥ ५०६ ॥
रागी तद्दोषवादिन्या लासादेव्या प्रबोधितः ।
व्यवासयत्स्वदेशात्स राजपुत्रान्परानिव ॥ ५०७ ॥
कार्येष्वतिमनुष्येषु साहायकविधायिभिः ।
योगिनीपुरनाथस्य तैरभूषि निजं कुलम् ॥ ५०८ ॥
औदार्याद्दत्तवृत्तीन्स हिन्दुखानेन बोधितः ।
म्लेच्छान्सिकन्दरमुखान्राजद्रोहकृतोवधीत् ॥ ५०९ ॥
पिशुनैर्जनिताशङ्कः शूरे मदनलाविके ।
राजा विप्लवसज्जोपि सेवयास्य निवारितः ॥ ५१० ॥
औदार्यशालिना राज्ञा स्वसमं वर्धितः स्वयम् ।
राजाधिकं व्यवाहार्षीत्तदा मदनलाविकः ॥ ५११ ॥

तुल्यार्थः समसामर्थ्यः शङ्कचोयमिति भूपतिः।
ईर्ष्यालुभिः कुसचिवैस्तस्मै परमकोप्यत ॥ ५१२ ॥
शुचिमप्यशुचिं मत्वा तं [illegible]तिं भूमिपालधीः।
खलनाशावृतत्वेन न चित्तविरताभवत् ॥ ५१३ ॥
उपप्लवयितुं वाञ्छंस्तं मुहुः क्रोधवेगतः।
राजरत्नाकरोरोधि तदीयगुणवेलया ॥ ५१४ ॥
उत्तराशां नृपो जातु व्यसनेनाभ्यषेणयत्।
नौसेतुकौतुकं सिन्धोः परिखाया इवाहरत् ॥ ५१५ ॥
शूरः खड्गनगर्यौ स पर्यटन्मृगयारसात्।
सिंहमन्वद्रवद्राजसिंहः संहतसाहसः ॥ ५१६ ॥
गच्छंश्चित्ताधिकं राजा वाजिना वेगराजिना।
अपारशौर्यभक्तिभ्यां मदनेनानुधावितुम् ॥ ५१७ ॥
आरुढः पौरुषं राजा सोवरूढस्तुरङ्गमात्।
यमेनेव व्यधाद्युद्धं हरिणा क्रौर्यधारिणा ॥ ५१८ ॥
एकाकिनं चिरं बद्धयुद्धमुद्धतकेसरः।
तमधः कृतवान्राजसिंहं सिंहोतिसाहसम् ॥ ५१९ ॥
उत्प्लुत्य वाजिनस्तूर्णं भक्तो मदनलाविकः।
निपातितनृपं सिंहं कृपाण्या सहसावधीत् ॥ ५२० ॥
प्राणरक्षोपकारेण प्रसन्नः पिशुनाज्ञनात्।
युक्त्या मारणमेतस्य शङ्कमानो नरेश्वरः ॥ ५२१ ॥
स विवाहच्छलाद्दत्त्वा द्रविणं करुणामयः।
मदनं व्यसृजद्दिल्लीपतेर्निकटमञ्जसा ॥ ५२२ ॥
उत्पन्नचम्पकं व्योम कुर्वतीं जातुचित्त्विषा।
स्वप्ने शंकरसूहाख्यो दृष्टवान्काञ्चनीं पुरीम् ॥ ५२३ ॥

निश्छद्मकौतुकाक्रान्तः सद्मसद्म विशन्नयम् ।
शून्यं पश्यन्नहो शोकविस्मयाभ्यामपूर्यत ॥ ५२४ ॥
रहस्थां राहुभीत्येव मूर्तिमिन्दोरनिन्दिताम् ।
कांचिदेकाकिनीं दृष्ट्वा राजधान्यां स पृष्टवान् ॥ ५२५ ॥
प्रत्यक्षा पुरदेवीव का त्वं कस्य च पूरियम् ।
तेजःसारमिवैकत्र कस्य चेदं कलेवरम् ॥ ५२६ ॥
सा जगादेति कश्मीरांस्तत्रत्यैः सह भुञ्जतः ।
राज्ञः शाहावदीनस्य मूर्तिं रक्षाम्यमूमहम् ॥ ५२७ ॥
प्रयोक्ष्यमाणो विधिना पातुमेतां निजां पुरीम् ।
अह्नां शतेन कश्मीरभोगात्स च निवृत्स्यति ॥ ५२८ ॥
प्रत्यवेक्षाप्रयत्नस्य स्वामिनस्तस्य दर्शनात् ।
अचिरेणैव भोक्ष्येहं ध्रुवमस्य फलश्रियम् ॥ ५२९ ॥
इति श्रुत्वा प्रबुद्धः स विस्मयाविष्टमानसः ।
यथावद्वृत्तमाचक्षौ शाहाब्दाय महीभुजे ॥ ५३० ॥
माहात्म्याद्धाविभोगेषु निश्चयाद्वा महीपतिः ।
धनं संत्यक्तवान्सर्वं न तु धैर्यं मनागपि ॥ ५३१ ॥
मदन्तिकमुपागम्यमिति भूमिपतिस्ततः ।
दूरस्थितानां पुत्राणां सद्यो लेखान्विसृष्टवान् ॥ ५३२ ॥
पूर्वराजगुणादर्शो मुमूर्षुर्भूपतिस्ततः ।
अप्राप्तेषु सुपुत्रेषु स्वानुजं राज्यमार्पयत् ॥ ५३३ ॥
तं भक्तं नेश्वरोनैषीत्सदेहं यत्सधर्मताम् ।
तत्र हेतुर्ध्रुवं तस्मिन्सौभाग्यान्मदनभ्रमः ॥ ५३४ ॥
शौर्योदार्यविधौ विधौतविविधश्लोके नृलोकेश्वरे
तस्मिन्नस्तमुपागते गुणिगणत्राणोच्चरत्नैपुणे ।

शक्रेणोन्नमितं शिरः परिभवत्रासापसाराद्ध्रुवं
भूभारोद्वहनात्पुनर्विनमितं शेषेण शोकस्पृशा ॥ ५३५ ॥
प्रत्यक्षं ज्वलतः प्रतापशिखिनः स्वीकृत्य यं भुक्तवा-
नन्यान्नाद्रियताधिकं स्पृहयतस्तद्रागबन्धाच्च या।
तां भूमिं प्रविहाय हायमगमद्द्यां शक्रभुक्तां चिरं
पुंसां स्त्रीषु कदापि न प्रभवति प्रेमग्रहप्रत्ययः ॥ ५३६ ॥
ज्येष्ठशुक्लचतुर्दश्यां तानाङ्के वत्सरे नृपः।
आलिङ्गनैः सुरस्त्रीणांस्तनौन्नत्यमपीफलत् ॥ ५३७ ॥
मत्वेव भूजयाद्भूयः पुनरुक्तापवादताम्।
शाहावदीने निर्जेतुं द्यामिव प्रस्थिते सति ॥ ५३८ ॥
कुह्वदीननरेन्द्रोथ मौलावाज्ञां महीभुजाम्।
चित्ते सुखं मुखे हर्षं स्तुतिं वाचि न्यधात्ततः ॥ ५३९ ॥
तस्य प्रतापकमला सगर्वपदवीमगात्।
जयव्यसनिपूर्वेशविरहान्तेव भूपतेः ॥ ५४० ॥
तद्वियोगासहादेशदेवी जयमधात्स्वयम्।
नातितीव्रो न वा मन्दः सर्वस्यैव महीपतिः।
चित्तमादित लोकस्य वैषुवो भानुमानिव ॥ ५४१ ॥
अह्नायापह्नुतं युद्धे तद्धनुःप्रतिकूजितम्।
शोचद्भिरिवधूवर्गक्रन्दितैर्मत्सरादिव ॥ ५४२ ॥
दिङ्मुखे चन्दनालेपः कीर्तिरम्बरचन्द्रिका।
धरणीरमणस्यास्य द्विषामाम्लापयन्मुखम् ॥ ५४३ ॥
क्षेम लक्ष्मीं प्रजाः क्षोणीपाले तन्वति तन्वति।
भूमावेव स्थिता नाकभोगसौख्यमभुञ्जत ॥ ५४४ ॥
लोहरप्रत्यवेक्षार्थं यान्व्यधात्पूर्वभूपतिः।
लोहराधिपतेर्भीत्या ते पलाय्य गतास्ततः ॥ ५४५ ॥

शाम्यन्त्यौषधयः सर्वाः शशिन्यस्तं गते सति ।
दृष्टो हि सूर्यकान्तानां रवौ याति द्युतिक्षयः ॥ ५४६ ॥
लोहरं प्रतिसंधातुं कुद्धुदीनमहीपतिः ।
शौर्यशालिनमादिक्षत्पुरो डामरलौलकम् ॥ ५४७ ॥
अवेष्टयत्ततो गत्वा लोहराद्रिं स सर्वतः ।
प्राणा हि स्वामिभक्तानां तृणायन्ते महात्मनाम् ॥ ५४८ ॥
असामर्थ्यान्निजं दुर्गं दुर्गेन्द्रोर्पयितुं ततः ।
ब्राह्मणान्व्यसृजद्दूतान्डामराधिपतिं प्रति ॥ ५४९ ॥
द्विजलिङ्गान्स तान्मत्वा सारं द्रष्टुमुपागतान् ।
न्यग्रहीद्विग्रहादुग्राद्विजानव्यग्रमानसः ॥ ५५० ॥
द्विजदैवतमप्येनं श्रुत्वा तदपकारिणम् ।
लोहरेन्द्रो न कोट्टाशां जीवाशां च विसृष्टवान् ॥ ५५१ ॥
पश्यन्तो मरणं स्वस्य युद्धे वाथ पलायने ।
क्षत्रियाणां निजं धर्ममग्रहीषुस्ततो रणम् ॥ ५५२ ॥
शरासारशिलावर्षैर्दुर्दर्शा दुर्घना इव ।
लोहराद्रेरवारोहन्नारोहंस्तु यशांसि ते ॥ ५५३ ॥
स्वं खण्डीकृत्य शैलेन विभक्तं स्वामिभक्तितः ।
प्रत्येकं शत्रवस्तेषु शिलावर्षिष्वमंसत ॥ ५५४ ॥
दृषत्सु तद्विकीर्णासु लौलडामरनायकः ।
त्रपयेव तिरोधानं समं कीर्त्यागमत्ततः ॥ ५५५ ॥
शत्रुकीर्णशिलाराशिच्छन्नो डामरलौलकः ।
यवनप्रेतसंस्कारान्न विपद्यप्यहीयत ॥ ५५६ ॥
स्त्रीविधेयतया पूर्वं निर्वास्यापि निजान्सुतान् ।
स्वप्नज्ञापितदृष्टान्तः शाहाब्दीनो महीपतिः ॥ ५५७ ॥

आकारयत लेखैर्यान्स्वाभिज्ञानपरिष्कृतैः ।
तज्ज्यायान्हस्सनस्तावदापन्महेन्द्रमण्डलम् ॥ ५५८ ॥
स नेत्रशुक्तिमुक्ताभिर्मुक्ताभिर्बाष्पवीचिभिः ।
श्रुत्वा तत्र पितुर्मृत्युं निवापाञ्जलिमार्पिपत् ॥ ५५९ ॥
व्यावृत्य गमनेच्छायाः स्वच्छाशयममुं ततः ।
न्यवारयत्पितृव्यस्य लेखः कश्मीरभूपतेः ॥ ५६० ॥
शक्रादिसख्यलोभेन भृत्यानस्मानपेक्ष्य सः ।
समस्कुरुत शाहावदीनभूमिपतिर्दिवम् ॥ ५६१ ॥
स्वःस्त्रीभोगरसेनेव गमनाय त्वरावतः ।
तस्यास्माभिर्भवत्कार्यमशेषं निरपाद्यत ॥ ५६२ ॥
क्ष्मारक्षालक्षणामाज्ञां विचक्षणशिरोमणेः ।
तन्मन्त्रिमानितां मौलिमूले मालां विदध्महे ॥ ५६३ ॥
गमनागमनाभ्यां त्वं पितुः पालितयाज्ञया ।
श्रीराम इव भूलोकं यशोभिः स्वैरपूपुरः ॥ ५६४ ॥
भूतो भावी च संमानो यद्यपि स्वगुणैस्तव ।
यौवराज्यग्रहाद्भारं लघूकुर्यास्तथापि मे ॥ ५६५ ॥
स्वधैर्यं सत्यसंयोगो नानाबन्धुसमागमः ।
जगद्रक्षाधिकारश्च दौर्मनस्यं विलुम्पतु ॥ ५६६ ॥
यशसेव प्रमीतानां परदेशनिवासिनाम् ।
प्राप्तेन विभवेनापि महतां न सुखं भवेत् ॥ ५६७ ॥
स्वरूपप्रतिबिम्बेन भवता स्वर्गवासिनः ।
त्वदुत्कण्ठाभरोस्माकं दर्शनेन निवार्यताम् ॥ ५६८ ॥
पुत्रः शाहावदीनस्य सोयमित्यन्यमण्डले ।
अङ्गुल्यग्रेण निर्देशः प्राकृतस्येव मास्तु ते ॥ ५६९ ॥

राज्ञां मदनुकम्प्यानां मुखप्रेक्षी भवन्भवान् ।
कश्मीरैश्वर्यमाहात्म्यं मा नैषीरल्पकल्पताम् ॥ ५७० ॥

विभज्य भवति क्षोणीभारं मेरुगिराविव ।
सुखसंपत्तिमतुलामनन्तद्युतिरामुयाम् ॥ ५७१ ॥

कीर्तिं सुरवधूगीतां पात्रे श्रीप्रतिपादनात् ।
स कर्णपूरयन्राजा माद्दत स्वर्गमालतीः ॥ ५७२ ॥

प्रिययोरावयोः स्नेहश्रुतिसौख्येन शीतलैः ।
निःश्वासैर्भूपतेः स्वोयैः स्यादस्पृह्यं च चामरम् ॥ ५७३ ॥

येन मानेन मामन्वग्रहीत्स वसुधाधिपः ॥
त्वं संचरस्व तेनैव मयि पालयति प्रजाः ॥ ५७४ ॥

त्राता द्यौः शक्रराजाभ्यामावाभ्यां च समं मही ।
शेषैकनाथां पाताललक्ष्मीं हसतु निःसुखाम् ॥ ५७५ ॥

उदयश्रीमुखामात्यमतानुष्ठानशालिनीम् ।
ममार्थनानिषेधेन लक्ष्मीं नैव वृथा कृथाः ॥ ५७६ ॥

अजानँल्लोलकर्णत्वं राजेन्द्रकरिणामथ ।
पन्थानं लेखवाची स कश्मीराणामगाहत ॥ ५७७ ॥

पवनैः संमुखायातैर्झोंकाररवधारिभिः ।
न्यवार्यतेव कश्मीरप्रवेशाद्राजनन्दनः ॥ ५७८ ॥

स विशन्नथ कश्मीरसरणीमुदजिज्वलत् ।
अमलीमसयद्राज्ञः श्रुतिं तु खलचोदना ॥ ५७९ ॥

नक्राः समुद्रमिव केचिदुदेतुकामा
वाता लताग्रमिव केचन दर्पवेगात् ।
दुर्मन्त्रिणो भुवनकाननचक्रवाल-
हव्याशना नरपतिं प्रविलोलयन्ति ॥ ५८० ॥

प्राप्तेथ हस्सनेभ्यर्णं क्रौर्यनिर्णयवादिभिः।
वर्णाश्रमगुरुस्तूर्णं पिशुनैरिति बोधितः॥ ५८१॥
सर्वासामेव बुद्धीनामुपरीश्वरबुद्धयः।
तथापि सचिवैर्वाच्यो हिताहितविनिर्णयः॥ ५८२॥
पुरंदरादिलोकेशतेजोंशाश्रयशालिनाम्।
स्ववंश्येभ्यो नरेन्द्राणामन्तरायो विलोक्यते॥ ५८३॥
स्पर्शनाशितया ख्याताद्भ्रातृपुत्राद्धि जिह्मगात्।
कृष्णसर्पादिवाश्लिष्टात्कष्टं दूरे न कस्यचित्॥ ५८४॥
विभवैस्तर्प्यमाणोयं न च स्वीभविता तव।
स्नेहेन सिच्यमानोग्निः शीतलत्वं किमृच्छति॥ ५८५॥
वरं हालाहलो घोरो न दुरात्मा च दुर्जनः।
तस्य पानाद्भलत्येकः परस्य त्वखिलं कुलम्॥ ५८६॥
दैवाद्दूरतरं सर्पं प्रसर्पद्विषधारिणम्।
विना दैवकृतं को नु निधौ स्थापयति स्वयम्॥ ५८७॥
न चिन्त्यं चायमेकाकी राज्ञो मे किं करिष्यति।
हरेः पुरः सयूथोपि कतमो वारणेश्वरः॥ ५८८॥
बुद्धिशस्त्रस्य किं नु स्यात्परिपन्थिपराक्रमैः।
नैतद्युक्तं सौगतौ हि राजपुत्रोदयश्रियौ॥ ५८९॥
आद्ये पक्षे द्रुतं नाशश्चिरं नाशः परे यतः।
नानुग्राह्यो न च त्याज्यस्ततस्ते हन्त हस्सनः॥ ५९०॥
न चैवं प्रायतावृत्तिं तेजस्वी स सहिष्यते।
यस्मिन्दहति नाम्भोधिं स क्षणो वाडवस्य कः॥ ५९१॥
अतस्तस्य निरोधेन निरुत्पिञ्जसुखाः प्रजाः।
कुण्ठयन्तुतरां पूर्वभूपालोत्कण्ठितां चिरम्॥ ५९२॥

प्रविष्टैरिति दुर्वाक्यैर्निर्गमाद्धिरिव ह्रदः ।
वैरस्यमभजद्राजा खलवाक्यैः स हस्सने ॥ ५९३ ॥

पश्यञ्शृण्वन्ननुभवंस्तस्यैवोत्सुकविक्रियाम् ।
भ्रातुः पुत्र इतिस्नेहात्तं बबन्ध न भूपतिः ॥ ५९४ ॥

उदयश्रीरथालक्ष्य विरक्तं हस्सने नृपम् ।
तद्धात्रीं लौलकवधूं समदिक्षत्तरामिति ॥ ५९५ ॥

स्वामिरागादिवारूढो नाकं डामरलौलकः ।
न यशो नाशयामास कुस्वामिमुखवीक्षणैः ॥ ५९६ ॥

अस्माद्दुर्मनसो राज्ञो विभवाशास्तु दूरतः ।
वर्धितस्य त्वया प्राणसंशयो हस्सनस्य तु ॥ ५९७ ॥

अतः प्रलोभ्य राजेत्थं त्वयानीयो निजान्गृहान् ।
योग्यं स्थानान्तरं नास्मद्विपन्निर्यातनाविधौ ॥ ५९८ ॥

तस्मात्त्वया निजार्थानां ग्रहणार्थं महीपतिः ।
प्रार्थनीयो यथाभ्येति त्वद्गृहानेष लुब्धधीः ॥ ५९९ ॥

विश्वस्तायाः किमर्थैर्मे धर्मकामार्थहेतुभिः ।
राज्ञोर्पयामि तान्सर्वान्यदि मे स्यादनुग्रहः ॥ ६०० ॥

अतः स्वकीर्तये पूर्तसंमानस्फूर्तयेस्तु मे ।
यत्तु त्वच्चरणस्पर्शोदर्शितानुग्रहं गृहम् ॥ ६०१ ॥

प्रत्याहृत्य स्वयं स्वीयमोषधेरिव सद्वसु ।
आशाः प्रकाशयत्वर्थपतिर्भास्वानिवाभितः ॥ ६०२ ॥

वदन्येन त्वयापेक्ष्यं न तु स्त्रीधनमित्यतः ।
रसाया रसमादत्ते लोकाप्यायाय भास्करः ॥ ६०३ ॥

अनेन वसुना राज्ञः फलत्तु प्रार्थनार्थिनाम् ।
सरितां वारि गृह्णानो मेघांस्तर्पयतेम्बुधिः ॥ ६०४ ॥

निधीनहिभिरावेष्ट्य गोपयन्ती मया मही।
उपहास्येत नाथेन मद्व्ये दृष्टिकारिणा ॥ ६०५ ॥
तथेति प्रतिसंदिश्य सा पुंवद्धैर्यशालिनी।
तद्बुद्धिपरितोषार्थमेवं संदेशमाक्षिपत् ॥ ६०६ ॥
एकाकी दीर्घधीकृद्यः किमुद्यच्छेत साहसे।
कदाचिन्नोच्चरत्येव करेणैकेन तालिका ॥ ६०७ ॥
सामर्षः सावलेपत्वात्कम्पनाधिपतिस्त्वया।
साहाय्यकार्थमभ्यर्थ्यः सिद्धे कार्ये धृतौजसा ॥ ६०८ ॥
भवतैव विधार्येयं निराधारत्वनिष्फला।
वाताहताश्रया द्राक्षावल्लीवान्येन भूरुहा ॥ ६०९ ॥
उदयश्रीरिति श्रुत्वा वाचिकं मतिमानपि।
तथैवायाचत्सहाय्यं कम्पनेश्वरलक्ष्मकम् ॥ ६१० ॥
हस्सनस्य जनन्याः स लक्ष्म्या ध्यायन्नपक्रियाः।
तस्मिन्प्रत्यपकारेच्छुस्तद्राज्ञे विन्यवेदयत् ॥ ६११ ॥
मन्त्रिभिर्विवृतः सोथ गुणवत्सलमत्सरैः।
अबोध्युदयभद्रस्य दुर्नयं तं नराधिपः ॥ ६१२ ॥
मन्त्रिणं स्तन्यमाप्याय स्वकीयमभयाय तम्।
राज्ञी राज्ञोस्य सुडाख्या पुत्रीयांचक्रुषी स्वयम् ॥ ६१३ ॥
स पूर्वस्वामिसंमानवृणमार्गोपलब्धये।
हस्सनाभ्युदयाङ्गानि प्राणानपि त्वजीगणत् ॥ ६१४ ॥
तत्रागतं महीपालं हनिष्यामो वयं छलात्।
बध्नीमो वा ततो राजपुत्रो वृद्धिमुपेष्यति ॥ ६१५ ॥
इति दैवाद्गते तस्मिन्मन्त्रे भेदं महीपतेः।
उदयश्रीस्ततो भीतः पलाययत हस्सनम् ॥ ६१६ ॥

आत्मनो वधबन्धेन मोचयन्नपराञ्जनान् ।
रसेन्द्र इव लोकेस्मिञ्श्लाघनीयत्वमश्नुते ॥ ६१७ ॥
कर्मण्यभीक्ष्णतीक्ष्णेपि तथा लक्षितमुद्यतम् ।
क्षमाशीलः क्षमापालो नातक्ष्णोदुदयश्रियम् ॥ ६१८ ॥
गुणैः संवृत्य रन्ध्राणि शुचितां शीलयन्बहिः ।
बिसवत्कालमनयत्पङ्कवत्सु जलेषु सः ॥ ६१९ ॥
बुद्धेलस्वामिनः कन्यारत्नं स्वीकृत्य हस्सनः ।
अविशल्लोहरं तावन्निरगाच्च दिशां भयम् ॥ ६२० ॥
कश्मीराम्बरबद्धस्य घनस्येवोदयश्रियः ।
धीवृष्ट्या पुष्टिमभ्यायात्केदार इव हस्सनः ॥ ६२१ ॥
युक्त्या मन्त्रान्मताथान्तराधिनेवोदयश्रिया ।
व्याधिनेव बहिर्भूपो हस्सनेनाभ्यभूयत ॥ ६२२ ॥
तावद्भमति यस्तोयं दूरात्स्पृष्टो हिमांशुना ।
कियन्नैव तदाश्लिष्टचन्द्रकान्तो वमेदिति ॥ ६२३ ॥
उदयश्रीर्गन्तुमना राजपुत्रान्तिकं ततः ।
परिहृत्य परान्मार्गान्सरलान्रोधशङ्कया ॥ ६२४ ॥
मडवासरणिं वक्रां सिद्धिहेतुं विदन्रहः ।
श्वशुरं वर्णितस्वीयरहस्यं मडवापतिम् ॥ ६२५ ॥
गङ्गराजमयात--न्मार्गेण विनिर्गमम् ।
अन्ते नश्यति धीः पुंसः सहस्रांशोरिव द्युतिः ॥ ६२६ ॥
न यद्युद्भेदयेत्कन्दकोटिं शृङ्गाटमुन्नताम् ।
कस्तस्यान्तर्निमग्नस्य ज्ञातुं शक्तो भवेत्स्थितिम् ॥ ६२७ ॥
स्वनाशशङ्कया गङ्गराजे तद्द्रोहवर्णिनि ।
इद्धतेजा नृपः क्रुद्धो रुणद्धि स्मोदयश्रियम् ॥ ६२८ ॥

परीक्षितुमिवोद्युक्तैर्गुरोस्तस्य च शेमुषीम्।
सुरैरिवार्थितो राजा क्रोधाद्यापादयत्स तम् ॥ ६२९ ॥

वायुश्चन्दनपादपं रयभयादुन्मूलयँल्लीलया
छिन्दन्पद्ममिभो घनः परिहरन्बालातपं हेलया।
पुंरत्नं पृथिवीपतिर्गुणमणिश्रेणिश्रियां रोहणं
रोषापस्मृतिमूर्छितेन मनसा निघ्नन्न कैर्गृह्यते ॥ ६३० ॥

भुवनोपवनेषु मानुषप्रसवानामथ वा प्ररोहताम्।
विचिनोति मनोहरं विधिर्विलसत्सौरभसंपदुज्ज्वलम् ॥६३१॥

हस्सनो नष्टधैर्यश्रीरुदयश्रीमतं विना।
विनष्टहस्तपालोंध इव पातमथान्वभूत् ॥ ६३२ ॥

पक्षिशाव इव क्रूरकरकाभग्नपक्षतिः।
पर्यन्तवृत्तिभिः क्रूरैर्हस्सनोथ न्यरुध्यत ॥ ६३३ ॥

प्रसादप्रीणितैः प्रायः खशराजैर्दुरात्मभिः।
राजपुत्रो हस्सनः स हन्त प्रत्यर्पितः प्रभोः ॥ ६३४ ॥

उत्पिञ्जे गलिते शत्रुवर्गे चाशाच्युते सति।
स तिग्मतेजा लोकानामालोकश्रियमादधौ ॥ ६३५ ॥

वितस्तायां स्वनामङ्का पुरी तेनाथ निर्मिता।
उच्छ्रितैः कनकच्छत्रैर्द्यामुल्लुण्ठयति स्म या ॥ ६३६ ॥

प्रत्यब्दं जनमालक्ष्य दुर्भिक्षक्षपितायुषम्।
मासि भाद्रपदेकार्षीत्स सत्रं भूरिदक्षिणम् ॥ ६३७ ॥

साधुसूक्तिसुधास्नानात्कर्णाभ्यर्णतले कचैः।
ध्रुवं धवलिमापेदे वार्धकेथास्य भूपतेः ॥ ६३८ ॥

भूषणं निजवंशस्य पूषणं धरणेरसौ।
वैरिश्रीदूषणं पुत्ररत्नं न च स लब्धवान् ॥ ६३९ ॥

आयुर्वायुचलद्वीचिचञ्चलं कलयन्नथ ।
सर्वाग्रहारनिर्माणमकरोत्पुत्रलिप्सया ॥ ६४० ॥
योगिनं ब्रह्मनाथाख्यं तत्कर्मप्रेरणादिव ।
कश्मीरानागतं राजा पुत्रार्थ्येवमभाषत ॥ ६४१ ॥
मया वैरिवरान्नीत्वा कारागारकुटुम्बिताम् ।
निवारितं विलोलत्वं नैसर्गिकमपि श्रियः ॥ ६४२ ॥
यथापराधं दण्डेन हरता धर्मविप्लवम् ।
प्रजा अपक्षपातेन स्वप्रजा इव पालिताः ॥ ६४३ ॥
नीताश्चिराय निर्मथ्य विपश्चिज्जनवारिधिम् ।
कियंतोपि मया — मैत्रीं शास्त्रमणिप्रभाः ॥ ६४४ ॥
इति मे कृतकृत्यस्य शोकशङ्कुरयं परम् ।
प्राज्यसाम्राज्यभारस्य वोढा नास्ति कुलाङ्कुरः ॥ ६४५ ॥
इति श्रुत्वा वचस्तस्य वंशच्छेदतमोमुषम् ।
दर्शयन्दशनज्योत्स्नां योगी तं प्रत्यभाषत ॥ ६४६ ॥
मा विषादं कृथा राजन्पुत्रानुत्पत्तिहेतुकम् ।
नहि किंचित्कदाचिस्याद्दुरापं पुण्यशालिनाम् ॥ ६४७ ॥
पुत्रोत्पत्तिनिमित्तं मे योगिनोप्यानुषङ्गिकम् ।
किंचित्संचितमस्त्येव तत्तवास्तूपकारकृत् ॥ ६४८ ॥
गुणैः सममिमं मे च कश्मीरागमनोद्यमम् ।
फलयत्वेव महिषी भुञ्जाना गुलिकामिमाम् ॥ ६४९ ॥
कुलतन्तौ समुत्पन्ने त्रिलोकाभयलग्नके ।
नरोत्तमो जगत्राणचिन्तातानवमश्नुताम् ॥ ६५० ॥
इत्यूचुषोथ यागीन्द्रादादाय गुलिकां नृपः ।
अभोजयत्स महिषीं चरुं दशरथो यथा ।
देवीमभोजयन्मूर्तां प्रसादपदवीमिव ॥ ६५१ ॥

अन्वयाभरणं देवी पितुरानन्दपारणम्।
तमोहरणमर्यन्धकरणं सुषुवे सुतम् ॥ ६५२ ॥

शृङ्गारमङ्गलावासमवलोक्य शिशोर्वपुः।
शृङ्गार इति नामास्य व्यधाद्भूलोकवासवः ॥ ६५३ ॥

हर्षादादिशति क्ष्मापे बद्धमुक्तिं तदुत्सवे।
अन्वभावि तदा चित्रं बन्धौ नौसेतुभिः क्षणात् ॥ ६५४ ॥

यो मातुलसुतो देव्या भाण्डागारिक उद्दकः।
तत्प्रियां सेवतां राजा निन्ये धात्रीषु मुख्यताम् ॥ ६५५ ॥

अथ द्वितीयपुत्रं सा देवी हैवतसंज्ञितम्।
असूत कान्तिसंतानतर्ज्यमानसुधाकरम् ॥ ६५६ ॥

न कस्य वस्तुनोलक्षि सुभिक्ष्यश्रीः पदेपदे।
तस्मिन्रक्षितरि क्षोणिमन्यत्रारिभयाज्जनैः ॥ ६५७ ॥

धनुर्विनमितं तेन पश्यन्तो नैव कुत्रचित्।
प्रणतिं वैरिणस्तस्य कस्मादप्यधिगोषत ॥ ६५८ ॥

दैवी नीतिरभूत्तस्मिन्पृथ्वीं पालयति प्रभौ।
उत्पिञ्जखञ्जताख्यानं प्रत्युतास्य तिरस्क्रिया ॥ ६५९ ॥

चन्द्रस्येव कलङ्कोयं दोषोभूत्तु महीभुजः।
कुलागतां महीं यत्स वास्तव्यानामपाहरत् ॥ ६६० ॥

अकलङ्कः स राजेन्दुर्विकसत्कुमुदाकरः।
नाग्रामनाम्नि धाश्यापत्परधामविलीनताम् ॥ ६६१ ॥

चिरभुक्तां भुवं मत्वा सोस्पृश्यां भाविकिल्विषैः।
जगाम त्रिदिवं राजा ध्रुवं भोक्तुं सुरस्त्रियः ॥ ६६२ ॥

भाद्रे कृष्णद्वितीयायां पञ्चषष्ठे स वत्सरे।
अस्तं जगाम राजेन्दुः कुद्रुदीनमहीपतिः ॥ ६६३ ॥

राज्ञी शोकान्तरा राजपुत्रौ बालाविति प्रजाः ।
अभूवंश्चकिताः सर्वा अथ वैनाश्यशङ्कया ॥ ६६४ ॥
देव्या विषादतोये तु बहुलत्वमुपेयुषि ।
परस्परममात्यानां मात्स्ये न्यायेभवद्रुचिः ॥ ६६५ ॥
अलं विषादनिर्बन्धैर्धैर्यस्यैव क्षणो ह्ययं ।
रुन्धते मलिनात्मानः क्षमाशूरामराजकाम् ॥ ६६६ ॥
इति प्रबोध्य सुभटां देवीमुद्दकसाहकौ ।
ज्येष्ठं सिकन्दरं पुत्रं महाराज्येभ्यषिञ्चताम् ॥ ६६७ ॥
देव्या मतेनोद्दकोथ साहिं मह्मदमुद्भटम् ।
जामातरमपिं क्रूरः सजानिमदहच्छलात् ॥ ६६८ ॥
सूक्ष्मानत्ति तिमिर्महान्स्वकुलजान्व्याधादजानन्वधं
पीडां क्षौद्रहरान्नरादविदुषी स्वां मातरं पुत्तिका ।
प्रार्यः श्रीलवलोभमोहितधियः कलपान्तरस्थायिनो
मन्वाना दुरितं कियन्न जडिमग्रस्ता विदध्युः खलाः ॥६६९॥
शोभानाममहादेव्याः सोधिविन्नां महीं व्यधात् ।
प्रतापहेमराजा तु नाधिवेदनिकां ददौ ॥ ६७० ॥
शाभादेव्यास्तदा लक्ष्मीः स्तुतित्वमगमत्तराम् ।
क्ष्मां हेमलिङ्गैर्द्यौ पुण्यलिङ्गैर्या स्वैरमण्डयत् ॥ ६७१ ॥
एतद्बन्धुघ्नमेषोपि मां हनिष्यति निश्चितम् ।
इत्युद्दको राजपुत्रं विषेणाथ व्यपादयत् ॥ ६७२ ॥
निर्जयैवं कृपाण्याहं स्वं छिन्द्यां कण्ठमेतयां ।
यद्यहं त्वा निरुन्ध्यां वा हन्या वेत्यथ संविदा ॥ ६७३ ॥
विश्वास्य साहकं वीरमुद्दकोथ व्यपादयत् ।
आसन्नविनिपातानां द्रोहा दूता हिं दुर्धियाम् ॥ ६७४ ॥

यथा भ्रातुस्तथा स्वस्य वधं संभावयन्नृपः ।
प्रौढीभूतस्ततो वृद्धिं स्वपक्षं किंचिदानयत् ॥ ६७५ ॥
भोट्टाज्ञित्वा गतो दृप्तोसहमानोन्यवैभवम् ।
श्रीशोभाभ्रातरं खुञ्जराजमुद्दोवधीत्ततः ॥ ६७६ ॥
गूढां नृपौरुषै राजमात्रा बोधित उद्दकः ।
होलर्डामगमत्क्रुद्धस्ततो योद्धुमथोद्धतः ॥ ६७७ ॥
तच्छ्रुत्वा लद्दराजाद्या भूपतेरनुयायिनः ।
योद्धुं बद्धोद्यमाः पद्मपुरधन्वनि धन्वनि ॥ ६७८ ॥
प्रत्यासन्नविनाशानां प्रायो मतिमतामपि ।
पिशाचादिभ्रमो नूनं स्वच्छायास्वपि जायते ॥ ६७९ ॥
उद्दसैन्यैस्ततो योद्धुं वल्लामठमुपागतैः ।
पारेवितस्तं महिषीष्वश्वभ्रान्त्या पलाय्यत ॥ ६८० ॥
आवितस्तापुरं रात्रौ तमनुद्रुत्य भूपतिः ।
व्यावर्तताथ तं बद्ध्वा नगरोत्पिञ्जशङ्कया ॥ ६८१ ॥
मनोविशालं गगनं पटहैस्तर्जयन्निव ।
स प्राविशत्पुरं राजा हर्षश्च हृदयं विशाम् ॥ ६८२ ॥
मदज्वरोद्भुतः पालपशूनामेवमप्यभूत् ।
आश्रयन्स्तब्धतां येन तच्छिरांसि तदा चिरम् ॥ ६८३ ॥
कदाचित्सह तैः पालकुञ्जरैर्मदघूर्णितैः ।
पलङ्कमाविशद्राजसिंहः सन्नखरद्युतिः ॥ ६८४ ॥
तत्र पालोत्तमाङ्गानि वपुश्चक्रान्महीपतिः ।
शरावानिव सूत्रेण कुम्भकारोसिनाच्छिनत् ॥ ६८५ ॥
पक्षिराज इव व्यालाञ्श्रृगालानिव केसरी ।
पालान्धरणिपालः स कालान्तिकमथानयत् ॥ ६८६ ॥

तं वध्यमपि कारायां कारुण्यात्तु नृपोक्षिपत् ।
उद्दकस्तु स विश्वस्तद्रोहपापमलीमसः ॥ ६८७ ॥
शङ्कमानो वधं भूपात्करुणाकोमलादपि ।
निजयैव कृपाण्या स स्वगलच्छेदमाचरत् ॥ ६८८ ॥
राज्यं शौर्यं वयस्तेजो निर्नियन्त्रणता तथा ।
प्राक्कृतस्याभवद्राज्ञः पञ्चाग्नितपसः फलम् ॥ ६८९ ॥
हर्तुं राज्ञां ततो दर्पतिमिरं नृविकर्तनः ।
यात्रामसूत्रयच्चित्रां गोत्रभिन्त्रासदायिनीम् ॥ ६९० ॥
रूढं तत्सेवकक्षत्रच्छत्रशेषफणाशतैः ।
स व्यधादम्बरारोहि रजो भूमण्डलान्तरम् ॥ ६९१ ॥
विश्वं रञ्जयतस्तस्य प्रतापेन प्रथीयसा ।
द्वेषियोषिन्नखाङ्कश्रीः पाण्डिमानमवाप्यत ॥ ६९२ ॥
तदैव मीरतिमिरो जेतुं त्रीञ्जलधीनपि ।
प्रास्थितः स्थितसत्कीर्तिः स्वयमेवोत्तराधिपः ॥ ६९३ ॥
संत्यक्ताभरणां दीनामपालकतया युताम् ।
तदा ढिल्लीमुदीचीशो विधवामिव स व्यधात् ॥ ६९४ ॥
स विघ्नकरणाभावात्तुष्टः कश्मीरभूभुजे ।
उपदां व्यसृजत्तस्मै हस्तिद्वयमुदक्पतिः ॥ ६९५ ॥
हस्तिद्वयगलद्दानराजिव्याजात्स्वयं व्यधात् ।
देशसीमाविभागं स कश्मीराधिपतेरिव ॥ ६९६ ॥
हस्तिद्वये समारूढे हिमाद्रिशिखरश्रिये ।
विन्ध्यवृद्धिभ्रमाद्विन्ध्यनियन्ता कोपमागमत् ॥ ६९७ ॥
नागौ कोपमगातां तौ वितस्तातरणक्षणे ।
प्रतिबिम्बं निजं दृष्ट्वा प्रतिहस्तिभ्रमं गतौ ॥ ६९८ ॥

दिदृक्षयैव करिणो राजधान्यां महीपतेः ।
नोच्चं शिरोभवत्तस्य तत्तृस्या तिमिरादपि ॥ ६९९ ॥
सुन्दरीस्तनसौन्दर्यचौर्यकारिकटोत्कटौ ।
तौ गजौ भूमिपालेन वारीकारां प्रवेशितौ ॥ ७०० ॥
वदन्येन नरेन्द्रेण सुवर्णपरिपूरिताः ।
नैवार्थिनः परं राज्यस्थितिः स्वा च व्यधीयत ॥ ७०१ ॥
यथेष्टलाभसंपत्तिप्रीणितार्थिस्तवैरिव ।
विनमन्संकुचन्हस्तो दानकालेभवत्प्रभोः ॥ ७०२ ॥
दानं वर्णयितुं तस्य शक्यते नैव केनचित् ।
दानाम्बु नित्यं यत्रोर्ध्वं पाणिपद्मोर्थिनामधः ॥ ७०३ ॥
सदा दानाम्बुसेकाद्यन्न प्रारोहद्यवः करे ।
खड्गत्सरुविमर्दानां मन्ये तत्र निमित्तताम् ॥ ७०४ ॥
अवाच्या सौभगश्लाघा श्रीसिकन्दरभूपतेः ।
त्यक्तापि यं स्वयं लक्ष्मीर्भूयोभूयः समाश्रिता ॥ ७०५ ॥
दानोद्यमपराद्राज्ञः स्फुरन्मुखरुचः पुरः ।
कमला दानभीत्येव पद्मादपि पलायत ॥ ७०६ ॥
आजीवमेव तिष्ठन्ती निन्द्या श्रीस्तस्य तूत्तमा ।
मान्यजन्मस्वपि प्रत्ता यद्वाग्देवीव भाविनी ॥ ७०७ ॥
अनेका यवनाचार्या दानोद्रिक्तं तमाश्रयन् ।
विहाय परभूपालान्पुष्पाणीवालयो द्विपम् ॥ ७०८ ॥
प्रजापापविपाकेन ततो यवनदर्शने ।
बालस्येव मृदि क्षोणिपते रुचिरवर्धत ॥ ७०९ ॥
भासेन्दुरिव ऋक्षाणां तेषां बालोपि विद्यया ।
यवनानामभूज्ज्यायान्मीरसैदमहम्मदः ॥ ७१० ॥

अनंसीदग्रहीच्छिक्षां पुरो नम्रो न्यविक्षत ।
विनयं शिष्यवत्तस्य न को भूमिपतिर्व्यधात् ॥ ७११ ॥

मरुद्भिरिव वृक्षाणां शालीनां शलभैरिव ।
तन्मतस्थैः खलैश्चक्रे भङ्गः कश्मीरसंविदाम् ॥ ७१२ ॥

स्वामिनो दानमानाभ्यां ख्यातैर्देशगुणैरपि ।
कश्मीरानविशन्म्लेच्छाः सुक्षेत्रं शलभा इव ॥ ७१३ ॥

विद्वानभ्यासबोधाभ्यां विद्यामेव विशांपतिः ।
स लक्ष्मीं त्यागभोगाभ्यामशोभयदवीवृधत् ॥ ७१४ ॥

शाहिभङ्गपतिं जित्वा पिरुजं स महीपतिः ।
मेरादेवीं महीपालात्प्राप्तवान्प्राभृतं ततः ॥ ७१५ ॥

अवातरत्तत्र कुले नूनं सा कापि देवता ।
योजयिष्यति कश्मीरान्नष्टांस्तन्नन्दनो यतः ॥ ७१६ ॥

श्रीजैनोल्लाभदीनाख्यो मूर्तो धर्मः कलाविव ।
राजापि योगिराजो यो राजचूडामणेः प्रियः ॥ ७१७ ॥

यवना गुरवो भृत्याः सेवका वल्लभास्तथा ।
बान्धवाश्चाभवंस्तस्य काकाः पिकशिशोरिव ॥ ७१८ ॥

केनापि रससिद्धेन दत्तस्तोकरसः प्रभुम् ।
रससिद्धिं वदन्धूर्तो महादेवाभिधोभ्यगात् ॥ ७१९ ॥

सहस्रवेधिता तेन रसेनैव न साधिता ।
विस्मयेन रसेनापि काञ्चनश्रियमृच्छता ॥ ७२० ॥

सदा राज्ञि महीभारोद्वहनादनुरागगान् ।
अदान्मेरुर्महादेवरूपेणेव निजं वसु ॥ ७२१ ॥

रससिद्धिप्रसादोथ महादेवस्य हीनताम् ।
अगान्न तु सतीदेशनिवासविषये मनाक् ॥ ७२२ ॥

रससिद्धिभ्रमार्थं स कृत्वा हग्बन्धमौषधैः।
हेम स्वं मूषिकामध्ये चिरमासीत्क्षिपन्नथ ॥ ७२३ ॥
प्राज्ञेन शापितो राज्ञा तच्छद्म स्वयमेकदा।
अकीर्तिश्रवणाद्भीतो महादेवो जहावसून् ॥ ७२४ ॥
धिक्तं वारिदमम्बु यो जलनिधेराप्याशुचिश्रीर्भव-
न्मित्रं साशमुपद्रवत्यथ परिक्षीणः स्खलत्यद्रिषु।
पद्मः स्तुत्यतमश्च यो विकसने सारै रसैरौरसैः
संप्रीय भ्रमराव्रसव्युदसने प्राणान्निजान्मुञ्चति ॥ ७२५ ॥
शेषं विषभयेनेव काठिन्येनेव पर्वतान्।
मदेनेव द्विपांस्त्यक्त्वा सुखं भूस्तद्भुजेवसत् ॥ ७२६ ॥
चित्रं च नालभट्टेन गुणिना मित्रबन्धुना।
कुलपद्मेनापि राजवाल्लभ्यादुच्चनालता ॥ ७२७ ॥
लब्धराजोगदंकारशंकरो भट्टसूहकः।
मन्त्रिणश्चान्तरङ्गाश्च सर्वदैवाभवन्प्रभोः ॥ ७२८ ॥
अभिषेणयतस्तस्य कन्यारत्नौषधार्पणात्।
मद्रेन्द्रो बिल्लदेवोथ जातु यात्रामपीपलत् ॥ ७२९ ॥
औचित्यात्साधुवादेषु प्रसक्तेन प्रभोः पुरः।
सख्यं शंकरवैद्येन निरवद्यं च बद्धवान् ॥ ७३० ॥
धृतामर्षः सूहभट्टः शंकरप्रीतिवत्सरे।
अपकारान्मद्रराजे चिन्तयन्नास्त संततम् ॥ ७३१ ॥
उदीचीनायको धाट्या यं पौरैः सह नीतवान्।
शिखकुक्कुरराजस्य पुत्रं मलेकजस्रतम् ॥ ७३२ ॥
मृतेथोदक्पतौ जातेत्युत्पिञ्जे मुक्तता भजन्।
स मद्रनायकद्वेषात्सूहभट्टार्थनाबलात् ॥ ७३३ ॥

मद्रासन्नक्षितेः स्वाम्यं कश्मीरेन्द्रेण लम्भितः ।
सचेतनं जयस्तम्भमिव तं तत्र रोपयन् ।
व्यावर्ततारिलोकार्त्तिकर्ता स क्ष्माविकर्तनः ॥ ७३४ ॥
प्रत्यक्षा इव धर्मार्थकामाः काममनोरमाः ।
मीरादेव्यास्त्रयो राजपुत्रास्तस्योदपत्सत ॥ ७३५ ॥
मीरखानः शाहिखानः खानो मह्मद इत्यपि ।
यैः संज्ञा अभ्यभूषन्त गङ्गौघैर्विष्टपा इव ॥ ७३६ ॥
प्रमीतमातृकं शोभानन्दनं पिरुजाभिधम् ।
स राजा मीरखानादिनिर्विशेषमवीवृधत् ॥ ७३७ ॥
अलकासदृशीं राजा मानसप्रतिबिम्बिताम् ।
पुरीं पुण्यजनाकीर्णां प्रद्युम्नाद्रितटे व्यधात् ॥ ७३८ ॥
पूर्णानन्दा जयारिक्ता भद्रा विस्मयदायिनी ।
श्रीस्तस्यातिथिसंपत्त्यै भूभुजोभूद्दिवानिशम् ॥ ७३९ ॥
राजावनाश्रयत्वेन प्रसिद्धः स सदायतिः ।
लक्ष्मीमचुम्बितामन्यैर्वताचुम्बद्द्विषां बलात् ॥ ७४० ॥
यवना नित्यतद्दत्तवित्तसंपत्तिशालिनः ।
आहारव्यवहारादौ जितवन्तो महीपतिम् ॥ ७४१ ॥
अयत्नप्राप्तवित्तानां यवनानां महीपतेः ।
वराटके च कोटौ च दृष्टिरासीत्समा तदा ॥ ७४२ ॥
कश्मीरमण्डले म्लेच्छदुराचारेण दूषिते ।
महिमा ब्राह्मणैर्देवैर्मन्त्रैश्च स्वः समुज्झितः ॥ ७४३ ॥
खद्योतैरिव यैः कालबलात्तेजः प्रकाशितम् ।
तैर्देवैः कालदौरात्म्यात्तदन्तर्धिमनीयत ॥ ७४४ ॥
पुण्यक्षयेण कर्तृणां कलिदोषेण चोज्झिताः ।
गीर्वाणैः प्रतिमा सर्वा निर्मोका भुजगैरिव ॥ ७४५ ॥

प्रत्याहृते ततस्तेजोविशेषे त्रिदशैरभूत्।
प्रतिमानां शिलाभावो मन्त्राणां वर्णमात्रता ॥ ७४६ ॥
कलिस्पर्शभयात्त्यक्तकामैः स्वप्रतिमा ध्रुवम्।
तद्ध्वंसे त्रिदशैर्म्लेच्छा धियमाविश्य चोदिताः ॥ ७४७ ॥
राजात्तरंगो यवनमतभक्तः प्रतारितः।
यवनैः सूहभट्टोथ प्रतिमानां निराकृतौ ॥ ७४८ ॥
रक्ते रागं शुचौ शौक्ल्यं मलिने मलिनां स्थितिम्।
संक्रान्ते सति गाहन्ते स्फटिकानीव भूभुजः ॥ ७४९ ॥
स्वयं ब्राह्मक्रियाद्वेषी यवनैश्च प्रतारितः।
सूहभट्टः प्रभुं जातु देवभङ्गार्थमैरयत् ॥ ७५० ॥
पाषाणान्देवसान्निध्यभ्रमेणैष जनो नमन्।
त्वत्प्रणामविशुद्धं स्वशिरो दूषयति ध्रुवम् ॥ ७५१ ॥
मायया कवलक्षोभसंसर्गान्धंभविष्णुषु।
श्रद्दधीते च देवत्वमीश्वरादितरेषु कः ॥ ७५२ ॥
मुखानि कमलानीव रज्जवो भुजगा इव।
शुक्तयो रजतानीव स्थाणवः पुरुषा इव ॥ ७५३ ॥
मायेन्द्रजालसंदर्भप्रभवादिनयोदिताः।
ये च केचिज्जडैर्देवा भ्रान्तिशक्त्या प्रकल्पिताः ॥ ७५४ ॥
सन्निधापयितुं तान्कः प्रतिमासु क्षमो भवेत्।
ग्रहीतुं मारुतं मुष्टौ सौष्ठवं कस्य दृश्यते ॥ ७५५ ॥
ते च सन्निहिताः किं वा कुर्युः कर्मनियन्त्रिताः।
शिल्पिभिः कल्प्यमानासु स्वतुल्यावयवास्वपि ॥ ७५६ ॥
कलिकाले स्फुरत्यद्य तिष्ठेरंस्ते जना हि किम्।
तेजस्तिमिरयोर्नास्ति साधारणपदस्थितिः ॥ ७५७ ॥

तेनेत्यादि कुतर्कोक्त्या दुरमात्येन पापिना ।
निरस्तो देवताभावः प्रतिमाभ्यो महीपतेः ॥ ७५८ ॥
सुरासुराणां समरे सज्ञानां सततं तदा ।
असुरैर्विजितं नूनमन्यथा कथमप्ययुः ॥ ७५९ ॥
विध्वस्ताः प्रतिमाः सर्वा गीर्वाणानां शिला इव ।
न विघ्नो भञ्जकानां च प्राग्वद्दृष्टः कथंचन ॥ ७६० ॥
विहाय राज्यकार्याणि प्रजामाग्यविपर्ययात् ।
देवानां प्रतिमाभङ्गे राजारज्यदहर्निशम् ॥ ७६१ ॥
भग्नः श्रीविजयेशोपि तेनेति कथयोत्थितम् ।
प्रक्रान्तस्यानुरोधेन शोकशल्यं सहामहे ॥ ७६२ ॥
शृण्वतां पश्यतां श्रोत्रनेत्रस्य त्रस्यतो मुहुः ।
नोल्कानिपतनाच्चक्रधरभङ्गो व्यभिद्यत ॥ ७६३ ॥
सिंहिकापुत्रदण्डान्तो मार्तण्डः पुनरुत्थितः ।
न पुनः सूहदण्डान्तः पुनः कुत्रापि जात्वपि ॥ ७६४ ॥
रीतिमय्या बृहद्बुद्धमूर्त्या मर्दितया नृपम् ।
निजनामाङ्कितां मुद्रां तां सूहो निरमापयत् ॥ ७६५ ॥
प्रत्यङ्मुखः प्राङ्मुखत्वं योगान्नगररक्षया ।
मूर्तिमर्दादभूद्भीमस्वामी सोन्तर्मुखस्तदा ॥ ७६६ ॥
सुमनोनागसंहर्तुर्निकर्तुः पक्षशालिनाम् ।
अभूच्छ्रीशारिका देवी पुरस्तस्यातिसंभ्रमा ॥ ७६७ ॥
सुरेश्वरीवराहादिप्रतिमाध्वंसनोद्यमे ।
अकम्पत भियेवोर्वी नास्य सर्वङ्कषा तु धीः ॥ ७६८ ॥
नगरं पत्तनं वापि न ग्रामो न च तद्वनम् ।
यत्र सूहतुरुष्केण सुरागारमशेष्यत ॥ ७६९ ॥

तद्दर्शनभयेनेव तिरोभूतः स्वयंभवः।
तदाद्भुताशो नाशोचि निकटस्थैर्द्रुमैः परम् ॥ ७७० ॥
भीत्येवापः प्रकाश्य स्वास्त्रिसंध्यं तत्र मज्जतः।
संध्यादेवी परं वन्ध्या तस्यागादनुकम्प्यताम् ॥ ७७१ ॥
कथाशेषीकृते सर्वगीर्वाणप्रतिमागणे।
व्याधिमुक्त इवानन्दं सूहभट्टोभजत्ततः ॥ ७७२ ॥
सिन्धूदभाण्डपुरयोः स्वामिनौ श्रीसिकंदरः।
श्रीशोभाकन्ययोः पाणिग्रहेणान्वग्रहीदथ ॥ ७७३ ॥
प्रत्यमुञ्चत्स्वदेशोत्कं मीरसैदमहम्मदम्।
राजा सहचरीकृत्य शोभापुत्रं सपिर्वजम् ॥ ७७४ ॥
दर्शितैर्मौसुलैः शास्त्रैर्जातिद्वेषमयैरिव।
अश्रावि तेन तद्राज्ञा किमसाध्यं दुरात्मना ॥ ७७५ ॥
श्रीसिंहभट्टकस्तूट्टवणिजौ श्लाघ्यतां गतौ।
श्रीनिर्मलाचार्यवर्यस्त्रिजगच्छ्लाघ्यतां गतः ॥ ७७६ ॥
त्यक्ता जातिग्रहं यत्तावन्यदर्शनसेविनौ।
देवानां प्रतिमाभङ्गो घिन्यवारयतां यतः ॥ ७७७ ॥
निर्मलाचार्यवर्यः स सर्वस्वं तृणवत्क्षणात्।
त्यजन्वै पततु ब्रह्मदण्डो विप्रेण भाषिते।
पश्यतां सर्वलोकानां ब्रह्मदण्डोपतद्दिवः ॥ ७७८ ॥
कृतव्रणः स तेनाङ्गे विसर्पिक्लिन्नविग्रहः।
कीर्यमाणक्रिमिकुलक्रकचैश्चारितैरभूत् ॥ ७७९ ॥
अनुभाव्य व्यथां भाविनिरयक्लेशवर्णिकाम्।
गणरात्रेण तं प्राणाः काङ्क्षितापगमाञ्जहुः ॥ ७८० ॥
दण्डाक्रान्तः स राजाथ मीरखानं निजे पदे।
अभिषिच्यालिशाहाख्यां कृत्वास्यागाद्यमालयम् ॥ ७८१ ॥

स्वामी भृत्यापराधेन दण्डनीय इति स्थितेः ।
सूहभट्टापराधेन कालो भूपेकरोत्क्रुधम् ॥ ७८२ ॥
ज्यायांसमभिषिच्याथ पुत्रं सिकन्दरो नृपः ।
नन्दाष्टाब्दे ततो ज्येष्ठकृष्णाष्टम्यां व्यपद्यत ॥ ७८३ ॥
रूपं निष्फलमर्चितं किमपि तन्मन्दानमन्दाग्रहा-
न्भक्तान्यः समनुग्रहीतुमतुलस्वाछन्द्यवन्द्यक्रियः ।
गौरीरूपकरीं वपुःसहचरीं स्वां शक्तिमव्यक्तय-
ङ्गुर्किं मुक्तपुरस्सरीं दिशतु वो देवः स्वयंभूरयम् ॥ ७८४ ॥
विश्रम्यतुतरां शाहिखानवृत्ताञ्जसानुतिः ।
मद्राक् श्रान्तान्यराजाख्याशैलकोटिशिखाटनैः ॥ ७८५ ॥
तद्गुणौघरसश्लाघ्यां पिबन्त्वपि गिरं मम ।
सुगन्धिघनसारेण कूपाम्भोपि मनोरमम् ॥ ७८६ ॥
आलिशाहः स वसुधासुधांशुर्जगतां तमः ।
प्रदोषारब्धमाच्छैत्सीद्भास्वतोस्ते पितुस्ततः ॥ ७८७ ॥
अदर्पकचितं बालं प्रौढा लक्ष्मीर्मुहुर्मुहुः ।
कुलजालिङ्गदङ्गैस्तं राजानं नतिशालिभिः ॥ ७८८ ॥
तस्य बाल्यं मनोहारि विशेषाद्राज्यराजितम् ।
कान्तिं कलयते कान्तपूर्णेन्दुः शरदि स्फुरन् ॥ ७८९ ॥
पूर्वोर्वीश्वरवद्बालमपि तं भूभुजोनमन् ।
अहिदष्टो हि दामापि क्रमितुं न प्रगल्भ्यते ॥ ७९० ॥
— नाधिकारिमुख्यत्वं तदा सूहे————
———मतिर्वैदग्ध्यं तदीयमवहद्विधेः ॥ ७९१ ॥
सूहेनाशङ्कि मार्गेशो लब्धकः स्वोदयः सहः ।
ध्रुवं स्वाशयवद्भाति सर्वस्यैव पराशयः ॥ ७९२ ॥

अद्रोहार्थिततत्संवित्पीतकोशोदको सन्।
लब्धमार्गपतिं सूहभट्टो रोद्धुमचिन्तयत् ॥ ७९३ ॥
तेन ह्यशङ्कि स स्वस्मिन्स्वात्मेवास्मिन् ह्यविश्वसन्।
महात्मनां भवेत्कोशः कोशो वारि तु पापिनाम् ॥ ७९४ ॥
कातरो वीरविद्वेषी निर्गुणो गुणिमत्सरः।
दूढः कुलीनः कौलीनो विधात्रैव हि निर्मितः ॥ ७९५ ॥
वीरः स लब्धमार्गेशो जातकोशोदकाग्रहः।
दाम्भिके सूहभट्टे तु बके तिमिरिवाश्वसीत् ॥ ७९६ ॥
शस्त्रमार्गपतिर्वीरः करालम्बमपि स्वयम्।
यत्स्वाङ्गसङ्गमत्याक्षीत्सूहप्रत्ययलब्धये।
हरेर्हस्तप्रणामं तच्छस्त्रत्यागममंस्त सः ॥ ७९७ ॥
कलिकालभुजङ्गस्य तादृशमायु बिलम्।
ग्रहं शुचिरुचो मत्वा पितुः सूहविधुंतुदम्।
शूरो मह्मदमार्गेशो बाङ्गिले शङ्कितोवसत् ॥ ७९८ ॥
मार्गेशं शौर्यकोशाभ्यां शस्त्रोपेक्षणमप्यतः।
रोद्धुं नैवाशकत्सूहः सहसा साहसासहः ॥ ७९९ ॥
तावोतुरिव गर्ताटौ मन्त्री रोद्धुमनाः समम्।
तयोः सह पुरावासबिलावेशस्पृहामगात् ॥ ८०० ॥
राजाग्रे ताजकादीनां विश्वासार्थमनर्थसूः।
लद्दमार्गेशपुत्राणां शूराणां शं स दत्तवान् ॥ ८०१ ॥
व्याहरन्मधुरस्निग्धमपश्यद्यावृणोद्गुणान्।
मित्रैरिव स तैः सत्रा कं न द्रोहं व्यवाहरत् ॥ ८०२
अन्तः कण्टकपारुष्यं संवृत्योन्नतपक्षभृत्।
प्रकृतिस्निग्धतां मन्त्री तिमिवत्समदर्शयत् ॥ ८०३ ॥

हृदयं कालकूटेन विषैरङ्गान्यभङ्गुरैः ।
कृत्वास्य किं व्यधाद्वेधा रसनाग्रं सुधाकणैः ॥ ८०४ ॥
स तान्कपटविश्वासभोज्यैराश्वास्य दुष्कृती ।
विश्वासवागुरावेशमैच्छन्मह्मदपक्षिणः ॥ ८०५ ॥
त्रिजगत्सर्गसंहारकरणोद्धारभैरवः ।
विधिः सहायतां धत्ते भियेवोग्रात्मनां विधेः ॥ ८०६ ॥
राधेयस्यन्दनस्येव भूमिर्भूयो भिये तदा ।
छिद्रकाले रुजत्पादं तीव्रा मार्गयते रुजा ॥ ८०७ ॥
कालज्ञो दीर्घसूत्रोथ सूहो विमलकाभिधम् ।
स्वभृत्यमिति संदिश्य व्यसृजन्मह्मदं प्रति ॥ ८०८ ॥
बालो राजा नवं राज्यं मन्त्री मार्गपतिर्जरन् ।
धुर्यो यदि भवान्दूरे तर्हि का जगतो गतिः ॥ ८०९ ॥
अपेक्षन्ते प्रकृतयस्त्वामात्मानमिवाखिलाः ।
पाषाणा ह्यर्कपाषाणाः सूर्योदयदशां विना ॥ ८१० ॥
अवहेलामयं राज्यधुरः संवहनं तव ।
वर्धतां दुर्धियं चान्तरातङ्कविषवल्लरी ॥ ८११ ॥
अस्मच्चक्षुश्चकोरोपि चिरतृष्णाकदर्थितः ।
अमन्दमानन्दनीयकलैकनिधिना त्वया ॥ ८१२ ॥
निवेद्य कुशलप्रश्नं मार्गराजस्य सादरम् ।
विमलो मह्मदस्याथ संदेशं निरवर्णयत् ॥ ८१३ ॥
स्वद्रोहनिश्चयं जानन्मह्मदः श्रुततद्वचः ।
स्वं विना स्वपितुर्बन्धं स मत्वा कोशयन्त्रितः ।
द्वित्रांस्त्वादिश्य तान्वीरान्कश्मीरेभ्योचलत्फुटम् ॥ ८१४ ॥
महम्मदो मार्गपतेर्बन्धं श्रुत्वैव शौर्यवान् ।
भाङ्गिलाचलमार्गेण मार्गाभिज्ञः पलायत ॥ ८१५ ॥

मारुतस्येव वीरस्य गतिः क्वापि न हन्यते।
श्रुत्वा तद्गमनं दूतान्मन्त्रिनिर्भेदशङ्कितः।
लब्धं मार्गपतिं रोद्धुं सहसा समचिन्तयत् ॥ ८१६ ॥
रुजः संवीक्षणव्याजान्मार्गेशस्य शयासये।
विश्वासनाय च प्रासद्भट्टोत्सं तस्य सद्मनि ॥ ८१७ ॥
चिकित्सकौषधाहारी मार्गेशतिमिनाहतः।
नाबोधि पिण्डीनिर्गूढबडिशं पुनरुत्सवः ॥ ८१८ ॥
तावन्मार्गपतेः सौधं सिंहनादोद्भटैर्भटैः।
जवाद्रोधितवान्मन्त्री दाशो नीडं तृणैरिव ॥ ८१९ ॥
तीक्ष्णैरप्यदयाविष्टैरिष्टैरिव स विह्वलैः।
कथञ्चिद्दोषरहितो मार्गेशः समरुध्यत ॥ ८२० ॥
निरुध्यमानं निःशङ्कमगदंकारशंकरम्।
अप्रयुक्तातितीक्ष्णापि शस्त्री धीश्च व्यडम्बयत् ॥ ८२१ ॥
अपश्यन्दर्पतः किञ्चित्सिंहो विशति वागुराम्।
चित्रं तु तद्विशेत्पाशं दूरदृश्वापि यत्खगः ॥ ८२२ ॥
ततो मार्गपतेः पुत्रान्मेषानिव स सौनिकः।
रुद्धवानुद्धतक्रोधः पाप्मा मूर्त इवापरः ॥ ८२३ ॥
ताभ्यां सपरिवाराभ्यां कारागारमपूपुरत्।
न परं भुवनं सर्वं दुर्यशोभिश्च निश्चलैः ॥ ८२४ ॥
एकाहेनैव तत्कृत्वा मह्मदप्राप्तिचिन्तया।
कन्ययेव दरिद्रः स नक्तंदिवमदूयत ॥ ८२५ ॥
दुर्दण्डदेशे गोविन्दनाम्नो मित्रस्य वेश्मनि।
विश्वस्तः प्राविशत्तावद्विश्रमार्थं महम्मदः ॥ ८२६ ॥
श्रीसिकंदरदत्तैतद्देशाधिकारशालिना।
मह्मदस्य पुरा शाखीतेनानाटि हि दुर्धिया ॥ ८२७ ॥

वह्नेर्धूमविवर्धितः शमयति ज्वालाभरं वारिदो
वृक्षक्षोदभवो वनानि नयति क्षिप्रं कृशानुः क्षयम् ।
दाहं जन्मभुवो दिशेद्विषतरुर्वैरस्यदोषावहं
द्रुह्यन्त्यत्युपकारिणेपि सततं लोभाभिभूता जनाः ॥ ८२८ ॥

प्राप्ते महम्मदे मार्गपतौ विश्वासतो गृहान् ।
स गोविन्दखशश्चित्ते क्षणमेवमचिन्तयत् ॥ ८२९ ॥

मन्त्रिणा सूहभट्टेन राज्योपद्रवरक्षिणा ।
द्वैराज्यकाङ्क्षी दुर्बुद्धिरित्यवारि महम्मदः ॥ ८३० ॥

लीलेवापक्रिया कर्तुरपकार्यस्य सा पुनः ।
नाडीव व्रणिता जातु न शुष्यति कथंचन ॥ ८३१ ॥

परिणामेतिदुःखेन सुखेनासुखसीमनि ।
अपथ्येनेव किं नः स्यात्सेवितेनामुना फलम् ॥ ८३२ ॥

राजद्रोहोद्यतः पापी निःसामर्थ्यो भयादयम् ।
मम देशं प्रविष्टोद्य रक्षणीयो न युज्यते ॥ ८३३ ॥

इति संमन्त्र्य विश्वस्तजिह्मगो मह्मदं ततः ।
सुप्तं हरिमिव व्याधो गोविन्दस्तं निबद्धवान् ॥ ८३४ ॥

अनेकेनाथ रत्नेन निःसपत्नत्वलिप्सया ।
एकं सूहः स पुंरत्नमक्रीणन्मह्मदं ततः ॥ ८३५ ॥

तावच्छ्रीसूहभट्टेन विसृष्टाः श्रेष्ठबुद्धयः ।
अन्वेषका गृहं प्राप्ताः गोविन्दस्य खशेशितुः ॥ ८३६ ॥

सुप्तं हरिमिव व्याधो यदा बद्ध्वार्पिपत्खशः ।
पशुवत्तं तदा तेथ कश्मीरानानयन्द्रुतम् ॥ ८३७ ॥

मन्त्रार्दितस्य फणिनः प्लवगाश्चपेटै-
र्व्याधाः सटाविघटनान्निरसोर्हरेश्च ।

बद्धस्य कातरतया बलिनोवमानै-
र्निन्दां विना किमिव नाम परं लभन्ते ॥ ८३८ ॥

करोटीटङ्कनाघट्टरदटाङ्कारकुट्टनैः।
पर्यभूयत जिह्मेन सूहभट्टेन मह्मदः ॥ ८३९ ॥

मान्यं कृतावमानं तं शङ्कमानः पलायनम्।
बहुरूपे महादुर्गे सूहः कारामवीविशत् ॥ ८४० ॥

हितैषिणो निजप्राणैर्देवस्य स्वानुजीविनः।
विषयेस्मिन्ह्यधीकारस्तेनामन्दमधीयत ॥ ८४१ ॥

विद्युद्द्योतभरैर्निशि प्रवसतः पान्थान्नवो वारिदः
पश्चास्यो घनवासिनो मृगगणान्व्यावृत्य विप्रेक्षितैः।
गम्यान्वक्रगतैर्दिनेशतनयो राशीनजादीन्विधि-
र्भेद्राभासविलोकनैर्दुरितिनो विश्वास्य पर्यस्यति ॥ ८४२ ॥

शाहनाङ्यास्ततो दास्या मुखेन प्रतिबिम्बितः।
मह्मदो निजधात्रेयैर्बन्धस्थानादकृष्यत ॥ ८४३ ॥

स हि खेदाकुलः स्नानं करोमीति स्वरक्षकान्।
भ्रमयित्वा प्रविश्याथ स्नानकोष्ठं ततोचलत् ॥ ८४४ ॥

धात्रेयैर्विहितं संधिभेदस्थानमुपेत्य सः।
हंसः क्रौञ्चान्तरमिव निःसृतोथ महम्मदः ॥ ८४५ ॥

रोषादिव स्तुतिं हर्तुमुत्पतन्निर्झराम्भसाम्।
भृगोरिव ततो दुर्गाद्दद्दौ झम्पामकम्पितः ॥ ८४६ ॥

अशक्नुवन्नमुं रोद्धुं पाषाणरक्षिणो न च।
निर्झरास्तु तदङ्घ्रिस्थनिगडध्वनिडम्बरम् ॥ ८४७ ॥

धात्रेया मह्मदस्याथ भञ्जन्तो निगडान्दृढान्।
सूहभट्टममन्यन्त भग्नं साकं स्वबन्धुभिः ॥ ८४८ ॥

हिमगमनतः क्लान्तस्वान्तो हिमं मनुतेनलं
तटतरुसुखं नावा गच्छन्व्रजत्परिपश्यति ।
वलति नितरां विश्वं विश्वं विवेत्ति च मूर्च्छितः
सरलहृदये शङ्काग्रस्तस्तनोत्यतिशङ्किताम् ॥ ८४९ ॥

महम्मदवदेतस्मिञ्शङ्कमानः पलायनम् ।
वृद्धं निपीतकोशोपि स मार्गेशमघातयत् ॥ ८५० ॥

हते मार्गपतौ वृद्धे सूहभट्टेन दुर्धिया ।
अमन्दनिन्दमाक्रन्दत्पितरीवाखिलो जनः ॥ ८५१ ॥

ऋक्षैः संलक्षयन्नाशाविशेषं निशि निश्यथ ।
पक्षीव नीडभ्रष्टः स सूहो लोकभयादयात् ॥ ८५२ ॥

अहस्तस्य विहस्तस्य रात्रिरासीन्निशा दिनम् ।
विपर्येति ध्रुवं सर्वं विधौ विधुरतां गते ॥ ८५३ ॥

कारानावं समुल्लङ्घ्य चलितं तं स्मरन्मुहुः ।
महम्मदतिमिं सूहधीवरः शुचमासदत् ॥ ८५४ ॥

मन्त्रिणा सूहभट्टेन पालितैर्लालितैर्जनैः ।
ज्ञातो दर्शनमात्रेण स्वर्यातः श्रीसिकन्दरः ॥ ८५५ ॥

श्रीसिकन्दरशाहिर्यं शोभादेव्याः स्वमात्मजम् ।
उत्पिञ्जानामभावार्थं स्वदेशान्निरवासयत् ॥ ८५६ ॥

उदीचीपतिना राजपुत्रत्वादभिनन्दितम् ।
कश्मीरानाययौ जेतुं तमादायाथ मह्मदः ॥ ८५७ ॥

तुरुष्ककटकैः साकं श्रुत्वा पिरुजमागतम् ।
व्यसृजत्तन्निरोधाय सूहः श्रीलहगौरकौ ॥ ८५८ ॥

मन्त्रैः श्रीलहराजस्य विक्रमैर्गौरकस्य च ।
सा तुरुष्कचमूः शान्ता व्याधिर्दानजपैरिव ॥ ८५९ ॥

वीतभीतिस्ततो मन्त्री कम्पनाधिपतिं व्यधात्।
लद्दराजं गौरभट्टं क्रमराज्येश्वरं च सः ॥ ८६० ॥

संध्याक्षण इवोदग्रे सूहे रञ्जितभूभृति।
नाभूतामुदितौ राजयुवराजौ रवीन्दुवत् ॥ ८६१ ॥

श्येनो हन्ति पतत्रिणो मृगपतिर्निष्पातयिष्णुर्मृगा-
न्भिद्यन्ते मणयोपि वज्रमणिना खाता खनित्रैर्मही।
पुष्पाणीव नभस्वता ग्रहगणाः सूर्येण निर्धूनिताः
प्रायेणात्र विलोक्यते परिभवत्रासः सजातीयतः ॥ ८६२ ॥

द्विजातिपीडने तेन प्रेरितोपि मुहुर्मुहुः।
श्रीसिकन्दरभूपालः करुणाकोमलाशयः ॥ ८६३ ॥

यवनाब्धिमहावेलां यामकार्षीत्कथञ्चन।
उद्‌लङ्घि द्विजातीनां तेन दण्डस्थितिस्ततः ॥ ८६४ ॥

दर्शनान्तरविद्वेषी प्रदोषस्तमसां निधिः।
यागयात्रादि नागानां दुर्वृत्तः स न्यवारयत् ॥ ८६५ ॥

शङ्कमानः कृतातङ्कसंकोचानां द्विजन्मनाम्।
विदेशगमनाज्जातिरक्षामक्षाममत्सरः ॥ ८६६ ॥

मोक्षाक्षरं विना मार्गो दातव्यो नैव कस्यचित्।
इत्यादिशदशेषान्स मार्गरक्षाधिकारिणः ॥ ८६७ ॥

ततो मीनानिव व्याधो दत्तबन्धे सरिज्जले।
लोकानप्यतिदुर्जातो देशेस्मिन्न्यग्रहीत्तराम् ॥ ८६८ ॥

तद्भयानलजं तापं पापं च बहवो जनाः।
अग्निज्वालाप्रवेशेन सहसैव न्यवारयन् ॥ ८६९ ॥

केचिद्विषेण पाशेन परे तोयेन चापरे।
भृगुणा वह्निना चान्ये जना भीत्या विपेदिरे ॥ ८७० ॥

राजद्रोहिसहस्रेण रक्षितुं राजवल्लभः ।
न त्वेकमशकल्लोकमेतस्मिन्द्वेषदीक्षिते ॥ ८७१ ॥

दुर्वहत्वेन निन्दन्स राज्यभारग्रहं खलः ।
अश्लाघत जनाक्रन्दश्रवणानन्दलाभतः ॥ ८७२

गृहाद्भूर्येव लोकानां पङ्क्तिर्जात्यभिमानिनी ।
रुद्धमार्गात्ततो देशादपमार्गैरपासरत् ॥ ८७३ ॥

त्यक्त्वापि पितरं पुत्रस्तं पिता चागमज्जनः ।
सूहान्तके कृताक्षेपे विदेशं परलोकवत् ॥ ८७४ ॥

क्ष्मा रूक्षा क्षाममशनं व्यायामो वेदनामयः ।
जीवन्नरकता तेषां विद्वेषोभून्महात्मनाम् ॥ ८७५ ॥

धाटीफणीन्द्रभीतीव्रतापस्वल्पाशनान्तरैः ।
मार्गे न कैर्द्विजैर्मृत्युलाभात्सुखमलभ्यत ॥ ८७६ ॥

क्व च स्नानं क्व च ध्यानं तपः क्व च जपः क्व च ।
भिक्षार्थमटतां ग्रामानगात्कालो महात्मनाम् ॥ ८७७ ॥

लोकानामुपकारोभूदपकारमुखादहो ।
यत्तन्निर्वासिताः सर्वे पापं तीर्थेष्वनाशयन् ॥ ८७८ ॥

विदेशमागताः शुष्यत्कलत्रत्राणचिन्तया ।
म्लेच्छवेशा द्विजाः केचित्कश्मीरेष्वेव चाभ्रमन् ॥ ८७९ ।

विच्छेत्तुमिच्छता विद्यां तेनापहृतवृत्तिभिः ।
लडितं प्रतिवेश्माथ पिण्डीलोभाज्जनैः श्ववत् ॥ ८८० ॥

तुरुष्कदर्शने भक्त्या न तु द्वेषेण स द्विजान् ।
व्यप्लावयदतश्चास्मिन्हत्या न प्रजगलिभरे ॥ ८८१ ॥

इत्याख्यानेन वै तेषां स तस्य परिहारदः ।
द्वेषद्योतनशक्तानां कार्याणामेव दर्शनात् ॥ ८८२ ॥

रत्नाकरं यमाश्रित्य ब्राह्मणा जगतीभृतः।
पक्षरक्षां व्यधुः सोभूत्क्षुद्रभट्टोस्य वल्लभः॥ ८८३॥
मलानोर्देननामानं यवनानां परं गुरुम्।
वैदग्ध्याच्छङ्कमानः स द्रोहीति तमबन्धयत्॥ ८८४॥
यतः प्रभृति स प्रापद्राज्यमच्छत्रचामरम्।
ततः प्रभृति रोगार्तिरिव दर्शनदूषणा॥ ८८५॥
स्वप्नेपि नात्यजत्स्नेहभट्टं घट्टितवैरिणम्।
भोगः सद्वासना चातिशुद्धानां तपसां फलम्॥ ८८६॥
तस्यैव फलपूर्णानामृतूनामिव मन्त्रिणाम्।
मानस्य हानिसंपत्ती भास्वतोधीनतां गते॥ ८८७॥
एकस्मिञ्शाहिखाने स दृष्ट्वा मन्त्रपराक्रमौ।
अत्यन्तचिन्ताचकितो निद्रां नापत्कदाचन॥ ८८८॥
पश्यन्नेवाबिलं स्नेहसर्पे सविषया दृशा।
शाहिखानप्रदीपोभूत्तमः संहर्तुमक्षमः॥ ८८९॥
जनातिपीडया शास्त्रनिन्दया द्रोहचिन्तया।
चिकित्सया च तस्याब्दैर्यातं त्रिचतुरैस्तथा॥ ८९०॥
दायवानिव दोषोस्य हेतुमात्रपरीक्षया।
संवृतौजा व्यलम्बिष्ट शाहिखानस्य बाधने॥ ८९१॥
वलीमुखमनोज्ञः स प्रजाभाग्यबलोदयात्।
अनैषीद्भग्नतां शाहिखानचिन्तामणिं न च॥ ८९२॥
प्रजापुण्योदयेनैव प्रेरितो दुष्कृतोत्थितः।
क्षयामयो दुश्चिकित्स्यो द्विजराजमशोषयत्॥ ८९३॥
अनालोक्यैवेन्दोरुदयमगमिष्यद्यदि शमं
समन्तान्नादित्योपलदहनराशिव्यतिकरः।

किमद्राक्ष्यन्नायं तदुदयवशस्रावतुहिन-
द्युतिग्रावाम्भोभिः कृतधरणितापोपशमनैः ॥ ८९४ ॥
वर्षीस्त्रिचतुरान्याज्जीवेच्चेत्स न किं ततः ।
शाहिखानोदये पश्येदिहैव स्वांहसां फलम् ॥ ८९५ ॥
जीवत्येव ततः सूहभट्टे भीत्या पलायितम् ।
विश्वास्य लद्दराजं द्राक् हंसगौरौ बबन्धतुः ॥ ८९६ ॥
श्रीधेनौ रागिणौ तौ द्वौ मदोदग्रौ वृषाविव ।
अन्योन्यशृङ्गभङ्गार्थं प्रावर्तेतां द्विजे मृते ॥ ८९७ ॥
कारागा मोचिते लद्दराजे हंसेन संयति ।
प्राणांस्त्यक्त्वा गौरभट्टः सुरस्त्रीणां मुदं व्यधात् ॥ ८९८ ॥
त्यक्त्वा गत्यन्तराभावात्करिकर्णविलोलताम् ।
पुंश्चल्येव पतिर्वृद्धो भेजे हंसस्तदा श्रिया ॥ ८९९ ॥
बालोपि शाहिखानोस्य नोत्सेकं सोढवान्पुनः ।
शशीव तिमिरस्फारं न हि तेजो वयोनुगम् ॥ ९०० ॥
ठक्कुरैः सह संमन्त्र्य युवराजोथ मन्त्रवित् ।
लद्दराजं विनिघ्नन्तं हंसभट्टं रणेवधीत् ॥ ९०१ ॥
शाहिखानं प्रजारागो निम्नं पय इवागमत् ।
अमन्दच्यूतसंपत्तौ कुन्दं निन्दन्ति षट्पदाः ॥ ९०२ ॥
युवराजं जयोदग्रं परिरब्धुं समुत्सुका ।
राज्यश्रीः समयालाभाच्चिन्ताकुलमवर्तत ॥ ९०३ ॥
स्नेहाद्विदग्धभावाच्च प्रजारागभरादपि ।
अधिकारभरं राजा युवराजे समार्पिपत् ॥ ९०४ ॥
मीरकेसारसंज्ञस्य तुरुष्कस्याथ दुर्मतेः ।
द्विपस्येव मदान्धस्य द्विष्टोभूत्तद्गुणाङ्कुशः ॥ ९०५ ॥

सुचिरं मलिनै राज्ञो मानसं वारिदैरिव।
पैशुन्यवर्षिभिर्नेतुं मालिन्यं न स्म शक्यते॥ ९०६॥

भक्ते दक्षेनुजे स्निग्धे भूभृदाश्रितवत्सलः।
अतिप्रेरणया तेषां राज्येप्युद्विग्नतामगात्॥ ९०७॥

उन्मग्न इव भोगेषु निमग्न इव सूक्तिषु।
स मह्मदखानं च शाहिखानमथाब्रवीत्॥ ९०८॥

अनर्थितर्पणं वित्तं चित्तमध्यानदर्पणम्।
अतीर्थसर्पणं देहं पर्यन्ते शोच्यतां व्रजेत्॥ ९०९॥

दिग्गजेष्विव युष्मासु भूभारं न्यस्तवानहम्।
पुरुषोत्तमसेवायै यते शेष इवापरः॥ ९१०॥

शाहिखानार्णवः प्रेममन्दरान्दोलितस्ततः।
वार्णीं सुधाकरकलामीश्वराय नवामदात्॥ ९११॥

अस्तु संदेहसंदोहा दूरे तीर्थकदर्थना।
द्वारं यशःसुकृतयोः प्रजापालनमस्तु वः॥ ९१२॥

चिरस्य पालितां पित्र्यां हित्वा निःशरणां महीम्।
नैर्घृण्येनैव शूरस्त्वमाशङ्कयैवाङ्कचसे खलैः॥ ९१३॥

देवस्य यदि तीर्थार्थमुत्कण्ठा वर्ततेतराम्।
आराधकानामस्माकं किमन्यत्कार्यमुच्यताम्॥ ९१४॥

व्यक्तमित्युक्तवत्येव युवराजे नरेश्वरः।
ईषत्स्मितरुचा चारुं पुनर्वाचमवोचत॥ ९१५॥

प्रजानुपालनात्पुण्यं केवलात्कियदर्ज्यते।
रसायनानामग्र्यं यदनेकरसचर्वणम्॥ ९१६॥

देहात्पृथङ्निवसतो मद्भुजस्येव ते बत।
दृष्ट्वा पराक्रमं शङ्का मदशक्तौ कथं भवेत्॥ ९१७॥

एतावदपि वाक्यं मे यदि नैवानुतिष्ठसि ।
त्वयि संकल्पिताः शेषास्तदाशाः सन्तु दूरतः ॥ ९१८ ॥
निर्बन्धेनेति जल्पन्स तीर्थार्थं धरणीपतिः ।
युवराजं हठाद्राज्यभारमग्राहयच्चिरात् ॥ ९१९ ॥
श्रीजैनोल्लाभदीनाख्यः सुरत्राणोभवद्भवान् ।
चिरं राज्यं क्रियादेवं राजास्याशिषमभ्यधात् ॥ ९२० ॥
तीर्थदर्शनलोभेन स्वदेशान्निरगान्नृपः ।
न पुनर्युवराजस्य चित्तात्प्रेमार्गलाञ्छितात् ॥ ९२१ ॥
कोशसाराणि रत्नानि वाजिरत्नानि चार्पयन् ।
भ्रातरं वसतीर्द्धित्राः सोन्वयात्प्रेमगौरवात् ॥ ९२२ ॥
मार्गे क्लेशं प्रयत्नेन सिद्धिं तीर्थफलालपताम् ।
उक्ता मार्गे खला राज्ञस्तीर्थश्रद्धामखण्डयन् ॥ ९२३ ॥
स्वजामातुस्तिरस्कारं मन्यमानेन मानिना ।
मद्रेन्द्रेणाथ भूपालो हठात्तीर्थान्निवारितः ॥ ९२४ ॥
प्राप्तायां शरदि श्रेष्ठदशायामिव भूपतिम् ।
मद्रराजस्तमादाय कश्मीरान्प्रत्यगात्ततः ॥ ९२५ ॥
भ्रातुरागमनात्तुष्ट्या मद्रासारग्रहाद्रुषा ।
नवराजः प्रसादे च कालुष्ये च निमग्नवान् ॥ ९२६ ॥
देवस्योपद्रवं कार्षीर्मा मद्रेन्द्रचमूरिति ।
इयेष ठक्कुरं राजा तं निरोद्धुं विसृष्टवान् ॥ ९२७ ॥
युद्धं विना निवर्त्तिन्यां सेनायां मद्रभूपतेः ।
आज्ञां विनाक्षमो योद्धुं व्यावर्तत स ठक्कुरः ॥ ९२८ ॥
क्षुद्रेष्वथ स मद्रेषु युवराजो महामतिः ।
भ्रातुः स्नेहाद्रुषं त्यक्त्वा राज्यत्यागं स्वयं व्यधात् ॥ ९२९ ॥

तस्यस्तं दिवसावसानसमये सूर्यस्य तेजो निजं
प्रत्यूषे प्रतिपादयन्नतिशयश्लाघ्यस्वतेजा भवन्।
वन्हिर्यज्वकुलैस्ततोपि दिवसे श्रद्धानुबन्धाकुलै-
स्तेजोवृद्धिमुषा नवेन हविषा यज्ञेषु संतर्प्यते ॥ ९३० ॥

ठक्कुरैरन्वितो राजा पवनैः कुसुमैरिव।
कश्मीरेभ्यो गतैः सर्वैर्देशाधीशैर्नतस्ततः ॥ ९३१ ॥

सुखं तावदगाहिष्ट वीतनक्रां नदीमिव।
ठक्कुरैरुज्झितां मद्रचमूः कश्मीरमेदिनीम् ॥ ९३२ ॥

अथ विस्तीर्णमाक्रान्तमालिशाहेन भूभुजा।
पित्र्यं सिंहासनं तेन न तु सज्जनमानसम् ॥ ९३३ ॥

उद्यच्छेत कथं जडद्युतिरहो दूरोल्लसल्लाञ्छनो
गच्छेद्दीप्तकरो न चेद्दिनकरो लोकान्तरं स्वेच्छया।
वीरेणात्यवहेलया विरचितोपेक्षो जडः कातरः
संभाव्य स्वपराक्रमेण विजयं विश्वं तृणं मन्यते ॥ ९३४ ॥

शाखाभङ्गेन सच्छायमुद्यानं प्लवगा इव।
मण्डलं क्षोभयामासुस्तुरुष्का राजसेवकाः ॥ ९३५ ॥

कातरान्नाम भूपालादनिष्पन्ननियन्त्रणः।
यवनो मीरकंसारो व्यधान्मण्डलविप्लवम् ॥ ९३६ ॥

अकार्षीन्मलिनो भृङ्गः संकुचन्तीरिवाब्जिनीः।
पौरनारीरनार्यः स हठसंभोगदूषिताः ॥ ९३७ ॥

महाकरैर्मदेनान्धैः पङ्कसंकुलतां भजत्।
अक्षोभि मण्डलं स्वच्छैः सरो मरुगजैरिव ॥ ९३८ ॥

मन्त्रिमन्त्रैरवार्याणां दिवसेप्यनिवर्तिनाम्।
रक्षसामेव कश्मीरास्तदा हस्तवशं गताः ॥ ९३९ ॥

अराजकं वरं राज्यं न स्वामी तादृशः पुनः ।
अभूषणो वरं कर्णो न पुनर्लोहकुण्डलः ॥ ९४० ॥
हिमादग्निस्तमः सूर्याच्छिला व्योम्नस्तदापतत् ।
यत्पालकोपि भूपालः सर्वलोकक्षयोभवत् ॥ ९४१ ॥
सद्म तुङ्गं वरो वाजी स्वच्छं वासो मणिर्महान् ।
स्वीकृतं यवनैस्तत्तद्यद्यच्छोभावहं प्रभोः ॥ ९४२ ॥
अकार्षीत्पञ्चषाण्मासान्राज्यं स जडनायकः ।
प्रजापापविपाकेन न पुनः स्वेन कर्मणा ॥ ९४३ ॥
मालिन्यं सुमनःपथे प्रथयते दैन्यं निधत्ते दृशः
सूर्यालोकतिरस्क्रियां च कुरुते संहारमाशा नयन् ।
उद्रिक्तः कमुपद्रवं न तरसा कुर्वीत धूमोद्गमो
नोद्योतेततरां शिखी यदि महाज्वालाकलापाकुलः ॥ ९४४ ॥
श्रीसिकन्दरदत्तस्य राज्यस्य ऋणमात्मनः ।
निवारयितुकामेन स्वलक्ष्मीफलकाङ्क्षिणा ॥ ९४५ ॥
मद्रेन्द्रद्वेषपूर्णेन खुःखुरस्वामिना ततः ।
नवराजोर्थितो दूतैर्निजदेशागमं प्रति ॥ ९४६ ॥
नक्रो न चेज्जलनिधेर्बहिरभ्युपेया-
त्काकस्त्यजेन्न वनपादपमुन्नतं चेत् ।
आखुर्न चेद्गहनगर्तगुहां विमुञ्चे-
द्धर्तव्यतां कथमवाप्नुयुरेव तत्ते ॥ ९४७ ॥
आश्रयो युवराजस्य मद्विषो दीयतेमुना ।
जस्रथं प्रतिभूपालः क्रोधादित्यभ्यधेणयत् ॥ ९४८ ॥
म्लेच्छच्छादितमाहात्म्यैरुद्विग्नैः सचिवैर्निजैः ।
अनिषिद्धोद्यममतिर्धूर्तैरुभयवेतनैः ॥ ९४९ ॥

युक्त्योपोद्बलितश्रद्धस्तथा द्वैराज्यजीविभिः।
नवराजोदयं लेखमुखेन प्रापयिष्णुभिः ॥ ९५० ॥
प्रसादलोभाद्यवनैरतिमात्रकृतस्तुतिः।
नवराजजयोद्रेकश्रवणभ्रष्टसाहसः ॥ ९५१ ॥
स्वसैन्यैर्दैन्यचकितैर्निन्द्यमानोद्यमो नृपः।
मलेकं जस्रथं जेतुं प्रस्थानमकरोत्ततः ॥ ९५२ ॥
अभ्यमित्रीणतां तस्य कश्मीरेन्द्रस्य गच्छतः।
आसीन्मित्रस्य सांमुख्यं न मित्राणां महीभुजाम् ॥ ९५३ ॥
स्वस्यात्यौन्नत्यमालक्ष्य शङ्कमानोथ पातकम्।
खञ्याकादः समं मन्त्रममन्त्रयत मन्त्रिभिः ॥ ९५४ ॥
मन्त्रविक्रममुख्यानि लक्षणानि क्व भूभुजाम्।
अयं वालिशभावस्य भाजनं क्व जनाधिपः ॥ ९५५ ॥
अस्माभिर्निहिताश्चास्मिन्नुपदेशा हिताश्रयि।
प्रतीपं यान्ति शशिनः पङ्कजे किरणा इव ॥ ९५६ ॥
प्रागेव युवराजोभूदजय्योसह्यसाहसः।
विशेषेणाद्य मद्रेशद्वेषाज्जस्रथमानिनः ॥ ९५७ ॥
राज्याश्रयेषु नास्मासु विश्वासी नूतनो नृपः।
हारलुब्धस्य दास्रस्तु हारो न मणिभृत्फणी ॥ ९५८ ॥
तस्मादस्माभिरेतेन युवराजो विजीयते।
योग्याः पाहुणकेनैव गृहे घ्नन्ति भुजङ्गमम् ॥ ९५९ ॥
जीयमाने नरेन्द्रेण युवराजे निरङ्कुशाः।
आयान्तु मण्डलं सर्वे साधयामश्चिकीर्षितम् ॥ ९६० ॥
इति संमन्त्र्य मन्त्री स युवराजाभियोजने।
सोद्यमस्य नरेंद्रस्य हेतुकर्तृदशामगात् ॥ ९६१ ॥

यत्र यत्रागमन्म्लेच्छकटकः स मदोत्कटः ।
तत्र तत्र रजोव्याजात्तमो मूर्तं स्म दृश्यते ॥ ९६२ ॥
पालनीयेषु देशेषु राजपुर्यादिषूद्धतः ।
परदेशेष्विवाकार्षीत्स लुण्ठनपराभवम् ॥ ९६३ ॥
प्राप्तेथ मुद्गरव्यालनामस्थानं महीपतौ ।
संदेशमित्यमन्दौजाः प्राहिणोन्मद्रभूपतिः ॥ ९६४ ॥
पत्तिलोकः ससंपत्तिर्वाजिनो वेगराजिनः ।
भटा रणोद्भटाः सन्ति कटके तव यद्यपि ॥ ९६५ ॥
तथापि च्छलबद्धेषु प्रसिद्धेषु महीतले ।
यूयं खुःखुरयुद्धेषु नैव नाम प्रगल्भथ ॥ ९६६ ॥
वयमेव तु जानीमः खुःखुराणां रणच्छलम् ।
अहिरेव भुजंगस्य पदं जानाति नेतरः ॥ ९६७ ॥
अतो यावद्वयं प्राप्तास्तत्सेवाविधिसिद्धये ।
भवद्भिस्तावदत्रैव स्थातव्यं पर्वतोपरि ॥ ९६८ ॥
मद्रेशस्य स संदेशो मन्दैर्यवनपुङ्गवैः ।
स्वयशोलब्धये ज्ञातो मदसंमूढदृष्टिभिः ॥ ९६९ ॥
राज्ञि मूढेवतीर्णेथ मानादिव महीधरात् ।
ध्वजैर्वायुचलैर्यातं खुःखुरेशबलाद्भिया ॥ ९७० ॥
धावदश्ववलक्षोदात्तनीयसि महीतले ।
हर्षभीरससंभेदे मज्जति स्म फणीश्वरः ॥ ९७१ ॥
अश्वक्षुण्णेस्रसंसिक्ते भूतलेसिकुशाञ्चिते ।
वीराः प्राणान्प्रतापाग्नौ तत्राजुहुवुराहवे ॥ ९७२ ॥
आलिशाहस्ततो राजा सिन्धौ प्रवहणं यथा ।
अभाग्यदुर्मरुद्वेगाद्भज्यते स्म रणार्णवे ॥ ९७३ ॥

विश्वान्धंकरणान्धकारनिकरग्रस्तस्य सूर्योदयं
हेमन्ते हिममारुतैर्हृतधृतेः पुष्पाकराभ्यागमम्।
दुष्टक्ष्मापतितर्जितस्य जगतो निर्दोषलेशं प्रभुं
लोकेशो जनयन्व्यनक्ति नितरां कारुण्यमत्युज्ज्वलम्॥९७४॥

श्रीजैनोल्लाभदीनोथ कश्मीरानपकल्मषः।
अनुकूलो विधातेव प्राविशद्विजयोर्जितः॥ ९७५॥

सतां स्तुत्या दिशां भेर्या मुखान्यनुनयन्नयम्।
पौराणां प्राङ्मनः पश्चाद्राजधानीं नृपोविशत्॥ ९७६॥

श्रीनैर्मल्यं जनस्याहो जातं राज्ञोभिषेकतः।
प्रतापो वैरिणां शान्तस्तस्मिञ्शस्त्राणि बिभ्रति॥ ९७७॥

तन्नीतिः पूर्वराजेषु कुण्ठोत्कण्ठाः प्रजा व्यधात्।
गुणातिशयिनी या च शर्करेक्षुरसेष्विव॥ ९७८॥

पूर्वराजव्यवस्थाः स विनष्टा नवयन्नभूत्।
शिशिरोपहता वल्लीर्वसन्त इव भूपतिः॥ ९७९॥

परस्पराधिकं शत्रूञ्जयद्भिर्दुर्जयानपि।
शस्त्रैर्मन्त्रा जितास्तस्य मन्त्रैः शस्त्राणि च प्रभोः॥ ९८०॥

कान्त्याङ्गं वदनं वाचा श्रियोरः क्षमया मनः।
श्रितं पश्यन्त्यगाद्दूरं कीर्तिरीर्ष्यावशादिव॥ ९८१॥

राज्ञः कलिदशामध्ये धर्म्या साम्राज्यपद्धतिः।
अन्तर्दशेव शुशुभे शुभा कृतयुगस्य सा॥ ९८२॥

भोगे सखा नये मन्त्री विवेक्ता शास्त्रनिर्णये।
श्रीमहम्मदखानोभूत्कश्मीरेन्द्रस्य सोदरः॥ ९८३॥

किमन्यद्राज्यमेवासीच्छत्रचामरवर्जितम्।
श्रीमहम्मदखानस्य कश्मीरेन्द्रप्रसादतः॥ ९८४॥

वसन्त इव कामस्य भूपतेरभवत्सखा ।
खुःखुराधिपतिस्तस्य भृत्येष्वभ्यधिकं प्रियः ॥ ९८५ ॥
दुर्व्यवस्था निवार्याहो देशेस्मिन्म्लेच्छनाशिते ।
इति राज्यपरिप्राप्तिफलं यावदचिन्तयत् ॥ ९८६ ॥
तावद्दोहोचितं कर्म द्रोग्धारो राजवल्लभैः ।
अपृष्ट्वैव महीपालं नीता वीतभयैः स्फुटम् ॥ ९८७ ॥
यशो दिशि श्रियं साधौ सुखं लोकेषु रोपयन् ।
व्यधात्प्रक्रमभङ्गं तं यच्छत्रूनुदमूलयत् ॥ ९८८ ॥
एकान्ता तिग्मता भानोर्म्रदिमा शशिनः पुनः ।
स द्वौ जेतुमिवापुष्यत्तत्संसर्गमयीं श्रियम् ॥ ९८९ ॥
असंख्यानत्र संक्षिप्ते तद्गुणान्वर्णयामि किम् ।
शृगालानां गुहामध्ये कथं हस्तिपतिर्वसेत् ॥ ९९० ॥
तस्माच्छैलेन्द्रवच्चित्ते मुकुरे सूर्यविम्बवत् ।
न्यस्यामि तद्गुणाख्यानमत्र चित्रे त्रिलोकवत् ॥ ९९१ ॥
शीतोष्णयोरिवोर्जादौ विषुवेहर्निशोरिव ।
तस्य मानोभवत्तुल्यः स्वे परे वापि दर्शने ॥ ९९२ ॥
राजा वणिगिवात्यर्थं तुलायाः पुण्ययोरिव ।
साम्यभङ्गं दर्शनयोर्नाक्षमिष्ट कथंचन ॥ ९९३ ॥
शान्ते सिद्धाश्रमे सिंहैर्मृगा इव न पीडिताः ।
तुरुष्कैः पुष्कलभयैर्ब्राह्मणाः पूर्ववत्तदा ॥ ९९४ ॥
दोषाकरेण सूहेन येषां संकोचिता स्थितिः ।
व्यकाशयत्ततो भास्वान्गुणिनस्तान्महीपतिः ॥ ९९५ ॥
रन्ध्रैरधोगतिं प्राप्ता कुल्येवोद्धृत्य भूभुजा ।
विद्या प्रवाहिता तेन गुणिना गुणिरागिणा ॥ ९९६ ॥

दोषच्छेदकरै राजा क्रमाद्विषगिवानलम्।
कश्मीरेषु सदाचारमदीपयदुपक्रमैः ॥ ९९७ ॥

अहंकारागदंकारौ राजा प्रकृतिवृद्धये।
दर्शनानां स धातूनामिवोल्लूनमशीशमत् ॥ ९९८ ॥

कलेर्धर्मेण व्यच्छेदि मात्स्यन्यायप्रवर्त्तनम्।
अष्ट लोकेशतेजोंशधारणस्यास्य लक्षणम् ॥ ९९९ ॥

स सूहभट्टसंस्पर्शदुष्टायाः शुद्धये भुवः।
प्रतापाग्निं ध्रुवं दीप्तमहाकाशमजिज्वलत् ॥ १००० ॥

राज्ञः संचिन्वतो मन्त्रप्रपञ्चे पञ्चधा स्थितिम्।
जिगीषयेव तस्यारिवर्गः पञ्चत्वमाश्रयत् ॥ १००१ ॥

अनित्यबाह्यविद्वेषिनिर्जयस्तुतिसंस्तवः।
नित्यान्तःस्थारिसंहर्तुस्तस्य प्रत्युत गर्हणा ॥ १००२ ॥

शक्तोपि काश्यपीशक्रः शक्यानेवाभ्यषेणयत्।
व्योम्नि यात्रां करोत्यर्कः सतारे न तु सोडुपे ॥ १००३ ॥

नाजिगीषत्स तेजस्वी शत्रून्विभवतृष्णया।
हरिर्मांसादिलोभेन हिनस्ति न हि हस्तिनः ॥ १००४ ॥

शैलेषु तद्विषो भानुप्रतापाधिदवश्रमैः।
प्रायश्चित्तीयितुं पञ्चतपस्त्वं ध्रुवमाश्रयन् ॥ १००५ ॥

प्रावर्तिष्ट महिष्ठोपि नोत्पथेन स जातुचित्।
राकेन्दुर्न निशारम्भं विना जात्वभ्युदेति यत् ॥ १००६ ॥

गर्वं प्रवृद्धा वास्तव्या हीना मैव क्षयं गमन्।
इति नीतिविदा राज्ञा तेभ्यो बलिरगृह्यत ॥ १००७ ॥

वैरिकीर्तिर्जुहोतु स्वं विक्रमस्य वियोगतः।
बताहौषुर्द्विषः स्वं तत्प्रतापे विरहाच्छ्रियः ॥ १००८ ॥

ढिल्लीशपीडितं जातु जस्रथं शरणागतम् ।
द्रोणीगुहासु सोरक्षत्तमोद्रिर्भास्करादिव ॥ १००९ ॥
तस्मिञ्शासितरि क्षोणीं विनेतरि दुरात्मनाम् ।
जयापीडपुरस्थस्य भूमिदेवस्य कस्यचित् ॥ १०१० ॥
सस्यग्रासाभिलाषाद्वा विधातुर्वा नियोगतः ।
कदाचित्काप्यगाद्धेनुर्मूर्त्तेवाशा सुधाभुजाम् ॥ १०११ ॥
गतो मडवराज्यं स तीर्थस्नानाय जातुचित् ।
स्वां परिज्ञातसंकेतां गां परिज्ञातवान्द्विजः ॥ १०१२ ॥
सनिश्चयं गृहं यान्तीं सायं तामनुगम्य गाम् ।
विवादमकरोद्धेश्मस्वामिना सह तत्र सः ॥ १०१३ ॥
तौ लोभनिश्चयग्रस्तावशान्तकलहावुभौ ।
महीपालसभास्थाने विवादं कर्तुमुद्यतौ ॥ १०१४ ॥
तयोरशक्तयोर्जेतुमुपपत्तिं परस्परम् ।
शृङ्गाटानि परीक्षार्थं गोरग्रे व्यकिरन्नृपः ॥ १०१५ ॥
सा बाल्ये ग्रसनाभ्यासाच्छीघ्रमाघ्राय सस्पृहा ।
गौरभुङ्क्त फलानीव न तु तत्संततिश्चिरम् ॥ १०१६ ॥
सभायां राजनैपुण्यं स्तुवत्यां कृतनिश्चयात् ।
दण्डेनाजिग्रहद्दण्ड्यं भाण्ड्यं राजा द्विजन्मनाम् ॥ १०१७ ॥
तस्य दाक्षिण्यदक्षस्य प्रजानां हितहेतुना ।
पुत्रे मन्त्रिणि मित्रे वा दुष्टे नालक्ष्यत क्षमा ॥ १०१८ ॥
अपराधं विना जायां क्षीबो निघ्नन्प्रियोपि सन् ।
मीरेशायोपि यवनो वधं भूपेन लम्भितः ॥ १०१९ ॥
शत्रुपक्षे निकारं स क्षिपन्क्षितिपुरन्दरः ।
अकरोदादरं नित्यं योगिनां न नियोगिनाम् ॥ १०२० ॥

पराक्रमश्च नीतिश्च तस्यान्येषां च भूभुजाम्।
करुणा च विवेकश्च यस्मिन्राजनि राजति ॥ १०२१ ॥
कामो वियोगिवर्गस्य करोत्यपचितिं सदा।
निर्विकारः स्मयो योगिवर्गस्यापचितिं व्यधात् ॥ १०२२ ॥
सौम्या भीमा गुणा यस्मिन्नवसन्नवसंगमम्।
क्वान्यत्र सागराद्दृष्टा विषामृतजलानलाः ॥ १०२३ ॥
चिरं स्थेयैरुपात्तोर्थिप्रत्यर्थिभ्यां धनग्रहः।
तेन धर्मप्रवृत्तेन सद्वृत्तेन निवारितः ॥ १०२४ ॥
केनापि हेतुना पूर्वं लौलराजद्विजन्मना।
भूप्रस्थदशके प्रस्थो विक्रीतो लेखपूर्वकम् ॥ १०२५ ॥
बालानां नोनराजादिपुत्राणां तदुदीर्य सः।
विक्रयाब्दे ब्रह्मभूयं लौलराजोगमत्ततः ॥ १०२६ ॥
नोनराजाद्यसामर्थ्यात्प्रस्थग्राह्यैरभुज्यत।
अविक्रीतमपि प्रस्थनवकं बलिभिश्चिरात् ॥ १०२७ ॥
एवं कृते दशप्रस्थभोगे तैर्बलिभिश्चिरात्।
नवभोगाय कपटं कृतं विक्रयपत्रके ॥ १०२८ ॥
व्यञ्जनाग्रस्थितैकाररूपज्ञानाय लेखकाः।
रेखां पूर्वं व्यञ्जनानां पश्चाद्भागे किलालिखन् ॥ १०२९ ॥
कालान्तरे लिपेर्भेदादुपर्यद्यतनाः पुनः।
व्यञ्जनानां लिखन्त्येव रेखामेकारबोधिकाम् ॥ १०३० ॥
भूप्रस्थमेकं विक्रीतमिति विक्रयपत्रके।
ते मकारस्थितैकारबोधिरेखापदे ततः ॥ १०३१ ॥
भूप्रस्थग्राहिणो धूर्ता दकारं समलेखयन्।
मकारं ते सकारं च कारयामासुरञ्जसा ॥ १०३२ ॥

भूप्रस्थमेकं विक्रीतमिति विक्रयपत्रके ।
विक्रीतं प्रस्थदशकमिति वर्णानलेखयन् ॥ १०३३ ॥
तेस्मिन्राज्ञि विचारज्ञे नोनराजस्य नन्दनः ।
बलाद्धृतां भुवं राजसभायामहमाक्षिपम् ॥ १०३४ ॥
प्रत्यर्थिभिरथानीतं भूर्जं राजाज्ञया नृपः ।
युक्तिज्ञः सलिलस्यान्तर्वाचयित्वाक्षिपत्ततः ॥ १०३५ ॥
नष्टेषु नववर्णेषु पुराणेषु स्थितेष्वथ ।
भूप्रस्थमेकं विक्रीतमिति सभ्यानवाचयत् ॥ १०३६ ॥
राजा कीर्तिमहं भूमिं कूटकृद्दण्डमद्भुतम् ।
प्रजाः सुखं खला भीतिं प्राप्तवन्तः समन्ततः ॥ १०३७ ॥
इन्दो राहुभयं कदापि कुरुते कालः कलाः पूरयन्
सिञ्चन्संचिनुते तडिन्निपतनक्षोभं तरोर्वारिदः ।
वेधाः सत्पुरुषस्य सर्वजगतामाह्लादनायोदयं
कुर्वन्नामयदर्शनेन कुरुते भीतिप्रकर्षं क्षणम् ॥ १०३८ ॥
अवाधिष्टतमां कष्टो विषस्फोटः कदाचन ।
प्रकोष्ठं भूमिपालस्य प्रजानां हृदयं च सः ॥ १०३९ ॥
माघमासीव पुष्पाणां म्लेच्छप्रालेयबाधया ।
न लाभो विषवैद्यानां देशेस्मिन्नभवत्तदा ॥ १०४० ॥
यज्वा गारुडशास्त्रज्ञः शिर्यभट्टो नृपानुगैः ।
अत्रान्विषद्भिरानीत्र कूपोध्वन्यैर्मरावि व ॥ १०४१ ॥
चिकित्सायां विदग्धः स म्लेच्छभीत्या व्यलम्बत ।
स्फुलिङ्गदग्धः पुरुषः स्पृशत्यपि मणिं चिरात् ॥ १०४२ ॥
स्वयं दत्ताभयो राज्ञा प्राज्ञस्तमुदमूलयत् ।
शिर्यभट्टो विषस्फोटं करीव विषपादपम् ॥ १०४३ ॥

तस्य कीर्तिः सुखं राज्ञः प्रजानां हर्षसंततिः।
प्रारोहंस्त्रीणि विस्फोटे तत्रैकस्मिन्विपाटिते ॥ १०४४ ॥

तुष्टेन भूभुजा दत्तां यथेष्टमपि संपदम्।
नैक्षिष्ट शिर्यभट्टः स यतात्मेव वराङ्गनाम् ॥ १०४५ ॥

उद्वाहपातकवशादिव निर्घृणः सन्
दग्ध्वा तृणं तृणकृशानुरुपैति शान्तिम्।
जाताम्बुवाहकरुणाप्रणयात्तृणस्य
कान्तिः पुनः शतगुणा मसृणाभिरामा ॥ १०४६ ॥

क्ष्मां संतापयता गाढमाषाढेनेव वारिदाः।
सूहभट्टेन संशुष्य पराभूता ययुर्दिशः ॥ १०४७ ॥

वर्षा मरुदिव क्ष्मापस्तद्विद्याप्रत्ययोत्सुकः।
अनाययत्स तान्सर्वान्पण्डितान्निजमण्डलम् ॥ १०४८ ॥

मुक्ताहारोपमे देशे विद्वद्रत्नानि नायकः।
कान्त्या वा सुधिया तत्र यथायोगं न्यवीविशत् ॥ १०४९ ॥

राजा संरोपितानर्घवृत्तिदानेन पण्डितान्।
अप्याययज्जलेनेव मालाकारो महीरुहान् ॥ १०५० ॥

नाशितं सूहभट्टेन यद्यत्कश्मीरमण्डले।
योजितं शिर्यभट्टेन राजप्रार्थनयाथ तत् ॥ १०५१ ॥

प्रवृत्य यागयात्रादि नागानां शिर्यभट्टकः।
तुरुष्कापहृतां भूमिं विदग्धेभ्यो न्यदापयत् ॥ १०५२ ॥

उदये दापिते तेन हिन्दुकानामखण्डिते।
शिर्यभट्टाय चुकुपुः सर्वे यवनदानवाः ॥ १०५३ ॥

महापद्मफणीन्द्राम्भःसंभेदे कुम्भकेन सः।
बद्धोपि हतिवत्स्थित्वा यवनेन्द्रान्व्यलक्षयत् ॥ १०५४ ॥

तापो यस्याह्नि शैलाञ्ज्वलयति स रविः सायमक्ष्णापि गम्यः
स्वग्राव्णः शुष्यतोह्नि द्रवयति न शशी पूरकः सायमब्धेः ।
कारुण्यादेव लोके निजमतिसकलं स्वेच्छया दर्शयित्वा
तं तद्भाग्यावसानात्प्रथममथ महांस्तूर्णमन्तर्दधाति॥१०५५॥

कलौ पातकिनां पुंसां स्पर्शदर्शनविव्हला ।
अवश्यं शारदा देवी तदान्तर्धानमाश्रयत् ॥ १०५६ ॥

मुखे स्वेदो भुजे कम्पः पादस्पर्शे विदाहिता ।
जातु जात्वभवद्देव्या नो तदा हि तथा क्वचित् ॥ १०५७ ॥

द्रोहार्जिताद्धनाद्भागं प्रसादेन नियुञ्जति ।
कश्मीरलोके सा देवी नानुग्रहपरा ह्यभूत् ॥ १०५८ ॥

दूर्वामात्रेण तुष्यन्ति विशुद्धेन हि देवताः ।
प्राणैरपि न मालिन्यदूषितैर्जातुचित्पुनः ॥ १०५९ ॥

कलिकालेपि देव्या स प्रभावोपि शमं गतः ।
जात्वित्यगान्नृपो देवीं द्रष्टुं तद्यात्रिकैः सह ॥ १०६० ॥

नदीं मधुमतीं स्नानपानाभ्यां फलयन्नयम् ।
शारदाक्षेत्रमासीदत्सीदत्परिषदाकुलम् ॥ १०६१ ॥

देवीभक्ताभयोद्युक्तो वक्तुं तच्छक्तिमुद्यतः ।
युक्तायुक्तविवेक्ता स तत्र राजा न्यविक्षत ॥ १०६२ ॥

तत्रापि तेषां दौरात्म्यदर्शनाद्विस्मितो नृपः ।
भक्तिन्हासमगाद्देव्यां यात्रिकेषु च कोपिताम् ॥ १०६३ ॥

साक्षात्त्वद्दर्शनं देवि देवानामपि दुर्लभम् ।
अस्माभिर्नार्थनीयं तत्कलिकालकलङ्कितैः ॥ १०६४ ॥

अशक्तानां भवद्रूपं निष्फलं ध्यातुमर्चितुम् ।
भक्तिभाजामनुक्रोशाद्यत्तु रूपं त्वमग्रहीः ॥ १०६५ ॥

तवास्यां प्रतिमायां चेद्यपेतो नैव संनिधिः।
पवित्रयतरामद्य स्वप्ने त्वद्दर्शनेन माम् ॥ १०६६ ॥
अस्माभिश्च ततः सा त्वं यथाशक्ति निषेव्यसे।
मिथ्याभक्तदुरात्मत्वात्त्वं चेद्दूरमितो गता ॥ १०६७ ॥
किमर्थं प्रतिमा तर्हि गर्हिता हिन्दुवैरिभिः।
विज्ञप्येति स सप्तम्यां भाद्रे राजा जितेन्द्रियः ॥ १०६८ ॥
अशेत शारदाक्षेत्रप्रासादस्थण्डिलोपरि।
दर्शितं न यदा स्वप्ने किंचित्संनिधिसूचकम् ॥ १०६९ ॥
राज्ञाष्टानवतौ वर्षे स्वां मूर्तिं देव्यचूर्णयत्।
नास्यादाद्दर्शनं देवी म्लेच्छसंसर्गतो ध्रुवम्।
स्वामी भृत्यापराधेन गर्हणीय इति स्थितिः ॥ १०७० ॥
देवीदर्शनविच्छेदि तस्य नासीद्धि किंचन।
दया सत्यं विवेकश्च तमेवाश्रयते तदा ॥ १०७१ ॥
व्यावृत्त्य यवनानां स वनानामिव वारिदः।
हर्षोत्कर्षवशोकार्षीन्महत्कनकवर्षणम् ॥ १०७२ ॥
यत्र दण्ड्या न दण्ड्यन्ते दुर्बलास्तस्करं विना।
भूपतेः प्राड्विवाकत्वं स प्रापद्भट्टशिर्यकः ॥ १०७३ ॥
प्रतिजानंस्तदा कोशधनसंभवने सति।
स्वगलच्छेदनं भट्टो मिथ्यावक्तुश्च विप्लवम् ॥ १०७४ ॥
शाखाभङ्गसमुद्भूतशब्दव्याप्तचतुर्दिशाम्।
समुदीरयतां नूनमब्राह्मण्यं पदे पदे ॥ १०७५ ॥
द्रुमाणां फलनम्राणां जनानां नमतां गुणैः।
छेदाद्रक्षामकार्षीत्स जिष्णुरिन्धनहेतुना ॥ १०७६ ॥
प्रतिवर्षं रौप्यपलद्वयमात्रसुदुर्ग्रहः।
जातिरक्षार्थमासीद्यच्चण्डो दण्डो द्विजन्मनाम् ॥ १०७७ ॥

शिर्यभट्टमुखेनैव तं निवार्य नरार्यमा ।
प्रतिवर्षं रौप्यमाषं तेषां दण्डमकल्पयत् ॥ १०७८ ॥

मांसादिलोभान्निघ्नन्स मण्डलेषु विषेण गाः ।
गोमांसकुण्डीर्ग्राह्यादिवारणात्स न्यवारयत् ॥ १०७९ ॥

पत्यौ मृत्येन्यं गच्छन्त्या विहितं भर्तृगोत्रजैः ।
स महामतिमाञ्श्रूद्या विप्लवं विन्यवारयत् ॥ १०८० ॥

न्यवारयत्सपुत्रीणामौर्ध्वदैहिकविप्लवम् ।
अपुत्रस्य विपन्नस्य लुब्धैस्तद्गोत्रजैः कृतम् ॥ १०८१ ॥

शिशूनां शास्त्रपाठादि सूहभट्टेन नाशितम् ।
वृत्तिदानेन विदुषां विद्यावानानयत्पुनः ॥ १०८२ ॥

विधित्सु— स्वाभि—— द्विजदेहे महीपतिः ।
व्यधत्त तिलकव्याजाद्विभागं सत्यधर्मयोः ॥ १०८३ ॥

ग्रामाणां प्रथमे वर्षे संक्रान्तं कारकातुरैः ।
पत्तलाघोषदेशेषु लोत्रदण्डं न्यवारयत् ॥ १०८४ ॥

निवार्य शाकटतुलामानकूटं चिरस्थितम् ।
अर्घव्यवस्था जन्तूनां प्रतिमासमकारयत् ॥ १०८५ ॥

बहिर्देशागतार्थानां देशकालाद्यपेक्षया ।
व्यवस्थाप्यार्थमुत्पिञ्जमच्छिनद्दिनमोषणम् ॥ १०८६ ॥

विदग्धः शिर्यभट्टोपि नोत्कोचफलमादित ।
अविनाशि पुनर्धर्मफलं वर्षोपकारतः ॥ १०८७ ॥

देहस्थैवार्थिनां ज्ञानरसविज्ञानकाङ्क्षिणाम् ।
तदिच्छासिद्धिरभवद्राज्ञः पुण्यफलाद्भुतम् ॥ १०८८ ॥

महाश्रीशिर्यभट्टस्य मुखाद्राजा न्यवारयत् ।
धर्मप्रकाशनामानं राजकाङ्कटिकं प्रभुः ॥ १०८९ ॥

दूरं निवारयामास निर्धारणपदाङ्कितम्।
भाविनां भूमिपालानां दुर्व्यवस्थापथार्गलम्॥ १०९०॥
अस्थापयत्स धर्मस्थः सद्वृत्तं प्रतिपत्तनम्।
मुषितो ग्रामसीमायां ग्रामेभ्यः प्रापयद्धनम्।
अरण्येरण्यनाथेभ्यः पान्थस्तेन महीभुजा॥ १०९१॥
हासाः श्मशानदेवीनां सूहभट्टं प्रतीव तम्।
प्रतिस्थानं विमानानि प्रेतानामद्युतंस्तदा॥ १०९२॥
म्लेच्छैरुपद्रुतां क्षौणीमक्षीणकरुणो नृपः।
उदहार्षीत्क्रमादेवं दानवैरिव केशवः॥ १०९३॥
उच्छृङ्खान्स नयन्भङ्गं निम्नानापूरयन्नृपः।
स्वकीर्तिबीजवापार्थमनुद्घातां महीं व्यधात्॥ १०९४॥
भूपतेः परदारेषु निष्कौतुकमयं व्रतम्।
अभज्यत परं तस्य परश्रीपरिरम्भणे॥ १०९५॥
सम्यग्दशबलेनाथ सर्वज्ञेन महीभुजा।
सौगतस्तिलकाचार्यो महत्तमपदे कृतः॥ १०९६॥
स शिर्यभट्टस्तिलकः स सिंहगणनापतिः।
सोपानान्यभवन्नुच्चपदारोहे द्विजन्मनाम्॥ १०९७॥
मेदिन्याखण्डलस्यासीत्पिकस्येव रसश्रिया।
अखण्डं रसपाण्डित्यं ब्रह्मकुण्डलसेवया॥ १०९८॥
कर्पूरभट्टो निर्दर्पः प्राणरक्षो महीभुजः।
गुणिनां शरणं चक्रे स्वगुणैः सुरभिं सभाम्॥ १०९९॥
पूर्वाब्दग्रहसंचारादुत्तराब्दग्रहस्थितिम्।
रूप्पभट्टो विदन्नासीद्विनैव गणितश्रमम्॥ ११००॥
श्रीरामानन्दपादानां भाष्यव्याख्या क्षणेक्षणम्।
वीक्षते शारदा क्षोणीमेव संभ्रान्तमानसा॥ ११०१॥

गान्धारसिन्धुमद्रादिभूभुजस्तस्य भूभुजः ।
ग्राम्या इवाभवन्नाज्ञाकारिणो जितवैरिणः ॥ ११०२ ॥

युद्धे जितं ततो बद्धं खुःखुरेन्द्रेण भूपतिः ।
मालदेशं मद्रराजमाज्ञया निरमोचयत् ॥ ११०३ ॥

राजा राजपुरीराजं नयज्ञः स्वपदातिभिः ।
क्षणाद्भ्रूभङ्गमात्रेण रणसूहमलोठयत् ॥ ११०४ ॥

उदभाण्डपुराधीशं सिन्धुराजोपबृंहितम् ।
स कन्दुकमिवोत्थाप्य मुहुर्मुहुरपातयत् ॥ ११०५ ॥

भोट्टभूमौ महीन्द्रेण गोग्गदेशे कदाचन ।
बाणागौरखराख्रेण गुणैर्लोकाश्च रक्षिताः ॥ ११०६ ॥

समिज्जिते शयादेशे क्रूरादेशो महीपतिः ।
सुवर्णबुद्धप्रतिमा यवनेभ्यो ररक्ष सः ॥ ११०७ ॥

कषाकरङ्कषस्तस्य निकषो भोट्टतेजसाम् ।
अप्रकाशां प्रकाशोथ कुलूतनगरीं व्यधात् ॥ ११०८ ॥

केवलं हृदयं शून्यं भोट्टानां नाभवत्तदा ।
भूमिपालभयावेशात्कोशोपि चिरसंचितः ॥ ११०९ ॥

प्रकृतीनां ददद्राजा शोषाप्यायौ यथोचितम् ।
प्रत्यवेक्षामकार्षीत्स शालीनामिव कार्षिकः ॥ १११० ॥

नासहिष्टैव तच्चापं तुलां शार्ङ्गपिनाकयोः ।
दूरकार्यार्थसाधिन्या धनुष्मत्ता भ्रुवः पुनः ॥ ११११ ॥

अस्तं यस्तमसां कुलानि बलतो नेतुं सदा वाञ्छति
क्षीणं तं वसुनाभिपूर्य शशिनं संवर्धयत्यञ्जसा ।
काश्यप्यामवकाशमात्रघटनां शाखामुखै रुन्धतो
वृक्षान्वृष्टिभरैश्च योस्य कतमो भानोस्तुलामर्हति ॥ १११२ ॥

लद्दराजसुतं राजा नोत्सवं यमवर्धयत्।
अहृतद्रविणं तं स द्रोहीति निरवासयत्॥ १११३॥

मक्कदेशागतो जातु पुस्तकाडम्बरं वहन्।
सैदालनामा यवनो राजेन्द्रं तमुपागमत्॥ १११४॥

गुणान्वितकत्थमानं तं गुणिरागी नरेश्वरः।
उपागच्छत्प्रतिदिनं दर्शनायेतरो यथा॥ १११५॥

ध्वनतः पटहस्येव तस्यापश्यत्क्रमादसौ।
अन्तःसारविहीनत्वं परीक्षायां विचक्षणः॥ १११६॥

म्लेच्छमस्करिणि क्षोणीप्राणेशो निर्गुणेपि सः।
प्रेमाणं नामुचत्पुत्रे पितेव करुणामयः॥ १११७॥

प्रदोषस्येव तमसां दुर्दिनस्येव विद्युताम्।
दोषाणां बहुता तस्य प्रजाः समुदवेजयत्॥ १११८॥

तस्मिन्नवसरे कश्चिद्योगिराजो जितेन्द्रियः।
न्यविक्षतोन्नते स्तम्भे योगाभ्यासस्य सिद्धये॥ १११९॥

स्तम्भोपरि नवाहानि निराहारमपश्यतः।
तस्याशिषेव महिषी राज्ञः पुत्रमजीजनत्॥ ११२०॥

तपस्यतस्ततस्तस्य तदभून्नवमं दिनम्।
राज्ञस्त्वनवमं पुत्रजन्मकालमहोत्सवैः॥ ११२१॥

हेमन्तान्ते पतति तुहिनं फाल्गुनेफल्गु वल्ग-
द्वीपस्यापि स्फुरति सुतरां शान्तिकालेतिदाहः।
शैत्योद्रेकं बृहति वहति ग्रीष्मकाले तुषारं
वस्तु प्रायः प्रथयति निजं धर्ममायाति नाशम्॥ ११२२॥

तपःकवचमस्पृष्ट्वा तमधो मार्गणैर्गतम्।
प्रहर्तुरिव निर्देष्टुं भविष्यन्तीं यथागतिम्॥ ११२३॥

राजमान्यं तमालोक्य कुप्यन्तं शान्तमानसः ।
निर्णयादचलद्वर्णी नयान्न तु भयोदयात् ॥ ११२४ ॥
स स्तम्भान्न महाधैर्यादवारोहन्महामनाः ।
नैवारोहज्जगद्दृष्टिं सद्यो द्यामपि योगवित् ॥ ११२५ ॥
अतिथिं योगपथिकं मावधीर्मामिति ब्रुवन् ।
म्लेच्छमस्करिणा वर्णी खड्गघातैरचूर्णत ॥ ११२६ ॥
अत्यर्थदर्शनद्वेषान्मदिरामदमोहितः ।
स म्लेच्छमस्करी योगिराजं तमवधीच्छरैः ॥ ११२७ ॥
संतप्तैर्मलिनैः स्थूलैर्जनानां तद्विलोकनात् ।
भूतले पतितं वाष्पैरपवादैश्च राजनि ॥ ११२८ ॥
पृथ्वीनाथोथ तच्छ्रुत्वा शुद्ध्यर्थमिव मग्नवान् ।
भीर्ह्रीशोकक्रुधाश्चर्यकृत्यचिन्तार्णवेषु सः ॥ ११२९ ॥
प्रथमोद्भूतपुत्रेपि तस्मिन्नहि महीभुजा ।
नास्नायि नाभ्यवाहारि न व्यवाहारि नाकथि ॥ ११३० ॥
अन्येद्युर्भूपतिः पृष्टस्मृतिश्चगुरुकोविदः ।
हन्तुर्दण्डं वधं शण्वन्करुणायन्त्रितोभवत् ॥ ११३१ ॥
प्रतीपं खरमारोप्य प्रतिहट्टं परिभ्रमम् ।
नरमूत्राभिषिक्तस्य कूर्चस्य परिकर्तनम् ॥ ११३२ ॥
ष्ठीवनं सर्वलोकानां प्रेतान्त्रैर्बाहुयन्व्रणम् ।
जीवन्मरणमादिक्षद्दण्डं तस्य मृषायतेः ॥ ११३३ ॥
राजनि म्लानिहीनानि दिक्सौगन्ध्यवहानि च ।
अपतन्नाकपुष्पाणि पौराशीर्वचनानि च ॥ ११३४ ॥
मद्रराजदुहित्रोः स चतुरस्तनयान्नृपः ।
यथा दशरथो राजा जनकान्तानजीजनत् ॥ ११३५ ॥

ज्यायानादामखानः स हाज्यखानस्तथा परः।
खानो जस्सरथः खानो बहरामश्च संज्ञितः॥ ११३६॥
हिन्दवः सूहभट्टेन बलाद्ये पीडिता भृशम्।
परदेशं गतास्ते तु बिभ्रतो वेशकल्पनाम्॥ ११३७॥
निजाचारेरता नित्यं तदाचारद्विषो हृदा।
स्वमाचारमनुष्ठातुं प्रेरिताश्च द्विजैर्बलात्॥ ११३८॥
दारिताः स्वत्राणभयादुत्कोचार्पणतत्पराः।
रक्षिता भूमिपालेन तदुपद्रववारणात्॥ ११३९॥
क्षीरार्णवस्य मथनात्परतः सुधादि-
रत्नानि तान्यनुपभोगनिरर्थकानि।
यो नीतवान्सफलतां किल पात्रदाना-
त्स्तुत्यः स मन्दरगिरिर्गिरिराजवर्गे॥ ११४०॥
नदीरघट्टपातेन भुवश्चाम्बु विनाफलाः।
संयोगात्सफलीकृत्य यशश्चित्रमजीजनत्॥ ११४१॥
राज्ञोत्पलपुरक्षोणौ कुल्यां प्रापय्य वप्रिणीम्।
तयोर्निरर्थकत्वेन दूषणा विनिवारिता॥ ११४२॥
नन्दशैलमरौ कुल्यामवतार्य महीपतिः।
अस्मारयच्चक्रधरं सागरान्तर्निवासिनम्॥ ११४३॥
करालम्बः सतां बिभ्रदकरालं सितं यशः।
कुल्ययाकारयद्देशं करालाख्यं स्तुतेः पदम्॥ ११४४॥
साग्रहारा द्विजा यत्र साग्रहाराश्च योषितः।
साथ जैनपुरी राज्ञा कराले निरमीयत॥ ११४५॥
अवन्तिपुरभूमौ च कान्तोदन्तेन भूभुजा।
कुल्यावतारिता तुल्या शालिसंपत्तिशालिनी॥ ११४६॥

गिरिमार्गेण गङ्गाया मानसं प्रापिते जले ।
किं पूता मानसेनेयमनया किमु मानसम् ॥ ११४७ ॥
व्यडम्बयत्स्वमूर्तिं या मानसप्रतिबिम्बिताम् ।
व्यधायि तत्तटे तेन नगरी सफलाभिधा ॥ ११४८ ॥
श्रीस्वयस्य यमानेतुं प्रज्ञा न स्फुटमस्फुरत् ।
श्रीसिकन्दरसाहोपि कुण्ठोत्कण्ठोभवत्तराम् ॥ ११४९ ॥
श्रीजैनोल्लावदीनस्तमानीय पहरं नदम् ।
प्रासिञ्चद्विंशतिक्रोशाञ्छ्रीमान्स्वयपुरे मरुम् ॥ ११५० ॥
दुर्भिक्षव्याप्तचित्तानां विश्रान्तिजननाघृणाम् ।
विश्रान्तिसंज्ञया कुल्या प्रसिद्धाभूत्पदे पदे ॥ ११५१ ॥
श्रीमान्स्वयपुरात्पारेवितस्तं धरणेर्नृपः ।
संयोज्य पहरं तापव्यापदं स न्यवारयत् ॥ ११५२ ॥
आ प्रद्युम्नगिरिप्रान्तादमरेशपुरावधि ।
मठाग्रहारहट्टाढ्यां स जैननगरीं व्यधात् ॥ ११५३ ॥
स्वर्गं जेतुमिवोदस्थादुन्नतैरश्मवेश्मभिः ।
संक्रान्ता जैनगङ्गायां फणिलोकं च यागमत् ॥ ११५४ ॥
जैनगङ्गां रणस्वामिप्रासादे प्रापितां कृती ।
व्यसिस्मरत्स्मेरयशा हरिपादकुतूहलम् ॥ ११५५ ॥
पारेस्वयपुरं जैनगिरिसंज्ञां पुरीं व्यधात् ।
कैलासाचलतुल्यैर्या प्रासादैरभिभूषिता ॥ ११५६ ॥
सिद्धक्षेत्रे सुरेश्वर्यां प्रसिद्धविलसद्यशाः ।
राजधानीं निषिद्धारिर्व्यधात्सिद्धिपुरीमसौ ॥ ११५७ ॥
प्रासादशिखरे राजा मार्तण्डामरनाथयोः ।
राजधान्यौ व्यधात्सौधधौतदूरनभस्तले ॥ ११५८ ॥

सुभिक्षं स्वयराजेन पूर्वमङ्कुरितं किल।
ततः प्रभृत्यतीतेषु बहुष्वपि च राजसु ॥ ११५९ ॥
प्रजानामल्पपुण्यत्वान्नावर्धत मनागपि।
तपोबलात्पल्लवितं पुष्पितं फलितं तथा ॥ ११६० ॥
श्रीजैनोल्लाभदीनेन युगपत्तद्व्यधीयत।
तपसामतिशुद्धानां किमिव ज्ञापकं परम् ॥ ११६१ ॥
पूर्वपुण्यक्षये राज्यात्पतन्त्यन्ये महीभुजः।
तस्य जन्मान्तरे राज्यप्राप्त्यै राज्यमभूत्प्रभोः ॥ ११६२ ॥
स नदीमातृकाः कृत्वा धरणीर्देवमातृकाः।
अग्रहारान्ननु क्षमापो द्विजेभ्यो यददात्सदा ॥ ११६३ ॥
वराहक्षेत्रनगरविजयेशपुरादिषु।
यवनेभ्योग्रहारान्स सविहारान्स्वयं ददौ ॥ ११६४ ॥
विजयक्षेत्रवाराहक्षेत्रशूरपुरादिषु।
सत्रदानेन स त्रासमपि गोत्रभिदो व्यधात् ॥ ११६५ ॥
भूमिविक्रयभूर्जादि कृतचिह्नं महीभुजा।
निह्नवप्रागभावाय धर्माधिकारिणा कृतम् ॥ ११६६ ॥
यो जयापीडदेवेन प्राप्तो नागप्रसादतः।
स दण्डमिव तस्यादात्ताम्रं ताम्राकरो गिरिः ॥ ११६७ ॥
मणीन्खनिभ्यश्चालभ्यांस्तद्राज्ये भूरजीजनत्।
ये जैनमणयः ख्याताः पद्मरागमदच्छिदः ॥ ११६८ ॥
सरितां सैकते पीतसिकताभ्रमयं तदा।
काञ्चनं काञ्चन छायां बिभ्रल्लोकैरचीयत ॥ ११६९ ॥
सरित्सुवर्णात्षष्ठांशो ग्राह्यो भाविभिरीश्वरैः।
ताम्रपट्टेलिखद्राज्ञावाक्यमेवं नरेश्वरः ॥ ११७० ॥

नगराधिकृतः काचडामरो दुस्तरे पथि ।
क्रोशमात्रं व्यधात्सेतुं नगरान्तः शिलामयम् ॥ ११७१ ॥
नात्मैव सेतुदानेन तेन पङ्कात्समुद्धृतः ।
सकलोपि जनो मध्येनगरं पुण्यशालिना ॥ ११७२ ॥
विषये विषये चक्रे शिर्यभट्टो मठान्पृथक् ।
अन्येपि सचिवा राज्ञो धर्मशाला बहूर्व्यधुः ॥ ११७३ ॥
पद्माकरस्य मथनाय गजाधिराजा-
वभ्युद्यतौ सततमेव तदम्बुतृप्तौ ।
तावत्कराकरि रदारदि चातिमत्तौ
कृत्वा क्षणादगमतां स्वयमेव नाशम् ॥ ११७४ ॥
मसूदशूरौ धात्रेयौ भूपतेरेकगोत्रजौ ।
द्वौ रन्ध्रान्वेषिणावास्तामन्योन्यविभवासहौ ॥ ११७५ ॥
राज्ञा तौ वारितोद्रेकौ स्नेहदाक्षिण्यशालिना ।
हृत्वान्यतममुत्पिञ्जसज्जावभवतां चिरम् ॥ ११७६ ॥
कदाचिद्भूपतेरग्रे स्पृष्टः शूरेण वाक्शरैः ।
मसूदठक्कुरः शस्त्रसंन्यासं समकल्पयत् ॥ ११७७ ॥
न्यस्तशस्त्रः स रजनौ गच्छन्मितपरिच्छदः ।
रन्ध्रं लब्ध्वाथ शूरेण मसूदठक्कुरो हतः ॥ ११७८ ॥
वित्ताढ्यैष्टक्कुरैस्तस्य भ्रातृभिः ख्यातपौरुषैः ।
हन्तुमभ्यर्थितः शूरो भूपतेः प्रेमशालिनः ॥ ११७९ ॥
शूरे सानुचरे वित्तठक्कुरेण हते सति ।
प्रसादमगमत्कीर्तिष्टक्कुराणां च धीस्तदा ॥ ११८० ॥
तथाप्तयोगिनां मानमदाद्भूलोकवासवः ।
तेषामग्रे यथा मद्रराजाद्यैर्लेडितं श्ववत् ॥ ११८१ ॥

स ददद्योगिनां भोगं योगं तेभ्योग्रहीन्नृपः।
भयं ददद्रातिभ्यो दधावभयमप्यहो ॥ ११८२ ॥

मुद्राकर्पूरकन्थादि वारयन्योगिनां नृपः।
कुण्डलं हेमपात्राणि दुकूलमपि दत्तवान् ॥ ११८३ ॥

छित्वा पर्वतपक्षतीरपि नवाः फेनेन हत्वाप्यहिं
कृत्वा यज्ञशतं त्रिलोकविजयी कोर्त्या न तृप्तिं गतः।
इन्द्रः पीतसितासितारुणहरिद्वर्णं विभर्त्ते धनु-
र्ज्योतिर्धूमसमीरनीरघटनामात्रेप्यसारे घने ॥ ११८४ ॥

भूतानां भाविनां वापि यदशक्यं महीभुजाम्।
तदिष्टसाहसो राजा कीर्तये कर्तुमिष्टवान् ॥ ११८५ ॥

कर्तव्यं साहसं यद्यदचिन्तयदयं नृपः।
कालस्यानवधित्वेन विपुलत्वेन च क्षितेः ॥ ११८६ ॥

तत्तत्संभाव्य साध्यं स भाविभिर्मेदिनीश्वरैः।
दूरादब्धिमिवायातो रत्नेष्वधिकदीप्तिषु ॥ ११८७ ॥

साहसेष्वेकमादातुमपि प्राप न निश्चयम्।
उपचारैर्दरिद्राणां बभूवोदारमानसः ॥ ११८८ ॥

न तोषितः श्रुतैराज्ञामतीतानां स साहसैः।
अगम्येष्वपि भूपालः शैलेषु च सरस्सु च ॥ ११८९ ॥

शब्देष्वर्थेष्विव कविस्ततः समचरन्नृपः।
वणिजामिव वाक्यानि व्यवहारसमुत्सुकः ॥ ११९० ॥

राजा नीलपुराणादीन्पण्डितेभ्यस्ततोश्रृणोत्।
चिन्तान्तराणि संत्यज्य साहसैकसमुत्सुकः ॥ ११९१ ॥

कदाचिद्धरणीपालश्चिरमेवमचिन्तयत्।
देहस्येव त्रिलोकस्य मुखवत्क्षितिमण्डलम् ॥ ११९२ ॥

प्रधानं तत्र कश्मीरमण्डलं नयनं यथा ।
शैलराजशिखाः पक्ष्मतुलां यत्र वहन्ति ताः ॥ ११९३ ॥

तारामण्डलवत्तत्र महापद्मसरोवरः ।
शश्वदुद्भ्रमितो यत्र मैनाकान्वेषणोद्यतः ॥ ११९४ ॥

प्रतिबिम्बफलाद्भाति जाने हिमगिरीश्वरः ।
समुद्रसदृशे यत्र प्रतिबिम्बच्छलाद्रवेः ॥ ११९५ ॥

अन्तः कृतास्पदो दीप्तो लक्ष्यते वडवानलः ।
महापद्मास्पदं तत्र ज्योतिर्मण्डलसोदरम् ॥ ११९६ ॥

तदापूर्य कथंचिच्चेत्कियन्मात्रमपि क्रमात् ।
निर्माणं शक्यते कर्तुं तदा राज्यफलोदयः ॥ ११९७ ॥

अगाधसलिलच्छन्नक्रोशाष्टाविंशतिर्भवन् ।
सरोराजः स हि महानाशयो महतामपि ॥ ११९८ ॥

विचिन्त्येति स विस्रष्टुं तत्रोपायं सरोवरे ।
नागस्य गतवान्मध्यं योगीवात्मानमात्मना ॥ ११९९ ॥

सदैवोद्धतकल्लोलं महापद्मसरो महत् ।
नागाहन्त नृपाः पूर्वे तरणीभङ्गशङ्किनः ॥ १२०० ॥

तपःप्रभावाद्धैर्याद्वा कार्यगौरवतोपि वा ।
स्थलवत्सलिले तत्र स राजा त्वचरत्सुखम् ॥ १२०१ ॥

यच्चेतसा चिरतरं परिचिन्त्यमानं
चिन्तामणिः किल ददाति तदेव नान्यत् ।
चित्तस्य चापि यदगोचरतामुपैति
तत्तु प्रयच्छतितरां बत बुद्धिरत्नम् ॥ १२०२ ॥

तस्य हि क्षितिपालस्य निरालस्यमतेः सतः ।
सरसः स्थलतां कर्तुमुपायः प्रत्यभादयम् ॥ १२०३ ॥

शिलापूर्णप्रवहणैरुपर्युपरि पातितैः।
शैलशृङ्गैरिवाम्भोधिमेतदापूरयाम्यहम् ॥ १२०४ ॥
कृताभिर्लोहनद्धाभिः पट्टीभिर्दैवदारुणः।
न क्लिद्यन्ते न भिद्यन्ते शिलाप्रवहणानि यत् ॥ १२०५ ॥
ततः प्रत्यागतो राजा वृद्धानाबद्धकौतुकः।
अपृच्छत्कारणं तस्य ते चैनं नृपमब्रुवन् ॥ १२०६ ॥
द्वारिकेवार्णवेत्रासीत्पुरी संधिमती किल।
सुदर्शनेन सहिता सततं श्रीपतिश्रिता ॥ १२०७ ॥
नगर्या देवता तस्या महापद्मः फणीश्वरः।
त्वमिवैतांश्चतुर्वर्णान्पुत्रवत्पर्यपालयत् ॥ १२०८ ॥
कलिकालबलात्तत्र दुराचारनिषेविणः।
वसन्तस्ततवास्तव्याः प्रापुर्वृद्धिं दिनाद्दिनम् ॥ १२०९ ॥
अथ वर्णाश्रमाचारविपर्यासानुबन्धतः।
क्रोधं नागपतिर्यातो दूषणादिव सज्जनः ॥ १२१० ॥
अनुज्झितनिजाचारं कुम्भकारं स कंचन।
स्वप्नेवदद्दुराचारान्पौरान्मज्जयितास्म्यहम् ॥ १२११ ॥
नागः प्रजादुराचारक्रुद्धो ब्रोडयतीति तम्।
प्रातर्वदन्तं जहसुः पौरा मत्तमिवाखिलाः ॥ १२१२ ॥
तदास्तिके कुम्भकारे गते तस्मात्पुराद्बहिः
नागेन्द्रो जलपूरेण सर्वमब्रोडयत्पुरम् ॥ १२१३ ॥
यावत्पौराः पुरश्चेलुस्ते सर्वे हरिणा इव।
तावदेवाग्रमाक्रामद्दावाग्निरिव तज्जलम् ॥ १२१४ ॥
फणाशतोल्लसद्धारिधाराशब्दभयंकरः।
नागराजोथ नगरीं वैरीवावेष्टयज्जलैः ॥ १२१५ ॥

मन्त्रान्पठत्सु विप्रेषु जनेषु प्रणमत्सु च ।
रुदत्स्वपि च बालेषु नास्याभूद्यमवद्दया ॥ १२१६ ॥
भयाद्बालेषु पुत्रेषु कण्ठलग्नेषु योषितः ।
बाष्पमुक्ताफलैश्चक्रुः पूजां फणिपतेरिव ॥ १२१७ ॥
पादादङ्कं ततः कण्ठं ततः स्कन्धं ततः शिरः ।
प्राणा इव सुता जग्मुर्मातृणां भयविह्वलाः ॥ १२१८ ॥
सर्वाण्यङ्गानि नारीणां शृङ्गारीवानुरागवान् ।
कम्पमानानि लोलः स जलपूरः समस्पृशत् ॥ १२१९ ॥
ह्रस्वं दीर्घं च सूक्ष्मं च स्थूलं चाणु महत्तथा ।
अन्धकार इवाच्छाद्य जलपूरो व्यजृम्भत ॥ १२२० ॥
अगाधे सलिले तस्मिन्खलस्पर्शासहस्ततः ।
फणिराजः स्थितिं चक्रे विपिने सज्जनो यथा ॥ १२२१ ॥
कालियः स हि नागेन्द्रः पदाक्रान्तो मुरद्विषा ।
शिरस्युत्पन्नपद्मत्वान्महापद्माभिधां गतः ॥ १२२२ ॥
नष्टान्योजयितुं भूयः कश्मीरानिच्छतो हरेः ।
अवतारस्त्वमेतत्ते सिध्यत्येव चिकीर्षितम् ॥ १२२३ ॥
राजा श्रुत्वेति तत्त्वज्ञः क्षणमेवमचिन्तयत् ।
एवंविधानि कार्याणि सिध्येयुः कथमन्यथा ॥ १२२४ ॥
प्रजाचारविपर्यासान्नाक्षमिष्ट पुरं फणी ।
नानिष्टं क्षमतेल्पोपि तादृशस्तु महान्कथम् ॥ १२२५ ॥
नागराजोचितच्छत्रसगोत्रमहमत्र तु ।
स्थलमात्रं यशोरत्नघटिकारम्यमारभे ॥ १२२६ ॥
उल्लोलसरसो मध्ये कल्पमाने स्थले तथा ।
पवित्रे विजने चात्र सिद्धिं यास्यन्ति साधकाः ॥ १२२७ ॥

चिन्तयित्वेति भूपालः शिलाप्रवहणैर्दृढैः ।
उल्लोलसरसो मध्यमप्यगाधमपूरयत् ॥ १२२८ ॥
हेमन्ते बिसशृङ्गाटकिषुकोद्धरणादिना ।
श्रीजयापीडकोट्टस्य ज्ञायतेगाधवर्तिता ॥ १२२९ ॥
उल्लोलस्यान्तभागेषु स्वयाकुण्डलकादयः ।
दृश्यन्ते बहवो ग्रामा विशालसदनाङ्किताः ॥ १२३० ॥
गिरयोपि निमज्जन्ति यत्र तत्र तु स व्यधात् ।
जैनलङ्कां महाटङ्कां तं निधायाधिकारिणम् ॥ १२३१ ॥
कारुण्यात्कीर्तिलोभाच्च स्वयमेवाथ भूपतिः ।
वामपार्श्वे गिरौ वारि विस्रष्टुं चिरमभ्रमत् ॥ १२३२ ॥
दृष्ट्वा निःसलिलं शैलं लेदर्यानयनोत्सुकः ।
अश्रौषीच्छास्त्रवृद्धेभ्यस्तन्मूलममरेश्वरम् ॥ १२३३ ॥
निर्विघ्नं कार्यसिद्ध्यर्थं प्रसादयितुमीश्वरम् ।
आरुरोहामरेशाद्रिमभिमानमिवाथ सः ॥ १२३४ ॥
ते लताभ्य इव म्लेच्छा नागेभ्यः शङ्कयाकुलाः ।
नान्योन्यमिव संलापं तत्र स्वक इव व्यधुः ॥ १२३५ ॥
त्वग्रोगिणामिव स्वस्थास्तुरुष्काणां वनस्थिताः ।
नागा दर्शनमप्यन्तर्नासहंत कदाचन ॥ १२३६ ॥
धैर्येणोपद्रुतो राजा शुश्रूवान्नासहिष्ट तान् ।
बालोग्निकणविप्लुष्टः पद्मरागमिवामलम् ॥ १२३७ ॥
कपीनामिव बद्धानां भीतानामपि च ध्रुवम् ।
म्लेच्छानां च दुराचारचापल्यं विन्यवर्तत ॥ १२३८ ॥
यदुद्गर्जद्भिरुद्यद्भिः सविद्युद्भिर्घनैर्घनैः ।
कोपेनेवाभवत्तेषु ततः कालमुखं नभः ॥ १२३९ ॥

कातरेष्वेव संग्रामाद्भिरेस्तूर्णपलायिषु ।
म्लेच्छेषु करकावर्षैर्नष्टधैर्येषु तत्क्षणम् ॥ १२४० ॥
मानादिव कुलीनोथ भक्त्या धैर्यादविच्युतः ।
अवरूढो न शैलेन्द्रात्कश्मीरेन्द्रः कथंचन ॥ १२४१ ॥
मान्त्रिकेष्विव मेघेषु गर्जत्सु यवनोरगैः ।
त्यक्तो निधिरिव क्ष्मापो देवो नागैरशंस्यत ॥ १२४२ ॥
निवृत्त्यतामितो देव कार्यसिद्धिर्भविष्यति ।
पूजोपकरणं शंभोः प्राप्तमेव विसृज्यताम् ॥ १२४३ ॥
स्वप्ने दिव्याकृतेः पुंसः श्रुत्वेति क्षितिनायकः ।
सिद्धकार्यस्ततः प्रातः कश्मीरान्तरमाविशत् ॥ १२४४ ॥
लेदरीगिरिमार्गेण प्राप्य मार्तण्डपत्तनम् ।
इति राजा समादिक्षद्धार्मिकं शिर्यभट्टकम् ॥ १२४५ ॥
दयालुत्वात्प्रशस्तत्वान्निर्लोभत्वान्महीभुजा ।
नियुक्तः स नदीकृष्टावलगद्भट्टशिर्यकः ॥ १२४६ ॥
सोव्याहताज्ञः सर्वत्र लोकालीपतिभिस्ततः ।
लोकमानाय शैलेन्द्रं सरितः पदवीं व्यधात् ॥ १२४७ ॥
अवटेषु शिलाबन्धं निम्नेषु ग्रावपूरणम् ।
खनीषु कुटिलं मार्गं तस्याः स सरितो व्यधात् ॥ १२४८ ॥
तटस्थान्पोषयन्त्युच्चैः पुरस्ताच्छाखिनः सरित् ।
सा तु राजसभेवाथ रभसादुदपूरयत् ॥ १२४९ ॥
प्रज्ञेव विदुषा स्थित्या चिरं प्रतिपदं सरित् ।
लोलीकृततरङ्गभ्रूः प्रातिष्ठत शनैः शनैः ॥ १२५० ॥
राज्ञस्तपःप्रभावेण शिर्यभट्टनयेन च ।
प्रजानामपि भाग्येन नास्या विघ्नोभवत्क्वचित् ॥ १२५१ ॥

सा भजन्ती गिरिं क्वापि त्यजन्ती दूरतः क्वचित् ।
वप्रात्पररतेवाभूत्सशब्दकलहा सरित् ॥ १२५२ ॥
नवस्य भूमिपालस्य चित्तवृत्तिरिवाम्भसा ।
अवटो दक्षिणे नद्या वामेद्रिर्विकटोपलः ।
पुरस्तुङ्गा च दीर्घा च शिलेति क्वाप्यदृश्यत ॥ १२५३ ॥
स्थूलेन गण्डशैलेन पुरतो रुद्धपद्धतिः ।
न तस्थौ न ययौ कुल्या कामिनीव विमानिता ॥ १२५४ ॥
राज्ञा स्वयमथाप्यत्र गण्डशैले विदारिते ।
सरित्तीर्णप्रतिज्ञेन गच्छन्ती क्रमते स्म सा ॥ १२५५ ॥
नद्या व्याकृष्टुमिष्टायाः शिलया मार्गरोधने ।
मिहिराख्यो नृपः क्रोधात्स्त्रीलक्षाणि जघान सः ॥ १२५६ ॥
श्रीजैनोल्लाबदीनस्तु सरितो मार्गरोधिनीम् ।
दारयित्वा शिलां शस्त्रैर्जनताः समजीवयत् ॥ १२५७ ॥
गिरीशमुकुटभ्रष्टां गङ्गामिव भगीरथः ।
लेदरीमब्धिविस्तीर्णां मार्तण्डक्ष्मामवापयत् ॥ १२५८ ॥
मेखलेव गिरेस्तस्य राज्ञः कीर्तिरिवामला ।
भूमेर्मुक्तालतेवासौ सरित्परमशोभत ॥ १२५९ ॥
समीपस्थोपि मार्तण्डो न मां शोषयितुं क्षमः ।
इतीव तरलोद्दामा निनादमकरोत्सरित् ॥ १२६० ॥
एकः श्रीजयनोल्लाबदीनो धर्मपरो नृपः ।
सरित्प्रवाहकपटादिति रेखां विधिर्व्यधात् ॥ १२६१ ॥
ब्रह्मचर्योपतप्तानां स्त्रीसङ्गादिव भूरुहाम् ।
सेकात्सरित्कृतात्तत्र किमप्युदभवत्सुखम् ॥ १२६२ ॥
दर्शितावर्तनाभिः सा गच्छन्ती सुभगं शनैः ।
सरित्सफेनसहिता मार्तण्डमहसत्तराम ॥ १२६३ ॥

सूर्यो हारिप्रवाहायां सरिति प्रतिबिम्बितः ।
मूर्तः संनिहितो ज्ञातः कलावपि चिरं जनैः ॥ १२६४ ॥

ननु दीनान्पालयन्ती नदानाभिमुखी सती ।
सरित्प्रसिद्धिमगमज्जैनधर्मनदीति सा ॥ १२६५ ॥

सान्द्रं प्रदोषजनितं तिमिरं निवार्य
विश्वप्रकाशनपरस्य दिवाकरस्य ।
आयाति मण्डलतलं स्वयमेव तेजः
श्रेष्ठौषधीशक्रुणमास्ततरां चिरं यत् ॥ १२६६ ॥

त्रिपञ्चाङ्कमिते वर्षवृन्दे याते कलेः किल ।
अथर्वकौशलाद्द्रोणो रणं कुरुबलैर्व्यधात् ॥ १२६७ ॥

कुरुभिर्निहते द्रोणे तदाथर्वा निराश्रयः ।
शरणीकृतवान्वेदः कर्णाटान्पटुचेतनान् ॥ १२६८ ॥

शास्त्रेष्वथर्ववेदस्य माहात्म्यं परिपश्यताम् ।
काश्मीरिकाणां तत्प्राप्त्यै चिरमासीन्मनोरथः ॥ १२६९ ॥

कालेथ विपुले याते सूहभट्टभयाकुलः ।
युद्धभट्टाभिधो मानी देशान्तरमगाद्गुणी ॥ १२७० ॥

यजुषः पठनात्प्रीतैः कर्णाटैः सोथ पाठितः ।
सरहस्यमथर्वाणं निजं प्रत्यागतो भुवम् ॥ १२७१ ॥

श्रीजैनोल्लाबदीनस्य गुणिनो गुणरागिणः ।
उपधीकृत्य तं वेदं परां तुष्टिमजीजनत् ॥ १२७२ ॥

दत्तस्वकीयवस्त्रान्नः शिर्यभट्टोथ धर्मवित् ।
तेनैवाथर्ववेदं तं द्विजपुत्रानपाठयत् ॥ १२७३ ॥

सा धर्मिष्ठा तु शाला शिर्यभट्टस्य धीमतः ।
कर्णाटानामपि परमगमत्स्पृहणीयताम् ॥ १२७४ ॥

स्निग्धा विद्युच्छ्रवणमधुरं गर्जितं वृष्टिरिष्टा
छायाभासत्क्रमभरहरिर्गाहते मन्दमन्दः।
वर्षाकालं विधिरनुदिनं वर्धयन्स्वं गुणौघै-
र्ग्रीष्मार्तासु प्रथयति दयादक्षिणत्वं प्रजासु ॥ १२७५ ॥

दशाविधुरभावेन विपक्षस्य बलेन वा।
दानसंस्कारमानादावनुरूपे पराङ्मुखः ॥ १२७६ ॥

यस्मिन्नादमखानाख्ये ज्येष्ठे पुत्रेपि भूपतिः।
अप्रसन्नो विदग्धत्वहीनैः संभावितश्चिरम् ॥ १२७७ ॥

हाजीखानादिपुत्रेभ्यो विशेषाद्विहितादरः।
विभासितः स राज्ञापि तिलको मधुना यथा ॥ १२७८ ॥

आदौ पादतले सन्तं करालम्बं ततः कृतम्।
यं दर्शनान्तरे चन्द्रमुक्तमाङ्कोपरिस्थितम् ॥ १२७९ ॥

अवर्धयत्क्रमादेव कलानां निधिमीश्वरः।
मल्लादर्यावखानः स सर्वत्राधिकृतः कृतः ॥ १२८० ॥

समो वैश्रवणस्यासीद्भट्टवैश्रमणो गुणैः।
ईश्वरस्य प्रसादेन राजभिर्यदवत्स्यत ॥ १२८१ ॥

रूप्यभाण्डपतिं शिल्पकौशलाभ्युल्लसन्मतिम्।
राजधानीमहाद्वारं नष्टं योयोजयत्पुनः ॥ १२८२ ॥

हिमाचलशिखादर्पच्छेदि प्रासादमेदुराम्।
क्रमराज्ये स्फुरद्राज्यः सुरत्राणः पुरीं व्यधात् ॥ १२८३ ॥

जैनकोट्टं घट्टितारिरट्टशालि समन्ततः।
नृत्यत्पटपताकान्तकान्तं राजा विनिर्ममे ॥ १२८४ ॥

जीर्णोद्धारेषु सर्वेषु निर्माणेषु नवेषु च।
आज्ञा राज्ञो बभौ हेतू रूप्यभाण्डपतेश्च धीः ॥ १२८५ ॥

महापद्मसरस्तीरे जैनोपपदशालिनः ।
पुरमण्डपिकाघोषांस्तथा श्रीजैनकुण्डलम् ।
स जैनपत्तनं चापि विदधे धरणीपतिः ॥ १२८६ ॥
भूपतेः कोमलकरा मनोज्ञाचरणाञ्चिता ।
अभिरामा महोदन्ता करुणा वल्लभाभवत् ॥ १२८७ ॥
अनिघ्नन्करुणानिघ्नो नरेन्द्रो डोम्बतस्करान् ।
बन्धयन्निगडैर्गाढं मृत्कर्माकारयत्सदा ॥ १२८८ ॥
निर्दिशन्यशसा शुभ्रा दिशो नृपतिरादिशत् ।
अवधं खगमत्स्यानामनेकेषु सरःसु सः ॥ १२८९ ॥
अथ जातु हतां चौरैर्गां परिज्ञाय काञ्चन ।
क्रन्दन्तं भूमिपः पृच्छंश्चौरांश्चाथाप्यढौकयत् ॥ १२९० ॥
वयोलक्षणसंवादं विना गोस्तुङ्गशृङ्गताम् ।
सभाक्षोभनहेतुं स सत्यवाग्ब्राह्मणोवदत् ॥ १२९१ ॥
तिलकादिवदेवास्याः सहजा तुङ्गशृङ्गता ।
राज्ञा पृष्टे वदन्त्येवं चौरमूका सभाभवत् ॥ १२९२ ॥
परीक्षार्थं तिमिस्वेदे राज्ञा गोशृङ्गयोः कृते ।
कुटिलत्वं व्यपैति स्म प्राक्चौरस्याथ शृङ्गयोः ॥ १२९३ ॥
एवं बुद्धिप्रकर्षेण व्यवहारविमर्शतः ।
अमात्यपर्षदो हर्षचित्तोत्कर्षमजीजनत् ॥ १२९४ ॥
प्राड्विवाकक्षमा बुद्धिर्युक्तदण्डत्वरञ्जकः ।
राज्ञोवहत्प्रजाभारं गणनापतिगौरकः ॥ १२९५ ॥
यैर्दत्तमुपकारित्वादुत्कोचद्रविणं स्वयम् ।
कालान्तरे कृतघ्नेषु तेष्वेवास्थानमण्डपे ॥ १२९६ ॥
प्रकाशयत्सु तद्दानं कुपितेन महीभुजा ।
मौलानो मल्ल एसाकस्तेभ्यः प्रत्यपि दापितः ॥ १२९७ ॥

आदौ पादतले तिष्ठत्करालम्बीकृतस्ततः ।
अथ चक्षुष्यतां गच्छन्नुत्तमाङ्गोर्ध्ववर्तिताम् ॥ १२९८ ॥
नीतो दर्यावखानोथ कृतज्ञेनेश्वरेण सः ।
कलानिधिर्हिमरुचिः कौमुदे हिततां वहन् ॥ १२९९ ॥
दिनपतिर्न रसातलगं तमः
शमयितुं यतते यदवेक्ष्य सः ।
अतिलसद्रुचि कालघनावृते-
र्हरति तत्प्रतिबिम्बमहो क्षणात् ॥ १३०० ॥
राज भूभारखिन्नोपि खड्गधाराध्वगोपि सन् ।
स्वदत्तं विभवं यस्य दृष्ट्वा विश्राममाप्तवान् ॥ १३०१ ॥
अस्तं गच्छदखानः सः कलानिधिरथागमत् ।
अत्यन्तरमणीयानां सुचिरस्थायिता कुतः ॥ १३०२ ॥
प्रत्यहं प्रीतहार्याद्यैर्यो व्यधात्प्रीतिमर्थवान् ।
सत्यव्रतो दिवमगान्महिमश्रीः स ठक्कुरः ॥ १३०३ ॥
तद्गोत्रजेभ्यःशङ्कित्वाद्गूढं तस्य वधं क्वचित् ।
यो दूतच्छलतो राज्ञा स्वदेशान्निरवास्यत ॥ १३०४ ॥
राज्ञः सैन्धवशुद्धादिस्थाने सोर्ध्याभिधे पुरे ।
प्रत्यागतः स तीर्थध्वखिन्नो विन्नो दिवं ययौ ॥ १३०५ ॥
राज्ञो धर्माधिकारेऽ प्रत्यवेक्षापरः सदा ।
महाश्रीशिर्यभट्टोपि तस्मिन्काले दिवं ययौ ॥ १३०६ ॥
गतेष्वप्येषु राज्ञोस्य धर्मो नैवाल्पता गतः ।
क्ष्मां दधानस्य शेषस्य दिग्गजा हि परिच्छदाः ॥ १३०७ ॥
एकाह एव दीनारकोटिका महीभुजा ।
बालेभ्य एव दत्तासीज्जयद्भट्टमुखेन यत् ॥ १३०८ ॥

अद्भुतानां पदार्थानां तद्राज्ये संग्रहोभवत् ।
नारायणावतारोयं ज्ञायेत कथमन्यथा ॥ १३०९ ॥
येषां हिमांशुपीयूषप्रवाहा नित्यभिक्षवः ।
इक्षवस्तेन मार्तण्डदेशभूमिषु रोपिताः ॥ १३१० ॥
त्यजता योगमाहात्म्याद्वलीपलितविक्रियाम् ।
श्रीमद्दर्शननाथेन विबुधत्वं प्रकाशितम् ॥ १३११ ॥
उदीपे सस्यसंपत्तेरुपप्लवकरीं व्यधात् ।
तूलमूलादपाकृष्य सिन्धुं भारोत्सगामिनीम् ॥ १३१२ ॥
पूर्वा तिथिवारर्क्षसंक्रान्त्याद्येकसाधनः ।
तिथिवारर्क्षसंक्रान्तीर्भविन्यब्दे क्षणाल्लिखन् ॥ १३१३ ॥
तद्राज्ये रूप्यभट्टोभूद्राज्यवाल्लभ्यविश्रुतः ।
अनादरं खण्डखाद्ये कारयन्गणितागमे ॥ १३१४॥
चन्द्रेस्तं गत एव दैववशतः शोकाग्निशान्त्यै निशा
तत्कान्ता रविकान्तवह्निमुदयात्कष्टं प्रविश्य सती ।
द्यामारुह्य तदीयधूमकपटात्प्राप्ता पुनस्तन्मही
यन्मोहं ग्रहराजपादमहिमा प्राप्तः प्रसद्योदयः ॥ १३१५॥
ऋतुपतिः शिशिरेण समत्सरो-
प्यतिविरुद्धकरो न हितः स्थितः ।
यदि भुवं शिशिरोपि विनाशये-
त्किमिव नाम मधुर्बत योजयेत् । १३१६ ॥
सूहभट्टोथ शास्त्रार्थमण्डितोप्यथ गण्डितः ।
दर्शनद्वेषतः प्रेतदाहं बत निषिद्धवान् ॥ १३१७ ॥
प्रेतदाहं तदा केचित्त्यक्ता गूढं जलान्तरे ।
अरण्ये केचन त्यक्ता निखाता बन्धुभिः परे ॥ १३१८ ॥

कालधर्ममुपेतेथ सूहभट्टे शनैः शनैः।
प्रजा वीतभया कांश्चित्प्रेतान्गूढमदाहयन् ॥ १३१९ ॥
दोषान्दृष्ट्वा स्वयं राज्ञा सैदमके निराकृते।
अदहं प्रकटं प्रेतदेहानहनि बान्धवाः ॥ १३२० ॥
अथानुसरणात्पत्न्यः पत्युः सुकृतशालिनः।
स्वर्गाङ्गनाङ्गसंसर्गात्पुण्यक्षयमवारयन् ॥ १३२१ ॥
भोक्तुं राज्यं पैतृकं तद्धात्रा दत्तं स ठक्कुरः।
जयनोल्लाबदीनोसौ कश्मीरान्प्रत्युपाययौ ॥ १३२२ ॥
हतानां वस्त्रवासोस्त्रशिरस्त्रादि प्रगृह्य तत्।
सदनं सधनं जस्सरथोप्यागाद्विमुच्यताम् ॥ १३२३ ॥
शुक्ले शुक्ले ब्रह्मणोह्नि रसाङ्केब्दे शशाङ्कगे।
जयनोल्लाबदीनोसौ राजधानीं विवेश सः ॥ १३२४ ॥
दानातकथनेशस्य तनूजाय हनूमते।
सर्वस्वकर्षणग्रामाधिपत्यं प्रददौ नृपः ॥ १३२५ ॥
मीरकाय ददौ भूभृदास्थानासनसंविदम्।
कर्तुं विचारदक्षाय सत्यासत्यपरीक्षणम् ॥ १३२६ ॥
विवृद्धयवनाधिकारवरविप्रवीरैर्विटै-
भर्टैः कुटिलवर्त्मगैर्मथितमोहिताश्च प्रजाः।
सुरेज्यधिषणं विचारचतुरं परं ठक्कुरं
निरीक्ष्य युयुजे विचारपदनिर्णये मीरकम् ॥ १३२७ ॥
सेनाधिपत्यं वीराय ठक्कुरायोग्रतेजसे।
विनूकपरमल्लेकनौरुजाय ददौ नृपः ॥ १३२८ ॥
लेदर्यो सव्यपारं स ताजराजाय सोदिशत्।
महेशराजाय ददौ महाग्रामपरंपराम् ॥ १३२९ ॥

विषयं देयनिर्मुक्तं नृपोप्यर्धवनाभिधम् ।
आदमाख्याय स ददौ महाविक्रमशालिने ॥ १३३० ॥

प्रवरेशपुराधीशत्वं परं परमेश्वरः ।
वीराय मार्गपतये मह्मदाख्याय धीमते ॥ १३३१ ॥

भाङ्गेलविषयं भूभृत्सतुलायां ददौ नृपः ।
तस्यानुजान्मार्गपतींस्ताजकप्रमुखान्बहून् ॥ १३३२ ॥

पञ्चग्रामीं महार्घांश्च दत्त्वाश्वान्समतूतुषत् ।
श्रीजाकोट्टाधिपत्यं च मीरेष्कारपदं ददौ ॥ १३३३ ॥

ठक्कुरायामह्मदाख्याय महाग्रामांश्च पत्तलाम् ।
ठक्कुरेभ्यो परेभ्योसावपि मान्यतया समम् ।
महाग्रामसहस्राणि यथेष्टं प्रददौ नृपः ॥ १३३४ ॥

इतिश्रीजोनराजकृतौ द्वितीया राजतरङ्गिणी समाप्ता ।

अथ

श्रीवरपण्डितकृता

तृतीया राजतरङ्गिणी ।

प्रथम तरङ्गः

प्रथमः सर्गः

शिवायास्तु नमस्तस्मै त्रैलोक्यैकमहीभुजे ।
अशेषक्लेशनिर्मुक्तनित्यैश्वर्यदशाजुषे ॥ १ ॥

प्रेम्णार्धं वपुषो विलोक्य मिलितं देव्या समं स्वामिनो
मौलौ यस्य निशापतिर्नगसुतावेणीनिशामिश्रितः ।
आस्ते स्वाम्यनुवर्तनार्थमिव तत्कृत्वा वपुः खण्डितं
देयाद्द्वयभावनां स भगवान्देवोर्धनारीश्वरः ॥ २ ॥

वन्द्यास्ते राजकवयः पदन्यासमनोहराः ।
ख्याता ये सरसैः शब्दैः क्षीरनीरविवेकिनः ॥ ३ ॥

अनित्यतान्धकारेस्मिन्स्वामिशून्ये महीतले ।
काव्यदीपं विना कः स्याद्भूतवस्तुप्रकाशकः ॥ ४ ॥

येषां करोमि वपुरस्थिरमत्र राज्ञां
तेषामयं जगति कीर्तिमयं शरीरम् ।

आकल्पवार्तां कुरुते किमितीव रोषा-
द्धाताहरद्ध्रुवमतः कविजोनराजम् ॥ ५ ॥
श्रीजोनराजविबुधः कुर्वन्राजतरङ्गिणीम् ।
सायकाग्निमिते वर्षे शिवसायुज्यमासदत् ॥ ६ ॥
शिष्योस्य जोनराजस्य सोहं श्रीवरपण्डितः ।
राजावलीग्रन्थशेषापूरणं कर्तुमुद्यतः ॥ ७ ॥
क्व काव्यं मद्गुरोस्तस्य क्व च मन्दमतेर्मम ।
वर्णमात्रेण मक्कोलं घनसारायते कथम् ॥ ८ ॥
राजवृत्तानुरोधेन न काव्यगुणवाञ्छया ।
सन्तः शृण्वन्तु मद्वाचः स्वधिया योजयन्तु च ॥ ९ ॥
अथ वा नृपवृत्तान्तस्मृतिहेतुरयं श्रमः ।
क्रियते ललितं काव्यं कुर्वन्त्वन्येपि पण्डिताः ॥ १० ॥
तत्तद्गुणगणादानात्स्वसंपत्तिसमर्पणात् ।
पुत्रवद्धर्धितो राज्ञा ग्रामहेमाद्यनुग्रहैः ॥ ११ ॥
अतो वाञ्छन्नमेयस्य तत्प्रसादस्य निष्कृतिम् ।
सोहं ब्रवीमि तद्वृत्तं तद्गुणाकृष्टमानसः ॥ १२ ॥
एकया तद्गुणाख्यानं जिह्वया वर्ण्यते कियत् ।
रोमवत्कोटिशश्चेत्स्युस्तास्तदा मद्गिरः क्षमाः ॥ १३ ॥
सत्यं नृपाम्बरेमुष्मिन्विपुले विमलाशये ।
गुणतारापरिच्छेदे न शक्ता भारती मम ॥ १४ ॥
तथापि सकलं चित्रपटान्ते त्रिजगद्यथा ।
श्रीजैनोल्लाबदीनस्य न्यस्यामि गुणवर्णनम् ॥ १५ ॥
केनापि हेतुना तेन प्रोक्तं मद्गुरुणा न यत् ।
तच्छेषवर्तिनीं वाणीं करिष्यामि यथामति ॥ १६ ॥

सात्मजस्य नृपस्यास्य प्राप्यते राज्यवर्णनात्।
प्रतिष्ठादानसंमानविधानगुणनिष्कृतिः ॥ १७ ॥

स्वदृग्दृष्टमृतानेकविपद्भिभवसंस्मृतेः।
सूते कस्य न वैराग्यं नाम जैनतरङ्गिणी ॥ १८ ॥

श्रीजैनोल्लाबदीनः स हत्वा शत्रून्दिगन्तरे।
आगत्य पैतृके देशे राज्यं राम इवासदत् ॥ १९ ॥

हृतावशिष्टां कोशेभ्यः स्वप्रबन्धोपयोगिनीम्।
नानापदार्थसामग्रीं राजा कविरिवाचिनोत् ॥ २० ॥

तद्राज्यमालिशाहस्य राज्यकालादनन्तरम्।
अज्ञायि कैर्न ग्रीष्मान्ते मरौ श्रीखण्डलेपनम् ॥ २१ ॥

धर्मराजोपमात्तस्मात्तास्ता नरकयातनाः।
अपराधानुसारेण पापाः केचिद्विषोभजन् ॥ २२ ॥

यो द्रव्यगुणसत्कर्मसमवायविशेषभृत्।
असामान्योप्यधाच्चित्रं नानार्थपरिपूर्णताम् ॥ २३ ॥

नेत्रोज्ज्वले लसद्धर्म्यशब्दाढ्ये कमलाचिते।
यस्य श्रीरवसन्नित्यं वदने सदनेपि च ॥ २४ ॥

बङ्गालमालवाभीरगौडकर्णाटदेशगा।
यत्कीर्ती रागमालेव बभूवामृतवर्षिणी ॥ २५ ॥

भास्वान्राजा सदाचारो बुधः सधिषणो महान्।
अधाद्विश्वग्रहाख्यातिमासन्नस्य ग्रहोचिताम् ॥ २६ ॥

यं संप्राप्य गुणाः सर्वेप्यलभन्नधिकां श्रियम्।
रात्रौ कुमुदवृन्दानि चिन्तामणिमिवोडुपम् ॥ २७ ॥

षड्दर्शनक्रिया यस्य वृत्तं समन्वरञ्जयन्।
सुमनोरञ्जिकाह्लादा ऋतवो नन्दनं यथा ॥ २८ ॥

त्रिवर्गे प्रोज्ज्वलं दृष्ट्वा यस्मिंस्तद्रसिका इव ।
अवसञ्शक्तयस्तिस्रः सममेकमता इव ॥ २९ ॥
भूपेर्थैः पूरयत्यर्थिसार्थं पार्थोपमेन्वहम् ।
आह्वानार्थमिवैतस्य यशः सर्वदिशोगमत् ॥ ३० ॥
शिल्पिनो विश्वकर्माणं गोरक्षं योगिनां गणाः ।
अवतीर्णं रसज्ञा यं नागार्जुनमिवाविदन् ॥ ३१ ॥
तस्याग्रे योग्यतादर्शि यैः शिल्पकविकौशलात् ।
तथा प्रसादमकरोत्तत्परास्ते यथाभवन् ॥ ३२ ॥
काव्यशास्त्रश्रुतैर्गीतनृत्यतन्त्रीचमत्कृतैः ।
आजीवमनयत्कालं कार्यानुद्विग्नमानसः ॥ ३३ ॥
न्याय्यं कुर्वन्ति शास्त्रज्ञाः कार्यभारं सुधीरतः ।
तेभ्यः क्षिप्त्वा च स्वे धर्मे तिष्ठतेत्येवमभ्यधात् ॥ ३४ ॥
अवार्यवेगैः सततमाशुगैर्यस्य ताडिताः ।
आसन्वनदिगन्तेषु मशका इव शत्रवः ॥ ३५ ॥
तस्य स्वपरवृत्तान्तं नित्यमन्विष्यतश्चरैः ॥
केवलं स्वप्नवृत्तान्तो बभूवाविदितो विशाम् ॥ ३६ ॥
गृहं गृहस्थवृत्तस्य ध्यायतो नीतिशालिनः ।
अन्यायान्नाशकद्धर्तुं काकिनीमपि कश्चन ॥ ३७ ॥
आदिश्य कृष्यैर्वास्तव्याञ्श्वपचादीन्स तस्करान् ।
मृत्कर्माकारयद्बद्धपादायःशृङ्खलान्बलात् ॥ ३८ ॥
न कः प्रवर्तते चौर्ये नीचो वृत्तिकदर्थितः ।
इति कारुणिको राजा तेभ्यो वृत्तिमकल्पयत् ॥ ३९ ॥
चक्रादीन्क्रमराज्यस्थान्दुष्टाञ्ज्ञात्वा स तद्भुवम् ।
हृत्वा मडवराज्यान्तर्दत्तवृत्तीन्व्यवेशयत् ॥ ४० ॥

तस्करोपद्रवे राज्ञा नीत्यैव शमिते सुखम्।
गृहेष्विवाटवीष्वन्तः पथिकाः शेरते स्म हि ॥ ४१ ॥
सत्ताप्रकृतिमध्यस्थो नित्यसर्वाङ्गवर्धनः।
स्वतन्त्रवृत्तिर्भूपालो रेमे नानापुरेषु सः ॥ ४२ ॥
मन्देहानहितान्निवार्य च भजन्पूर्वाचलाग्रोदयं
यो नित्यं कमलाकरेषु रसिको बिभ्रत्प्रतापोच्चयम्।
संकोचं कुमुदाशयेषु रचयन्पद्माकरोत्पूजितः
शस्यः कस्य न दत्तलोकमहिमा भास्वान्यशस्वी विभुः॥४३॥
धात्रेयाष्टकुरा राज्ञो विभवश्रीमदोद्धताः।
विस्फूर्तिहारिणोस्यासन्गजा इव निरङ्कुशाः ॥ ४४ ॥
श्रीमीरठक्कुरो ज्येष्ठः प्राड्विवेकपदोज्ज्वलः।
तेषां मुसुलवृद्धोपि बभौ ग्रन्थगुणोज्ज्वलः ॥ ४५ ॥
कष्टेन काष्ठवाटं स प्राप्तोवटपथात्ततः।
हिमान्यन्तरदग्धाङ्घ्रिर्हिमान्यन्तरमासदत् ॥ ४६ ॥
स्थित्वा माणिक्यदेवाग्रे स मुद्रस्यान्तरे चिरात्।
चिब्भदेशं ततः प्राप किंचित्प्राप्तपरिच्छदः ॥ ४७ ॥
तद्देशकालविषमावस्थाशतहतोपि सन्।
स तत्र प्रेष्यवत्सैदपादशौचं समासदत् ॥ ४८ ॥
तद्ग्रन्थतामयोत्पन्नस्फोटवैकृतशान्तये।
वैद्यैर्वरत्राबद्धैकपादोभूज्जीवितावधि ॥ ४९ ॥
तत्रोपायान्बहून्कुर्वन्स्वदेशविभवाप्तये।
यथाकथंचित्तत्रस्थः पञ्चषः सोवसत्समाः ॥ ५० ॥
अतःपरं किंचिद्ग्रन्थचरितं कालवशाच्छिन्नम्।
स सिन्धुहिन्दुवाडादिदेशाञ्जित्वा बहिःस्थितान्।
प्रतस्थे भुट्टदेशं स जेतुं सकटको नृपः ॥ ५१ ॥

वनमध्ये प्रविश्यैव नरकंकालपञ्जरम् ।
भित्तिस्थदीपमात्रे ते पश्यन्ति स्म सकौतुकम् ॥ ५२ ॥
तपस्तप्त्वा चिरं प्राप्य योगसिद्धिमसौ नृपः ।
फणीव कञ्चुकं पूर्वं गुहायामत्यजत्तनुम् ॥ ५३ ॥
इत्याहुर्ज्ञानिनोन्ये वा ये बुद्ध्वा सत्त्वमूर्जितम् ।
तेषां प्रामाण्यमकरोत्स राजा च सविस्मयम् ॥ ५४ ॥
ध्रुवं महानुभावत्वं विना व्यवहितं नृपः ।
जानीयात्कथमित्याह विद्वज्जन उदानधीः ॥ ५५ ॥
इत्युपोद्घातः ।

अथ राज्यवर्णनम् ।

ज्येष्ठमादमखानं च हाजीखानं च मध्यमम् ।
बन्हामखानमनुजं पार्थिवोजीजनत्सुतान् ॥ ५६ ॥
तेषां लावण्यसौभाग्यसुभगैः प्राक्तनैर्गुणैः ।
जनकं रञ्जयामास चन्द्रमा इव वारिधिम् ॥ ५७ ॥
प्रत्यहं हाजीखानः स कर्पूर इव सौरभैः ।
बाललीलायितैस्तैस्तैः स्वमुदन्तमजिज्ञपत् ॥ ५८ ॥
तौ सुतौ संमतौ पित्रो रक्षणायाक्षिपन्नृपः ।
स्वधात्रेयतया स्वस्थो द्वयोष्ठक्कुरपक्षयोः ॥ ५९ ॥
स्वपक्षस्थापनादक्षाः परपक्षेष्टखण्डनाः ।
तार्किका इव तेन्योन्यं धात्रेयाष्ठक्कुरा बभुः ॥ ६० ॥
सौन्दर्यस्नेहवृक्षस्य मूलच्छेदनकारिणः ।
तेन्योन्यगोत्रजद्वेषात्तयोरासन्समत्सराः ॥ ६१ ॥

राजपुत्रास्त्रयस्तस्य गुणातिशयसुन्दराः।
तत्कृतान्योन्यवैरेण समं वृद्धिं समाययुः ॥ ६२ ॥
देहसमो देशोयं तस्यात्मसमो महीपालः।
तस्मिन्ससुखे सुखितो दुःखिनि तस्मिन्सदुःखोसौ ॥ ६३ ॥
अन्योन्यं सरुषो राजपुत्रयोर्मन्त्रिदुर्नयात्।
अभूज्ज्येष्ठकनिष्ठत्वं प्रक्रियारहितं तयोः ॥ ६४ ॥
श्रुत्वाथ पुत्रयोर्वैरमन्योन्यं जातु भूपतिः।
आह स्मादमखानं स विदेशगमनत्वराम् ॥ ६५ ॥
युक्तमुक्तं न गृह्णासि कुपुत्र यदि मद्वचः।
मानप्राणधनध्वंसी प्रत्यूहस्तेन्यथा भवेत् ॥ ६६ ॥
श्रुत्वेति पितृसंदेशं स भृत्यानब्रवीद्वरम्।
तत्पर्णोत्सपथा यामः सुखं तत्रैव नः सदा ॥ ६७ ॥
अथोचुस्ते तव भ्राता दाता जातोत्युदारधीः।
स्वलक्ष्मीं भृत्यसात्कर्तुं स क्षमो न भवान्क्वचित् ॥ ६८ ॥
वरं मरणमेवास्तु तदग्रे नोद्य सेवया।
विक्रमादिगुणैर्हीनं न त्वामेवं भजामहे ॥ ६९ ॥
अग्रजानुजयो राजपुत्रयोः सुखदुःखयोः।
विपर्ययं व्यधाद्धेधाः प्रमातेव विभागिनोः ॥ ७० ॥
अथाशङ्क्य नृपः पापं तद्वधात्कतिचिद्दिनैः ॥
बहिर्निष्कासयामास भुट्टमार्गेण तं सुतम् ॥ ७१ ॥
वज्रबाणप्रकारांश्च शिल्पिनः समदर्शयन्।
येभ्योश्रावि ध्वनिर्धीरलोकहृत्कम्पकारकः ॥ ७२ ॥
तद्यन्त्रभाण्डभेदांश्च तत्तद्धातुमयान्नवान्।
आनीतवान्नरपतिः संहताञ्शिल्पिनिर्मितान् ॥ ७३ ॥

प्रशास्तिः क्रियतां यन्त्रभाण्डेष्विति नृपाज्ञया ।
मयैव रचिताञ्श्लोकान्प्रसङ्गात्कथयाम्यहम् ॥ ७४ ॥

यदनुग्रहेण राज्ञां समयो लीलाविलासमयः ।
समयश्च यन्त्रतन्त्रैः स्थिरां प्रतिष्ठां क्रियात्समयः ॥ ७५ ॥

रसवसुशिखिचन्द्राङ्के शाके नाकेशविश्रुतो राजा ।
श्रीजैनोल्लाबदीनः कश्मीरान्पालयन्विजयी ॥ ७६ ॥

वर्षे शशिवेदाङ्के निर्मितवान्यन्त्रभाण्डमिदम् ।
तदिति मौसुलभाषाख्यातं लोके तट्टकाण्डमिति ॥ ७७ ॥

दुर्गेषु दुर्गतिपरं हृत्स्फोटकरं तुरङ्गदत्तदरम् ।
दूरोन्मुक्ताश्मशरं कटकबलान्यदृष्टचरम् ॥ ७८ ॥

सारं सुरीतिबद्धं घनघोषं शिल्पिकल्पितमहार्घम् ।
नवमिव नगरं नृपतेः कल्पं स्ताद्यन्त्रभाण्डमिदम् ॥ ७९ ॥

धातुविभक्तिस्फारात्पदप्रवृत्या प्रयोजिते शब्दे ।
अर्थोपलब्धिहेतोर्भवत्विदं वृद्धिगुणयुक्तया ॥ ८० ॥

इति पद्याङ्किता यन्त्रभाण्डाली व्यरुचन्नवा ।
यदुष्मौघध्वनिश्चक्रे मेघगर्जिततर्जनाम् ॥ ८१ ॥

कालेनादमखानेथ भुट्टाज्ञित्वा समागते ।
हाजीखानोकरोद्यात्रां लोहराद्रौ नृपाज्ञया ॥ ८२ ॥

कथं हि छुरिकायुग्ममेककम्बुनि स्थाप्यते ।
इति ज्ञात्वा सुतौ राज्ञा कारितौ निर्गमागमम् ॥ ८३ ॥

जनकस्यान्तिके स्नानपानलीलोत्सवादिकम् ।
आदमखानः सत्राणो विदधेनुदिनं ततः ॥ ८४ ॥

दृष्टा सतीसरसि येन सुखस्थितिः सा
भीतः स यद्यपि गतो घनकालदोषात् ।

यावन्न नाशमुपयाति किरातघातै-
स्तावत्कथं तदवमुञ्चति राजहंसः ॥ ८५ ॥
अथाष्टाविंशवर्षेपि रावत्रलवलादिभिः।
इतीरितोकरोत्खानः कश्मीरागमनस्पृहाम् ॥ ८६ ॥
स्वामिंस्त्वदग्रजीयास्ते कश्मीरसुखभागिनः।
क्लिश्यामः परदेशेत्र वयमेव गृहोज्झिताः ॥ ८७ ॥
राजानकप्रतीहारमार्गेशकुलजादयः।
अस्मत्प्रतीक्षिणः सर्वे तत्र वीरा बलोद्धताः ॥ ८८ ॥
यद्यप्यवचनग्राही भूभुजो निश्चितो भवान्।
तावतैव स किं क्रुद्धो हन्त्यस्मान्कुरुणापरः ॥ ८९ ॥
युद्धायादमखानश्च निर्यातः स्वबलान्वितः।
त्वत्तः स नश्यति क्षिप्रं श्येनाग्रादिव पोतकः ॥ ९० ॥
अमी राजपुरीयाद्याः सर्वेस्मच्छुभकाङ्क्षिणः।
तत्तेनैवाधुना यामो न किं सिध्यति साहसात् ॥ ९१ ॥
मृते रिंगप्रतीहारे वीराः के सन्ति तत्पुरे।
इति त्वत्पैतृकपदं हर्तुं गन्तुं तवोचितम् ॥ ९२ ॥
शिष्यास्तेमी वयं भृत्या वीरास्त्वत्पैतृकैः सह।
योत्स्यामः कीदृशं शौर्यमेकदा द्रष्टुमर्हसि ॥ ९३ ॥
तथेत्युक्ताथ खानेन पृष्टौ तन्मन्त्रिणौ मतम्।
सफिर्यडामरस्ताजतन्त्रेशश्चेत्यवोचताम् ॥ ९४ ॥
देव त्वत्सेवकाः सर्वे स्वगृहोत्कण्ठिताशयाः।
देशकालावनालोच्य कथयन्त्यसुखप्रदम् ॥ ९५ ॥
कथमभ्यन्तरं यामः सति राज्ञि बलोर्जिते।
प्रदीप्तं व्योम्नि मार्तण्डं कुण्डेन पिदधाति कः ॥ ९६ ॥

यावज्जीवति भूपालस्तावत्को बाधितुं क्षमः ।
मनोनुवर्तनं कर्तुं तद्युक्तं तव सांप्रतम् ॥ ९७ ॥

प्रसन्ने जनकेस्माकं भवेयुः का न संपदः ।
ईश्वरे च गुरौ भक्तिर्जायते पुण्यकर्मणाम् ॥ ९८ ॥

अस्य कोपेन यत्साध्यं परानुग्रहतो न तत् ।
दुर्दिने या रवेर्दीप्तिः प्रदीपाज्ज्वलतो न सा ॥ ९९ ॥

खलोक्तिश्वासमालिन्यं सततं नयसेविनः ।
हृदयादर्शवैषद्योत्स्रंसकं नास्य दृश्यते ॥ १०० ॥

निर्वाणगोष्ठीनिष्ठस्य तद्वच्छास्त्रविवेकिनः ।
कृपाब्धेरस्य नो किंचित्कृत्यमस्त्यसुखप्रदम् ॥ १०१ ॥

तद्दुग्धपितृपक्षोपि स्वामिभक्तिं न सोत्यजत् ।
तेनैवान्त्यक्षणः श्लाघ्यस्तस्याभूज्जैनभूपवत् ॥ १०२ ॥

सौहार्दमार्दवोपेता योग्या कार्यविचक्षणा ।
जाने तेनैव पुण्येन संततिस्तस्य राजते ॥ १०३ ॥

स पिता त्वं सुतस्तस्य वयं सर्वे स्वसेवकाः ।
गत्वा चेत्कुर्महे युद्धं जयोस्माकं भवेत्कथम् ॥ १०४ ॥

हताश्चेत्केपि तद्भृत्या बहुभृत्यस्य का क्षतिः ।
एकपक्षक्षये किं स्याद्गरुडस्य जवाल्पता ॥ १०५ ॥

न शिवाः शकुनाः सन्ति देशाः पर्वतदुर्गमाः ।
तत्रापि जनकस्तेस्मान्न कालो विग्रहस्य नः ॥ १०६ ॥

भजत्वभ्यन्तरं राजा वयं बाह्यं भजामहे ।
तत्प्रसादादिहैवास्तां राज्यं छत्रं विना न किम् ॥ १०७ ॥

ते चेद्युद्धार्थमेष्यन्ति न जेष्यत्यस्मदन्तिकात् ।
वयं चेदन्तरं यामो न जेष्यामः कदाचन ॥ १०८ ॥

इति दर्पात्स श्रुत्वापि खानः शूरपुराध्वना।
अगाद्राजपुरीं त्यक्त्वा कश्मीरान्पिशुनेरितः॥ १०९॥
अस्मिन्नवसरे श्रुत्वा स्वपुत्रं सहसागतम्।
गृहीत्वा स्वबलं तूर्णं नगरान्निरगान्नृपः॥ ११०॥
गच्छन्सकटको राजा मरणे कृतनिश्चयः।
सदुःखो निःश्वसञ्श्लोकमिममेकमपाठयत्॥ १११॥
राज्येपि हि महत्कष्टं संधिविग्रहचिन्तया।
पुत्रादपि भयं यत्र तत्र सौख्यस्य का कथा॥ ११२॥
अधर्मशङ्का दूरेस्तु युद्धे जनकपीडया।
वैधेयातिविधेयेन येन स्नेहोपि विस्मृतः॥ ११३॥
त्वयि कुर्वति साम्राज्यं यः खेदाय समागतः।
स यातु सबलः शीघ्रं त्वद्वीर्याग्निपतङ्गताम्॥ ११४॥
त्वमेवाकण्टकं राज्यं क्रिया धर्मक्रिया भजन्।
वैरिणो विमुखा यान्तु रणे लब्धपराभवाः॥ ११५॥
ग्रामेष्वित्यधिकास्तास्ताः शृण्वञ्जनपदाशिषः।
प्रापत्सकटको राजा स सुप्रशमनाभिधम्॥ ११६॥
अथ मल्लशिलास्थाने पितापुत्रबलद्वये।
संनद्धे नृपतिर्दूतं विप्रमेकं व्यसर्जयत्॥ ११७॥
स गत्वा नृपसंदेशमब्रवीदिति निर्भयः।
किं वक्तीति क्षणं क्रुद्धैस्तत्त्वज्ञैः परिवेष्टितः॥ ११८॥
राजपुत्र महाबाहो दाक्षिण्यामृतसागर।
शृणु पित्रा समादिष्टं यत्तत्सर्वं ब्रवीमि ते॥ ११९॥
फलं संसारवृक्षस्य लाभोमुत्र परत्र च।
पित्रोर्नेत्रोत्सवो नित्यं पुत्रः कैर्नाम निन्द्यते॥ १२०॥

सर्वः संचिनुते सर्वं पुत्रार्थं प्रयतो यतः ।
वार्द्धके वचनग्राही भवेत्पितृसुखप्रदः ॥ १२१ ॥
इत्थं लोकद्वयस्थित्यां त्वयि जाते सुते मम ।
दूरे सर्वसुखाशास्तु चिन्ता प्रत्युत वर्धिता ॥ १२२ ॥
त्वत्कृतो दुर्जनाश्वासो निश्वासो य इवान्वहम् ।
मलिनीकुरुते शुद्धं मद्राज्यं मुकुरोपमम् ॥ १२३ ॥
जीवनाशोद्यता ये मे लसन्त्युच्छृङ्खलाः खलाः ।
सुचिरं नैव तिष्ठन्ति सरसः सारसा इव ॥ १२४ ॥
मदादेशं विना देशं किमर्थं स्वयमागतः ।
केन राज्यं बलात्प्राप्तं निजभाग्योदयं विना ॥ १२५ ॥
बाह्यदेशावनिः सर्वा भुज्यते तृप्यसे न किम् ।
येन मण्डलमात्रं मेवशिष्टं हर्तुमागतः ॥ १२६ ॥
तन्निवर्तस्व मा पुत्र पापबुद्धिं वृथा कृथाः ।
बलद्वयवधात्पापं तवैतत्परिणेष्यति ॥ १२७ ॥
इत्युक्तिः पैतृकी प्रोक्ता किं तु सत्यमहं ब्रुवे ।
नश्यन्ति भूपाच्छयेनाग्रात्त्वद्भटाश्चटका इव ॥ १२८ ॥
इति रूक्षाक्षरामुक्तिं श्रुत्वा विप्रस्य ते भटाः ।
छित्वा कर्णौ व्यधू रक्तादायुधेषु विशेषकान् ॥ १२९ ॥
तद्दृष्ट्वा हाजीखानोथ सत्रपः पितुरागमात् ।
अभिमन्युप्रतीहारमुख्यानाख्यदिदं वचः ॥ १३० ॥
वरं पादप्रणामार्थं पितुर्याम्यमुतो बलात् ।
भूपस्तुष्टोथ रुष्टो वा यत्करोतु करोतु तत् ॥ १३१ ॥
सर्वथा तातपादा मे सेव्या रक्षेत्स नो ध्रुवम् ।
तन्मा कुरुत युद्धेस्मिन्संरम्भं चेन्मतं मम ॥ १३२ ॥

किं तु स्वप्नेपि भूपाय नानिष्टं चिन्तयाम्यहम्।
यो मे देवाधिकः पूज्यो लोकद्वयसुखप्रदः ॥ १३३ ॥
अग्रजोग्रे समायाति रणायायाति नो नृपः।
इत्युक्तं तेन स प्राप्तो नाहं पितृवधोद्यतः ॥ १३४ ॥
श्रुत्वेति मन्त्रिणस्ताजतन्त्रिपत्यादयस्ततः।
तत्तुरङ्गात्तवल्गाग्रा निष्ठुरं तेब्रुवन्निति ॥ १३५ ॥
यदोक्तं समयो नायं याम इत्यवधीरितम्।
आरब्धस्यान्तगमनं तद्युक्तमधुना तव ॥ १३६ ॥
यूयं चेज्ज्ञातसौहार्दा मार्दवानन्दितापराः।
वयमेव हताः कष्टं क्लिष्टास्त्वत्सेवनाशया ॥ १३७ ॥
भवेत्संतप्तयोः संधिर्नित्यं तैलकटाहयोः।
तदन्तः पूरणी क्षिप्ता सैव दन्दह्यते क्षणात् ॥ १३८ ॥
भवान्स्वामी वयं दासाः पौरुषं पश्य सांप्रतम्।
जयश्चेत्तव राज्याप्तिर्नष्टो याहि यथागतम् ॥ १३९ ॥
यावद्युद्धं करिष्यामस्तावदेव विलम्ब्यताम्।
हतेष्वस्मासु कर्तव्यं यत्पुनस्तत्समाचर ॥ १४० ॥
अस्मदुक्तं न गृह्णासि यदि त्वं पितृवञ्चितः।
त्वय्येवानुचितं कृत्वा पुनर्यामो दिगन्तरम् ॥ १४१ ॥
इति निर्भर्त्सनावाक्यजातभीतिर्नृपात्मजः।
तत्तच्चिन्तार्णवे मग्नो युद्धश्रद्धामगाहत ॥ १४२ ॥
अत्रान्तरे द्विजं तादृगवस्थं वीक्ष्य भूपतिः।
पुरारातिरिव क्रुद्धो युद्धसंनद्धतां दधे ॥ १४३ ॥
शुक्रयोगजनामर्क्षपरीक्षणविचक्षणः।
स्वपक्षरक्षणं क्षमापः पृष्ठीकृतरविर्व्यधात् ॥ १४४ ॥

राज्ञः पृष्ठगतः सूर्यः खड्गान्तः प्रतिबिम्बितः ।
जयस्ते भवितेत्येव वक्तुं व्योम्नोवतीर्णवान् ॥ १४५ ॥

कियन्तोमीति यावत्सोचिन्तयत्तावदग्रतः ।
अर्कदीप्तिज्वलच्छस्त्रद्युतिद्योतितभूतलम् ॥ १४६ ॥

निर्यत्सन्नाहिसाद्योघपतद्भटतुरंगमम् ।
गणशो गणशो धावत्तत्सैन्यं समवैक्षत ॥ १४७ ॥

कोन्यो वीरो हाजीखानाद्यो राज्ञा वाग्रजेन वा ।
गृहीतसर्वसैन्येन धैर्यात्कृष्टुमशक्यत ॥ १४८ ॥

तत्र मल्लशिलारङ्गसंगतास्तद्भटा नटाः ।
त्वङ्गदङ्गविहङ्गानां नाट्यभङ्गिमदर्शयन् ॥ १४९ ॥

ववर्ष शरधाराभिः स भूपकटकाम्बुदः ।
स्फुरच्छस्त्रतडिज्ज्योतिस्तूर्यगम्भीरगर्जितः ॥ १५० ॥

अन्योन्यमिलिताः कांस्यघनवत्कठिना घनाः ।
अन्योन्याघातसहना नदन्तः सुभटा बभुः ॥ १५१ ॥

भटा नयन्ति मां युद्धे मां मा ताडयत द्रुतम् ।
इतीव तारं दध्वान खानस्यानकदुन्दुभिः ॥ १५२ ॥

पूर्वं मया प्रतीहारमुख्या गुरुलघूर्जिताः ।
रणे फलतया दृष्टा रवेर्वृत्तेर्घना इव ॥ १५३ ॥

ततो भूपबलात्क्रुद्धौ धात्रेयौ भूपतेर्हितौ ।
ठक्कुरौ निरगातां तौ वीरौ हस्सनहुस्सनौ ॥ १५४ ॥

सुवर्णसीहनग्राद्या राजपुत्रा रणाध्वरे ।
शस्त्रज्वालावलीलीढे जुहुवुः श्रीफलं वपुः ॥ १५५ ॥

ते वीरभ्रमरास्तत्र रणोद्याने तदाभ्रमन् ।
स्वामिमाधवसान्निध्याद्यशःकुसुमलम्पटाः ॥ १५६ ॥

ते वीरमस्तकाश्छिन्ना रणभूभाजने स्फुटम्।
क्षुत्तप्तस्य कृतान्तस्य कवला इव रेजिरे ॥ १५७ ॥
रणतूर्यस्वनैस्तैस्तैर्जनकोलाहलैस्तथा।
वीराणां सिंहनादैश्च शब्दाद्वैतमजायत ॥ १५८ ॥
तच्छुद्धये ऋणमिवेक्ष्य नृपप्रसादं
प्राप्ते क्षणे जहति ये निजजीविताशाम्।
तत्तद्विहस्तपरिरक्षणधर्मलुब्धा
धन्यास्त एव कतिचिन्नृपसेवकेभ्यः ॥ १५९ ॥
राजाग्रादागतास्तीक्ष्णाः शरास्तत्पक्षपातिनः।
स्वयं पाहीति भीत्येव स्खलन्तः समचोदयन् ॥ १६० ॥
ध्वजचेलाञ्चला राजसुतस्याग्रे तु वायुना।
सकम्पा रणभीत्येव पश्चाद्भागमाशिश्रियन् ॥ १६१ ॥
शस्त्रकृत्तस्फुरद्वीरशिरःकमलनिर्भरा।
जीवनाशा चलत्पत्रा नलिनी रणभूरभूत् ॥ १६२ ॥
शौर्यमत्यद्भुतं दृष्ट्वा सूनोस्तत्कटकस्य च।
पुनर्जातमिवात्मानं रणोत्तीर्णं नृपोविदत् ॥ १६३ ॥
कृत्वा सर्वदिनं युद्धं बलाद्भृत्यैर्निवारितः।
हाजीखानः सवित्राणः समरात्स न्यवर्तत ॥ १६४ ॥
भग्नं निजानुजं दृष्ट्वा पश्चाल्लग्नो विविग्नधीः।
अग्रजोथावधीन्नग्नान्मग्नांस्त्रासार्णवे भटान् ॥ १६५ ॥
किमुच्यते नृशंसत्वं येन शूरपुरान्तरे।
जन्ययात्रागतो मोहान्निहतः पथिकव्रजः ॥ १६६ ॥
यस्यां मन्दप्रभो भास्वाञ्छनैः सर्वैर्विलोकितः।
दक्षिणस्या दिशस्तस्याः प्रवासी स नृपोभवत् ॥ १६७ ॥

दुर्योधनार्पितरसा गुरुशल्यविष्टा
भीष्मप्रियाः परहतिं प्रतिदत्तकर्णाः ।
ये धर्मजातिविमनस्कतया कृपेच्छा-
स्ते कौरवा इव रणे न जयं लभन्ते ॥ १६८ ॥
अन्येद्युर्हतशिष्टांस्तान्भृत्यानानीय पूर्ववत् ।
हाजीखानः सानुतापश्चित्रदेशे स्थितिं व्यधात् ॥ १६९ ॥
खिन्नानाश्वासयन्कांश्चित्संभिन्नान्प्रतिपालयन् ।
भक्षयन्क्षुधया क्षीणान्नगाग्रे सोनयन्निशाम् ॥ १७० ॥
मा बाधिष्ट सुतं कश्चिन्मत्परो वातिविह्वलः ।
इति कारुणिको राजा न्यवर्तत रणाद्रुतम् ॥ १७१ ॥
आसिष्ये सुखितः सुतार्पितभरो बुद्धेति दत्ता निजा
राष्ट्रेशा वरसेवकाः सतुरगाः संवर्धिता ये मया ।
तेमी राज्यजिहीर्षवः सुतरता युद्धाय मय्यागता
धिङ्मां येन नयोज्झितेन घृणयानर्थः स्वयं स्वीकृतः॥१७२॥
इत्यादि विमृशन्राजा स्वपुरं दुःखितोगमत् ।
विरोधादायिनो निन्दन्सेवकान्विधिकर्मणा ॥ १७३ ॥
संग्राममृतवीरेन्द्रच्छिन्नमस्तकपङ्क्तिभिः ।
आनीय राजा नगरे सुखागारमकारयत् ॥ १७४ ॥
इत्थं सेवकपैशुन्यात्पितापुत्रविरोधतः ।
समरे तत्र तद्वर्षे वीरलोकक्षयोभवत् ॥ १७५ ॥
राज्यस्थितिप्रविकसन्नलिनीहिमौघो
लोकक्षयोचितमहाभयधूमकेतुः ।
विघ्नप्रसक्तखलघूकनिशान्धकारः
शापः सुखस्य नृपतेः स्वजनैर्विरोधः ॥ १७६ ॥

इति पण्डितश्रीवरविरचितजैनराजतरङ्गिण्यां मल्लशिलायुद्धवर्णनं नाम प्रथमः सर्गः ॥

द्वितीयः सर्गः

भूभृतो निर्गता प्रेमसरित्प्रोच्चानुजच्छलात् ।
प्रत्यावृत्ता कियत्कालं शुद्धाग्रजमशिश्रियत् ॥ १ ॥

यत्स्नेहभागी सुदृशाभिरामो
भाति प्रदीपः समुपास्य पात्रम् ।
आशाप्रकाशैकनिधेस्तदारा-
दसंनिधानेन विरोचनस्य ॥ २ ॥

ददावादमखानाय नायकः स क्षितेस्तदा ।
प्रमेयान्क्रमराज्यस्थाननुजीयान्विरागतः ॥ ३ ॥

जगृहे स च वित्तौघं गृहग्रामादिदेवगम् ।
हाजीहैधरखानीयं पानीयमिव वाडवः ॥ ४ ॥

ततःप्रभृति ज्येष्ठः स कश्मीरान्तर्नृपाग्रगः ।
यौवराज्ये सुखं तद्वद्बुभुजे पञ्चशः समाः ॥ ५ ॥

येषां सुखं वितनुते विधिरन्नवृद्ध्या
दुर्भिक्षदुःखमपि संतनुते स तेषाम् ।
वृष्ट्या विवर्धयति यानि तृणानि मेघ-
स्तान्येव शोषयति भावितुषारभारात् ॥ ६ ॥

सर्वसस्यसमृद्धेस्मिन्देशे षट्त्रिंशवत्सरे ।
अकस्मादभवच्चैत्रे गगनात्पांशुवर्षणम् ॥ ७ ॥

बभूव वर्षः षट्त्रिंशः सर्ववृष्णिकुलक्षयात् ।
भयकृत्सर्वजन्तूनां भारतादिति विश्रुतम् ॥ ८ ॥

अभवन्यत्र पुष्पौघा धूलिधूसरताननाः ।
भाविदुर्भिक्षपीडार्तजनचिन्तावशादिव ॥ ९ ॥

भविता वत्सरेमुष्मिन्दुर्भिक्षं पांसुवर्षणात् ।
इत्याख्यन्नुत्तरं पृष्टा भूभुजा दैववित्तमाः ॥ १० ॥
षट्त्रिंशो वत्सरोतीतो दुर्भिक्षार्तिप्रदोभवत् ।
ऐषमस्तादृशः प्राप्तो भीतिरित्युदभूद्धृदि ॥ ११ ॥
पपात मार्गशीर्षेथ मास्युपद्रवदर्शनम् ।
देशेत्र विलसच्छालिमाले प्रालेयवर्षणम् ॥ १२ ॥
दुर्भिक्षदुःस्थितं लोकं कथं पश्यामि सांप्रतम् ।
इतीव भूरभूच्छन्नमुखी हिमसितांशुकैः ॥ १३ ॥
छादिताः शालयः पक्का हिमैर्जनमनोहराः ।
खलमूर्खसभामध्ये पण्डितैः स्वगुणा इव ॥ १४ ॥
कुक्ष्यावेगाद्बुभुक्षार्तः क्षपिताक्षः क्षणे क्षणे ।
आशु दुर्भिक्षयक्षोत्र व्यधात्प्रक्षीणलक्षणम् ॥ १५ ॥
प्रविश्य रात्रौ गेहान्तः क्षुद्भक्ष्यद्रोह्यपीडितः ।
हिरण्यादि धनं त्यक्त्वा भाण्डेभ्योन्नमपाहरत् ॥ १६ ॥
सर्वस्मिन्दिवसे रात्रावपि भिक्षुपरंपराः ।
शरा इवाविशन्देहे गेहे धान्यवहे तदा ॥ १७ ॥
धान्यवद्बृहसंदिष्टकृष्टकम्बुकदम्बकाः ।
नीरसापूपभोगेनाप्यरक्षन्केपि जीवितम् ॥ १८ ॥
पालीपालीवतासक्तष्टङ्कटङ्कितभोजनः ।
चिराचिरास्वादरतः कोपि कोपि हतोभवत् ॥ १९ ॥
क्षीणा ग्रामेषु वास्तव्याः केचिदन्नामृताप्तये ।
शाकमूलफलाहारा व्रतनिष्ठा इवाभवन् ॥ २० ॥
चिराटङ्कान्तरे क्षिप्त्वा शाकं किमपि तण्डुलम् ।
पक्वान्ये केपि तद्भोगादकुर्वन्प्राणधारणम् ॥ २१ ॥

सर्पिर्लवणतैलानां तण्डुलेन महार्घता।
हृता नीचेन साधूनामिव सर्वोपयोगिनाम् ॥ २२ ॥
बहुधान्यकथानिष्ठो योभूत्पूर्वं पुरान्तरे।
बहुधान्यकथानिष्ठस्तत्कालं स व्यलोकत ॥ २३ ॥
बन्धुजीवस्तदा कन्दो बन्धुजीव इवाभवत्।
मन्दान्संधारयामास क्षुधान्धान्योन्धसा विना ॥ २४ ॥
धान्यखारेः क्रयः पूर्वं दीन्नाराणां शतत्रयम्।
दुर्भिक्षतस्तदा सार्धसहस्रेणापि नापि सा ॥ २५ ॥
किमन्यत्कुत्रचिद्राष्ट्रे धात्रा निष्किंचनो जनः।
अभवन्मण्डकुण्डस्य काञ्चिकेनापि वञ्चितः ॥ २६ ॥
यत्पूर्वमकरोद्वेलां रसवद्व्रीहिशालिषु।
मन्ये तेनैव शापेन भयमापत्प्रजेदृशम् ॥ २७ ॥
करुणाकुलितो राजा स्वधान्यैः पुत्रवत्प्रजाः।
पोषयामास मासेषु केषुचिद्यावदाकुलाः ॥ २८ ॥
तावदस्यैव माहात्म्यात्सस्यसंपद्यजृम्भत।
सत्यव्रतानां भूपानां कावकाशश्चिरं शुचाम् ॥ २९ ॥
मन्येथवा विधिर्भूपकारुण्यप्रथनेच्छया।
दौर्भिक्ष्यदौस्थ्याद्भूलोकमशोकमकरोत्तदा ॥ ३० ॥
पार्थिवोपप्लवे चौरा अन्धकारेभिसारिकाः।
दुर्भिक्षे चैव तुष्यन्ति धान्यविक्रयिणो जनाः ॥ ३१ ॥
अतः क्षुधा महार्घा ये पदार्था धान्यविक्रयात्।
गृहीतास्तेन्यदा पूर्वमूल्येनादापयन्नृपः ॥ ३२ ॥
दुर्भिक्षभक्षिताक्षोटलोकदक्षः क्षितीश्वरः।
धिया सरलवृक्षेभ्यस्तैलाकर्षणमादिशत् ॥ ३३ ॥

तस्मिन्संवत्सरे राजा कारुण्याद्भूर्जगामिनी।
उत्तमर्णाधमर्णानां व्यवस्था विनिवारिता ॥ ३४ ॥

चतुःषष्टिकलाः शिल्पं विद्या सौभाग्यमेव च ।
दुर्भिक्षोपप्लवे सर्वं तदाभून्निष्प्रयोजनम् ॥ ३५ ॥

पदवाक्यतर्कनवकाव्यकथा-
बहुगीतवाद्यरसनृत्यकलाः ।
सुरतप्रपञ्चचतुरा वनिताः
क्षुधितस्य नैव जनयन्ति सुखम् ॥ ३६ ॥

इति जैनराजतरङ्गिण्यां श्रीवरपण्डितविरचितायां षट्त्रिंशद्वर्षे दुर्भिक्षवर्णनं नाम द्वितीयः सर्गः ।

तृतीयः सर्गः

तुष्टः प्रसादमतुलं कुरुते क्षणाद्यः
क्रुद्धः प्रजासु कुरुते भयमप्रतर्क्यम् ।
उन्मत्तपार्थिवपतेरिव हन्त धातो-
र्लीलास्वतन्त्रचरितं भुवि बुध्यते कैः ॥ १ ॥

षट्त्रिंशद्वर्षदुर्भिक्षदुःखविस्मरणं जनः ।
न यावदकरोत्तावदष्टात्रिंशेपि वत्सरे ॥ २ ॥

वृष्ट्या सह रजोवर्षमपतद्गगनाद्भुवि ।
उदीपक्षतशाल्युत्थभाविदुर्भिक्षसूचकम् ॥ ३ ॥

अथाचिरेण गर्जन्तो धृतचापा घनाघनाः ।
जनानुद्वेजयामासुः शरासारैरिवारयः ॥ ४ ॥

वृष्टशुपद्रवसंनद्धा फलर्द्धिहरणाकुलाः ।
उत्थिता बुद्बुदव्याजाद्दुष्टा नागफणा इव ॥ ५ ॥

उत्पन्नध्वंसिनो भावान्करिष्याम्यहमञ्जसा।
इति ज्ञापयितुं मेघो बुद्बुदानसृजद्भुवम् ॥ ६ ॥
वृक्षाः सर्वत्र पत्रान्तःपतद्वृष्टिस्वनच्छलात्।
अश्रुबिन्दूनिवामुञ्चन्रुदन्तो जनचिन्तया ॥ ७ ॥
वितस्तालेदरीसिन्धुक्षिप्तिकाद्यास्तदापगाः।
अन्योन्यस्पर्द्धयेवोग्रा ग्रामांस्तीरेष्वमज्जयन् ॥ ८ ॥
सविभ्रमा धूतावर्ता वाहिन्युत्थाः सहेषिताः।
जवाद्धावन्तुत्तुङ्गास्तत्तरङ्गतुरंगमाः ॥ ९ ॥
अत्युच्चापातकृन्नीचोन्नतिदं च निरङ्कुशम्।
आसीदपथगं सत्यं तदा जलविजृम्भितम् ॥ १० ॥
मृदो जलस्य तत्कालेद्रिवृक्षविटपालिषु।
केनोपदिष्टं तत्काले मूलोत्पाटनपाटवम् ॥ ११ ॥
आग्राग्रपशुगोप्राणिगृहधान्यादिहारकः।
भयदोभूज्जलापूरः स म्लेच्छोत्पिञ्जसंनिभः ॥ १२ ॥
तदा मडवराज्यस्था विशोका शोकदा नदी।
इतीव तज्जले तूर्णं ममज्जुर्गृहपङ्क्तयः ॥ १३ ॥
पुराणेषु प्रसिद्धा या विशोका शोकनाशिनी।
तदाभूद्विपरीतार्था प्रजाभाग्यविपर्ययात् ॥ १४ ॥
येभ्यः प्रतिष्ठा प्राप्ता तान्दुःस्थान्द्रष्टुमसांप्रतम्।
इतीव तोये तत्कालं ममज्जुर्नगरे गृहाः ॥ १५ ॥
शिलादारुमयी मग्नस्तम्भीभूतचतुर्गृहा।
चतुष्पादिव धर्मो या लोकोत्तरणकृद्बभौ ॥ १६ ॥
तारदाग्रामपङ्क्त्याश्च दर्शनाय विशांपतेः।
यात्रागतस्य रामस्य सेतुबन्ध इवाभवत् ॥ १७ ॥

वितस्तायां कृता जैनकदलिः सा गृहोज्ज्वला ।
जलावेशात्तटे मग्ना भग्नाद्यनगरान्तरे ॥ १८ ॥
पादद्वयावशेषापि स्थापिताग्रे भविष्यताम् ।
पादद्वयं पूरयितुं समस्येव महीभुजाम् ॥ १९ ॥
क्रमराज्ये तदा कुर्वन्कल्लोलैराकुलं जनम् ।
महानप्रसरो वेगादगाद्दुर्गपुरान्तरम् ॥ २० ॥
अन्यः सरोवरः कोपि पद्मनागसरोन्तिकम् ।
प्रीत्या किमागतो दूराद्यं दृष्ट्वा विशशङ्किरे ॥ २१ ॥
स्वयमुत्पाटयत्यस्मान्वृक्षवत्स सहागतः ।
इतीव तत्र वेश्मानि चिक्षिपुः स्वं जलान्तरे ॥ २२ ॥
दूरे समुद्रो मद्भर्ता कोयं मे समुपागतः ।
इत्थं वितस्ता त्रस्तेव प्रतीपमगमत्तदा ॥ २३ ॥
सीमोज्झिता चलन्मार्गा पङ्कातङ्ककलङ्किता ।
स्थितिः कलियुगस्येव भूरभूज्जलपूरिता ॥ २४ ॥
तस्मिन्नवसरे धारासारं वर्षति वासवे ।
नौकामारुह्य भूपालो निरगाज्जनचिन्तया ॥ २५ ॥
पश्यञ्जलान्तरे मग्नां कृषिं कृशतरः शुचा ।
जनकारुण्यपुण्यात्मा विचचार पतिः स्थलम् ॥ २६ ॥
दृष्टानि यानि घोषेषु गहनत्वान्न जातुचित् ।
स्थानानि तानि भूपालो नौकारूढो व्यलोकयत् ॥ २७ ॥
प्रतापशिखिनेवाथ शोषितोगान्मितैर्दिनैः ।
शान्तिं क्रूरो जलापूरः स त्रिसारे समागतः ॥ २८ ॥
अथाचिरेण तद्वर्षे दानोत्कर्षादिव प्रभोः ।
हर्षमन्वभवन्सर्वे पक्वया शालिसंपदा ॥ २९ ॥

प्रजाचन्द्रकलावृद्धचै कश्मीरेन्द्रपयोनिधिः ।
तूर्णं पूर्णात्मतां प्राप दयापीयूषभूषणः ॥ ३० ॥
आत्मेव कश्चित्सुकृती क्षितीशः
प्रजा प्रियास्य प्रकृतिर्यथैव ।
तत्सौख्यवृद्धचा सुखिता यदास्ते
तदीयदुःखेन च दुःखभागः ॥ ३१ ॥
वितस्तोच्चतटे भूयस्तदुपद्रवशङ्कया ।
पुरं चिकीर्षुर्बभ्राम जयापीडपुरान्तिके ॥ ३२ ॥
अकरोत्तिलकं भूमेरलकादर्पहृत्पुरम् ।
स जैनतिलकं नाम नदीतीरोन्नतिस्थले ॥ ३३ ॥
राज्ञो दिदृक्षयेवात्र राजधानीरुचिच्छलात् ।
सौधभित्तिगता नूनं चन्द्रिकास्ते सुधासिते ॥ ३४ ॥
मूलोत्पाटे दशास्योरिर्ममेशेन विवर्धितः ।
इतीव खिन्नः कैलासः सौधव्याजादिवागतः ॥ ३५ ॥
सुधासितगृहा यत्र सन्नागारवसुंधरम् ।
जयापीडपुरं जीर्णं हसतीव रुचिच्छलात् ॥ ३६ ॥
तलद्वारोत्सुकस्यास्य राज्ञः प्रत्यक्षतां गतम् ।
मयासुरपुरं किं वा यद्दृष्ट्वेत्यवदन्बुधाः ॥ ३७ ॥
यद्वारि कान्तं संक्रान्तं परितः सरितस्तटात् ।
द्वारिकां हसतीवास्य द्वारि कान्त्या सुधासितम् ॥ ३८ ॥
तत्र राजपुरीयाय जयसिंहाय भूपतिः ।
प्रददौ राज्यतिलकं निजजन्मदिनोत्सवे ॥ ३९ ॥
तत्रोपविष्टः संतुष्टः सेवया मे महीपतिः ।
भट्टतन्त्राधिकारं च प्रददौ ब्राह्मणप्रियः ॥ ४० ॥

काश्मीरकाश्यदेशीयसर्वगीताङ्किताङ्गने ।
तस्मिन्संवत्सरे राज्ञा चक्रे कनकवर्षणम् ॥ ४१ ॥

तत्रोपकण्ठे भूपालः स्मृत्यै कण्ठीरवद्विषः ।
हेलालनाम्नो दासस्य हेलालपुरकं व्यधात् ॥ ४२ ॥

शैलपीठं विधायोच्चैर्जयापीडपुरान्तरे ।
सरस्तीरे मनोहारिराजवासं स्वकं व्यधात् ॥ ४३ ॥

उदीपब्रुडितं जीर्णं निर्लुण्ठ्योपसरोवरम् ।
महाप्रज्ञो नृपश्चक्रे तद्वद्राजा गृहावलिम् ॥ ४४ ॥

नागयात्रादिने यत्र प्रत्यब्दं दिनपञ्चकम् ।
गणचक्रोत्सवे राजा योगिनो भोगिनो व्यधात् ॥ ४५ ॥

यत्र कादम्बरीक्षीरव्यञ्जनादिप्रपूरिताः ।
कृत्वा पुष्करिणीः सर्वान्स यथेच्छमभोजयत् ॥ ४६ ॥

यत्र योगिसहस्रोत्थशृङ्गनादासकृच्छ्रुतेः ।
जाने मानसनागोपि न्यमीलन्निजचक्षुषी ॥ ४७ ॥

न तदन्नं न तन्मांसं न तच्छस्यं न तत्फलम् ।
न ते भोगा न ये राज्ञा भोजिता भोजनक्षणे ॥ ४८ ॥

योगिनां त्रिविधाश्लीलं मद्यमत्ततयोदितम् ।
असहिष्ट नृपो भक्त्या यदसह्यं जनैरपि ॥ ४९ ॥

महार्घपरिधानोद्यद्दानमानादिलाञ्छनैः ।
तेषामधिपतिं यत्र मेरुं स्वसदृशं व्यधात् ॥ ५० ॥

सत्कन्थाकिंनरामुद्रादण्डाद्यैर्द्वादशीदिने ।
भारिकान्योगिनः कृत्वा प्रत्यमुञ्चत्ततो बहिः ॥ ५१ ॥

वितस्ताजन्मपूजार्थं त्रयोदश्यां ततो नृपः ।
दीपमालादिदृक्षुः सन्नौकारूढोभ्यगात्पुरम् ॥ ५२ ॥

सुभाषितानि संशृण्वन्संगीतानि जलान्तरे।
समारोहावरोहाभ्यां स पौराशिषमग्रहीत् ॥ ५३ ॥
पूजार्थं प्रस्फुरत्पौरदत्तदीपावलिच्छलात्।
वितस्तान्तरमायाता तीर्थकोटिरिवाद्युतत् ॥ ५४ ॥
पारावारतटप्रत्तदीपमालास्तदा दधुः।
अर्चनाप्तसुरोन्मुक्तसुवर्णकुसुमश्रियम् ॥ ५५ ॥
वितस्तावलिपूजाप्तनागरीमुखनिर्जितः।
लज्जया कम्पतीवेन्दुः सेवाप्तः प्रतिमाच्छलात् ॥ ५६ ॥
गर्वखर्वीकृतारातिः सुपर्ण इव लीलया।
सर्वां रात्रीं स गान्धर्वचर्वणैरनयत्सुखम् ॥ ५७ ॥
वन्द्योसौ गुणिबान्धवो दिनपतिर्यस्योदयानुग्रहा-
दृष्टा कुत्र न सर्वदर्शनसुखात्सञ्चक्रहर्षस्थितिः।
निन्द्यौ तस्य सुतौ पितुर्विसदृशौ लोकव्यथोत्पादकौ
यौ कालोयमिति प्रथामुपगतौ क्रूरग्रहौ निश्चितौ ॥ ५८ ॥
अत्रान्तरे निजद्वेषवशात्कलुषिताशयः।
आदामखानो निःशेषं देशमाक्रामयद्बठात् ॥ ५९ ॥
यत्राश्मेवातिकठिनास्तन्त्रतन्त्रितयन्त्रिणः।
दुर्मन्त्रिणोभजन्राज्ञि तस्मिन्सोपि स्वतन्त्रताम् ॥ ६० ॥
स्फीते भीते न कामास्त्रे शास्त्रे न रसिकोभवत्।
केवलं मृगयासक्तश्चमत्कारं श्वभिर्व्यधात् ॥ ६१ ॥
सरसामन्तरेरण्ये यत्र कुत्रापि तिष्ठतः।
मृगयारसिकस्यात्र रात्रिर्दिनमिवाभवत् ॥ ६२ ॥
किमुच्यतेन्यन्नीचत्वं यद्भृत्यैर्व्यवहारिवत्।
श्येनसंहतपक्षौघविक्रयो नगरे कृतः ॥ ६३ ॥

अथैकदा विभज्यासौ यौवराज्यमदोद्धतः ।
क्रमराज्यं नृपत्याज्यं ययौ प्राज्यपरिच्छदः ॥ ६४ ॥
यत्र यत्रोपविष्टः स पापनिष्ठोप्यनिष्टवत् ।
अभवन्पीडितग्रामीणाक्रन्दमुखरा दिशः ॥ ६५ ॥
प्रसादमतुलोदग्रप्रतिग्रहदृढां क्षितिम् ।
उपग्रह इवात्युग्रः संजहार पदे पदे ॥ ६६ ॥
क्वचिद्रीत्या क्वचिद्भीत्या क्वचिन्नीत्या विलोभयन् ।
लोभग्रस्तो बलात्कारान्न केषामहरद्धनम् ॥ ६७ ॥
स प्राकृत इव व्याजमैत्रीं कुर्वन्गृहागतः ।
लोभादन्याँल्लवन्यांस्तानन्यान्वित्तैरवञ्चयत् ॥ ६८ ॥
नीता जारकृताद्युक्त्या सभयास्ताडयन्स्त्रियः ।
तदुक्त्यादण्डयत्तस्य ग्रामीणान्सेवकव्रजः ॥ ६९ ॥
तत्तद्विनिग्रहस्थानसावधानमतिस्तदा ।
स तार्किक इवात्युग्रो राष्ट्रियैर्दुर्जयोभवत् ॥ ७० ॥
जायास्नुषादुहित्राद्या भव्या येष्वभवन्गृहे ।
बलात्प्रविश्य संभुक्ता निर्लज्जैस्तस्य सेवकैः ॥ ७१ ॥
समण्डमत्स्यं कुण्डैस्ते पीत्वा शुण्डान्तरे मधु ।
भाण्डा इव मदोद्भण्डाः श्वासैर्भाण्डमवादयन् ॥ ७२ ॥
तण्डुलाश्च कुसूलेभ्यः शालाभ्यः पीनबर्कराः ।
वीटिकाभ्यः स्वयं मद्यं भुक्तं तैर्बलकारिभिः ॥ ७३ ॥
सेवकानौचिती तस्य कियती वर्ण्यते मया ।
येश्वमूर्धनि वास्तव्यान्घृताभ्यङ्गमकारयन् ॥ ७४ ॥
हसन्तीरिव ज्वालाभिस्तैलपूर्णा हसन्तिकाः ।
तान्वारयित्वा ये दीपान्निशास्वज्वलयञ्शठाः ॥ ७५ ॥

इत्यादि कुत्सिताचारं भारार्त इव भूपतिः।
विज्ञप्योद्वेजितो लोकैर्निर्गन्तुं नाशकद्गृहात् ॥ ७६ ॥
पीडां मा कुरुतेत्यादि राजदूते ब्रुवत्यमी।
अवोचन्निति तद्भृत्या राजा क्रन्दतु पीडितः ॥ ७७ ॥
वैरं यो गुरुभिः करोति सततं पुष्णात्यलं दुर्जना-
ल्लोभात्संचयमातनोत्यनुदिनं तद्दानभोगोज्झितः।
दीनान्ग्राम्यजनांश्च पीडयति यो निर्हेतुमत्याक्षिपं-
स्तस्यासन्नविनाशिनः स्वविभवस्तापाय शापाय वा ॥७८॥
कुर्वन्स्वसैन्यसामग्रीं कुद्मदेनपुरे स्थितः।
एकदा जैननगरे भूपालं सबलोभ्यगात् ॥ ७९ ॥
तद्दिने शङ्कितस्तस्मात्पूर्णकर्णो दुरुक्तिभिः।
स्वसैन्यसंग्रहं राजा राजधान्यां गतोकरोत् ॥ ८० ॥
वितस्तान्तर्वसद्दारुशैलपूर्णचतुर्गृहम्।
तरदायामपङ्त्युच्चदशकं नगरान्तरे ॥ ८१ ॥
सेतुबन्धं व्यधाज्जैनकदलाख्यमयं नृपः।
स्वकृतं तं तदाज्ञासीत्स्वविघ्नमिव भीतिदम् ॥ ८२ ॥
नगरोपप्लवाशङ्की संत्रस्तो यत्नमास्थितः।
पुरान्निष्कासयामास तं सुतं मन्त्रयुक्तिभिः ॥ ८३ ॥
संतापप्रदमुत्तरायणमिहालोच्यापि रम्यं गुणै-
र्यो वाञ्छत्यथ दक्षिणायनममुं ज्ञात्वा हिमार्तिप्रदम्।
लोकानामसुखक्षयार्थमुभयोराद्यं पुनर्यो भज-
त्यर्थायैव परोपकारनिरतः सूर्याय तस्मै नमः ॥ ८४ ॥
क्रमराज्यान्तरं प्राप्ते तस्मिन्द्वैराज्यशङ्कितः।
स्वाक्षरैर्हाजिखानं स प्राहैषीत्पत्रमित्यदः ॥ ८५ ॥

पुत्र मेवसरो दुष्टस्तादृक्प्राप्तो दुरुत्तरः ।
यत्र मत्प्राणसंदेहे गतिर्नान्या त्वया विना ॥ ८६ ॥
मत्पत्रावेक्षणे युक्तं शयितस्य तवासनम् ।
आसीनस्य समुत्थानमुत्थितस्य च धावनम् ॥ ८७ ॥
किमन्यत्सत्यमेवोक्ते त्यक्तापि श्रुतयन्त्रणाम् ।
यद्यागच्छसि तत्तूर्णं पूर्णं प्राप्स्यसि वाञ्छितम् ॥ ८८ ॥
अतितूर्णं न चेत्प्राप्तो मयि जीवति विह्वले ।
गते मयि मदभ्यर्णं पुनरागमनेन किम् ॥ ८९ ॥
तावत्स्वयपुरं प्राप्तः सोभूत्तीर्णो नृपात्मजः ।
राजानीकैः समं युद्धमुद्धतं सबलो व्यधात् ॥ ९० ॥
राष्ट्राधिकारिणं तत्र नत्थभट्टं भटैः सह ।
हत्वा कृत्वा च कदनं देशोत्पिञ्जं क्षुधा व्यधात् ॥ ९१ ॥
अथोदतिष्ठत्तुमुलस्तत्कालं सैन्ययोर्द्वयोः ।
उन्नद्धखानसंनद्धयुद्धेक्षणसुदुःसहः ॥ ९२ ॥
अष्टाविंशाब्दवदस्मिन्पञ्चत्रिंशेपि वत्सरे ।
वैरं नीत्वा पितापुत्रौ पिशुनैः कारितो वधः ॥ ९३ ॥
तत्रत्यादरदा वान्ये परितः सरितो जले ।
ममज्जुस्तद्भयाद्येन शवपूर्णमभूत्सरः ॥ ९४ ॥
हत्वा मृत्युरिवात्युग्रां तद्दिने नृशतत्रयीम् ।
नौसेतुबन्धमुच्छिद्य नदीपारं समासदत् ॥ ९५ ॥
धिक्तं यः पैत्रिके देशे रक्षणीयेपि निष्कृपः ।
परदेशजयं त्यक्त्वा तादृङ्निन्द्यं समाचरत् ॥ ९६ ॥
पापास्ते शिखजादाद्या गृहीत्वोभयवेतनम् ।
भूपमुद्वेजयामासुः फलं यैरनुभूयते ॥ ९७ ॥

उच्चः सत्फलदो यथायमहमप्येतादृगेतावता
स्पर्धी यावदियेष हन्त जनकेनैकेन मन्दः सुतः।
भास्वानभ्युदितः स तावदतुलः सर्वप्रकाशोद्यतो
यन्माहात्म्यवशेन वक्रगतयो ध्वस्ता भवन्ति स्वयम् ॥९८॥
तद्देशकष्टदैर्दुष्टैः प्रजानां नाशहेतुना।
आदामखानो वित्राणो लक्ष्म्या भाग्यैश्च तत्यजे ॥ ९९ ॥
इत्यातङ्कादिभिर्दुःखैर्वरं देशेत्र जीव्यते।
सर्वनाशकरी मास्तु भूभर्तुर्बह्वपत्यता ॥ १०० ॥
सा चेत्तेषां स्वभेदो मा भूयाद्वैरात्परस्परम्।
मा जायेताथ वा दुष्टः सुतः कस्यापि दुःखदः ॥ १०१ ॥
प्रजान्तकारिणौ क्रूरौ राजपुत्रावुभावपि।
सूर्यस्येव महीभर्त्तुः पङ्गुकालाविवोदितौ ॥ १०२ ॥
अपकर्तॄन्विपन्मग्नान्दयमानः परानपि।
क्षमी दाता गुणग्राही स्वामीदृग्लभ्यते कथम् ॥ १०३ ॥
व्यथितो यत्सुतैर्दुष्टैः सोस्मद्भाग्यविपर्ययः।
शृण्वन्स रुदिताक्रन्दमिति पौरगिरः पथि।
पाददाहव्यथार्तोपि नगरान्निरगान्नृपः ॥ १०४ ॥
पुत्रोत्पत्तिमवेक्ष्य तुष्यति नृपो वोढा धुरः स्यादिति
स्नेहात्संपदमस्य यच्छति निजामुल्लङ्घ्य नीतिक्रमम्।
ज्ञात्वा तं बलवन्तमात्मसदृशं तादृग्भिया शङ्कते
येनासन्नसुखो न जातु लभते निद्रां सचिन्ताज्वरः ॥ १०५ ॥
बद्ध्वा मल्लिकजस्रथेन स यदा राजालिशाहिर्हतो
भ्रातृद्वेषवशाद्बभूव कदनं काश्मीरिकाणां महत्।
तद्वज्जैनमहीभुजोस्य तनयद्वेषात्किमालोक्यते
तन्माभूद्बहुसंततिर्नृपगृहे देशे विनाशप्रदा ॥ १०६ ॥

इति मार्गे कथाः शृण्वन्ग्राम्याणां जैनभूपतिः ।
वधात्कुतनयं निन्दन्प्राप स्वयपुरान्तरम् ॥ १०७ ॥
तीरद्वये वितस्तायाः पितापुत्रबलद्वयम् ।
न्यवीविशत्समासन्नं परस्परजयोद्यतम् ॥ १०८ ॥
अत्रान्तरे हाजिखानः पर्णोत्साच्चूर्णमागतः ।
सुपर्ण इव सद्वर्णदेशाभ्यर्णं समासदत् ॥ १०९ ॥
श्रुत्वा वराहमूलान्ते पुत्रं प्राप्तं बलान्वितम् ।
अग्रे भद्रामखानं तं सत्कर्तुं व्यसृजन्नृपः ॥ ११० ॥
कालापेक्षी हाजिखानः प्रेम्णाश्लिष्य कृतादरः ।
प्रीतिनिष्ठं कनिष्ठं तं भ्रातरं स्वममानयत् ॥ १११ ॥
अन्येद्युर्मानितं दृष्ट्वा जनकेन निजानुजम् ।
आदमखानो वित्राणः संत्रस्तोगाद्दिगन्तरम् ॥ ११२ ॥
शाहिभङ्गपथा सिन्धुं समुत्तीर्य बलान्वितः ।
प्राप सिन्धुपतेर्देशं कष्टक्लिष्टपरिच्छदः ॥ ११३ ॥
इत्थं त्रिंत्रिंशमे वर्षे ज्येष्ठं निष्कास्य युक्तितः ।
हाजिखानान्वितस्तुष्टो नगरं प्राप भूपतिः ॥ ११४ ॥
शिशिरसमये योभूत्क्लिष्टश्चिरं हतपक्षति-
र्धरणिकुहरेष्वन्तः कालं निनाय शुचाकुलः ।
कुसुमसमये प्राप्योद्यानं विकासिलतोज्ज्वलं
किसलयरतः सोयं भृङ्गः सुखं रमते पुनः ॥ ११५ ॥
अस्मिन्नवसरे तुष्टाद्धाजिखानोद्धृतं चिरात् ।
यौवराज्यपदं प्रापज्जनकाज्जनकोपमात् ॥ ११६ ॥
पितुः प्रेममणिं प्राप्य स्वच्छं भक्तिपरायणः ।
हृदयान्नात्यजज्जातु श्रीमाञ्शार्ङ्गीव कौस्तुभम् ॥ ११७ ॥

विनयक्षिप्तदेवाग्रजानुसंकुचिताकृतिः ।
हकार इव सद्वर्णः सोष्मा सर्वावधिर्बभौ ॥ ११८ ॥

न तत्तीर्थं न सा यात्रा न सा लीला न चोत्सवः ।
तदाभून्नैव यत्रागाद्धाजिखानान्वितो नृपः ॥ ११९ ॥

यो नित्यं परितो वृतो गणशतैरत्यर्थभक्त्युज्ज्वलैः
पुत्राभ्यां सहितो हितस्त्रिजगतां नानाविलासान्भजन् ।
कालो गच्छति यस्य लास्यललितं गीतं च यच्छृण्वतः
शस्यः कस्य न तन्नमस्यविभवः कैलासवासो भवः॥ १२० ॥

इति जैनराजतरङ्गिण्यां आदमखाननिर्वासनं हाजिखानसं-
योगवर्णनं नाम तृतीयः सर्गः ।

चतुर्थः सर्गः

अत्रान्तरे मदनबन्धुरयाद्वसन्तः
शृङ्गारसारकुमुदाकररोहिणीशः ।
मानान्धकारविनिवारणभानुमूर्तिः
स्फूर्जल्लुतालिललनानवयौवनश्रीः ॥ १ ॥

ततश्चैत्रोत्सवे राजा पुष्पलीलाचिकीर्षया ।
ययौ मडवराज्योर्वीं नौकारूढः सुतान्वितः ॥ २ ॥

तरण्डमण्डली राज्ञो वितस्तान्तरगा बभौ ।
शक्रस्येव विमानाली छायापटविभूषिता ॥ ३ ॥

स्वकीयराजवासस्थो राजावन्तिपुराद्गतः ।
विजयेशादिदेशेषु नाट्यं द्रष्टुमुपाविशत् ॥ ४ ॥

हरांशं भूभुजं जेतुं यत्र राजसभानिभात् ।
भवासक्तोभवत्कृत्वा बहुधा स्वं मनोभवः ॥ ५ ॥

सालंकारप्रबन्धज्ञाः सिद्धान्तश्रुतविश्रुताः ।
यत्रान्तःकरणोद्युक्ता द्रष्टारो गायना अपि ॥ ६ ॥
नानाग्रामगताश्चारुस्वररागमनोहराः ।
यत्र गीता रसस्फीता बभुर्युवतयोपि च ॥ ७ ॥
कलाकलापवेत्तासीन्मानमानससौख्यभृत् ।
रङ्गरङ्गद्रुचिर्लोको विद्याविद्यातसंशयः ॥ ८ ॥
प्रतितालैकतालादिबहुतालादिभूषितम् ।
तत्र ताराचनाराचसंज्ञानं विदधुर्नटाः ॥ ९ ॥
उत्सवा नाम कामास्त्रं गायनी नयनोत्सवा ।
लास्यताण्डवनृत्यज्ञा न केषां रञ्जिकाभवत् ॥ १० ॥
भावानेकोनपञ्चाशत्संख्यांस्तानांश्च तावतः ।
दर्शयन्त्यो बभुः पात्र्यस्ता मूर्ता इव मूर्च्छनाः ॥ ११ ॥
यासां नृत्ये च गीते च त्वत्तो मेस्त्यधिकं सुखम् ।
इति वादोभवच्छ्रोत्रनेत्रयोः प्रेक्षणक्षणे ॥ १२ ॥
पात्रीगानपिकध्वाने रङ्गोद्याने तदाद्युतन् ।
दीपचम्पकमालास्ता मधुपैः परितो वृताः ॥ १३ ॥
राज्ञो राज्येक्षणात्तुष्टैर्नृत्यप्रेक्षागतैः सुरैः ।
दीपमालाच्छलान्मुक्ता नूनं हेमाम्बुजस्रजः ॥ १४ ॥
जलान्तर्बिम्बिता क्वापि दीपाली नागलोकतः ।
वरुणेन नृपप्रीत्या दापितेवाद्युतत्तदा ॥ १५ ॥
ता दीपिता दीपमाला द्विधा रङ्गे चकाशिरे ।
दिदृक्षागतनागानां फणामणिगणा इव ॥ १६ ॥
किं राजालोकलोभात्तटभुवि मिलिताः पूर्वभूपालजीवाः
किं व्योम्नस्तारकौघः शशधरविमुखः सेवनायावतीर्णः ।

किं वा सिद्धाः सुरेन्द्रा निजरुचिरुचिराः प्रेक्षणायोपविष्टाः
किं वैता दीपमाला इति जनमनसामास्त दूराद्वितर्कः॥१७॥

साक्षादेष पुरन्दरः कविबुधा विद्याधराः सेवका
अन्ते देवसभासदः सवपुषः सिद्धा अमी योगिनः।
एता अप्सरसो रसोर्जितगुणा गन्धर्वका गायना
रङ्गोयं त्रिदिवस्थलीति जगदुः सर्वे जनाः प्रेक्षकाः॥ १८॥

अङ्गारक्षारचूर्णादिगन्धकौषधयुक्तिभिः।
रागैः शिलिपकृता लीला क्रीडालोकमरञ्जयत्॥ १९॥

तथाह्यौषधसंपूर्णान्नालाद्वन्हिकणा घनाः।
निर्यत्कुसुमसंपूर्णस्वर्णवल्लीभ्रमं व्यधुः॥ २०॥

सर्पाकारानलज्वाला निर्गता सलिलान्तरात्।
चक्रे प्रेक्षकलोकानां त्रासाश्चर्यभयोदयम्॥ २१॥

नालकादुत्थिता व्योम्नि ज्वालागोलकपङ्क्तयः।
राजद्राजतरोचिष्का जीवशुक्रोपमां व्यधुः॥ २२॥

रज्जुबद्धागमद्दूरं ज्वलन्त्योषधनालिका।
आहूतेव तया नीतास्तादृश्यो बहवो गताः॥ २३॥

गतागतानि कुर्वन्त्यो दीप्ता उल्का इवोल्वणाः।
प्रेक्षकाणां प्रिया दृष्टीरहरन्नद्भुतावहाः॥ २४॥

अत्र पात्रीकरस्थापि ज्वलन्त्यौषधनालिकाः।
द्युलोकोन्मुक्तसद्वर्णस्वर्णपुष्पश्रियं व्यधात्॥ २५॥

निर्गतं ननु दण्डान्तर्ज्वालापिण्डं नभोन्तरे।
उद्दण्डदण्डं सर्वेषां चण्डरश्मिभ्रमं व्यधात्॥ २६॥

वन्हिक्रीडनलीलाया युक्तिज्ञेन महीभुजा।
शिक्षयित्वा हमेभाख्यं तास्ताः सर्वाः प्रदर्शिताः॥ २७॥

क्षारस्तदुपयोग्योत्र दुर्लभो योभवत्पुरा।
तद्युक्तिशिक्षया राज्ञा स्वदेशे सुलभः कृतः ॥ २८ ॥

प्रश्नोत्तरमयी स्वोक्तिर्हेभेभं प्रति या कृता।
पारसीभाषया काव्यं दृष्ट्वाद्य कुरुते न कः ॥ २९ ॥

ते शिल्पा मतिकल्पिताः स च सदा संगीतवाद्यो रसः
सालंकारविचारचारुधिषणा काव्ये च तत्कौशलम्।
सच्छास्त्रश्रवणादरः स च नवप्रोत्पादनायोद्यमः
श्रीमज्जैनमहीपतेर्बहुमतेस्तस्येव कस्याधुना ॥ ३० ॥

खुजाब्दोल्कादराख्यस्य शिष्यः सर्वगुणाम्बुधेः।
भूभुजश्चित्तमनयद्रागतालादिभिर्मुदम् ॥ ३१ ॥

खुरासानागतो मल्लाजादकाख्यो महीपतेः।
वादनात्कूर्मवीणायाः प्रापातुलमनुग्रहम् ॥ ३२ ॥

मल्लाज्यमालनामापि म्लेच्छवाग्गेयकारकः।
नारदो वासवस्येव राज्ञो भूदतिरञ्जकः ॥ ३३ ॥

तुम्बवीणाधरः सोहं सर्वगीतविशारदः।
उद्भटनवगीताङ्ककौशलं समदर्शयन् ॥ ३४ ॥

अन्येपि जाफराणाद्या मया सह नृपाग्रगाः।
तौरुष्कान्तुष्करान्रागानगायन्वीणया समम् ॥ ३५ ॥

गीतं द्वादशरागाङ्गं गायतां नः सभान्तरे।
प्रीत्यैवैक्यमिवापन्नास्तन्त्रीकण्ठोत्थिताः स्वराः ॥ ३६ ॥

देशसंस्कृतकाव्यज्ञो राज्ञो निकटवास्यभूत्।
पण्डितो नोत्थसोमाख्यो देशजैनचरित्रकृत् ॥ ३७ ॥

देशभाषाकवियोंधभट्टः शुद्धं च नाटकम्।
चक्रे जैनप्रकाशाख्यं राजवृत्तान्तदर्पणम् ॥ ३८ ॥

भट्टावतारः शाह्लामदेशग्रन्थाब्धिपारगः।
व्यधाज्जैनविलासाख्यं राजोक्तिप्रतिरूपकम् ॥ ३९ ॥
वीणातुम्बीरभाभाद्याः सर्वास्तुष्टेन भूभुजा।
सुवर्णरौप्यरत्नौघैर्घटितास्ताश्चकाशिरे ॥ ४० ॥
तद्वाचिकाङ्गिकाहार्यसात्त्विकाभिनयोज्ज्वलम्।
नाट्यं दृष्ट्वा जनः सर्वश्चतुर्मुखमशंसत ॥ ४१ ॥
इत्थं त्रिवर्गविद्राजा त्रिजगत्ख्यातपौरुषः।
त्रियामास्त्रिविधैर्नृत्यैरनयत्त्रिदशोपमः ॥ ४२ ॥
स्फुरद्विचकिलोल्लासहासं स भवनान्तरम्।
आसदत्तारकापूर्णं पूर्णचन्द्रइवाम्बरम् ॥ ४३ ॥
ततो विमलकुण्डान्ते पानक्रीडां महीपतिः।
कर्तुं प्रचक्रमे तत्र पुत्रमित्रविभूषितः ॥ ४४ ॥
पितृप्रेमामृतोत्सिक्तो हाजीखानोथ भक्तिमान्।
वसन्तवर्णनोन्मिश्रां चाटूक्तिमवदद्विभोः ॥ ४५ ॥
संगीतनादनिपुणान्कलकण्ठभृङ्गा-
न्कृत्वानिलं व्रततिलास्यविधानदक्षम्।
गीतप्रियं नरपते किमु सेवितुं त्वां
प्राप्तो वसन्तऋतुचारणचक्रवर्ती ॥ ४६ ॥
मेघाडम्बरमम्बरं यदि तदा निर्नष्टशोभा वयं
नित्यं तीक्ष्णकरेण तेन दिवसे तत्राप्यहो बाधिताः।
स्वामी नः शशभृल्लयोदयहतो दुःखादितीवागता
उद्याने नरदेवसेवनपराः पुष्पच्छलात्तारकाः ॥ ४७ ॥
पङ्कातङ्ककलङ्किता जलमया ये भोगिदेहार्तिदा
स्त्वद्देशे विलसन्त्युपात्तविषयाः सन्मार्गविघ्नोद्यताः।

ते याताः स्वयमेव देव विलयं श्रीमत्प्रतापोदया-
दस्मिन्हर्षमये वसन्तसमये प्रालेयपूरा यथा ॥ ४८ ॥

श्रुत्वेति भूपतिर्हृष्टो हाजीखानाय सत्वरम् ।
सौवर्णकर्तरीबन्धमप्रमेयं समार्पिपत् ॥ ४९ ॥

यैर्यैः सेवा कृता तस्य शाह्यादेशे विचार्य तान् ।
पुत्रस्नेहेनभूपालो घोषराष्ट्राधिपान्व्यधात् ॥ ५० ॥

प्रेष्याद्याक्षेपसिन्ध्वौघमग्नांस्तान्सेवकव्रजान् ।
प्रसादपट्टपोतेन समुत्तीर्णान्व्यधान्नृपः ॥ ५१ ॥

विद्वद्गीताङ्गिभृत्येभ्यस्तस्मिन्नवसरे नृपः ।
सुताप्त्यानन्दबाष्पाढ्यो व्यधात्कनकवर्षणम् ॥ ५२ ॥

दत्तमार्गोपचारार्था राष्ट्रिया दर्शनागताः ।
प्राप्तपट्टपरीधानमानतुष्टा न केभवन् ॥ ५३ ॥

तान्विलोक्य भवनोपवनादी-
न्पुष्पपूरपरिपूरितनौकः ।
संस्तुवन्मडवराज्यनिवासा-
न्प्राप जैननृपतिर्नगरं स्वम् ॥ ५४ ॥

इति जैनराजतरङ्गिण्यां पुष्पलीलावर्णनं नाम चतुर्थः सर्गः ।

पञ्चमः सर्गः

अत्रान्तरे सुतप्राप्त्या निश्चिन्तः सुकृतोद्यतः ।
कुल्या नवनवाः कर्षन्प्रतिष्ठारसिकोभवत् ॥ १ ॥

कविः श्रीजोनराजो यां स्वसंदर्भान्तरेब्रवीत् ।
ग्रन्थविस्तारभीत्या तद्वर्णनं न मया कृतम् ॥ २ ॥

एकैवास्त्यमरावती ननु पुरी साश्चातनिर्माणका
तत्राप्यत्र सदा विमानवसतिर्देवादिषु श्रूयते।
सोभूद्भूमिपुरंदरः पुरशतं कुर्वन्नवं सर्वतो
यत्रैते निवसन्ति मानसहितास्ते भूमिदेवादयः ॥ ३ ॥
श्रीजैननगरे पञ्चदशेब्दे या कृता पुरा।
राजधानी नवात्युच्चा विद्धा देवगृहोपरि ॥ ४ ॥
तस्याः समीपे नृपतिश्चत्वारिंशेथ वत्सरे।
इष्टिकादारुसंबद्धं राजवासं नवं व्यधात् ॥ ५ ॥
यत्पृष्ठे स्वर्णकलसो भाति भातिमनोहरः।
हेमपद्म इवोन्मुक्तः शक्रेण श्रुतकीर्तिना ॥ ६ ॥
यद्द्वाराग्रनियुक्तेभ्यस्तत्तत्कर्म समादिशन्।
आजीवं सोवसद्राजा राजधान्युज्झितस्थितिः ॥ ७ ॥
यत्र वापीगता हंसा गीतशंसां स्वनच्छलात्।
कुर्वन्तीव समीपस्था गायद्गीताङ्गिसंस्कृतैः ॥ ८ ॥
यत्र खर्वीकृतारातिः सुपर्वाधिपतिर्यथा।
सर्वाहः सुखगन्धर्वचर्वणैरनयत्सुखम् ॥ ९ ॥
यदन्तरे सुविस्तीर्णः सर्वदर्शनमण्डपः।
काचभित्तिमयो भाति त्र्यश्रसिंहासनोज्ज्वलः ॥ १० ॥
यद्गर्भाद्भूपसंदर्भनिर्भरान्नृपसंश्रितात्।
वातोपि सफलो यातः प्रातर्घ्राणसुखप्रदः ॥ ११ ॥
कदाचिल्लाहरं दुर्गं यात्रां द्रष्टुं गतो नृपः।
राजवासं नवं कृत्वा जीर्णोद्धारमकारयत् ॥ १२ ॥
समुद्रकोटादारभ्य यावच्छ्रीद्वारकावधि।
तत्तन्नवनवावासवासवालयसुन्दरान् ॥ १३ ॥

जैननामाङ्कितान्ग्रामानकरोन्नगभूषितान् ।
उपतीरं महापद्मश्रीमत्पन्नगभूषितान् ॥ १४ ॥

तदन्नसत्रतृप्तानामर्थिनां त्रिपुरेश्वरे ।
उदरं मेदुरं क्षान्तो राजा लम्बोदरः कथम् ॥ १५ ॥

अन्नसत्रे क्षितीशान्नैर्वराहक्षेत्रभूमिषु ।
अस्तु नम्रशिराः शेषश्चित्रमिन्द्रोपि चाभवत् ॥ १६ ॥

मत्स्येभ्यो नित्यतृप्तेभ्यः सूक्ष्माणामभयं ददौ ।
मत्स्यानामन्नसत्रेण वितस्तासिन्धुसंगमे ॥ १७ ॥

अर्थिनामतितृप्तानां श्रीशंकरपुरे नृपः ।
अपेक्ष्य विदधे छायां न फलानि महीरुहाम् ॥ १८ ॥

अश्रमायां व्यधादन्नसत्रैः संतर्पयज्जनान् ।
भङ्गं शृङ्गाटवल्लीनां शृङ्गाटैरतिसंस्कृतैः ॥ १९ ॥

तस्य पद्मपुरे चान्नसत्रे व्यञ्जनसौरभैः ।
कथं न कुङ्कुमस्याभूद्गन्धभेदकदर्थना ॥ २० ॥

अच्छिन्नेनान्नसत्रेण विजेयश्वरवासिना ।
उदरे मेदुरे सिद्धः प्रणामो यत्नतो विभोः ॥ २१ ॥

अन्नसत्रमविच्छिन्नं कृत्वा शूरपुराध्वना ।
शुल्कस्थाने व्यधाद्राजा भारिकानभिसारिकान् ॥ २२ ॥

गुणी मूर्खो निराचारः साचारो यवनो द्विजः ।
नापोषि यस्तदन्नेन कश्मीरेषु स नाभवत् ॥ २३ ॥

शंभुश्रीपतिधातृजह्नुमनुभिः पूर्वं रवेरन्वये
जातेनापि कृतः श्रमस्त्रिपथगा गङ्गैव जाता नदी ।
तेषां स्वार्थमभूद्रसो नरपतिः सोयं परार्थे पुन-
र्देशेस्मिन्सुधिया नदीर्नवनवा नानापथः कृष्टवान् ॥ २४ ॥

नवीनोदारकेदारभूम्युत्पन्नाः प्रतिस्थलम् ।
कूटा धान्यफलैः पुष्टा दृष्टाः पर्वतसंनिभाः ॥ २५ ॥
धान्यकूटच्छलान्नूनं साभूद्धात्र्याः कुचस्थली ।
प्राप्तोपाया प्रजा यस्माद्वृद्धिमापद्दिने दिने ॥ २६ ॥
दुर्लभोपद्रवानिष्टा यत्रयत्राभवत्क्षितिः ।
ससुख्य इव सस्याढ्यां तत्र तत्राकरोन्नृपः ॥ २७ ॥
न तत्स्थलं न कान्तारो न स देशो न साटवी ।
यत्र नानीय कुल्याः स्वाः स्वनामाङ्काः पुरीर्व्यधात् ॥ २८ ॥
न सा नदी न तत्क्षेत्रं न स ग्रामो न सा पुरी ।
न तत्स्थानं न यद्राजा जैननामाङ्कितं कृतम् ॥ २९ ॥
यत्र यत्राभवन्निम्नः प्रदेशस्तत्र कुल्यया ।
व्यधाद्राजा सरः पक्षिबिसश्रृङ्गाटभूषितम् ॥ ३० ॥
धन्यो वारिधरो धरोपकरणोद्युक्तः सदा जीवनै-
र्यः सिन्धोः सलिलं निरर्थकतया निन्ये निकृष्यान्वहम् ।
कान्तारेष्वफलेषु केषु रुचिरं मुञ्चत्यभीक्ष्णं यत-
स्तत्सेकोदितसर्वशस्यविभवो लोकः सुखी जायते ॥ ३१ ॥
लोके डल इति ख्यातं यदगाधं सरोवरम् ।
तस्य प्रतिष्ठा प्रस्तावाद्वर्णनं क्रियते मनाक् ॥ ३२ ॥
आ राजधान्या यद्दीर्घं सुरेश्वर्याः सरोवरम् ।
नौकारूढोचरन्नित्यं व्योम्नीवेन्दुः सुनिर्मले ॥ ३३ ॥
अरित्रपत्रा यत्रान्तः सोड्डीनाः पटसुन्दराः ।
पोता इवारुचन्पोता राज्ञः शाकुनिकान्विताः ॥ ३४ ॥
तिलप्रस्थागता यत्र तटिनी त्रिपुरेश्वरात् ।
संगच्छते सुटङ्कां यल्लङ्कां द्रष्टुमिवोत्सुका ॥ ३५ ॥

श्रीपर्वतोपि षट्क्रोशस्तीर्थस्नानफलेप्सया ।
स्वसङ्गातिच्छलाद्यत्र मज्जतीव दिवानिशम् ॥ ३६ ॥
शैवलन्ति द्रुमा यत्र कमठन्ति च पर्वताः ।
पुर्यश्च नागलोकन्ति जलान्तर्यत्र बिम्बिताः ॥ ३७ ॥
यच्चलत्तृणभूशालिकुलानि सरसीरुहाम् ।
तत्सौगन्ध्यमिवाघ्रातुमानतानीक्षते जनः ॥ ३८ ॥
यल्लङ्कायुगलोत्प्रेक्षास्वोदयद्वयसंभ्रमात् ।
जाने याति रविः कुर्वन्प्रत्यब्दमयनद्वयम् ॥ ३९ ॥
यत्र तीरे सुरेश्वर्याः क्षेत्रं भुक्तिविमुक्तिदम् ।
वाराणस्यधिकं भाति तीर्थराजिविराजितम् ॥ ४० ॥
विहारैरग्रहारैश्च मठैः सुकृतकर्मठैः ।
आश्रमैरश्रमै राजवासैः स्वर्गोपमां व्यधात् ॥ ४१ ॥
दीर्घैश्चतुष्किकाहस्तैर्नृत्यन्त इव सूनृताः ।
दृश्यन्ते ये जनैर्दूराद्धेमच्छत्रवरोदराः ॥ ४२ ॥
येषां सिद्धपुरी नाम प्रसिद्धं नृपतेर्गृहम् ।
स्वसौधैः कुरुते सिद्धविमानावलिविभ्रमम् ॥ ४३ ॥
जीर्णा देवालया यत्र राजधान्यन्तरीकृताः ।
धृत्यौन्नत्या निजास्थित्या सत्यार्था भूभुजा कृताः ॥ ४४ ॥
यत्र सर्वतृणक्लेदनिर्भेदोत्पन्नभूस्थली ।
संचारिण्युर्वरा राज्ञां सफला विहिता धिया ॥ ४५ ॥
एकत्र देशे यत्रान्तःसत्रं श्रीजैनवाटिका ।
योगिनां पात्रपूजार्थं कृतं भोगाकृतस्मयम् ॥ ४६ ॥
मद्यपुष्करिणीमध्यसंक्रान्तः स्वादलिप्सया ।
यत्रैति द्विजराजोपि योगिचक्रान्तरे ध्रुवम् ॥ ४७ ॥

भूपतिर्भोजयन्योगिसहस्रं मीलदीक्षणम्।
निष्कम्पमकरोन्नित्यं किं तृप्त्या किं समाधिना ॥ ४८ ॥

आहारमनु तीव्रोद्यत्कीर्त्या रसवतीश्रिया।
दिवीव क्रियते यत्र सर्वा रसवती प्रजा ॥ ४९ ॥

पक्वान्नराशयोदभ्रा यत्राभ्रमुभ्रमप्रदाः
बिभ्रत्यभ्रभ्रमच्छुभ्रशरदभ्रश्रियोपमाम् ॥ ५० ॥

यत्राधर्ममृगं हन्तुं शृङ्गनादमिषाद्भुवम्।
संमिलत्सारसारावं श्रूयते मृगयारवः ॥ ५१ ॥

सामोदकामनिर्मुक्तमोदका यत्र योगिनः।
श्रमघर्मोदका जग्धेर्जाता राज्ञः प्रमोदकाः ॥ ५२ ॥

योगिस्फुरत्करक्लिष्टदधिदिग्धाशनच्छलात्।
योगाच्छशिकलास्रावास्तत्रैवान्त इवाद्युतन् ॥ ५३ ॥

मारी नाम नदी तस्माद्धितस्तान्तरमागता।
केवलं याभवत्पौरस्नानपानप्रयोजना ॥ ५४ ॥

हस्तिकर्णाभिधे क्षेत्रे युक्त्या राज्ञा प्रवेशिता।
सिन्धुसंगमपर्यन्तं निर्मिता शालिनालिनी ॥ ५५ ॥

मृतानां देहदाहेन स्वर्गदो नगरान्तरे।
स मारीसंगमः ख्यातो जातः सङ्गाद्धितस्तया ॥ ५६ ॥

द्युक्षेत्रपालाः कालेन किंकराः पञ्चवारिकाः।
पौरेभ्यः शवदाहोत्थमगृह्णञ्शुल्कमन्वहम् ॥ ५७ ॥

मत्पितृप्रमये राजा विज्ञप्तः स मयैकदा।
दण्डयित्वा किरातांस्ताञ्शवशुल्कं न्यवारयत् ॥ ५८ ॥

ततः प्रभृति तत्स्थाने विमाना नगरान्तरे।
दह्यन्ते दर्शनद्वेषिम्लेच्छानां हृदयैः समम् ॥ ५९ ॥

निरर्गला वयं जाता इतीव शिविकारकैः ।
छत्रहस्तैः प्रनृत्यन्तो दृश्यन्ते वाद्यनिस्वनैः ॥ ६० ॥
दिगन्तरीयया रीत्या यत्र राज्ञाप्यवारिताः ।
प्रियानुगमनं नार्यश्चितामारुह्य कुर्वते ॥ ६१ ॥
अर्थिसंघोपकारार्थं पौराणां सुकृती नृपः ।
विहारं बहुविस्तारं तत्संगमतटे व्यधात् ॥ ६२ ॥
स च हाजीविहारश्च पारावारे पुरद्वये ।
गृहश्रेणिमणिव्रातनायकश्रियमापतुः ।
अन्याः प्रतिष्ठास्तत्कालं राज्ञा स्वस्थेन कारिताः ॥ ६३ ॥
श्रीहर्षो नृपतिर्बभूव कविताराज्ये तदा येभवन्
सर्वे ते कवयः किमन्यदपि ते सूदाः स्त्रियो भारिकाः ।
सन्त्यद्यापि कृतानि तैः प्रतिगृहं पद्यानि विद्यानिधी
राजा चेद्गुणवान् गुणेषु रसिको लोको भवेत्तादृशः ॥ ६४ ॥
छात्रशाला विशालास्ता धर्मार्थं गुणशालिना ।
कृता याभ्यः श्रुतः शब्दस्तर्कव्याकरणोद्भवः ॥ ६५ ॥
आचार्यपुस्तकावाससहायान्नसमृद्धिभिः ।
पाठयन्सर्वविद्यानां वर्धयामास मण्डलम् ॥ ६६ ॥
न विद्यासुखयोः संधिस्तेजस्तिमिरयोरिव ।
इति व्यर्थं वचश्चक्रे मुनीनामभयप्रदः ॥ ६७ ॥
सौराज्यसुखिते देशे विद्याभ्यासपरायणे ।
अकाङ्क्षीत्सर्वदारोग्यं नृपतेः स्वस्य चान्वहम् ॥ ६८ ॥
राज्योत्पत्त्या नृपस्तादृक्कुष्ठोभून्न प्रतिष्ठया ।
यथा पण्डितसामग्र्या यामग्र्यामविदद्गुणैः ॥ ६९ ॥
येषां स्वप्नेपि पाण्डित्यं नाभूज्जातुचिदन्वये ।
तेपि भूपप्रसादेन जाताः पाण्डित्यमण्डिताः ॥ ७० ॥

वर्धिता जीवनोपायैर्दैवेन फलदाः सदा।
याताः सहस्रशाखत्वं विद्याः कल्पलता इव ॥ ७१ ॥
न सा विद्या न तच्छिल्पं न तत्काव्यं न सा कला।
श्रीजैनभूपते राज्ये नाभूद्या प्रथिता भुवि ॥ ७२ ॥
विदुषां मान्यतां दृष्ट्वा भूपतेर्गुणिबान्धवात्।
काङ्क्षन्ति स्मापि सामन्ताः पाण्डित्यं नित्यमादरात् ॥७३ ॥
निदाघकाले विषमः प्रतापो
दहेद्धरित्र्यां तृणगुल्मपूगान्।
वन्द्यो न केषां घनकाल एको
यो जीवनैस्तान्वितताञ्करोति ॥ ७४ ॥
सिकंदरधरानाथो यवनैः प्रेरितः पुरा।
पुस्तकान्सकलान्सर्वांस्तृणान्यग्निरिवादहत् ॥ ७५ ॥
तस्मिन्काले बुधाः सर्वे मौसुलोपद्रवाज्जवात्।
गृहीत्वा पुस्तकान्सर्वान्ययुर्दूरं दिगन्तरम् ॥ ७६ ॥
किमन्यद्विजवद्देशे सर्वे ग्रन्था मनोरमाः।
कथावशेषतां याताः पद्मानीव हिमागमे ॥ ७७ ॥
सुमनोवल्लभेनात्र राज्ञा भूषयता क्षितिम्।
नवीकृताः पुनः सर्वे मधुनेव मधुव्रताः ॥ ७८ ॥
पुराणतर्कमीमांसाः पुस्तकानपरानपि।
दूरादानाय्य वित्तेन विद्वद्भ्यः प्रत्यपादयत् ॥ ७९ ॥
मोक्षोपाय इति ख्यातं वासिष्ठं ब्रह्मदर्शनम्।
मन्मुखादशृणोद्राजा श्रीमद्वाल्मीकिभाषितम् ॥ ८० ॥
श्रुत्वा शान्तरसोपेतां व्याख्यां स्वप्नेपि नो नृपः।
अस्मार्षीदभिकाः कान्ता हावभावक्रिया इव ॥ ८१ ॥

यो यद्भाषाप्रवीणोस्ति स तद्भाषोपदेशभाक् ।
लोके न हि जना नानाभाषालिपिविदोखिलाः ॥ ८२ ॥

इति संस्कृतदेशादिपारसीवाग्विशारदैः ।
भाषाविपर्ययात्तत्तच्छास्त्रं सर्वमचीकरत् ॥ ८३ ॥

धातुवादरसग्रन्थकल्पशास्त्रोदितान्गुणान् ।
यवना अपि जानन्ति स्वभाषाक्षरवाचनात् ॥ ८४ ॥

दशावतारपृथ्वीशग्रन्थराजतरङ्गिणीः ।
संस्कृताः पारसीवाचा वाचकार्हास्त्वकारयत् ॥ ८५ ॥

म्लेच्छैर्बृहत्कथासारं हाटकेश्वरसंहिताः ।
पुराणादि च तद्युक्त्या वाच्यते निजभाषया ॥ ८६ ॥

कश्चिच्छ्रुत्वा शुचिरुचि चिरं धर्मशास्त्रं पवित्रं
धत्ते चित्ते पट इव सितो रञ्जनं तत्क्रियां यः ।
आकर्ण्यान्ये प्रतिदिनममुं पद्मिनीपत्रतुल्याः
कुल्याधारा अपि धृतगुणा गृह्णते तन्न किंचित् ॥ ८७ ॥

नौबन्धनगिरेर्यात्रामाकर्ण्यादिपुराणतः ।
तीर्थयात्रोत्सुकं राज्ञः कदाचिदभवन्मनः ॥ ८८ ॥

एकोनचत्वारिंशेब्दे पितृपक्षान्त्यवासरे ।
यात्रा दिदृक्षया भूयो जगाम विजयेश्वरम् ॥ ८९ ॥

नानावर्णांशुकच्छन्नैः प्रेक्षकैः परिपूरितम् ।
पुष्पाकीर्णमिवोद्यानमद्राक्षीद्रङ्गमण्डलम् ॥ ९० ॥

यत्र बान्दरपालाद्या राजानो वीक्ष्य सद्बलाः ।
तद्धर्षे दर्शनायाता हर्षमन्वभवन्निति ॥ ९१ ॥

गगनं तारकापूर्णं दीपाढ्यं रङ्गमण्डपम् ।
यत्रान्योन्यं तुलां चक्रे रात्रौ कविबुधार्चितम् ॥ ९२ ॥

अमावस्यादिने प्राप्तैर्नानानागरिकामुखैः।
शुशुभे शुभदं यत्र शतचन्द्रं भुवस्तलम् ॥ ९३ ॥
दीपवृक्षो नृवाह्योपि यत्र रङ्गान्तरे स्फुरन्।
दध्रे तारकमध्योद्यत्कृत्तिकर्क्षचयोपमाम् ॥ ९४ ॥
विजयेशादथोत्थाय भूपः पुत्रद्वयान्वितः।
पद्भ्यामुल्लङ्घ्य दुर्मार्गं प्रपेदे वासरैस्त्रिभिः ॥ ९५ ॥
दृष्ट्वा क्रमसरोविष्णुपादमुद्राकृतिं प्रभुः।
पादप्रणामजानन्दमविन्दद्भक्तिसुन्दरः ॥ ९६ ॥
ब्रह्माच्युतेशगिरयः पतत्तोयरवच्छलात्।
अकुर्वन्कुशलप्रश्नं हरांशजमहीभुजे ॥ ९७ ॥
कस्तूरीकुसुमश्यामां कोष्ठागारावनिं गिरेः।
दृष्ट्वा तुष्टो नृपश्रेष्ठो योगीवेष्टां हरेस्तनुम् ॥ ९८ ॥
अथ नौकां समारुह्य धीवरैः पञ्चषैर्वृताम्।
धृत्वा मां सिंहभट्टं च चचार सरसोन्तरे ॥ ९९ ॥
गीतगोविन्दगीतानि मत्तः श्रुतवतः प्रभोः।
गोविन्दभक्तिसंसिक्तो रसः कोप्युदभूत्तदा ॥ १०० ॥
कुञ्जप्रतिश्रुतो मञ्जुर्गीतनादस्तदावयोः।
अनुगीत इवात्रस्थैः किंनरै राजगौरवात् ॥ १०१ ॥
क्षणं सरोन्तश्चरतो हिमवृष्टिनिभाद्भिभोः।
भक्तिप्रीतैरिवोन्मुक्तं देवैः कुसुमवर्षणम् ॥ १०२ ॥
दृष्ट्वा सरोन्तरे श्वेता हिमान्यो भ्रमणाकुलाः।
तीर्थस्नानाप्तकैलासशृङ्गभङ्गिभ्रमं व्यधुः ॥ १०३ ॥
सत्यं विष्ण्ववतारः स येन भक्त्या प्रदक्षिणम्।
त्रीन्वारानकरोन्नूनं ज्ञातुं स्वक्रमविक्रमम् ॥ १०४ ॥

योभूदागमसिद्धार्थो नौबन्धनगिरिस्तदा ।
प्रत्यक्षार्थः कृतो राज्ञा बद्ध्वा नौकां यदागतः ॥ १०५ ॥
सकुमारसरो यावत्सुकुमारः स्मरन्पथि ।
स कुमारोम्बुपानेन सुखं पुण्यमिवासदत् ॥ १०६ ॥
शृण्वन्स्थानाभिधाः पुण्याः स्पृशंस्तीर्थजलं शुभम् ।
पिबन्सतुहिनं तोयं पश्यन्वनतरुश्रियम् ॥ १०७ ॥
जिघ्रन्नौषधिपुष्पाणि पञ्चेन्द्रियसुखप्रदाम् ।
तीर्थयात्रां विधायेत्थं नगरं प्राप भूपतिः ॥ १०८ ॥
इति राजतरङ्गिण्यां क्रमसरोयात्रावर्णनं नाम पञ्चमः सर्गः ।

षष्ठः सर्गः ।

ततः क्रमसरस्तुल्यं राजा पद्मपुरान्तरे ।
तत्कौतुकापनोदाय चक्रे जैनसरो नवम् ॥ १ ॥
फुल्लत्कुङ्कुमपुष्पौघश्यामीभूतस्थलच्छलात् ।
शरदीवागता प्रीत्या यमुना यत्सरोवरम् ॥ २ ॥
कुलोद्धरणनागाख्यमण्डिते यत्तटे नवम् ।
राजद्राजगृहं राजा राजराजोपमो व्यधात् ॥ ३ ॥
उच्चैः पदस्थममलं रुचिरञ्चिताशं
संपूर्णमण्डलमखण्डकलाकलापम् ।
राजानमीशमवलोक्य हतोपतापं
काङ्क्षन्ति के न नितरामपि दूरसंस्थाः ॥ ४ ॥
दिगन्तरीया भूपालाः श्रुत्वैतद्गुणगौरवम् ।
नानोपायनवर्षौघैर्ववर्षुर्नितराममुम् ॥ ५ ॥
वेगेन जितवायुं स्वं ताजिकाख्यं तुरंगमम् ।
उपदां व्यसृजत्सख्यादुच्चैः पञ्चनदप्रभुः ॥ ६ ॥

किंनरोश्वमुखः ख्यातः कण्ठान्नृत्यं न वेत्त्यसौ ।
इतीव नाट्यं यो दर्पाद्धरारूढोकरोत्पथि ॥ ७ ॥
प्रवालहस्तः सद्रश्मिः सुखलीनः सुलक्षणः ।
यथासावहमित्थं यो नासहिष्टास्य ताडनम् ॥ ८ ॥
पादैश्चतुर्भिः शुभ्रो यो मुखमध्येन चावहत् ।
कल्याणपञ्चकख्यातिं कल्याणाभरणोज्ज्वलः ॥ ९ ॥
माण्डव्यगौडभूमीशः खलुच्यो यो महीपतिः ।
अतूतुषन्दरन्दामनामवस्त्रैरुपाहितैः ॥ १० ॥
इतो ह्यस्मै नृपो भव्यं काव्यं कृत्वा स्वभाषया ।
प्राहिणोद्द्रव्यसंयुक्तं सव्यसाच्यग्रजोपमः ॥ ११ ॥
सोप्यनर्घैः पदार्थैर्न तथा तुष्टो महीपतेः ।
सालंकारैर्यथा भूपकाव्यस्यातिमनोहरैः ॥ १२ ॥
वस्त्रं नारीकुञ्जराख्यं कुम्भराजो विसर्जयन् ।
अहरद्धृदि तच्छेषनारीकुञ्जरकौतुकम् ॥ १३ ॥
राजा डुगरसेहाख्यो गोपालपुरवल्लभः ।
गीततालकलावाद्यनाट्यलक्षणलक्षितम् ॥ १४ ॥
संगीतचूडामण्याख्यं श्रीसंगीतशिरोमणिम् ।
राज्ञे गीतविनोदार्थं गीतग्रन्थं व्यसर्जयत् ॥ १५ ॥
तस्मिन्राज्ञि दिवं याते कीर्तिसिन्धौ महीपतिः ।
तत्पुत्रः पितृवत्प्रीतिमरक्षत्प्रहितोपदः ॥ १६ ॥
मण्डलीकाधिपो राजा सुराष्ट्रनगराधिपः ।
प्राहिणोन्नृपतेः प्रीत्या ललामकमनीयकम् ॥ १७ ॥
चित्रवर्णोल्लसत्पक्षलक्ष्यशोभान्महीपतेः ।
पक्षिणो मुचुकुन्दाख्यान्प्राहिणोदक्षिसुन्दरान् ॥ १८ ॥

जिघांसया चरन्सोपि भूपतेः प्राक्तनैर्गुणैः ।
बद्धो हिंस्रोपि डिल्लेशो वल्लूको रल्लकोपमः ॥ १९ ॥
कचिच्छ्रीराजहंसस्य राजहंसयुगं ददौ ।
अन्ये हंसा यदुत्पन्ना राजहंसमरञ्जयन् ॥ २० ॥
सरःस्वन्तर्भ्रमन्तस्ते निर्दाराः पङ्क्तिपावनाः ।
तरङ्गतरलोत्फुल्लश्वेतोत्पलतुलां दधुः ॥ २१ ॥
खुरासानमहीपस्य यस्यैवाज्ञा हयप्रभोः ।
मूर्ध्ना मन्दारमालेव ध्रियते दिगधीश्वरैः ॥ २२ ॥
यस्यायुधोर्जितकराः किंकराः सुभयंकराः ।
यमस्य चार्पितकरा व्यचरन्धरणीतले ॥ २३ ॥
उत्तराशाधिपो मिर्जाभोसैदः स महीभुजे ।
उच्चाश्ववेसरीयुक्तं व्यसृजत्सोपधिं चरम् ॥ २४ ॥
कतेफसोफसग्लातख्यातवस्त्राद्युपायनैः ।
महम्मदसुरत्राणो गुर्जरीशोप्यतूतुषत् ॥ २५ ॥
गिलानमिस्त्रमक्कादिदेशाधीशा हितेच्छया ।
दुर्लभोपायनैस्तैस्तैर्न के भूपमरञ्जयन् ॥ २६ ॥
अनल्पाः शिल्पिनः कल्पवृक्षकल्पममुं न के ।
भृङ्गा इवाययुर्दूराच्छिल्पकल्पितकल्पनाः ॥ २७ ॥
काश्मीरिका अथाभ्यस्य तुरीवेमादिचातुरीम् ।
कौशेयकं वयन्त्यद्य बहुमूल्यं मनोहरम् ॥ २८ ॥
और्णाः सोफादयो वस्त्रविशेषा दूरदेशजाः ।
काश्मीरिकाश्च भान्त्यद्य समर्थास्ते नृपोचिताः ॥ २९ ॥
विचित्रवयनोत्पन्ननानाचित्रलताकृतीः ।
दृष्ट्वा चित्रकरा येषु जाताश्चित्रार्पिता इव ॥ ३० ॥

अनन्ततन्तुसंतानवर्णविच्छित्तिसुन्दरः।
बभौ कौशेयकाख्यातो देशो वेशश्च भूपतेः ॥ ३१ ॥
नानावर्णविशेषचित्रकटकालंकारसारोचितो
विद्यामानवराजितोतिसुखदः कौशेयताख्यातिमान्।
श्रीमान्नित्यमहोज्ज्वलोतुलगुणः सत्तन्त्रसंपत्तिभृ-
द्राज्ञा तेन विशेषितो निजधिया वेशोपि देशोपि वा ॥३२॥
इति जैनराजतरङ्गिण्यां चित्रोपचयशिल्पवर्णनं नाम षष्ठः सर्गः।

सप्तमः सर्गः

दाता भवेत्क्षितिपतिर्यदि सादरोयं
लोकोपि दर्शयति तत्स्वकलाकलापम्।
वर्षासु वर्षति घनो यदि चातकोपि
नृत्यन्मुदा भवति तज्जनरञ्जनाय ॥ १ ॥
अथोत्तरपथाद्दानख्यातकीर्तेर्महीभुजः।
रज्जुभ्रमणशिल्पज्ञः कोप्यागाद्यवनोन्तिकम् ॥ २ ॥
विंशप्रस्थाभिधे स्थाने कदाचिद्यवनोत्सवे।
तं द्रष्टुमगमद्राजा परिवारविभूषितः ॥ ३ ॥
धनुर्दण्डशतायामान्तरस्थान्दीर्घरज्जुभिः।
उच्चान्स्तम्भानबध्नात्स स्वशिल्पप्रथनोद्यतः ॥ ४ ॥
अभवन्कलुषास्ते ये नागा रज्जुपुरादिषु।
भाविस्वभक्तभूपालदेहानिष्टेक्षणादिव ॥ ५ ॥
अथो भूभागलग्नैकरज्जुमार्गेण निर्भयः।
आरोहमकरोत्तत्र पतत्रीव नभोन्तरे ॥ ६ ॥
निपातास्खलितां तत्र लोकचित्तानुरञ्जिकाम्।
कवितामिव शिल्पेज्याचित्रां पदगतिं व्यधात् ॥ ७ ॥

अनीचवर्तिनस्तस्य ग्रहस्येव फलप्रदा ।
सुरश्मिराशिगस्यालं बभूवाश्चर्यभूर्नृणाम् ॥ ८ ॥
कृत्वा सुखं सुरुचिरं सुचिरं विधाता
दुःखं पुनर्जनपदे जनयत्यसह्यम् ।
वर्षं प्रदर्श्य जलदः कृषिकर्षहेतुं
नेतुं फलं वितनुते करकाविकारम् ॥ ९ ॥
सौराज्यसुखिते देशे नरेशे निरुपद्रवे ।
अकस्माद्दुःसहाज्ञातानुत्पातान्ददृशुर्जनाः ॥ १० ॥
इत्यातङ्कागमे सेतुर्हेतुः सर्वजनक्षये ।
अथोत्तरदिशा रात्रौ धूमकेतुरदृश्यत ॥ ११ ॥
दीर्घपुच्छोच्छलत्कान्तितत्केतुकपटाद्ध्रुवम् ।
कालेन द्रुघणं क्षिप्तं क्षयायेव महीक्षिताम् ॥ १२ ॥
मासद्वयं स्फुरन्नासीत्स व्योम्नि विमले सदा ।
सदये हृदये राज्ञश्चिन्तौघोनिष्टशङ्कया ॥ १३ ॥
अदृश्यन्त सदा श्वानो विक्रोशन्तः पुरान्तरे ।
शुचेव रुदिताक्रन्दा भाविविघ्नेक्षणादिव ॥ १४ ॥
एकपक्षेभवच्चन्द्रसूर्यग्रहणसंस्थितिः ।
एकपक्षमिवादातुं राज्यं राजविपर्ययात् ॥ १५ ॥
सूर्यसंक्रान्तयः क्रूरदिनेष्वाप्तास्तदा विशाम् ।
भाविक्रूरफलोत्पादसादचिन्तनभीतिदाः ॥ १६ ॥
मन्निर्माता क्षयंयास्यत्ययं किमिति दुःखिता ।
राजधान्यरुदच्छत्रतलोलूकध्वनिच्छलात् ॥ १७ ॥
दृष्टोम्बरे द्वितीयस्यां सुधांशुस्तत्र तैर्जनैः ।
उत्तान इव भूपेशमन्यं सूचयितुं विशाम् ॥ १८ ॥

अत्रान्तरे महाघोरमनावृष्टिकृतं भयम्।
उदभूदन्यदेशेषु दुर्भिक्षोपद्रवासहम् ॥ १९ ॥
भिक्षुकानन्यदेशीयान्प्रेतरूपानिवागतान्।
दृष्ट्वापृच्छन्नृपस्ते च वार्तां तस्याब्रुवन्निति ॥ २० ॥
राजन्देशेष्वनेकेषु वृष्ट्यभावात्समन्ततः।
सर्वान्तकृत्काल इव दुष्कालः समुपस्थितः ॥ २१ ॥
दुर्भिक्षेण प्रभवता मणीनां सा महार्घता।
नीता नीचेन साधूनामिव सर्वोपयोगिनाम् ॥ २२ ॥
भुञ्जते श्वादयोन्योन्यं पिशितं क्षुदुपद्रुताः।
तत्तच्छून्यगृहान्तःस्थनिःशेषितशवव्रजाः ॥ २३ ॥
स्पृष्टोच्छिष्टतया दृष्टप्रायश्चित्तादिनिष्ठिताः।
क्षुधा द्विजवरा देव प्रयाताः सर्वभक्ष्यताम् ॥ २४ ॥
क्वापि विप्रस्त्रियस्तत्तदभक्ष्यान्वीक्षणक्षमाः।
पक्वान्नं सविषं भुक्त्वा स्वमन्यांश्च व्यसून्व्यधुः ॥ २५ ॥
अवृष्ट्या वसतिं त्यक्त्वा गते क्वापि मृते जने।
शून्या के न पुरग्रामा दृष्टा राजन्पदे पदे ॥ २६ ॥
प्रीतिं स्नेहं च दाक्षिण्यं पत्न्यां पुत्रे पितर्यपि।
कुक्षिभरिः क्षुदुत्तप्तो विस्मरत्यवनौ जनः ॥ २७ ॥
खुरासानावनीशक्रं विक्रान्त्या शत्रुभूमिगम्।
अन्नाभावाद्भवन्मित्रमभिषेणेन निर्गतम् ॥ २८ ॥
मिर्जाभोसैदनामानं सुरत्राणं रणान्तरात्।
इराकभूपतिर्बद्ध्वावधीत्कोटिबलान्वितम् ॥ २९ ॥
तस्य दुर्योधनस्येव बद्धस्य हरणक्षणे।
अभूत्संख्यान्तरेसंख्यतुरुष्कनृपतिक्षयः ॥ ३० ॥

देशेषूद्भूतदुष्कालबलाबलविपर्ययात् ।
अन्योन्यनृपयुद्धेन विघ्नो देव पदे पदे ॥ ३१ ॥
सुखप्रदं भवद्देशं श्रुत्वान्नादिसमृद्धिभिः ।
आगतांस्तत्क्षमापाल रक्षास्मान्विक्षतान्क्षुधा ॥ ३२ ॥
श्रुत्वेतिवार्तामार्तौ तां जानन्निव निजां प्रजाम् ।
द्रव्यकोटिं ददौ राजा तदर्थे करुणाकुलः ॥ ३३ ॥
अत्रान्तरे स्वयं सिद्धकृतं स्वयपरं महत् ।
समस्तं वह्निना दग्धं शून्यारण्यमिवाभवत् ॥ ३४ ॥
क्रमराज्यस्फुरत्प्राज्यराज्यतन्त्रक्रियाङ्कितम् ।
भूर्जभाण्डादि तत्रस्थं समस्तं भस्मसादभूत् ॥ ३५ ॥
ग्राह्यो जैनगिरिक्षेत्रे सप्तमांशोत्र भाविभिः ।
इति ताम्रमये पट्टे कल्पं यस्यां व्यधान्नृपः ॥ ३६ ॥
श्रीमाञ्जैनोल्लावदेवो नरेशो
याचे भूपान्भाविनो जैनगिर्याम् ।
कृष्टोत्पाट्य स्वैर्धनैर्भूर्मयात्र
तस्या ग्राह्यः सप्तमांशो भवद्भिः ॥ ३७ ॥
जलावतरणं कृत्वा गिरीनुल्लङ्घ्य मत्कृतः ।
पुण्यकेतुरयं सेतुर्वर्धनीयः शुभेच्छया ॥ ३८ ॥
इत्थं ताम्रमये पट्टे श्रीवकाशीशनिर्मिता ।
प्रशस्तिरासीत्तां राजधानीवह्नी ररक्ष च ॥ ३९ ॥
प्रदीप्तः सुकृतोत्कर्ष इवास्यैव महीपतेः ।
अरक्षद्राजधानीं तां मध्यस्थामपि पावकः ॥ ४० ॥
श्रुत्वा दग्धं पुरं राजा शुचा दग्धो विदग्धधीः ।
अचीकरन्नवं तूर्णं चारु दारुमयैर्गृहैः ॥ ४१ ॥

राजा वराहमूलीयां राजधानीं पुरा कृताम्।
आनीय विदधे तत्र राजावासं नवं महत्॥ ४२॥

तन्त्रायकनृपागारं सेतुमत्तोम्भितं नवम्।
क्रमराज्यश्रियो हारं सारं सुय्यपुरं व्यधात्॥ ४३॥

सेतुमत्तोम्भिते तत्र गृहश्रेणिमणिव्रजे।
राजधानी स्फुरच्छत्रा धत्ते मध्यमणिश्रियम्॥ ४४॥

मानुष्यकं नववसन्तमिवाप्य हृद्यं
लोका लता इव वसन्ति नवे वनेस्मिन्।
तद्बान्धवा रुचिकरा इव पुष्पपूगाः
स्थित्वा दिनानि कतिचिच्चतुरं प्रयान्ति॥ ४५॥

विहगेष्विव जातपक्षपूगः
पुरुषेषु प्रभवेत्कुटुम्बवर्गः।
सुखगत्युचितोपि तत्प्रतिष्ठो
न चिरं तिष्ठति कायकष्टदायी॥ ४६॥

अत्रान्तरे दिवं याता सा बोधाखातोनाभिधा।
श्रीमत्सैदान्वयोदन्वच्चन्द्रिका नृपतिप्रिया॥ ४७॥

यत्संयोगसुखं प्राप्य सोज्ञासीत्सफलं वयः।
तद्वियोगाद्विदग्धाङ्गः सर्वं शून्यमिवाविदत्॥ ४८॥

न्यस्तो राजेन्दुना सिन्धुदेशे यो गुणसुन्दरः।
स्वत्राणेन सुरत्राणपदे प्राणाधिकप्रियः॥ ४९॥

श्रीक्यामदेनं सिन्ध्वीशं भागिनेयं सुतोपमम्।
एबराहिमनाम्ना तं हतं युद्धेश्रृणोन्नृपः॥ ५०॥

परमाश्वासनोपायः सुखे दुःखे च योभवत्।
तदा तन्मरणं राजा भुजच्छेदमिवाविदत्॥ ५१॥

दर्यावखानादिमृतौ याभून्मन्त्रिसभा नवा ।
लीलामित्रैः समं सर्वा सा ययौ स्मरणीयताम् ॥ ५२॥
लसन्मदो विभुशप्तकार्योत्पादितसौहृदः ।
तत्कालं प्रमयं यातो दाता मीरखुशाह्वदः ॥ ५३ ॥
दुर्वार्तामन्वहं शृण्वन्नार्तो जानन्निजां प्रजाम् ।
स्वसुतान्योन्यवीरेण चिन्तातप्तो नृपोभवत् ॥ ५४ ॥
अतीतान्बान्धवान्भृत्यान्सखीन्प्राणसमान्स्मरन् ।
स्वात्मानमविदद्राजा यूथभ्रष्टमिव द्विपम् ॥ ५५ ॥
अत्रान्तरे राजसूनोर्हाजीखानस्य रक्तजम् ।
अस्वास्थ्यमुदभून्नित्यं मद्यपानातिसेवनात् ॥ ५६ ॥
शौर्यौदार्यनिधेः सूनोरतिप्रियतया तया ।
राज्यसौख्यलता राजद्दुद्याने फलाचिता ॥ ५७ ॥
तदाभूनीरसप्राया तदस्वास्थ्यदवाग्निना ।
अथानीयान्तिकं दृष्ट्वा सविकारं भृशं कृशम् ॥ ५८ ॥
स्नेहादित्यब्रवीद्राजा पुत्रं मन्त्रिसभान्तरे ।
अहो पुत्रफलं लब्धं दोषासक्तेन पानजम् ॥ ५९ ॥
येनेदृशी दशा प्राप्ता चन्द्रेणेव क्षयावहा ।
स्वार्थापेक्षी हितः कोपि भृत्यस्ते नास्ति रक्षकः ॥ ६० ॥
पानव्यसनसंसक्तं यस्त्वामुपदिशत्यलम् ।
कियन्तो बत नो भोगाश्चमत्कारकरास्तव ॥ ६१ ॥
किमेकेन भवान्ग्रस्तो विषयेण पतङ्गवत् ।
अस्मिञ्जन्मनि सामग्री येयं प्राप्तान्यदुर्लभा ॥ ६२ ॥
प्राप्ता नैवेदृशी भूयो यदि दुर्व्यसनो भवान् ।
किं चिरंतनवृत्तान्तैर्वृष्ट्यादीनां समीरितैः ॥ ६३ ॥

मद्येनातनुभूपाला दृष्टनष्टा विचार्यताम् ।
तथा हि सबलारातिगणतूलसमीरणः ॥ ६४ ॥
मल्लेकजस्त्रथो योभून्मद्राज्याप्तिनिधानभूः ।
तेनापि दृष्टं दुष्टं प्राङ्नात्याक्षीत्तत्स्ववञ्चकः ॥ ६५ ॥
तस्य पुत्रोभवच्छाहिमसोदः प्रमये पितुः ।
सर्वं हारितवान्क्षीवः कुर्वन्नुन्मत्तचेष्टितम् ॥ ६६ ॥
सप्तप्रकृतिधात्वाढ्यं तन्मल्लेकपुरं महत् ।
कुपुत्रव्यसनाद्यातं देहवत्स्मरणीयताम् ॥ ६७ ॥
मद्यं यल्लोहितं वर्णं विभर्त्ति चषकान्तरे ।
जाने पापप्रवृत्तानां हृद्रक्तेनैव जायते ॥ ६८ ॥
न मद्येनामुना तुल्यः शत्रुरस्ति हि देहिनाम् ।
सेवितो हितकृच्छत्रुर्मद्यं हन्त्यतिसेवितम् ॥ ६९ ॥
मैरेयमदमत्ता यां कुर्वन्त्यनुचितां क्रियाम् ।
उन्मत्तोपि न तां कुर्याद्यत्स तस्मात्पलायते ॥ ७० ॥
मद्यरूपेण वेतालः प्रविश्य हृदयं क्षणात् ।
न केषां हरते प्राणान्सहासरुदितक्रियम् ॥ ७१ ॥
विषेण वामुना पुत्र पीतेनाप्तेदृशी दशा ।
पाहि स्वं त्यज सावद्यं मद्यमद्यप्रभृत्यतः ॥ ७२ ॥
न चेत्यजसि मूढस्त्वं व्यसनार्पितमानसः ।
अचिराद्भ्रश्चितो लक्ष्म्या प्रक्षीणायुर्भविष्यति ॥ ७३ ॥
श्रुत्वेति राजपुत्रः स स्वपितुः संमता गिरः ।
त्वदाज्ञां न विना मद्यं पिबामीत्युत्तरं व्यधात् ॥ ७४ ॥
दीप्त्युज्झितं क्षीणदशं मन्दमस्नेहभाजनम् ।
सुतं दीपमिवेक्ष्याभूद्भूपो मोहतमोहतः ॥ ७५ ॥

उपदेशगिरः प्रियाः श्रुतौ गतभाग्येषु भवन्ति जन्तुषु ।
विपदभ्युदये पुनः स्मृता न मयाश्रावि किमित्यरुन्तुदाः ॥७६॥

अथ स्वावसथं गत्वा सोपिबद्यन्त्रितोपि सन् ।
विषवद्व्यसनान्धानामुपदेशो निरर्थकः ॥ ७७ ॥

तावता स्नेहमाशङ्क्य राजपुत्रेति मन्त्रिणः ।
आदमखानमानिन्युर्गूढलेखैर्दिगन्तरात् ॥ ७८ ॥

अनुजागमनत्रासाद्यथा यातोग्रजः पुरा ।
तथाग्रजागमत्रासादनुजो याति देशतः ॥ ७९ ॥

एतत्कलहनिश्चिन्तः प्राग्वत्स्यां निजमण्डले ।
इति बुद्ध्या प्रवेशेस्य कृतोपेक्षो नृपोभवत् ॥ ८० ॥

हाजीखानात्मजः श्रुत्वा तं पितृव्यं समागतम् ।
युयुत्सुः प्राप पर्णोत्सं त्यक्त्वा राजपुरीं ततः ॥ ८१ ॥

आन्द्रोटकोटमासाद्य भ्रातृपुत्रपितृव्ययोः ।
काश्मीरागमनद्वेषादभवद्युद्धमुद्धतम् ॥ ८२ ॥

दृष्टं हसनखानस्य क्षमित्वं बलशालिनः ।
विना पैतामहीमाज्ञां नागाद्देशोत्सुकोपि सन् ॥ ८३ ॥

अग्रजेभ्यन्तरं प्राप्ते द्वारस्थे लक्षिते पितुः ।
हाजीखानोनुजयुतो युक्त्या साम प्रयुक्तवान् ॥ ८४ ॥

दिव्यं मौसुलदेवेन ते कृत्वापि परस्परम् ।
नात्यजन्हृदयाद्वैरं काष्ण्यमौर्णा इवांशुकाः ॥ ८५ ॥

अहो गुहायामेकस्यां प्राप्ता सिंहचतुष्टयी ।
एतदन्योन्यवैरोत्थो नाशोयं समुपस्थितः ॥ ८६ ॥

राज्ञो देशस्य खानानां परिवारस्य मण्डले ।
सर्वांस्तान्मिलितान्दृष्ट्वा प्रोवाच सकलो जनः ॥ ८७ ॥

अत्रान्तरे द्वयोर्द्विष्टं कनिष्ठं श्रेष्ठमात्मजम्।
विचार्यानीय वह्रामखानं स विजनेब्रवीत् ॥ ८८ ॥
वह्राम ज्येष्ठो भ्रातायं द्विष्टो दुश्चेष्टितैः कृतः।
स्मृतपूर्वापकारोयं हितो जातु न ते भवेत् ॥ ८९ ॥
अन्यं यं सेवसे भक्त्या दुराशाग्रस्तमानसः।
स कथं स्वं सुतं त्यक्त्वा कार्ये त्वां समपेक्षते ॥ ९० ॥
तस्मात्त्वं पैशुनाचारं मा कृथा भाविदुःखदम्।
मदेकशरणो भूत्वा कालं नय ततोचिरात् ॥ ९१ ॥
प्राप्स्यन्ति संपदः सर्वा न्यायमार्गस्थितस्य ते।
अन्यथा तैलतप्तायःकटाहफरणीनिभः ॥ ९२ ॥
तद्वैरानलमध्यस्थो मुग्ध दग्धो भविष्यसि।
श्रुत्वेति स पितुर्वाक्यं मुग्धधीरब्रवीदिदम् ॥ ९३ ॥
देव मे पितृवत्स्नेहं हाजीखानः करोत्यलम्।
सेव्यः स एव मे भाति तं त्यजे नैव जातुचित् ॥ ९४ ॥
रक्षिष्यति स मां काले कोन्योस्मादधुना बली।
श्रुत्वेति भूपः प्रोवाच क्रुद्धस्तं कृतनिश्चयम् ॥ ९५ ॥
हा धिग्त्वां मां परित्यज्य पितान्योङ्गीकृतस्त्वया।
दृष्टिर्या विहिता मूढ प्रोल्लङ्घ्य वचनं मम ॥ ९६ ॥
तस्या नाशोचिरेणैव भविष्यति न संशयः।
इत्युक्त्वा परिमुच्यामुं स्वान्तरेवमचिन्तयत् ॥ ९७ ॥
अहो प्रदीप्तान्मत्तोमी जाता विसदृशाः सुताः।
त्रयोमी दहनागारादिव हा भस्ममुष्टयः ॥ ९८ ॥
अयोग्या दीप्तिरहिताः काष्ठाः कृष्टावनिष्ठिताः।
कदाचिद्विजने राजा सुतानिष्टाविशङ्कितः ॥ ९९ ॥

अधुना करणीयं किं मयेति व्यक्तमब्रवीत् ।
तत्समक्षं बुधा येपि तत्प्रसङ्गाद्बभाषिरे ॥ १०० ॥

राजन्नुत्साद्यते देशो राज्यलुब्धैः सुतैस्तव ।
एकस्यैव निजं राज्यं किं नार्पयसि यो हितः ॥ १०१ ॥

व्याकुलत्वं विशां येन तव न स्याच्च भूपते ।
तत्रापि माणिक्यदेवः श्रुत्वामुं प्रबलं श्रिया ॥ १०२ ॥

वैरी स्याद्येन देशस्य सर्वनाशोचिराद्भवेत् ।
इति श्रुत्वाब्रवीत्पुत्रस्वभावेक्षणदक्षधीः ॥ १०३ ॥

ज्येष्ठः श्रेष्ठोस्ति किं त्वस्य कार्पण्यं येन सेवकाः ।
न सन्ति तादृशा येषां राज्यं दार्ढ्यमवाप्नुयात् ॥ १०४ ॥

मध्यमोतीव दातास्य प्रद्युम्नाचलसंनिभम् ।
द्युम्नं चेत्स्याद्व्ययान्नास्य कर्षमात्रोवशिष्यते ॥ १०५ ॥

कनिष्ठो दुष्टधीः पापनिष्ठोस्मादचिरात्सभा ।
नष्टा स्यात्तत्सुतं श्रेष्ठं जाने कमपि नोचितम् ॥ १०६ ॥

मया तावत्स्वयं राज्यं कस्मा अपि न दीयते ।
गते मयि बलं यस्य स प्राप्नोत्विति मे मतम् ॥ १०७ ॥

बहवो न मरिष्यन्ति यदि तन्मम को गुणान् ।
ज्ञासिष्यति यतः स्थित्या द्वयोर्भेदो हि लभ्यते ॥ १०८ ॥

ध्वान्तं पतेद्यदि न दिक्षु जनस्य दृष्टि-
र्नश्येन्न चेद्यदि मुषन्ति न तस्कराद्याः ।
संकोचमेति गुणवान्यदिनाम नासौ
जानाति नो दिनमणिं परलोकयातम् ॥ १०९ ॥

स्ववीर्येणार्जितं राज्यं योजितं स्वधिया मया ।
कुपुत्रैर्नाशितं सर्वं परस्परविरोधिभिः ॥ ११० ॥

सप्ताङ्गं धातुसंबद्धं राज्यं देहमिवोर्जितम्।
दोषैरिवैतैः पुत्रैर्मे त्रिभिः संदूषितं नु यत् ॥ १११ ॥
तत्स्वास्थ्यमासादयितुं शक्ताः पथ्यचिकित्सया।
मन्मन्त्रिणोगदंकारा न सन्त्यद्यतने क्षणे ॥ ११२ ॥
भुक्ता भोगाश्चिरं शास्त्रगीतकाव्यविनोदनैः।
वयः सफलतां नीतं कार्यं किमपि नास्ति मे ॥ ११३ ॥
देशस्य यावत्युत्पत्तिर्नवा तत्त्रिगुणा मया।
संपादिता प्रजास्नेहात्कुल्याकर्षणयुक्तिभिः ॥ ११४ ॥
सर्वदर्शनरक्षायै पात्राण्यालोच्य सर्वतः।
प्रतिपद्य शुभे काले भूर्नवा धर्मसात्कृता ॥ ११५ ॥
सच्छिद्रमधुना राज्यं वदने रदनोपमम्।
तुदति प्रत्यहं तस्मात्तत्त्यागेन सुखं मम ॥ ११६ ॥
चौराणामिव दीपोहं येषामक्षिगतोस्म्यहम्।
अचिरान्मद्रुणस्थित्या ते स्युरनुशयार्दिताः ॥ ११७ ॥
स्थास्यन्ति न चिरं तेपि मद्विष्टा ये सुतादयः।
सकलाः प्रलयं यान्ति भुक्त्वा धान्यफलं न किम् ॥ ११८ ॥
युक्त्या निर्याणमेवास्य जीवस्येच्छामि साम्प्रतम्।
येन सर्वे भविष्यन्ति पुत्राः पूर्णमनोरथाः ॥ ११९ ॥
श्रुत्वेत्युक्तिं सदुःखस्य नृपतेस्तेब्रुवन्पुनः।
देवेदं चेन्मतं तर्हि कोशोयं रक्ष्यते महान् ॥ १२० ॥
परलोकस्य पाथेयं कुरु जीवन्स्वयं व्ययम्।
तदाकर्ण्याब्रवीद्राजा युक्तमुक्तमिदं वचः ॥ १२१ ॥
किं तु शृण्वन्तु मे हेतुं यत्कोशोयं धृतो भृतः।
मयि प्रमीते मद्राज्यं मत्पुत्रः कोपि चेल्लभेत्।
मत्संचयेन तृप्तः स प्रजायाः स्वं त्यजिष्यति ॥ १२२ ॥

पुत्राधिका प्रजेयं मे रक्षणीया विभाति या ।
तस्याः पीडां भविष्यन्तीं हरिष्ये संचयादतः ॥ १२३ ॥

पूर्णो विलासान्कुरुतेप्रजेशो
रिक्तः प्रजापीडनमातनोति ।
तृप्तो मृगेन्द्रो रमते गुहान्त-
र्भुङ्क्ते क्षुधार्तो वनजन्तुवर्गम् ॥ १२४ ॥

मत्संचयोपकारेण भाविभिः पीडनोज्झितैः ।
आयतिज्ञं वदद्भिर्मां करिष्यन्ते न गर्हणाः ॥ १२५ ॥

पूर्णाद्राजगृहादन्ये पूर्णाः स्युरुपकारकाः ।
नयन्त्यब्धेर्न चेत्तोयं भूमौ वर्षन्ति किं घनाः ॥ १२६ ॥

इयं या सामग्री भवति नृपतेः सर्वरुचिरा
धनेनैकेनैव प्रभवति चिरं सा प्रभवता ।
फलं पत्रं पुष्पं समुदयति यद्यद्विटपिनो
धरण्यन्तर्भूतो जनयति तदेको रसगुणः ॥ १२७ ॥

सुदीर्घदर्शिनो वाक्यं श्रुत्वेति पृथिवीपतेः ।
आसंस्तच्चोद्यकर्तारस्तदग्रे ते निरुत्तराः ॥ १२८ ॥

राजवेश्मनि पयोनिधौ च या
वाहिनीभृति पदार्थपूर्णता ।
जीवनाप्तजनयाचकाचिता
सैव तस्य सुषमा समाहिता ॥ १२९ ॥

यद्यदुक्तं नरेन्द्रेण स्मृत्वा तत्तत्फलेक्षणात् ।
न कः शंसति शोकार्तस्तदीयां दीर्घदर्शिताम् ॥ १३० ॥

सचिवाः सेवकाः पुत्रमित्रसंबन्धिबान्धवाः ।
दुःखापनोदं कुर्वाणाः केपि नासन्महीभुजे ॥ १३१ ॥

राजा गर्भगृहान्तस्थः शृण्वन्पुत्रस्थितिं मिथः।
कृतकप्रेमवैराढ्यां न बहिर्निरयाद्भिया ॥ १३२ ॥

संसारदुःखशान्त्यर्थं मत्तो व्याख्यानवेदिनः।
अशृणोद्वरणरात्रं स श्रीमोक्षोपायसंहिताम् ॥ १३३ ॥

स्वकण्ठस्वरभङ्गचाहं तद्वृत्तपरिवर्तनैः।
व्याख्यामकरवं येन निःशोकोभूत्क्षणं नृपः ॥ १३४ ॥

भ्रमस्य जाग्रतस्तस्य जातस्याकाशवर्णवत्।
अपुनः स्मरणं साधोर्मन्ये विस्मरणं वरम् ॥ १३५ ॥

दीर्घस्वप्नोपमं विद्धि दीर्घं वा प्रियदर्शनम्।
दीर्घं वापि मनोराज्यं संसारं रघुनन्दन ॥ १३६ ॥

यदि जन्म जरा मरणं न भवे-
द्यदि वेष्टवियोगभयं न भवेत्।
यदि सर्वमनित्यमिदं न भवे-
दिह जन्मनि कस्य रतिर्न भवेत् ॥ १३७ ॥

यतो यतो निवर्तेत ततस्ततो विमुच्यते।
निवर्तनाद्धि सर्वतो न वेत्ति सुखमण्वपि ॥ १३८ ॥

मद्व्याख्याश्रवणाभ्यस्तान्स्वावस्थासूचकान्बहून्।
इत्यादिकान्स्वयं श्लोकानपठत्स महीपतिः ॥ १३९ ॥

मोक्षोपाये श्रुते मत्तस्तत्तत्पद्यार्थभावनात्।
अथैकदाब्रवीद्राजा विबुधानन्तिकस्थितान् ॥ १४० ॥

किमर्थं स्वसुतस्नेहं करिष्ये को न तेहितः।
इत्येव वक्ति मे नूनं कर्णोपान्तागतो जनः ॥ १४१ ॥

अस्थिदन्तादिभिर्भङ्क्त्वा मांसं मांसेन भुज्यते।
रक्तवीजमये भोगे भ्रमोयं न व्यपैति मे ॥ १४२ ॥

अहो मयि मृदौ सर्वसुखदे छिद्रकारिणः ।
नाशायामी सुता जाता राङ्कवे क्रिमयो यथा ॥ १४३ ॥
यैः समं स्ववयो नीतं तेवशिष्टा न केचन ।
आजीवनं चलत्येषा तद्वियोगविषव्यथा ॥ १४४ ॥
देहोटजमिदं जीर्णं केशतृणगणावृतम् ।
सच्छिद्रं रोचते नाद्य दुर्दिने मन्मनोमुनेः ॥ १४५ ॥
भुजगैरिव दष्टानि राज्याङ्गानि सुतैर्मम ।
तत्त्यागोपाय एवैको युक्तो मे नान्यथा सुखम् ॥ १४६ ॥
इत्यादि चिन्तयन्राजा पारसीभाषया व्यधात् ।
काव्यं शीकायताख्यं स सर्वगर्हार्थचर्वणम् ॥ १४७ ॥
राज्ञो धात्रेयपुत्राद्याः प्रमेयैरपि सत्कृताः ।
भूपपक्षं परित्यज्य हाजीखानमुपागमन् ॥ १४८ ॥
किमन्यद्यक्तमेवाह्नि ये दुष्टा नृपसंनिधौ ।
अलक्ष्यन्त निशि स्वैरं ते खानाग्रे गतत्रपाः ॥ १४९ ॥
ताटस्थ्येन स्थिते राज्ञि तद्भृत्यानां परस्परम् ।
तत्तदाक्षेपतो देशे कोप्यजृम्भत विप्लवः ॥ १५० ॥
भविष्यन्निव साम्राज्यस्यार्धभागी न कस्तदा ।
तत्पुत्रेष्वनुरक्तोभून्नतु राज्ञि सुखस्थिते ॥ १५१ ॥
इत्थं स्वभृत्यसंचारदुराचारविचारणात् ।
परिवारान्निजात्सर्वान्निर्विण्णोभून्महीपतिः ॥ १५२ ॥
अद्य ये स्वान्तिके दृष्टाः प्रातः खानान्तिके श्रुताः ।
दार्ढ्यं कुत्रापि नो प्रापुः सारसा इव सेवकाः ॥ १५३ ॥
हृद्गतो वर्ण्यते यस्मै तादृगाश्वासभाजनम् ।
तत्कालं सेवको भक्तो दृष्टः कोपि न भूभुजा ॥ १५४ ॥

यन्नोक्तं यच्च नो दृष्टं यच्छ्रुतं वा कदाचन।
निर्यन्त्रणो जनः प्रोचे प्रत्यहं राजमन्दिरे ॥ १५५ ॥
स्वभ्रातृकलहैकाग्रस्तत्तत्पैशुन्यकर्मणा।
बह्वामखानोनर्थानां कर्णो मूलमिवाभवत् ॥ १५६ ॥
स्निग्धोयमित्यवगते यदि काष्ठखण्डे
दत्तप्रदीपपदवीपरिदीपिताशे।
किं स ज्वलन्नपि करोति चिरं प्रकाशं
दोषं न कं वितनुते निजकज्जलौघैः ॥ १५७ ॥
प्राप्तस्त्राणाय राज्ञोसावित्याशा यन्निवेशिता।
अभूदादमखानः स वित्राणोप्यात्मरक्षणे ॥ १५८ ॥
भ्रात्रा समं जिघांसुं मां बह्वामो द्वैधनिष्ठुरः।
अहमेकोबलस्तन्मे गतिः कान्या त्वया विना ॥ १५९ ॥
नास्त्यस्मान्मे स्वजीवाशा तत्स्वात्मा रक्ष्यतां विभो।
त्वयि जीवति राज्यस्थे भयं मम न विद्यते ॥ १६० ॥
कुर्वन्त्यन्ये तदास्कन्दमद्यान्योन्यरणोद्यताः।
इत्यादिवार्तां शृण्वन्स बभूव भयविह्वलः ॥ १६१ ॥
इत्थमादमखानेन कदाचिज्ज्ञापितो नृपः।
ऊचे तं नास्ति मे लाभो राज्ये वा निजजीविते ॥ १६२ ॥
गच्छ कापुरुषाव स्वं विघ्नार्थं किमिहागतः।
इत्थं निर्भर्त्सितः पित्रा कुञ्जदीनपुरीं गतः।
अनुजास्कन्दभीतोभूत्स्वरक्षणकृतक्षणः ॥ १६३ ॥
लुब्धेमुष्मिन्भवति हि सुखं सर्वदैवेति बुद्ध्या
यः संहर्तुं रिपुकृतभयो रक्षणीयोवभाति।
तत्तन्त्रस्थो यदि भवति स स्वात्मरक्षास्वशक्तो
भाण्डत्रासादिव तुरगतः प्रत्युतोपद्रवः स्यात् ॥ १६४ ॥

पित्रास्मदर्थमानीतो ज्येष्ठो द्विष्टो भयाय नौ ।
इति क्रुद्धौ सुतौ श्रुत्वा चकितः स नृपोभवत् ॥ १६५ ॥
राजा च राजपुत्रश्च तदमात्यपुरोगमाः ।
अन्योन्याशङ्किताः सर्वे न निद्रामुपलेभिरे ॥ १६६ ॥
भोगोपचारं संत्यज्य तत्कालं तेषु सेवकाः ।
यत्तज्जिह्वोपकारेणारञ्जयन्स्वामिनो निजान् ॥ १६७ ॥
कर्तव्यमादिशत्किंचिद्यत्स भृत्यानक्षणान्तरे ।
अवोचत्कृतकर्तव्यान्किमुक्तं न स्मराम्यहम् ॥ १६८ ॥
स्वहस्ताक्षरसंपन्नां त्यक्त्वा रीतिं पुरातनीम् ।
ज्ञात्वा प्रकृतिवैगुण्यं चक्रे तन्त्रं स मन्त्रिसात् ॥ १६९ ॥
यैरस्मत्सदने क्षिप्तः सोयं वैरानलः खलैः ।
तच्छमाय कृतोपेक्षा तैस्तैरुभयवेतनैः ॥ १७० ॥
मद्बर्धितास्ते नश्यन्तु मन्त्रिणस्तनयाश्च मे ।
ये मन्नाशेन तुष्यन्ति राज्यलुब्धा जिघांसवः ॥ १७१ ॥
इत्युद्विग्नो महीपालः श्वसञ्जपपरायणः ।
प्राप्तदुःखोशपत्सर्वं यास्यति स्मृतिशेषताम् ॥ १७२ ॥
स्वामी विरक्तस्तत्पुत्रा मिथो वैरपरायणाः ।
किमु जीव विधेयं नः कष्टमापतितं महत् ॥ १७३ ॥
इत्थं पौरजनः सर्वश्चुक्रोशातितरां तदा ।
यवनव्रतमासाद्य त्यक्तमांसाशनो नृपः ॥ १७४ ॥
संदध्यौ च कुपुत्रोयं यैरानीतो दिगन्तरात् ।
तैः स्वात्मरक्षिभिः सर्वं राज्यं मे बत नाशितम् ॥ १७५ ॥
एकतः सबलौ पुत्रौ नगरे मिलितौ मिथः ।
एकतः पुत्र एकाकी तन्निष्ठा मन्त्रिणः शठाः ॥ १७६ ॥

पुत्रा युद्धं करिष्यन्ति कष्टमापतितं महत्।
किं तु दूये पुरी सेयं पाल्या कुलवधूरिव ॥ १७७ ॥
मयि जीवति नश्येच्चेत्किं कार्यं जीवितेन मे।
भक्ताः शक्ता गता भृत्याः किं पृच्छामि करोमि किम् ॥ १७८ ॥
इत्यादिचिन्तासंतापजाताधिव्याधिबाधितः।
विमुक्तराज्यनिर्बन्धः स निस्पन्द इवाभवत् ॥ १७९ ॥
सबालवृद्धं नगरं क्षुभ्यत्तत्तत्कुवार्तया।
सोभूदब्धिमिवोद्वृत्तं समास्थापयितुं क्षमः ॥ १८० ॥
भोक्तव्यं यन्मया भुक्तं किं भोक्ष्येद्य नय द्रुतम्।
आनीतभोज्यमन्येद्युः शिवभट्टं क्रुधाब्रवीत् ॥ १८१ ॥
अतिचिन्ताकुलो राजा छायायामप्यविश्वसन्।
दुध्रुक्षून्सचिवाञ्श्रुत्वा श्रद्दधे न स्वजीवितम् ॥ १८२ ॥
गतसंविदिव स्थित्वा दिनानि कतिचिन्निजैः।
स पृष्टोप्युत्तरं राजा न कस्मा अप्युदैरयत् ॥ १८३ ॥
पृष्टः प्रकृतिभिः कार्यं संभाष्यानर्थकं वचः।
रुजार्त इव शय्यायां स सुष्वापैकदालसः ॥ १८४ ॥
नाविदंस्तद्रुजो हेतुं लक्षणं वा चिकित्सकाः।
जानेवाच्यां शुचं हर्तुं बभूवानशनव्रती ॥ १८५ ॥
अत्युन्नतान्सुफलदान्वितताञ्चशाखान्
ख्यातान्द्विजप्रियतया शुभमार्गसंस्थान्।
धाता निपातयति सर्वजनोपयोग्यान्
पृथ्वीधरांस्तरुवरानिव दुष्टवातः ॥ १८६ ॥
अत्रान्तरे त्रयः पुत्रा दोषा इव महोल्वणाः।
धातुवद्दूषयामासुर्देशे प्रकृतिसप्तकम् ॥ १८७ ॥

मूकप्रायं नृपं तादृगवस्थं द्रष्टुमन्वहम् ।
सशङ्कास्तमुपाजग्मू राजपुत्रा भटोल्वणाः ॥ १८८ ॥
गजांस्तुरंगांस्तत्पुत्रभीत्यै तादृग्दशं नृपम् ।
द्वाराग्रे स्थापयामासुः सर्वदर्शनदित्सया ॥ १८९ ॥
स्वस्तिवादध्वनिं श्रुत्वा सबाह्याभ्यन्तरा जनाः ।
द्वितीयेन्दुमिवाद्राक्षुः सानन्दा दर्शनागताः ॥ १९० ॥
श्रुत्वा बह्वामखानोथ चकितोन्तिकमागतः ।
गत्वरं लक्षणैर्ज्ञात्वा भूपं भ्रात्रेब्रवीदिति ॥ १९१ ॥
जीवत्यस्मत्पिता नैव मिथ्यैवोत्थाप्यते विटैः ।
द्वाराग्रात्पतितो भूमौ मूकप्रायो विचेतनः ॥ १९२ ॥
तदुत्तिष्ठ वयं यामः ससंनाहा नृपाङ्गनम् ।
हरामस्तत्तुरंगादि बद्ध्वा दुष्टांश्च मन्त्रिणः ॥ १९३ ॥
नौसेतुबन्धं छेत्स्यामस्तेन नश्यति तेग्रजः ।
श्रुत्वेति सोभ्यधान्नैवं वक्तुं युक्तं ममाग्रतः ॥ १९४ ॥
स्वप्नेप्यनिष्टं यस्याहं नेच्छामि स्वामिनः पितुः ।
तच्छ्रुत्वैकां निशां यावत्तदग्रे सोनयच्छुचा ॥ १९५ ॥
तावन्मुमूर्षुं तं श्रुत्वा पितृराज्यजिहीर्षया ।
आदामखानः श्रीजैननगरं सबलोभ्यगात् ॥ १९६ ॥
भटसंनाहसामग्रीं प्रापय्य पथि गोपिताम् ।
अवसत्स निशामेकां राजधान्यन्तरालये ॥ १९७ ॥
तावद्धस्सनकोशेशः स्वार्थान्धो मोहयन्परान् ।
गृहीतदिव्यः श्रीहाजीखानपक्षं समाश्रयत् ॥ १९८ ॥
अथ निष्काशितोन्येद्युः सचिवैः सबलोग्रजः ।
कुम्रदीनपुरं गत्वा धिया भाग्यश्रियोज्झितः ॥ १९९ ॥

ज्येष्ठोप्यभूत्कुशलधीरपि भृत्ययुक्तः
शूरोप्यनन्यसदृशोद्यमधैर्ययुक्तः ।
प्राप्ते क्षणे किमपि साधु न कर्म कुर्या-
त्पुण्यैर्विना न हि भवन्ति समीहितार्थाः ॥ २०० ॥

स चेत्तन्निशि हत्वैकमहरिष्यत्तुरङ्गमान् ।
अलभिष्यद्ध्रुवं राज्यं बुद्धिः कर्मानुसारिणी ॥ २०१ ॥

अत्रान्तरे हाजीखानः कोशेशानुजचोदितः ।
राजधान्यङ्गनं गत्वा तुरंगाद्यहरत्पितुः ॥ २०२ ॥

यद्वार्तया विनिर्धैर्या येभवन्सुतसेवकाः ।
विविशुस्ते ससंनाहाः समदाः कालपर्ययात् ॥ २०३ ॥

अभिमन्युप्रतीहारमुखा निन्द्यं यदब्रुवन् ।
तदुत्पिञ्जे तत्फलं तैरचिरेणानुभूयते ॥ २०४ ॥

तद्दिने हाजीखानः स सबलो बहिरास्थितः ।
नाशकज्जनकं द्रष्टुं सोत्कोपि द्रोहशङ्कया ॥ २०५ ॥

तद्वार्ताकर्णनाद्भीतो निराशः सपरिच्छदः ।
आदामखानो वित्राणो विपुलाटाध्वना ययौ ॥ २०६ ॥

स तारबलमार्गेण गच्छन्निजजनावृतः ।
अन्धागतानुजभ्रातृवीरलोकक्षयं व्यधात् ॥ २०७ ॥

अभिमन्युप्रतीहारमुख्याः शौर्यममानुषम् ।
दृष्ट्वैवादामखानस्य सान्वर्थाभिधमूचिरे ॥ २०८ ॥

यावान्स्वयंपुरे तेन कृतो लोकक्षयः क्रुधा ।
तावानेव कृतस्तत्र संकटे गिरिगह्वरे ॥ २०९ ॥

तावद्धस्सनखानोपि राजपुत्रो गुणोज्ज्वलः ।
तूर्णं पर्णोत्समुल्लङ्घ्य काश्मीरान्तरमाययौ ॥ २१० ॥

ग्रीष्मोष्मशोषिततनुर्विरसश्चिरं य-
श्छायोज्झितो मरुतरुः पथिकैर्निरस्तः ।
वर्षाप्तसेकमहिमा जनतापशान्त्यै
सेव्यः स एव बत पत्रविचित्रशोभः ॥ २११ ॥

सदृशौवावहन्मध्ये या द्वयोस्तटयोरिव ।
एकपार्श्वगता सर्वा तदाभूद्राज्यनिम्नगा ॥ २१२ ॥

इत्थं भ्रातृद्वयस्थित्या विजयाविजयक्रमः ।
अन्यथा कल्पितः सर्वैरन्यथाभूद्विधेर्वशात् ॥ २१३ ॥

पुत्रः स्यान्नु कदेति शोचति पिता जातेतिहर्षाकुल-
स्तद्वृद्धयै यततेन्वहं विधिशतैश्चिन्तास्तदीया वहन् ।
वृद्धो विघ्नमिव स्वकं स जनकं जानाति लोभान्वित-
स्तद्वित्ताप्तिधिया मरिष्यति कदेत्यन्तःसदा चिन्तयन् २१४

अस्मिन्नवसरे राजा कियद्भिः सेवकैर्वृतः ।
श्रुतमश्रुतवत्कर्तुं स निश्चिन्त इवाभवत् ॥ २१५ ॥

दर्शितास्वास्थ्यवाग्बन्धस्त्यक्तपेयाद्युपक्रमः ।
नृपेन्द्रो विरुचिः क्षीणकलचन्द्र इवाभवत् ॥ २१६ ॥

प्रजाभाग्यविपर्यासात्सर्वायासाय विच्छविः ।
कल्पान्तरविवत्सोस्तं गन्तुं प्रावर्ततातुरः ॥ २१७ ॥

कम्पितोष्ठपुटज्ञातमन्त्रपाठः कवेर्दिने ।
द्वादश्यां ज्येष्ठमासस्य मध्याह्ने जीवितं जहौ ॥ २१८ ॥

प्राणप्रयाणसमये नृपतिः स मयेक्षितः ।
सर्वाङ्गनिर्यत्सौभाग्यभाग्यावृतमुखच्छविः ॥ २१९ ॥

जाने तद्वदनं लक्ष्मीसदनं स्वेदसंततिः ।
निर्यद्भाग्यतरङ्गिण्याः प्रवाह इव दिद्युते ॥ २२० ॥

तज्जीवरत्नहरणाज्जातभीतिरिव ध्रुवम्।
प्राणवायुर्हरन्नायुः क्षणं तूर्णगतिं व्यधात् ॥ २२१ ॥
प्राणान्ते विगलत्सूर्यसोमनेत्रजलच्छलात्।
निरगान्नरदेवस्य प्रजास्नेहरसो ध्रुवम् ॥ २२२ ॥
द्वापञ्चाशतमब्दान्स राज्यं कृत्वा सुखप्रदम्।
षट्चत्वारिंशवर्षेगाद्दिवं श्रीजैनभूपतिः ॥ २२३ ॥
कर्णीरथशबप्रोद्यच्छत्रचामरकैतवात्।
शुचेव पतितौ नूनं सूर्याचन्द्रमसौ दिवः ॥ २२४ ॥
तत्कालं मन्त्रिणो भृत्या दासाजनपदाश्च ये।
रुदितास्रुस्रुतिव्याजान्निवापाञ्जलिमक्षिपन् ॥ २२५ ॥
राज्यं षण्णवते वर्षे ज्येष्ठे मास्यग्रहीन्नृपः।
उत्तरायणकालान्तस्तेनैवान्तर्धिमासदत् ॥ २२६ ॥
अतीतगणितैकोनसप्तत्यब्दायुषं नृपम्।
वदनावगतप्रोद्यत्कृष्णकूर्चकचच्छटम् ॥ २२७ ॥
शवीभूतं शिवीभूतं शिबिकायां शवाजिरम्।
रुदन्तो मन्त्रिणो निन्युश्छत्रचामरराजितम् ॥ २२८ ॥
यत्र सुप्ता इवैकत्र भान्ति पूर्वे महीभुजः।
भर्तृप्रेम्णा धरण्येव निहिता हृदयान्तरे ॥ २२९ ॥
रुदत्पौरजनप्रोद्यत्तारारोदननिःस्वनैः।
बभूवुस्तच्छुचेवारं साक्रन्दमुखरा दिशः ॥ २३० ॥
क्व प्रयासि प्रजास्त्यक्त्वा हा देव नरजीवित।
इत्यस्मादपरः शब्दो नाश्रावि नगरान्तरे ॥ २३१ ॥
तत्तदाक्रन्दितैः शश्वत्कर्णसंजातसंस्तवाः।
शून्येप्यश्रृण्वँल्लोकानामाक्रन्दितमथासकृत् ॥ २३२ ॥

कर्णीरथादथोत्क्षिप्य पितुः पार्श्वे नरेश्वरम् ।
कृत्वा पटैकसंवीतं भूगर्भाभ्यन्तरे न्यधुः ॥ २३३ ॥

नेत्रनालस्रवद्बाष्पधाराः स्वाचारकारणात् ।
मुखावलोकनं कृत्वा सर्वे मृन्मुष्टिकां जहुः ॥ २३४ ॥

भूपतिर्भविता नान्यस्त्वत्समो भूरियं गता ।
इतीव भावनां चक्रुर्मृन्मुष्टिग्रहणच्छलात् ॥ २३५ ॥

जित्वारीन्प्रबलाग्रणे क्षितिमिमां वृत्त्वा धनैः सर्वतो
दत्त्वा कोशमशेषदेशविदिताः कृत्वा पुरीः स्वाभिधाः ।
सप्ताङ्गोर्जितभङ्गिसङ्गिसुभगं कृत्वापि राज्यं चिरं
हित्वा सर्वमहो पटैकरचनामन्ते लभन्ते नृपाः ॥ २३६ ॥

स वैरराज्यदावाग्निसंतप्त इव शीतलम् ।
तद्गुहान्तरमासाद्य सुखनिद्रामिवाभजत् ॥ २३७ ॥

मुखं निद्रावृतस्येव दृष्ट्वा सौभाग्यसुन्दरम् ।
हाजीखानोकरोत्पित्रे मस्तकं स्वमरात्रिकाम् ॥ २३८ ॥

अपराद्धं मया तात बहुशः पापबुद्धिना ।
मन्ये तेनैव रुष्टस्त्वमसहायो गतो दिवम् ॥ २३९ ॥

सिकन्दरनृपो धन्यो यस्त्वां पश्यति नाकगः ।
धिङ्मां यो वञ्चितो राजन्दर्शनामृतवर्षणैः ॥ २४० ॥

विहृतं क्वापि नो तात मां विना स्वोत्सवक्षणे ।
वदाद्य कथमेकाकी भजसे स्वर्गसंपदः ॥ २४१ ॥

यस्त्वं कोमलशय्यासु नागा निद्रां गणावृतः ।
स कथं भूगणस्यान्तस्तिष्ठस्येकः सशर्करे ॥ २४२ ॥

प्रतिमुच्य भवन्तं मे प्राप्तस्य स्वगृहं न कः ।
प्रशपेन्मास्तु मेलापो भूयो वामिति कोपितः ॥ २४३ ॥

औन्निद्र्यं कारितोस्माभिः कुपुत्रैः सततं भवान्।
अद्यैवावसरं प्राप्य दीर्घनिद्रां करोषि किम्॥ २४४॥

ज्वलिताभूत्तनुर्नित्यं सततोदितया यया।
साद्य किं चलिता राजंश्चिन्ता ते मानसान्तरम्॥ २४५॥

चित्रे वाप्यथ संकल्पे पश्यामि वदनाम्बुजम्।
शृणोमि ताः कथाः कुत्र तात ते बहुपातकी॥ २४६॥

राज्यं विपद्दिनं रात्रिः सूद्यानं पितृकाननम्।
जीवनं मरणं नाथ त्वां विना मम सांप्रतम्॥ २४७॥

कुपितो वा प्रसन्नो वा कुतोप्यागत्य तात मे।
दर्शनं देहि नो सोढुं क्षमो विरहवैशसम्॥ २४८॥

विहाय क्व नु मां तात गतः पादैकसेवकम्।
द्युतिं न लभते पद्मकोरको भास्करं विना॥ २४९॥

किं रुष्टोसि महीपतेहमधुना दासोस्मि सेवापरो
मौनं मा भज देहि वाक्यमधुनाप्येकं ममात्यादरात्।
नो जीवामि विना त्वयेति विलपन्कुर्वन्भुजारात्रिकां
साक्रन्दं रुदितं चकार सुचिरं दृष्ट्वा मुखं भूपतेः॥ २५०॥

इति प्रलापमुखरं हाजीखानं शुचार्दितम्।
राज्यधानीं ततो निन्युर्दिनान्ते मन्त्रिणो बलात्॥ २५१॥

पितुर्लोकान्तरस्थस्य प्रीत्यर्थं तत्क्षणं सुतः।
सालोरग्राममात्मीयं न्यधात्तत्र शवाजिरे॥ २५२॥

ग्रीष्मपानीयदानेन तृप्त्यर्थं तत्प्रदायिनाम्।
बहूनां प्रददौ क्षोणीमहार्यां धर्मसात्कृताम्॥ २५३॥

राज्ञानेन विना शून्यां नास्मि क्ष्मामीक्षितुं क्षमः।
इतीव दुःखात्तत्कालं स्वमब्धौ रविरक्षिपत्॥ २५४॥

संध्याभ्रशाटीमुत्सृज्य रोदनार्थमिवेशितुः ।
शुचेव विसृतं चक्रे तमःकचचयं क्षितिः ॥ २५५ ॥
आशाप्रकाशके वन्द्यदर्शने गुणिबान्धवे ।
परलोकं गते तस्मिन्मण्डले प्रोदभूत्तमः ॥ २५६ ॥
तद्दिने रन्धनाभावाद्गृहधूमविवर्जिता ।
शोकमूका निरुच्छ्वासा निर्जीवेवाभवत्पुरी ॥ २५७ ॥
शवागारोपरि शिलां स्फाटिकीं रचनोज्ज्वलाम् ।
दीर्घां सर्वोन्नतां राज्ञो मूर्तिं परिणतामिव ॥ २५८ ॥
घनोत्कण्ठदिदृक्षाप्तरुदल्लोकाश्रुबिन्दुभिः ।
यत्र मुक्ताफलैः पूजा लसतीवोपरि प्रभोः ॥ २५९ ॥
पौराः शुक्रदिने भान्ति यत्रान्तःप्रतिबिम्बिताः ।
राज्ञेव निकटं नीताः कुतूहलतयात्मनः ॥ २६० ॥
कवाटविकटं वक्षो मुखं पूर्णेन्दुसुन्दरम् ।
शुकवद्दीर्घनासाग्रं नेत्रे कमलकोमले ॥ २६१ ॥
भ्रूलेखे लोमशे भालं प्रभालम्भितलक्षणम् ।
सा बुद्धिस्ते गुणास्ताश्च राज्यकार्यावधानताः ॥ २६२ ॥
स्मारं स्मारं जनः सर्वो राज्ञः पुर इव स्थितः ।
पर्यन्तनीरसासारं संसारं निन्दते न कः ॥ २६३ ॥
ज्योत्स्ना पूर्णसुधाकरस्य कुसुमोत्कर्षो वसन्तस्य य-
त्सौभाग्यं शरदि प्रसन्ननभसो नार्या नवं यौवनम् ।
राज्ये चैव विवेकिनो नरपतेर्यत्सर्वसौख्यप्रदं
धाता तत्कुरुते स्थिरं यदि जने स्वर्गार्जने न स्पृहा ॥२६४॥
बाल्ये पित्रा वियोगो वरसचिवभियो भ्रातृभृत्यैर्विरोधः
प्राप्ते राज्ये प्रवासो बहिरथ समरोप्यग्रजेनातिकष्टः ।

धात्रेयेभ्योथ चिन्ता तदनु निजसुतैर्यावदायुश्च बाधा
संसारे सर्वदास्तुच्छुतिकृति भविनां नित्यदुःखां स्थितिं धिक् २६५
नूनं जातकयोगेन पुत्रेभ्यो दुःखमन्वभूत्।
अभूदस्य सुतस्थाने भौमो यत्पापवीक्षितः ॥ २६६ ॥
पण्डिताः कवयस्तस्य वाचाला येभवन्सदा।
त एव तं विना दृष्टाः पौषे मूकाः पिका इव ॥ २६७ ॥
याभूत्सरस्वती नेत्रनिभा विकसिता सदा।
ग्रन्थ्या संकुचिता साभूद्बुधपुस्तकसंततिः ॥ २६८ ॥
तर्कव्याकरणादीनां शास्त्राणां ये श्रमं व्यधुः।
ते राजरञ्जनायालं देशभाषाश्रमं व्यधुः ॥ २६९ ॥
राज्ञा ये बहु मानिता गृहसुखश्रीमण्डिताः पण्डिताः
शास्त्राभ्यासमहर्निशं प्रविदधुर्ग्रन्थार्जनाद्युत्सुकाः।
पृष्टाः किं पठतेति ते प्रतिजगुः श्रीजैनलाभे गते
कुत्र व्याकरणं क्व तर्ककलहः कुत्रापि काव्यश्रमः॥ २७० ॥
योभूत्सर्वकलानिधिः शुभविधिर्दातामिगम्यो गुणी
काव्यज्ञो बहुभाषया गुणिरतः कारुण्यपुण्याकुलः।
सोयं हन्त समीक्ष्यतेवनितले धिक्पापिनोस्माञ्शठा-
न्ये जीवन्ति शुचा न यान्ति विपिनं संसारतृष्णाजिताः२७१
हारेणेव विनाङ्गनाकुचतटी शास्त्रेण हीनेव धीः
सूर्येणेव विना प्रफुल्लनलिनी तारुण्यहीना तनुः।
चन्द्रेणेव विना यथैव रजनी पत्या विना भामिनी
येनैकेन विना नृपेण न बभौ कश्मीरराज्यस्थितिः ॥२७२॥
श्रीमत्तर्कादिविद्याभ्यसनरसलसद्गर्वसर्वप्रवीण-
प्रेक्षोद्यद्दानमानोचितविचितयशोभूषिताशेषदेहः।

श्रीजैनोल्लाभदीनो नरपतितिलकः सर्वशास्त्रप्रवीणः
कश्मीरान्योजयित्वा दिवमपि स गतो योजनायेव नष्टाम् २७३ ।

इत्यादि संततं सन्तो वदन्तोत्यन्तचिन्तया ।
नितान्ततान्तहृदया विश्रान्तिं नाभजन्त ते ॥ २७४ ॥

दृष्टो रम्यश्चिरमुपवने वंशवाटो जनैर्यो
नानावर्णैर्नवतृणगणैर्भूषितो भूरिपत्रः ।
तत्रान्योन्याहननजननात्ताहगभ्युत्थितोग्नि-
र्येनैकान्तादुपवनगतं सर्वमेव प्रनष्टम् ॥ २७५ ॥

या कारकसभा भव्याभवच्छ्रीजैनभूपतेः ।
वर्षेणैकेन तच्छापात्सर्वा स्वप्नोपमाभवत् ॥ २७६ ॥

क्षुब्धे राज्यमहाम्भोधौ भूपप्रमयवायुना ।
तत्तत्सेवकरत्नौघः शतैकीयोवशिष्यत ॥ २७७ ॥

प्रभवत उत यावत्स्वप्रभुः सौख्यदाता
विदधति खलु तावत्सेवकास्तस्य मानम् ।
इह वसति वसन्तो यावदेव स्वनन्तो
मधुकरपिकभेकास्तावदेवाद्रियन्ते ॥ २७८ ॥

केचिदप्यवशिष्टा ये सेवकास्तस्य भूपतेः ।
तेप्यनन्तरविज्ञानात्तृणतुल्योपमां गताः ॥ २७९ ॥

इति पण्डितश्रीवरविरचितायां जैनराजतरङ्गिण्यां जैनशाहि-
वर्णनं नाम प्रथमस्तरङ्गः ।

द्वितीयतरङ्गः

वन्दे विश्वमयं देवं सर्ववाङ्मन्त्रनायकम् ।
यदंशवर्णनस्तुत्या तत्पूजाफलभाङ्न कः ॥ १ ॥
पादो दक्षिण एष यच्छति पदं यत्रैव नाट्येच्छया
तत्रैवेच्छति नाम वामचरणः संचारसंस्कारतः ।
इत्थं मण्डलमण्डितां समपदां चारीं नरीनर्ति यः
संध्यायां स सदा ददातु सुखितां देवोर्धनारीश्वरः ॥ २ ॥
अथ हैदरशाहाख्यां ख्यापयन्मुद्रिकार्पणैः ।
हाजीखानोग्रहोद्राज्यं स ज्येष्ठप्रतिपद्दिने ॥ ३ ॥
अग्र्यार्घो दक्षिणानन्दी तत्तत्सुकृतसूचकः ।
बभावर्थिजनानन्दी स राज्यग्रहणोत्सवः ॥ ४ ॥
शुद्धांशुकचितै राजवल्लभैः सुखशालिभिः ।
बभौ सिकन्दरपुरो पूर्णा द्यौरिव तारकैः ॥ ५ ॥
राजधान्यङ्गने हैमं सिंहासनमशिश्रियत् ।
अतितोष्णो नवो राजा मेरोस्तटमिवांशुमान् ॥ ६ ॥
बभतुर्भूपतेरग्रे स्थितौ तस्यानुजात्मजौ ।
इन्दोः पुरस्तादुद्यन्ताविव शुक्रबृहस्पती ॥ ७ ॥
राज्ञो हस्सनकोशेशस्तद्राज्यतिलकं ददौ ।
सौवर्णं पुष्पपूजाढ्यं यदृच्छाविहितव्ययः ॥ ८ ॥
स हाजीहैदरनृपो घनकालोर्जितप्रभः ।
धाराधर इव धरां दधार धरणीधरः ॥ ९ ॥
सोनुजं स्वसमं भूमिनायकः सुक्षितेरसात् ।
बन्हामखानं नाग्रामदेशे तं स्वामिनं व्यधात् ॥ १० ॥

क्रमराज्येक्षिकादेशे स्वामिनं स्वसुतं व्यधात् ।
चिरान्निजसुतप्राप्त्या यौवराज्यसुखादपि ।
पितृशोकहतोप्यन्तर्विश्रान्तिमभजन्नृपः ॥ ११ ॥
तस्माद्धितमेवास्तु देशाधीशत्वराजिताः ।
प्रसादमतुलं प्रापू रावत्रलवकादयः ॥ १२ ॥
अन्येप्युच्चावचान्ग्रामान्सेवका नवभूपतेः ।
पूर्वसेवानुसारेण प्रसादं प्रतिपेदिरे ॥ १३ ॥
राजा राजपुरीसिन्धुपत्यादीन्दर्शनागतान् ।
प्रत्यमुञ्चदलंकृत्य पार्थिवोचितया श्रिया ॥ १४ ॥
सौवर्णकर्तरीबन्धसुन्दरा नृपमन्दिरे ।
ननन्दुर्मन्त्रिसामन्तसेनापतिपुरोगमाः ॥ १५ ॥
पितृशोकार्पितानर्घपट्टांशुकविभूषणाः ।
विचेरुः सेवकास्तस्य तदन्तिकगताः सदा ॥ १६ ॥
आसीद्राजा च सततं प्रकामं दोषनिष्क्रियः ।
स्वपक्षपालने सक्तः संध्याक्षण इवोडुपः ॥ १७ ॥
पक्षपातोक्षणापत्यप्रतिपालनतत्परः ।
लोभक्रोधविरक्तात्मा मोहान्धक्षपणक्षमः ॥ १८ ॥
सैदनासिरपुत्रो यः स मेर्जाहस्सनाभिधः ।
अहो तत्पितृवत्पूज्यो बहुरूपादिराष्ट्रभाक् ॥ १९ ॥
उत्सवादिसदाचारसत्कारेषु सभान्तरे ।
त एव प्रथमं मान्यास्तद्राज्ये सर्वदाभवन् ॥ २० ॥
एतान्पक्षाश्रयान्मद्वद्राव्ययं बलवानिति ।
मेर्जाहस्सनपुत्र्याः स पार्णि पुत्रमजिग्रहत् ॥ २१ ॥
हृत्वा ज्यंसरमार्गेशात्स ज्यहाङ्गिरमार्गपे ।
वाङ्गिलं प्रददौ राजा तद्गुणाकृष्टमानसः ॥ २२ ॥

चक्रे कृतापकाराणामप्यनुग्रहमेव सः।
प्रणम्य सिंहः पूर्वं हि हन्ति दन्तिगणं ततः॥ २३॥
गूढभावो महीपालस्तत्तच्चेष्टां चरैर्विदन्।
तदा हस्सनकोशेशं संमान्याधिकृतं व्यधात्॥ २४॥
प्रतापतापितारातिच्छन्नकोपो महीपतिः।
भस्मान्तरगतो वह्निरिवासीत्परमृत्युदः॥ २५॥
कांश्चित्सन्नभयान्कांश्चित्संधाय प्रतिपालयन्।
कांश्चिदुन्मीलयन्नीत्या नानावृत्तिरभून्नृपः॥ २६॥
प्रसादकृत्स भृत्यानामभूद्वैश्रवणोपमः।
मनागप्यपराधेन बभूवान्तकसंनिभः॥ २७॥
पैयः पितृकृतामात्यफिर्यडामरकादयः।
विचार्यासहनं कोपे बभूवुर्वृतयन्त्रणाः॥ २८॥
चौरा जाराश्च रिपवो भृत्या दुर्णयकारिणः।
अह्नीव जम्बुकाश्चेरुस्तद्राज्ये भयविह्वलाः॥ २९॥
श्रीजैननृपतौ शान्ते मूर्धगूढशिलोपमे।
अबाधन्त पुनर्लोकं व्याला इव नियोगिनः॥ ३०॥
विरुद्धपक्षो रुचिरञ्जिताशः
कलाकलापो विबुधोपजीव्यः।
पूर्णेन्दुनानेन समोस्तिकोन्यः
कलङ्क एको यदि नास्य दोषः॥ ३१॥
श्रुत्वास्मद्दूषणाः सोयं सर्वान्हन्तीति कद्धिया।
ऐक्यं पुरप्रवेशार्थं मिथस्तद्दूषका व्यधुः॥ ३२॥
कुकृत्यप्रेरकः पापश्चान्यायोत्कोचहारकः।
प्रियोभवद्दिवाकीर्ती राज्ञो रिक्केतराभिधः॥ ३३॥

कामीव व्यसनं नित्यमुपालब्धोपि भूभुजा ।
यं त्यक्तुं नाशकद्राजा संस्तवाद्धृदयंगमम् ॥ ३४ ॥
संचितार्थः प्रजायासैर्मुद्रादानादिकर्मभिः ।
आसीत्स्वकार्यकुशलः ख्यातो धूर्तः स नापितः ॥ ३५ ॥
रुद्धं चित्तेन काठिन्यं माधुर्यं जिव्हया धृतम् ।
शठस्य यस्य सततं लोकोद्वेजनकारकम् ॥ ३६ ॥
येनाधिकाराद्देशेस्मिन्प्रजाः कुकर्मभिः कृताः ।
दुःखिता रक्षिताः पूर्वं पुत्रवच्छ्रीमहीभुजा ॥ ३७ ॥
मीरभोखारनामापि बुद्धिमान्प्रथितो भुवि ।
नितरामपकोपाग्नेः राज्ञः साचिव्यमादधे ॥ ३८ ॥
वात्सल्याद्धितो राज्ञा स चुटगणनापतिः ।
समस्तकार्यस्थानेभ्यो भुङ्क्ते राजोपजीविकाम् ॥ ३९ ॥
यो वर्षणैकनिरतः शिखिहर्षहेतुः
संदर्शितातुलफलः कृतकर्षणेषु ।
जातोपि यः प्रतिदिनं हृतसर्वतापः
सोयं घनस्तुदति दुःसहवज्रपातैः ॥ ४० ॥
दुर्मन्त्रिप्रेरितो राजा व्यधान्मदविचेतनः ।
प्रजाभाग्यविपर्यासाद्विवेकविगुणाः क्रियाः ॥ ४१ ॥
सिकन्दरपुरीपार्श्वस्वनिर्माणचिकीर्षया ।
अमृतोपवने प्रांशुतरुच्छेदनमादिशत् ॥ ४२ ॥
छिन्नांस्तान्पुष्पितान्वृक्षान्समीक्ष्यैतत्समुत्थिताः ।
तच्छुचेव व्यधुस्तत्र रोलम्बा रोदनध्वनिम् ॥ ४३ ॥
तन्निर्माणग्रहोन्येषां न केषां प्रत्यभाद्धृदि ।
अग्रे दिनपतेर्दीपप्रकाशनरसोपमः ॥ ४४ ॥

तद्भूमः क्षीव एवैष करोतीति विनिश्चितम्।
स्वाहितापि क्रिया हेतोः घूर्णितं तं नृपं व्यधात्॥ ४५॥
बहूनामथ लोकानां नापितोवयवच्छिदाम्।
भूपालवाक्यनिरतः क्षीवतोपि तथाकरोत्॥ ४६॥
नापितो निर्घृणः पापी क्रोधी क्रकचपाटितान्।
पैतृकांष्ठक्कुरादींश्च कारयामास भूपतेः॥ ४७॥
चलितानग्रजभ्रातुः स्वावनायान्तिकं पथि।
रुद्ध्वा शूलेधिरोप्यान्यान्पञ्चषानप्यघातयत्॥ ४८॥
जीवन्तो गणरात्रं ते स्वकुटुम्बोक्तवेदनाः।
पौरैः सास्रजलैर्दृष्टाः शूलपृष्ठे पुरान्तरे॥ ४९॥
वैडूर्यभिषजं ज्ञात्वा दूषकं परपक्षगम्।
अमुञ्चद्बन्धनात्कृत्तभुजनासोष्ठपल्लवम्॥ ५०॥
तथैव नोनदेवादीञ्शिखजाजादिसंयुतान्।
पञ्चषानकरोत्कृत्तजिह्वानासैकहस्तकान्॥ ५१॥
विरुद्धावयवच्छेदशूलारोपणकर्मणा।
स पूर्णनापितः पापी बभूव नरशौनिकः॥ ५२॥
आचार्यपुत्रो जय्याख्यस्तथा भीमाभिधो द्विजः।
छिन्नाङ्गौ स्वं यथाशक्तौ वितस्तायां समौज्झताम्॥ ५३॥
मद्यलीलाव्यसनतस्तद्राज्ये बाह्यदेशवत्।
आसीन्माद्वीकवद्गौडी देशेत्र प्रचुरा सुरा॥ ५४॥
तन्मद्यरसिके राज्ञि सर्वभोगपराङ्मुखे।
खण्डादीक्षुविकारास्ते सुलभा न गुडोभवत्॥ ५५॥
खुज्याद्बुल्कादिर्यस्यान्तेवासी गीतगुणाम्बुधेः।
मल्लाडोदकनामासीत्तन्त्रीवाद्यगुरुर्नृपे॥ ५६॥

कूर्मवीणादिवाद्यानां प्राप्यास्मद्गीतकौशलम्।
आजीवं क्षणमप्यासीन्न तन्त्रीवादनं विना ॥ ५७ ॥

तन्त्रीवादविशेषज्ञो राजा व्यञ्जनधातुभिः।
स्वयं वादननिष्णातो वैणिकानप्यशिक्षयत् ॥ ५८ ॥

रबाबवाद्यरचनैर्बह्वोलाद्यैश्च गायनैः।
राज्ञः प्रसादात्किं नाप्तं तत्तत्कनकवर्षिणः ॥ ५९ ॥

शौचालयस्थैः सुरतालयस्थै-
भूतैरिवान्तश्छलनप्रवीणैः।
वशीकृतो यः पिशुनैर्नरेशो
बिभेति तस्मान्ननु को न मर्त्यः ॥ ६० ॥

रहः स्थितं नृपं जातु पिशुनः पूर्णनापितः।
अपृच्छत्प्रेरितोमात्यैश्चिकीर्षां पूर्वमन्त्रिषु ॥ ६१ ॥

भवत्पक्षविनाशो यैः कृतस्त्वत्पितृमन्त्रिभिः।
प्राप्तराज्येन भवता त एव प्रबलीकृताः ॥ ६२ ॥

अमी हस्सनकोशेशमुख्यास्तदनुजाहृताः।
सोपि धूर्तो धिया तत्तद्वशीकारसमुद्यतः ॥ ६३ ॥

असमर्थशरीरस्त्वं भ्रात्रर्पितभरः सदा।
तत्ते सपुत्रभृत्यस्य न नाशो भविता चिरात् ॥ ६४ ॥

श्रुत्वेत्यवोचन्मत्पुत्रः सत्यं मदनुजाप्रियः।
किं तु ब्रवीमि येनायं रक्ष्यते कुटिलाशयः ॥ ६५ ॥

उग्रो मदनुजस्तीक्ष्णो मत्पदाक्रान्तिसूद्यतः।
अनेन क्रष्टुमिच्छामि कण्टकेनेव कण्टकम् ॥ ६६ ॥

कार्यापेक्षावशादेतं रक्षामि न तु गौरवात्।
श्रुत्वेति द्विन्नान्महतो व्यधाज्ज्ञातचिकीर्षितान् ॥ ६७ ॥

अत्रान्तरेग्रजो राज्ञो मद्रदेशाद्बलान्वितः।
भ्रातृराज्यजिहीर्षायै पर्णोत्सं प्राप दर्पितः॥ ६८॥
तच्छ्रुत्वा नृपतिः क्रुद्धस्तान्समानीय पैतृकान्।
अवोचत्किं नु कर्तव्यं ते तमित्यूचुरुत्तरम्॥ ६९॥
तटिकासेतुबन्धं तं छेत्तुं यामोस्य तिष्ठतः।
अन्यथा दुःसहः प्राप्तस्तदाज्ञा दीयतां विभो॥ ७०॥
श्रुत्वेति कातरं वाक्यं तेषां दुर्लक्ष्यचेष्टितः।
तत्पक्षपातिनो ज्ञात्वा तथेति प्रत्यपद्यत॥ ७१॥
प्रतिमुच्य नृपस्तान्स रात्रावित्यब्रवीन्निजान्।
आनीय फिर्यडारादीन्मन्त्रिणः कार्यनिष्ठुरान्॥ ७२॥
इयं हस्सनकोशेशचक्रिका यत्समागतः।
एतद्बधेन नष्टः स्यादन्यथाभ्यन्तरं विशेत्॥ ७३॥
तत्प्रातरेते हन्तव्या युक्त्यानीयेति तान्नृपः।
छन्नकोपः सेवकान्स्वानकरोत्कृतसंविदः॥ ७४॥
राज्ञा प्राप्तः समाहूय विसृष्टानुचरा गृहात्।
सर्वे हस्सनकोशेशमुख्यास्तूर्णं समाययुः॥ ७५॥
कम्पते तुरगस्त्रस्तो ज्ञातवृत्त इवाचलः।
ताडनैर्बहुशः सास्रुः प्राप कष्टान्नृपाङ्गनम्॥ ७६॥
महार्हास्तरणस्थांस्ताम्राजकर्तव्यताकुलान्।
कोशेशहस्सनमीरकाकादीन्पञ्चषान्नृपः॥ ७७॥
भृत्यैः संजरमीराद्यैराज्ञप्तैर्मण्डपान्तरे।
छलाद्विश्वासमुत्पाद्य राजधान्यन्तरेवधीत्॥ ७८॥
किं द्रोह इति यावत्स कोशेशोभ्युत्थितोब्रवीत्।
द्रुघणैकप्रहारेण तावत्प्राणैर्व्ययुज्यत॥ ७९॥

शस्त्राघातैर्मुमूर्षुः सन्नुत्थितो मीरकाककः ।
राज्ञ एवाशिषः कुर्वन्पुनः परशुना हतः ॥ ८० ॥

लिखन्नह्मदमीराख्यः स विद्याव्यसनी गुणी ।
हतो जनमनःकान्तो ययौ कस्य न शोच्यताम् ॥ ८१ ॥

जीवतां मनसा चैक्यं तेषां नित्यमभूद्यथा ।
शस्त्रकृत्ततनूद्गच्छच्छोणितैक्यमभूत्तथा ॥ ८२ ॥

वर्णकम्बलपृष्ठस्था जीवन्तस्ते यथाभवन् ।
निद्राणा इव ते तत्र मृता अपि तथेक्षिताः ॥ ८३ ॥

क्षत्रमात्राक्षथा शस्त्रैर्मरणं राजवेश्मनि ।
अनन्यसुलभं तत्र तेषां श्लाघार्हतामगात् ॥ ८४ ॥

न वित्तं न च दारास्ते न भृत्या न शवाजिरम् ।
तेषां तथा प्रमीतानां ययावन्तोपकारिताम् ॥ ८५ ॥

निजपरिभवभीत्या बन्धवो यान्ति दूरं
त्यजति च निजपत्नी का कथा सेवकानाम् ।
प्रतिदिनमृणहेतोस्ताडनं बन्धनं वा
भवति हि यमभङ्गाद्राजभङ्गोतिकष्टः ॥ ८६ ॥

स्फुलिङ्गालिङ्गनात्क्रुद्धकृष्णसर्पोपसर्पणात् ।
मकराकरपाताच्च कष्टं नृपतिसेवनम् ॥ ८७ ॥

प्रद्युम्नगिरिपादान्ते चण्डालैर्निश्यनाथवत् ।
इष्टिकाभिस्ततो नीत्वा भूगर्तेषु निवेशिताः ॥ ८८ ॥

कुर्वन्ति मौसुलजनाः स्वशवाजिरार्थं
यत्नं सदैव बहुकारुषु दत्तवित्ताः ।
नो चिन्तयन्ति परमेश्वरमन्तरेण
जानाति को मम कदा मरणं कथं स्यात् ॥ ८९ ॥

यः स्वायुषोवधिमवैति स्वदेहनिष्ठं
यस्यान्तको भवति मित्रतयातिवश्यः।
युज्येत तं प्रति शवाजिरकर्म कर्तुं
म्लेच्छेषु दुर्व्यसनमात्रमिदं मतं मे ॥ ९० ॥

ते वैश्रवणभट्टाद्याः कृत्वापि स्वशवाजिरम्।
अन्ते यत्र मृता ग्रामे भुवि तत्रैव शायिताः ॥ ९१ ॥

एक एको भुवो हस्तशतमात्रावृतौ रतः।
पराप्रवेशदो यत्नात्प्राकृतो लज्जते न किम् ॥ ९२ ॥

श्रुतं यच्छास्त्रतः सूक्ष्मशिलाश्चेच्छवभूतले।
स्थाप्यन्ते तत्सुखं तस्मिन्परलोकगते भवेत् ॥ ९३ ॥

अहो लोभस्य माहात्म्यं जीवद्भ्यन्मृताअपि।
शवाजिरापदेशेन कुर्वन्त्यावरणं भुवः ॥ ९४ ॥

महान्तो हन्त कुर्वन्तु कृतयत्नाः शवाजिरम्।
तन्निर्माणेन जीवन्ति कियन्तोपि बुभुक्षिताः ॥ ९५ ॥

वन्द्योन्यदर्शनाचारो हस्तमात्रे भुवस्तले।
दग्धा यत्कोटिशो नित्यं सावकाशं तथैव तत् ॥ ९६ ॥

इत्याद्यनुचिता निन्दा प्रस्तावाद्धिहितात्र यत्।
क्षन्तव्या मौसुलैर्यस्मात्कविवाचो निरर्गलाः ॥ ९७ ॥

ये राजवैभवमवाप्य निपीड्य लोकं
कुर्वन्ति संचयमतो न च दानभोगौ।
अत्युत्कटाघभरतत्फललब्धदुःखा-
स्ते कोशरक्षणनिभाद्धितरन्ति राज्ञः ॥ ९८ ॥

द्रव्यं गृहतुरंगादि तेषां तद्राजसादगात्।
तत्कुटुम्बैर्निरालम्बैर्नाक्षाप्येका वराटिका ॥ ९९ ॥

कोशेशसंचितं स्वर्णपूर्णं रूपकभाजनम् ।
दृष्ट्वा धिक्कृत्य कृपणं थूत्कारं नृपतिर्व्यधात् ॥ १०० ॥
तत्पक्षान्बह्मरागादीन्हृतसर्वस्वसंचयान् ।
कारायामक्षिपद्राजा मुत्कैकं सैदहुस्सनम् ॥ १०१ ॥
अन्ये पित्रपराधेन तस्माद्भृगुसुतोपमात् ।
क्षत्रिया इव ते सर्वे नाशं प्रापुः पुरातनाः ॥ १०२ ॥
यासीत्पितुः सभा योग्या तत्तत्कार्यविशारदा ।
स्मृतपूर्वापकारेण तेन सर्वावसादिता ॥ १०३ ॥
अन्तरङ्गान्हभेभादीन्पञ्चषानधिकादरैः ।
अरक्षत्प्राक्तनां स्मृत्वा प्रेमसेवां च पैतृकीम् ॥ १०४ ॥
आदामखानः पर्णोत्से श्रुत्वा कोशेशनाशनम् ।
स्वनामान्वर्थतां बिभ्रद्ययौ भीतो यथागतम् ॥ १०५ ॥
बह्रामखानो वित्राणस्तद्बधाच्छङ्कितो भृशम् ।
गृहमेत्य नृपेणाश्वासितः कार्यावलोकिना ॥ १०६ ॥
अस्मिन्नवसरे मद्रमण्डले सुभटक्षयः ।
अभून्माणिक्यदेवस्य तुरुष्कैः सह संयुगे ॥ १०७ ॥
मातुलेन समं यातो योद्धुं तत्रैव संगरे ।
आदामखानः स प्रापच्छरभिन्नमुखः क्षयम् ॥ १०८ ॥
केप्यूचुः स निजैरेव हतस्तत्र भयाश्रितैः ।
केपि व्रणशलाकाग्राकृष्टिमर्मविदारणात् ॥ १०९ ॥
श्रुततन्मरणो राजा दूतैरत्यन्तदुःखितः ।
तद्देशाच्छवमानीय जननीसंन्निधौ न्यधात् ॥ ११० ॥
ज्येष्ठोपि शौर्यनिलयोपि बलान्वितोपि
प्राप्तोपि जन्मभुवमाप्तधनप्रपञ्चः ।

नैवाप राज्यमुचितं स कृतप्रयत्नो
भाग्यैर्विना न हि भवन्ति समीहितार्थाः ॥ १११ ॥
अथ वा पितृशापः स तस्यापि फलितोभवत् ।
यदाप्तोपि निजं देशं परदेशे क्षयं गतः ॥ ११२ ॥
अत्रान्तरे महोत्पाता दिव्यभौमान्तरिक्षगाः ।
अहंपूर्विकयेवापुर्नृपतेर्जनकम्पदाः ॥ ११३ ॥
तथा हि प्रथमं राज्ञि पुष्पलीलाचिकीर्षया ।
गते मडवराज्योर्वीं भूमिकम्पोभवन्महान् ॥ ११४ ॥
अस्मत्कर्तृजनः कोपि सुखी नैवाधुना स्थितः ।
इतीव देशे तत्कालं चकम्पुर्जनवद्गृहाः ॥ ११५ ॥
उदभूत्पूर्वदिक्पुच्छः केतुर्नभसि विस्तृतः ।
पूर्वं बह्वामखानेन दृष्टो रिष्टस्य सूचकः ॥ ११६ ॥
स दूरविस्तृतः पुच्छः कालकुन्तोपमो दिने ।
स्फुरन्प्रतीचीं प्रत्याशां तस्यैव ददृशे जनैः ॥ ११७ ॥
युग्मसूर्वडवा राजमन्दुरान्तर्गताभवत् ।
देशात्कष्टुं ददौ राजा यां भिया यवनक्षये ॥ ११८ ॥
सिंहादयोवने चेरुर्वन्याः श्रीनगरान्तरे ।
विडालपोतं सुषुवे शुनी च प्रसवक्षणे ॥ ११९ ॥
निष्फलः सफलस्तूलीतरुः स सफलोभवत् ।
उपराजगृहं मूलाद्दाडिमीकुसुमोद्गमः ॥ १२० ॥
सुमनोवाटशाटान्तर्भवं शोणितवर्षणम् ।
इति दृष्ट्वा जनः सर्वः क्षते क्षारमिवान्वभूत् ॥ १२१ ॥
अत्रान्तरे वसन्सैदखानगाहादिपीडनम् ।
हिन्दुका विदधुः पूर्णनापितोद्धलिताः क्रुधा ॥ १२२ ॥

तच्छ्रुत्वा यवनाः सर्वे गत्वा क्रुद्धा नृपान्तिकम् ।
चुक्रुशुर्येन राजापि लोकपीडनमादिशत् ॥ १२३ ॥
अजरामरयुद्धादीन्स्वकीयान्सेवकानपि ।
तत्कोपेनाकरोद्राजा निकृत्तभुजनासिकान् ॥ १२४ ॥
त्यक्तस्वजातिवेशास्तद्दिनेषु ब्राह्मणादयः ।
न भट्टोहं न भट्टोहमित्यूचुर्भट्टलुण्ठने ॥ १२५ ॥
बहुखातकमुख्या ये पुरे सन्तीष्टदेवताः ।
क्रोधेन तेषां नगरे तदोत्पातो महानभूत् ॥ १२६ ॥
दत्ता भूर्जैनभूपेन येषां गुणपरीक्षया ।
तेभ्यस्तां निर्निमित्तेनाप्यहरन्नधिकारिणः ॥ १२७ ॥
समाहिसफरो मासः प्रसिद्धो म्लेच्छदर्शने ।
सर्वदर्शनविघ्नाय न केषां भयकार्यभूत् ॥ १२८ ॥
भूपं नित्यमदोन्मत्तं स्वतन्त्रं मन्त्रिमण्डलम् ।
उत्कोचहारिणः सर्वानन्तरङ्गांस्तरङ्गितान् ॥ १२९ ॥
दर्शिताबलपीडार्तिपण्डितानवलोक्य च ।
स्मृतश्रीजैनभूपालगुणमालस्तदा जनः ॥ १३० ॥
देशे सरुदिताक्रन्दं शुशोचात्यन्तदुःखितः ।
सर्ववृद्धिश्चिरारूढो ग्रस्तो दृष्टपराभवः ॥ १३१ ॥
सर्वकार्यान्तरज्ञोयं क्षयं याति कदा नृपः ।
इति येप्यवदन्दुष्टास्तत्सुतविभवार्थिनः ॥ १३२ ॥
पारसीभाषया काव्ये यदूचे दूषणा विशाम् ।
स शापः फलितो देशे श्रीमज्जैनमहीपतेः ॥ १३३ ॥
सेवकाः कितवप्राया भुक्तप्रेष्या नियोगिनः ।
तच्छापादिव कालेन प्राप्तात्यन्तनिपीडनाः ॥ १३४ ॥

किमस्मद्रक्षको दैवहतो वृद्धो महीपतिः।
इत्यादि सास्रु साक्रन्दाः शुशुचुस्तेपि पार्थिवम् ॥ १३५ ॥
स्वल्पोपि राज्यकालोभून्नवायामैः सुदुःसहः।
निदाघरात्रिसंदृष्टदीर्घदुःस्वप्नसंनिभः ॥ १३६ ॥
लोत्रराशिगृहद्रव्यहरणैः परपीडनैः।
तुतुषुस्तस्यभृत्यौघाः कौशिकास्तिमिरैरिव ॥ १३७ ॥
शय्यारूढो मधुक्षीवः प्रजाकार्यपराङ्मुखः।
सर्वं दिनं निनायान्तः स्वपार्श्वपरिवर्तनैः ॥ १३८ ॥
कुलालगायनोद्गीतं गीतं शृण्वन्दिवानिशम्।
गुणिभ्यो राजयोग्येभ्यो नादाद्दर्शनमात्रकम् ॥ १३९ ॥
शाहावदीनराज्ये या संपन्नातिमनोहरा।
लक्ष्मीपुरे राजधानी तां पुप्लोषोदितः शिखी ॥ १४० ॥
या बलाढ्यमठस्थाने वेश्माली विपुलाभवत्।
सापि दग्धा समं तत्र तत्तत्पौरजनश्रिया ॥ १४१ ॥
इत्याद्युपद्रवादेशे दृष्ट्वा वास्तव्यनाशकान्।
एतन्नाशाद्भवेद्विघ्नशान्तिरित्यवदज्जनः ॥ १४२ ॥
राजा पञ्चगृहावासं स्वं ज्वलन्तं समीक्ष्य च।
हर्म्यमारुह्य संतुष्टः पानलीलां व्यगाहत ॥ १४३ ॥
अस्मिन्नवसरे नेयधिषणः पिशुनेरितः।
यात्रार्थं सबलं पुत्रं बहिर्देशे व्यसर्जयत् ॥ १४४ ॥
यत्सैन्यं वीक्ष्य दैन्यं ते ययुर्बाह्यमहीभुजः।
प्रदीप्तं रविरश्म्योघं दिवसे तारका इव ॥ १४५ ॥
पूर्वं राजपुरीराजो जयसिंहो नृपात्मजम्।
स्वसारं च स्वसारं च दत्त्वा तोषयति स्म तम् ॥ १४६ ॥

कालाधारामसिलतामिव वीक्ष्य तदाश्रिताम् ।
कम्पं के नात्र देशस्थाः प्रापुस्तद्भयतो जनाः ॥ १४७ ॥
सेना दीन्नारकोटीयाः शिश्रियुस्तां भयच्छिदे ।
बलिभिर्मङ्गलादेवीमिवोन्नतभुवि स्थिताम् ॥ १४८ ॥
मद्रगगडचिम्भेशा राजहंसास्तमाययुः ।
सरोवरमिव प्रोद्यच्छुक्लपक्षा विनिर्मलम् ॥ १४९ ॥
राजवृत्तान्तरोधेन स्वपदार्थोपपादकैः ।
मातुलैरपि तस्याग्रे सुल्हणैः कल्हणायितम् ॥ १५० ॥
कौमारोद्धंसिकं वीक्ष्य कटकालंकृता अपि ।
अभूवन्धैर्यरहिता माहिला महिला इव ॥ १५१ ॥
बद्धपङ्क्तिस्तरन्ती सा ज्यलेमस्तनदीतटात् ।
तत्सेना रामबद्धाब्धिसेतुकौतुकमातनोत् ॥ १५२ ॥
कुटीपाटीश्वरप्राप्तं तत्सैन्यं दैन्यवर्जितम् ।
नारायणोदरोद्गच्छद्विश्वलोकभ्रमं व्यधात् ॥ १५३ ॥
संप्लुष्टे भोगपालानां पुरे मद्वाचितान्यपि ।
सुचिरं धूमितान्यासन्गृहाणि हृदयानि च ॥ १५४ ॥
उन्नादह्रदसंसङ्गतत्तुरङ्गतरङ्गिता ।
बाल्येश्वरगिरेः पादमूलं प्रापास्य वाहिनी ॥ १५५ ॥
तदीयकटको दीपस्तत्तुरङ्गतरङ्गितः ।
तं तमेव नतं चक्रे येन येन यथावहत् ॥ १५६ ॥
निस्तृणं भूतलं तत्तु निष्पानीया जलाशयाः ।
निरिन्धनान्यरण्यानि तत्सैन्ये चलितेभवन् ॥ १५७॥
सोहं संमान्य राज्ञास्मै दत्तस्तत्समयेन्वहम् ।
कुर्वन्बृहत्कथाख्यानमभूवं धृतपुस्तकः ॥ १५८ ॥

करदीकृतभूपालः स षण्मासकृतस्थितिः।
अभवच्चैत्रमासान्ते कश्मीरागमनोत्सुकः॥ १५९॥

तावद्बभ्राम बह्रामखानो दामनिरर्गलः।
आक्रान्तमन्त्रिसामन्तो ज्ञात्वा व्यसनिनं नृपम्॥ १६०॥

अथ संततपानेन क्षीणदेहबलच्छविः।
स वातशोणितव्याधिबाधितोभून्महीपतिः॥ १६१॥

प्राप्तो हस्सनखानः स पूर्णचन्द्र इवोदितः।
तान्दुष्टमन्त्रिणः पद्मानिव संकुचितान्व्यधात्॥ १६२॥

किं नैतेन समानीतो बद्ध्वा पिरुजगख्खडाः।
इति रोषं सुते राजा पिशुनप्रेरितोग्रहीत्॥ १६३॥

पश्चिमाशागतं श्रुत्वा तमपूर्वार्कसंनिभम्।
बह्रामखानो मन्देहोसंदेह इव सोभवत्॥ १६४॥

प्राप्ते सुतेन्तिकं सोभून्न तदत्यधिकादरः।
प्रत्यासन्नविनाशानां धीर्भीत्येव पलायते॥ १६५॥

अन्योत्क्रन्तितया मन्त्रिसामन्तानां महीपतिः।
यात्रागताय पुत्राय ददौ दर्शनमात्रकम्॥ १६६॥

नूनं स्वानुजभीतोभूत्तत्कालं सोन्यथा कथम्।
परिधानादिसत्कारं न्यूनमेवाकरोत्सुते॥ १६७॥

बह्रामो बाधते नूनं मत्पुत्रमिति शङ्कितः।
स तस्मिंच्छन्नकोपाग्निः शमीतरुरिवाभवत्॥ १६८॥

पानार्थं राजधान्यग्रं तस्मिन्नवसरे नृपः।
आरुरोह समं भृत्यैर्मृत्युनेव प्रचोदितः॥ १६९॥

तत्र पुष्करसौधान्तर्लीलया काचमण्डपे।
धावन्पपात नासाग्रस्रवदस्रविसंस्थुलः॥ १७०॥

कक्षाक्षिप्तभुजैर्भृत्यैर्नीतः शयनमण्डपम् ।
ध्वस्तच्छाय इवादर्शः संमूर्छञ्शयनेपतत् ॥ १७१ ॥
भिषजोस्यावमत्याप्तान्कोपि योगी चिकित्सतः ।
विषौत्कटौषधस्तस्य यतते स्म कृतव्यथः ॥ १७२ ॥
तस्यौषधप्रयोगेण प्राप्तदाहो दिवानिशम् ।
काङ्क्षति स्म स्वमरणं क्षणमात्रं न जीवनम् ॥ १७३ ॥
राजधान्यन्तरे राजसुतः स्वजनकान्तिके ।
आयुक्ताह्वदसंयुक्तस्तद्दिनेषु स्थितिं व्यधात् ॥ १७४ ॥
मुमूर्षौ पितरि ज्ञात्वा महतो दर्शनागतान् ।
तन्निर्गमनिरोधाय द्वारधान्यां भटान्व्यधात् ॥ १७५ ॥
स्वालयस्थोनुजो राज्ञो भयहर्षाप्तसंभ्रमः ।
करानिव रविस्तीक्ष्णांश्चारान्संचारयन्नभूत् ॥ १७६ ॥
तत्कालं राजलक्ष्मीः सा पितृव्यभ्रातृपुत्रयोः ।
द्वयोरासीत्समारूढा चित्ते संशयधीरिव ॥ १७७ ॥
अत्रान्तरे ह्वदायुक्तः संमन्त्र्य सचिवैः सह ।
बह्वामखानमागत्य युक्तमित्यब्रवीद्वचः ॥ १७८ ॥
स्वामिहैधरशाहोद्य समर्प्य स्ववयस्त्वयि ।
सुगृहीताभिधो भ्राता प्रयातः कीर्तिशेषताम् ॥ १७९ ॥
ज्येष्ठोधुनावशिष्टस्तद्भवान्भज नृपासनम् ।
स्वयं हस्सनखानाय यौवराज्यं प्रदीयताम् ॥ १८० ॥
त्वत्पित्रा महतो यत्नाद्रक्षिता चकिता सती ।
सेयं त्वयाद्य नगरी पाल्या कुलवधूरिव ॥ १८१ ॥
किमन्यत्पुरलुण्टाकाः काका इव बलिप्रियाः ।
यथागतं प्रयान्त्वेते कुशब्दा मलिनत्विषः ॥ १८२ ॥

श्रुत्वेति भाषितं तस्य कोपरूक्षाक्षरोब्रवीत्।
सुस्निग्धो जनकस्त्यक्तस्तादृक्कल्पद्रमोपमः ॥ १८३ ॥
सदैवादमखानः स बाधितस्तदुपाधिभिः।
परलोकमनालोच्य स्वार्थं संत्यज्य दूरतः ॥ १८४ ॥
अस्वस्थः स यथा भ्राता सेवितः सततं मया।
जानात्येवं न को राज्यं यथा तस्य मयार्जितम् ॥ १८५ ॥
कोयं मद्भ्रातृपुत्रोद्य वद कैवास्य योग्यता।
अस्मिन्मत्पैतृके राज्ये योग्यो मदपरस्तु कः ॥ १८६ ॥
स कनीयानहं ज्येष्ठो वयसा च गुणेन च।
पृथिव्यां वीरभोग्यायां साम्नः कोवसरोधुना ॥ १८७ ॥
इत्याद्यनुचितं यत्तच्चोक्ता तं प्रत्यमोचयत्।
यैः स ग्रथितकन्थोभूद्राज्यार्थे कृतभावनैः।
अप्राप्यैतांस्तथा मत्वा निराशः समपद्यत ॥ १८८ ॥

प्रत्यासन्ने नाशे
रुद्धजलौघस्य बद्धमूलस्य।
कुपथा प्रसरत्यादौ
धृतिरिव सेतौ मतिर्जन्तौ ॥ १८९ ॥

युक्तमयुक्तवाक्ये चेदग्रहीष्यन्नयान्वितः।
तुरगार्घार्जितं सर्वमदास्यच्चेत्स्वयं गतः ॥ १९० ॥
अथवाप्तं तमेकं चेदहनिष्यद्बलोन्नतः।
कोशं हर्तुमयास्यच्चेत्स्थितं पितृपुरान्तरे ॥ १९१ ॥
अथवा बाह्यदेशं चेदगमिष्यत्तदध्वना।
निवृत्तः क्रमराज्ये चेदाक्रमिष्यच्छनैर्महीम् ॥ १९२ ॥
क्रमाप्तसकलस्यास्य किमु नश्येद्विलम्बतः।
बालबालिशभृत्योक्ता युक्तवाक्याविनिश्चयात् ॥ १९३ ॥

अनभिज्ञतया तेन तव किं किं न हारितम् ।
नास्मत्कोपि चिरं भोक्ष्यत्यतितीक्ष्णतया धिया ॥ १९४ ॥

वरमज्ञे सुते राज्ञो राज्यं दत्त्वास्ति नः सुखम् ।
इत्येकमेवं संबोध्य बलिनं नृपवल्लभम् ॥ १९५ ॥

आयुक्ताह्वदमल्लेकः संमन्त्र्य सचिवैः सह ।
चक्रे संभावनां राज्यनिश्चये राजसूनवे ॥ १९६ ॥

गत्वास्कन्दं प्रदास्यामि बह्रामामिति दर्पतः ।
अभिमन्युप्रतीहारो निश्चिकायाभिषेचनम् ॥ १९७ ॥

अथ स्वच्छन्दवार्तां स श्रुत्वा तूर्णं सुतान्वितः ।
वह्रामखानो वित्राणो निरगान्नगरान्तरात् ॥ १९८ ॥

दृष्ट्वा महार्घमणिमौक्तिकविद्रुमौघा-
त्रत्नाकरं श्रयति लुब्धमतिः स एकः ।
तत्तन्महाभयकरान्मकरांस्तदीया-
न्वीर्येण यः शमयितुं गतभीः समर्थः ॥ १९९ ॥

श्रुत्वा स्वभ्रातृपुत्रस्य चरितं चित्रमत्र सः ।
वित्रासितबलः पुत्रयुतो द्वाराध्वनाचलत् ॥ २०० ॥

यथैवादमखानस्य निष्काशनमयं व्यधात् ।
तथैवास्याभवद्रात्रौ न चिरेण फलत्यघः ॥ २०१ ॥

राज्यं च दशमासाब्दे कृत्वा मासि स माधवे ।
वर्षेष्टचत्वारिंशेगाद्दिवं श्रीपञ्चमीदिने ॥ २०२ ॥

वेतालोवसदुद्दण्डस्तम्भमण्डितमण्डपे ।
तेनैवोच्चण्डकोपेन खण्डितोक्रियया नृपः ॥ २०३ ॥

इत्यूचुः केपि केप्यूचुर्योगिनोशस्तहस्ततः ।
न्यस्तोत्कटौषधेर्ध्वस्तरुचिरस्तमगान्नृपः ॥ २०४ ॥

केचिद्धात्रैव दुष्टेन कैवल्यात्सुतवर्जिते ।
भूपतेर्दुश्चिकित्सार्थे कारिता भिषजस्त्वराम् ॥ २०५ ॥
दिव्यं मौसुलदेवेन कृत्वाश्वस्ततया तया ।
वहिः श्यौटालदेशादौ हत्वा द्रोहेण पार्थिवान् ॥ २०६ ॥
येभ्यश्च राज्यतिलकं सिंहासनगतोग्रहीत् ।
पित्र्यांस्तान्सचिवान्हत्वा प्रमीत इति केचन ॥ २०७ ॥
नूनं स पितृशापेन तत्तत्पापेन दूषितः ।
हिमौघ इव तापेन विलयं प्रापदञ्जसा ॥ २०८ ॥
निष्कण्टकं पुरं ज्ञात्वा निःशङ्को नृपनन्दनः ।
जनकं शिविकारूढं स निनाय शवाजिरम् ॥ २०९ ॥
मञ्जूषिकान्तरान्नीत्वा तं पटैकावृतं शवम् ।
पितुः पादतले तत्र भूगर्भाभ्यन्तरेक्षिपत् ॥ २१० ॥
सर्वे मृन्मुष्टिकामात्रमेतदेवेति शंसिनः ।
मुखावलोकनं कृत्वा तस्मिन्मृन्मुष्टिकां जहुः ॥ २११ ॥
गर्तं तत्र समापूर्य शिलां मध्योन्नतां न्यधुः ।
कठिनोयमभूद्युद्धे जनानित्येव सूचितुम् ॥ २१२ ॥
अरुदन्सेवकास्तस्य कृतवक्षोवदारणाः ।
स्मृत्वा स्वामिप्रसादानां मुखरीकृतदिङ्मुखाः ॥ २१३ ॥
तद्राज्यं स्वल्पकालीनं प्रसादसुभगोर्जितम् ।
अबिन्दन्सेवकास्तस्य स्वप्नस्वर्गाप्तिसंनिभम् ॥ २१४ ॥
पारसीभाषया हिन्दुस्थानवाचा च भूपतिः ।
काव्यं गीतं व्यधाद्येन प्रशसन्ति न के जनाः ॥ २१५ ॥
पुराणधर्मशास्त्राणि मोक्षोपायादिसंहिताः ।
शृण्वतो भूपतेरासीद्यामिनीषु प्रजागरः ॥ २१६ ॥

दोषाकुलाः परगृहाशुभपाकदा ये
घूकादयो दिनपतेरुदयं द्विषन्ति ।
तस्मिन्समुद्यति महारुचिरप्रकाशे
निष्ठा भ्रमन्ति विपिनेषु गुहाप्तदुःखाः ॥ २१७ ॥

दुष्टान्मेरेप्तकारादीञ्ज्ञात्वा निष्ठान्विशिष्टधीः ।
खानोन्येद्युः सुदुःखोपि कारागारान्तरे न्यधात् ॥ २१८ ॥

निर्वर्त्यान्यक्रियां सर्वां स पितुर्व्ययशालिनीम् ।
राज्याभिषेकसंभारं चक्रे षोडशभिर्दिनैः ॥ २१९ ॥

घूकादयो नभसि सन्ति पराप्रशस्ता-
स्तावत्प्रदोषसमयाप्तसुखप्रचाराः ।
आशाप्रकाशविशदो विलसत्प्रकाशो
भास्वान्न यावदुदयं कुरुते सुचण्डः ॥ २२० ॥

इति जैनराजतरङ्गिण्यां पण्डितश्रीवरविरचितायां हाजीहैदर-
शाहराज्यवृत्तान्तवर्णनं नाम द्वितीयस्तरङ्गः ॥

शिवायास्तु नमस्तस्मै त्रैलोक्यैकमहीभुजे ।
अशेषक्लेशनिर्मुक्तनित्यैश्वर्यदशाजुषे ॥ १ ॥

भूतं यद्राज्यवृत्तान्तं वर्तमानं करोत्यलम् ।
स्ववाग्योग्यप्रकारेण वन्द्यो योगीश्वरः कविः ॥ २ ॥

प्रतिग्रहानुग्रहाप्ता भुक्ता यन्नृपजीविका ।
तद्वृत्तं स्वस्य निष्कृत्यै वक्ष्ये श्रीवरपण्डितः ॥ ३ ॥

स्वदृग्दृष्टस्मृतक्ष्माभृद्विपद्विभववैकृतैः ।
सेयं कस्य न वैराग्यं सूते राजतरङ्गिणी ॥ ४ ॥

राज्यवृत्तानुरोधेन न काव्यगुणचर्चया ।
सन्तः शृण्वन्तु मद्वाचः स्वधिया योजयन्त्वपि ॥ ५ ॥

कायस्थोक्तिवदेवेयं कृता स्मृत्यै भविष्यताम्।
दृष्ट्वेदं ललितं काव्यं कुर्वन्त्वन्येत्र पण्डिताः ॥ ६ ॥
ततः श्रीहस्सनो राजा व्यसनोज्झितवासनः।
सिकन्दरपुरीं त्यक्त्वा पित्र्यं प्राशस्त्यसुन्दरम्।
अगमज्जैननगरं पितामहविनिर्मितम् ॥ ७ ॥
सिंहासनोपविष्टः स निर्मलाम्बरभूषणः।
बभौ कुवलयानन्दी शशीवोदयपर्वते ॥ ८ ॥
मल्लकोथाह्वदायुक्तो विधाय तिलकं स्वयम्।
सौवर्णकुसुमैः पूजामकरोन्नवभूपतेः ॥ ९ ॥
रौप्यासनसमुद्गान्तः कृत्वा छत्रपिधानकम्।
एकशेषतयेव श्रीररक्षद्वंशभूषणम् ॥ १० ॥
चित्रं नवनृपस्यास्य मुखचन्द्रावलोकनात्।
नगराननपद्मानां विकाशः समपद्यत ॥ ११ ॥
अभिषेकक्रियारब्धहोमधूममिषाद्भुवः।
हर्षेणैवोद्गतो राज्ञो मुखोच्छास इवाबभौ ॥ १२ ॥
वाद्यमानोद्यतातोद्यतोद्यत्प्रतिरवच्छलात्।
सुप्रसन्नाः सुदेवस्य प्रोचुः पूर्णाशिषो दिशः ॥ १३ ॥
ध्वजमाला बभुर्दीर्घस्फुरद्रक्तपटाञ्चलाः।
ज्वाला इव प्रतापाग्नेर्निर्गता नवभूपतेः ॥ १४ ॥
छायाकुसुमकार्यास्ता बभुः श्वेताः प्रविस्तृताः।
चिरात्तरुणराजाश्या हर्षहासा इव श्रियः ॥ १५ ॥
कौशेयकोज्ज्वलाः सर्वे सेवका नवभूपतेः।
स्फुरद्भाग्यतरङ्गस्य तरङ्गा इव तेरुचन् ॥ १६ ॥
कार्पासकपरीधानं यत्र यत्राभवत्पुरा।
तत्र तत्रास्त तद्राज्ये कौशेयकव्ययो महान् ॥ १७ ॥

राज्यलाभे वसन्ताभे सूर्यस्येव महीपतेः ।
प्रत्यापहारकाः सर्वे दुष्टमेघा लयं ययुः ॥ १८ ॥

रविः प्रदीप्तः कुरुते प्रकाशं
विभाति चास्मिन्सति सूर्यकान्तः ।
तस्मात्समुत्थः स च पावकोर्च्य-
स्तमोपहः किं न करोति कार्यम् ॥ १९ ॥

आसन्पितृपितृव्याद्या यत्कृते विफलश्रमाः ।
पौत्रेण हेलया प्राप्तं तद्राज्यं गतकण्टकम् ॥ २० ॥

पितुः पितामहस्यापि पितृव्यस्य च संपदः ।
भाग्यभाजं नृपं प्रापुः सर्वाः सिन्धुमिवापगाः ॥ २१ ॥

षड्दर्शनपरिचयं सोग्रहीन्मत्सरोज्झितः ।
षड्दर्शनक्रिया यस्मिन्नैकमत्यमिवाययुः ॥ २२ ॥

भूपतेरह्मदायुक्तो नियुक्तः सर्वकर्मसु ।
साचिव्यं पुत्रसंयुक्तः पुण्योद्युक्तः सदाकरोत् ॥ २३ ॥

अथ प्रथममेवाह्मदायुक्तं मल्लिकं नृपः ।
स ग्रामग्रामनाग्रामप्रमेयस्वामिनं व्यधात् ॥ २४ ॥

पुत्रोस्य नौरुजा युक्तो द्वारपालादिकार्यभाक् ।
इक्षिकामभजद्राष्ट्रं स ग्रामविभवोर्जितः ॥ २५ ॥

पानलीलान्तरे तत्र प्रसादामृतवर्षिणा ।
येन दारिद्र्यदावाग्निः केषां न क्षपितः क्षणात् ॥ २६ ॥

वहिर्देशस्थिते राज्ञि बाल्ये यः सेवकोभवत् ।
स ताजिभट्टो मल्लेकमतः प्रापान्तरङ्गताम् ॥ २७ ॥

निग्रहानुग्रहव्यग्रः समग्रे राज्यविग्रहे ।
दत्तदूत्याधिकारेण राज्ञो जिह्वेव सोभवत् ॥ २८ ॥

अधिकारनदी पूर्वं स्फुरन्ती शतधाभवत्।
तदा द्वितीयया वृत्त्या तस्मिन्कृतपदा बभौ ॥ २९ ॥
अन्येप्युच्चावचान्ग्रामाञ्जोनराजानकादयः।
पूर्वसेवानुसारेण प्रसादं प्रापुरञ्जसा ॥ ३० ॥
श्रीमल्लेकाह्वदः सर्वकार्ये यां स्थितिमब्रवीत्।
तां नोदलङ्घयद्राजा वेलां सिन्धुरिवोल्वणः ॥ ३१ ॥
पित्र्याः पैतमहा वापि निरुद्धा बन्धनेवसन्।
भुक्तदेशं धिया तस्य तेषां निष्काशनं व्यधात् ॥ ३२ ॥
सर्वदर्शनसंयुक्तो नृपो मन्त्रिविधेयधीः।
पितामहसमाचारं प्रावर्तयत मण्डले ॥ ३३ ॥
स्वामी क्षमी कृतज्ञश्च मन्त्री भक्तः स्मयोज्झितः।
संयोगोयं प्रजापुण्यैः संचिरेण निरीक्षितः ॥ ३४ ॥
उच्चासनेषु मार्गेशठक्कुरादीन्निवेशयन्।
तद्दूत इव राजाग्रे स निषण्णोभवत्तदा ॥ ३५ ॥
हितं प्राणपणेनापि प्रभोः संपादयन्नयम्।
महेश्वरवदेतस्मिन्नाभवद्भक्तिखण्डितः ॥ ३६ ॥
मठाग्रहारसदननिर्माणातिथिपूजनैः।
नृपोपचारैः साफल्यमनैषीत्सर्वसंपदः ॥ ३७ ॥
कमलममलं दृष्ट्वा श्रीमत्स्वकोशविभूषितं
मथयितुमथ प्राप्तो यावन्मदान्मदवारणः।
प्रकृतिमलिनस्तावन्मग्नः सपङ्कसरोवरे
श्रवणचपलो बद्धो याति क्षयं मधुपैः सह ॥ ३८ ॥
अत्रान्तरे स बन्हामखानः पिशुनमोहितः।
देशान्तरोद्यमं त्यक्त्वा युद्धायागान्मदोद्धतः ॥ ३९ ॥

त्वद्बलान्तरमेष्यामो वयं तव रणक्षणे ।
इति लेखैर्धृताशं तमकुर्वन्राजपूरुषाः ॥ ४० ॥
कर्णाभ्यन्तरतः शैलानुल्लङ्घ्य कटकोत्कटः ।
क्रमराज्यपुरं प्राप्तः क्रमराज्यजिहीर्षया ॥ ४१ ॥
तावन्मन्त्रियुतो राजा स्थितोवन्तिपुरान्तरे ।
तत्प्रत्यावृत्तिवार्तां तां श्रुत्वा तूर्णं न्यवर्तत ॥ ४२ ॥
राजा सुय्यपुरं प्राप्तः पितृव्यागमविह्वलः ।
आनीय सचिवान्सर्वान्सभान्तरिदमब्रवीत् ॥ ४३ ॥
पितुः क्रमागतं राज्यं पुत्रस्येत्युचितं मम ।
कोयं पितृव्यो ज्येष्ठोपि कनिष्ठो निर्मितोद्यमः ॥ ४४ ॥
अथ वा वीरभोग्यायां भुवि कोयं न यो द्वयोः ।
युद्धेन विजयी यः स्याद्राज्यभाक्सोस्तु मण्डले ॥ ४५ ॥
श्रुत्वेति नृपतेर्वाक्यं प्रत्यूचुर्मन्त्रिनायकाः ।
ये तेप्यादमखानाद्यास्त्वदर्थं विधिना हताः ॥ ४६ ॥
कोयमल्पबलस्ते स्याद्योद्धा स्थानपरिच्युतः ।
किं त्वद्यावसरो नास्ति समित्युभयवेतनाः ॥ ४७ ॥
अमुमेव मिलन्त्येते यदि किं क्रियते पुनः ।
तद्धृत्वा कोशसामग्रीमितो गत्वा बहिस्ततः ॥ ४८ ॥
देशमाक्रम्य नः कार्यं सिद्धयत्येवाचिराद्विभो ।
श्रुत्वेति मल्लिकः प्राह भूपं तत्र सभान्तरे ॥ ४९ ॥
तिष्ठत्वत्र भवांस्तावन्मौनं मन्त्रिसभान्वितः ।
स्वकीयादमखानीयाञ्जेतुं तं विसृजामहे ॥ ५० ॥
ते चेज्जिता वयं यामः पुनः सर्वबलान्विताः ।
कोयं तत्संभ्रमः कस्य सहायः किं करोत्यसौ ॥ ५१

श्रुत्वेत्यादि मतं तेषां विविधं निश्चयोज्झितः।
मल्लेकाह्वदमन्त्रेण कर्तव्ये प्रत्यपद्यत ॥ ५२ ॥
पितुः पितामहस्याथ सैन्यं वृत्वा निजान्तिके।
पैतृव्यान्सेवकान्स्वांश्च दत्त्वा तत्तद्बलान्वितान् ॥ ५३ ॥
सफिर्यडामरांस्ताजिभट्टादीन्व्यसृजन्नृपः।
योद्धुं बन्हामखानाय मावरीदेशवासिने ॥ ५४ ॥
अथ स्वल्पबलानेताञ्जेष्यामीति त्वराकुलः।
तावद्बन्हामखानः स प्राप डुलपुरान्तरम् ॥ ५५ ॥
अनागतैः कृताश्वासैरपि राजमहत्तमैः।
स्वात्मानं वञ्चितं मेने तन्निराशो नृपात्मजः ॥ ५६ ॥
तद्दिने राज्यलक्ष्मीः सा पितृव्यभ्रातृपुत्रयोः।
द्वयोरासीत्समारूढा कोट्योः संदेहधीरिव ॥ ५७ ॥
चौरा इवान्धकारौघे द्वैराज्योपप्लवप्रियाः।
तुतुषुश्चक्रवाडाद्यास्तं श्रुत्वा क्रमराज्यजाः ॥ ५८ ॥
अथ जैनगिरिं यावदाययौ तद्रणाकुलः।
दूतस्तावत्समागत्य भूपतेरिदमब्रवीत् ॥ ५९ ॥
देव बन्हामखानः स तनयो नयविच्युतः।
युयुत्सुः समरे बद्धः करीव मदनिर्भरः ॥ ६० ॥
पतिते तद्रणोद्याने त्वद्बलोद्धतमानसे।
तत्यजेनुचरैः खानः पौषे पर्णैरिव द्रुमः ॥ ६१ ॥
ततः संजरमीराद्या गर्जन्तः सैन्यनायकाः।
दुष्टमेघा इवायाताश्चक्रुस्तच्छरवर्षणम् ॥ ६२ ॥
धन्यास्ते श्लाघ्यमरणाः स्यरणाः स्वामिनः पुरः।
स्मृत्वामितप्रसादानां जीवं यत्तृणवज्जहुः ॥ ६३ ॥

तच्छुद्धये ऋणमिवेक्ष्य मितप्रसादं
प्राप्ते क्षणे जहति ये निजजीवरत्नम् ।
शस्त्राणि पुष्पनिकरानिव संविदन्तो ।
धन्यास्त एव कतिचित्प्रभुसेवकेभ्यः ॥ ६४ ॥

अथ देवस्य माहात्म्यं यत्तस्यैव रणे भटाः ।
शिरालमार्गपाद्या थे तद्भृत्याः प्रलयं ययुः ॥ ६५ ॥

इदं चित्रतरं यन्नः कटके कोपि नो मृतः ।
किं त्वस्मद्भटनिर्मुक्तशराग्रफलसंधितात् ॥ ६६ ॥

निष्कृष्टुं नाशकत्कोष्ठात्खड्गं खानो रणोद्यतः ।
तेनाफलयुधः खानो दीनस्त्वद्भटवेष्टितः ॥ ६७ ॥

चितानल इवासारैर्मिथोष्मा समपद्यत ।
यावत्समेत्य हन्तुं तं प्रारभन्कृपया द्रुतम् ॥ ६८ ॥

तं फिर्यडामरस्तावदरक्षद्बाहुपञ्जरे ।
भूः पङ्किलातिवृष्टिश्च द्विजोग्रे निःसहायता ॥ ६९ ॥

मृत्युभीतिरिति प्राभूत्कि किं तस्य न दुःखदम् ।
शीतवातभयोद्विग्नाः मग्नाः केदारकर्दमे ॥ ७० ॥

त्यक्ता तं तद्भटा नग्ना गर्ताटा इव तेचलन् ।
अर्जितां सर्वसामग्रीं पामरैः परिलुण्ठिताम् ॥ ७१ ॥

साक्रन्दं च सुतं पश्यन्नश्यद्धैर्यः स विव्यथे ।
दध्यौ च क्व च मे भ्राता क्व भृत्याः क्व गृहादिकम् ॥ ७२ ॥

स सुतः शत्रुभिर्बद्धः कं पृच्छामि करोमि किम् ।
वरं मरणमेवास्तु मा मास्तु मम जीवनम् ॥ ७३ ॥

फलितं वचनं मेद्य यदुक्तं जनकेन तत् ।
धिङ्मां चिन्तामणिं त्यक्ता येन काचमणिः श्रितः ॥ ७४ ॥

इत्यादि निन्दन्स्वात्मानं पश्चात्तापहताशयः ।
जीवन्मरणमापन्नः खानः संप्रति वर्तते ॥ ७५ ॥
पौषे तरुरिवोन्नग्नः फलपत्रविवर्जितः ।
राज्यं तव क्रमायातं दत्तं दैवेन भुज्यताम् ॥ ७६ ॥
फलितो धर्मविजयः सोयं भाग्यैर्महीपते ।
किमन्यत्तस्य कर्तव्यं यत्तत्पूर्णं समादिश ॥ ७७ ॥
श्रुत्वेति नृपतिस्तुष्टो दत्त्वास्मै पारितोषिकम् ।
जयवाद्यनिनादौघैः सर्वं बलमतोषयत् ॥ ७८ ॥
अन्येद्युस्तद्भटा जैनगिर्यो कटकवेष्टितम् ।
बन्हामखानमानिन्युः ससुतं भूपतेः पुरः ॥ ७९ ॥
संग्रामविजयोत्सिक्तं सत्कर्तुं स्वभटव्रजम् ।
सहर्षो राजधानीं तामारुरोह नरेश्वरः ॥ ८० ॥
उच्चावचोक्तिमुखरपौरान्तरगतं नतम् ।
भूमेरन्ध्रमिवेक्षन्तं लज्जया च भयेन च ॥ ८१ ॥
रणक्षणभटन्यस्तहस्तध्वस्तविभूषणम् ।
दयालुनीचदत्तात्मजीर्णवस्त्रावगुण्ठितम् ॥ ८२ ॥
मुखलग्नेषुभेदोद्यद्रक्ताक्तधृतवेष्टनम् ।
अलक्ष्मीवीक्षितं दूरात्पितृव्यं क्षणमैक्षत ॥ ८३ ॥
भाग्योर्जितस्य भूभर्तुरग्रे बद्धः समात्मजः ।
दीनात्मा ददृशे पौरैः स्थिराः कस्य विभूतयः ॥ ८४ ॥
लोभाक्रान्तधियो विवेकमुचितं मुञ्चन्ति यन्मोहिता
भुक्ता या मनसापि दर्पकचितास्त्यक्तुं न शक्याः स्वयम् ।
संतापाय भवन्ति संततमलं नीताः परैश्चेद्वला-
न्मामा सन्तु भवेत्र हन्त चपला वेश्या इवैताः श्रियः ॥८५॥

उपेक्षितः पिता तादृगस्वास्थ्ये स्वार्थलिप्सया ।
ज्येष्ठोप्यादमखानः स बाधितोपाययुक्तिभिः ॥ ८६ ॥

दुराशयापरो भ्राता श्रियोसाध्या अपेक्षणात् ।
राज्यलोभाद्भ्रातृसुते तास्ता द्रोहधियः कृताः ॥ ८७ ॥

अद्यैतेन फलं प्राप्तं तदधर्मविनिश्चयात् ।
दृष्ट्वा बद्धं तमानीतं खानमित्यवदज्जनः ॥ ८८ ॥

केप्यूचुः स पितुः शापाद्विमूढः समपद्यत ॥
तथा हि तं पिता जातु पितृद्वैधे रहोब्रवीत् ॥ ८९ ॥

राज्यं त्वदग्रजाभ्यां मे नाशितं वैरतो मिथः ।
तत्राप्यनिष्टौ द्वावेव मम चिन्ताज्वरप्रदौ ॥ ९० ॥

तदेतौ विनिवार्याहं युक्त्या देशसुखाशया ।
त्वामेव वर्धयिष्यामि त्वं मदेकाश्रयो भव ॥ ९१ ॥

श्रुत्वेति प्राह तं नाहं जातु चेद्भ्रातरं त्यजे ।
यतो ज्येष्ठोस्ति मे द्विष्टो द्वयोः किं स करिष्यति ॥ ९२ ॥

श्रुत्वेत्याहाग्रजं हन्तुं त्वयेच्छुस्त्वां स रक्ष्यति ।
प्राप्तप्राघुणहस्तेन भुजङ्गमिव वेश्मगम् ॥ ९३ ॥

सिद्धकार्यः सपुत्रः स बाधते यदि का गतिः ।
तच्छ्रुत्वा संस्कृतज्ञः स श्लोकेनेत्युत्तरं ददौ ॥ ९४ ॥

विद्यातीर्थे श्रुतपरिचिताः साधवः सत्यतीर्थे
गङ्गातीर्थे सकलमुनयो योगिनोध्यात्मतीर्थे ।
लज्जातीर्थे कुलयुवतयो दानतीर्थे वदान्या
धारातीर्थे धरणिपतयः किल्विषं क्षालयन्ति ॥ ९५ ॥

तदाकर्ण्याब्रवीद्राजा सक्रोधं तं दुराशयम् ।
बहुधा युद्धदृष्टोसि नाहं यत्रास्मि तत्क्षमः ॥ ९६ ॥

वराकः खड्गधारार्थी तत्र त्वमपि दर्पितः।
किं वच्म्युत्पाटने योग्ये नेत्रे पश्यामि दुर्धियः॥ ९७॥
तदेक एव नष्टस्त्वं भवेः सानुशयोचिरात्।
इत्युक्तमस्मिन्पित्रा यत्तदद्य फलितं वचः।
तमीक्ष्येति कथा लोकः सशोकोप्यकरोन्मिथः॥ ९८॥

(इति वन्हामखानपराजयः।)

यथोचितैर्दानमानैस्तोषयित्वा निजं बलम्।
तस्मिन्नेव दिने राजा तुष्टो नगरमाययौ॥ ९९॥
बद्धं रिपुं समादाय नौकारूढं सुतान्वितम्।
श्रीजैननगरे राजावासे स्वे बन्धने व्यधात्॥ १००॥
जननी नृपतेः प्रीता दर्शनामृतहर्षणा।
अमन्यत रणोत्तीर्णं पुनर्जातमिवात्मजम्॥ १०१॥
शङ्कितो यौनसंबन्धाद्भूपतिः कतिचिद्दिनैः।
रुषावतारसीहादीन्कारागारान्तरे व्यधात्॥ १०२॥
पापो मल्लिकजाजः स पञ्चगह्वरदेशजः।
पुनश्चटुकतन्त्रेण तत्तदायासकार्यभूत्॥ १०३॥
उत्कोचमुद्रादानादिप्रपञ्चाञ्चितवञ्चनः।
सुसंचयकृता येन देशोशेषो विलुण्ठितः॥ १०४॥
अभिमन्युप्रतीहारः स्वतन्त्रो मन्त्रिमण्डले।
स देवसरसि स्वाम्यमभजद्बलदर्पितः॥ १०५॥
लोत्रप्रतिग्रहक्षेत्रदत्तरुद्धिः पदे पदे।
लुब्धः स निजमात्मानमनाशीर्भाजनं व्यधात्॥ १०६॥
शङ्क्यो राजगृहासन्नः पितृव्यो बन्धनस्थितः।
त्वय्यन्यत्र स्थिते कोपि नीत्वा द्वैराज्यमाचरेत्॥ १०७॥

इत्यादिप्रेरितोनेन नेयबुद्धिर्नरेश्वरः ।
क्रुद्धो बह्वामखानाय नेत्रोत्पाटनमादिशत् ॥ १०८ ॥
तस्य तूलाचिते नेत्रद्वये तप्तां शलाकिकाम् ।
जैनराजानको लौहीं दृङ्नाशार्थमदापयत् ॥ १०९ ॥
नैर्घृण्यमक्षिहर्तुर्यत्कृष्टाक्षस्य च या व्यथा ।
द्वयं न शक्यते वक्तुं यथार्थं मादृशां गिरा ॥ ११० ॥
दुर्नीतिमवदन्केचित्केचिदीश्वरजृम्भितम् ।
प्राक्कर्मपाकमपरे नीचसङ्गमथापरे ॥ १११ ॥
केचिद्विभववैशस्यं कातरत्वमथापरे ।
तदन्धकरणं श्रुत्वा कोप्यवाच्यगिरोब्रवीत् ॥ ११२ ॥
मानुष्यं मास्तु तच्चेत्स्याद्वरं प्राकृतवेश्मनि ।
राजगेहेस्तु मा जन्म कस्यापीति न कोवदत् ॥ ११३ ॥
स्फूर्जद्भाग्यसमुद्भवश्चवनवप्रोल्लाससंपत्सुखः
प्रायो वेत्ति विभुर्विनोदकलया कालं विशालं क्षणम् ।
दौर्भाग्योदितदुर्गतेः स्मृतनिजप्राच्यप्रकर्षोन्नते-
स्तस्य प्राप्तमहाभयस्य स भवेत्स्वप्नोपि कल्पोपमः ॥११४॥
अयःशृङ्खलबद्धाङ्घ्रिः सोन्धस्तत्रैव बन्धने ।
स्मरन्विभवसामग्रीमनयच्छेषमायुषः ॥ ११५ ॥
नायं गीतैर्विना जातु वर्तते स्म गृहान्तरे ।
इत्येव तस्य सारावा झिल्लचो जागरणं व्यधुः ॥ ११६ ॥
योभूच्छय्यागृहे नित्यं सर्वाङ्गे सेवकैर्वृतः ।
अभूवन्केवलं तस्य भृत्याश्चटकमत्कुणाः ॥ ११७ ॥
वितानावलयो यस्य बभूवुर्दुर्लभाः सुरैः ।
दृष्टास्त एव तद्गेहे लूतातन्तुविनिर्मिताः ॥ ११८ ॥

यद्वपुः कोमलं पट्टतूलशय्यामभूषयत्।
तदा तत्तस्य भूपृष्ठेशयिष्टादृष्टविष्टरम्॥ ११९॥

दीयतां दीयतां तस्य वाणी या त्यागिनः श्रुता।
विपत्क्षणेन सैवाभूत्तत्तद्वस्तूपयाचने॥ १२०॥

गतं स्वाम्यं हता भृत्याः प्राप्तः परिभवो नवः।
बन्धनं शृङ्खलाबन्धैर्नेत्रोत्पाटनतो व्यथा॥ १२१॥

इत्येवैकः स्मरन्दुःखं सोन्धो राजसुताश्चिरम्।
नाशासीत्स्वात्मनस्तुल्यमपरं प्राक्कथास्वपि॥ १२२॥

कोशोज्ज्वलं कमलमीक्ष्य नवं समन्ता-
दस्मिन्नमेहमिति तुष्यति चञ्चरीकः।
दोषानुषङ्गमधिगम्य निबद्धमूर्ति-
स्तत्रैव नाशमुपयाति विधौ विरुद्धे॥ १२३॥

राजवासः स्वलीलार्थं निर्मितस्तेन यः स्वयम्।
स एव बन्धनायाभूत् को वेत्ति भवितव्यताम्॥ १२४॥

इत्थं वर्षत्रयं तावदनुभूतमहाव्यथः।
अस्थिशेषतनुः क्लेशात्तस्मिन्नेव क्षयं ययौ॥ १२५॥

देशकालमनालोच्य वैरं यः कुरुतेरिभिः।
स नश्यत्यचिरेणैव शौर्यश्रीमण्डितोपि सन्॥ १२६॥

अभिमन्युप्रतीहारस्तत्तच्छौर्यमदोद्धतः।
अयुक्तपक्षं प्रबलं नासहिष्ट स निष्ठुरः॥ १२७॥

स्वातन्त्र्येण स्फुरत्प्राग्वत्स्फुरद्वाक्शरताडनम्।
दर्पादायुक्तपक्षस्य सूचीवाक्षिगतोभवत्॥ १२८॥

उपायान्कुर्वता तांस्तांश्छन्नकोपेन मन्त्रिणा।
बन्द्धुं तं मल्लिकेनात्र नावाप्यवसरः क्वचित्॥ १२९॥

एकदा तद्गृहं गत्वा श्वस्तं श्रीविजयेश्वरे ।
तद्धिया नृपती राजधान्यन्तस्तमबन्धयत् ॥ १३० ॥
अभिमन्युः स्वयं ख्यातः पाण्डवाद्याश्च तत्सुताः ।
शृगालवत्तदाभूवन्धिगिच्छां विविधां विधेः ॥ १३१ ॥
यस्याहवे वदनमीक्ष्य महागजेन्द्रा
दूरं प्रयान्ति बलिनः सशिलीमुखौघाः ।
दर्पाद्विशेद्यदि न निर्मितकूटयन्त्रं
कस्तं निरोद्धुमलमुत्सहते मृगेन्द्रम् ॥ १३२ ॥
सपुत्रं हृतसर्वस्वं बद्ध्वा नौकान्तरे ततः ।
ताजिभट्टः समानीय कारागारान्तरेक्षिपत् ॥ १३३ ॥
यादृग्वह्नामखानाय कारयन्नृपतेरसौ ।
वर्षेणैकेन तादृक्तं नेत्रोत्पाटनमन्वभूत् ॥ १३४ ॥
यादृग्वन्हामखानस्य व्यथाभूदतिदुःसहा ।
अविन्दत्तादृशीं सोपि वक्तुं नान्येन शक्यते ॥ १३५ ॥
यस्मिन्नेव दिने यस्मिन्मासे विप्रियमातनोत् ।
तस्मिन्नेव दिने तस्मिन्मासे सोपि समासदत् ॥ १३६ ॥
सोपि वर्षद्वयं भुक्त्वा सपुत्रो नरकव्यथाम् ।
वह्नामखानवद्भद्रो व्यसनान्तर्व्यपद्यत ॥ १३७ ॥
अद्यैव मदृशौ धन्ये याभ्यां मत्कुलवैरिणः ।
सर्वस्वहरणं दृष्टं मरणं जैनभूपतेः ॥ १३८ ॥
इत्यूचे निष्ठुरं यत्स दुष्टात्मा कृतलुण्ठनः ।
तदुक्तिफलमापासौ तयोर्नाशोभवत्फलम् ॥ १३९ ॥
चिन्तितं जैनभूपेन संपन्नं नैव यत्पुरा ।
हेलयास्याद्य पौत्रेण कृतमित्यवज्ञदनः ॥ १४० ॥

यत्कर्तुमिच्छति परापचयं मनुष्य-
स्तेनैव तस्य नियमेन भवेद्विनाशः।
शृङ्गं बिभर्ति हरिणः पररन्ध्रबुद्ध्या
शार्ङ्गीकृतं तदिषुभिर्हरते तमेव ॥ १४१ ॥

दृष्टो रम्यश्चिरमुपवने वंशवाटो जनैर्यो
नानावर्णैस्तृणगणगुणैर्भूषितो भूरिपत्रः।
तत्रान्योन्याहननजननात्तादृगभ्युत्थितोग्नि-
र्येनैकान्तादुपवनगतं सर्वमेव प्रनष्टम् ॥ १४२ ॥

या कारकसभा रम्याभवन्मौलमहीभुजाम्।
अचिरेणैव कालेन सर्वा स्वप्नोपमाभवत् ॥ १४३ ॥

कृष्टुं मल्लिकजादोयमन्धजं खानमिच्छति।
राज्यार्थमिति केनापि राज्ञोग्रे पैशुने कृते ॥ १४४ ॥

सर्वस्वहरणं कृत्वा कारायां बन्धुमादिशत्।
श्रुतेन तेन तद्भिष्टो न कः सौख्यं समासदत् ॥ १४५ ॥

आक्षेपैरर्जिता यद्वत्तेन श्रीर्न्यायवर्जिता।
तद्वदाक्षेपतस्तस्मान्नीता राजाधिकारिभिः ॥ १४६ ॥

उत्कोचमुद्रादानादितत्तदायासकारणात्।
स विपत्पतितो नाभूत्कस्यापि करुणावहः ॥ १४७ ॥

कदर्यहस्ते क्षणसौख्यनिष्ठं
विशत्यशुद्धं प्रसभं धनं यत्।
कष्टेन निर्याति तदेव कष्टं
शुनीभगे लिङ्गमिव प्रविष्टम् ॥ १४८ ॥

एकैकं संचितं वस्तु कृष्टुं कष्टेन तत्करात्।
नियुक्तैः पीडनं कृत्वा बिलान्तर्गतसर्पवत् ॥ १४९ ॥

पूर्णनापितमल्लेकजादाद्या हृतसंचयाः ।
बन्धनस्थाश्चिरं भूत्वा ते सर्वे प्रमयं ययुः ॥ १५० ॥
तत्तद्राज्यहिताकाङ्क्षिकुले तस्य क्षयावधिः ।
शापः श्रीजैनभूपस्य प्रसारितभुजोभवत् ॥ १५१ ॥
मन्त्रै राज्यविवर्धनं कुरुत भोः सत्यं ब्रुवे मन्त्रिणो
नाशं स्वामिनि कुर्वतां न हि सुखं स्याद्धः परत्रेह च ।
यैर्यैर्जैनमहीपतावपकृतं पुत्रैर्न भृत्यैर्न वा
तैर्लब्धं फलमीदृशं तदहिता मात्सर्यधीस्त्यज्यताम् ॥१५२॥
अन्येप्युच्चावचास्तस्य सेवका ये तदाभवन् ।
तदनिष्टकराः सर्वे तद्वत्तेपि प्रमिम्यिरे ॥ १५३ ॥
यावद्वसति वसन्तस्तावद्विलसन्ति संततं भृङ्गाः ।
तस्मिन्निष्टे नष्टे भ्रष्टच्छाया न चेष्टन्ते ॥ १५४ ॥
पूर्वं जैननृपः सैदनासीरादीन्समागतान् ।
पैगम्बरान्वये जातान्पूज्याञ्ज्ञात्वा महागुणान् ॥ १५५ ॥
प्रोच्चासनकरस्पर्शदर्शितातुलसत्कृतीन् ।
स्वसुतादानमानेन यांस्ताम्राघ्राधिपान्व्यधात् ॥ १५६ ॥
तेभ्यः सैदज्जमालादीन्राजा ज्ञात्वा तरङ्गितान् ।
प्रत्यमुञ्चत्तदादेशात्तत्संचयमवञ्चयन् ॥ १५७ ॥
स सैदनासिरो धन्यो गण्यो धुरि मनीषिणाम् ।
यो विचार्यायतिं राज्ञि सति देशान्तरं ययौ ॥ १५८ ॥
सुतोपनयनाद्राज्ञः सुचिरं यैर्नृपायितम् ।
बहुरूपादिराष्ट्राधिपत्यनित्यसुखोज्ज्वलैः ॥ १५९ ॥
इतस्ततो भ्रमन्तस्ते केचिद्विलीपुरं ययुः ।
के चिद्विभवलोभेन पुनर्निष्काशिता अपि ।
नारमन्त बहिर्देशे माघे मधुकरा इव ॥ १६० ॥

प्राप्ता ये परदेशजाः कणभुजो देशेत्र संपद्युता
गर्भोत्थादिविविस्मृतात्मचरिताः कुर्युः प्रजापीडनम्।
ते तत्पापभरेण नष्टविभवा निष्कासिताः स्वामिना
गच्छन्ति ह्रदकष्टमत्स्यतुलनां तज्जीवनाशाकुलाः ॥ १६१ ॥

राजानकैष्टक्कुरैश्च तैर्मार्गपतिभिः सह।
निबद्धयौनसंबन्धकृतैक्यो मल्लिकोभवत् ॥ १६२ ॥

सर्वतन्त्राधिकारेण राजतन्त्रमखण्डितम्।
ताजिभट्टाय मल्लेको मुष्टिबन्धमिवाकरोत् ॥ १६३ ॥

पुत्रीकृतोयं मद्वंश्यो मदाज्ञास्मात्स्फुरत्यलम्।
इति तस्याक्षमिष्टादौ मल्लिकः स्फूर्जितं न किम् ॥ १६४ ॥

स्वसारं वीक्षते स्वल्पं मार्गेशोपि ज्यहांगिरः।
स्वसारं सैदनिर्मुक्तिदत्तपत्राङ्कितां व्यधात् ॥ १६५ ॥

तन्मार्गेशाग्रजां राजानुमतेन प्रसन्नधीः।
अभ्यर्थ्य ताजिभट्टाय मल्लेकस्तामदापयत् ॥ १६६ ॥

ज्यहांगिरोपि मार्गेशः क्षितिपालानुरोधतः।
स्वाग्रजार्पणमेतस्मै चक्षमे नयदक्षधीः ॥ १६७ ॥

चञ्चरीका इवोद्यानं कुल्या इव महोदधिम्।
भाग्यभाजं समायान्ति कलत्राणि च संपदः ॥ १६८ ॥

तां मार्गेशकुलोद्यानकल्पवल्लीं फलप्रदाम्।
तैः संपूर्णगुणैः पूर्णो भट्टो लक्ष्मीमिवासदत् ॥ १६९ ॥

सैदनिष्काशनं नैव संपन्नं जैनभूपतेः।
हेलयैवास्य पौत्रेण कृतमित्यवदज्जनः ॥ १७० ॥

कृते निष्कण्टके देशे मल्लिकाह्वदसंततः।
प्रतिष्ठारसिको राजा तत्सभा च तदाभवत् ॥ १७१ ॥

विवाहोत्सवसद्वेश्मनाट्ययात्रादिमङ्गलाम् ।
नापरामग्रहीच्चिन्तां सौराज्यसुखितो जनः ॥ १७२ ॥

पञ्चाशद्वत्सरे राजा निर्ममे निर्ममेहितः ।
दिद्दामठे नदीप्रान्ते राजधानीं मनोहराम् ॥ १७३ ॥

धन्याहमन्या किंशून्या इत्येवाम्बुनि बिम्बिता ।
स्फुरच्चतुष्किकाहस्तैर्नृत्यतीव दिवानिशम् ॥ १७४ ॥

मद्वंश्येन कृता केनापीदृशीति दिदृक्षया ।
स्वर्णच्छत्रच्छलाद्यस्याः प्राप्तो व्योम्नो दिवाकरः ॥ १७५ ॥

यत्कारुकृत्तकोणस्थदारुगारुडमूर्तिभिः ।
त्रस्ताश्चरन्तो नायान्ति पक्षिणस्तन्नभोध्वना ॥ १७६ ॥

गुल्खातुनाभिधा राज्ञी माता दिद्देव देवता ।
विशालां धर्मशालां साप्यकरोन्मद्रसाख्यया ॥ १७७ ॥

यत्प्रवेशे नृपस्तुष्टो मात्रा सह समागतः ।
पक्षमेकं व्यधाद्भूरिव्ययशालिमहोत्सवम् ॥ १७८ ॥

प्रतिष्ठामर्धनिष्पन्नां निर्लोड्यानुचितां नृपः ।
नगरे पितृपुण्यार्थं खानगाहं विनिर्ममे ॥ १७९ ॥

कुलोद्धरणनागस्य तटभूमौ महीपतिः ।
वह्निदग्धं नवं चक्रे राजवासं मनोरमम् ॥ १८० ॥

विजयेशनदीप्रान्ते राजवेश्म नवीकृतम् ।
भाति भातिशयान्मध्यरत्नं हारावलेरिव ॥ १८१ ॥

छत्रं यत्र स्फुरत्पत्रं वितस्ताम्बुनि बिम्बितम् ।
प्रेक्ष्य तुष्टैः सुरैर्मुक्तमिव सौवर्णपङ्कजम् ॥ १८२ ॥

भाति सुय्यपुरे राजधानी राजविनिर्मिता ।
पुरातनीं पराकीर्णां हसतीव सुधासिता ॥ १८३ ॥

राज्ञा कृतैरनेकाक्षे सोद्याने राजवेश्मभिः।
यद्दर्शनादनेकाक्षो नूनं स्वमभिनिन्दति ॥ १८४ ॥
प्रतिष्ठा विहिता राज्ञा नवा या निजमण्डले ॥
अन्यास्ता वर्णिता नात्र ग्रन्थगौरवतो मया ॥ १८५ ॥
दिद्दामठेह्मदायुक्तः कृतातुलगृहावलिः।
मसूदामजिरोदारशिलाभित्तिविराजिताम् ॥ १८६ ॥
खानगाहेति विख्यातं धर्मवासं विनिर्ममे।
येन नानादिगायाततत्तत्पथिकशालिना ॥ १८७ ॥
दिद्दामठपुरं सर्वं ययौ नेत्राभिरामताम्।
प्रवेशे नृपमानीय षष्टिलक्षकृतव्ययम् ॥ १८८ ॥
दत्त्वा सतिपुषग्रामं सत्रं यत्रावतारितम्।
शाहाभिधास्य भार्यापि मठं सुकृतकर्मठम् ॥ १८९ ॥
खेरीविषयमार्गान्तर्निर्ममे सप्रतिग्रहम्।
तत्पुत्रो नौरुजायुक्तो कृत्वा धर्ममठं नवम् ॥ १९० ॥
नगरात्क्षत्रिकां यावच्छैलसेतुं नवं व्यधात्।
तद्द्वीपे सति यो हन्ति सर्वेषां पुरवासिनाम् ॥ १९१ ॥
स्तम्भनिर्मितदीर्घाश्मसेतुबन्धकुतूहलम्।
भ्रातरावपि तौ धन्यावन्यौ रिगकनूथकौ ॥ १९२ ॥
व्यधातां क्रमराज्यान्तर्मठौ सौधमनोहरौ।
ताजिभट्टोपि भूपालवाल्लभ्यविभवोर्जितः ॥ १९३ ॥
करालविषये जैनपुरीमध्ये मठं व्यधात्।
कुह्नदीनपुरीमध्ये चक्रेश्मरचनां नवाम् ॥ १९४ ॥
इन्द्रोपीक्षेत तत्सोपि भवेत्कर्मकुतूहली।
एदराजानको राजवस्त्रशोभाधिकारभाक् ॥ १९५ ॥

खानगाहं स निर्वर्त्य बलाढ्यमठकान्तरे ।
नवः पितृविहारान्ते निजजन्मभुवोन्तरे ॥ १९६ ॥
येन लोकार्तिहृच्चक्रे विहारः स्वगृहोज्ज्वलः ।
मठाग्रहारमस्जीदाविहारगृहपङ्क्तिभिः ॥ १९७ ॥
त्रिंशद्द्विंशप्रतिष्ठास्ता मण्डले येन कारिताः ।
सर्वदर्शनसंपन्नप्रतिपादितदक्षिणे ॥ १९८ ॥
प्रतिहार्यक्षणे येन कोटिरेका व्ययीकृता ।
स फिर्यडामरो जैननगरे सत्रसुन्दरम् ॥ १९९ ॥
मसूदाहजिरोदारं खानगाहं विनिर्ममे ।
हयातखातुना राजवल्लभा विभवोज्ज्वला ॥ २०० ॥
मृगवाटाभिधे स्थाने मठं दग्धं नवं व्यधात् ।
मोमारखातुना राजमहिषी स्वधनैर्नवम् ॥ २०१ ॥
राजधान्यन्तिके जैननगरे स्वमठं व्यधात् ।
जयरालाभिधा राजपुत्री राजान्वयोदिता ॥ २०२ ॥
शिकन्दरपुरप्रान्ते खानगाहं नवं व्यधात् ।
श्रीजैननगरेयस्य मसूदाहजिरादयः ॥ २०३ ॥
भान्ति प्रतिष्ठा यत्रैताः पुण्यकीर्तिमनोहराः ।
कर्ममत्यधिकारस्थो नापितः फेरठक्कुरः ॥ २०४ ॥
विजयेशनदीपारे मठं चारुतरं व्यधात् ।
सय्यभाण्डपतिश्चक्रे विहारं विजयेश्वरे ॥ २०५ ॥
यो धर्मसङ्घाद्युपकृद्बौद्धमार्ग इवाबभौ ।
प्रासादं लक्ष्ममेराद्या भ्रातरोस्य वणिग्वराः ॥ २०६ ॥
भीमस्वामिगणेशस्य व्यधुः शैलमयं नवम् ।
तद्गणेशालयं दृष्ट्वोन्नतं सुधया सितम् ।
द्वेषान्म्लेछमुखं चित्रं भवत्येवासितं नतम् ॥ २०७ ॥

अन्येप्युच्चावचा वेश्मप्रतिष्ठा विविधा व्यधुः
याभिः स्वर्गोपमं भाति मण्डलं वेश्ममण्डितम् ॥ २०८ ॥
देशेस्मिन्विभवोभवन्कति न ते यैः संचयार्थं वयः
संनीतं न ततो मृतेरुपहृताप्येकाकिनी काकिनी ।
सोहं लब्धपदः करोमि यदि नो धर्मं प्रतिष्ठादिभी
रिक्तो याम्यमुतोचिरादिति मतिः पुण्यात्मनो जायते ॥२०९॥
कोपोद्दीपे नरेन्द्रस्य वेगादपि समुत्थिते ।
द्विषामधो गतिर्जाता न तु तद्वेश्मनां क्वचित् ॥ २१० ॥
योभूद्राजविरुद्धानां दण्डस्तद्बृहलुण्ठनम् ।
तद्राज्ये प्रभविष्णूनां तद्विकल्पोगलद्धृदः ॥ २११ ॥
किमन्यद्वेश्मनिर्माणव्यसने शाख्युपद्रवात् ।
जाता वनभुवः शून्या द्विषां वसतयो यथा ॥ २१२ ॥
श्रीतोरमाणदीन्नाराच्चिष्प्रचारानवेत्य च ।
द्विदीन्नारी नागमयी नवा तेन प्रवर्तिता ॥ २१३ ॥
पञ्चविंशतिको योभूत्पुराणस्ताम्रनिर्मितः ।
किंचिदूनीकृतश्चाभूद्व्याप्राचुरलक्षणात् ॥ २१४ ॥
मुक्तामणिं नृपतिमौलिषु योग्यमूर्तिं
या वर्धयत्युपनतेन पयोधरेण ।
सा पावनी शुचिरुचिर्जननी सुमुख्या
संगच्छते न चिरकालमनेन साकम् ॥ २१५ ॥
(सा शुक्तिकास्य जननी जननीतचित्ता ।
साध्वीव तिष्ठति चिरं नरभुक्तिकामा ॥)

॥ इति वापाठः ॥

शैशवे स्ववयो दत्त्वा राजा संवर्धितो यया ।
गुल्खातुनास्य जननी साकस्माद्त्रिदिवं गता ॥ २१६ ॥
कोपौर्वविकृते राज्ञस्तरङ्गतरलात्मनः ।
सततं प्रतिबन्धाय सिन्धोर्वेलेव याभवत् ॥ २१७ ॥
तां हिन्दुकसमाचारशतपत्ररविप्रभाम् ।
स्मृत्वा सरुदिताक्रन्दं शुशोच सकलो जनः ॥ २१८ ॥
तया वियुक्तस्तत्कालं राजा कृष्णाम्बराम्बरः ।
दिनश्रियेव पद्मोभूद्दुःखसंकुचिताननः ॥ २१९ ॥
ग्राहयित्वांशुकं शुद्धं व्यतीते दिनसप्तके ।
सव्ययं मल्लिको राज्ञो व्यधाद्दुःखनिवारणम् ॥ २२० ॥
शाहाबदीनपुर्यन्तर्नौसेतुं विपुलं नवम् ।
तद्धनेनादिशत्कर्तुं तत्पुण्यर्द्ध्यै महीपतिः ॥ २२१ ॥
अभूत्सैदान्वये जाता वल्लभा या महीपतेः ।
हयातखातुना राज्ञी प्रेमाश्वासविलासभूः ॥ २२२ ॥
पदार्थान्घोषभूषादिपरिवारसमन्वितान् ।
अनन्यरसिको राजा तस्यै सर्वं समार्पयत् ॥ २२३ ॥
तयैकयैव राजेन्दुः स सुन्दरगुणश्रिया ।
अविन्दत्परमानन्दं मालत्येव मधुव्रतः ॥ २२४ ॥
विभवे सति भवति भवे कस्यचिदेवेप्सितो लाभः ।
वर्षति मेघे कृषिकृत्कोपि मणिं मौक्तिकं लभते ॥ २२५ ॥
महाराज्ञ्यां महीभर्तुरस्यां राजसुतोजनि ।
यस्य मह्मदखानाख्यामकरोन्मौसुलोचिताम् ॥ २२६ ॥
ततः पूर्वाधिकप्रीते ताजिभट्टे स भूपतिः ।
स्वसुतं रक्षणायादात्सिन्धुरिन्दुमिवेश्वरे ॥ २२७ ॥

चतुःपञ्चाशवर्षेथ वैशाखे नरनायकः।
पुत्रजन्मोत्सवानन्दमभजद्व्ययसुन्दरम् ॥ २२८ ॥
विदग्धचर्चरीपालनर्तकीनटगायनान्।
उद्दिश्य त्यागरसिकैर्न कैर्वैश्रवणायितम् ॥ २२९ ॥
पट्टकौशेयवस्त्राणी राज्ये श्रीजैनभूपतेः।
सामान्तसचिवादीनामासीत्सत्कारसिद्धये ॥ २३० ॥
तद्राज्ये विभवोदारव्यये सा प्राक्तालयात्।
उत्सवे चर्चरीपालनटाद्यैः प्रापि तैरपि ॥ २३१ ॥
स्फीतराजश्रिया प्रीतो नृपतिर्नवयौवनः।
आनीतगीतविन्द्यर्थः संगीतरसिकोभवत् ॥ २३२ ॥
संगीतज्ञज्यहांगीरमार्गेशाद्याः सुखोचिताः।
तारका इव चन्द्राग्रे व्यरुचन्त सभासदः ॥ २३३ ॥
कृष्टचन्द्रावलीराजरूपाभिनयनैपुणात्।
राज्ञे वरनटा नाट्यात्तद्दर्शनकुतूहलम् ॥ ३३४ ॥
प्रलम्बकृतकाश्मश्रुदन्तभ्रूविक्रियाञ्चलैः।
तारानुसारितद्भावनाट्यहास्यकथाक्रमैः ॥ २३५ ॥
अनेकमुख्यवाद्यैश्च प्राणिभाषानुकारकैः।
भण्डिमापण्डितो भण्डो मूर्तो हास्यरसोभवत् ॥ २३६ ॥
मल्लाहस्सननामापि पितुरप्यधिको गुणी।
प्रथमं दशतन्त्रीकां मोदवीणामकारयत् ॥ २३७ ॥
भाषादिगीतसामग्रीं पारसीगीतकौशलम्।
तुम्बवीणाधरःसोहं नृपाज्ञप्तोप्यदर्शयम् ॥ २३८ ॥
गाथागीतप्रियो राजा स्वयं संस्कृतपद्यवित्।
नादशंसामयं श्लोकं रागालस्येदमब्रवीत् ॥ २३९ ॥

शुष्का येन समुल्लसन्ति तरवो वश्या भवेयुर्मृगा
यत्रैवावतरन्ति दैवतगणा जल्पन्त्यदृष्टाअपि ।
यो दुःखे च सुखे च मूर्खविदुषोर्बालस्य वृद्धस्य वा
प्रायः प्रीतिकरो ममास्तु सततं श्रीनादनामा रसः ॥ २४० ॥

श्रव्यकण्ठे नृपो गीत्वा रागैकालप्तितो बहून् ।
रागान्समोच्चगीतांश्च साश्चर्यान्नस्तदाकरोत् ॥ २४१ ॥

अथ गायनवृन्दं तत्प्रवेशय ममाग्रतः ।
गीताङ्गाधिपतेराज्ञामदान्मे नृपनायकः ॥ २४२ ॥

आनीय स्थापिताः सर्वे नामग्राहं निवेद्य च ।
ते ते वहावदीनाद्याः सर्वाद्या वृन्दनायकाः ॥ २४३ ॥

शिक्षाकारादयः पञ्च स्वप्रपञ्चातिचञ्चलाः ।
अमुञ्चन्पञ्चमव्याजात्पञ्चेषुरससंचयम् ॥ २४४ ॥

निर्दोषकण्ठसंजातमञ्जुलध्वनिरञ्जकाः ।
अधीतगीतवद्धात्तमात्तद्रवकमद्दकाः ॥ २४५ ॥

संगीतज्ञं नृपं तं ते श्रुत्वैवं तत्समुत्सुकाः ।
गीते शद्धगुणाः पञ्चदशसंख्यां स्थितिं व्यधुः ॥ २४६ ॥

केदारगौडगान्धारदेशभङ्गालमालवाः ।
कर्णाटगायना राज्ञो रागाश्चाप्यस्फुरन्पुरः ॥ २४७ ॥

मदनोद्दीपिता रात्रौ नव्यभाव्या दशोज्ज्वलाः ।
अशोभन्तानुगा राज्ञो लासिका दीपिका अपि ॥ २४८ ॥

रत्नमालादीपमालारूपमालाङ्किताभिधाः ।
अकुर्वल्लाँसिका लास्यं हावभावमनोहरम् ॥ २४९ ॥

झम्पाकम्पाकुलाग्रप्रसरसरसताधारसर्वाङ्गहार-
प्रारब्धाशास्यलास्योत्तरतरललसद्भावभावानुभावा ।

उत्कण्ठाकारिकण्ठोद्गतसततततस्फीतगीतप्रपञ्चा
पात्रीयं रम्यगात्री लसति सतिलका कीदृशी रत्नमाला ॥२५०॥

गुणिमदतृणदात्री प्रेक्षकानन्ददात्री
नवकरणविधात्री रूपलावण्यधात्री।
कलितललितगात्री शुद्धसंगीतगात्री
गुणगणमणिपात्री रूपमालैव पात्री ॥ २५१ ॥

यस्या मुखं हिमरुचिर्ननु यद्विधात्रा
संपूर्णसर्वमवशेषतयात्र मुक्तः।
आश्यानतामुपगतोस्य रुचायमास्ते
नासाग्रमौक्तिकमिषादमृतस्य विन्दुः ॥ २५२ ॥

आसां कर्णालिकप्रोतलम्बिमुक्ताफलच्छलात्।
मुखेन्दोर्निर्गता नूनं लावण्यामृतविन्दवः ॥ २५३ ॥

इत्यादि शंसां कुर्वाणो नृपतिर्नवयौवनः।
लीलामित्रैः समं ताभ्यो मद्यपात्रमगाहत ॥ २५४ ॥

तत्तत्कलापरिचये कविवाक्प्रपञ्चे
पञ्चेषुसंचयनिभासु वराङ्गनासु।
संगीतचर्वणविधौ वसुधानृभोगे
धन्या नृपाः प्रतिदिनं व्यसनं भजन्ते ॥ २५५ ॥

श्रुत्वा दिगन्तरात्कीर्तिं राज्ञः कर्णामृतप्रदाम्।
गीतकाव्यकलाख्यातः पवारकदनोभ्यगात् ॥ २५६ ॥

गायतः सोनुगीतानि स्वकृतानि सभान्तरे।
तुष्टो महीपतिस्तस्मै व्यधात्कनकवर्षणम् ॥ २५७ ॥

प्रबन्धगीतचतुरः कदाचित्स नृपाग्रगः।
अगायत्सर्वलीलाख्यं प्रबन्धं देशभाषया ॥ २५८ ॥

अनभिज्ञतया राज्ञः पृष्टोहं तस्य लक्षणम् ।
तूर्णं भरतशास्त्रादेः सोदाहरणमब्रवम् ॥ २५९ ॥
पदपाठस्वरैस्तैस्तु तालरागैर्मनोहरम् ।
श्रुत्वा षडङ्गं तन्मत्तो राजाभूदुदिताशयः ॥ २६० ॥
तद्गीतस्याङ्गवैकल्यं ज्ञात्वा मामब्रवीदिदम् ।
गीतदर्पभृता वादं कुर्वनेन सभान्तरे ।
तथेत्युक्ते महाराजो द्वयोर्वादमकारयत् ॥ २६१ ॥
सभायां विहिते वादे गीतग्रन्थावलोकनात् ।
श्रुत्वा प्रबन्धान्मत्तः स साश्चर्यो गदनोभवत् ॥ २६२ ॥
अहो काश्मीरिकोपीदृक्चतुरः सर्वशास्त्रवित् ।
इत्युक्त्वालिङ्ग्य मां मे त्वं गुरुरित्यब्रवीत्स्फुटम् ॥ २६३ ॥
कौशेयकपरीधानप्रसादानन्दिताशयम् ।
अकरोन्मां नृपस्तूर्णं तद्वादजयरञ्जितः ॥ २६४ ॥
घोषाः स्वोत्पत्तितोषा गतिगुणचतुराः पीवराङ्गास्तुरङ्गाः
स्फीतं यज्ञोपवीतं कनकमणिचितं द्रव्यमन्यच्च भव्यम् ।
वस्त्रोद्योताश्च पोता निजवपुषि धृता वस्त्रयोगाः सभोगा
राज्ञा श्रीहस्सनेन प्रसभमिह मयि श्रीवरे किं न दत्तम् ॥२६५॥
नयज्ञः शंसदीनोभून्मन्त्री बालाबदीनकः ।
वीरः शाहाबदीनः स कुद्दीनो विवेचकः ॥ २६६ ॥
श्रीशिकन्दरशाहोपि यवनेन्द्रमतप्रियः ।
आलिशाहोभवद्दाता श्रीमाञ्जैनमहीपतिः ॥ २६७ ॥
सर्वशास्त्रप्रियः सर्वभाषाकाव्यविचक्षणः ।
राजा हैदरशाहः स तन्त्रीवाद्यविशारदः ॥ २६८ ॥
संगीतनिपुणः सोयं हस्सनेन्द्रो नरेश्वरः ।
एकैकगुणबाहुल्या प्रसिद्धा नृपमण्डली ॥ २६९ ॥

मण्डलेस्मिञ्जनैर्दृष्टेत्यवोचन्नृपतेः सदा।
श्रुत्वा राज्ञो महागीतं रागालक्षिमनोहरम्।
श्रीजहाङ्गिरमार्गेशमुख्याः पादौ ववन्दिरे ॥ २७० ॥
देशेस्मिन्परवञ्चनात्प्रकुरुते लोको यदा संचयं
तत्तद्धर्मविपर्ययेण च भजन्स्वाचारनिःसारताम्।
उत्पातैर्विविधैस्तदा समुदिताः स्वं पीडयन्ति प्रजा
दुर्वात्यानलदाहदुर्हिममहाशैत्यस्वभेदामयाः ॥ २७१ ॥
कदाचित्पौरवणिजो गोवधं नगरान्तरे।
आजन्महिन्दुकाचाराश्चक्रुर्मांसुलवल्लभाः ॥ २७२ ॥
यत्र गावो हता भुक्तैस्तन्मांसैस्तैर्दुराशयैः।
स विहारः स नगरः शुङ्ख्येवाग्नौ स्वमक्षिपत् ॥ २७३ ॥
अथ नैर्ऋतदिग्वातो जातोत्पातशताचितः।
अकस्मादुदभूद्देशे प्रत्यूहापातदुःसहः ॥ २७४ ॥
आरम्भ एव कोप्येतं श्लोकं सूनुर्विपश्चितः।
गणरात्रं समालोच्य दुर्वातं तं महाद्भुतम् ॥ २७५ ॥
खरवर्णेन मेघेन चन्द्रवर्णेन भानुना।
नैर्ऋतेनातिवातेन हा प्रजे क्व गमिष्यसि ॥ २७६ ॥
वत्सरे पञ्चपञ्चाशे प्रवरेशपुरान्तरे।
गोसौनिकापणोपान्तादकस्मादुदभूच्छिखी ॥ २७७ ॥
मारी तटैकपार्श्वस्था गुलिकावाटिकावधिः।
क्षणान्नगरभूर्दाहाद्दग्धारण्यमिवाभवत् ॥ २७८ ॥
भूर्जत्वग्वायुनोद्धूता ज्वलन्ती सजवागता।
बृहन्मसूदाच्छत्रान्तः पपातोत्पातदूतिका ॥ २७९ ॥
प्रसारिता चतुर्दिक्षु यत्र भित्तिः सुधासिता।
श्रीशिकन्दरभूभर्तुर्मूर्ता कीर्तिरिवाभवत् ॥ २८० ॥

व्यधाद्यदन्तर्जनता प्रणीता पुनरुत्थिता ।
त्वत्संगरो वरोत्तुङ्गतरङ्गावलिभङ्गिताम् ॥ २८१ ॥
मन्त्रपाठोद्यतं यत्र यवनानां कदम्बकम् ।
गुञ्जन्मधुपगर्भाब्जसहस्रमिव राजते ॥ २८२ ॥
चतुर्दिग्द्वारनिर्गच्छच्छुक्रवारागता जनाः ।
कुर्वन्ति भूगतम्लेच्छतदहर्निर्गमभ्रमम् ॥ २८३ ॥
यन्मध्योच्चचतुःस्तम्भदम्भाद्विधिदिदृक्षया ।
चतुष्पादिव तद्धर्मः प्राप्तो भात्युज्झितस्थितिः ॥ २८४ ॥
स्वर्णच्छत्रच्छलाद्यत्र मायाकर्णनकौतुकात् ।
कर्णं दातुमिवाभ्यर्णं भजन्भाति दिवाकरः ॥ २८५ ॥
तन्महासदनं व्याप्तगगनं रचनाद्भुतम् ।
म्लेच्छदर्शनराजार्था रक्षा दुर्गेश्रियं ददत् ॥ २८६ ॥
कुर्वन्कल्पाग्निनिर्दग्धविश्वज्वालावलिभ्रमम् ।
क्षणमात्राक्तदा यातं भितिमात्रावशेषताम् ॥ २८७ ॥
निमित्तजा विधा यस्यां म्लेच्छाः कुर्वन्ति भक्तितः ।
एधामहोत्सवाद्येषु गणशो मिलिताः सदा ॥ २८८ ॥
तत्तद्ग्रामखानीयपञ्चावासादिभिर्गृहैः ।
सताण्डवच्चटत्कारं तैः खाण्डववनायितम् ॥ २८९ ॥
ज्वलद्भूर्जत्वचो याता वितस्तासलिलान्तरम् ।
दग्धा जलगता नावः शेकुः शमयितुं न याः ॥ २९० ॥
सुरपत्तनघोषेषु तदुपप्लववायुना ।
सहस्रसंख्या वेश्मौघास्तद्दिने जज्वलुर्न के ॥ २९१ ॥
उत्पातवातजातोर्मिमहापद्मसरोन्तरे ।
शतसंख्या दिने तस्मिन्किराताः प्रलयं ययुः ॥ २९२ ॥

वर्णाचारविपर्यासः समासः कुजवत्सरः ।
पुरश्रीविहितोद्भासे निवासक्षयकार्यभूत् ॥ २९३ ॥
अथ वा पूर्वकर्तॄणां जाते पुण्यक्षये सति ।
नवीनकर्तृनिर्माणकीर्त्यर्थं कुरुते विधिः ॥ २९४ ॥
निर्मिता तादृशी राज्ञा सा महासदनस्थितिः ।
पुण्यश्रीरिव या स्फीता विभाति नगरान्तरे ॥ २९५ ॥
अचिरात्सा पुरी दग्धा नवीकृतगृहा बभौ ।
भूपं तरुणमीक्ष्येव विहिता तरुणी प्रिया ॥ २९६ ॥
भूपालदुर्व्यसनजाः प्रभवन्ति दोषा
नाशाय यद्यपि हि साधुनि मण्डलेस्मिन् ।
अन्योन्यमन्त्रिवरवैरसमुत्थदोषो
राज्यं समस्तमपि नाशयति क्षणेन ॥ २९७ ॥
शक्तिस्फीतं समुदयलसत्सप्तधात्वङ्गभङ्ग
धत्ते नित्यं यदपि सुभगं सर्वकार्यक्षमत्वम् ।
दोषा वातादय इव महामन्त्रिणोन्योन्यदुष्टा
यत्रैते स्युर्गलति न चिराद्देहवत्तत्र राज्यम् ॥ २९८ ॥
अत्रस्थैः सर्वदा रक्ष्यः स्वभेदः प्रभविष्णुभिः ।
चार्वाकाणामिवैषां हि भयं न परलोकतः ॥ २९९ ॥
ललितादित्यदेवोक्तामिति नीतिं विलङ्घ्य ये ।
मिथो वैरं प्रकुर्वन्ति ते नश्यन्तीह मन्त्रिणः ॥ ३०० ॥
मलाईसाकदर्यावखानादीनां विरोधतः ।
स्वभेदजर्जरं राज्यं दृष्टं श्रीजैनभूपतेः ॥ ३०१ ॥
तदाप्रभृति तेनैव दृष्टे नाशेत्र मण्डले ।
मन्त्रिणो नैव कस्यापि मत्सरो विरमत्ययम् ॥ ३०२ ॥

अहो द्वेषपिशाचोयं रूढो राजसभाशये ।
केनापि मन्त्रिणा नैव जीयते सर्वनाशकः ॥ ३०३ ॥
रोगो हतप्रयोगो व्यालो वा धृतमहाविषज्वालः ।
नाग्निस्तादृग्भयकृत्प्रकृतिविरोधो यथा देशे ॥ ३०४ ॥
अत्रान्तरेह्मदायुक्तो युक्तोपि नयसंपदा ।
अधीर इव नाशाय नेयबुद्धित्वमग्रहीत् ॥ ३०५ ॥
एकदा पितरं पुत्रा विजने नौरुजादयः ।
इत्यूचुर्दूषणां ताजिभद्दीयां विभवासहाः ॥ ३०६ ॥
निग्रहानुग्रहैकाग्राः समग्रे मन्त्रिमण्डले ।
उग्रो भट्टः प्रजायासैर्देशनाशाय वर्धितः ॥ ३०७ ॥
तत्रापि दुग्धपितृता राजसूनोर्नृपास्पदे ।
अग्रे ययौ समायोगः सोयं दाहाय दुःसहः ॥ ३०८ ॥
राज्ञी राजावदच्चास्मै सेनानीरयमेव हि ।
प्रबलं बाधते ह्यस्मान्यदि नायं प्रणाश्यते ॥ ३०९ ॥
इत्याकर्ण्य सुतैरुक्तवैगुण्यादवलोक्य च ।
पुत्रीकृतोपि मल्लीकस्ताजिभट्टे व्यरज्यत ॥ ३१० ॥
राज्याङ्गानि समस्तानि योरक्षत्समया दृशा ।
प्राक्पुण्यसंक्षयात्सोपि शनैरासीत्स्खलन्मतिः ॥ ३११ ॥
स्वार्थं परित्यज्य विभोर्हितं ये
कुर्वन्ति तत्कार्यकृतावधानाः ।
विनाशकाले समुपस्थिते ते
भवन्त्यकस्माद्विपरीतचेष्टाः ॥ ३१२ ॥
प्रभविष्णुरयं राज्ञो दूरीकार्यः कया धिया ।
इति चिन्ताकुलस्तांस्तानुपायान्मल्लिकोकरोत् ।
अथैकदाब्रवीद्राज्ञः सभायां मल्लिकः क्रुधा ॥ ३१३ ॥

राज्येनाप्तेन किं राजन्नाक्रान्ता बाह्यभूः परैः।
चिन्ता कस्यापि नैवास्ति यावत्सर्वं प्रणश्यति ॥ ३१४ ॥
वरं स्वयमहं यामि तदाज्ञा दीयतां विभो।
इति श्रुत्वाब्रवीत्ताजिभट्टस्तं साहसोत्सुकः ॥ ३१५ ॥
यात्रायै दीयतां राज्ञः सेनानीर्मत्परोधिकः।
तच्छ्रुत्वा सर्वसामग्रीं दत्त्वा मल्लिकचोदितः ॥ ३१६ ॥
राजा तं कटकोपेतं बाह्यदेशं व्यसर्जयत्।
भीत्या प्रीत्या च नीत्या च जग्मुस्तमनु सेवकाः ॥ ३१७ ॥
मधुपा इव गर्जन्तो यातुं मधुकरेश्वरम्।
राजप्रक्रियया रम्यं दृष्ट्वा तं व्ययशालिनम् ॥ ३१८ ॥
नृपा राजपुरीयाद्या बभूवुर्विस्मिताशयाः।
अन्येप्यज्यभदेवाद्याः समस्ता भद्रमण्डले ॥ ३१९ ॥
तत्तारखानमुत्सृज्य तुष्टास्तमुपतस्थिरे।
तदुपोद्बलिता मद्राः क्षुद्रा विद्रावितारयः ॥ ३२० ॥
देशं तत्तारखानीयं सोपद्रवमचीकरत्।
दहञ्शृङ्गारकोटादौ मसूदां खाननिर्मिताम् ॥ ३२१ ॥
सामान्यकुलजोप्येष निःसारोनुमितो जनैः।
अचिन्त्यकृतकार्यासीत्स्वामिस्नेहे प्रभावतः ॥ ३२२ ॥
पुरपत्तनघोषादीननयत्स्मृतिशेषताम्।
प्रतापस्तस्य तत्कालं तीक्ष्णांशोरिव दुःसहः ॥ ३२३ ॥
तत्तद्विल्यादिदेशस्थजनोल्लूकभयं व्यधात्।
करदीकृत्य सामन्तांस्तत्तत्साहसनिष्ठुरः ॥ ३२४ ॥
स्वदेशं प्रत्यगात्पूर्णं पूर्णस्तुरगसंपदा।
स्वामिकार्यवशान्मन्त्री पुत्रं पश्यति शत्रुवत् ॥ ३२५ ॥

शत्रुमप्यतिवैराढ्यं पुत्रवत्परिरक्षति ।
इत्यादिनीतिमुल्लङ्घ्य मल्लिको दैवमोहितः ॥ ३२६ ॥
तदुत्कर्षासहस्तस्य दर्पनाशोद्यतोभवत् ।
सबलो बाधते सर्वान्वाल्लभ्यादिति शङ्कितः ॥ ३२७ ॥
मल्लिकस्तं प्रति क्रुद्धो भूपं द्वेषमजिग्रहत् ।
अत्रान्तरे सुतो राज्ञः कनीयान्होस्सनाभिधः ॥ ३२८ ॥
पयोदानाय मल्लेकनौरुजाय समर्पितः ।
तेन श्रुतेन तद्भूपविधेयत्वविसूत्रितः ॥ ३२९ ॥
आगच्छन्कटके भट्टो ययौ मन्दप्रतापताम् ।
तस्य सेनागतस्याथ नेयबुद्धिर्नृपेश्वरः ॥ ३३० ॥
सत्कारं चोदितं तस्मै नाकरोद्धिरसीकृतः ।
अथ तस्यापकारार्थं मल्लिकः स्वयमक्षमः ॥ ३३१ ॥
दध्रे गतानां सैदानां पुनरागमने मतिम् ।
तदीयास्तनया राजंस्तव पुत्रवती प्रिया ॥ ३३२ ॥
रक्ष्यः श्वसुरपक्षः स कथं नानीयते त्वया ।
इत्यादिप्रेरणाद्राज्ञो राजाराधनतत्परः ॥ ३३३ ॥
सोपाधीन्व्यसृजल्लेखान्सैदाण्ढल्लीशमण्डले ।
तस्यैवेति प्रभवति जनो दुर्नयैर्दूषणाद्यै-
रेतद्बुद्ध्या नयति न वयः स्वं कथं गाढमूढः ।
सर्वीं पृथ्वीं जयति न कथं तन्त्रमन्त्रोर्जितोसा-
वित्याशङ्क्यो भवति पुरुषो भाग्यभाग्यावदास्ते ॥ ३३४ ॥
अपकृत्य पुनः सैदान्यदानयति मल्लिकः ।
तेन स्यात्सर्वनाशोस्येत्यवदत्तीक्ष्णधीर्जनः ॥ ३३५ ॥
सैदानयनवृत्तान्तं बुद्ध्वा श्रीफिर्यडामरः ।
गृहं गत्वाह्वदायुक्तं युक्तमित्यब्रवीद्वचः ॥ ३३६ ॥

ताजिभट्टो विधेयोयं भृत्यवद्वर्तते त्वयि ।
तदेतं रक्ष युक्त्यास्य विधाय मदशातनम् ॥ ३३७ ॥
मा प्रवेशय सैदांस्त्वं दुर्धरान्देशकण्टकान् ।
तुरुष्कपुष्कलाश्वासान्यत्नान्निष्काशितानपि ॥ ३३८ ॥
एकनाशार्थमिच्छा चेत्सर्वनाशस्तदागतेः ।
पोतैकहेतोश्चैत्यस्य ज्वलनं किं समर्प्यते ॥ ३३९ ॥
नूनं सपुत्रभृत्यस्य नाशो न भविता चिरात् ।
यत्सैदानयने बुद्धिर्जाता भाग्यविपर्ययात् ॥ ३४० ॥
कृतापकारान्सैदांस्तानानिनीषुर्भवान्यदि ।
विषमुष्टिं क्षिप स्थाल्यां सान्नायां तत्स्वमृत्यवे ॥ ३४१ ॥
मद्वचो गृह्यते सत्यं क्षमन्येन त्वया न तत् ।
विपत्तौ स्मरणीयं स्यान्मयि लोकान्तरं गते ॥ ३४२ ॥
श्रुत्वेति मल्लिकः प्राह किं कुर्वन्ति मयि स्थिते ।
एकदा ज्ञातसामर्थ्याच्चाटुकारा भवन्ति नः ॥ ३४३ ॥
तथेत्युक्त्वा गते तस्मिञ्क्षमन्यत्वाद्दणाद्दते ।
सैदानयनसंकल्पान्न मनाग्विरराम सः ॥ ३४४ ॥

ज्ञातायतित्वादुपदिष्टमिष्टै-
र्गृह्णाति वाक्यं न हि नष्टचेष्टः ।
कष्टे निविष्टः स हि वक्ति शोका-
द्धिङ्मामतिष्टं न हितोपदेशे ॥ ३४५ ॥

ततो लेखान्समालोच्य तस्योत्कण्ठितमानसाः ।
हंसा इवाययुः सैदाः कृतपक्षपरिग्रहाः ॥ ३४६ ॥
अथ प्रथममेवेह समीयाहस्सनोग्रणीः ।
अग्र्यासनौरुजायुक्तयुक्तो भूपाग्रमाययौ ॥ ३४७ ॥

विहितान्योन्यकं शंसन्मल्लिकोस्मै प्रसन्नधीः ।
खोयाश्रमं प्रदेशं तत्स्वकीयं स समार्पयत् ॥ ३४८ ॥
यत्सैदहस्सनेनापि सिद्धादेशाधिकारिता ।
तस्य तेनैव नाशार्थं सिद्धा देशाधिकारिता ॥ ३४९ ॥
क्रमात्समागतैः सैदैराक्रान्ते मण्डले बलैः ।
आभ्यन्तराश्च बाह्याश्च काश्मीरास्तत्रसुर्जनाः ॥ ३५० ॥
सैदांस्तरङ्गितान्दृष्ट्वा तुरङ्गाद्भूपतेर्मतात् ।
नृपो जायाविधेयत्वात्तद्विधेयक्रमागतः ।
सपुत्रः सोह्मदायुक्तो बभूवानुशयाकुलः ॥ ३५१ ॥
पश्चाद्भवेद्या मनुजेषु बुद्धिः कार्ये कृते सा प्रथमं यदि स्यात् ।
मित्रार्पितश्रीः परिभूतशत्रुर्न को भवेत्संततसौख्यभागी॥३५२॥
अथ सैदाः स्वतन्त्रास्ते कलत्रहरणेच्छया ।
बन्धनं ताजिभट्टाय कर्तुमैच्छंश्छलैषिणः ॥ ३५३ ॥
एकदानिष्टमाकर्ण्य स्वात्मनः सैदचिन्तितम् ।
मल्लेकसदनं प्रायात्ताजिभट्टो भयाकुलः ॥ ३५४ ॥
सैदविस्फूर्जितं दृष्ट्वा साशङ्कः सोभवद्यदा ।
स फिर्यडामरो वृद्धस्तत्कालं प्रमयं ययौ ॥ ३५५ ॥
प्रतिक्रियादिसुकृतैरिह वा परदुर्लभम् ।
य एकः सकलश्लाघ्यामलब्ध्वान्त्यक्षणे क्रियाम् ॥ ३५६ ॥
तच्छ्रुत्वा नृपतिस्तूर्णं क्रुद्धः सैदप्रतारितः ।
रोद्धुं तद्यसृजज्जोनराजानकमुखान्भटान् ॥ ३५७ ॥
स्वगृहे स्थाप्यतां बद्धो हृतस्वो दत्तरक्षकः ।
इत्युक्तो मल्लिकस्ताजिभट्टं तेभ्यः समार्पयत् ॥ ३५८ ॥
तथैव स्थापितो बद्धः पुण्यशेषतयात्मनः ।
कालं वृत्त्या कृताप्यायः सकुटुम्बोत्यवाहयत् ॥ ३५९ ॥

भूर्यर्थव्ययपुण्यः स बाह्येपि स्वगृहान्तरे।
सकुटुम्बः सुखं तस्थौ मराल इव मानसे ॥ ३६० ॥
विभवे दानभोगं यः करोति सुकृतेच्छया।
एतद्भ्रष्टः समाप्नोति भूयस्तत्ताजिभट्टवत् ॥ ३६१ ॥
एवं मल्लेकाह्वदेन परोद्रेकासहिष्णुना।
ध्वस्तप्राया व्यधीयन्त सर्वे ते प्रभविष्णवः ॥ ३६२ ॥
कृतापकारिसैदेभ्यो भागिनेयप्रणाशनात्।
ज्यहाङ्गिरोपि मार्गेशो मल्लिके शङ्कितोभवत् ॥ ३६३ ॥
सर्वाधिकारसामग्री स्वपक्षस्य समर्पिता।
प्रतीहारादिवीरेन्द्राः स्वार्थबुद्ध्या विनाशिताः ॥ ३६४ ॥
इत्यादिदूषणे राजा मल्लिके विरसोभवत्।
रक्षेत्युक्ता स्वमात्मानं कदाचित्कृतदर्शनः ॥ ३६५ ॥
नैकत्रावस्थितिस्तिष्ठन्स्वराष्ट्रान्तः स्थितिं व्यधात्।
अथागात्कुसुमक्रीडां कर्तुं सैदसमन्वितः ॥ ३६६ ॥
भवनोपवनं राजा शक्रश्चैत्ररथं यथा।
विधाय लीलां पुष्पाणां नौकायातो महीपतिः ॥ ३६७ ॥
मार्गेशनौरुजायुक्तः पानलीलां व्यगाहत।
सर्वे परस्परक्षीवास्तत्तद्वाचानुबन्धिनः।
ते वृष्णय इवान्योन्यं चक्रुर्वाक्छरताडनम् ॥ ३६८ ॥
क्षोभे प्रवृद्धे क्रुद्धोथ त्यक्तमस्तकवेष्टनः।
अगात्कर्तुमुपालम्भं नृपो मल्लिकमन्दिरम् ॥ ३६९ ॥
प्रसादितोपि स प्राप राजधानीं क्रुधान्वितः।
पुत्रदुर्नयजः शोको मल्लिकस्य च मानसम् ॥ ३७० ॥
अन्येद्युरहितांस्तस्य राजा विरलमानसः।
रक्ष्यो नायुक्तपक्षो मे युक्तमित्यब्रवीद्गृहः ॥ ३७१ ॥

अवश्यमेव छिद्रं तत्समासाद्य विरोधिनः
अपकाराय संनद्धा देहे दोषा इवाभवन् ॥ ३७२ ॥

राज्ये यूसुबखानं चेत्कुर्युः किं क्रियते त्वया ।
एभ्यो नीत्वा तदन्यस्मै देह्येनं रक्षणाय भोः ॥ ३७३ ॥

तथेत्युक्त्वा नृपोन्येद्युर्जोनराजानके द्रुतम् ।
विन्यस्य रक्षणे युक्त्या मल्लिकात्खानमग्रहीत् ॥ ३७४ ॥

पुत्रं विन्यस्य भूपाग्रे तद्दिने स्वगृहस्थितः ।
अपकर्तास्मि शत्रूणां प्रातरित्यब्रवीत्प्रियाम् ॥ ३७५ ॥

अत्रान्तरे मार्गपतिर्नृपाहूतो बलान्वितः ।
स्वराष्ट्रात्साहसोद्युक्तो नगरे तूर्णमाययौ ॥ ३७६ ॥

प्रातः श्रुत्वाथ मल्लिकः सबलोगान्नृपान्तिकम् ।
रुषा निवृत्तो रुद्धोपि चिल्लया दक्षिणस्थया ॥ ३७७ ॥

पादाभ्यां ताडयन्वक्षो गच्छतोस्य तुरङ्गमः ।
भविष्यत्स्वामिविरहाच्छुचेवाश्रुमुखोभवत् ॥ ३७८ ॥

तत्कालोदितसूर्यार्चिःसंक्रान्तिज्वलितायुधः ।
नृपाज्ञप्तोपि मार्गेशः ससैन्योविशदङ्गनम् ॥ ३७९ ॥

अन्योन्यस्पर्धया तत्र द्वयोः प्रविशतोस्तदा ।
संनद्धयो राजधानी ययौ संभ्रमलोलताम् ॥ ३८० ॥

सशस्त्रोयं प्रविष्टः किमित्यायुक्तः स भाङ्गिलम् ।
अदापयज्ज्यंसराय मार्गेशाय नृपः कुधा ॥ ३८१ ॥

तावन्निर्गत्य भीतेन राज्ञा स प्रेरितस्ततः ।
पुरान्तर्ग्रन्थनां कृत्वा ससैदः पुनराययौ ॥ ३८२ ॥

निर्मुच्य बन्धनात्ताजिभट्टं राजानकान्वितः ।
राजधान्यङ्गनास्कन्दं ददौ जिष्णुर्जहाङ्गिरः ॥ ३८३ ॥

प्रेरितास्ताजिभट्टेन तद्भटाः समरोद्यताः।
पश्चिमद्वारधानीं तां राजधान्यामदाहयत् ॥ ३८४ ॥
सोग्निर्हस्सनराजानकावासान्तं क्षणान्तरात्।
सोच्चागारां गृहश्रेणीं दग्धारण्यमिवाकरोत् ॥ ३८५ ॥
इन्द्रवासोपमा वेश्मरचना ज्वलिता श्रुता।
दूरस्थितानामप्यन्तः संतोषमुदपादयत् ॥ ३८६ ॥
तद्धूमस्तोमसंघट्टज्वालाजालगतोष्मणा।
सर्वेन्तःस्थाः कटाहान्तर्जीवन्मत्स्योपमां दधुः ॥ ३८७ ॥
अङ्गनेग्निं समालोक्य ज्वलन्तं राजसद्मनि।
सभीतिर्नृपतिर्भीतो विह्वलः समपद्यत ॥ ३८८ ॥
उष्णायमानमार्गेषु स्फुरन्तोपि युयुत्सवः।
न केपि शेकुस्तान्योद्धुं तद्भाग्यैर्यन्त्रिता इव ॥ ३८९ ॥
स्वभृत्यांश्चलितान्दृष्ट्वा पुत्रोत्सेवावशेषितः।
बभूव मल्लिकस्तत्र किंकर्तव्यतयाकुलः ॥ ३९० ॥
पुत्राः कुर्वन्तु मा युद्धं राज्यं नश्यति भूपतेः।
अयं राजास्य देशस्तु रक्षितो दश वत्सरान् ॥ ३९१ ॥
तत्कथं नाश्यते युद्धादस्मिन्विषमविग्रहे।
तत्रापि ज्येष्ठः पुत्रो मे तटस्थोरिषु मध्यगः ॥ ३९२ ॥
अनिष्टं नौरुजाद्या मे लभन्तेस्माद्रणक्षणे।
वरं ममैव नाशोस्तु नाकीर्तिं वार्धके सहे ॥ ३९३ ॥
इति ध्यात्वाब्रवीत्पुत्रान्न योद्धव्यमिहासत।
इत्युक्ता गलितोत्साहो नृपं शरणमाययौ ॥ ३९४ ॥
मण्डपे राजधान्यां स राजा विन्यस्य रक्षिणः।
स्नेहादरक्षदायुक्तान्पूर्वसेवामनुस्मरन् ॥ ३९५ ॥

आयुक्तनत्थकाद्यास्ते ज्ञात्वा भूपं तदाश्रितम् ।
युद्धाशक्ताश्च निर्गत्य भुट्टदेशान्तरं ययुः ॥ ३९६ ॥
अथोत्तरदिशा द्वारधान्या मान्या जयोद्यताः ।
ज्यहाङ्गिराद्या गर्जन्तः प्राविशन्त नृपाङ्गनम् ॥ ३९७ ॥
रणदुन्दुभिनिःस्वानप्रतिश्रुत्यारवच्छलात् ।
अहसद्राजधानीव तुष्टा तत्साहसक्रमात् ॥ ३९८ ॥
राजदर्शनतुष्टानामुत्कृष्टानां जयार्जनात् ।
प्रापुः प्रसादं तत्कालं मनांसि च वपूंषि च ॥ ३९९ ॥
प्रातः सपुत्रं मल्लिकं तत्तत्सेवकसंयुतम् ।
क्रुद्धैस्तैश्चोदितो राजा कारागारान्तरेक्षिपत् ॥ ४०० ॥
आयाता युद्धसदनाद्भीतेवातिव्ययादिभिः ।
अकरोद्राजलक्ष्मीः सा स्वगृहे सुखसुप्तिकाम् ॥ ४०१ ॥
तेषां राजविरुद्धानां दासकायस्थपीडनात् ।
संचितं रौप्यकुप्यादि सर्वं तद्राजसादगात् ॥ ४०२ ॥
यन्मन्त्रात्सभयः स जैननृपतिः श्रीहाजिसाहोभव-
द्यन्नीत्या दशवत्सरीं गतभयः पुत्रोस्य राज्यं व्यधात् ।
यातास्ते स्मृतिशेषतां यदमता बह्रामखानादयः
सोपि व्याकुलतामगाद्रिपुभये धिग्वैभवं स्वामिनाम् ॥४०३॥
आतङ्कपङ्ककलुषाः प्रभवन्ति येर्थाः
सन्मार्गविघ्नकरणा धृतजाड्यदोषाः ।
तत्तद्दरिद्रजनपीडनहेतुभूता-
स्तिष्ठन्ति ते न सुचिरं हिमपूरतुल्याः ॥ ४०४ ॥
तद्भृत्यैः फेरभट्टाद्यैरित्यादिजनपीडया ।
यदानीय धनं दत्तं तत्सर्वं राजसादगात् ॥ ४०५ ॥

बहिर्देशात्समानीतांस्तुरङ्गांस्तान्मनोहरान्।
स्वांशुकान्रक्षितांश्चापि निक्षेपमिव दत्तवान्॥ ४०६॥

भूपालवन्महेच्छत्वात्स्वजन्मदिवसादिषु।
यद्दत्तं यच्च भुक्तं स्वं तदेवास्याभवद्धनम्॥ ४०७॥

हे मर्त्या नृपविभवाप्तभूरिवित्ता-
श्चित्तात्तौ कुरुत यथार्थदानभोगौ।
संसारे जलधितरङ्गभङ्गुरेस्मि-
न्सामग्री न पुनरियं सदैव लभ्या॥ ४०८॥

राज्ञः प्रियोस्मि विभवप्रथितप्रभावो
हे सेवकास्त्यजत मानमिमं स्वनिष्ठम्।
गन्धर्वनिर्मितपुरे च कुसुम्भरागे
वेश्यारसे नरपतौ च कुतः स्थिराज्ञा॥ ४०९॥

प्राप्ता पूर्णा सपदि पदवी शत्रुवर्गो जितो यः
कोशोशेषो मम सदनगो भृत्यवर्गः ससर्गः।
इत्थं यावत्कलयति नरो वैभवोत्सिक्तचित्त-
स्तावत्सर्वं क्षपयति विधिः स्वप्नवत्तद्विरुद्धः॥ ४१०॥

एकदा जुगभट्टस्तं बन्धने प्रष्टुमभ्यगात्।
अन्यत्किमस्ति ते स्वर्णं तूर्णं राज्ये समर्प्यताम्॥ ४११॥

क्रुद्धस्तमब्रवीद्द्रव्यकोटिसंख्यं हृतं मम।
एतावतापि नो तृप्तिः प्रभोर्लुब्धस्य विद्यते॥ ४१२॥

किं ब्रूमो राज्यरक्षार्थं स्वपक्षो नाशितोखिलः।
शक्तेनापि न युद्धाय सोढुं तत्तुमुलेन्तरे॥ ४१३॥

कान्दिशीकाः समानीय सैदाः संवर्धिता मया।
द्रोग्धारस्तेपि मे जाताः कृतघ्नेस्मिन्महीपतौ॥ ४१४॥

सर्वं मद्योजितं राज्यमन्धं तावत्करोत्वसौ ।
पुनश्चेद्भुज्यतां राज्यं मन्नाशान्मुदितस्तु सः ॥ ४१५ ॥
दशवत्सरपर्यन्ते राज्यतन्त्रनियन्त्रणा ।
मदीयासीद्भवेदग्रे यदीदृश्यपि तद्विभुः ॥ ४१६ ॥
तुष्यत्वस्मत्प्रणाशेन मयि लोकान्तरं गते ।
इत्याद्युक्त्वा नृपाग्रे स स्वविज्ञप्तिं व्यसर्जयत् ॥ ४१७ ॥
धिङ्मां येन गृहीतं न वचनं दीर्घदर्शिनः ।
श्रीफिर्यडामरेशस्य निनिन्दात्मानमन्वहम् ॥ ४१८ ॥
यद्यहं सुविशुद्धोस्मि तन्मद्रोहकरा अमी ।
मार्गेशताजिभट्टश्च लभन्त्वल्पदिनैः फलम् ॥ ४१९ ॥
इत्यादि दुःखदग्धः स बन्धनस्थो यदब्रवीत् ।
अचिरात्तत्फलं दृष्ट्वा साश्चर्यो भविता जनः ॥ ४२० ॥
इत्थं निर्द्रोहवृत्तेस्मिन्सपुत्रे मल्लिकाह्वदे ।
नाशितेन्ये व्यजृम्भन्त खलप्राया नृपास्पदे ॥ ४२१ ॥
पाजभट्टादयो लुब्धाः सैदानामधिकारिणः ।
प्रमेयान्पीडयामासुर्दुष्टा देहमिवामयाः ॥ ४२२ ॥
आनन्दपुष्पदीन्नागखण्डप्राह्यादिनामभिः ।
सैदाधिकारिणश्चक्रुः प्रजायासैर्धनार्जनम् ॥ ४२३ ॥
श्रीजहाङ्गिरमार्गेशनोसराजानकादयः ।
मधाविव द्रुमाश्चित्रपत्रास्ते शिश्रियुः श्रियः ॥ ४२४ ॥
मल्लीकपदवीं मल्लां श्रीमीयाहस्सनोभजत् ।
नाग्रामग्रामराष्ट्रादि तदीयं तद्ददग्रहीत् ॥ ४२५ ॥
सभृत्यपुत्रवर्गेभ्यः प्रमेयान्विभजन्नवान् ।
स मीयामह्वदायार्धधनराष्ट्रं समार्पयत् ॥ ४२६ ॥

स्वायत्तीकृतभूपास्ते सैदा जयविशृङ्खलाः ।
दूतान्विसृज्य चतुरमानिन्युः सैदनासिरम् ॥ ४२७ ॥
प्राप्ते पञ्चालदेवाग्रं तस्मिञ्शूरपुराध्वना ।
ज्वरस्तद्धृदयं पूर्वं पश्चात्स पुरमाविशत् ॥ ४२८ ॥
पौत्रीजामातृसंबन्धिबान्धवाः सर्वमन्त्रिणः ।
अपुनःसङ्गमायेव सर्वेषां दर्शनं दधौ ॥ ४२९ ॥
तदर्थमिव संप्राप्तो मृतकल्पो दिनद्वयम् ।
अतिवाह्य ज्वराक्रान्तः स्वगृहे पञ्चतां ययौ ॥ ४३० ॥
मल्लिको बन्धनस्थः सन्त्रस्तः पुत्रप्रवासनात् ।
तत्तच्छोकामयग्रस्तः सोप्यस्वस्थो व्यपद्यत ॥ ४३१ ॥
बद्धस्यापि मृतिं तस्य श्रुत्वा मन्त्रिशिरोमणेः ।
देशे सरुदिताक्रन्दं शुशोच सकलो जनः ॥ ४३२ ॥

सत्कार्यभाजां महतां वियोगा-
द्भवन्ति नीचाः पदवीषु योग्याः ।
प्रकाशकेस्मिन्द्युमणौ प्रयाते
भवन्ति दीपाः शरणं प्रजानाम् ॥ ४३३ ॥

दुहितृभाग्यसौभाग्यसंप्राप्तविभवोर्जिताः ।
सैदाः काश्मीरिकान्सर्वान्न तृणायाप्यजीगणन् ॥ ४३४ ॥
याभूत्सैदमुखादाज्ञा निर्यान्ती स्वार्थलिप्सया ।
राज्ञस्तदर्थनिष्ठस्य प्रतिश्रुतेव साभवत् ॥ ४३५ ॥
सैदेषु द्वैधनिष्ठेषु क्षान्तिशीले महीपतौ ।
प्रबलासु च नारीषु कोप्यजृम्भत विप्लवः ॥ ४३६ ॥
उत्कोचग्रहणं धर्मः प्रजापीडा च कौशलम् ।
स्त्रीषु च व्यसनं सौख्यममन्यन्ताधिकारिणः ॥ ४३७ ॥

प्रातिबन्धिकनिर्वृत्त्या स्वाच्छन्द्यप्राप्तिदर्पितः ।
स मीयाहस्सनः सर्वतन्त्रेभ्यो यन्त्रणां व्यधात् ॥ ४३८ ॥
प्रवर्धमानो राज्ञः स शनैराक्रान्तमण्डलः ।
ग्रहाधिपत्यं सर्वेषां राहुश्छायामिवाकरोत् ॥ ४३९ ॥
अथ सूक्ष्मबृहद्भुट्टदेशान्सैदा जिगीषया ।
श्रीजहाङ्गिरनासेरौ यात्रायै द्वौ व्यसर्जयन् ॥ ४४० ॥
उभावेकत्र गच्छावो यद्यावां कर्म सेत्स्यति ।
इति मार्गपतेर्वाक्यं सैदौ नैवान्वतिष्ठताम् ॥ ४४१ ॥
तयोर्देशं विजित्यैकः सयशाः प्राविशत्पुरम् ।
अन्यो विशङ्कितो बद्धो युक्त्यात्मानमरक्षत ॥ ४४२ ॥
निपत्य पश्चाद्भुट्टैर्यत्सेनायाः कदनं कृतम् ।
कालापेक्षानुरोधेन न मनाग्वर्णनं कृतम् ॥ ४४३ ॥
बाह्दुरागादयस्तस्य सेवका वृद्धभूभुजः ।
केचिज्ज्युल्चाणभुट्टाजिवह्नौ शलभतां गताः ॥ ४४४ ॥
पूर्वापकारस्मरणात्सैदास्ते रन्ध्रलब्धिताः ।
नोस्सराजानकं रुद्धदर्शनं तं न्यवारयन् ॥ ४४५ ॥
तेभ्यः स्वानिष्टमाशङ्क्य निजरक्षणदक्षधीः ।
युक्त्या तद्दर्शनो राज्ञो राष्ट्रं मार्गपतिर्ययौ ॥ ४४६ ॥
ततः सैदेषु नष्टेषु प्रजानाशनकारिषु ।
आशङ्क्यानिष्टमात्मीयं युक्त्या राजाग्रमाययौ ॥ ४४७ ॥
एकदा रहसि क्ष्मापमब्रवीत्स जहाङ्गिरः ।
राजन्सैदा यदानीता अमी निष्कासिता अपि ॥ ४४८ ॥
सोयं निष्कण्टके देशे स्वस्त्रानर्थः स्वयं कृतः ।
यथैव राज्ययोग्यस्त्वं पौत्रः श्रीजैनभूपतेः ॥ ४४९ ॥

दौहित्रोपि तथैवास्य प्राप्तो मीयामहम्मदः।
सैदास्ते सर्वदा शङ्क्यास्तुरुष्काश्वस्तमानसाः ॥ ४५० ॥
गृध्रा इवामिषे राज्ये ये लुब्धाः सन्ति संततम्।
न युक्तैकप्रियासक्तिर्बहुभावस्य ते विभो ॥ ४५१ ॥
एकवल्लीरतो भृङ्गः सततं केन शस्यते।
यदि जायाविधेयत्वं न स्यात्तव महीपते ॥ ४५२ ॥
सर्वं सिध्यति कार्यं तत्स्त्रीजितो मा भव प्रभो।
मया स्वद्राज्यरक्षार्थं स्वरक्षार्थं च गम्यते ॥ ४५३ ॥
बहिर्देशो ह्यतः स्वात्मा रक्षणीयो यथा तथा।
इति श्रुत्वा तथेत्युक्ता राजा रात्रौ प्रियान्तिके ॥ ४५४ ॥
तदुक्तमब्रवीत्सर्वं स्नेहमोहवशीकृतः।
तेन मार्गपतेः क्रुद्धा भोगिनीव भयावहा ॥ ४५५ ॥
अनिष्टं चिन्तयन्त्यासीत्पितृपक्षमताहता।

पुरुषानवधीर्य यत्र नारी
प्रभवत्येव जितप्रिया स्वतन्त्रा।
कुपितेव तदीक्षणाद्विशिष्टा
न चिरं तिष्ठति तत्र राज्यलक्ष्मीः ॥ ४५६ ॥

अमुञ्चद्वल्लभापार्श्वं तत्पक्षानुग्रहग्रहः।
मल्लिकाह्वदवद्राज्यं तदायत्तं ततोकरोत् ॥ ४५७ ॥
सैदेभ्योनिष्टमाशङ्क्य त्रस्तो राज्ञ्या विरुद्धया।
कार्कोटद्रङ्गमार्गेण मार्गेशः सबलो ययौ ॥ ४५८ ॥
सर्वां कुटुम्बसामग्रीं भाङ्गिलान्तरतो नयन्।
गच्छन्दुर्गममार्गेण न स धैर्याद्व्ययुज्यत ॥ ४५९ ॥

तद्राज्यसिन्धुर्विपुलः समृद्ध्या
व्यलक्षि यः संभृतवाहिनीकः।

परस्परामात्यविरोधवात्या-
विक्षोभितोभूत्स विकीर्णरत्नः ॥ ४६० ॥

साम्ना दैन्यमुदारदानविधिना वित्तप्रकर्षक्रिया-
भेदात्पैशुनकर्म मर्मदलनं युद्धेन नाशो विशाम् ।
इत्यालोच्य विरोधिषु प्रतिदिनेवर्धत्सुशक्ते प्रभौ
देशत्यागमुपायमेकमुचितं कोप्युत्तमो गाहते ॥ ४६१ ॥

अयुक्तपक्षनाशेन पश्चात्तापाहतो नृपः ।
मार्गपत्यादिनाशेन क्षते क्षारमिवान्वभूत् ॥ ४६२ ॥

मार्गेशाद्यैर्विना राजा सर्वसैदान्वितोपि सन् ।
स्वात्मानं गणयामास यूथभ्रष्टमिव द्विपम् ॥ ४६३ ॥

मार्गपत्यन्वये जाताः प्रतीहारान्वये च ये ।
ठक्कुरान्वयजाः कोशाध्यक्षजा अपरे च ये ॥ ४६४ ॥

स्वस्वपक्षोर्जिताः पूर्वे येभवन्विजयोर्जिताः ।
नष्टमन्त्रविरोधेन शतैकीयोवशिष्यते ॥ ४६५ ॥

तस्मिन्याते बहिर्वर्षतुषारं प्रसभं नभः ।
भाग्याधिकोयं सर्वेभ्यो विशां चिच्छेद संशयम् ॥ ४६६ ॥

हिमानीपातभारेण येवसन्नत्र मण्डले ।
ययुर्निश्छायतां वृक्षा भग्नशाखा जना इव ॥ ४६७ ॥

प्राक्चेत्पतेद्धिमं तावन्म्रियेरन्ब्रुडिताः क्षणात् ।
पिष्टराद्यन्तगर्ताटाः प्रविष्टा इव तद्भटाः ॥ ४६८ ॥

तेनैकेन विना सर्वहृदयाह्लाददायिना ।
नाशोभत सभा राज्ञश्चन्द्रेणेव कुमुद्वती ॥ ४६९ ॥

तटस्थो भृत्यकार्येषु सैदभार्याविधेयधीः ।
विसूत्रव्यवहारत्वं निन्द्यत्वं चागमन्नृपः ॥ ४७० ॥

स्वराज्यरक्षणाचारलक्षणाक्षमशासनः।
निन्दन्दास्यं सदैवासीत्प्रियेक्षणकृतक्षणः॥ ४७१॥
निग्रहानुग्रहव्यग्राः सूत्कोचग्रहतत्पराः।
अन्तरङ्गाः स्त्रियोभूवन्न मन्त्री न च सेवकः॥ ४७२॥
भोगलोभोज्झितौचित्या अमी विन्दन्ति सांप्रतम्।
तुरुष्कपुष्कलाश्वासाः स्वार्थमर्थं न च प्रभोः॥ ४७३॥
अनायका विनश्यन्ति नश्यन्ति शिशुनायकाः।
स्त्रीनायका विनश्यन्ति नश्यन्ति बहुनायकाः॥ ४७४॥
स्त्रीविधेयं समालोच्य राज्यं तस्य महीपतेः।
इति श्लोकं पठँल्लोकः सशोकः समदृश्यत॥ ४७५॥
ध्यायतो मार्गपत्यादींस्तत्प्रत्यानयनक्षमः।
शयनीयविमुक्ताङ्गस्तप्यते स्म दिवानिशम्॥ ४७६॥
अत्रान्तरे स मार्गेशो लोहरान्तरसंश्रयः।
स्वामिचिन्ताकुलो लेखशिक्षामित्थं व्यसर्जयत्॥ ४७७॥
राजन्पुंरत्न कोशस्ते योभूत्सर्वार्थसाधकः।
उत्पाद्योत्सारितः सैदैर्यद्दारिद्र्यं सुदुःसहम्॥ ४७८॥
निसर्गगुरवो नान्यसङ्गमिच्छन्ति चञ्चलाः।
अमी परस्पराभिन्नाः पारदस्य कणा इव॥ ४७९॥
हरिचन्दनवद्राजन्सर्वसौख्यप्रदो भवान्।
किंतु फूत्कारकारिण्या भोगिन्या वेष्टितो ह्यसि॥ ४८०॥
यस्मिन्स्फूर्जद्विषज्वाला व्यालाः सन्ति परासहाः।
निधानमिव तद्राज्यं त्याज्यं कस्य न सन्मतेः॥ ४८१॥
प्रदीप्तापि न या स्पृश्या दृश्यापि भयकारिणी।
श्मशानाग्निशिखेवासौ लक्ष्मीः सा केन सेव्यते॥ ४८२॥

स मीयाहस्सनस्तत्तद्दुर्ग्रहग्रस्तवासनः ।
आप्तैरुक्तोपि सन्मार्गे न तिष्ठतीव रावणः ॥ ४८३ ॥
मीराख्या ताडकेवात्र सूत्कोचामिषभक्षिणी ।
पौलस्त्यस्येव ते सर्वनाशार्थं निकटे स्थिता ॥ ४८४ ॥
तिष्ठन्त्वभ्यन्तरे सैदा यदीष्टा भवदन्तिके ।
तुरुष्ककरगं देशमिहस्थः साधयाम्यहम् ॥ ४८५ ॥
राजद्रोही न कोप्यस्मत्कुलेभूद्भक्तिवर्जितः ।
त्वदेकशरणः सोहं स्कन्दस्थो द्वाःस्थवद्भसे ॥ ४८६ ॥
वयमेव सदाचारा विचारविशरारयः ।
उन्मार्गे यदि गच्छामः कोप्यस्मासु न विश्वसेत् ॥ ४८७ ॥
कल्पान्तमपि जीवित्वा कृत्वापि धनसंचयम् ।
हत्वाप्यरीन्न कोप्यत्र भवे भवति सुस्थिरः ।
नष्टेन्यस्मिन्भवांस्त्राता त्वयि नष्टे परोस्ति कः ॥ ४८८ ॥
इति लेखं नृपस्याग्रे बुद्ध्वा मार्गपतेर्द्रुतम् ।
स मीयाहस्सनः क्रोधाच्छ्वसन्नहिरिवाब्रवीत् ॥ ४८९ ॥
सोयं स्थानच्युतस्तत्र स्वजीवनविवर्जितः ।
नूनमस्मत्प्रतापेन शुष्यतीवाब्जषण्डवत् ॥ ४९० ॥
ग्रीष्मोष्मणा विशुष्कस्य पङ्कमात्रावशेषिणः ।
भृत्यास्तस्य न तिष्ठन्ति तडागस्येव पक्षिणः ॥ ४९१ ॥
किं करोतु स्थितस्तत्र तत्रत्यैर्विहितादरः ।
मदीयदासमात्रोपि तं जेतुं क्षमते युधि ॥ ४९२ ॥
अथ वाहं स्वयं यामि तं निष्काशयितुं ततः ।
स तुरुष्कैः समं तत्र ग्रथनं कुरुतेन्यथा ॥ ४९३ ॥
अथोचे सैदहसनः पूर्वमैत्रीमनुस्मरन् ।
किं नस्तेन हृतं राष्ट्रं दीयतामानयाम्यहम् ॥ ४९४ ॥

अयुक्तोपप्लवे पूर्वं कृतदिव्याः परस्परम्।
अनिष्टं चिन्तयामश्चेत्तत्कथं सहते विधिः ॥ ४९५ ॥

तच्छ्रुत्वा नृपतेरग्रे तद्वैरैकाग्रमानसः।
तूर्णं दौलतयानं स्वं नौशाहाराधिप व्यधात् ॥ ४९६ ॥

वाह्यस्थः साधयत्येष कार्यं सद्भृतकागृणीः।
द्रव्यकोटिं ददामोस्मै सैन्यसंग्रहसिद्धये ॥ ४९७ ॥

इत्युक्ता प्रतिमुक्तं तमेधराजानकं पथः।
द्रुतं निवर्तयामास दत्तद्रव्यमपि स्वयम् ॥ ४९८॥

श्रुत्वा परशुरामाद्या मद्राः कश्मीरदेशतः।
सानिष्टशङ्कया गन्तुं साङ्गं तेभ्यो यथोचिरे ॥ ४९९ ॥

ऊचुस्तान्प्रति मुञ्चामो युष्मान्पाथेयसंयुताः।
कियद्दिनानि तिष्ठध्वं तद्यूयं दत्तवेतनाः ॥ ५०० ॥

तेषु स्ववसतिं यात्सु सैदास्तेन्योन्यमब्रुवन्।
निष्कास्याः सर्वथैतेन तुरुष्कैकविरोधिनः ॥ ५०१ ॥

अत्रान्तरे नरेन्द्रस्य तत्तद्भृत्यादिचिन्तनात्।
जाताधिबाधितं वक्त्रं पौषे पद्ममिवाभवत् ॥ ५०२ ॥

मृगयारसिकाः सैदा निन्युस्तं तादृशं नृपम्।
माघे विषयराष्ट्रादिगतान्हन्तुं मृगव्रजान् ॥ ५०३ ॥

यत्र यत्रावसद्रात्रौ ससैदः कटकोत्कटः।
पीड्यमानजनाक्रन्दमुखरास्तद्दिशोभवन् ॥ ५०४ ॥

पङ्क्तीः प्रसार्य परितोद्रिषु तद्विभागं
यत्रोपवेशमकरोत्कटको नृपस्य।
तत्रोदतिष्ठदतिनिष्ठुरवाग्जनानां
द्राक्षालताच्छिदि शुचा रुदितस्वनौघः ॥ ५०५ ॥

गिरयोत्युन्नतास्तत्र सुखदाः सान्त्वनिर्भराः ।
आक्रान्ताः कटकैर्हिंस्रैर्दुर्जनैरिव साधवः ॥ ५०६ ॥

प्रालेयपूरमग्नाङ्गाः कुरङ्गा गिरिशृङ्गतः ।
श्रुत्वा कोलाहलं त्रस्ताः सकुटुम्बाः समाययुः ॥ ५०७ ॥

कृष्टजिह्वान्स्फुरद्रक्तसिक्तास्याञ्श्वगणावृतान् ।
तांस्तत्राग्रागतान्दृष्ट्वा सैदास्ते तुतुषुर्भृशम् ॥ ५०८ ॥

हरास्मान्पीवरानेतान्पोतान्मा हर दुर्बलान् ।
इतीव वक्तुं भूपाग्रे प्रापुस्ते सार्भका मृगाः ॥ ५०९ ॥

सिद्धाध्युषितशृङ्गस्थत्रस्तैणवधदर्शनात् ।
क्रुद्धाः स्युर्देवता राजन्मा कृथा मृगयामिमाम् ॥ ५१० ॥

इत्याद्युक्तोपि बहुशस्तत्रत्यैः सकलैर्जनैः ।
शृङ्गारीवाङ्गनासङ्गान्न व्यरंसीन्मृगग्रहात् ॥ ५११ ॥

आस्थानमृगगोग्रेयं नान्यथा क्रियते त्वया ।
मुनिर्वैश्रवणाद्रिस्थो नृपमेत्याब्रवीदिति ॥ ५१२ ॥

साक्रन्दमाहता हत्वा मृगीस्ता रुधिरोक्षिताः ।
तद्गर्भनिर्भरां भूमिं सैदाश्चक्रुर्दशोज्झिताः ॥ ५१३ ॥

अतृप्तस्तद्वधात्कृत्वा निर्मृगांस्तान्गिरीश्वरान् ।
सायं श्रान्तः सघोषौघान्वसतीरादिशन्नृपः ॥ ५१४ ॥

भव्या स्नुषास्य तनया तरुणी च जाया
कादम्बरं प्रसरके पशवश्च मीनाः ।
तिष्ठाम्यमुष्य सदनेहमिहैव रात्रौ
ध्यात्वेति कोपि न्यविशद्यमकिंकराभः ॥ ५१५ ॥

धानुष्कपुष्कलबला बलिनस्तुरुष्काः
षट्कर्मधर्मनिरताग्र्यगृहोपविष्टाः ।

तद्भाण्डपक्कहतकुक्कुटमांसभक्ष्या
यक्षा इवात्र विदधुर्मधुपानलीलाम् ॥ ५१६ ॥
पशुतण्डुलमद्यादि हृत्वा वास्तव्यलोकतः।
लुब्धास्तत्सेवकाः केपि स्वगृहे भरणं व्यधुः ॥ ५१७ ॥
मान्यदागमनं भूयाद्युष्माकं जनपीडया।
इत्याद्यार्त्ताशिषः शृण्वन्न शक्तो विव्यथे नृपः ॥ ५१८ ॥
मृगयाव्यसनं राज्ञो धिक्फलं भुज्यतेनघैः।
मृगापदेशाल्लोकानामेव सा क्रियते स्फुटम् ॥ ५१९ ॥
पशुवच्छतशो बद्ध्वा मृगौघो यत्र मार्यते।
मृगया सा विनोदाय यदि शौनिककर्म किम् ॥ ५२० ॥
श्रमस्त्वयं चले लक्ष्ये स्पृहणीयोस्ति सादिनाम्।
कोयं बद्धे मृगे श्लाघ्यः शराभ्यासो धनुष्मताम् ॥ ५२१ ॥
क्षत्रियैर्मृगया कार्या निरवद्यतृणाशनात्।
नैकान्तव्यसनं युक्तं ह्याति सर्वत्र गर्हितम् ॥ ५२२ ॥
महापद्मसरस्तीरगिरिगांश्च मृगव्रजान्।
आगतो नृपतिस्तद्धन्निःशेषानकरोद्धधात् ॥ ५२३ ॥
इत्याद्यनुचितं किंचिन्मृगयादूषणं कृतम्।
विलोक्य यद्भवेद्भीतिर्भाविनां मृगयाजुषाम् ॥ ५२४ ॥
आखेटिकां नृपः कृत्वा राजधानीं समागतः।
अस्वास्थ्यमवहद्देहे ग्रहणीगदसंभवम् ॥ ५२५ ॥
केप्यूचुर्मृगयादोषात्कुपिता देवतास्ततः।
अतीसारगदारम्भस्तत्रैवास्य विलोकितः ५२६ ॥
केपि प्रच्छन्नराज्येच्छाः सैदाः स्वातन्त्र्यकाङ्क्षिणः।
व्यधुः किमपि भूपाले तुरुष्काहतमानसाः ॥ ५२७ ॥

केपि मन्त्रिवियोगोत्थचिन्तासंतापितात्मजम् ।
रुजमाहुर्न तद्व्याधेर्निश्चयः कस्यचिदभूत् ॥ ५२८ ॥
भूपस्तादृगवस्थः स नववर्षादिवासरे ।
ययौ सर्जप्रदेशं तद्व्यर्थया शकुनोच्छया ॥ ५२९ ॥
तद्दिने गच्छतस्तस्य राज्ञो नौकान्तरस्थितेः ।
जैनवाटविहाराग्रात्सर्पस्तुत्रोट पद्धतिम् ॥ ५३० ॥
तद्दुर्निमित्तभीशान्त्यै हत्वा तं सायकैर्नृपः ।
अहरद्धृदयाशङ्कां न शरीराद्रुजं पुनः ॥ ५३१ ॥
किमर्थं निर्गतो वासि चिरं त्वं सुकृतं कुरु ।
इतीवाग्रागतो वायुः सवेगं तं न्यरुध्यत ॥ ५३२ ॥
अस्मिन्गते प्रजापीडा भविष्यत्यत्र मण्डले ।
अकम्पत शुचेवोद्यत्तरङ्गतरलं सरः ॥ ५३३ ॥
तत्र सर्जोत्सवे भुक्त्वा सैदमन्त्रिसभावृतः ।
अपुनर्दर्शनायेव सर्वेषां दर्शनं ददौ ॥ ५३४ ॥
नौकारूढस्ततस्तूर्णं सभृत्यः स दिनावधि ।
उत्कण्ठाखण्डनायैव श्येनैः पक्षिवधं व्यधात् ॥ ५३५ ॥
अद्यैवेमं विनोदं नः करोति न पुनः प्रभुः ।
इत्येव श्येनाः पक्ष्यालीं गृहीत्वोपायनं व्यधुः ॥ ५३६ ॥
प्रत्यावृत्तस्ततो राजा सैदांस्तान्प्रतिमुच्य च ।
नाहं स्वस्थोस्मि तल्पस्थो देवीं ज्ञातरुजं व्यधात् ॥ ५३७ ॥
तत्पथ्यपरिचारिण्या स्वयं देव्या वृतो नृपः ।
दिवसेन्दुरिव क्षीणरुचिं विच्छायतामगात् ॥ ५३८ ॥
कपाटविकटं वक्षः श्यामगौरं तदाननम् ।
कटयूरुजानुपादाश्च पीनाः पद्मदलोपमाः ॥ ५३९ ॥

सुन्दरं नयनद्वन्द्वं ललाटं भ्रूमनोहरम्।
तद्भुजा नृपतेः सर्वे विवर्णे समपद्यत ॥ ५४० ॥
एकदा सोवदद्राजा तं मीयाहस्सनं रहः।
नाहं जीवामि राज्यार्हाः न सुताः शिशवो मम ॥ ५४१ ॥
बद्धो बह्वामखानीयो न पाति मम बालकान्।
वरमादमखानीयं युक्त्यानीयाभिषिच्यताम् ॥ ५४२ ॥
अथ वेयं भवत्कन्या यद्वक्ष्यति करोतु तत्।
श्रुत्वेति भव धीरस्ते स्वास्थ्यं स्यादिति सोब्रवीत्।
केवलं सैदहसनो रुरोद भृशदुःखितः ॥ ५४३ ॥
अथ राज्ञ्यवदत्पित्रे रहो मीरामुखादिदम्।
संदेहितासू राजायं राज्ये किं क्रियतेधुना ॥ ५४४ ॥
वरं बन्हामखानीयो युवायमभिषिच्यताम्।
यौवराज्ये च ज्येष्ठोयं दौहित्रः स्थाप्यतामिति ॥ ५४५ ॥
द्वित्रा द्विष्टाश्च बध्यन्तां सर्वे स्युरविनश्वराः।
श्रुत्वेति मीयाहसनः सक्रोधस्तामभर्त्सयत् ॥ ५४६ ॥
तच्छ्रेयःप्राप्तिसंकल्पकल्पितद्रव्यसंचयान्।
मौसुलेभ्यो ददुः सैदा द्विजभक्तिविवर्जिताः ॥ ५४७ ॥
प्रभुं द्रष्टुं न यच्छन्ति गच्छन्त्यभ्यन्तरं स्त्रियः।
मन्त्रपाठं निषेधन्ति तत्तद्गारुडिकोचितम् ॥ ५४८ ॥
चिकित्सां वैद्यकोक्तां तामन्यथा रचयन्ति च।
तत्रापि गुलिकां भोक्तुं रचयन्ति स्वसाधिताम् ॥ ५४९ ॥
किमप्यनिष्टं कर्मेति कृतमित्यादिवादिनः।
वर्चो विवर्णं पश्यन्तोप्यन्तरङ्गा महीपतेः ॥ ५५० ॥
वैद्यो गारुडिकश्चाहं दृष्टकर्मेति कत्थयन्।
तथाभूद्रूप्यभट्टः स स्त्रीवैद्यककृतार्थनः ॥ ५५१ ॥

मुमूर्षुः सेवकैः पृष्टः का रुक्किं चेक्षसे विभो।
सण्डो निवार्यतामग्रादित्यूचे तान्महीपतिः ॥ ५५२ ॥
कृतान्तमहिषो दृष्टो दिवमद्यैव यात्ययम्।
इत्युक्त्वा शुशुचुः सर्वे साक्रन्दं साश्रुलोचनाः ॥ ५५३ ॥
संरुद्धवसनः साश्रु घूर्णयन्दृष्टिमण्डले।
तस्यामेव रजन्यां स मुमूर्षुरभवन्नृपः ॥ ५५४ ॥
वर्षे षष्टितमे कृष्णनवम्यां माघि माधवे।
पञ्चाहं द्वादशाब्दांश्च राज्यं कृत्वा दिवं ययौ ॥ ५५५ ॥
आक्रन्दमुखरा रात्रिः सर्वा सा जनताप्यभूत्।
प्रातर्याने समारोप्य च्छत्रचामरसंयुतम् ॥ ५५६ ॥
सैदाः ससेवकाः सर्वे निन्युः पितृशवाजिरम्।
श्रीजैनभूपप्रमये दुःखिता नाभवत्प्रजा।
तादृशी यादृशी तस्य मरणे शरणोज्झिता ॥ ५५७ ॥
तद्गृहाश्मनि वस्त्राढ्ये तस्य मस्तकवेष्टनम्।
तद्बन्धरचनं टुप्पिकोज्ज्वलं मन्त्रिणो व्यधुः ॥ ५५८ ॥
तदालोक्य जनः सर्वो दर्शनोत्कण्ठिताशयः।
स्मारंस्मारं नृपं मेने निषण्णमिव मध्यगम् ॥ ५५९ ॥
प्रातःप्रातः समागत्य सैदाः सप्तदिनावधि।
स्ववेदाध्ययनं चक्रुर्मिश्रितं रुदितैः स्वनैः ॥ ५६० ॥
विहितरतयो दृष्टा येन्यैर्महाविभवोज्ज्वला-
स्तरुणवयसो बालालीलाविलासमदालसाः।
कतिपयदिनैस्तेमी रिक्ता व्रजन्ति शुचान्विता
विरसमनसो राज्याद्वेश्यागृहादिव कामुकाः ॥ ५६१ ॥
देशो मेयं रचितरचना राजधानी ममेयं
कोशो मेयं युवतिरपि मे मे सुता मे च भृत्याः।

इत्येवान्तः कलयति नृपो यावदेत्यन्तकस्तं
त्यक्त्वा सर्वं व्रजति सुशिराः पुण्यपापैकभागी ॥ ५६२ ॥
सप्ताङ्गसुभगं राज्यं ममेदमिति योब्रवीत्।
तदीयो नाभवत्तस्य स्वदेहान्ते पृथक्स्थितेः ॥ ५६३ ॥
इत्थं शवाजिरे लोकः शुशोच नृपसंततिम्।
अश्मैकरचनामात्रावशिष्टां तत्र संस्थिताम् ॥ ५६४ ॥
राज्यदानाय राज्ञी सा म्लेच्छसंपर्ककर्कशम्।
बह्रामखानजं पुत्रं दुःखोदर्कमतर्कयत् ॥ ५६५ ॥

इति हस्सनशाहिस्वर्यानम्।

इति जैनराजतरङ्गिण्यां पण्डितश्रीवरविरचितायां
हस्सनशाहिराज्यवृत्तान्तवर्णनं नाम तृतीयस्तरङ्गः।

तृतीयेहनि सैदास्ते मिथः संमन्त्र्य सत्वराः।
व्यधुर्मह्मदखानाय राज्यदानाय निश्चयम् ॥ १ ॥
प्रतीक्षाक्षममालोक्य कालं सैदास्त्वराकुलाः ।
राज्याभिषेकदानेच्छामकुर्वन्नृपसूनवे ॥ २ ॥
अथ राज्ये व्यधीयन्त तत्सुतं सप्तवार्षिकम्।
कृत्वा मह्मदशाहाख्यं गोनन्दमिव सुन्दरम् ॥ ३ ॥
तस्य सिंहासनस्यान्ते स्थापिता वस्तुसंततिः।
त्यक्त्वा भोजनसामग्रीं पूर्वं शार्ङ्गेपतत्करः ॥ ४ ॥
एतद्राज्ये सदा युद्धं भविता मण्डलान्तरे।
दृष्ट्वा शकुनविज्ञाः केप्यूचुस्तत्रान्तिकस्थिताः ॥ ५ ॥
रौप्यसिंहासने छत्री विबभौ बालभूपतिः।
दत्तानन्दः पयःपूरैर्बालेन्दुरिव सुन्दरः ॥ ६ ॥
सैदाः शुभ्रांशुकन्यस्तकुङ्कमालोहितत्विषः।
भाविद्रोहकृतोद्रच्छद्रक्तासिक्ता इवाबभुः ॥ ७ ॥

भ्राता हुस्सनखानोस्य कनीयान्रुचिराकृतिः ।
बभौ बालनृपस्याग्रे शुक्रस्येव बृहस्पतिः ॥ ८ ॥

शोकहर्षान्वितो लोकस्तद्दिने पितृपुत्रयोः ।
दधौ तमःप्रकाशाढ्यां लोकालोकाचलश्रियम् ॥ ९॥

दौहित्राभ्युदये सैदाश्चेरुरानन्दसुन्दराः ।
सुगन्धिमकरन्दाढ्ये मधौ मधुकरा इव ॥ १० ॥

वाद्यमानोत्सवातोद्यप्रोद्यत्प्रतिरवच्छलात् ।
अकुर्वन्निव वृद्ध्यर्थं राज्ञस्तस्याशिषो दिशः ॥ ११ ॥

राजधान्यङ्गने सैदाः परिधानप्रसादनैः ।
अतोषयन्नुत्सवान्तः सर्वं नृपपरिच्छदम् ॥ १२ ॥

एकस्मिन्कीर्तिशेषेन्या दिग्द्वयाद्धस्सनद्वयी ।
तादृशे ददृशे पौरैः स्फूर्जत्सादिशतावृता ॥ १३ ॥

राज्यसंपत्ससप्ताङ्गा तद्गृहे समलक्ष्यत ।
तत्कन्योद्वेजितेवाप्ता वक्तुं रिपुपराभवम् ॥ १४ ॥

राज्ञः सेवकसामन्ताः प्राप्नुवन्तस्तदन्तिकम् ।
प्रवेशं लेभिरे नान्तर्लुठन्तः कुक्कुरा इव ॥ १५ ॥

देश्यसंस्कृतशास्त्रज्ञविद्वत्कृतविडम्बनाः ।
गृहे स्त्रीषु बहिः श्येनलीलासु व्यसनं दधुः ॥ १६ ॥

विगुणव्यवहारेषु क्रूराचारेषु दर्पिषु ।
दुःसहान्तकदूतेन लोभेन क्षोभितेषु च ॥
दौःशील्यानभिगम्येषु प्रसरन्मत्सरेषु च ।
विरागं तेषु सैदेषु सप्रजाः सेवका ययुः ॥ १७ ॥

हितानामपि सैदानां केचिद्भूपालसेवकाः ।
नाभ्यनन्दन्परिचयं काकानामिव कोकिलाः ॥ १८ ॥

द्विजस्थितिः सुखं यासीत्सती सरसि निश्चला।
तेषां श्येनैश्च भृत्यैश्च भ्रामिता चपलाशया ॥ १९ ॥
स्फीतगीतोल्लसन्नादा येभवन्वृन्दगायनाः।
शोकमूका इवाभ्यर्णे माघे भृङ्गा इवाभवन् ॥ २१ ॥
अथ प्रथममेवैते गृहीत्वा नवभूपतिम्।
शकुनापेक्षिणो नावा वितस्तातटमभ्यगुः ॥ २२ ॥
स्वपक्ष्यावर्जकास्तत्र पृष्टभोज्यान्नसंपदः।
स्वातन्त्र्यप्राप्तिदर्पान्धाः काश्मीरानादरं व्यधुः ॥ २३ ॥
अपुनर्गमनायेव विधाय शकुनिक्षयम्।
एकदा स्वीयसंयुक्ता व्यधुः किमपि मन्त्रणम् ॥ २४ ॥
तेषां तत्केवलतया श्रुत्वा षाड्गुण्यमन्त्रणम्।
काश्मीरिकाश्च मद्राश्च शङ्किता नगरेभवन् ॥ २५ ॥
ततः परशुरामाद्यैस्तद्विष्टैः सह तद्दिने।
मिलिताः पञ्चशस्तीक्ष्णाः सैदा द्रोहमचिन्तयन् ॥ २६ ॥
जिघांसतामथैतेषां वैजन्यावसरेक्षिणाम्।
न भेदमगमन्मन्त्रो गुप्तस्तदुष्कृतैरिव ॥ २७ ॥
एकदा तत्सुताभीष्टा मीराख्या मीरहस्सनम्।
मूर्तेव दुर्दशा गेहमागत्येत्यब्रवीद्रहः ॥ २८ ॥
राज्ञः क्वापि क्रिया साध्या तूर्णमागम्यतां प्रभो।
इत्युक्त्वानिष्टमप्येनं सा निनाय गृहान्तरात् ॥ २९ ॥
द्रोहस्ते सूर्यवारे स्यान्न गन्तव्यो नृपालयः।
पित्रेत्युक्तोपि स स्वप्ने ययौ दैवविमोहितः ॥ ३० ॥
तावत्स सैदहसनोप्याययौ स्वगृहाद्द्रुतम्।
पादच्छेदोस्ति ते द्रोहान्मा पलायनमारुह ॥ ३१ ॥

इत्येव पादकटकच्छिन्नोश्वादपतद्भुवि ।
प्रतोल्यां सैदसाद्यश्वखुरोत्कीर्णरजोमिषात् ॥ ३२ ॥
नैते पुनर्विशन्तीति शुचेवोच्छ्वासमक्षिपन् ।
तत्तारखानलेखेन त्वदनर्थादिहेतवे ॥ ३३ ॥
प्राप्तेनाद्य मिथो मन्त्रं विधाय कृतनिश्चयाः ।
आक्रान्तमण्डलाः सैदा युष्मच्छेषविशङ्किताः ॥ ३४ ॥
प्रातर्बध्नन्ति वस्तस्मादुपायः कोपि चिन्त्यताम् ।
मिथ्येति बोधिता मद्रा जोनराजानकादिभिः ॥ ३५ ॥
हन्मस्तान्वयमेवादौ समंत्र्येति समाययुः ।
सर्वानमृतवाट्यन्तः समेतानवगम्य तान् ॥ ३६ ॥
अन्तः परशुरामाद्या विविशुः शस्त्रधारिणः ।
रक्ष्यो द्वारस्त्वया तैरित्युक्तो द्वारेशताजकः ॥ ३७ ॥
मन्त्रे प्रवृत्तिरित्युक्त्वा सैदभृत्यान्न्यवारयत् ।
कुर्वन्ति भोजने लुण्ठि त्वद्भृत्या इति तद्गिरा ॥ ३८ ॥
सैदाः स्वशस्त्रान्स्वान्भृत्यान्स्वसमीपाञ्यवारयन् ।
जोनराजानकस्तावत्पथान्येनागमद्द्रुतम् ॥ ३९ ॥
गृहीत्वा राजभृत्यौघाञ्जिघांसुर्वाटिकान्तरात् ।
ताजदौवारिकोप्यश्वमारुह्याप्तो नृपाग्रगम् ॥ ४० ॥
बभ्रामाभ्यन्तरेन्यत्र तन्मतेन जिघांसया ।
वाटिकान्तश्चतुष्खण्डमण्डपोपरि संस्थिताः ।
सैदा मद्रान्समालोक्य साशङ्का इव तस्थिरे ॥ ४१ ॥
किं न गच्छत देशं स्वं प्रतिमुक्ताः किमागताः ।
इत्यागतांस्तान्दृष्ट्वैव सेर्ष्यं सिंहद्विजोभ्यधात् ॥ ४२ ॥
मार्गमुक्त्यक्षरो नाप्तस्त्वत्तो यामः कथं वयम् ।
अद्य वः प्रतिमोक्ष्यामः सत्यार्थमिति तेभ्यधुः ॥ ४३ ॥

वैजन्यमीक्ष्य पाथेययाच्ञादम्भादुपागतः।
परशुः सिंहभट्टं तं न्यबधीत्प्रथमं रुषा ॥ ४४ ॥
चतुष्मण्डपिकाप्रान्ते प्रक्षरत्क्षतजोक्षितः।
सिंहोपि विद्युटच्छालः शृगाल इव सोपतत् ॥ ४५ ॥
किं द्रोहो द्रोह इत्युक्त्वा यावद्भीताः समुत्थिताः।
तावत्खड्गप्रहारैस्ताञ्जघ्नुर्मद्राः समेत्य ते ॥ ४६ ॥
निर्यातः प्रस्फुरन्मेदा द्वाराग्रे सैदहस्सनः।
हतो मुष्ट्यायुधस्तत्तत्प्रहारशतविह्वलः ॥ ४७ ॥
तं दृष्ट्वा मीयहसनं सभयं विद्रुतं द्रुतम्।
प्राकारारूढमवधीत्कोपि छिन्नपदद्वयम् ॥ ४८ ॥
गदयामीनकासीममल्लुलाद्यास्तदन्तिके।
त्रिंशन्मात्रा हतास्तत्र पुत्रमित्रसमन्विताः ॥ ४९ ॥
वदन्तो हालहालेति रक्तसिक्ताक्तपाणयः।
चेरुस्ते तद्वधोद्युक्ताः कृतान्तस्येव किंकराः ॥ ५० ॥
गृहेषु गोवधात्तेषां पापभीर्नाभवद्यथा।
तथा तत्र घ्नतां सैदान्मद्राणां नाभवद्घृणा ॥ ५१ ॥
मृगयान्ते कुरङ्गादींश्छिन्नाङ्गान्व्यदधुर्यथा।
तथा सैदाः कृता मद्रैः क्षुद्रैस्तद्वाटिकान्तरे ॥ ५२ ॥
द्विपद्धृतांशुका नग्ना महार्हशयनोचिताः।
अनाथा इव लोकस्य प्रययुः प्रेक्षणीयताम् ॥ ५३ ॥
केचिद्दैवतखानाद्या निष्कृष्टच्छुरिकास्ततः।
तूर्णं प्राकारमुलङ्घ्य गृहीत्वाश्वान्पलायिताः ॥ ५४ ॥
तद्दृष्ट्वा तुमुले जाते बहिस्तदनुजीविनाम्।
कस्यापि निश्चयो नाभूदन्तरे के हता इति ॥ ५५ ॥

भयत्यक्ताभिमानेषु विद्रुतेष्वनुजीविषु ।
चकर्ष शस्त्रं तन्मध्यात्कोपि नैवाङ्गनान्तरे ॥ ५६ ॥

मल्लजादात्मजाहूतस्तावन्मीयामहम्मदः ।
गृहादेत्य द्रुतं प्रादादास्कन्दं राजमन्दिरे ॥ ५७ ॥

प्रतोलीपालकः सोयं द्रोहीत्यग्रागतं द्रुतम् ।
राजमार्गान्तरे क्रुद्धो नूरोल्लाहमघातयत् ॥ ५८ ॥

बद्धारिपुटां दृष्ट्वा राजधानीं नवीकृताम् ।
ज्ञात्वान्तःस्थान्रिपून्प्राग्वत्क्षोभेनाग्निमदापयत् ॥ ५९ ॥

न शक्तोपद्रवं द्रष्टुं स्वर्गं मद्रक्षको गतः ।
शुचेवेति द्वारधान्या जुहुवे ज्वलने वपुः ॥ ६० ॥

सौधप्रान्तलसद्धूमस्तोमव्याजान्नृपश्रियः ।
क्व मां खला नयन्तीति निःश्वासौघा इवास्फुरन् ॥ ६१ ॥

अत्रान्तरेग्निमालोक्य द्रोग्धारो धारितायुधाः ।
राजधान्यङ्गनं प्रापुर्निर्गता वाटिकान्तरात् ॥ ६२ ॥

जोनराजानको गच्छन्क्रुद्धः केनापि पत्तिना ।
वीरः खड्गप्रहारेण द्वित्रांस्तत्राङ्गनेवधीत् ॥ ६३ ॥

समारुह्याथ राजाश्वान्सर्वे मद्रसमन्विताः ।
मुक्तामूलकनागान्ते प्राप्ताः प्रोचुः क्षणं मिथः ॥ ६४ ॥

वरमत्रैव तिष्ठामः सैदैर्युद्धं विदध्महे ।
स्वल्पावशिष्टैः शत्रूणां न शेषः परिरक्ष्यते ॥ ६५ ॥

जल्लालठक्कुरः श्रुत्वा तानूचे नयकोविदः ।
न युद्धसमयोस्तीह गत्वानेन पथा द्रुतम् ॥ ६६ ॥

वितस्तापारमासाद्य तिष्ठामः सपरिच्छदाः ।
तत्रोपायान्विधास्यामो येन नश्यन्त्यमी स्वयम् ॥ ६७ ॥

अभिनन्द्येति तद्वाक्यं सर्वे साहसशालिनः।
जुहिलामठमार्गेण वितस्तापारमासदन् ॥ ६८ ॥
अत्रान्तरेन्तरं प्राप्तः क्रुद्धो मीयामहम्मदः।
अवधीद्भ्रातरौ ताजपाजकौ द्वारपालकौ ॥ ६९ ॥
राजधान्यङ्गनात्कृष्टौ श्वपचैर्गुल्फदामभिः।
अमेध्यमध्यमग्नाङ्गौ ययतुस्तौ श्वभोज्यताम् ॥ ७० ॥
आजन्म कृपणौ ग्राम्यपीडोत्कोचार्जितश्रियौ।
प्राणदानक्षणे तस्मिन्गतौ सर्वस्वदातृताम् ॥ ७१ ॥
संचितं ग्राम्यपीडाभिर्लुब्धैर्यत्परवञ्चनैः।
तेषां सद्रूप्यकुप्यादि सर्वं तद्राजसादगात् ॥ ७२ ॥
कृपणस्य गृहं विशन्ति येर्था
न बहिः क्रष्टुमतो जनाः क्षमन्ते।
बिलमध्यगता इव द्विजह्वा
यदि निर्यान्त्यसुभिः सहैव सर्वे ॥ ७३ ॥
भिक्षोः प्रसृतिमात्रं यैर्न दत्तं तद्गृहान्तरात्।
शतं तण्डुलखारीणां भिक्ष्वाद्यैरेव तद्धृतम् ॥ ७४ ॥
गोधूमपिष्टं पूपैकपर्याप्तं नाप्तमर्थिभिः।
यत्तल्लुण्ठिततच्चूर्णैर्हिमपातायितं पथि ॥ ७५ ॥
अत्रान्तरे गृहादाप्तोप्यालिखानो भटोद्भटः।
प्राग्वाटिकाप्रतोलीं तामदहत्तज्जिहीर्षया ॥ ७६ ॥
एदराजानकाद्याश्च तावद्भ्रातृखानजम्।
उन्मुच्य बन्धनात्तूर्णमपमार्गेण निर्ययुः ॥ ७७ ॥
अग्रे दृष्ट्वारिसैन्यं च पश्चादपि हुताशनम्।
क्षमो यातुं न च स्थातुं मृगशाव इवाभवत् ॥ ७८ ॥

कृष्टोरिष्टाय सोयं नो विरुद्धैरिति तं विदन् ।
अलिखानः समाश्वास्य सिंहो मृगमिवावधीत् ॥ ७९ ।

महाराज्ञ्यैव कृष्टोयं पाजभट्टमतस्थया ।
राज्यार्थमिति सैदास्तं चुक्रुशुः केचनावदन् ॥ ८० ॥

उपायो बन्धनात्कृष्टुं चिन्तितस्तस्य योपरैः ।
अपायः प्रत्युतास्याभूद्दैवं केन विलङ्घ्यते ॥ ८१ ॥

तस्य मीरादयो भृत्याः पापास्तेन प्रचोदिताः ।
प्रहारविवशं चक्रुः शशकं शबरा इव ॥ ८२ ॥

राजपुत्रवधोत्पातविवशं पृष्ठपातिनम् ।
अवधीत्पाजभट्टं तं स्वपक्षमिव राक्षसः ॥ ८३ ॥

भुक्तं किमपि नो राज्यान्निर्हेतुः किमयं हतः ।
शुचेवारोदि तद्दृष्ट्वा वृक्षैः पिकरवच्छलात् ॥ ८४ ॥

मा मा वधीरिमं खानं सुचिराद्बन्धनोद्गतम् ।
रुरुदुस्तच्छुचेवेत्थं मरुता कम्पिता लताः ॥ ८५ ॥

केमी तुरुष्का दुष्कार्यकराः पुष्कलपातकाः ।
इत्येव तरवः कम्पमापुर्वायुविघट्टिताः ॥ ८६ ॥

चतुर्विंशतिवर्षोयं मात्रा प्राप्तश्चिराच्छवः ।
ज्यहं रुद्ध्वान्तिके स्नेहात्कृतोन्त्यक्रियया ततः ॥ ८७

यवान्नभक्षिणी तस्य जननी विधवा सती ।
सुल्हाणदेवी साजीवमवसत्तच्छवाजिरे ॥ ८८ ॥

राजसैदद्विजानेतान्हतान्वीक्षाम्यहं कथम् ।
इतीव तत्क्रुधा रक्तः सूर्यो लोकान्तरं ययौ ॥ ८९ ॥

परितो राजधान्यास्तान्दृष्ट्वा नग्नान्महत्तरान् ।
न शेकुः केपि वस्त्रैकखण्डं दातुं त्रपाहते ॥ ९० ॥

सरस्तीरगता भेका अविच्छिन्नरवच्छलात्।
साक्रन्दाः सर्वरात्रं ते तच्छुचेवाभवंस्तदा ॥ ९१ ॥

ये राजवेश्म विविशुः सुभगाः सुवेशा-
स्त्वङ्गत्तुरङ्गखुरधूलिकृतान्धकाराः।
ते द्वित्रवोढशिबिका धृतजीर्णवस्त्रा
निष्काशिता नृपगृहात्स्रुतरक्तधाराः ॥ ९२ ॥

इत्थं षष्टितमे वर्षे भाव्युपद्रवकारणम्।
वैशाखस्य चतुर्दश्यां सैदानां विप्लवोभवत् ॥ ९३ ॥

नूनं हसननाम्नां सकृत्यानां तत्र वत्सरे।
अन्तकः संनिविष्टोभूद्येनैते प्रलयं गताः ॥ ९४ ॥

सामान्यवेश्मनि वरं जनिरस्तु पुंसां
मा मास्तु राजनिलये बहुदुःखकर्त्री।
ते शेरते तु सममेत्य पटैकमध्ये
नो माति राजयुगलं विपुले सुदेशे ॥ ९५ ॥

अथालिखानमीयाद्याः क्रुद्धाः पश्चादवालगन्।
नदीपारगताञ्श्रुत्वा द्रोहिणस्तान्विरोधिनः ॥ ९६ ॥

नौसेतुबन्धानुच्छिद्य माद्रैः काश्मीरिकैः समम्।
जल्लालठक्कुराद्यास्ते मतं चक्रुर्जिगीषया ॥ ९७ ॥

विंशप्रस्थान्तरे सैदाः प्राप्तसंनाहवाहनाः।
तत्तत्पटकुटीषण्डमण्डिताः शिबिरं व्यधुः ॥ ९८ ॥

पुरमात्रावशिष्टास्ते सैदा द्वैधान्निवर्तिनः।
वाजिवर्मासिभूयिष्ठां राज्यलक्ष्मीं विभेजिरे ॥ ९९ ॥

येषां वराटिकैकापि नाभूत्करगता क्वचित्।
स्वर्णरूपकहस्ताङ्काश्चेरुस्ते वेशभूषिताः ॥ १०० ॥

तेषूत्तुङ्गतुरङ्गेषु सर्वतो वसुवर्षिषु ।
अकारि शस्त्रग्रहणं शिलिपशाकटिकैरपि ॥ १०१ ॥
मन्दुरासुन्दरा येश्वा राज्ञोभूवन्महागुणाः ।
तानारुह्याधमाश्चेरुस्तद्भृत्या नित्यदुर्लभान् ॥ १०२ ॥
ततो हस्सनराजानकाद्यैरन्यैश्च संयुताः ।
षाड्गुण्यं विदधुः सैदाः काश्मीरिकजिगीषवः ॥ १०३ ॥
ते मीयामत्तनाराचमुख्यानां यन्त्रणोज्झिताः ।
स्वसेवकानां विदधुरधिकारसमर्पणम् ॥ १०४ ॥
अत्रान्तरे पारगताष्ठक्कुराद्या महाधियः ।
सैन्यानां संग्रहं चक्रुस्ते जालद्रगरान्तरे ॥ १०५ ॥
श्रुत्वेति साहसोदात्तं नगरे मद्रनिर्मितम् ।
आययुः सर्वराष्ट्रेभ्यो लोकास्ते शस्त्रधारिणः ॥ १०६ ॥
प्रवृत्ते च पुरक्षोभे पुरे ग्रामे च पत्तने ।
अत्युल्बणजनः सर्वो धावति स्म धृतायुधः ॥ १०७ ॥
शमालावाङ्गिनीयाद्याः क्रमराज्यगताश्च ये ।
स्थामार्थं क्षिप्तिकातीरे शिबिरं समकल्पयन् ॥ १०८ ॥
दरद्भिश्चक्रवाकाद्यैर्दरद्भिः सुभटैः समम् ।
वैडूर्यभट्टः स्थामस्थो युद्धसंनद्धतां दधौ ॥ १०९ ॥
नीलाश्वलोकं संगृह्य पम्मराजानकादयः ।
दुग्धाश्रमान्तिके सिन्धोः पारं स्थामार्थमासदन् ॥ ११० ॥
सर्वतो धान्यसंभारानानीयानीय नाविकैः ।
प्रवासवेतनं कोशाभावात्काश्मीरिका व्यधुः ॥ १११ ॥
क्वचिल्लुण्ठ क्वचिद्दाहं परदेश इवात्र ते ।
पारावारगताश्चक्रुर्नदीं तीर्त्वा पुरद्वये ॥ ११२ ॥

धनुर्यन्त्रशरैर्मुक्तैः प्रतितीरं पुरद्वये।
पञ्च सप्त मृता युद्धे प्रत्यहं कटकद्वये ॥ ११३ ॥
खशाश्चोपान्तसामन्ताः क्षीणप्रेष्या गृहोज्झिताः।
नामावशेषाः खानाश्च शूरा दारिद्र्यपीडिताः ॥ ११४ ॥
चौराः कृतप्रमोषाश्च चिरबन्धनयन्त्रिताः।
तत्तद्राजविरुद्धाश्च पिशुनाश्च श्ववृत्तयः ॥ ११५ ॥
हृताधिकारास्तत्कार्यन्यायप्रत्यायनक्षमाः।
एते चान्ये च तुतुषुर्देशेस्मिंस्तदुपद्रवे ॥ ११६ ॥
नौसेतुबन्धान्नावश्च सर्वा मडवराज्यतः।
आनीय वामतीरस्था विदधुः स्वोपयोगिनीः ॥ ११७ ॥
देवाभिधः शाकुनिको नाविकाधिपतां भजन्।
प्रतीर्य नौकायुद्धेन विदधे सुभटक्षयम् ॥ ११८ ॥
सैदा डल्लसरस्तीरस्थिताञ्शाकुनिकान्नवान्।
सपोतान्व्यसृजन्योद्धुं तत्तन्नन्दपुरस्थितान् ॥ ११९ ॥
मीयावफाकनामापि पुररक्षाधिकारभाक्।
विचार्य चौरांस्तत्काले द्वित्रान्शूले न्यरोपयत् ॥ १२० ॥
आसमुद्रमठाज्जैननगरान्तं सडिण्डिमम्।
तस्मिन्स्फुरति पौराणां न भीश्चौरकृताभवत् ॥ १२१ ॥
छिन्नेषु सेतुबन्धेषु तत्तन्नौपुरकादिषु।
पूर्दुर्गरचनेवाभूद्दुर्गमा तद्विरोधिनाम् ॥ १२२ ॥
आस्कन्दं स्कन्दभवनादाशङ्क्योपनृपाङ्गनम्।
पञ्चहस्तमितां सैदाः परिखां समकल्पयन् ॥ १२३ ॥
द्वारधानीसमीपेपि रुद्धराजानकान्तिके।
तादृशीं परिखामन्यां चक्रुर्वैरिभयच्छिदे ॥ १२४ ॥

विरुद्धवेश्मलुठनं कुर्वन्तो हृततद्धनाः ।
सैदभृत्या भयं चक्रुः प्रजानां गोवधादिना ॥ १२५ ॥

विरुद्धमुक्तलुण्ठितगृहदारुसमाप्तितः ।
दिद्दामठे रुद्रवनवासेन्धनकृतोभवत् ॥ १२६ ॥

अनभिज्ञतयालपानां तद्विरुद्धगृहश्रियः ।
व्ययीचकुर्वृथा सैदा गावो हत्वा शुनामिव ॥ १२७ ॥

निष्कृष्टशस्त्राः संनाहममुञ्चन्तो दिने दिने ।
राजधान्यङ्गने साश्वास्तद्भृत्याः प्राविशन्मदात् ॥ १२८ ॥

मल्लामीनग्रहांश्चुन्दकायस्थसदनानि च ।
राजानको हस्सनः स ददाह स्वगृहं क्रुधा ॥ १२९ ॥

काकतालीयकन्यायः सैदकाश्मीरसैन्ययोः ।
परस्परभयभ्रश्यद्धैर्ययोरभवत्तदा ॥ १३० ॥

पारावारगता वीरास्तीर्त्वा साहसिनो द्रुतम् ।
हत्वा तांस्ताञ्छिरश्छित्त्वा तीरे दण्डे न्यरोपयन् ॥ १३१ ॥

लोलाश्वारोहिणि हते तीर्त्वा सैदभटद्वये ।
लुण्ठिं पिर्वजखानाद्याश्चक्रुः पद्मपुरान्तरे ॥ १३२ ॥

जोनराजानकाद्यास्तच्छ्रुत्वा तीर्णा भटोद्भटाः ।
ओबाणादिषु तद्रोषादुत्पिञ्जं चक्रुरञ्जसा ॥ १३३ ॥

तेन सैदा अपि ग्रामे जन्ममूमौ गृहावलेः ।
जोनराजानकस्यैव क्रोधादग्निमदापयन् ॥ १३४ ॥

तच्छ्रुत्वा स तदीयस्य वडवीविषयान्तरे ।
ताजिभट्टस्य सदने तद्वदग्निमदापयत् ॥ १३५ ॥

गृहान्पदातिमात्रः स दग्ध्वा लहरमध्यगः ।
दुग्धाश्रमादिस्थामस्थान्पलायनपरान्व्यधात् ॥ १३६ ॥

अथ लोहरकोटस्थं श्रीमार्गेशजहाङ्गिरम्।
जल्लालठक्कुराद्यास्ते लेखमित्थं व्यसर्जयन् ॥ १३७ ॥

यत्प्रमादभिया देशात्सकुटुम्बो गतो भवान्।
स मद्वैर्विहितोस्माभिर्युक्त्या तद्वधसाहसः ॥ १३८ ॥

मीयामहम्मदाद्यैस्तत्पुत्रैरस्मज्जिगीषुभिः।
वैतस्तो दक्षिणो वामो भागोस्माभिः समाश्रितः ॥ १३९ ॥

जिगीषवो वयं सर्वे क्रान्तकश्मीरमण्डलाः।
पुरमात्रावशिष्टास्ते सैदास्तिष्ठन्ति वेष्टिताः ॥ १४० ॥

तद्विलम्बधियं त्यक्त्वा तूर्णमागम्यतां यतः।
प्राप्ते त्वयि जयोस्माकं तव स्युः कीर्तिसंपदः ॥ १४१ ॥

राजभक्ताश्च शक्ताश्च यूयमेवात्र मण्डले।
तदनागमनात्कीर्तिं मा कार्षीः स्वां कलङ्किताम् ॥ १४२ ॥

बद्धे रणादालिशाहे पूर्वं मल्लेकजःस्थितः।
राज्यरक्षां व्यधादत्र यथा मार्गेशमह्वदः ॥ १४३ ॥

तद्धत्प्राणं त्वया रक्ष्यं तूर्णमागत्य साम्प्रतम्।
अन्यथास्य शिशो राज्ये स्थापयन्ति न सैदजाः ॥ १४४ ॥

इति लेखं विचार्याशु स्वदेशोत्कण्ठिताशयः।
तूर्णं पर्णोत्समार्गेण स मार्गपतिराययौ ॥ १४५ ॥

प्राप्ते तस्मिन्दिनैर्द्वित्रैः कुद्वदीनपुरान्तरम्।
चकम्पुः शिबिरे सैदाः प्रदोषा इव वायुना ॥ १४६ ॥

अथ संमन्त्र्य सैदास्ते भयात्संधातुमिच्छवः।
इत्थं शिखशहावादीँल्लेखहस्तान्व्यसर्जयन् ॥ १४७ ॥

प्रधानपुरुषाः सन्तः कृतसैदवधाः कथम्।
भवन्तो यत कुर्वन्ति कार्यं लोकविगर्हितम् ॥ १४८ ॥

दैवाद्यदि मृतो भूपस्तत्सुतस्तत्पदे कृतः
कस्य किं वो हृतं येन सर्वे छेदार्थमुद्यताः ॥ १४९ ॥
न सर्वे द्रोहिणः सन्ति यूयं काश्मीरिका जनाः ।
वैदेशिकैर्हता यैस्ते द्वित्रांस्तान्नः प्रयच्छत ॥ १५० ॥
अथ वा परदेशात्तान्निष्कास्य सपरिच्छदान् ।
यूयमेवात्र देशे स्थ मुख्या मन्त्रिषु पूर्ववत् ॥ १५१ ॥
या यस्य पदवी पूर्वमासीत्सा तस्य तिष्ठतु ।
संभूय सर्वे भुञ्जाना नास्माकं विग्रहे ग्रहः ॥ १५२ ॥
मरणं नियतं जन्तोर्यथैव विधिकल्पितम् ।
तथैवावश्यभावीति के निवर्तयितुं क्षमाः ॥ १५३ ॥
इति लेखार्थमालोच्य मार्गेशाद्या महत्तमाः ।
यवनाक्षरसंबद्धमिति लेखं व्यसर्जयन् ॥ १५४ ॥
रक्षारत्नं नृपस्ताद्यग्रक्षितो न दुराशया ।
किमर्थं स हतो राजपुत्रो बह्वामखानजः ॥ १५५ ॥
नूरुलाहादिवधतः कस्याश्वासो भवत्विह ।
तत्राप्यस्य शिशो राज्ञः सर्वः कोशो विलुण्ठितः ॥ १५६ ॥
लौहो सा घटिकैवैका द्वारि तिष्ठति भूपतेः ।
सैदैः शिष्टाहमेवेति ब्रुवतीव ध्वनिच्छलात् ॥ १५७ ॥
गच्छन्त्वनिष्टा मद्रास्ते बहिर्युक्त्या निवारिताः ।
संतोषवृत्त्या तिष्ठन्तु यूयं पैतामहे पदे ॥ १५८ ॥
इत्यादि श्रुत्वा सैदैः स समाहूतोप्यनागतः ।
तदग्रं व्यसृजद्दूतं स च प्राप्तोब्रवीदिदम् ॥ १५९ ॥
स्थापयन्तु धनं कोशे यद्धृतं बालभूपतेः ।
शस्त्रं त्यजन्तु मन्त्रादौ तिष्ठन्तु भयवर्जिताः ॥ १६० ॥

अत्रत्या एव कुर्वन्तु राज्यकार्याणि पूर्ववत्।
किंचिन्नश्यति नो देशे दोषाः शान्तिं व्रजन्ति च ॥ १६१ ॥
यद्गतं गतमेवात्र मृता जीवन्ति नो पुनः।
अन्योन्यशुद्धिर्वैरस्य जातान्योन्यकृताद्भवात् ॥ १६२ ॥
इत्यादि युक्तमुक्तं तद्वाक्यं श्रुत्वा मदोद्धताः।
सैदास्तदुक्तिजनितक्रोधदग्धा इवाभवन् ॥ १६३ ॥
नृपः कोशश्च शस्त्रं च युद्धदक्षास्तथा भटाः।
सर्वमित्यस्मदायत्तं किं कुर्वन्ति विरोधिनः ॥ १६४ ॥
इति हैवतखानोक्ता युद्धसंनद्धबुद्धयः।
अभूवंस्ते कृतोद्योगाः कौरवाः पाण्डवेष्विव ॥ १६५ ॥
अथैकदा सैफडारजोनराजानकादयः।
पुरे नौसेतुमुत्तीर्य सैदयुद्धार्थमाययुः ॥ १६६ ॥
उपायैः सर्वदा जेयाः समयो न रणस्य वः।
इति मार्गपतेर्वाक्यं नागृह्णंस्ते रणोद्यताः ॥ १६७ ॥
दावूदनामा मार्गेशपुत्रो धामाकरो द्रुतम्।
प्रतीहारादिभिर्युक्तो नगरान्तरमासदत् ॥ १६८ ॥
समुद्रामठमार्गेण प्रविष्टा पृतनाथ सा।
प्रापल्लोष्टविहारं तं कर्तुं सैदभटक्षयम् ॥ १६९ ॥
रणं संत्यज्य डोम्बाद्या येन्ये लुब्धा महाभटाः।
सर्वस्वहरणव्यग्रा बभूवुर्नगरान्तरे ॥ १७० ॥
डोम्बाद्याः सुभटाश्चान्ये घ्नन्तोन्योन्यमुदायुधाः।
प्रसिद्धपौरवेश्मभ्यो भाण्डागाराद्यलुण्ठयन् ॥ १७१ ॥
भूमौ निखन्य यद्यस्तं पौरैर्गुप्तं गृहे धनम्।
क्षिप्त्वा प्रतिपदं शङ्कुभीतं तत्तैरिवार्पितम् ॥ १७२ ॥

मद्राहते भटे दृष्ट्वा सैदा दिग्पतितं शिरः ।
नाद्यास्माकं जयोस्तीति तूर्णं जग्मुर्यथागतम् ॥ १७३ ॥
अथ सैदचमूः श्रुत्वा तान्प्रविष्टान्पुरान्तरे ।
अग्रे जगाम युद्धाय सायकायुधवर्षिणी ॥ १७४ ॥
अग्रागतं पद्मभटं हत्वा स्वशिबिरान्तरे ।
तद्रक्ततिलकं चक्रुः सैदाः स्वायुधसिद्धये ॥ १७५ ॥
आलिखानः स तत्रस्थस्त्रस्तः श्रुत्वागतां चमूम् ।
लुद्रभट्टविहारेभ्रि मार्गरोधार्थमार्पयत् ॥ १७६ ॥
ज्वालाजटाकुले मार्गे प्राप्तो दावूदमार्गपः ।
सङ्कुसनप्रतीहारः स वीरो रणमग्रहीत् ॥ १७७ ॥
सेतुसंकटमार्गेण पतितः परिखान्तरम् ।
स मार्गपतिदावूदो युध्यन्प्राणैर्व्ययुज्यत ॥ १७८ ॥
तत्राह्लदप्रतीहारमुख्या वीरा रणाङ्गने ।
ययुः शौर्यं दर्शयन्तो दिव्यस्त्रीसुखभागिताम् ॥ १७९ ॥
रूपं तस्य मृतस्यापि स्मृत्वा पौराङ्गनाः पुरे ।
वदन्ति नैव पश्यामस्तादृशं सुभगं क्वचित् ॥ १८० ॥
सुरूपो मानुषो योग्यो नायं तन्नीयते दिवम् ।
इतीव देवताभिः किं मृतस्तत्र न्यधीयत ॥ १८१ ॥
तावद्भैवतखानाद्यैः पश्चादन्यपथागतैः ।
विदधे खानगाहाग्रे तत्तत्सुभटसंक्षयः ॥ १८२ ॥
भूताविष्टैरिव प्राप्तविजयैरुद्यतायुधैः ।
रणप्रेक्षागताः पौरास्तद्दिने केपि तैर्हताः ॥ १८३ ॥
किमन्यत्परदेशीया दूता विप्रगृहे स्थिताः ।
एते मद्रा इति प्रोक्ता लोभाद्भित्रा निपातिताः ॥ १८४ ॥

विमुच्य बन्धनस्थान्स्वान्युध्यन्सैदभटैः सह।
स सैफडामरः पौरान्सैदांश्चोत्फलकान्व्यधात् ॥ १८५ ॥

अस्मद्वैरिहितः सोयमिति सैदभटा रुषा।
जघ्नुर्गृहस्थितं वैद्यपण्डितं यवनेश्वरम् ॥ १८६ ॥

अत्यन्तानुचितं सैदाश्चक्रुर्यत्तस्य मस्तकम्।
छित्वा चन्दनलिप्ताङ्गं न्यधू राजपथान्तरे ॥ १८७ ॥

प्रविष्टा राक्षसाः केपि तद्दिने तत्पुरान्तरे।
अविचार्य क्षयं चक्रुः सर्वेषां यत्कृपोज्झिताः ॥ १८८ ॥

तस्य चन्दनलिप्ताङ्गं मस्तकं वीक्ष्य नागराः।
न के निन्दां व्यधुः सैददुष्कर्माधर्मनिश्चयात् ॥ १८९ ॥

आ मल्लिकपुराल्लोष्टविहारान्तं पुरान्तरे।
शवा इन्धनगण्डाल्य इवासन्निहिताः पथि ॥ १९० ॥

आसन्येषु वपूंषि तूलशयनन्यस्तोपधानोद्गत-
स्पर्शोत्कर्षसुखावमर्षविलसच्छृङ्गारसाराण्यलम्।
नग्नास्ते भुवि काककुक्कुरवृकैः संभक्षिता लक्षिता
मेदोमांसवसावमत्क्रिमिलसन्निष्पन्ददुर्गन्धिनः ॥ १९१ ॥

जयेन तावन्मात्रेण तुष्टाः सैदाः परस्परम्।
विंशप्रस्थान्तरे चक्रुर्वाद्यैस्ते विजयोत्सवम् ॥ १९२ ॥

हतावशिष्टान्नष्टांस्तांस्तद्दिने चलितान्बहून्।
पश्चाच्चेदगलिष्यन्त सर्वसंहरणं भवेत् ॥ १९३ ॥

किं तु प्राग्लुठिता देवा ज्वलिताः केपि देशगाः।
तां बुद्धिं विजयायैषामदास्यन्कुपिताः कथम् ॥ १९४ ॥

अहंपूर्विकया यातत्रद्भटभरासहः।
सौसेतुबन्धस्तुत्रोट तावच्छ्रीनगरान्तरे ॥ १९५ ॥

संनाहभरमग्नाङ्गाः सेतुभङ्गात्परिच्युताः ।
शतसंख्या दिने तस्मिन्वितस्तायां विपेदिरे ॥ १९६ ॥
नूनं सा शारदा देवी वितस्तारूपधारिणी ।
तदधर्मक्रुधा ग्रासं विदधे कटकद्वये ॥ १९७ ॥
प्रेक्षागता हताः पौरा इति निन्दानिवृत्तये ।
तत्क्षणोत्कृत्तशिरसां सैदै राशिः कृतोग्रतः ॥ १९८ ॥
तत्तत्कोल्यर्पितमुखैस्तैर्वितस्तातटान्तरात् ।
काष्ठमेकं न्यधुः सैदा भीत्यै दीपधरोपमम् ॥ १९९ ॥
वितस्तायां शवाः केचित्सलिलोच्छूनविग्रहाः ।
विसस्रुर्विस्रगन्धाढ्या महापद्मसरोन्तरे ॥ २०० ॥
अत्रान्तरे समानीयावशिष्टान्परितो भटान् ।
काश्मीरिकाः पुनश्चक्रुः पूर्ववत्सैन्यसंग्रहम् ॥ २०१ ॥
श्रीजहाङ्गिरजल्लालसैफडामरकादयः ।
मुख्यान्सैदान्पुनर्जेतुं रणोपायं व्यचिन्तयन् ॥ २०२ ॥
स सैफडामरः प्राप्तसिद्धादेशपदस्ततः ।
उच्चावचेषु व्यभजद्विषयान्सप्तविंशतिम् ॥ २०३ ॥
काष्ठागता लसत्पक्षास्तीक्ष्णाश्च सफलीकृताः ।
यन्त्रेषवश्च योधाश्चाघटंस्तेषु दिने दिने ॥ २०४ ॥
क्षुभ्यद्वैतस्ततीरद्वयजयघटनारब्धयन्त्रेषुयुध्य-
त्क्रुध्यद्धीरेक्षणाप्तप्रचुरपुरजनस्वान्तसंक्रान्तशौर्यम् ।
धावत्संनाहिताश्वोत्कटसुभटघटाघातजाताग्निवर्षं
चक्रुः क्रोधात्पुनस्ते प्रवरपुरवरे युद्धमत्युद्धतं तत् ॥ २०५ ॥
यामदुन्दुभिवाद्यानां ध्वनिः सर्वैस्तदा श्रुतः ।
पूर्वं राजगृहे पश्चात्सैदकाश्मीरसैन्ययोः ॥ २०६ ॥

अवतीर्णा जलार्थं याः पारावारपुराङ्गनाः।
यन्त्रेषुभिर्विदीर्णाङ्गा बह्व्यस्तत्र विपेदिरे ॥ २०७ ॥
स नासीद्दिवसो यत्र छित्त्वा वीराः पतत्त्रिभिः।
विद्धा मुमूर्षवस्तीरान्न नीताः स्वगृहान्प्रति ॥ २०८ ॥
वह्निदानस्फुरद्बोधसंहाराद्यैरुपद्रवैः।
एकमेकं दिनं तत्रानेहस्याभूद्भयावहम् ॥ २०९ ॥
अश्लीलालापिनोन्योन्यं रहस्योद्घाटनोद्यताः।
तट्द्वये भटाः क्रूरा अवाच्यमपि तेब्रुवन् ॥ २१० ॥
राजसैदद्विजद्रोहरोहत्पापादिवादिनः।
मिथो गालीं वदन्तस्ते किं नावाच्यं बभाषिरे ॥ २११ ॥
प्राप्ता दोलतसीहाद्याः कष्टवाटादिदेशतः।
शिष्टाः सल्हणहंसाश्च शाहिभङ्गनृपात्मजाः ॥ २१२ ॥
पञ्चगव्हरजाः केचित्सिन्ध्वपत्यन्वयोदिताः।
खशा म्लेच्छास्तथान्येपि रुरुधुः सर्वतो दिशः ॥ २१३ ॥
काश्मीरिकाः स्वभेदेन बलप्राप्त्या तथापरे।
ययुस्त्रासविसूत्रत्वमज्ञातान्योन्यनिश्चयाः ॥ २१४ ॥
अत्रान्तरे नभस्युल्का सायं दीप्तोदभूत्स्फुटम्।
उदीच्या दक्षिणां याता प्रज्वलद्बहुमस्तका ॥ २१५ ॥
दृष्ट्वा तामद्भुतां सर्वे सैन्ययोरुभयोरपि।
संग्रामाशङ्कितानिष्ठा बभूवुर्भयविह्वलाः ॥ २१६ ॥
अत्रान्तरे सैदलेखैः प्रेरितो देशलिप्सया।
तत्तारखानो व्यसृजत्तौरुष्कं पुष्कलं बलम् ॥ २१७ ॥
प्राप्ताः शस्त्रगलस्थानं तुरुष्कास्ते सुदुष्कराः।
हता बोडनराजाद्यैः प्रालेयैः शलभा इव ॥ २१८ ॥

कालीधारापदेशेन काली भगवती क्रुधा ।
व्यधात्तद्भक्षणं नूनं सतीदेशहितेच्छया ॥ २१९ ॥
आदमखानजस्तस्मै विसृज्य इति चोदितः ।
निवर्त्य तं तुरुष्कः स स्वान्तिके समरक्षत ॥ २२० ॥
तदीयाश्वपदार्थौघग्राह्या तद्देशवासिभिः ।
अनन्यसुलभां प्राप्य श्रियं वैश्रवणायितम् ॥ २२१ ॥
अथ काश्मीरिकाः श्रुत्वा तद्वधं वाद्यवादनम् ।
चक्रुर्येनाभवन्सैदा विच्छायवदनाः श्रुतेः ॥ २२२ ॥
गतावशिष्टा दुर्निष्ठदुष्टतत्कटकान्तरात् ।
सहस्रद्वितयी तत्र शवानां निहिताभवत् ॥ २२३ ॥
विशुद्धपार्ष्णिसंत्यक्तभयाः प्राप्तबलोद्धताः ।
काश्मीरिका मतं चक्रू रणार्थं हृष्टमानसाः ॥ २२४ ॥
मध्ये ससैन्यास्तिष्ठन्तु मार्गेशाद्याः पुरान्तरे ।
राजानकाद्या गच्छाश्च स्थामस्था यान्तु दिग्द्वयम् ॥ २२५ ॥
एकतश्चेज्जिताः सर्वे नश्यन्त्यल्पबलाः पुनः ।
इत्येकमतनिष्ठास्ते संमन्त्र्य कृतनिश्चयाः ॥ २२६ ॥
स्थामार्थमादिशँल्लोकं स्वप्रदेशादुपर्यधः ।
नावा सिन्धुं प्रतीर्याथ जोनराजानको द्रुतम् ॥ २२७ ॥
स्थामस्थान्पञ्चषान्हत्वा पलायनपरान्व्यधात् ।
वस्त्रवाजितनुत्रादि हृत्वा सैदबलान्तरात् ॥ २२८ ॥
काश्मीरिका व्यभाव्यन्त प्रयाताः प्रतिवासरम् ।
किमन्यत्स्फुटमेवाह्नि येवसन्सैदसंनिधौ ॥ २२९ ॥
निर्लज्जास्ते व्यलक्ष्यन्त काश्मीरिकबलान्तरे ।
यतो याति ततश्चेति लोको विगतयन्त्रणः ॥ २३० ॥

बाले राजनि मन्दाज्ञे कोप्यजृम्भत विप्लवः ।
गृहेषु लुण्ठ्यमानेषु विटैर्विहितपेटकैः ॥ २३१ ॥
निरुद्धमार्गसंचारो देशोभूद्भयविव्हलः ।
मासद्वये व्यतीतेपि पारावाररणोद्यमैः ॥ २३२ ॥
जिगीषां नात्यजंस्तत्र सैदाः काश्मीरिका अपि ।
पूर्वमङ्कुरितः सैदवधे पल्लवितः क्रमात् ॥ २३३ ॥
परस्परं वैरतरुस्तदागाच्छतशाखताम् ।
दक्षिणे राजकोशादि वामे सेनाद्यवेक्ष्य च ॥ २३४ ॥
बलद्वयेपि विजयः संदिग्धः प्रत्यभाद्विशाम् ।
पुंसां निरुद्धे संचारे नावा नद्यास्तटद्वये ॥२३५ ॥
स्त्रिय एव तदाकुर्वन्पारावारगतागतम् ।
पारादेत्य विटैर्लुब्धैर्मुषिते पथिकव्रजे ॥ २३६ ॥
अधिष्ठानादिदेशेषु मार्गः प्रचलितोभवत् ।
पारावारगतान्कांश्चिदन्योन्यच्छलनोद्यतान् ॥ २३७ ॥
निरुध्य प्रत्यहं द्वित्रान्क्रोधाच्छूले न्यरोपयन् ।
अवोचन्नेकदा सैदा भटान्काश्मीरमन्त्रिणः ॥ २३८ ॥
आयान्तु यदि शक्तिर्वो युध्यन्तु पुनरप्यलम् ।
सीमा वा दीयतां तावत्प्रतीक्षामो रणं प्रति ॥ २३९ ॥
नित्यं जनवधे लोका उद्विग्नाः शरवर्षणैः ।
भजतां विभवं सोत्र विधिर्यस्मै प्रयच्छति ॥ २४० ॥
निशम्येति पुरप्रान्ते सीमार्थं वामपार्श्वगैः ।
चिच्छिदुः संधितां रज्जुं तूर्णं सैदभटास्तटात् ॥ २४१ ॥
तितीर्षून्वैरिणो ज्ञात्वा सैदाः काष्ठीलतस्ततः ।
न्यधुर्हस्सनराजानकादीन्स्थामार्थमाकुलाः ॥ २४२ ॥

छिन्नेषु सेतुबन्धेषु सैदैर्नौपुरकादिषु ।
नगरीं दुर्गमां दुर्गतुल्यां चक्रुर्द्विषद्भयात् ॥ २४३ ॥

अथ काश्मीरिकाः प्रोचुः सैदांस्तीरान्तिकस्थितान् ।
नौसेतुबन्धरज्जुर्यद्दत्तश्छिन्नो भयेन नः ॥ २४४ ॥

पुरमात्रावशिष्टत्वादुत्तिष्ठध्वं कियच्चिरम् ।
पर्याप्तं भुज्यते धान्यं किं कुरुध्वं पुनः परे ॥ २४५ ॥

श्रुत्वेति सैदास्तांस्तारमूचुरित्थं स्वसेवकैः ।
अन्नाभावाद्बुभुक्षार्त्या न चलामो भयादितः ॥ २४६ ॥

का जुगुप्सा तुरुष्केषु सर्वमांसभुजो वयम् ।
यावत्पुंपशुगोमांसपर्याप्तिस्तावदास्यते ॥ २४७ ॥

पुरश्चेद्गम्यतेस्मान्कः शक्तो रोद्धुं त्वदन्तरात् ।
श्रुत्वेत्युत्पुलकास्तीरे जल्लालमल्लिकादयः ॥ २४८ ॥

एकत्र मिलिताः सर्वे चक्रुः संमन्त्र्य निश्चयम् ।
सैन्यं स्थामविभागेन विभज्य पथिभिस्त्रिभिः ॥ २४९ ॥

उत्तीर्य यामः शीर्यन्ति सैदाः कटकभदेतः ।
अन्यथैकत्र संनद्धा दुर्जेयाः सैदपक्षगाः ॥ २५० ॥

एकतश्चेज्जिताः सर्वाञ्जेष्यामोल्पबलानमून् ।
अस्माकं प्रबलं सर्वे न विलम्बोधुनोचितः ॥ २५१ ॥

श्रुत्वेति मद्रसंयुक्ता जोनराजानकादयः ।
मृत्युर्वा नो जयो वेति युद्धसंनद्धतां दधुः ॥ २५२ ॥

अथैकं मतमाश्रित्य स्थामस्थाः सैन्यनायकाः ।
पुराणतक्षकस्थानात्तीर्त्वा पर्वतमासदन् ॥ २५३ ॥

प्रौलभट्टादयो हस्तबालिकाख्यप्रदेशतः ।
नौभिस्तीर्णा धृतोत्साहाः सोत्सेकान्स्वभटान्व्यधुः ॥२५४ ॥

दृष्ट्वा धैर्यं द्विजस्यापि रणाग्रे सरतः क्षणात्।
गक्कादयो भटाः सर्वे शशंसुर्वीरमानिनः॥ ५५५॥

अन्योन्यप्रहृतिर्माभूदिति काश्मीरिका भटाः।
पत्रशाखा न्यधुर्मूर्ध्नि हर्तुं निजपरभ्रमम्॥ २५६॥

सैफडारादिवीरेषु शक्तयः करगा बभुः।
निर्गतास्तान्निपून्हन्तुं मूर्तिमत्य इवान्तरात्॥ २५७॥

तानुत्तीर्णान्समाकर्ण्य सैदाश्चकितमानसाः।
आशिषं व्यसृजंस्तूर्णं प्राग्जयोद्धतमानसम्॥ १५८॥

संप्राप्तोभिवनायुक्तमठं तीराध्वना व्रजन्।
गिरिश्रृङ्गगतैर्दृष्टस्तैः शिलाभिरवार्यत॥ २५९॥

तच्छिलावर्षणत्रस्तस्तुरङ्गात्पतितः क्षितौ।
पदातिः स चलन्कृच्छान्निस्तीर्णो रणसंकटात्॥ २६०॥

तदीयं तुरगं बद्धखड्गं संनाहभूषितम्।
काश्मीरिकाः करगतं मूर्तं जयमिवासदन्॥ २६१॥

तं पराभूतमालोक्य तद्युद्धार्थं भटान्वितान्।
सैदाः पिरुजखानादीन्त्रात्रावेव व्यसर्जयन्॥ २६२॥

दुग्धाश्रमागता मीयाभाकेराद्याश्च तत्क्षणात्।
वर्षौघा इव गर्जन्तः प्रापुः पूपामठान्तिकम्॥ २६३॥

तावन्मद्रप्रतीहारडामराद्या महाभटाः।
संनद्धाः सुमनोवाटप्रदेशान्तं समासदन्॥ २६४॥

सैदखानादयः सैदहुसनादिसमन्विताः।
सैदानां सुभटाश्चान्ये प्रापुस्तत्रैव ते प्रगे॥ २६५॥

करवालाः स्फुरज्ज्वाला बभुः श्यामलकान्तयः।
भूपीडनादिव व्यालाः पातालविवरोद्गताः॥ २६६॥

अथोदतिष्ठत्तुमुलः समरः सैन्ययोर्द्वयोः ।
सखड्गफलकक्षुद्रमद्रव्यूहसुदुःसहः ॥ २६७ ॥

भो वीराः समरेत्र युध्यत मुदा मा यात पश्चादमी
जेतारो यदि तद्धरन्ति सकलं सैदाः क्रुधा निर्घृणाः ।
प्राप्तश्चेद्विजयः सुखं स्वविभवात्स्वर्गेपि तच्चेन्मृता
युद्धादाविति मद्रपः सपरशुः काश्मीरिकानब्रवीत् ॥ ३६८ ॥

पूर्वं पेरोजखानोग्रे निर्ययौ रणगर्वितः ।
तं पेरोजप्रतीहारो रामो रामामिवाभ्यगात् ॥ २६९ ॥

अनभिज्ञतया युद्धे स्फुरन्तं वीक्ष्य तं द्रुतम् ।
स्वभटान्प्रैरयन्मद्रास्तत्तुरङ्गखुरच्छिदे ॥ २७० ॥

खड्गकृत्तखुराश्वोद्यत्प्लुतिनष्टरणक्रियम् ।
गक्काख्याः प्राहरन्सर्वे शक्त्या शक्तिसमन्वितम् ॥ २७१ ॥

तद्भृत्याः शाहिभङ्गीया भ्रमरा इव सारवाः ।
ददंशुः कटकं क्रुद्धाः स्फुरन्तः खड्गकण्टकैः ॥ २७२ ॥

पतितं संमुखं दृष्ट्वा तं काश्मीरा रणाङ्गने ।
जयोद्य वर्ततेस्माकमित्युक्त्वोत्साहमादधुः ॥ २७३ ॥

व्याहन्यमानाः काश्मीरैर्भटैर्मद्रसमन्वितैः ।
भृत्यास्ते शाहिभङ्गीयाः कृत्यं सत्वोचितं दधुः ॥ २७४ ॥

एहि तिष्ठात्र युध्यस्व क्व गच्छस्यधुना मम ।
इत्यन्योन्यं भटास्तत्रातर्जयन्रणगर्जितैः ॥ २७५ ॥

काश्मीरपृष्ठगः सूर्यः खड्गान्तः प्रतिबिम्बितः ।
जयोद्य युष्मास्वित्येव वक्तुं व्योम्नोवतीर्णवान् ॥ २७६ ॥

अहंपूर्विकया सर्वे ते वीरभ्रमरास्तदा ।
रणोद्याने स्फुटं चेरुर्यशःकुसुमलम्पटाः ॥ २७७ ॥

तद्रणाङ्गनरङ्गान्तः संगतास्ते भटा नटाः।
त्वङ्गदङ्गविभङ्गाढ्या नाट्यभङ्गिमदर्शयन्॥ २७८॥

जहाङ्गिराद्यास्तद्भृत्याः प्रविष्टाः संमुखे रणे।
विधाय युद्धं संनद्धा वीरवृत्त्या विचक्रिरे॥ २७९॥

ववर्ष शरधाराभिः स सैन्यकटकाम्बुदः।
स्फुरच्छस्त्रतडिज्ज्योतिर्युक्तो गम्भीरगर्जितः॥ २८०॥

सैदेषु भास्करस्तत्र संमुखस्थविभाकरः।
शौर्यशोभाकरः प्रापदग्रे भाः करवालभृत्॥ २८१॥

त्वङ्गत्तुङ्गतुरङ्गस्थो रणरङ्गान्तरे स्फुरन्।
सोङ्गहारसमासङ्गो नाट्यभङ्गिमदर्शयत्॥ २८२॥

प्रहारविक्षतं सर्वे मिलित्वापि रणान्तरे।
शेकुः संनाहिताश्वस्थं चिरात्पातयितुं क्षितौ॥ २८३॥

द्वित्रान्हत्वा भटान्वीरो वीक्षितः श्लाघ्यविक्रमः।
अभजद्वीरशय्यां स रक्तस्पन्दोत्तरच्छदाम्॥ २८४॥

येषां प्राणपरित्यागे निर्णयं बध्नतामपि।
रणयोग्येक्षणोपेक्षा नास्ति किं तैः पशूपमैः॥ २८५॥

सैददुसनमुख्या ये काश्मीराः सैदपक्षगाः।
भाकरादीन्हतान्दृष्ट्वा रणं त्यक्त्वा पलायिताः॥ २८६॥

ततः काश्मीरसेनान्या वात्ययेव तटद्रुमाः।
भग्नास्तन्नीडनिःसृता भृत्याः शावा इवाहताः॥ २८७॥

न खड्गी न हयारोहो न चापी न च शक्तिमान्।
व्यावृत्य प्रेक्षितुं कश्चिन्नाशकद्विद्रुताद्बलात्॥ २८८॥

हठलुण्ठितविध्वस्ताः समस्तास्ते विरोधिनः।
वृक्षारूढानपि घ्नन्तः प्रापुस्ते नगरान्तरम्॥ २८९॥

आसमुद्रामठात्पूर्वाधिष्ठानान्तं निरम्बराः ।
मार्गेष्विन्धनगण्डौघा इवासन्निहिताः शवाः ॥ २९० ॥

केचित्कुल्यान्तरे मग्ना भग्नाः केपि रणान्तरे ।
केचित्प्रमुषिता नग्ना भयोद्विग्ना दिशोचलन् ॥ २९१ ॥

तद्वीरावयवैः कृत्तैः पूरिता विपुलैर्महो ।
तद्ग्रासार्थं प्रवृत्तस्य मृत्योरिव महानसः ॥ २९२ ॥

ये सुन्दरा विपुलभोगपुरंदराभा-
श्चेरुर्नरेशविभवप्रथितप्रपञ्चाः ।
नग्नान्विलोक्य भुवि तान्धृतदुष्टगन्धा-
न्कस्यापि शाम्यति न देहभवोभिमानः ॥ २९३ ॥

वरं मरणमेवास्तु रणे स्वर्गसुखप्रदम् ।
न सहेद्यतनस्वामिवृत्तियाच्ञाकदर्थनाः ॥ २९४ ॥

इत्युक्त्वा प्रविशन्युद्धे धीराश्वस्थोप्यकातरः ।
हबीबमीरः शस्त्रेण स श्लाघ्यमरणोभवत् ॥ २९५ ॥

अन्यान्प्रचलितान्दृष्ट्वापीक्षिताप्राप्तवैरिणः ।
पलायनेच्छा नैवाभूद्युयुत्सोर्यस्य मानसे ॥ २९६ ॥

छिन्नाङ्गुलिकरोप्यश्वमारुह्य स्वसुतान्वितः ।
अकरोत्क्षणमात्रं यः शस्त्रप्रचारणं रणे ॥ २९७ ॥

स्थामस्थितः पुरस्यान्ते स राजानकहस्सनः ।
हतः सेरङ्गमीराद्यैर्मारीकुल्यातटान्तगः ॥ २९८ ॥

प्रच्छिन्नाङ्गुलिहस्तेन सममस्य शिरो भटैः ।
नीत्वा न्यदर्शि हर्षार्थं मार्गेशादिसभान्तरे ॥ २९९ ॥

किमाकारनिकारेण कुर्वन्त्वस्यान्त्यसत्क्रियाम् ।
इत्युक्त्वास्मै स मार्गेशः शवमुक्तिमकारयत् ॥ ३०० ॥

योभूच्चिरं नृपगृहेखिलमन्त्रिवर्यो
धुर्यः पदेषु विभवोचितदानमानः।
शोच्यां दशामितरवत्स गतः किलान्ते
धिग्वासनां भविषु शाम्यति या न भोगैः॥ ३०१॥
स चेत्प्राप्तखलीकारस्तिष्ठेत्स सदने शमी।
सर्वो मन्त्रिगणस्तस्य भवेद्भाटुपरो न किम्॥ ३०२॥
पुनर्विभवलोभेन सैदपक्षं समाश्रयन्।
आगामिकम्पनेशाधिकारतां प्रार्थयन्निजाम्॥ ३०३॥
अज्ञातदैववृत्तान्तो ययौ लोकेषु हास्यताम्।
अथ वा नाशकाले स्याद्बुद्धिः कुपथगामिनी॥ ३०४॥
कुर्वन्ति ये परशरीरनिकारमाजौ
दर्पान्धलोचनयुगाः स्वविचारबाह्याः।
ते प्राप्नुवन्ति वधमाशु तथा यथामी
लोका वदन्ति नरकोचित एष मर्त्यः॥ ३०५॥
धिग्धिग्धैवतखानं तं वीरंमन्योपि यो रणात्।
निर्गत्य सभयः प्राप्तः फाखुवाविषयान्तरम्॥ ३०६॥
त्यक्तोत्तुङ्गतुरङ्गः स निःशस्त्रिर्भूतकोज्झितः।
तत्र प्राकृतवेशेन जुगोप स्वं भयाकुलः॥ ३०७॥
क्रुद्धैर्दावूदमार्गेशवधान्मार्गपतेर्भटैः।
स चौर इव वाट्यन्तर्हतोप्यात्तशिरोभवत्॥ ३०८॥
छित्त्वोत्तमाङ्गं तस्याशु निन्युर्मन्युनिवृत्तये।
मृतमार्गेशपुत्रस्य शवारात्रिकतां भटाः॥ ३०९॥
स चेत्पलायितः सैदशिबिरं प्राप्नुयान्निशि।
तद्वृत्तज्ञीवरक्षा स्यात्सुबुद्धिः पापिनां कुतः॥ ३१०॥

तद्भृत्यैर्लुण्ठितो देशो गोवधो यत्पुरे कृतः ।
जाने भृत्यापराधेन प्राप्तान्ते तादृशी दशा ॥ ३११ ।
दौहित्रोपि महीभर्तुर्जातो वीरकुलादपि ।
तत्पापेनाभवत्तस्य चित्तं वीररसोज्झितम् ॥ ३१२ ॥
विप्रा राजसुताः सैदाः काश्मीरा अपरेपि ये ।
सहस्रसंख्याः समरे तद्दिने प्रलयं ययुः ॥ ३१३ ॥
निहतानीकसुभटसमूहान्तरलक्षितान् ।
भूमिदाहाय निष्क्रष्टुं नाभूत्कस्यापि पौरुषम् ॥ ३१४ ॥
ये सर्वचङ्गाः पीनाङ्गा भोगैर्मण्डलवर्धिताः ।
याता घर्मोत्थदुर्गन्धास्ते श्ववायसभोज्यताम् ॥ ३१५ ॥
रक्ताक्तकर्तरीशक्तिमुद्गरद्रुघनादिभिः ।
शाल्मलिद्रुमवत्पुष्पैर्बभुर्युद्धगता भटाः ॥ ३१६ ॥
स्मृत्वा रुद्रविहाराग्निदाहं सैदकृतं क्रुधा ।
अलाभपुरदाहाय मार्गपोग्निमदापयत् ॥ ३१७ ॥
ज्वालाजालकरालोसावग्निर्वेश्मोत्थदारुणः ।
अलाभदीननगरं दग्धारण्यमिवाकरोत् ॥ ३१८ ॥
श्रीमत्सैदहमादानखानगाहोदितानलः ।
राजप्रजापचारोत्थतत्क्रोधाग्निरिवाद्युतत् ॥ ३१९ ॥
हतेषु भास्कराद्येषु पलाय्यान्येषु यात्स्वपि ।
विदधुर्नगरे लुण्ठि तद्भृत्याः श्वपचादयः ॥ ३२० ॥
आसञ्जन्मदरिद्रा ये ते महाढ्यत्वमाययुः ।
सदैवाढ्या दरिद्रत्वमुत्पिञ्जोपप्लवे तदा ॥ ३२१ ॥
केचिच्छवान्विचिन्वन्तो यत्र कुत्रापि तिष्ठतः ।
प्रीतिं प्राप्तैस्तदीयार्थैर्ययुः कापालिका इव ॥ ३२२ ॥

विरुद्धसंचयापूर्णगृहलुण्ठविधायिनाम् ।
अभूत्परस्परं युद्धं समांसास्थि शुनामिव ॥ ३२३ ॥
आदावेकेन यन्नीतं तस्मादन्येन तद्धृतम् ।
तस्मादप्यपरेणेत्थं मात्स्यो न्याय इवोत्थितः ॥ ३२४ ॥
द्विधा जयप्रवाहो यस्तद्वाहिन्योरभूत्पुरा ।
एकपार्श्वागमात्सोत्र शाख्युन्मूलनमातनोत् ॥ ३२५ ॥
आढ्यान्द्विजवणिक्प्रायान्पौरान्नित्यसुखोर्जितान् ।
मुष्णन्तस्तद्भटाश्चक्रुर्दरिद्रान्दुःखभागिनः ॥ ३२६ ॥
दारुणोष्मचयात्तत्तद्वस्तुनाशार्दितान्यपि ।
पौराणां समदह्यन्त सदनानि मनांसि च ॥ ३२७ ॥
नगरान्तः कुलीनानां पुण्याः कन्याश्च योषितः ।
विटाः केप्यधमाश्चक्रुर्हठसंभोगदूषिताः ॥ ३२८ ॥
व्यधायि यत्र निर्माणं कल्पान्तस्थिरताशया ।
कोटिकोटिधनं दत्त्वा दग्धं तद्भस्मसादगात् ॥ ३२९ ॥
आसदन्केपि केप्युच्चैरनदन्केप्यलुण्ठयन् ।
दस्यवो दक्षिणे पारे क्षीबा इव जयोद्धताः ॥ ३३० ॥
न शीधुचषकोप्यास्त येषामुत्सवतर्पणे ।
सहस्रसंख्याः कुम्भानामम्भोवन्नगराद्धृताः ॥ ३३१ ॥
केचिद्बन्धुवियोगार्ताः केचित्संचयवञ्चिताः ।
विरुद्धत्वकृताक्षेपा जितरुद्धभुवः परे ॥ ३३२ ॥
बहवो दुःखिताश्चेरुः शतैकीयोभवत्सुखी ।
तत्तद्रणविपन्नैश्च क्षतैः प्रेतैः स्ववेश्मनि ॥ ३३३ ॥
उच्चावचैर्जनैः सार्धं सहस्राद्वितयी मृता ।
इत्थं षष्टितमे वर्षे श्रावणप्रतिपद्दिने ।
एकान्तविजयात्तेषां तत्तल्लोकक्षयोभवत् ॥ ३३४ ॥

पूर्वमङ्कुरितः सैदवधात्पल्लवितः क्रमात् ।
परस्परं वैरतरुस्तद्दिने फलितोभवत् ॥ ३३५ ॥

पौराणां वीरवर्गः प्रतिदिनमहरत्संचयं वञ्चयित्वा
दुःस्थावस्थः समस्तः कृषिफलहृतिभागास्त वास्तव्यलोकः।
उच्छेदः शाटवाटावनिसफलतरुष्विन्धनार्थे दुरन्तः
सैदद्वैधात्समुत्थः प्रवरमुखपुरोपप्लवोभूत्समन्तात् ॥ ३३६ ॥

अत्रान्तरे वधं श्रुत्वा सैदाः काश्मीरिकोज्झिताः ।
आलिखानमुखास्तस्थुर्दासमात्रावशेषिणः ॥ ३३७ ॥

द्वित्रान्निहत्य नगरे निवृत्तः सेत्वभावतः ।
मीयामहम्मदः प्रापत्तावत्स्वशिबिरान्तरम् ॥ ३३८ ॥

भाकरादीन्हताञ्श्रुत्वा सैदा भीता अपि व्यधुः ।
द्वित्रान्निहत्य नगरे पुनर्युद्धाय निश्चयम् ॥ ३३९ ॥

पश्चात्प्रतीर्य मार्गेशो हन्यान्नस्तद्गणोस्त्विह ।
इत्युक्ता ताजभट्टस्तान्निन्ये त्रासविसूत्रताम् ॥ ३४० ॥

अस्मिन्नवसरे पारादागतो युक्तिपूर्वकम् ।
सैदानादाय रावत्रः स्वालयं तान्व्यसर्जयत् ॥ ३४१ ॥

कृत्वा बालनृपेन्दुं तं सैदाभ्रपटलोज्झितम् ।
पौरानानन्दयामासुर्मन्त्रिणो मरुतो यथा ॥ ३४२ ॥

दुर्योधनैकशरणाः कृतशल्ययोगा
ये धर्मजातिविरसाः कलिदत्तकर्णाः ।
अन्यायवृत्तिधृतराष्ट्रकृतावसादा-
स्ते कौरवा इव रणे न जयं लभन्ते ॥ ३४३ ॥

राजधानीं समानीय नवां पद्मपुरान्तरात् ।
खानगाहं नवीचक्रुर्दग्धं श्रीनगरान्तरे ॥ ३४४ ॥

बाबसैदहमादानखानगाहो नदीतटे।
पूर्णस्तत्पुण्यसंभारस्तदाकार इवोत्थितः ॥ ३४५ ॥
सर्वस्वमपहृत्याथ सैदास्ते सकुटुम्बकाः।
मण्डलादालिखानाद्या निरवास्यन्त मन्त्रिभिः ॥ ३४६ ॥
एकमत्येष्वमात्येषु काश्मीरेष्वविशङ्किताः।
ययुः परशुरामाद्याः स्वदेशं प्राप्तसात्क्रियाः ॥ ३४७ ॥
शिशौ दत्त्वा राज्यं वयमिह भजामः सुखमिति
व्यधुः स्वार्थे शिष्टा गलितमतयः सैदपतयः।
हतेष्वेवं तेषु प्रसभमभजन्मन्त्रिपदवीं
परे तत्तज्जुष्टां विधिरिह बलीयान्न पुरुषः ॥ ३४८ ॥
मीयाहस्सनसामग्रीं नाग्रामादिप्रमेयजाम्।
जल्लालठक्कुरोगृह्णात्तत्पुत्रो लहरादिकम् ॥ ३४९ ॥
गृहीत्वा बाङ्गिलं राष्ट्रं स्वकं मार्गेशमागतः।
मखूयादिप्रमेयांश्चाभजच्छ्रीमाञ्जहाङ्गिरः ॥ ३५० ॥
साक्षाश्रमादिराष्ट्रेषु स्वाम्यभूत्सैफडामरः।
अन्यां च ग्रामसामग्रीं सोदरेषु यथोचिताम् ॥ ३५१ ॥
परिहासपुराधीशो जोनराजानकोभवत्।
सैन्याधिकारनिर्दैन्यस्वातन्त्र्योज्झितयन्त्रणः ॥ ३५२ ॥
इब्राहिमश्च मार्गेशो द्वारपालाधिकारभाक्।
चक्रे सैदादिभृत्यानां रक्षामक्षामपौरुषः ॥ ३५३ ॥
राज्ञोधिकारसामग्रीं भूमेर्द्रव्यावलीमिव।
महाभूता इवामात्याः संभूय व्यदधुर्नवाम् ॥ ३५४ ॥
एको मार्गपतेः पक्षष्टक्कुरो डामरोपमः।
राजानकीयो दीप्तास्ते सर्वेंग्रय इवाद्युतन् ॥ ३५५ ॥

आत्मेव निष्क्रियः साक्षिमात्रं बालनृपोभवत् ।
सर्वं प्रकृतिनिष्पन्नं राज्यतन्त्रमभूत्तदा ॥ ३५६ ॥
विभजन्तो भुवं सर्वो यथेच्छं स्वेषु केवलम् ।
अलेखयन्नृपं पत्रे स्वाङ्गीकाराक्षरत्रयीम् ॥ ३५७ ॥
कष्टप्रदाः प्रजानिष्ठा दुष्टभृत्यविचेष्टिताः ।
यथेष्टं समचेष्टन्त हृष्टास्तेरिष्टचेष्टया ॥ ३५८ ॥
स्वपक्षरक्षणे दक्षाः परपक्षेष्टखण्डनाः ।
तार्किका इव ते तस्थुर्वितण्डा वादशिक्षिताः ॥ ३५९
मण्डलं तापयन्ति स्म सर्वे तीक्ष्णकरा न के ।
कल्पान्तकाले भुवनं द्वादशार्का इवोदिताः ॥ ३६० ॥
श्वाक्रन्दितोल्कादाहैश्च भूरिभूकम्पसंपदा ।
वेपमानो जनो जज्ञे प्रत्यावृत्तमुपद्रवम् ॥ ३६१ ॥
शिशौ नृपे व्यधुः पीडां विशां चैतन्नियोगिनः ।
आमया इव देहानां वार्धके शक्तिवर्जिते ॥ ३६२ ॥
नृपतेर्यदि मत्सरात्सहाया
रचयन्ति प्रबला मिथो विरोधम् ।
कुपिता इव धातवः शरीरं
क्षपयन्ति प्रसभं महर्द्धि राज्यम् ॥ ३६३ ॥
ये सर्वकण्टकास्तीक्ष्णाः परेषां छिद्रकारिणः ।
करभाणामिवैतेषां ते तेप्यासन्नातिप्रियाः ॥ ३६४ ॥
पैशुनोपायनाद्भेदं नयद्भिः प्रतिवासरम् ।
चाक्रिकैः कृतसंचारैर्वैरं प्रौढिमनीयत ॥ ३६५ ॥
उक्तं यन्नैव केनापि स्वबुध्या परिकल्पितम् ।
तेषां तद्भृत्यपैशुन्यं हृद्यं काव्यमिवाभवत् ॥ ३६६ ॥

इत्थं मन्त्रिहृदादर्शवैशद्यान्योन्यबिम्बिताः।
तद्भृत्यपैशुनश्वासैर्मालिन्यमभजन्त ते ॥ ३६७ ॥
अथ मार्गपतेरुच्चपदवीं प्राक्क्रमागताम्।
नासहन्तापरे रम्यां चक्रवाका इवैन्दवीम् ॥ ३६८ ॥
इहास्माभिर्हताः सैदा यद्भीत्या विद्रुतोप्ययम्।
नृपस्यास्य सभाज्येष्ठः स्थापितः कुरुते मदम् ॥ ३६९ ॥
इत्यादि शृण्वंस्तद्भृत्यवर्गान्मार्गपतिस्ततः।
ताटस्थ्यं राजकार्येषु विरक्तः सोभजद्रुषा ॥ ३७० ॥
बह्वामखाननयनोत्पाटनेन निजं वपुः।
विशामनाशिषां पात्रं जोनराजानकोनयत् ॥ ३७१ ॥
शस्त्राधिपत्यानौचित्यनिग्रहानुग्रहक्रमैः।
ग्रहाणामिव तेषां स क्रूरो राहुरिवाभवत् ॥ ३७२ ॥
छुन्दानकादिदेशस्थग्राम्याणामनियन्त्रणः।
लोत्रभूम्यपहारेण तद्देशेशोपि सोभवत् ॥ ३७३ ॥
सैदद्वैधान्तरे लुब्धैः सर्वत्र मुषिताः प्रजाः।
तत्पदार्थैर्गृहे पूर्णा कोष्ठागारावलीं व्यधात् ॥ ३७४ ॥
यत्कष्टेनार्जितं लौकैर्बलात्कारहृतं धृतम्।
स्वं ब्रह्मदेयमिति यत्परस्वं वेत्ति लुब्धधीः ॥ ३७५ ॥
संगृह्य वाहिनीः सर्वास्तदीया हृतजीवनैः।
और्वाग्निरिव तृप्तोसौ न बभूव कदाचन ॥ ३७६ ॥
द्वेषान्निरर्थकाक्षेपे ग्रामे वा नगरान्तरे।
नाशकद्रक्षितुं कश्चिद्बलिना तेन पीडितम् ॥ ३७७ ॥
यदि धर्मधिया कश्चित्प्रवृत्तो दीनरक्षणे।
स तद्दुरुत्तरै राजसदस्याप खली कृतिम् ॥ ३७८ ॥

स्वप्रमेयेषु वास्तव्यालुँब्धान्निरपराधिनः ।
अन्येपि पीडयामासू रोगा इव नियोगिनः ॥ ३७९ ॥

राजा शिशुर्गतवया बहवः सहाया
यत्रातिमत्सरभृताश्च मिथः स्वतन्त्राः ।
राज्याङ्गभङ्गमसमं नृपतेर्दिशन्त-
स्तत्राचिरात्समुदयन्ति न के ह्यनर्थाः ॥ ३८० ॥

अत्रान्तरे बाह्यदेशे यात्रार्थं यौ विसर्जितौ ।
एदराजानकष्ठक्कुराह्वदश्चापतुः पुरम् ॥ ३८१ ॥

तद्दर्शनापदेशेन श्रुत्वा किमपि मन्त्रिणाम् ।
नगरे नागमद्दूतैर्मार्गेशः शङ्कितो भृशम् ॥ ३८२ ॥

ससैफडामरेणाशु गत्वा स चकितो गृहे ।
वैदेशिकभटाव्हानात्साशङ्कः सोनयन्निशाम् ॥ ३८३ ॥

शङ्कयेषु सदनान्तेषु प्राप्तस्तन्मतमास्थितः ।
अह्वदष्ठक्कुरो जोनराजानकमथावधीत् ॥ ३८४ ॥

शस्त्रव्रणमुखोद्गच्छद्रक्तसंसिक्तमण्डपम् ।
तद्गृहे तं शवं दृष्ट्वा न को रोमाञ्चितोभवत् ॥ ३८५ ॥

दत्तकन्यमयं जन्यमवधीद्गृहमागतम् ।
दिव्यं कृत्वापि साश्वस्तं धिग्भोगाभ्यासवासनाम् ॥ ३८६ ॥

मिथोसहिष्णवो भेदान्मन्त्रिणः प्रभविष्णवः ।
विनश्यन्त्यचिरेणैवं द्रोहेणेत्यपि केचन ॥ ३८७ ॥

केप्यूचुः स यथा सैदानवधीन्मद्रपैः सह ।
वर्षेणैकेन तत्पापात्तद्वध्यापादितोरिभिः ॥ ३८८ ॥

भृत्या वृथैव रक्ष्यन्ते पोषिता ये सहस्रशः ।
नैकोपि तेभ्यस्तस्यान्ते प्राणत्राणक्षमोभवत् ॥ ३८९ ॥

अर्जितं यद्यथैवाशु तत्तथैव हृतं परैः।
न तिष्ठन्ति चिरं गेहेष्वन्यायोपार्जिताः श्रियः॥ ३९०॥
पापं पुण्यं बलं दाक्ष्यं परं स्वं दूषणं स्तुतिम्।
नो वेत्ति राजपुरुषः कदाचिद्विधुरे विधौ॥ ३९१॥
वैदेशिकभटैः किं नस्त्याज्या सैन्याधिकारिता।
इत्युक्तोपि स पुत्रेण नाग्रहीद्भाग्यवर्जितः॥ ३९२॥
विपरीता मतिः पुत्रे विश्वासः परसेवके।
जायते गतभाग्यानां विनाशे प्रत्युपस्थिते॥ ३९३॥
वैदेशिकभटान्मेने यत्सजातीनिवान्वहम्।
अत्रत्याञ्छस्त्रिणो वीरान्मेने भीरून्परानिव॥ ३९४॥
ससैफडामरो वीरवरस्तच्छौर्यशङ्कितः।
भीतः समार्पिपच्छस्त्रं वीरवृत्तेर्न निश्चयः॥ ३९५॥
जल्लालठक्कुरस्तावद्राजधान्यङ्गने स्थितः।
बद्धोन्तः स्वैर्द्वारपालैर्गतिः क्व विधुरे विधौ॥ ३९६॥
भास्वानपि प्रतिदिनं मृदुतौष्ण्यभिन्न-
स्तां तां बिभर्ति गगनान्तरगोप्यवस्थाम्।
नित्याकुलस्य मनुजस्य बलप्रभावे
को निश्चयो भवति तत्र विचित्रवृत्तौ॥ ३९७॥
मसूददामराद्यास्ते छिन्ननौसेतुबन्धनाः।
प्राग्वत्तेजालद्रगर्डे विदधुः सैन्यसंग्रहम्॥ ३९८॥
शृङ्गारसीहनिकटं ययुः शूरपुराध्वना।
ठक्कुराः सालियाद्यास्तेप्यसक्ताः स्वयमागताः॥ ३९९॥
कारागारान्तरं प्रापुः कस्य स्युः संपदः स्थिराः।
जीराकनामा तद्भृत्यः साहसी नगरान्तरात्।
ठक्कुराह्लादतुरगान्हृत्वा राजपुरीं ययौ॥ ४००॥

इत्थं तत्सैदवधतो जोनराजवधोधिकः ।
पाददाहादिवासह्यो गलरोगो व्यथावहः ॥ ४०१ ॥
यावन्नरस्त्यजति कार्यकृदेकचिन्तां
चिन्तान्तरं सृजति तावदमुष्य धाता ।
याते ऋशिम्नि शशिनः किल पूर्णिमास्तौ
संजायते द्युतिहरो ग्रहणप्रचारः ॥ ४०२ ॥
निष्प्रतिद्वन्द्वि नैश्चिन्त्यं मार्गेशो यावदाप सः ।
तावच्छुश्राव संप्राप्तं पुत्रमादमखानजम् ॥ ४०३ ॥
स यथाभ्यन्तरं प्राप्तो यथा राज्यं ग्रहीतवान् ।
बाल्यात्प्रभृति वृत्तान्तं तत्खानस्य ब्रवीम्यहम् ॥ ४०४ ॥
पितुः श्रीजैननृपतेः प्रमये निर्गतो बहिः ।
आदमखानो वित्राणः प्रपेदे मद्रमण्डलम् ॥ ४०५ ॥
भावीश्वरांशतैश्वर्यप्राप्तिसूचकपर्वणि ।
शिवरात्र्यन्तरे तस्य तत्रस्थस्य सुतोजनि ॥ ४०६ ॥
जनकेस्य दिवं याते तुरुष्कसमरान्तरे ।
मातामहगृहे चन्द्रो ववृधेम्बुनिधाविव ॥ ४०७ ॥
काले तात्तारखानेन रक्षितः स गतः स्वयम् ।
जालंधरमहीपीठे निनाय कतिचित्समाः ॥ ४०८ ॥
जहांगिरोस्य मार्गेशः सैदभीत्या गतो बहिः ।
सोपधिं व्यसृजल्लेखं धर्तुं पैतामहं पदम् ॥ ४०९ ॥
तत्तारखानप्रमये ततः खानमिमं पुनः ।
सुतो हस्सनखानोस्य कंचित्कालमपालयत् ॥ ४१० ।
तुरुष्कान्वञ्चयित्वाथ विहितोत्साहसाहसः ।
खानोमितपरीवारः प्रापद्ग्रहणमण्डलम् ॥ ४११ ॥

इतः काश्मीरिका दूता मार्गेशेन विसर्जिताः।
शृङ्गारसीहेनानीतास्तावद्राजपुरीं प्रति ॥ ४१२ ॥
ततो राजपुरीनाथो मार्गेशद्वेषनिष्ठितः।
फताहखानमानिन्ये स्वान्तिकं स्वाश्रयेच्छया ॥ ४१३ ॥
जोनराजानकवधात्कश्मीरेभ्यो विनिर्गतैः।
डामरैरेधराजानठक्कुरदौलुतादिभिः ॥ ४१४ ॥
तत्रस्थैः शिश्रिये खानस्तरुर्मधुकरैरिव।
प्रथां निन्ये यथा पूर्वं बुप्येदेवात्मजोभवत् ॥ ४१५ ॥
यौनसंबन्धबद्धोपि मार्गरक्षाधिकारभाक्।
मसूदनायकः सोपि खानपक्षं समाश्रयत् ॥ ४१६ ॥
दीनो ग्राम्यजनो दुष्टबहुनायकतार्दितः।
तदागमनवार्तां तां क्षते क्षारमिवाविदत् ॥ ४१७ ॥
सापराधर्णिकान्यायप्रेष्यविरुद्धसेवकाः।
चौरा विटा दरिद्राश्च तुतुषुः खानवार्तया ॥ ४१८ ॥
ग्रामे वा नगरे वापि त्यक्त्वा गृहकुटुम्बकम्।
बद्धाशो राजविभवे न कः प्राप तदन्तिकम् ॥ ४१९ ॥
तांस्तान्देशाद्विनिर्यातान्खानो गृह्णन्समृद्धिमान्।
ऐच्छल्लुब्धप्रतिष्ठः स राज्ञः प्रत्यभियोगिताम् ॥ ४२० ॥
पौत्रः श्रीजैननृपतेर्योग्योयमिति सर्वतः।
त्यक्त्वान्यान्सर्वराष्ट्रेभ्यस्तमेवाशिश्रियज्जनः ॥ ४२१ ॥
तद्वार्ताश्रवणात्तुष्टाश्चौराद्याश्छद्ममास्थिताः।
तत्कालमुत्प्लवन्ति स्म मत्स्या इव तडागगाः ॥ ४२२ ॥
न मम महती सेनैकोरिर्जितोस्त्यपरो महा-
न्क्षितिरतिबलै रुद्धा भिन्नाः परैश्चरसेवकाः।

स वरतुरगोस्वस्थः कोशे न चाधिकृतो हित-
स्तरुमिव घुणास्तास्ताश्चिन्तास्तुदन्ति विभुं न किम्॥४२३॥

तुष्टो जहाङ्गिरस्तावत्तत्प्राप्त्या प्रेषितोपधिः ।
तावत्तन्मतगं ज्ञात्वा सचिन्तः समपद्यत ॥ ४२४ ॥

अहितोन्मूलनोद्भूतदेशैकविभवाप्तितः ।
सुखेच्छुः प्रत्युत प्राप दुःखमुद्भूतविप्लवः ॥ ४२५ ॥

प्रवर्धमानया नित्यं खानागमनवार्तया ।
वेपमानोभवल्लोको वात्ययेव वनावलिः ॥ ४२६ ॥

चाक्रिकाश्चतुराः खानमन्त्रिणोथ जिगीषवः ।
इत्थं लेखाङ्कितं दूतं व्यसृजन्मार्गपं प्रति ॥ ४२७ ॥

भो भो मार्गपते गर्वसर्वखर्वितविक्रमः ।
काश्मीरान्तः सुपर्वेव भवांश्चर्वितसद्यशाः ॥ ४२८ ॥

सोयं खानस्त्वयानीतो लेखैस्तौरुष्कदेशतः ।
उपेक्ष्यते कुलस्वामी कथं मार्गपतेधुना ॥ ४२९ ॥

स्वयं कृतं कथं कार्यं पश्चात्तापाय जायते ।
शिशौ राज्यं परिस्थाप्य भुज्यते मण्डलं परैः ॥ ४३० ॥

व्यवहारोचितः शुद्धः सोयं किं तिष्ठते बहिः ।
अथ वा पितृभागं चेत्प्रयच्छस्यस्य मण्डलात् ॥ ४३१ ॥

बहिरेवास्त्वयं राजाप्ययमस्त्वन्तरे स्थितः ।
अथ किं बहुनोक्तेन मान्यो यदि न तेस्त्ययम् ॥ ४३२ ॥

रणोभयबलवधात्पापं ते परिणंस्यति ।
श्रुत्वेति लेखं मार्गेशः खानदूतोपदर्शितम् ॥ ४३३ ॥

प्रत्युत्तरमयं पत्रं तस्मै दत्त्वाब्रवीदिति ।
भो भो मण्डलगोप्तारो भोक्तारो नृपसंपदाम् ॥ ४३४ ॥

सर्वथा हितकर्तारः पुराणोक्तं विचार्यताम्।
कश्मीरा पार्वती तत्र राजा ज्ञेयः शिवांशजः ॥ ४३५ ॥
नावज्ञेयः स दुष्टोपि विदुषा भूतिमिच्छता।
देशेस्मिंस्तपसा राज्यं प्राप्यते न पराक्रमैः ॥ ४३६ ॥
अन्यथादमखानाद्यैः किं नाप्तं स्वक्रमोचितम्।
अन्यथाप्येतन्न चिरादनौचित्यचितं फलम् ॥ ४३७ ॥
क्रमेण येनायातोसौ तं त्यक्त्वा त्वद्बलार्थिनः।
सति राज्येस्य विघ्नाय प्रवेशो दीयते कथम् ॥ ४३८ ॥
न मयायं धृतो राज्ये बालोप्यन्याभिषेचितः।
कः शक्नोत्यधुना हन्तुं मयि संनिहिते स्थिते ॥ ४३९ ॥
खानोयं सर्वथा पूज्यो यद्यस्मन्मतमिच्छति।
अग्रेसरारुणः सूर्यः पूज्यते ह्युदयोन्मुखः ॥ ४४० ॥
श्रियः कृतघ्नभावाप्ता न सुखाय चिरं नृणाम्।
भोगा रोगाय देहानामपथ्याशनसंभृताः ॥ ४४१ ॥
किं वान्यत्सैदहस्तस्थो यद्वद्राजा विमोचितः।
तद्वत्तद्वस्तगः सोयं प्राप्यते तद्विधेर्मतम् ॥ ४४२ ॥
इति लेखं विसृज्यैतत्पक्षपातात्क्रुधान्वितः।
रथ्याधिकारं जग्राह मसूदस्य जहाङ्गिरः ॥ ४४३ ॥
बह्वामनायकादीनां दत्त्वा तन्मार्गरक्षणम्।
शृङ्गारराजानकादीन्स्थामार्थं व्यसृजद्धृतम् ॥ ४४४ ॥
अथ खानं पुरस्कृत्य नायकोसुखदायकः।
क्रुद्धः पथोपहरणात्प्रापच्छूरपुरान्तरम् ॥ ४४५ ॥
तद्भृत्याः खशडोम्बाद्यास्तद्विसृष्टाः पदे पदे।
देशे मडवराज्यान्तश्चक्रुरुत्पिञ्जमञ्जसा ॥ ४४६ ॥

एकतो नृपतेः सेना काष्ठाखानस्य चान्यतः ।
दंष्ट्राद्वयी यमस्येव लक्षिता सर्वभक्षिका ॥ ४४७ ॥
प्राक्सैदविप्लवात्खानविप्लवः सोधिकोभवत् ।
पाददाहादिवासह्यो गलरोगो व्यथावहः ॥ ४४८ ॥
तस्कराक्रान्तपथिको बलवन्निहतावलः ।
अराजक इवानीशो देशः कष्टां दशामगात् ॥ ४४९ ॥
जग्मुर्दक्षिणपारादीन्प्रमेयांस्तद्दिगाश्रिताः ।
गृहीत्वा गोधनं सर्वे त्यक्त्वा स्ववसतीर्भयात् ॥ ४५० ॥
खेरीं चार्धवनं राष्ट्रं भ्रष्टमग्निशिखेव सा ।
अतापयन्महोष्माढ्या प्रविष्टा कटकद्वयी ॥ ४५१ ॥
राजसैन्यं समालोच्य प्रसुप्तं चारचक्षुषा ।
एकदा जीरकाद्यास्ते स्वास्कन्दं शिबिरे ददुः ॥ ४५२ ॥
प्रजागरचरन्यासशस्त्राभ्यासविवर्जिताः ।
सर्वे पशूपमास्त्रासाद्विदध्रुः शिबिरान्तरात् ॥ ४५३ ॥
सेनापतेर्निजाः केपि युद्धादौ भेदिताः परैः ।
चक्रुस्तत्कटकं हत्वा द्रोहं वैरिसमाश्रयात् ॥ ४५४ ॥
राज्यं नश्यति हृष्यति प्रतिदिनं बाह्या खशाली न का
लोकः क्लिश्यति लुण्ठिदाहकरणैश्चौरः स्वकं पश्यति ।
सेना भ्रश्यति धीरवीरसहिताप्यन्विष्यति स्वं रिपुः
काश्मीरप्रभविष्णुषु प्रभवति द्वेषात्स्वभेदो यदा ॥ ४५५ ॥
द्रोग्धॄंस्तानवलोक्यैव स्रस्तां ज्ञात्वा स्ववाहिनीम् ।
सेनानीश्चकितः सैन्यात्पलायनपरोभवत् ॥ ४५६ ॥
हतेथ विद्रुते तस्मिन्पश्चादेत्य महाभटैः ।
सर्वस्वास्या जहर्षाथ खानस्तत्प्रथमं जयात् ॥ ४५७ ॥

तुरुष्कदेशाद्यद्बुद्ध्या खानः प्राप्तो निरर्गलः।
स भागसीहस्तत्पक्षात्केनापि प्रचलन्हतः॥ ४५८॥

अथ मल्लिशिलास्थाने तुष्टः खानो जयोन्मदः।
स्वसैन्यसंग्रहं कुर्वञ्जिगीषुः शिबिरं व्यधात्॥ ४५९॥

विकरालान्भटान्क्षित्वा करालविषयावनौ।
मुमुषुर्निष्करालम्भान्वास्तव्यान्तस्य शस्त्रिणः॥ ४६०॥

अत्रान्तरे मार्गपतिर्गृहीत्वा बालभूपतिम्।
तज्जयाय बलोद्युक्तो निर्ययौ नगरान्तरात्॥ ४६१॥

प्राक्सैदकदनाभ्यस्तन्यस्तवस्तुविलुण्ठनाः।
पुराद्गृहरमां भीताः पौरा ग्रामेषु न्यक्षिपन्॥ ४६२॥

निष्कृष्टवस्तुभावा सा मुषितेव वराङ्गना।
अभवद्राजरहिता नगरी न गरीयसी॥ ४६३॥

वैदेशिकटकाटोपकोपोत्कररटद्भटः।
गुप्तिकोड्डारभूवाटे पाटवाच्छिबिरं व्यधात्॥ ४६४॥

संस्थाप्य तत्र भूपालं त्रिधा कृत्वा स्ववाहिनीम्।
कल्याणपुरगं श्रुत्वा खानं योद्धुं विनिर्ययौ॥ ४६५॥

द्राभग्रामान्तसीमान्ते समासन्नोधिकार्तधी :।
तस्थौ खानान्तिकं प्राप्य स खानमरुगान्तरे॥ ४६६॥

क्रमराज्यस्फुरत्प्राज्यचक्रवाटादिदुःसहम्।
वैडूर्यभट्टः पाश्चात्त्यां जग्राह गिरिपद्धतीम्॥ ४६७॥

सपेरोजप्रतीहारगक्कराजसुतादयः।
चतुरङ्गोपमां लीलां क्षणं चक्रुः पुरो गताः॥ ४६८॥

अथैकतः स्वकाश्मीरवैदेशिकबलान्विताः।
मसूदनायकसुता योद्धुं व्यूहात्समाययुः॥ ४६९॥

फलकासिस्फुरत्पक्षा नदन्तोन्तिकमागताः ।
चेरुः पङ्क्त्या भटास्तत्र हंसा इव नभोन्तरे ॥ ४७० ॥
यावत्प्रवृत्तो योद्धुं तांस्तावद्वीक्ष्याग्रमागतान् ।
अह्लादठक्कुरव्यूहो निरीहः समपद्यत ॥ ४७१ ॥
चेलाह्विकाभुजः केपि गर्जन्तो जलदा इव ।
स्फुरच्छस्त्रतडिज्ज्वालाः सोत्फाला निर्ययुर्मृधे ॥ ४७२ ॥
विषमा पङ्कसंकीर्णा जाड्यदुर्मार्गदूषिता ।
तेषामापततां साध्या वासनेव निजाजिभूः ॥ ४७३ ॥
वैदेशिकभटान्दृष्ट्वा नटत्खेटकपीटकान् ।
चटका इव जग्मुस्ते विदूरं पाटवोज्झिताः ॥ ४७४ ॥
न संस्तम्भयितुं सेनामशकत्तां पलायिनीम् ।
अह्लादठक्कुरोदीर्णां सेतुभङ्गां नदीमिव ॥ ४७५ ॥
अहमहमिकायातजातघातव्रणार्दिताः ।
प्राणत्यागेन ते केपि चक्रुर्वेतननिष्कृतिम् ॥ ४७६ ॥
स्रवच्छोणितसिक्ताङ्गाः शालिक्षेत्रगताः शवाः ।
यागोपहारपशुतां ययुः कार्षिकभूमिषु ॥ ४७७ ॥
सेना खानस्य वात्येव सा नैर्ऋतदिगागता ।
तत्तल्लोकक्षयं चक्रे वेगभग्नभटद्रुमा ॥ ४७८ ॥
केपि काश्मीरिकास्तत्र वैदेशिकभटानले ।
शस्त्रज्वालावलीदीप्ते जुहुवुः श्रीफलं वपुः ॥ ४७९ ॥
किं नामोद्दीरणैस्तेषां दृष्ट्वा व्यूहं समागतम् ।
तिर्यग्भिरिव पातुं स्वं भीत्या यैर्यैः पलायितम् ॥ ४८० ॥
प्रमेयभाजो मुख्या ये दृष्टा राजसभान्तरे ।
अदृष्टपूर्वं संत्रासं तेप्यशस्त्रिवदाययुः ॥ ४८१ ॥

वीरवृत्त्या त्यजन्प्राणान्केवलं श्लाघ्यतामगात्।
तस्य त्रिचतुरास्त्यक्तप्राणा अनुचरा रणे।
दिवं यियासोर्भोगार्थं बभूवुस्ते पुरःसराः ॥ ४८२ ॥
हतावशिष्टान्विद्राव्य ते खानस्य महाभटाः।
निवृत्ता मार्गपत्यग्रे स्वीयभ्रान्त्या समाययुः ॥ ४८३ ॥
मसूदखानः क्वेत्येवं वदन्तो विजयोद्यताः।
वीरा हस्सनमीराद्या ज्ञाता मार्गपतेर्भटैः ॥ ४८४ ॥
पञ्चशस्तस्य संबधिभृत्यास्ते नौरुजादयः।
सपौरभट्टाश्चान्ये च हता मार्गपतेः पुरः ॥ ४८५ ॥
विमुखोभूत्कियत्कालं यः स सांमुरव्यमाययौ।
बालभूभृत्प्रभावेण कश्मीरकटके विधिः ॥ ४८६ ॥
मार्गेशस्याथ वा स्तुत्यं धैर्यं तस्यात्र संयुगे।
संनद्धः सबलस्तस्थौ जयस्तम्भ इवाचलः ॥ ४८७ ॥
पदैकमात्रं पश्चाश्चेदगमिष्यच्च तत्स्थलात्।
काश्मीरकटकस्यास्य नावशिष्येत किंचन ॥ ४८८ ॥
भिन्नप्रकृतिसंधानकौशलं श्रीजहाङ्गिरे।
भिषजीव तदा दृष्टं भैषज्यं सांनिपातके ॥ ४८९ ॥
प्रागलभ्यमप्रतिहतं प्रतिभानमोज-
स्तत्तत्प्रयोगचतुरत्वमसंभ्रमश्च।
एतानि यस्य समयेप्यतिसंकटे स्यु-
स्तुष्टेव तं प्रति समेति रणे जयश्रीः ॥ ४९० ॥
खानोस्मत्करमाप्तोत्र मिथ्योद्घोष्यात्र संयुगे।
रणात्प्रचलितान्दूरं युक्त्या सर्वानुपानयत् ॥ ४९१ ॥
मार्गेशमधुसांनिध्ये तद्रणोपवनान्तरे।
ते वीरभ्रमराश्चेरुः स्फुरत्पक्षरवोद्धताः ॥ ४९२ ॥

अथ खानस्य शिबिरे गक्काद्या जयदुर्मदाः ।
नीतावशिष्टां सामग्रीं हत्वा भूरीनलुण्ठयन् ॥ ४९३ ॥
इबराहिममार्गेशः सभृत्यः समराग्रगः ।
मसूदनायकमुखान्विमुखांस्तर्जनैर्व्यधात् ॥ ४९४ ॥
अन्ये शृङ्गारसोहाद्या दृष्ट्वा तत्सैन्यमद्भुतम् ।
भेडावनपथात्तूर्णं विद्रुताः स्वां भुवं ययुः ॥ ४९५ ॥
सर्वं राजपुरीसैन्यं सदैन्यं वेष्टितं भटैः ।
दत्त्वाभयं ररक्षाजौ गक्को गणपतिर्यथा ॥ ४९६ ॥
त्यक्ता संनाहसामग्रीं केप्येते विद्रुता द्रुतम् ।
मुषिताः सखशैर्डोम्बैः पृष्ठभग्नाः प्रशान्तयः ॥ ४९७ ॥
वृक्षानपि वने जक्षुररयोनु लगन्त्यमी ।
वैदेशिकैर्हृतं यत्तत्ग्रामेषु जनपीडया ॥ ४९८ ॥
काश्मीरिकेभ्यो मुषिता निक्षेपमिव ते ददुः ।
शीतज्वरार्दिताः केचित्केचिच्छ्रान्ता बुभुक्षया ।
वैदेशिकाश्च काश्मीराः शतसंख्याः क्षयं ययुः ॥ ४९९ ॥
संरूढं कमपि निपातयत्यकाण्डे
पातार्हं नयति च कंचन प्ररूढिम् ।
संकल्पाविषयविचित्रकाकताली-
वार्यौघस्तरुमिव पूरुषं विधाता ॥ ५०० ॥
यादृक्सुवासनः खानस्तादृशस्तस्य चेद्भटाः ।
भवेयुः किं न जायेत किं तु धर्मानुगो जयः ॥ ५०१ ॥
इत्थं फतहखानेस्मिन्प्राप्ते कश्मीरमण्डलम् ।
एकषष्ठितमे वर्षे पुरुद्रच्छ्रावणान्तरे ॥ ५०२ ॥
कटकद्वयसंयोगे कल्याणपुरसंनिधौ ।
अत्रत्यानां च बाह्यानां तत्तल्लोकक्षयोभवत् ॥ ५०३ ॥

मैत्रर्क्षेशनिसंयोगं मीलापं शनिजीवयोः।
भौमाब्दं तत्क्षये हेतुं देशे दैवविदो विदुः॥ ५०४॥
श्रीजैननृपते राज्ये षड्दर्शनरताः प्रजाः।
हृष्टाः स्वधर्मनिरता निरातङ्का निरीतयः॥ ५०५॥
तस्मिन्स्वर्गं गते राज्ञि नष्टाचारेत्र मण्डले।
प्रजापचाराल्लोकानां क्षयोभूदिति मे मतम्॥ ५०६॥
तथा हि वणिजः केचित्स्वाचारं हिन्दुकोचितम्।
त्यक्त्वा पुरान्तरे चक्रुर्हत्वा गोमांसभक्षणम्॥ ५०७॥
येनैव पितरो याता येन याताः पितामहाः।
तद्दर्शनेत्र तत्पुत्रास्त्रपन्ते मौसुलप्रियाः॥ ५०८॥
प्रत्यब्दं तिथिकार्याणि पुराणोक्तानि कानिचित्।
विस्मृतानि दुराचारात्कथं न स्युर्दुरापदः॥ ५०९॥
मण्डलेस्मिन्दुराचारचातुर्वर्ण्यविराजिते।
प्रसङ्गपतिताचारविपर्यासादितोरितम्॥ ५१०॥
राजाक्रान्तः परैर्मिथ्या वार्तयेति विसूत्रितः।
मार्गेशस्ताजभट्टादीन्धृत्वा स्वशिबिरं ययौ॥ ५११॥
पश्चाच्चेदलगिष्यत्स नष्टांस्तान्बलवर्जितान्।
न किंचिदवशिष्येत खानस्य चलतः पथि॥ ५१२॥
मार्गानभिज्ञो मार्गेशः सर्वेप्युभयवेतनाः।
दायाददुःस्थितिं लोके काङ्क्षन्तः स्वार्थलिप्सया॥ ५१३॥
प्रैरयंस्तद्रणाद्धन्तुं मार्गेशं चाप्यदीदरन्।
सनृपं सैन्यमुत्थाप्य ततो जिष्णुर्जहाङ्गिरः।
जमालामरुगास्थानं ययौ स विजयोर्जितः॥ ५१४॥
किमेते मिलिताः खानमिति तेन विसर्जिताः।
ददाह ताजभट्टः स ग्रामान्माङ्गल्यनादगान्॥ ५१५॥

तत्तद्दग्धगृहोज्ज्वालधूमजालाकुलं नभः ।
घनकालोद्भवादीप्ततडिदभ्रोपमां दधौ ॥ ५१६ ॥
कृतं यद्राह्यदेशेषु काश्मीरैर्दिग्जयक्षणे ।
दाहलुण्ठ्यादिकं तद्वदृष्टमत्रैव मण्डले ॥ ५१७ ॥
अकिंचनाञ्जनान्नम्रान्विज्ञप्त्यै समुपागतान् ।
अद्यैव जातान्दृष्ट्वा तान्न कोप्याच्छादनं ददौ ॥ ५१८ ॥
तत्रत्यास्तद्धृतं कुप्यं रूप्यं धेनूः पशूनपि ।
दृष्ट्वोच्छ्वासाकुलाश्चक्रुराक्रन्दमुखरा दिशः ॥ ५१९ ॥
सर्वस्वहरणं यद्वत्कृतमस्मास्वहेतुकम् ।
युष्मास्वपि तथा भूयादचिरेण विरोधिभिः ॥ ५२० ॥
तत्पापफलमेतेषु त्रिषु तन्मरणक्षणम् ।
फताहशाहराज्यान्तौ दृष्टं लोकैर्विगर्हितम् ॥ ५२१ ॥
उत्पिञ्जोत्पादनादेशे शृण्वन्नित्यादि दूषणम् ।
प्रजापापादसंधित्सुर्मार्गेशः स न्यवर्तत ॥ ५२२ ॥
स नृपो नगरं प्राप्तो विधाय विजयोत्सवम् ।
उच्चावचान्खानपक्षगतान्सर्वानदण्डयत् ॥ ५२३ ॥
एकं खानाग्रगं ज्ञात्वा शिष्टं तस्य कुटुम्बकम् ।
अबाधत न को देहे दुष्टरोग इवोल्बणः ॥ ५२४ ॥
कदाचित्सुप्रीतो जनयति सुखं सार्वजनिकं
कदाचिद्वक्रेच्छः सृजति जनतामीतिचकिताम् ।
फलं नीचं चोच्चं भविषु परिवृत्त्या विदधतो
ग्रहस्येवाकाशे गतिरिह विचित्रा बत विधेः ॥ ५२५ ॥
कंचित्कालं दरत्रस्तः खानस्त्राणविवर्जितः ।
यायावकिंचित्करतामवग्रह इवाम्बुदः ॥ ५२६ ॥

अत्रान्तरे स्थितः खानः सभैरवगलान्तरे ।
अचिन्तयत्पुनर्देशप्रवेशं नायकोर्जितः ॥ ५२७ ॥
मासद्वयमतिक्रम्य कश्मीराभिमुखस्ततः ।
आययौ स पुनः खानः सत्राण उद्भटैर्भटैः ॥ ५२८ ॥
तस्मिञ्छूरपुरं प्राप्ते स नृपोथ जहाङ्गिरः ।
निर्ययौ नगरात्तूर्णं संपूर्णः सैन्यसंपदा ॥ ५२९ ॥
प्राग्वत्स गुप्तिकास्थाने निषण्णः शिबिरान्तरात् ।
गक्करराजसुतं रात्रौ सोशृणोद्विद्रुतं द्रुतम् ॥ ५३० ॥
आरोहणक्षणे तस्य तुरङ्गस्त्रासमग्रहीत् ।
क्षणं स शकुनज्ञोपि नातिष्ठन्निष्ठुरः क्रुधा ॥ ५३१ ॥
गृहीतभूरिवित्तोपि यत्रैष द्रोहितामगात् ।
कोन्यस्तिष्ठति तत्रेति त्रस्तः प्रत्यागतोभवत् ॥ ५३२ ॥
सुलग्ने निर्गतो भूयो मार्गेशः शिबिरान्तरात् ।
उपायांश्चिन्तयांचक्रे खानस्य बलभेदनम् ॥ ५३३ ॥
अत्रान्तरे शूरपुराज्जीरकाद्या महाभटाः ।
प्रविश्य नगरे रात्रौ बन्धनस्थानमोचयन् ॥ ५३४ ॥
ते सर्वे बन्धनान्मृत्युद्वारादिव विनिर्गताः ।
सैफडामरमुख्यास्ते संप्रापुर्विजयेश्वरम् ॥ ५३५ ॥
स सैफडामरः पूर्वं बन्धने स्वप्नमैक्षत ।
केनाप्यन्यपदद्वन्द्वं छिन्नं शस्त्रेण तन्निशि ॥ ५३६ ॥
वीरस्य बन्धनं ह्यस्य स्फूर्जत्पक्षस्य रक्षणम् ।
सोष्मणः पतितं मेने वह्नेर्वस्त्रावगूहनम् ॥ ५३७ ॥
तथापि रक्षणं वह्नेरिव वस्त्रावगूहनम् ।
जयापीडपुराद्दुर्गाद्बन्धनं नगरे कथम् ॥ ५३८ ॥

इत्यपायोप्युपायस्य जातो मार्गपतेर्यतः ।
इभ्राहिमः स मार्गेशस्तावत्पश्चाद्विनिर्गतः ।
शंशनायकमुख्यानां बहूनां कदनं व्यधात् ॥ ५३९ ॥
ठक्कुराह्मदजीराकप्रतीहारान्वयादयः ।
इत्थं तत्साहसं चक्रुर्लङ्घितक्रोशषष्टयः ॥ ५४० ॥
विपदि समनुभूय कोपि कष्टं
भवति पदं नृपसंपदां नितान्तम् ।
कनकमनलपातघातमास्वा
शिरसि विभाति नृपस्य मौलिरूपम् ॥ ५४१ ॥
कारापञ्जरनिर्मुक्तः पक्षीवाक्षतपक्षतिः ।
पुनर्जातमिवात्मानममन्यत स डामरः ॥ ५४२ ॥
पूर्वं जयपुरे दुर्गे योभूद्बद्धःसहोदरः ।
काराप्राकारमुल्लङ्घ्य रज्जुनैकोपि निर्गतः ॥ ५४३ ॥
रुद्धः सुप्तः पुनर्बद्धो नगरे बन्धनालये ।
निश्चिन्तितं वधस्तत्र द्विष्टैर्द्वित्रदिनान्तरे ॥ ५४४ ॥
एवं कष्टात्ततो मुक्तः प्राप्तः खानान्तिकं क्रमात् ।
प्रधानपुरुषाख्यातिं प्रापत्प्रकृतिमध्यगः ।
स सैफडामरस्तत्र यथासंख्यमतस्थितः ॥ ५४५ ॥
रामो रावणवञ्चितो यदि गृहान्नैवागमिष्यद्वनं
सुग्रीवः स च वालिना कृतपदो नैवाघटिष्यद्रुषा ।
लङ्कां प्राप्य रिपून्निहत्य समरे जेताभविष्यत्कथं
संयोगं सुखदुःखयोः प्रतनुते धातैव भूत्यै द्वयोः ॥ ५४६ ॥
राज्यार्थी विच्युतो देशात्खानो वीरासिलम्पटः ।
डामरा मार्गपक्रुद्धः सर्वनाशात्पदच्युतः ॥ ५४७ ॥

एवमन्योन्यसापेक्षं नाभविष्यत्स्वयं यदि।
प्रविश्य देशे राज्याप्तिः कथमस्य भविष्यति ॥ ५४८ ॥

राजा विभाति बहुवीरसमाश्रयेण
वीरा भजन्ति च तदाश्रयणेन शोभाम्।
अन्योन्यसंगतिरभङ्गुरभङ्गिरेषां
बालाङ्गनाकनकभूषणवद्विभाति ॥ ५४९ ॥

तेन प्राप्तेन सा खानसभा तत्र व्यराजत।
मुक्तालतेवाङ्गनाङ्गे नायकेन शुभात्मना ॥ ५५० ॥

अत्रान्तरे मार्गपतिश्चकितस्तत्समागमात्।
संधित्सुः शेखवाहाबमुखात्खानं व्यसर्जयत् ॥ ५५१ ॥

एधराजानको रिगडामरः केशवो बुधः।
राजाग्रमेत्य संध्यर्थं निन्ये राजपुरीपतिम् ॥ ५५२ ॥

तावद्वदायराबुत्रमुखादाश्वास्य मार्गपः।
शृङ्गारसीहं तं भेदमनयद्विणार्पणैः ॥ ५५३ ॥

नीत्वा मार्गपतेः पुत्रं संधित्सुः स बलद्वये।
न्यवारयद्रणक्षोभं यावद्राजपुरीपतिः ॥ ५५४ ॥

तावन्मार्गेशपुत्रं तं रोद्धुमन्यैर्विनिश्चितम्।
नामन्यत स यत्नेन साशङ्का मन्त्रिणोभवन् ॥ ५५५ ॥

यावत्प्रजासु सनृपासु विधिर्विरुद्धो
दायाददुःस्थितिरुपायशतैर्न याति।
देहे दुराधिनिहते भिषजां प्रयुक्त्या
रोगाः कथं प्रविगलन्ति कृताधिकाराः ॥ ५५६ ॥

खानान्तरङ्गैराक्षिप्ते भिन्ने राजपुरीपतौ।
अकस्मादुदभूत्क्षोभः सर्वसैन्यभयावहः ॥ ५५७ ॥

गक्कश्रृङ्गारसीहाद्यास्त्रस्ता राजपुरीं ययुः ।
खानोपि सबलो भीतो ययौ प्राग्वद्यथागतम् ॥ ५५८ ॥
केचिज्जीराकमीराद्याः प्रापुर्मार्गेशसंनिधौ ।
जल्लालठक्कुरप्रेम्णा कृतमाध्यस्थ्यसंविदः ॥ ५५९ ॥
एवं क्षोभेण सा सेना खानस्याङ्गतरङ्गिता ।
ययौ सहस्रधा दीर्णा सेतुभङ्गादिवापगा ॥ ५६० ॥
अथ मार्गपतिः श्रुत्वा तद्वृत्तान्तमनुद्रुतः ।
युयुत्सया ससैन्यः स प्रापच्छूरपुरान्तरम् ॥ ५६१ ॥
तत्र दूतमुखाच्छ्रुत्वा क्रमराज्यमुपद्रवम् ।
शाहिभङ्गबलप्राप्त्या चिन्ता द्वैगुण्यमादधे ॥ ५६२ ॥
निवृत्य स ततो राज्ञः प्राप्तः सुय्यपुरान्तरम् ।
बबन्ध नौरुजो खानं युक्त्या यत्साधु तद्व्यधात् ॥ ५६३ ॥
स हि तद्दिवसे प्राप्स्येन्मुष्णञ्श्रीनगरं विटैः ।
किं तु तत्काङ्क्षितं क्रूरं न सिद्धं पौरपुण्यतः ॥ ५६४ ॥
सोपेक्ष्य मार्गपं तत्र ढौकितं क्रमराज्यतः ।
पदार्थराशौ दत्त्वाग्निं तद्रुषा भस्मसाद्व्यधात् ॥ ५६५ ॥
अन्यायतः प्रतिदिनं समुपार्ज्य वित्तं
यद्दानभोगरहितं निहितं गुहान्तः ।
तत्संप्रयाति कृपणेषु कृतानुतापं
भूपालसादनलसादरिदस्युसाच्च ॥ ५६६ ॥
ततस्तत्सहितः प्राप्तो नगरं स जहाङ्गिरः ।
जयेन तावन्मात्रेण नगरे स व्यजृम्भत ॥ ५६७ ॥
सैदाग्निष्काशितान्देशात्स्वपुत्रवधकानपि ।
लेखैरानाययामास सोपयोग्यतया स तान् ॥ ५६८ ॥

तदन्तरे जम्भवाटे वसन्खानो बलोर्जितः।
मृगानिव हरिस्तत्र विदधे दुर्दशान्खशान्॥ ५६९॥

सप्तविंशतिसंख्यान्स कश्मीरविषयान्यथा।
तावतीः सिन्धुरीस्तत्र व्यधाद्दुःस्थः पराक्रमैः॥ ५७०॥

सार्धं मल्हानहंसैस्तत्कटकः सुभटोत्कटः।
मद्रमण्डलमुल्लुण्ठ्य तुरुष्कांश्चकितान्व्यधात्॥ ५७१॥

स मद्रमण्डलं जित्वा दत्त्वा राजपुरीपतेः।
जिष्णुश्चैत्रे पुनः प्राप तद्युतो नायकालयम्॥ ५७२॥

गृहं दैवतवत्प्राप्तं खानं तं मानयन्गुणैः।
मसूदनायकोमुष्मिन्नाभवद्भक्तिखण्डितः॥ ५७३॥

सागरस्त्यजति चेन्निजां स्थितिं
पश्चिमोदयमुपैति चेद्रविः।
क्षत्रियः शरणमागतेर्थिनि
प्रायशश्चलति न स्वधर्मतः॥ ५७४॥

स सैन्यसंग्रहं कृत्वा छयिल्लकटकान्वितः।
तस्थौ खानो गिरिश्रृङ्गे वैरिभङ्गविधित्सया॥ ५७५॥

रोगैरिव भटैर्ध्वस्तसमस्तगृहवस्तुभिः।
वास्तव्यानां स्थितिर्दुःस्था गेहे देहे यथाभवत्॥ ५७६॥

अत्रान्तरे बन्धनान्तर्गतं पृष्ठकवाटितम्।
भीतो व्यापादयामास जीराकं नगरेध्वपः॥ ५७७॥

तच्छ्रुत्वा राजलोकश्च सर्व एव विरागभाक्।
आश्वासघातकत्वेन दुरुक्तिमुखरोभवत्॥ ५७८॥

ज्येष्ठे मासि श्रुतानिष्टो मार्गेशः कष्टनिष्ठितः।
अतिष्ठत्स नृपो मल्लशिलापृष्ठेतिनिष्ठुरः॥ ५७९॥

द्रङ्गमार्गनिरोधेन सर्वोप्युभयवेतनः ।
जनो बलद्वयं गन्तुं निराशः समपद्यत ॥ ५८० ॥
विशां निर्लवणं भोज्यमश्नतामत्र मण्डले ।
मार्गेशव्यञ्जनं नाम श्रुतं हास्यावहं न कैः ॥ ५८१ ॥
सार्धे पले सैन्धवस्य क्रयोभून्नगरान्तरे ।
दीनारपञ्चविंशत्या दुरापं नागरैरपि ॥ ५८२ ॥
द्वाषष्टितमवर्षेपि कश्मीरागमनोत्सुकम् ।
खानं श्रुत्वा मार्गपतिर्नीतिकौटिल्यमादधे ॥ ५८३ ॥
दौहित्रं हाजिखानस्य खानमिस्कन्दराभिधम् ।
कम्पनाधिपतिं कृत्वा स्थामार्थं स व्यसर्जयत् ॥ ५८४ ॥
मसूदनायकीयं च राष्ट्रं दत्त्वा स्वगुप्तये ।
यः शराजानकं चापि ससैन्यं प्रत्यमुच्यत ॥ ५८५ ॥
समं देशसुखेनाथ प्रालेये तनुतां गते ।
स्वसैन्यसहितः खानो राजपुर्याः समाययौ ॥ ५८६ ॥
प्राप्तं खानं समाकर्ण्य तं भैरवगलान्तरे ।
मार्गे शूरपुरे रोद्धुं मार्गेशः सनृपो ययौ ॥ ५८७ ॥
प्रवेशरोधः खानस्य तदूर्ध्वगलवर्त्तितः ।
राहुदेहेमृतस्येव देशेभूच्चक्रभीतितः ॥ ५८८ ॥
पशुपादिष्टमार्गेण पुरुद्रच्छ्रावणान्तरे ।
ततोगाद्गिरिमुल्लङ्घ्य खानः खाचगलन्तरात् ॥ ५८९ ॥
ताजभट्टादिसैन्यौघो गुसिकोड्डारभूतले ।
क्षुब्धं वायुरिवागत्य चक्रे खानबलार्णवम् ॥ ५९० ॥
ध्वनिदुन्दुभिनादेन तर्जयन्परितो जनान् ।
खानः सकटको भीत्या नगरं व्याकुलं कृतम् ॥ ५९१ ॥

उड्डीयेवागतं श्रुत्वा साश्चर्यो मार्गपस्ततः ।
ससैन्यः सनृपस्तूर्णं तद्युद्धाय समाययौ ॥ ५९२ ॥

उड्डामरो डामरः स शौर्यश्रीगरुडामरः ।
रणे डामरयोगेन्तर्बभावुच्छुष्मरुद्रवत् ॥ ५९३ ॥

केचित्सैदभटास्तत्र युध्यन्तः सुभटैः सह ।
अनिवर्तितया याता दिव्यस्त्रीसुखभागिताम् ॥ ५९४ ॥

श्वभ्रपातरणाघातक्षतानां तत्समागमे ।
शवानां राशयस्तत्र पतिताः समरान्तरे ॥ ५९५ ॥

न सैदयुद्धे नो खानागमप्रथमसंगरे ।
भटक्षयोभवद्यादग्गुसिकोड्डारसंगरे ॥ ५९६ ॥

प्रमेयभाजोप्यासन्ये रणे मुख्या निजोचितम् ।
शौर्यं नादर्शयन्केचित्साक्षिभूता इव स्थिताः ॥ ५९७ ॥

पातनेनेव वृक्षस्य पक्षिशावा इव च्युताः ।
गता हताः क्षताश्चासन्यत्र तत्र शवव्रजाः ॥ ५९८ ॥

पूर्वापकारी यो यस्य ग्रामे वा नगरेभवत् ।
स तस्य बाधं कृतवान्दुर्बलस्य बली तदा ॥ ५९९ ॥

मसूदनायकस्तत्र सायकायुधवर्षणे ।
रुद्धाश्वो विजहौ प्राणान्भावि केन विलङ्घ्यते ॥ ६०० ॥

कृत्वान्यान्युद्धगान्यत्र मार्गेशोगात्स्वरक्षया ।
श्रीसैफडामरो वीरयुतस्तत्रैव सोभवत् ॥ ६०१ ॥

यो गवेष्यः स चावाप्त इति तुष्टो भटावृतः ।
प्रथमं प्राहरत्तस्य मूर्ध्नि श्रीसैफडामरः ॥ ६०२ ॥

अलंशिरोहैदरश्च स च क्रूरा इव ग्रहाः ।
मुखे भुजे कपाले च घ्नन्तस्तं विवशं व्यधुः ॥ ६०३ ॥

अथ मार्गपतेः स्वर्णमयीमङ्गलमालिकाम् ।
सचामरां डामरेशो जयश्रियमिवासदत् ॥ ६०४ ॥
उपेक्षितं तं तत्रस्थैर्निजैराश्वस्तमानसम् ।
ररक्ष केवलं प्रीतो जात्यश्वः समराच्चलन् ॥ ६०५ ॥
विहितारित्रप्रसराः सचिवाः सममेकपार्श्वगताः ।
यत्र सुशस्त्रप्रचिता मज्जति नौकेव राजश्रीः ॥ ६०६ ॥
वैदेशिकभटैर्द्रोहे विहिते समरागमे ।
तावत्ते कत्थवाडाद्या निन्युः खानं यथागतम् ॥ ६०७ ॥
खानो राजभटैर्बद्धो रणे मिथ्येति वार्तया ।
स सैफडामरो युद्धात्स्रस्तधैर्यो न्यवर्तत ॥ ६०८ ॥
तत्तद्वराश्वसामग्रीं गृह्णञ्शूरपुराध्वना ।
समरोडुामरः सैफडामरः खानमासदत् ॥ ६०९ ॥
इत्थं तृतीयवारं स प्रविष्टो मण्डलान्तरात् ।
वधं कृत्वा विनिर्गत्य खानः पर्णोत्समागतः ॥ ६१० ॥
अधर्मबहलः कालः सर्वे द्रोहपरायणाः ।
राजा शिशुतरश्चायं स्वतन्त्रं मन्त्रिमण्डलम् ॥ ६११ ॥
अविधेया निजाश्चामी खानपक्षप्रतीक्षिणः ।
पौरा निरनुरागाश्च निष्कोशं नृपमन्दिरम् ॥ ६१२ ॥
सत्ता नाम न वृद्धस्य सर्वसामर्थ्यवर्जिता ।
इति संचिन्तयञ्शस्त्राघातजातव्यथाकुलः ।
मासौ द्वौ गमयामास मार्गेशोपि स्ववेश्मनि ॥ ६१३ ॥
दृष्ट्वा महार्घमणिमौक्तिकविद्रुमौघा-
ग्रत्नाकरं श्रयतु सोपि सुलाभलोभात् ।
यस्तान्महाभयकरान्मकरांस्तदीया-
न्वीर्येण वारयितुमुज्झितभीः समर्थः ॥ ६१४ ॥

अत्रान्तरे पुनः खानश्चटिकासारपर्वतात्।
इतो यातैर्भटैः सार्धं लब्धत्राणः समाययौ॥ ६१५॥
तस्मिन्नभ्यन्तरे प्राप्ते मुदितैरिव पर्वतैः।
तदहःपतितं दध्रे तुषारं सुसिताम्बरम्॥ ६१६॥
ग्रामान्प्रज्वलितान्दृष्ट्वा तद्वार्ताचकितस्ततः।
मार्गेशो वाङ्गिलं त्यक्त्वा सबलो योद्धुमभ्यगात्॥ ६१७॥
तावन्मितपरीवारो बहुरूपान्तराद्भुतः।
प्राप दामोदरोड्डारभूमिं डामरसंयुतः॥ ६१८॥
स नृपो मार्गपः पश्चात्तनवायुरिवोर्जितः।
सैन्यं न्यवेशयत्तत्र सातदैवतसंनिधौ॥ ६१९॥
सव्यूहो जातयुद्धेहो निशान्ते सैफडामरः।
बभञ्ज मार्गपानीकं दामोदर इवोत्थितः॥ ६२०॥
चित्रं हैदरशाहस्य यन्न सिद्धं त्रिधागमैः।
अहो हीनबलस्यापि सिद्धमस्य विधेर्वशात्॥ ६२१॥
किमन्यदल्पसैन्योपि खानः कश्मीरकुञ्जरान्।
हतविद्रुतविध्वस्तयूथान्सिंह इव व्यधात्॥ ६२२॥
प्राग्वत्सोनिष्टमाशङ्क्य मार्गपः सैफडामरात्।
अन्येषां वीक्ष्य तादृस्थ्यं प्रपेदे नगरान्तरम्॥ ६२३॥
छिन्नेषु सेतुबन्धेषु प्राक्सैदद्वैधवत्तदा।
पारावारगताः पौरा द्वैराज्याकुलतां दधुः॥ ६२४॥
पेरोजप्रतिहाराद्याः प्राप्ता मडवराज्यतः।
नृपपक्षं परित्यज्य खानपक्षं समाश्रयन्॥ ६२५॥
स्वभेदजर्जरं ज्ञात्वा सैन्यं द्वित्रा निशोनयन्।
सैदवत्स्कन्दभवने किंकर्तव्यतयाकुलः॥ ६२६॥

एकदा सर्वसैन्येशं कृत्वा मीयामहम्मदः ।
नसराजानकयुतो द्रोहं स्वामिनि तद्व्यधात् ॥ ६२७ ॥
यथा चित्तं तथा कायो यस्य स्यात्साहसक्षमः ।
तस्यात्मनिरपेक्षस्य कर्तव्यं किं न सिध्यति ॥ ६२८ ॥
भोगिनेयं नृपपदेप्युपेक्ष्य स्वार्थलुब्धधीः ।
द्रोग्धाभूद्यत्स तेनाभूत्सर्वनाशस्य कारणम् ॥ ६२९ ॥
नष्टसैन्यः सदैन्योथ मार्गेशः शरणं भयात् ।
ज्यल्लालठक्कुरं प्रायात्पूर्वाश्रमस्थितं हितम् ॥ ६३० ॥
यथैव स विरुद्धानामकरोच्छसनादिकम् ।
तादृशीं स दशां प्रापद्धिक्चला राजसंपदः ॥ ६३१ ॥
सप्तग्रहानुगुणधारितसप्तवार-
वर्णांशुकोपचितवेशविशेषभूषः ।
बह्वामभूप इव योभवदष्टभोगः
प्राप्तो दशामितरवत्स धिगस्तु लक्ष्मीम् ॥ ६३२ ॥
क्व नृपः क्व मदीयं तत्सर्वस्वं क्व परिच्छदः ।
नास्मरत्तद्दिने किंचित्प्राप्तो मुनिगुहान्तरम् ॥ ६३३ ॥
राजदारापहारोत्थपापभारादिवार्दितः ।
तद्भाता नाशकद्धन्तुं नावं स्त्रीसहितोविशत् ॥ ६३४ ॥
अन्ये सैन्याः सदैन्या गिरिबिलविगलद्वासरा धूसराभाः
संतिष्ठद्दिष्टरिष्टोद्धतघनविलसद्धृष्टिनिर्नष्टचित्ताः ।
द्विष्टैर्दुष्टैर्गरिष्ठैः परिहृतवसनाः पृष्ठलग्नैर्निकृष्टाः
कारागारान्तराले पशव इव बलात्ते निरुद्धा विरुद्धाः॥६३५॥
गर्जन्तो मुमुषुः परे जनपदान्दुष्टाः खशा दस्यव-
स्तद्भीत्या परिहृत्य सर्वमचलन्नग्ना नरा वा स्त्रियः ।

मार्गेष्वप्यबला हता बहुबलैः पूर्वापकारस्मृतेः
सोभूद्राज्यविपर्ययोतिभयदः कल्पान्तकालोपमः ॥ ६३६ ॥
सर्वस्वोलुण्ठने तस्मिन्धनिनां दुःसहे पुरे।
आसन्दरिद्रा अत्याढ्या आढ्या दारिद्र्यभागिनः ॥ ६३७ ॥
ये स्युर्द्रुमाः सदलपुष्पफलाभिरामा
नद्यस्तरङ्गतरलाः सरवाः पिकाद्याः।
ते शीर्णशुष्कजलमूकमुखा हिमर्तौ
किं तन्न यद्भवति कालविपर्ययेण ॥ ६३८ ॥
ते राजवल्लभा रम्यास्ताः स्त्रियस्ते च सेवकाः।
कथावशेषतां यातास्तस्मिन्नष्टदले नृपे ॥ ६३९ ॥
इत्थं वर्षद्वयं सप्त मासान्भूत्वा नृपासने।
नृपो द्वाषष्टिवर्षे स ह्याश्विने भ्रंशमाप्तवान् ॥ ६४० ॥
राजा मह्मदशाहः स विंशप्रस्थान्तरात्ततः।
आनीय फिर्यपालेन शत्रुपक्षे समर्पितः ॥ ६४१ ॥
राजधान्यङ्गने राजवासे तं मनुजैः सह।
विधाय वृत्तिं संपूर्णां ररक्षुर्डामराधिपाः ॥ ६४२ ॥
राज्यप्राप्त्या सुखं तादृक्तस्य नासीत्सुदुःस्थितेः।
यादृक्तद्भ्रंशतस्तस्य नृपमन्त्रिप्रसादतः ॥ ६४३ ॥
सैदद्वैधवधे लुण्ठिः पुरेभूत्त्रिगुणा ततः।
खशैः कृता दाहवर्जे तस्मिन्राजविपर्यये ॥ ६४४ ॥
प्रधानवणिजः केचित्कोटिसंचयवञ्चिताः।
तृणमात्रावृतैरङ्गैस्तस्थुस्ते रक्षितासवः ॥ ६४५ ॥
दिनत्रयं ददामो वो मोषणं यदि जायते।
इति वैदेशिकोत्कोचसापेक्षा मन्त्रिणोभवन् ॥ ६४६ ॥

काश्मीरिका यथा लुण्ठि बहिर्यात्रागता व्यधुः।
तथा वैदेशिकाश्चक्रुः काले किं किं न दृश्यते ॥ ६४७ ॥

प्रतिपदभ्रमणैः सपरिश्रमा
मधुकरी तनुते मधुगोकुलम्।
निहितधूमतया विनिवार्य तां
तमुपलभ्य परः सुखमश्नुते ॥ ६४८ ॥

कष्टैः षण्मासपर्यन्तं महद्भिःसंचितं गृहे।
अयत्नमपरैर्भुक्तं सर्वं तत्खानसंश्रितैः ॥ ६४९ ॥

रक्ताक्ततृणपूगान्तः क्षिप्तं कैरपि यद्धनम्।
न नीतमशुचिस्थानसूतिकास्तरणभ्रमात् ॥ ६५० ॥

सद्युन्ननिम्नकुम्भाम्भःपक्षिपुष्करिणीकृतैः।
रक्षितं कैरपि द्रव्यं नतिं ताडितदर्शनात् ॥ ६५१ ॥

सत्यं ब्रवीमि धनिकाः शृणुतास्मदुक्तं
यत्संचितं वसु गृहे परवञ्चनाद्यैः।
तद्भोगदानसफलं कुरुताविलम्बं
नो चेद्वृथा स्मरत राज्यविपर्ययेस्मिन् ॥ ६५२ ॥

भग्नभाण्डकरण्डालीः प्रसार्य परितो गृहे।
मुषिताः स्म इति व्याजात्खशाः कैरपि वञ्चिताः ॥ ६५३ ॥

जलान्तरशवागाराञ्शून्यानापूर्य वस्तुभिः।
ररक्षुर्नागराः केपि शून्यीकृतगृहा धनम् ॥ ६५४ ॥

तैर्निवर्तितगर्तान्तःक्षिप्तैः पौरधनैर्घनैः।
तस्मिन्काले प्रतिपदं सत्यार्थाभूद्वसुंधरा ॥ ६५५ ॥

मार्गरोधोद्यतैः सर्वैः क्षेपणीयाश्मवर्षिभिः।
राजानवाटकीयैस्तैस्तत्कालं साहसं कृतम् ॥ ६५६ ॥

कर्मस्थाननिधानसर्पसदृशप्रोत्सारणाडिण्डिमो
द्विष्टप्राक्तनसेवकाम्बुजघटाहेमन्तकालोदयः।
भूपक्ष्मामधुगोलकस्थसरघासंघातधूमोद्गमः
सोभूद्राज्यविपर्ययो नवसभोद्यानद्रुमालीमधुः॥ ६५७॥
किं स्वाचारविपर्ययात्किमु धनस्यान्यायतोपार्जना-
त्किं वा द्रोहितया सतां किमथ वा सद्वर्णसांकर्यतः।
निःसामर्थ्यतया यथा शिशुविभोर्द्वेषेण वा मन्त्रिणां
राज्ये सुस्सलभूपतेरिव बभूवायं प्रजोपद्रवः॥ ६५८॥
येनादौ सैदवैरे रणरसिकतया मोचिता बन्धनस्थाः
सिद्धादेशाधिकारो व्यधित जितरिपुः स्फूर्जितं च प्रयातः।
प्राज्यं राज्यं व्यधाद्यः फतिहनरपतेर्नाशयित्वारिचक्रं
जीयाच्छ्रीडामरेन्द्रो वरसचिवपतिः सैफमल्लेक एकः॥६५९॥

इति श्रीजैनराजतरङ्गिण्यां पण्डितश्रीवरविरचितायां
फतिहशाहराज्यप्राप्तिर्नाम चतुर्थस्तरङ्गः
समाप्तेयं श्रीवरराजतरङ्गिणी॥

अथ

प्राज्यभट्टकृता

चतुर्थी राजतरङ्गिणी ।

नमश्चराचराकारधारिणे चन्द्रमौलये ।
शिवाय स्वच्छस्वच्छन्दपरमात्मस्वरूपिणे ॥ १ ॥

विलोक्य मिश्रं शिवयोः स्वरूपं
सर्पाधिराजो मिलितोतिभक्त्या ।
गौर्या भुजावर्तनकङ्कणेन
यत्रावताद्वो गिरिजाशिवार्धः ॥ २ ॥

विरतं मोहान्धतमो यदनुग्रहरोचिषा शुकस्यापि ।
वन्दे तं गुरुतरणिं बुद्ध्याश्रयहृत्सरोजदीप्तिकरम् ॥ ३ ॥

वन्द्यं तर्कवितर्ककौशलमतेर्वाक्यं प्रमाणान्वितं
यत्कान्त्या नृपकीर्तिवस्तुरचना देदीप्यते सर्वतः ।
श्लोकैः सत्पदशोभनैरविरलानुप्रासयुक्तैः शुभै-
र्नानार्थानुगतैर्मतैः सुकविनां लालित्यभावान्वितैः ॥ ४ ॥

श्रीकह्लणद्विजप्रोक्तश्रीमद्राजतरङ्गिणीम् ।
आलोक्योद्यमिताभ्यां स्वं वपुः कर्तुमखण्डितम् ॥ ५ ॥

श्रीजोनराजविबुधश्रीवराभ्यां मनोरमम् ।
कृतं द्वाषष्ठिवर्षान्तं ग्रन्थं राजावलिह्वयम् ॥ ६ ॥
गङ्गाभगवतीतीर्थस्नाने धन्यः सुभूषितः ।
कविः श्रीप्राज्यभट्टाख्यः समग्रगुणभूषितः ॥ ७ ॥
राजावलिपताकां स्वां राज्ये फतिहभूपतेः ।
एकोननवतिं यावद्व्यक्तीचक्रे ततः परम् ॥ ८ ॥
अथ देशादिदोषेण दुष्टलुब्धकभीतितः ।
नाग्रहीद्राजवृत्तान्तशैवालं मानसे कविः ॥ ९ ॥
तदाप्रभृति तद्वृत्तवर्णनं क्रियते मया ।
बुद्ध्याश्रयात्मजेनात्र शुकाख्येनात्मचापलात् ॥ १० ॥
पूर्वेषां राजसंमान्यं निशम्य पृथुसंपदाम् ।
तद्धारशान्तये वाहं न कुर्वे कविवाञ्छया ॥ ११ ॥
क्व पूर्वकविवक्तृत्वं केदं मन्दधियो मम ।
वर्णमात्रेण रीत्यंशः स्वर्णखण्डायते कथम् ॥ १२ ॥
राजोदन्तमरुं सन्तः श्रुत्वा योजनपूर्वकम् ।
अनुगृह्णन्तु मद्वाक्यसुधावृष्टिनिबर्हणैः ॥ १३ ॥
कश्मीरेषु महाराजजैनशाहकुलाङ्कुरः ।
फताहशाहभूपालः प्रशासन्नभवन्महीम् ॥ १४ ॥
तस्मिञ्शासति तत्क्षोणीं प्रजाः सर्वसुखावहाः ।
आसन्स्वधर्मनिरता दयादाक्षिण्यभूषिताः ॥ १५ ॥
स्त्रीद्यूतमद्यव्यसनेष्वसक्तः सचिवाग्रणीः ।
मूसराजानकश्चन्द्रान्वयोभूत्तस्य भूपतेः ॥ १६ ॥
आसुरोपलवरोर्जितश्रियामन्ववायप्रभवोस्य मन्त्रिराट् ।
धार्मिकोध्वपतिरिव्रहीमकः सन्मतिः शुभरतिः परोभवत्॥१७॥

प्रतीहारपतिर्हाजीमीयोमेयो गुणैस्तदा।
तृतीयः सचिवो दैवात्कालधर्ममुपागतः॥ १८॥
सामान्येन महीभर्त्रा पुत्रो मल्लेकजङ्गिरः।
पैत्रिकैर्ग्रामराष्ट्रैर्धर्मानेनास्य नियोजितः॥ १९॥
नयज्ञः सर्वविद्दीर्घदर्शी बन्धुः सहानुजः।
मूसचन्द्रस्य राजानश्चङ्गारोभूत्सदाप्रियः॥ २०॥
वृष्टिकालः सुहृत्क्षेत्रे सदा कालश्च वैरिणाम्।
वैकर्तनोर्थिनामास्ते मल्लेकालोस्य सत्सुतः॥ २१॥
न्यूनाधिकतुलादण्डवृत्तिरध्वेशमार्गगः।
समोभूत्पूर्णरावुत्रो मूसचन्द्राध्वपेशयोः॥ २२॥
ब्राह्मणाः स्वक्रियाचारहीनाश्चासंस्तदा ध्रुवम्।
यदेषां मूसचन्द्रोभूक्रियालोपप्रवर्तकः॥ २३॥
सर्वविज्ञानविन्मीरशेष इराकदेशजः।
शाह्वासिमस्य च्छात्रोस्य ह्युपदेशं विना गुरुः॥ २४॥
मूसचन्द्रस्तदादेशाद्धृत्वा देवालयास्थितान्।
भूमिं द्विजेभ्यो नीत्वा तद्भृत्यांस्तृप्तान्व्यधात्तया॥ २५॥
सुफाख्यैर्मीरशेषस्य च्छिन्ना इन्धनवाञ्छया।
बोधखान इति व्याजादत्युच्चास्तरवोनुगैः॥ २६॥
सन्निधानं तदात्याजि दैवतैः प्रतिमासु हि।
कथं विधत्ते मनुजस्तत्स्थानेषु विलुण्ठनम्॥ २७॥
दुराचारोथ साचारो भट्टो भुट्टो नटो विटः।
इत्येवमासीत्तत्काले सभासाम्यं कलेर्बलात्॥ २८॥
मूसचन्द्रात्मजस्याथ दानमानौ च गौरवम्।
असहिष्णुभिरध्वेशपुत्रैरब्दालकादिभिः॥ २९॥

विभेद्य होसराजानं प्रतीहारादिचक्रिणः ।
अवधूय स्वजनकं यौनसंबन्धयन्त्रितम् ॥ ३० ॥
श्रीजैनोल्लाबदीनस्य पुण्यराशिरिवोच्छ्रितः ।
मज्जितः श्रीवितस्तान्तश्चिरकालमभूत्तु यः ॥ ३१ ॥
राजानमूसचन्द्रेण प्लावितो निर्मलैर्धनैः ।
श्रीजैनकदलः सेतुः पारावारप्रतारणे ॥ ३२ ॥
बलाढ्यमठमल्लेकपुरान्तरसमाश्रयैः ।
प्लोषितो वेश्मभिः साकं रात्रौ वैरिजिगीषया ॥ ३३ ॥
दग्धारण्यनिभे जाते नगरे कदले तथा ।
नावशिष्टं विटैर्लुण्ठ्या स्नानवासो जनस्य च ॥ ३४ ॥
स संवृत्तः क्षीणकलो मूसचन्द्रस्तदूष्मणा ।
स्वसैन्यसंग्रहं कृत्वा निविष्टो जालद्रागडे ॥ ३५ ॥
शतैकीयोवसत्कोपि ब्राह्मणो ब्रह्मवर्चसा ।
युक्तो येनाभवत्तस्य राजानस्यारिनिग्रहः ॥ ३६ ॥
प्रतापाग्नेर्नरेशस्य पुरस्य दहनार्चिषः ।
राजानमूसचन्द्रेण स्ववपुः श्रीफलायितम् ॥ ३७ ॥
राज्ञा दत्ते बहिर्गन्तुं धर्मद्वारे दिनैः पथि ।
विप्रशापाख्यस्वर्भानुर्मूसचन्द्रमथागिलत् ॥ ३८ ॥
मलेकालादयः पुत्रा विद्रुताः समराद्धयात् ।
विधाय मूसचन्द्रस्यान्त्यक्रियां नृपशासनात् ॥ ३९ ॥
मार्गेशब्राहिमो मन्त्री स्वान्परान्समतोषयत् ।
सिद्धादेशं महातन्त्रं ज्येष्ठपुत्राय मार्गपः ।
मल्लेकपेरुजायादान्मल्लेकाब्दालकाय च ॥ ४० ॥
शस्त्राधिकारं दत्त्वाथ विभज्यान्यप्रमेयकान् ।
मल्लेकलुहरादिभ्यः स्वात्मजेभ्यो ददौ महान् ॥ ४१ ॥

होसराजानजाङ्गेरप्रतीहारौ तु चक्रिणः।
बाह्यानीतान्डामरांश्च राष्ट्रेशान्विदधेध्वपः ॥ ४२ ॥

मृते प्रशान्ते सचिवे चेरुरुत्पिञ्जटास्ततः।
कर्णगोचरदुर्दण्डाः शिङ्गभर्तृव्यदायिनः ॥ ४३ ॥

यमेवाश्रयते रज्जुं नदीं तर्तुमहो नरः।
छिनत्त्यकस्मात्तस्मै तां विधिर्विधुरतां गतः ॥ ४४ ॥

मूसचन्द्रवधायैते बाह्यानीता हि डामराः।
मार्गेशेनास्य तैः सर्वैर्द्रोह्नोकारि नृपाज्ञया ॥ ४५ ॥

नौसेतुच्छेदं कृत्वा ते प्रतीहारादिडामराः।
नाशयित्वा मार्गपतिं विदेशमनयंस्ततः ॥ ४६ ॥

डामरा उत्समल्लेकदौलताद्या नृपास्पदे।
अभजन्मन्त्रिपदवीं षट्पदा इव माधवीम् ॥ ४७ ॥

आस्थाने डामरेन्द्रेषु सम्यङ्निर्णयकारिषु।
बलिनो दुर्बला आसन्नबला बलवत्तराः ॥ ४८ ॥

सुवृत्तं डामरेन्द्रीये शिङ्गानां प्रत्यभान्न तत्।
तामिस्रासक्तधूकानां सत्प्रकाश इवावनौ ॥ ४९ ॥

नृपान्तरङ्गाः कारायां क्षिप्तास्तैर्डामरैर्निशि।
अलिमीरादयो द्रोहकर्त्तारः स्वभयादमी ॥ ५० ॥

जहाङ्गीरप्रतीहारहोसराजानकादयः।
दुद्रुहुरवमानात्ते दिनैस्तान्डामरान्प्रति ॥ ५१ ॥

आस्थानासीनयोर्गाजखानमल्लेकदत्तयोः।
शस्त्रया गदायमीराख्यो जघानोरोद्वयोर्द्रुतम् ॥ ५२ ॥

श्रुत्वा तदुत्समल्लेको राजाग्रादगमद्बहिः।
चिरं युद्ध्वारिभी राज्ञा नीतः स्वान्तिकमादरात् ॥ ५३ ॥

तद्वधाद्राजधान्यन्तर्हाहाकारो महानभूत् ।
उदभूत्पौरलोकास्तु नृपतेश्चायशस्तदा ॥ ५४ ॥

डामरो होसमल्लेकः सुय्यभोगान्तरादथ ।
श्रुत्वा ज्ञातिवधं धैर्यान्न चचाल महाभटः ॥ ५५ ॥

प्रयुध्य वैरिभिः सोथ डामरस्तत्र संगरे ।
वीरः स्वःसुन्दरीयोगं समरे डामरोगमत् ॥ ५६ ॥

शाहावदीनकुलजः खान इब्राहिमस्ततः ॥
जहाङ्गीरप्रतीहारज्ञातीयः कुशलो महान् ॥ ५७ ॥

विभागीकृत्य राष्ट्राणि यथार्हं पञ्चषैर्दिनैः ।
प्रददौ होसराजानमुख्यानां नृपतेः पुरः ॥ ५८ ॥

आशङ्क्य नृपतेः पार्श्वस्थं तमुत्सवमल्लिकम् ।
अकरोद्बन्धनं नीत्वा दुर्गमे तु खशालये ॥ ५९ ॥

विभवं मासमात्रं ते गन्धर्वनगरोपमम् ।
विधाय द्वेषाद्ध्वेशभीत्या चेलुरिवाधमाः ॥ ६० ॥

वृत्तान्तमुत्समल्लेकदुग्धभ्राता विश्रुत्य तत् ।
रावुत्रदेवको गत्वा खशालयमवेष्टयत् ॥ ६१ ॥

खशैर्गङ्गामठोपान्ताद्धीतैरुत्सवमल्लिके ।
विमुक्ते ह्युदभूत्कोपि हर्षोन्योन्याश्रयात्तयोः ॥ ६२ ॥

अथाध्यश्रयतां तौ द्वौ नृपकल्पतरुं दृढम् ।
विपत्तीव्रातपक्लिष्टौ मार्गेशागमनोत्सुकौ ॥ ६३ ॥

एकोननवतौ शुक्लाषाढादाश्वयुजावधि ।
वधादिवृत्तं राजानडामराणामभूदिदम् ॥ ६४ ॥

शरत्काले बहिस्तीर्त्वा मार्गेशः पुनराययौ ।
विभागीकृत्य कश्मीरान्सर्वेषां दत्तवानसौ ॥ ६५ ॥

राजाधिकारान्संस्थाप्य स्वात्मजेभ्योभवद्भीः।
योगीव कतिचित्कालं स्वदेशे विगतज्वरः॥ ६६॥

उत्समल्लेकराजानश्शृङ्गारौ निरदाहयत्।
गृहानब्दालमीरस्य नावतेब्दे जिगीषया॥ ६७॥

निरोधं वेश्मदाहादि श्रुत्वा पुत्रस्य मार्गपः।
भाङ्गिलात्क्षुण्णमार्गेण हिन्दुवाटं समागमत्॥ ६८॥

तस्मिन्दिगन्तरं याते मल्लेकाब्दालकोरिभिः।
बन्धनाय निनायोग्रैर्दुर्गं लब्धखशालयम्॥ ६९॥

उत्समल्लेकराजानशृङ्गारौ नृपसंयुतौ।
यातौ विभक्तुं कश्मीरोत्पत्तिं वाराहमूलकम्॥ ७०॥

तत्र राजाज्ञयानीतैः सिद्धादेशाधिकारिभिः।
देशोत्पत्तिविभागज्ञैस्तज्ज्ञैर्लेखककर्मभिः॥ ७१॥

कायस्थैर्बुधकाश्वीशसंख्येशजुगकादिभिः।
भागत्रयं विधायोर्व्या राष्ट्रदेशेषु सर्वतः॥ ७२॥

भागः फताहशाहस्य मल्लेकोत्सस्य चापरः।
तृतीयोंशश्च राजानशृङ्गारस्येत्यलिख्यत॥ ७३॥

विभज्य भुक्ता देशेत्र देशोत्पत्तिः पुरा त्रिभिः।
हुष्कजुष्ककनिष्काख्यैस्तथैवैतैर्महात्मभिः॥ ७४॥

ततो नगरमारुह्य राजराजानडामराः।
नात्यजन्हृदयाद्वैरं गूढं नकुलसर्पवत्॥ ७५॥

मुख्यं मन्त्रिपदमुत्समल्लेकस्य ददौ नृपः।
सिद्धादेशं च राजानश्शृङ्गारस्य महत्पदम्॥ ७६॥

आस्थान उत्समल्लेके स्थिते निर्णयकारिणि।
शृगालैडिकसंयोगः श्रुतोभूल्लक्षितस्तदा॥ ७७॥

कीर्तितोर्णालडिङ्गचर्थवादिनोः प्राप्तयोर्द्वयोः ।
प्रादात्स उत्तरं द्रष्टुं स्वाभिज्ञामावृताश्रयाम् ॥ ७८ ॥
तदा ह्याहितसद्वेषः सुवेशो मन्त्रिणां वरः ।
मसूदशाहिसहित इब्राह्मोध्वेश आययौ ॥ ७९ ॥
वाराहमूलं संप्राप्ते तत्सैन्ये राजसैनिकैः ।
उत्समल्लेकमुख्यास्ते योद्धुं सुय्यपुरेविशन् ॥ ८० ॥
पारावारस्थितं सैन्यद्वयं वीक्ष्य नराधिपः ।
फताहशाहो मन्त्रीशमुत्समल्लेकमब्रवीत् ॥ ८१ ॥
मन्त्रिन्नध्वाधिपेनेयं परिणीतेव भामिनी ।
अस्मान्कापुरुषाञ्ज्ञात्वा राज्यलक्ष्मीर्हृतामुना ।
श्रुत्वा तदुत्समल्लेको नृपमूचे महीपते ॥ ८२ ॥
एकाकिनमबन्धुं मां दृष्ट्वा किं न करोत्ययम् ।
कदाचिद्दृश्यते चिन्तामणिः खकुसुमादि च ॥ ८३ ॥
राजप्रतापदग्धा हि नोत्पद्यन्ते नरर्षभाः ।
उत्तिष्ठ राजन्युध्यस्व दैवाधीना विभूतयः ॥ ८४ ॥
श्रुत्वैवं मन्त्रिणो वाक्यं योद्धुं नृपबलं ययौ ।
अध्वेशो भवतुङ्गं तत्पथा याते ससैनिके ॥ ८५ ॥
सबल उत्समल्लेकः कोशनोत्सो न्यविक्षत ।
मध्ये भूत्वा गिरिं तत्र स्थितात्सैन्यद्वयाद्भटाः ॥ ८६ ॥
एत्यान्योन्यं शरासारं पारावारादथाक्षिपन् ।
प्रयुध्य वैरिभिस्तत्र मार्गेशात्मजशिर्यकः ॥ ८७ ॥
स्वप्राणैः पद्मनागस्य प्रादाद्बलिं महत्तरम् ।
हते तस्मिन्रणे तत्र शिर्यमार्गपतावतः ॥ ८८ ॥
बन्धुत्वादुत्समल्लेको जेता शिथिलतां ययौ ।
शैथिल्यमस्य दृष्ट्वा ते वीरा मार्गेशसैनिकाः ॥ ८९ ॥

खूयाश्रमाध्वना यातस्यानुसस्तुर्महौजसः।
फताहशाहो राजानश्चङ्गारान्वित एव तत् ॥ ९० ॥
श्रुत्वा सुय्यपुराद्धिन्दुवाटं शूरपुराद्ययौ।
अनुयातैरथाध्वेशसैनिकैरुत्समल्लिकः ॥ ९१ ॥
अरोधि न्योवाग्रामान्ते केशरीव गुहामुखात्।
नवाब्दान्पालयित्वा क्ष्मां याते फताहभूमिपे ॥ ९२ ॥
मह्मदशाहः संप्रापद्राज्यं मार्गेशसंश्रयः।
मार्गेशप्रीत्या नृपतिर्महान्तं स्वाततायिनम् ॥ ९३ ॥
सेहएस्कन्दरं खानं यौवराज्यपदोर्जितम्।
महामार्गपतिर्भूयो राजलक्ष्मीविराजितान् ॥ ९४ ॥
स्वपुत्रानकरोत्कारागृहे शत्रुनिधानतः।
दत्तकन्योप्ययं जन्य इव मां घातयेत्कथम् ॥ ९५ ॥
निश्चिन्त उत्समल्लेको यावदास्ते स्म बन्धने।
मार्गेशपुत्रो बलिनं सद्वेषस्तं कुकर्मणा ॥ ९६ ॥
अयःशृङ्खलबद्धाङ्घ्रिमवधीत्पञ्चषैर्दिनैः।
युद्धं भट्टार्जुनस्याजौ कारायाः शेषचक्रिणः।
बद्धस्य तादृग्वीरस्य तस्याभूच्छस्त्रिभिः परैः ॥ ९७ ॥
बलिना कलिराहुणा नृचन्द्रे
ग्लपिते कोप्युदभूद्बलान्धकारः।
जनताप्यनिशं भृशं रुरोद
कलयन्ती पितरीव पक्षपातम् ॥ ९८ ॥
विरते चोत्समल्लेके लोके रात्रिञ्चराः खलाः।
विचेरुरन्धतमसा विस्फुरद्दीर्घदृग्भयः ॥ ९९ ॥
भोग्यांशो द्विगुणो जातो ग्राम्याणां तत्र वत्सरे।
विज्ञप्तिश्रवणे मूका बधिरा मन्त्रिणोभवन् ॥ १०० ॥

नवमासान्नवाहानि राज्यं कृत्वा महम्मदे ।
बहिर्याते कृतोत्साहः शाहः फतिह आययौ ॥ १०१ ॥

प्रतीहारजहाङ्गीरस्यादान्मन्त्रिपदं नृपः ।
सिद्धादेशं च राजानशृङ्गारस्य महत्पदम् ॥ १०२ ॥

स्वयंभूहुतभुग्दीप्तमहसः शौर्यशालिनः ।
काचचक्रस्य शस्त्राधिकारं राजा स्वयं ददौ ॥ १०३ ॥

नूनं नाकेशचक्रेशावतारः काचमल्लिकः ।
आजीवमभवद्यस्य राजश्रीललितं वपुः ॥ १०४ ॥

श्रीमद्धोसनचक्रस्य क्रमराज्याजिजन्मनः ।
प्रोद्भूतः काञ्चनो वीरो रामो दशरथादिव ॥ १०५ ॥

प्रजापुण्योदयाद्राज्ञो धार्मिका धीरजायत ।
अथवात्यल्पकालोस्य राज्यस्याज्ञायि भूभुजा ॥ १०६ ॥

तथा हि प्रेष्यवद्गुह्यव्यापाराधिपतां नृपः ।
अकरोत्ताम्रपट्टान्तर्गणनाक्षेपवारणम् ॥ १०७ ॥

मृतहिन्दुकजन्तूनामस्थीन्यादाय भूमिपः ।
गङ्गां यातुं समादिक्षन्म्लेच्छोपद्रवशान्तये ॥ १०८ ॥

क्षिप्त्वास्थीन्यत्र स्वर्णद्यां प्रत्यायाता जनाः पथि ।
अकस्माद्धातवृष्ट्या तेयुतसंख्या विपेदिरे ॥ १०९ ॥

चिरेण गङ्गया भुक्तान्यस्थीनीति क्षुधार्तया ।
मन्येस्थिप्राप्तलोकोपि निगीर्णो ह्यनया ध्रुवम् ॥ ११० ॥

आयुःशेषं समाश्रित्य पादत्राणसमाश्रयाः ।
मृता गृहेषु ये प्राप्ताः केचिन्नियतियोगतः ॥ १११ ॥

अस्मिन्नेकनवत्यब्दे शरत्कालेथ मार्गपः ।
मह्मूदशाहिसहितो बाङ्गिलात्पुनरायययौ ॥ ११२ ॥

ससैन्यो बाङ्गिले ग्रामे निविष्टोभून्महीभुजः।
फताहशाहः प्रबलं बलं युद्धाय निर्ययौ ॥ ११३ ॥
प्रयुध्य वैरिभिर्गाढं धार्मिकोध्वेशनायकः।
गतः स्वःकामिनीयोगं सात्मजोत्र रणाजिरे ॥ ११४ ॥
कलौ धर्मस्य पादैको वर्ततेस्मिन्भुवस्तले।
महामसूदस्तम्भैः स चतुष्पाद्येन योजितः ॥ ११५ ॥
नूनं कर्कोटनागेन निगीर्णो मार्गपः क्रुधा।
प्रत्यब्दं तद्गिरिस्थानाद्गमागमचिकीर्षया ॥ ११६ ॥
अन्येप्यब्दालमल्लेकलुहराद्या हि तत्सुताः।
गता दिगन्तरं भूभृद्युक्ता व्यर्थमनोरथाः ॥ ११७ ॥
वितस्तिः पूर्यते जीर्णवस्त्रे हस्तो विशीर्यते।
इत्येवमादिका दोषा जायन्ते पापिनां विशाम् ॥ ११८ ॥
सम्यगन्तकनारीव व्याध्युपद्रवकारिणी।
उदभूत्सर्वतो मारी जनताक्षयकारिणी ॥ ११९ ॥
मृतानां नाभवत्संख्या ग्रामेषु नगरेषु वा।
अन्त्यकर्पटवासोपि येषामास्ते स्म दुर्लभम् ॥ १२० ॥
बान्धवा नैव चक्रन्दुः प्रलापस्य कथैव का।
प्राणरक्षापराः केचिदायुःशेषेण रक्षिताः ॥ १२१ ॥
जजृम्भे शमिते मारीदोषे देशेथ दैवतः।
वार्त्ता मह्मदशाहस्य कश्मीरागमनं प्रति ॥ १२२ ॥
गत्वा मह्मदशाहः स नौशाहारात्सलोहरात्।
इस्कन्दराद्गजपतेः स प्राप्य महतीं चमूम् ॥ १२३ ॥
प्रत्यायातोध्वपसुतैः सहितो राज्यवाञ्छया।
प्राप्तो राजपुरीदेशमिति दूतान्नृपोश्रृणोत् ॥ १२४ ॥

त्रस्ता दुर्वार्त्तयाप्यासन्पूर्ववैरा महीभुजः ।
समस्ता मन्त्रिणः शाहमह्मदागमनेप्सवः ॥ १२५ ॥

काचचक्रेशराजानशृङ्गारौ स्वबलैर्वृतौ ॥
गतौ प्रतीक्षितुं शूरपुरं नवनृपस्य तौ ॥ १२६ ॥

विधुरे हि विधौ भृत्य आलीमीरोस्य भूपतेः ।
श्रीमत्फताहशाहस्य शत्रुपक्षमथाश्रयत् ॥ १२७ ॥

वैदेशिको निःशरणः शाहिभङ्गीय इत्यसौ ।
पुत्रवद्वर्द्धितो राज्ञा ग्रामहेमाद्यनुग्रहैः ॥ १२८ ॥

प्रतीहारजहाङ्गीरमन्त्रिणैकेन संश्रितः ।
श्रीमान्फताहशाहः स पुराद्योद्धुं विनिर्ययौ ॥ १२९ ॥

त्रोषाणकं फतिहशाहबले निविष्टे
गूढेक्षणैः प्रतिभटैर्विदितारिवृत्ताः ।
एत्यारिमध्यमथ शूरपुराद्युयुत्सु-
कामाः प्रवीरशयनान्यधिजग्मुरत्र ॥ १३० ॥

फताहशाहो वीक्ष्यैतद्युद्धमश्वादथापतत् ।
मन्त्रिभिः प्राक्तनस्नेहात्प्रभुत्वादपि रक्षितः ॥ १३१ ॥

एवं समासं वर्षैकं भुक्त्वा भूमिं स भूमिपः ।
वर्षे द्वानवते मास इषे राज्यादथापतत् ॥ १३२ ॥

ततः फतिहशाहः स निरस्तो बाह्यमण्डलम् ।
मन्त्रिभिश्चटिकासारीगिरिमुल्लङ्घ्य लोहरम् ॥ १३३ ॥

श्रीमान्महामदोत्साहः शाहो महम्मदः पुनः ।
समं गजपतेः सैन्यैः कश्मीरानविशज्जयी ॥ १३४ ॥

गजेशदत्तमत्तेभा व्यधुः सेनाजनस्य ते ।
जङ्गमाद्रिभ्रमं मार्गे कालीधाराधिरोहणे ॥ १३५ ॥

वाजिनां हेषया हस्तिकर्णतालैश्च धुंकृतैः।
पटहैर्जयशब्दोभूद्विगुणो नृपतेर्विशाम् ॥ १३६ ॥

बद्ध्वा राजानश्रृङ्गारमब्दालं मार्गपं बहिः।
कर्त्तुं मन्त्रिपदे राज्ञश्चिन्ता काप्युदभूद्धृदि ॥ १३७ ॥

नृपादेशान्महामन्त्रिपदं चक्रेशकाञ्चनः।
आलिमीराद्यनुज्ञातोप्यगृहीत्स महाबलः ॥ १३८ ॥

स्वामात्यान्देशरक्षायै स्थापयित्वा गते भुवम्।
विभज्याटविकं लोकं प्रतिमुक्ते बहिर्नृपे ॥ १३९ ॥

नाग्रामकोटं लुहराध्वेशराजाननोस्सकौ।
प्रविष्टौ सैन्यसंनद्धौ शत्रुकार्यचिकीर्षया ॥ १४० ॥

हिमार्तोराजको देशोपरिज्ञाताश्च मन्त्रिणः।
देशो दुर्वार्त्तयाशेषश्चकम्पेन्वहमित्यतः ॥ १४१ ॥

चक्रेशो विह्वलस्तूर्णं वीरं मल्लेकजाङ्गिरम्।
साहायकार्थमानिन्ये राष्ट्रघोषैः कृतार्हणम् ॥ १४२ ॥

मासमात्रमुषित्वात्र कोटे ते वैरिणां क्रुधा।
प्रभाते नगरं वीरा ययुर्युद्धचिकीर्षया ॥ १४३ ॥

निर्याते काचचक्रेशसैन्ये रिपुबलं प्रति।
परस्परमभूद्युद्धं वीराणां जालद्रागडे ॥ १४४ ॥

युद्ध्वा लुहरमार्गेशे याते राजाननोस्सकः।
हुत्वा रणाग्नौ स्वप्राणानाश्लिक्षन्नाकयोषितः ॥ १४५ ॥

छित्त्वा तत्राङ्गुलीः काचचक्रेशस्यारयोथ ते।
नाजोकमार्गपत्याद्याः प्रययुः शलभायिताम् ॥ १४६ ॥

प्रवीरो देवरावुत्रश्चलितः समराङ्गणात्।
हतो मारीनदीतीरे चक्रसैन्यैर्निरायुधः ॥ १४७ ॥

तादृशात्समरान्मुक्तः काचचक्रोखिलैर्जनैः ।
देशरक्षाकरोज्ञायि राधेयार्जुनसन्निभः ॥ १४८ ॥
सचिवः काञ्चनश्चक्रः प्रवीरः काञ्चनश्रियम् ।
अङ्गुल्या सह संप्राप च्छिन्नया तत्र संयुगे ॥ १४९ ॥
संतोष्य नृपतिर्दानमानाद्यै राजमण्डलम् ।
प्रतिमुच्यागतोकार्षीत्सौराज्यं राज्यमण्डले ॥ १५० ॥
वर्षेण साहिमल्लेकलट्टभट्टादयोखिलाः ।
चक्रेशमन्त्रिणा कारागारक्षिप्ता महौजसः ॥ १५१ ॥
अङ्गुलीसूत्रनिर्देशं स्थापिते भूपतौ ततः ।
चतुर्नवतिवर्षे तु श्रावणे काचचक्रपः ॥ १५२ ॥
मल्लिकजाङ्गिरप्रीत्या खानमिब्राहिमं व्यधात् ।
सिद्धादेशाधिकारेस्य सुजनं धीमतां वरम् ॥ १५३ ॥
क्रियालताया मूलानि पूर्वं शिर्यद्विजन्मना ।
रोपितानि च कालेन सिक्तान्यमृतवारिणा ॥ १५४ ॥
श्रीमन्निर्मलकण्ठेन वैकुण्ठेनेव भास्वता ।
कलौ गृहीतदेहेन कश्मीरेषु द्विजातिना ॥ १५५ ॥
श्रीमन्निर्मलकण्ठेन द्विजेन्द्रेण हिमागमे ।
मसूराजानकालोद्यन्म्लेच्छोपद्रवजो महान् ॥ १५६ ॥
संमन्त्र्य कण्ठभट्टाद्यैर्दुष्कलङ्को निवारितः ।
प्रलोभ्य काचचक्रेशं स्वप्राणेन धनेन च ॥ १५७ ॥
तत्कार्यत्रस्तचक्रेशानुमतो म्लेच्छचोदितः ।
खुज्जामीराह्मदो भट्टान्निर्मलाद्यानघातयत् ॥ १५८ ॥
ब्राह्मं तेजः क्व ते विप्राः क्वाचारोद्यतने युगे ।
इत्येव खिन्नो वित्रस्तांस्तन्मुखानवधीद्विजान् ॥ १५९ ॥

आसूत्रितः सैदकाले मूसचन्द्रेण व्यञ्जितः।
प्रफुल्लः काचचक्रेण मौसुलोपद्रवक्रमः॥ १६०॥
ततोब्दे पञ्चनवते श्रावणे बाह्यमण्डले।
फताहशाहराजेन्दुरस्तं यातो नृपाधिपः॥ १६१॥
श्रुत्वा मह्मदशाहेन तद्दिने नाशि नास्वपि।
नास्नायि राजराजं तं स्मारंस्मारं दिवानिशम्॥ १६२॥
नयज्ञो दीर्घदर्शी च सत्यवाग्गुणिवत्सलः।
प्रशान्तः प्रियभृत्यश्च क्व तादृग्लभ्यते प्रभुः॥ १६३॥
संप्राप्तं नरदेवेन जन्म बाह्येत्र मण्डले।
प्रमयोस्याभवत्तत्र विधिकार्यं हि दुर्घटम्॥ १६४॥
कर्णीरथमथारोप्य स्वभृत्यैर्नरनायकः।
शवीभूत इहानीतः कर्तुमन्त्यक्रियां दिनैः॥ १६५॥
कश्मीरेन्द्रः समारोप्य सामात्यस्तं शवं नृपम्।
बृहन्मृताजिरे श्रीमज्जैनशाहादिभूभुजाम्॥ १६६॥
गोगर्तैः स्फटिकावर्तैर्मूर्तैः कायैरिवाश्रिते।
राजोचितक्रियां कृत्वा भूगर्भाभ्यन्तरेक्षिपत्॥ १६७॥
कर्तुं राज्यमखण्डितं हठधियोद्धर्तुं स मान्यान्दृढा-
न्भर्तुंपामरसेवकान्हि नृपतिः किं किं न कुर्याच्छ्रमम्।
हा दैवं तदपासितुं प्रयततेनर्थादिवाभ्याहतो
मूलोत्पाटनमाप्य धिङ्नृपतरुस्तूर्णं पतेदाकुलः॥ १६८॥
क्व सैफडामरेन्द्रादीन्हत्वा स्वसचिवान्नृपः।
विपत्तौ प्रमयं प्राप हा हा कालविपर्ययः॥ १६९॥

॥ इति फताहशाहस्वर्यानम्॥

तदैवमेत्य राजानश्चङ्गारेण महात्मना।
अन्वगामि नृपेन्द्रस्य प्रेम्णेव स्वर्गवासिनः॥ १७०॥

तस्मिन्काले बहिश्चक्रवर्ती गजपतिर्दिवम् ।
इस्कन्दराख्योप्यगमत्सुरराजदिदृक्षया ॥ १७१ ॥
अभावादथ भूपस्य राजपक्ष्यं विशङ्क्य तम् ।
मल्लेकजङ्गिरमीरखुज्जाह्मदमुखान्ध्रुवम् ॥ १७२ ॥
इब्राहीं खानश्रृङ्गारभट्टादींश्चक्रनायकः ।
वैशाखेब्दे षण्णवतौ नगरस्थानरोधयत् ॥ १७३ ॥
सिद्धादेशातिपदवीं तदीयां चक्रपो ददौ ।
दैवदृष्टस्य राजानहोसनस्य महात्मनः ॥ १७४ ॥
तद्गौरवं त्रिभिर्मासैरसहिष्णुः स चक्रिराट् ।
होसराजानकं कारां क्षिप्त्वासीदकुतोभयः ॥ १७५ ॥
मल्लेकचक्रसेरङ्गताजमीरादिबान्धवान् ।
तोषयित्वा राष्ट्रघोषैः पूर्णकामांस्तदाकरोत् ॥ १७६ ॥
ज्येष्ठेथ सप्तनवते इब्राह्माध्वपतेः सुताः ।
मल्लेकाब्दालकाद्यास्ते संधाय देशवासिभिः ॥ १७७ ॥
फतिहशाहजं खानमादायेस्कन्दराभिधम् ।
ससैन्यमाययुर्बाह्यात्स्ववंशैश्वर्यकाङ्क्षिणः ॥ १७८ ॥
श्रुतप्रवेशश्चक्रेशकाचकोतिबली ययौ ।
योद्धुं लौलपुरोड्डारं क्ष्माभृद्युक्तोध्वपान्प्रति ॥ १७९ ॥
दृष्ट्वा चक्रबलं भूरि जग्मुर्भीत्याल्पसैनिकाः ।
नाग्रामकोटं रात्रौ ते दुर्गमं प्राणरक्षया ॥ १८० ॥
अथानुसस्रे चक्रेशसैन्येनाध्वपतीन्प्रति ।
कोटभूम्यन्तरे भूरि स्वसैन्यं स न्यवीविशत् ॥ १८१ ॥
चमूद्वयाद्विनिर्गत्य शरासारैरवाकिरन् ।
योधा दिवं च भूमिं च गर्जन्तः समराङ्गणे ॥ १८२ ॥

तावत्प्रतीहारपतिर्जहाङ्गीरः ससैनिकः।
गदायमीरबहुरमीराद्यैर्लुहरेविशत् ॥ १८३ ॥
ऊर्ध्वाधःसहितं शत्रुसैन्यं वीक्ष्य स चक्रपः।
मसूदचक्रं स्वसुतं व्यसृजल्लुहरं प्रति ॥ १८४ ॥
ताजचक्रादिसहितो वीरो मीरमसूदकः।
शाहावदीननगरं स प्रापारियुयुत्सया ॥ १८५ ॥
दृग्गोचरं गते चक्रिसुते युयुधिरे भटाः।
आगच्छ प्रविशेत्युच्चैर्नदन्तः समराङ्गणे ॥ १८६ ॥
मसूदमीरसंक्षिप्तां वीरो मीरगदायकः।
शरावलिं चकर्तास्य वैजयन्तीमिव श्रियः ॥ १८७ ॥
पार्थपुत्रोपमे तस्मिन्रणं चक्रिणि कुर्वति।
अरिमध्यात्सुसन्नद्धो नासीत्कोपि धनुर्धरः ॥ १८८ ॥
मा पलायन्त समराद्धीरा वीरगुणोज्झिताः।
जिताः शत्रुसमूहेन व्यूहेनागम्यतामिति ॥ १८९ ॥
इत्युक्तेर्जुनराजानकेनैकेनागता भटाः।
युद्धाय विविशुस्तूर्णं शलभा इव पावकम् ॥ १९० ॥
प्रत्यायाते स्वसैन्येथ प्रयुध्यैतैर्महारथैः।
गदायमीरः स्वर्नारीप्रणयित्वमथाश्रयत् ॥ १९१ ॥
स्वस्रेयश्चक्रिणो दत्तनायकः पुष्पसायकः।
दृष्ट्वैव नीतस्तूर्णं स स्वःस्त्रीभिः समराङ्गणात् ॥ १९२ ॥
सेनान्यं निहतं वीक्ष्य वीरास्तदनुयायिनः।
मसूदमीरं धावित्वा जघानाक्षिण शरेण ते ॥ १९३ ॥
शरनिर्भिन्ननयनो न्यपतन्निहतो भुवि।
मसूदमीरः प्रवरो धन्विनां चक्रिणः सुतः ॥ १९४ ॥

विशीर्णे रिपुभिश्चक्रिसुते तरलसंनिभे ।
अनीकिनीपदं लेभे मुक्ताहारा न कुत्रचित् ॥ १९५ ॥

होसराजानको राजमीरः शृङ्गारभट्टकः ।
एते विरुद्धास्तत्राजौ बद्धाः पापिजनैर्हताः ॥ १९६ ॥

प्रतीहारपतेः सेना प्रतुष्टा पुरमाविशत् ।
दिनद्वयमथोषित्वा सा प्रयाता यथागता ॥ १९७ ॥

तादृशे तनये वीरे निहते संगरेरिभिः ।
काचचक्रस्य तद्दुःखात्कालुष्यमगमन्मनः ॥ १९८ ॥

सेनान्यं दुःखितं वीक्ष्य ताजचक्रादयो निजाः ।
अवोचन्समये चास्मिन्दैन्यं मा संश्रयेश्वर ॥ १९९ ॥

निर्ययावथ चक्रेशो योद्धुं मार्गेशसैनिकान् ।
पारावारस्थितान्कोट्टे पुत्रशोकादविह्वलः ॥ २०० ॥

युयुत्सौ काचचक्रेशसैन्ये रिपुबलैश्चिरम् ।
ग्राम्या दीनतयाभूवन्किंकर्तव्यतयाकुलाः ॥ २०१ ॥

मार्गेशाः ख्यातवीर्यास्ते वैरिनिष्ठस्य चक्रिणः ।
पौरुष्यं वीक्ष्य स्वानेन युक्ता याता दिगन्तरम् ॥ २०२ ॥

यथागतं गतेष्वेषु ससैन्येषु नृपान्वितः ।
विजयी नगरं प्राप चक्रेशः शोकविह्वलः ॥ २०३ ॥

वीरं धीरं गुणज्ञं तं महायोधपुरःसरम् ।
मल्लेकदौलतं ज्ञात्वा चक्रेशोभूद्भयोज्झितः ॥ २०४ ॥

समस्तं ग्रामराष्ट्रादि पुत्रसम्बन्धि धन्विने ।
ददौ दौलतचक्राय भ्रातृपुत्राय स प्रभुः ॥ २०५ ॥

वर्षेष्टानवते राजपुत्रमाजग्मुरध्वपाः ।
हबीबखानमादाय चट्टिकाशारपर्वतात् ॥ २०६ ॥

तामसीमरुगास्थाने स्थापिते सैनिकेध्वपैः।
मल्लेककाचचक्रस्य बलं संधपुरेविशत् ॥ २०७ ॥
विज्ञातचक्रिवीर्यास्ते मार्गपा अल्पसैनिकाः।
गिरिमार्गादवारोहन्नधर्ग्रामेषु केषुचत् ॥ २०८ ॥
अध्वेशसैन्यात्तद्दैन्यान्निर्गत्याशेश्रयद्द्रुतम्।
मूसराजात्मज ईदाराजानश्चक्रिणश्चमूम् ॥ २०९ ॥
तच्छ्रुत्वा तेध्वपाः प्रत्यागतास्तत्पर्वताध्वना।
आशापिशाचिका त्यक्ता मित्रद्रोहात्सुविह्वला ॥ २१० ॥
मार्गेशवाहिनोमित्रद्रोहाख्यानशिलोच्चयात्।
विशीर्णा शतधा याता संबद्धा बाह्यपल्वले ॥ २११ ॥
हबीबखानः सोस्वस्थो मार्गे पञ्चत्वमागतः।
आरुह्य शिबिकां तूर्णमानीतो निजपार्श्वगैः ॥ २१२ ॥
कश्मीरानथ कृत्वास्य चान्त्यकर्म मृताजिरे।
शयितः पितृपार्श्वेधोगर्तेमात्यैर्महात्मभिः ॥ २१३ ॥
शस्त्रेण ये वारयितुमशक्या वैरिणोभवन्।
नखैरपास्तभाग्यानामुदये काचचक्रिणः ॥ २१४ ॥
प्रतीहारकुलोदन्वच्चन्द्रो मल्लेकजाङ्गिरः।
ज्वालाभिर्बाह्यदेशेत्र तत्काले पञ्चतां ययौ ॥ २१५ ॥
आनीताश्चक्रिणा मार्गपाब्दाललुहरादयः।
यौनसंबन्धन्यायेन कश्मीरान्विविशुस्ततः ॥ २१६ ॥
तथा हि लुहराध्वेशः स्वसुतां परिणीतवान्।
मल्लेककाचचक्राय शक्रायेव पुलोमजाम् ॥ २१७ ॥
मल्लेकाब्दालकायाथ चक्रेशः स्वसुतां ददौ।
परिणीयचिरोत्सन्नामिव स्नेहतरङ्गिणीम् ॥ २१८ ॥

श्रीमता ताजचक्रेण स्मरेणेव रतिर्यथा ।
उद्वाहिता मार्गपतेरब्दालस्यात्मजा तदा ॥ २१९ ॥
ततः काञ्चनचक्रेण राष्ट्रशेषैः क्रमागतैः ।
महद्भिर्दानमानैश्च मार्गेशानां कृतार्हणा ॥ २२० ॥
अन्वहं वर्धिते प्रेम्णि मार्गेशैः सह चक्रिणाम् ।
बन्धुना गिरिचक्रेण दैवाद्दूरीकृतस्तु सः ॥ २२१ ॥
काम्भोजयवनेशेन बाबुलेन विपाटितः ।
तदैव हास्तिनापुर्यामिब्राहीमो नृपेश्वरः ॥ २२२ ॥
तद्रणोत्थरजोध्वस्ता न प्राकाशन्त कुत्रचित् ।
आशा गजपतेर्वीररत्नानामनुयायिनाम् ॥ २२३ ॥
मार्गेशदीपश्चक्रेशस्नेहपूर्णो विकारितः ।
कर्णेजपाम्बुपूरेण रिगचक्रालिमीरयोः ॥ २२४ ॥
तद्रुषोत्थानलज्वलन्मनसश्चक्रिणः कृताः ।
रिगचक्रनिरोधाख्यजलाप्यायेन शैत्यता ॥ २२५ ॥
तृतीयेब्देध्वपास्ते तु निःस्नेहाश्चक्रिणं प्रति ।
आलिमीरकृताश्वासाश्चिरोड्डारं न्यवीविशुः ॥ २२६ ॥
विदित्वा तादृशैर्वृत्तं मन्त्रयित्वा महीभृता ।
न्यविक्षच्चक्रपः सैन्ये योद्धुं स्वं जालदर्गडे ॥ २२७ ॥
असाध्याः सामदानाद्यैस्तद्भटा उद्भटा रणे ।
न शेकुश्चक्रिसैन्यान्तः केनापि विनिवर्तितुम् ॥ २२८ ॥
शलस्थलपालडादिदेशेष्वध्वेशसैनिकैः ।
प्रयुध्य शतशोहानि निर्भयश्चक्रिपोभवत् ॥ २२९ ॥
रात्रौ चक्रबलाघाते लहरीवाटिकातलम् ।
भूपाले काचचक्रेशो बाह्यदेशं भयादगात् ॥ २३० ॥

विरोधमाषा उप्ता या आलिमीरेण धीमता।
ताः पुष्पिताः पल्लविताश्चक्रेशाध्वेशभूमिषु ॥ २३१ ॥
हिन्दुवाटं प्रयातेस्मिन्नुग्रे मन्त्रिणि भूमिभृत्।
साम्राज्यमकरोद्देशेध्वेशमन्त्रिभिराहृतः ॥ २३२ ॥
बहिश्चक्रेश्वरेणात्र सामन्ताः करदायिनः।
श्रीजैनशाहिवद्रीत्या कृताः स्वबलशालिना ॥ २३३ ॥
ताजचक्रादयो वीरा भ्रातरो लोहरादिषु।
आहवे मुगलान्हत्वा चक्रुः स्वं सफलं वयः ॥ २३४ ॥
दुश्चेष्टिते विचिन्त्यात्र युवराजस्य चक्रपः।
खानमिस्कन्दरं तं स रुरोधाजगरमिव ॥ २३५ ॥
तादृक्साहसिकं वीक्ष्य चक्रेशं भूमिपोनयत्।
चतुर्थेब्दे शुचौ मासे कश्मीरांस्तं दिगन्तरात् ॥ २३६ ॥
पिता भ्राताथवा पुत्रो राज्ञां राज्यजिहीर्षया।
शत्रवः कथिता लोके किं करोत्यपरो रिपुः ॥ २३७ ॥
इत्थं विदितभूपालचरिता अध्वपास्ततः।
ससैन्याः प्रययुर्बाह्यदेशं कीचाश्रमाध्वना ॥ २३८ ॥
शत्रुश्येनं समादाय प्राप्ते चक्रिपतौ नृपः।
राज्यं निष्कण्टकं मेने परितोषमुपाययौ ॥ २३९ ॥
खान इस्कन्दरो राजभृत्यैर्नीतो नृपालयम्।
अपुनर्दर्शनात्कुर्वञ्श्यामा नेत्रोत्पलैर्दिशः ॥ २४० ॥
नृपादेशादथ क्रूरा नेत्रोत्पाटनमञ्जसा
श्येना इव कुरङ्गाय व्यधू राजात्मजाय ते।
(व्यधू राजतनूजाय कुरङ्गायेव सारसाः)
तत्क्षणे या व्यथा तेन प्राप्ता वक्तुं न पार्यते ॥ २४१ ॥

तं विना वृषनिर्दैन्यांस्तान्क्रूरान्राजसेवकान् ।
पित्रोः शापो नु फलितो धनलुब्धस्य तस्य वा ॥ २४२ ॥
ज्ञात्वा कृत्याश्रमासीनानध्वेशांश्चक्रिराट् ततः ।
गत्वा वराहमूलान्ताच्छ्रीनगर्यां न्यवीविशन् ॥ २४३ ॥
पारावारात्समागत्य तत्रान्योन्यबलद्वयम् ।
व्यधाज्जनक्षयं घोरं जयाजयपरीक्षया ॥ २४४ ॥
गिरीनुल्लङ्घ्य यातोथ चक्रिभ्रातृसुतो निशि ।
मल्लेकदौलतो मार्गपेशान्देशाञ्यवारयत् ॥ २४५ ॥
असमर्थोध्वना यातुं मीयामीरोध्वपाग्रणीः ।
मार्गे पञ्चत्वमायातश्चलिताः केपि सायुधाः ॥ २४६ ॥
अथाध्वपेषु नष्टेषु यातेष्वेवं बहिर्भयात् ।
स महम्मदशाहोगान्नगरं चक्रिभिर्वृतः ॥ २४७ ॥
धत्ते मुदं जडमतिः शमितारिवह्नि-
स्तावद्धयुदेति निलयाद्विषमोग्निरस्य ।
मह्मूदशाहिनृपतिः स्वसुतादवाप-
त्साम्राज्यनाशमहहो घटना विधातुः ॥ २४८ ॥
तथा हि भूभुजानेन गजाधीशनिवेशने ।
पुत्र इब्राहिमाखानो नीर्वि दत्तोभवत्पुरा ॥ २४९ ॥
तुरुष्काहववातेन विधूता शतधा चमूः ।
याता तज्जीवरत्नौघयुता नौरिव सागरे ॥ २५० ॥
तदाहववधान्मुक्तो भाविराज्योदयात्ततः
खानः स प्राप कश्मीरान्पितृस्नेहविवर्धितः ॥ २५१ ॥
प्रादुर्बभूव राजानं प्रति राज्यजिहीर्षया ।
अस्मिन्नवसरे चक्रपतेर्दुष्टविषूचिका ॥ २५२ ॥

प्रादुर्बभूव राज्ञोस्य राज्यभ्रंशाय पूर्वजा।
राजान्तरङ्गांश्चक्रेशो दुष्टरोगान्भिषगिव।
मल्लेकलद्दभट्टादीन्कारागारे रुषाक्षिपत्॥ २५३॥
ताजचक्रालये बद्ध आलिमीरो निजानुगैः
विमुह्य रक्षिणो रात्रौ नीत्वा क्षिप्तो दिगन्तरम्॥ २५४॥
तद्वैषम्यादिवाग्दोषोपरागादावृणोत्क्रुधा।
मह्मूदशाहभानुं तं चक्रराहुर्मितैर्दिनैः॥ २५५॥
इत्थेमकादशाब्दान्स दशमासान्दिनानि च।
रक्षित्वा काश्यपीं राजा मह्मूदश्चलितोभवत्॥ २५६॥
धर्मः फलति कालेन सद्यःपाको हि सोभवत्।
खानस्यान्ध्याद्यथा याभूद्राज्यभ्रंशान्नृपस्य सा॥ २५७॥
गग्गोडाख्यं खशस्थानं प्रहितोथ स चक्रिणा।
दत्त्वा न्यायकसुय्यादीन्क्रूरान्रक्षिजनान्निजान्॥ २५८॥

॥ इति मह्मूदशाहराज्यभ्रंशः॥

जगत्सृष्टिस्थितिध्वंसहेतवे वृषकेतवे।
भवाब्धिसेतवे ब्रह्मविष्णुरुद्रात्मने नमः॥ २५९॥
अथ काञ्चनचक्रेण पुत्रो मह्मदभूभुजः।
इब्राह्मशाह इत्याख्यां कृत्वा राज्येभ्यषिच्यत॥ २६०॥
स्वमन्त्रिपदवीं दीप्तां चक्रे चक्रेश्वरस्ततः।
स्वीकृत्य राज्यतन्त्राणि द्रङ्गाशुल्कोद्भवैर्धनैः॥ २६१॥
नाग्रामप्रमुखै राष्ट्रै राजयोग्यैर्न्ययोजयत्।
अनुजांस्ताजचक्रेशमीयामीरादिकान्स्वकान्॥ २६२॥
बाह्ये चाब्दालमार्गेशो डिल्लीशं मुगलेश्वरम्।
सनां मार्गयितुं मिर्जाबाबुरं प्रययौ रुषा॥ २६३॥

आकारेङ्गितवाक्चेष्टासंपूर्णं वीक्ष्य मार्गपम् ।
क्षणं तुरुष्कराजोभूद्विस्मयानतकन्धरः ॥ २६४ ॥
तुरुष्कभूपेन ततो ज्ञात्वा मन्त्रिवरं च तम् ।
सहस्रसंख्या वीराणां सेनास्मै प्रतिपादिता ॥ २६५ ॥
इत्थं प्रवृद्धां वार्तां तां देशे पञ्चमहायने ।
वैशाखे श्रुतवांश्चक्रपतिर्विक्रमशोभितः ॥ २६६ ॥
स्वःक्रीडामिव कुर्वत्सु भूमौ चक्रिषु मार्गपाः ।
मल्लेकाब्दाललुहरमार्गेशाद्या महारथाः ॥ २६७ ॥
गिरीनुल्लङ्घ्य बाङ्गेलात्काश्मीरान्विविशुर्द्रुतम् ।
शिखालभिगमद्भूदखानादिमुगलैर्वृताः ॥ २६८ ॥
फताहशाहजं खानं नाजुकं चाग्रयायिनम् ।
कृत्वा निविष्टाः संनद्धाः प्रतापपुरधन्वनि ॥ २६९ ॥
श्रुत्वैतच्चक्रपः सेनां नीलाश्वे स्वां न्यवीविशत् ।
सैन्यद्वयोद्भता वीराः स्वामिभक्तिमदर्शयन् ॥ २७० ॥
विपक्षपक्षिविच्छिन्ने म्लेच्छसैन्यविहायसि ।
विहाय स्वपदं यातुं नाशकुत स पक्षिभिः ॥ २७१ ॥
ततश्चक्रपतिं दूतः प्राह मार्गेशवाचिकम् ।
भो भोश्चक्रपते बाह्ये सामन्ताः करदायिनः ॥ २७२
कृता येन स्ववीर्येण लक्षैः पञ्चभिरावृतः ।
हतो गजपतिः श्रीमानिब्राहीमो बलोत्कटः ॥ २७३ ॥
तस्य मिरजबाबुरराजस्यानुचरा इमे ।
मया नीताः सहायार्थं संनद्धोस्तु भवान्रणे ॥ २७४ ॥
इत्युक्तो लेखहारेण चक्रेशोन्ववददमुम् ।
डिल्ली न देशः कश्मीराः प्रतिष्ठाना वयं न ते ॥ २७५ ॥

फलपाको मतो देशान्मुगलानां महौजसाम्।
अथ वीरा महौजस्का महावीर्या धनुर्धराः ॥ २७६ ॥
इब्राह्मखानसेरङ्गमीरमल्लीकताजकाः।
तथा मार्गेशपक्ष्यास्तु मल्लेकलुहरादयः ॥ २७७ ॥
रिगचक्रेशमल्लेको म्लेच्छाः शिखबिगादयः।
कुरुपाण्डवसैन्यस्य युद्धं द्रष्टुमिवोद्यताः।
निर्ययुः समरे वीराः स्वबाहुबलदर्पिताः ॥ २७८ ॥
रिगचक्रेशवीरेण शक्तिः क्षिप्ता च वैरिषु।
प्रकृत्ताद्भुतवीरेण ताजमीरेण सत्वरम् ॥ २७९ ॥
मीरसेरङ्गचक्रेण प्रहिता करवालिका।
रिपोर्लुहरमीरस्य याता पुष्पक्षतोपमाम् ॥ २८० ॥
एवं प्रवीरैरन्योन्यं प्रकीर्य समराम्बरम्।
स्ववीर्यमृगनाभ्युद्यत्सौगन्ध्याकुलितं कृतम् ॥ २८१ ॥
ततः स्वसैन्यैः सेनान्तस्ताजचक्रेश उद्ययौ।
वातोद्धूतपताकाभिस्तर्जयन्निव वैरिणः ॥ २८२ ॥
रणः प्रववृते तत्र चक्रमार्गेशसैन्ययोः।
आगच्छ जहि तिष्ठेति शब्दोभूद्भटसंक्षये ॥ २८३ ॥
समरोद्धतमीक्ष्यताजचक्र-
मवदल्लूहरमार्गपस्तमेत्य।
कुरु युद्धं किमतः परं किमन्य-
न्मनुजैः स्वामिदशासु साध्यते तत् ॥ २८४ ॥
तन्निशम्य चिरं युद्ध्वा वीरैर्मल्लेकताजकः।
शिश्रिये वीरशयनं नाकनारीविराजितम् ॥ २८५ ॥
कीर्तिशेषं गते तस्मिन्परे चक्रिसहोदराः।
मीयामल्लेकसेरङ्गमीराद्या मुगलैर्युताः ॥ २८६ ॥

स्वसैन्यं निहतं दृष्ट्वा चक्रेशोल्पबलान्वितः ।
खशालयं ययौ भीत्या शोकेन च समाकुलः ॥ २८७ ॥
अथ मार्गेश्वरा जित्वा मल्लेकाब्दालकादयः ।
विविशुर्नगरं लोकानाश्वासंतो भयाकुलान् ॥ २८८ ॥
गत्वा नृपाङ्गणे सर्वे छत्रचामरशोभितम् ।
प्रददू राज्यतिलकमध्वेशा राजसूनवे ॥ २८९ ॥
अथ नाजुकशाहेन पित्र्ये सिंहासने श्रिते ।
प्रहर्षाकुलिता उच्चावचाः सर्वेभवंस्तदा ॥ २९० ॥
गत्वा ज्यमालमरुगां सनृपास्तेथ मन्त्रिणः ।
मल्लेकाब्दालकस्यांश आलिमीरस्य चापरः ॥ २९१ ॥
मार्गेशलुहरस्यांशो रिगचक्रस्य चापरः ।
विभक्तेर्थे चतुर्भागैस्तैश्चतुर्भिरिहत्यभूः ॥ २९२ ॥
खशालयस्थं चक्रेशं विसृष्टस्तैर्महात्मभिः ।
लेखहारस्तमाह स्म मार्गेशमुखवाचिकम् ॥ २९३ ॥
भोभोश्चक्रपते स्वामिभक्तिज्योत्स्ना भवादृशैः ।
दुर्मन्त्रिभिरमात्यानां विमला मलिनीकृता ॥ २९४ ॥
यस्य बालस्य साम्राज्ये राज्यकार्येषु मन्त्रिणः ।
बद्धाञ्जलय एवासन्स रुद्धो भवता कथम् ॥ २९५ ॥
रवेरावरणं मूढः कुण्डेन विदधाति कः ।
इत्थं दूतमुखाच्छ्रुत्वा मुमोच नृपतिं त्वसौ ॥ २९६ ॥
ततो मह्मदशाहः स गत्वा लुहरमासदत् ।
पूर्वोर्वरीशवद्भङ्गाशुल्काद्यमपि चाग्रहीत् ॥ २९७ ॥
नीतिज्ञो मन्त्रयित्वाथ मार्गेशैर्मुगलांस्ततः ।
विसर्जयामास नृपः संमान्यैतान्स्वकं पदम् ॥ २९८ ॥

उल्लङ्घ्य लोहरं प्रापुस्तुरुष्काः स्वनिवेशनम्।
मह्मूदशाहं संलेभे आलिमीरश्चिरं प्रभुम् ॥ २९९ ॥
हेमन्तमतिवाह्यात्र वसन्तमिव तं नृपम्।
काश्मीरोपवने मीरो मार्गेशानुमतोनयत् ॥ ३०० ॥
राज्यं कृत्वाथ वर्षैकं दशम्यां नाजिको नृपः।
ज्येष्ठशुक्ले नृपात्प्राप यौवराज्यं महम्मदात् ॥ ३०१ ॥
षष्ठेब्दे मह्मदः शाहोभिषिक्तः सचिवैः शुचौ।
राज्ये खशालयान्मुक्तो भूयो जात इवादृतः ॥ ३०२ ॥
दिवं मिरजाबाबुरः स प्रयातः स्वपुत्रयोः।
दत्त्वा स्वविभवं कामराणहोमाययोस्तदा ॥ ३०३ ॥
सप्तमेब्देध्वपैः सार्द्धं युद्धेच्छुः काचचक्रपः।
नौर्वारग्रामादगमत्ससैन्योथ दिगन्तरम् ॥ ३०४ ॥
याति चक्रपतौ वीरे ततः पश्चिमदिग्वधूः।
रतिहेतुरुषा केतुं मूर्ध्नि नित्यमधार्यत ॥ ३०५ ॥
तद्वर्षे कार्तिके शुक्ले मच्छूमाख्यश्चमूपतिः।
मिरजाकामराणस्य काश्मीराञ्जेतुमाययौ ॥ ३०६ ॥
शिखालभिगमह्मूदखानादिमुगलैः सह।
कुर्वन्दश दिशः पूर्णा गर्जद्भिः प्रबलैर्बलैः ॥ ३०७ ॥
श्रुत्वा मह्मदशाहाद्याश्चक्रेशं शीघ्रमानयन्॥
साहायकार्थमध्वेशौ राष्ट्रघोषकृतार्हणम् ॥ ३०८ ॥
सहस्रैरश्ववाराणां म्लेच्छा नगरमाविशन्।
काश्मीरिकाश्च दुर्गेषु स्वबलानि न्यवीविशुः ॥ ३०९ ॥
भयात्पौरजने याते गिरिगह्वरवर्त्मसु।
घीरेषु सैन्यबाहुल्यात्प्रनष्टेषु च तत्र तु ॥ ३१० ॥

शून्यं पुरवरं दृष्ट्वा मुगलास्ते क्षुधादहन् ।
गृहाणि राजधानीं च कुद्रदीनस्य लुण्ठकाः ॥ ३११ ॥
दुर्गेभ्यो निर्गता वीरास्तुरुष्कैराहवेच्छया ।
स्वेच्छया प्राणसर्वस्वं विक्रीय यश आददुः ॥ ३१२ ॥
ग्रामेषु नगरेरण्ये तुरुष्कैर्निष्कृपैर्हताः ।
सहस्रसंख्या लोकानां जुलुच्यवधकारिभिः ॥ ३१३ ॥
ततः काश्मीरिकैर्वीरैर्मार्गेशैश्चक्रिभिश्च ते ।
अर्कांशुभिस्तमांसीव संधायापासिता इतः ॥ ३१४ ॥

॥ इति तुरुष्कोपद्रवः ॥

मुक्तास्ते साहसाद्वीराः स्वगृहेषु स्थितिं व्यधुः ।
मार्गेशानादरत्रस्तः काचचक्रो बहिर्ययौ ॥ ३१५ ॥
वर्षेष्टमे शुचौ शूरपुरात्सोप्याययौ पुनः ।
शस्त्रं प्रतिहतं ज्ञात्वा बाह्यं यातो यथागतम् ॥ ३१६ ॥
मार्गमासेत्र शरदि कास्कारीयाश्चमूचराः ।
मिरजाहैदराद्याः श्रीसैदखानमहीभृतः ॥ ३१७ ॥
हयारोहसहस्रैर्द्वादशभिः परिवारिताः ।
काश्मीरानाययुर्जेतुं श्येना इव विहङ्गमान् ॥ ३१८ ॥
कोटाद्रमनानिर्यन्त आगच्छन्तो नृपालयम् ।
प्रविशन्तो भवन्तीत्थं श्रुत्वा सन्तो विषेदिरे ॥ ३१९ ॥
तुरुष्कोपप्लवाल्लोकैः कास्कारोपद्रवो महान् ।
अज्ञायि सूर्यग्रहणं चन्द्रग्रासाद्विशिष्यते ॥ ३२० ॥
चलिते सकले जीवलोके वेश्मावलिस्ततः ।
शवराशिरिवोच्छ्वासशून्याभूद्भयदायिनी ॥ ३२१ ॥
तस्यां दाहक्रियां कर्तुं तीव्रवह्निप्रदायकाः ।
सिकन्दरपुरीराजधानीं रम्यामतेजयन् ॥ ३२२ ॥

नीचावचगृहैर्लक्षसंख्यैर्दग्धैः पुरोर्वरा।
जाता श्मशानभूवत्सा दग्धकाष्ठभयङ्करा ॥ ३२३ ॥
राजधानीद्वयं तादृग्लभ्यते कुत्र भूमिपैः।
सुधादार्विष्टकाचित्रे कोटिसंख्या व्ययीकृताः ॥ ३२४ ॥
श्रीजैननगरे दिद्दामठे चाग्निं विना कृतम्।
राजधानीद्वयं भूभृत्सुकृतमिव तत्स्थितम् ॥ ३२५ ॥
वेतालसाधनायुक्ता इवासन्मुगला ध्रुवम्।
लब्धं यत्सद्मनिहितं गुप्तं पौरधनं तु यैः ॥ ३२६ ॥
जलावरणयुक्तासु भूपभूमिषु शिश्रियुः।
काश्मीरिकाश्चमूनाथा आश्रयान्म्लेच्छशङ्कया ॥ ३२७ ॥
चिरोड्डारं च हाजीङ्गकोट्टं चक्रधरं तथा।
श्रुत्वाभ्यवाहयन्मासत्रयं म्लेच्छैः प्रयुध्य ते ॥ ३२८ ॥
दैत्यरूपेण खुःशेन स्थितांश्चक्रधरान्तिके।
काश्मीरिकान्प्रति कृतं युद्धं निष्फलमप्यगात् ॥ ३२९ ॥
"वन्ध्यमप्यभवद्युद्धं कृतं काश्मीरिकान्प्रति।"
खिलीकृतास्तुरुष्कैस्ता भुवो मडवराज्यगाः।
हृत्वा फलसमृद्धिं तां हत्वा ग्राम्यजनान्क्षुधा ॥ ३३० ॥
ये याता नौषु तीर्त्वासन्खुयाश्रमादिभूमिषु।
सबालवृद्धाः सुखिनः स्वायुःशेषेण रक्षिताः ॥ ३३१ ॥
जुलुचोपप्लवे पूर्वं तथा कज्जलसंगरे।
क्षोभोभूत्तादृशे देशे कुकृत्यात्पापिनां विशाम् ॥ ३३२ ॥
चक्राधारादेत्य भूपेन्द्रयुक्ता
भीमादेवीसंनिधौ संनिवेशम्।
चक्रुस्तीर्त्वा लेदरीवामपारं
चक्रेशा वा मार्गपा आहवाय ॥ ३३३ ॥

खान इस्कन्दरो मिर्जाहैदरोन्ये महारथाः ।
काश्मीरिकान्प्रतिययुः संनद्धास्तत्र संयुगे ॥ ३३४ ॥
मार्ताण्डपादमूले तत्राहौषुर्बलद्धयात्प्राणान् ।
मल्लेकालकहोसनमीरशिखालाः कमालमीरश्च ॥ ३३५ ॥
कास्कारीयाः प्रवीराश्च केचिद्युद्ध्वा दिवं ययुः ।
सफलं स्ववयः कृत्वा मल्लेकालादिभी रणे ॥ ३३६ ॥
रे मूढाः कुरुत सदैव सेवनं त-
त्तान्सर्वान्भवविभवान्विहाय लोलान् ।
दृष्ट्वा तन्मरणमथालिमीरनाम्नः
सङ्ग्रामे मुगलवरैर्हि देशहेतोः ॥ ३३७ ॥
विदुरोपमिते तस्मिन्निहते दुद्रुवुर्भटाः ।
काश्मीरिकाः कृताश्वासाश्चक्रेशाध्वेशनायकैः ॥ ३३८ ॥
कबन्धनर्तका यक्षनरा वेतालराक्षसाः ।
महामांसाशनव्यग्रा जन्यव्याप्ता इवाहवे ॥ ३३९ ॥
रणोद्याने वीरपानमदोन्मत्तेषु तेष्वथ ।
हतशिष्टे चमूयुग्मे स्वाश्रयेषु न्यविक्षत ॥ ३४० ॥
अथ चक्रेशमार्गेशौ नृपादेशात्समेत्य तैः ।
मुगलैः सह संधानमकरोत्पौरुषोर्जितौ ॥ ३४१ ॥
नवसंख्यानि वस्त्राणि कतीफसूफसग्लतैः ।
तोकं तद्भाषयादाय मुगला भूपतेः पुरः ॥ ३४२ ॥
नृपमुद्राङ्कितं पत्रं गृहीत्वा मौसुलाक्षरैः ।
प्रत्यायाताः स्वसैन्ये तत्कुर्वन्तो हर्षनिर्भरम् ॥ ३४३ ॥
धाटीभिः पामरा नीताः स्त्री पुमान्पुष्यदान्तिकाम् ।
मुक्ता हस्सनमीराद्यैरानीताः करुणापरैः ॥ ३४४ ॥

ततोब्दे नवमे ज्येष्ठे स्वदेशं मुगला ययुः।
बलात्पौरश्रियं साम्नादाय राजसुतामपि ॥ ३४५ ॥
इत्थं सतीसरोदेशे पीडाभूत्पापिनां विशाम्।
पूर्वपश्चिमतः केतोरनिशं दिवि दर्शनात् ॥ ३४६ ॥

॥ इति कास्कारीयोपद्रवः ॥

पक्वशालिवरस्फातिपूर्णक्षेत्रेषु सर्वतः।
नभसस्तारकाः पेतुर्भूयः केतुरदृश्यत ॥ ३४७ ॥
सम्यङ्निगीर्णेन्नराजे तदुपद्रवरक्षसा।
उदजृम्भन्महाघोरो दुर्भिक्षोन्नपते रिपुः ॥ ३४८ ॥
निविष्टे मण्डलेमुष्मिश्चेरुस्तत्सैनिकास्ततः।
क्षुत्पिपासादयो लोकपीडका बलवत्तराः ॥ ३४९ ॥
सहस्रदशभिर्निष्कैर्लभ्या मूल्येन खार्यभूत्।
धान्यस्य गतिरादातुं कान्यस्य धनिनो विना ॥ ३५० ॥
भर्तृभक्तिं सुतस्नेहं शुश्रूषां पित्रोरेव च।
हित्वा स्वप्राणरक्षायै चेरुः स्त्रीपुरुषाः क्षुधा ॥ ३५१ ॥
भुक्त्वा द्वित्रिचतुर्वारं क्षुधार्ता दिवसान्तरे।
अटन्तः प्रेतरूपा हि दृष्टा भोजनवाञ्छया ॥ ३५२ ॥
तत्कालेब्दालमल्लेकादयः पुण्यरता हि ते।
प्रत्यहं तन्दुलशतैः पक्वान्नैः पुपुषुर्जनम् ॥ ३५३ ॥
ग्रामेषु नगरे राजमार्गेषु गणनास्तु न।
क्षुत्पिपासाप्रमीतानां प्रेतानामिव देहिनाम् ॥ ३५४ ॥
संचितं रूप्यकुप्यादि विक्रीय व्यधुरात्मनः।
प्राणसंधारणं केचिच्छाकेनाक्षोटपिण्यकैः ॥ ३५५ ॥
उपद्रवभयादेष दुर्भिक्षोपप्लवो महान्।
गलनेत्रामयाद्दुष्टविस्फोटो ह्यतिदुःसहः ॥ ३५६ ॥

ज्येष्ठान्तं दशमाब्दस्य नवमाद्वत्सराद्भृशम् ।
घोरे दुर्भिक्षतमसि परितः क्रान्तमण्डले ॥ ३५७ ॥
गुण्ठीबीजोद्भवस्नेहधूपैर्दीपैः प्रकाशयन् ।
आशा अन्ननृपामात्यः सुकालो योद्धुमाययौ ॥ ३५८ ॥
यथा गोधूमकलटा उद्ययुस्तम्भजा भुवः ।
कुर्वन्तः स्वफलैः शेषजन्तोरारात्रिकामिव ॥ ३५९ ॥
स्वबलैर्भृशमाक्रान्तमवेक्ष्यान्नाधिपः स्वयम् ।
आययौ बलिनं जेतुं दुर्भिक्षं घोरराक्षसम् ॥ ३६० ॥
वितत्य महतीं सेनां प्रियङ्गुशालिकोद्रवैः ।
यन्त्राश्मभिरिवाक्षोटैर्जित्वा तं स न्यविक्षत ॥ ३६१ ॥

॥ इति दुर्भिक्षोपद्रवः ॥

अन्नराजफलैः पुष्टा जन्तवोतिकृशास्ततः ।
पुनर्जातमिवात्मानममन्यन्त दिवानिशम् ॥ ३६२ ॥
तदा काञ्चनचक्रेशः स्थितिं जैनपुरे व्यधात् ।
मन्त्रित्वमध्वपादेशाद्राज्ञोभ्यर्णे विभूषयन् ॥ ३६३ ॥
श्वपचाकारकश्चक्रपतिर्मडवराज्यगः ।
भूमीरदण्डयन्मार्गपानां तटस्थ्यवीक्षणात् ॥ ३६४ ॥
अत्रान्तरे महान्देशो देहो दुष्टैरिवामयैः ।
स्वस्वावासाश्रयैरेतैः पीडया जर्जरीकृतः ॥ ३६५ ॥
तदुत्थपापसंतापाच्चैत्रान्तेब्दे त्रयोदशे ।
राजा मह्मदशाहोभूदस्वस्थो नियतेर्बलात् ॥ ३६६ ॥
कान्तं देहं रुजा क्रान्तं शान्तं वीक्ष्य च भूमिपः ।
मल्लेकलद्दभट्टाख्यं सस्नेहं प्राह मन्त्रिणम् ॥ ३६७ ॥
राजधर्मोद्भवैः पुण्यपापैः संवर्धितोपि सन् ।
तथापि कायः सापाय इति सर्वत्र निश्चयः ॥ ३६८ ॥

अस्मद्वंशे महीयांसः शंखदीनादयो नृपाः।
श्रीजैनोल्लाबदीनश्चाप्येते पूर्वपितामहाः॥ ३६९॥
तद्वंश्योहं मदीयः कः कीदृशो मत्परो भवेत्।
इति चिन्ताकुलं चेतो ज्वरेणाद्यापि दह्यते॥ ३७०॥
इत्युक्त्वा विरते राज्ञि मार्गेशाब्दालकादयः।
आगतास्तादृशं वीक्ष्य साश्रुनेत्रास्तमब्रुवन्॥ ३७१॥
भूपास्मदपचारेण प्रजाभाग्यैरथापि ते।
कायक्लेशोस्ति स्वस्यैव दण्डो भृत्यापराधतः॥ ३७२॥
श्रुत्वाब्रवीन्नृपस्तेषां वचो मत्तनयाः सदा।
भवद्भिः पालनीयाश्च वयं यामः पराध्वनि॥ ३७३॥
आक्रन्दोभून्महाराजगृहे श्रुत्वा नृपोदितम्।
तदहि निष्ककोट्यश्च राज्ञा धर्मेण योजिताः॥ ३७४॥
प्राप्ते पुष्पाकरे मासे व्यथार्तस्यास्य भूभुजः।
दातुर्जातु विपत्तिः स्यात्कृष्णपक्षे कथञ्चन॥ ३७५॥
ज्येष्ठशुक्लादिदिवसे गुरुवारे नरार्यमा।
वर्षान्पञ्चाशतिं भूपो राज्यं कृत्वास्तमाययौ॥ ३७६॥
तस्मिन्याते दिवं लोकः सशोको विललाप तम्।
हा कं श्रयाम भवति नाकलोकमुपस्थिते॥ ३७७॥
अस्मान्को नृपते कृच्छ्रात्त्वां विना पालयिष्यति।
मृगाङ्कसुन्दराकार महासेनपराक्रम॥ ३७८॥
महम्मद महीपाल महीं हित्वा क्व यास्यसि।
इति प्रलापमुखरे राजद्वारे स्थिता जनाः॥ ३७९॥
संस्थितस्य नृपस्यादुर्वाष्पैरिव जलाञ्जलीन्।
कर्णीरथमथारोप्य शवं बृहन्मृताजिरे।
दत्तस्कन्धाः पितुः पार्श्वे गोगर्ते मन्त्रिणः क्षिपुः॥ ३८०॥

क्वेदं कोमलशय्यासु नृपार्हं शयनं प्रभोः ।
क्व शर्करिलभूम्यन्तस्तमोन्धे विवरे स्थितिः ॥ ३८१ ॥
तदह्नि शोकमूकस्य लोकस्योच्छ्वसनात्परम् ।
धूमादि रन्धनाभावान्नालक्ष्यत गृहेषु तत् ॥ ३८२ ॥

॥ इति महम्मदशाहस्वर्यानम् ॥

मार्गेशेन कृताशंसः सप्रशंसोस्य मन्त्रिभिः ।
शंखशाहोयमित्याख्यां कृत्वा पुत्रोभ्यषिच्यत ॥ ३८३ ॥
नवराज्योर्जितं चैतं युवानं वीक्ष्य भूमिपम् ।
महान्तः पामराः सर्वे तुतुषू राजवल्लभाः ॥ ३८४ ॥
चिरं स्वे पैतृके राज्ये स्थाया इति जनाशिषः ।
शृण्वन्राजगृहं प्राप शंखशाहः सहानुजः ॥ ३८५ ॥
तस्मिन्राज्यस्थिते जैनपुरान्नगरमाययौ ।
काचचक्रपती रिगचक्राश्वस्तो महाबलः ॥ ३८६ ॥
दृष्ट्वा वीरं तमायान्तमुत्सभट्टान्वितस्ततः ।
मार्गेशहोस्सनः प्रायात्कीचाश्रमेध्वपान्तिके ॥ ३८७ ॥
प्रविष्टो नगरं रम्यं काचचक्रः सभाजितः ।
नृपेण तेन सस्नेहं परपक्षविमर्दनः ॥ ३८८ ॥
तथा काञ्चनचक्रेशो ज्ञात्वा दूरगताम्रिपून् ।
सबलो गर्भसोडारे निविष्टोरिजिगीषया ॥ ३८९ ॥
अत्यन्तिकस्थं बलिनं रिपुमाकर्ण्य मार्गपाः ।
चमूं निवेशयामासुस्तूर्णं जलगदान्तिके ॥ ३९० ॥
महात्मा रिगचक्रेशः काचचक्राध्वपेशयोः ।
गत्वा प्रेरितदूतः स साम कर्तुमथेष्टवान् ॥ ३९१ ॥
नगरे काचचक्रेशः क्रमराज्ये तु मार्गपाः ।
सन्तु सोहं समस्तेषामिति सांधिं व्यधादयम् ॥ ३९२ ॥

अथ मार्गेशसैन्यस्थानानीयान्तिकमात्मनः।
जैतचक्रेशमल्लेकदौलतेब्राह्मखानकान् ॥ ३९३ ॥
स्वबन्धून्काचचक्रेश आरुरोह जयी पुरम्।
निवासमकरोद्धीरो रिगचक्रालयेषु सः ॥ ३९४ ॥
काचचक्रे स्थिते राज्ञोन्तिके निर्णयकारिणि।
बलं बलवतां दृष्टं शौर्येण तु पृथग्जने ॥ ३९५ ॥
आगत्य रिगचक्रेशः काचचक्रान्तिकं तदा।
दिनान्युषित्वा ज्ञात्वास्य स्वल्पप्रेमागमत्पुनः ॥ ३९६ ॥
मार्गेशनिकटं गत्वावोचच्चक्रेशचेष्टितम्।
संमन्त्र्य वीरान्सर्वोस्तान्संघट्य्य नृपाग्रगान्।
रिगचक्रः स मार्गेशं ज्ञात्वा दुष्टमिवामयम् ॥ ३९७ ॥
कश्मीरभूमौ प्रथिता अमात्या भीमार्जुनद्रोणसमा रणेषु।
मल्लेकश्रीदौलतगाजखानचक्रेशमुख्याश्च विचारदक्षाः॥ ३९८॥
सिद्धादेशात्प्रसिद्धस्य सिद्धादेशाधिकारिणः।
श्रीमन्मल्लेकराजाननाज्ञुकस्य मुखाद्यथा ॥ ३९९ ॥
विज्ञप्यन्तेत्रदेशीयैः कान्दिशीकैर्बलातुरैः।
सर्वैर्जनपदैर्दीनैर्दुरातङ्ककलङ्कितैः ॥ ४०० ॥

तथा हि

जैनशाहे दिवं याते दुर्बला बलवत्तरैः।
पीडिताः कान्दिशीकाश्च जना दुर्दण्डतो गताः ॥ ४०१ ॥
श्रीसैफडामरेन्द्रेण नृपामात्येन पालिता।
लालिताथ प्रजा नित्यं दुर्व्यवस्थानिवारणात् ॥ ४०२ ॥
पुण्यपापपरीपाकान्मन्त्रिभिरन्तरान्तरात्।
पोषिता शोषिता लोकाः सद्विचारा विवेकतः ॥ ४०३ ॥

भानुरिव ततश्चक्रपतिर्मल्लेककाञ्चनः ।
उदेत्य मन्त्रिवीथीं तां नृपादेशादभूषयत् ॥ ४०४ ॥
विचारनिरतेमुष्मिन्नासीने राजमन्दिरे ।
बलं बलवतां दृष्टं शौर्येण तु पृथग्जने ॥ ४०५ ॥
वैमत्यान्महतां पापाद्भिशां च तत उत्थिताः ।
मुगलातङ्कदुर्भिक्षदोषास्तस्मिन्बहिर्गते ॥ ४०६ ॥
मार्गेशाब्दालकानीतो मीरेजोगणयत्ततः ।
अप्राप्तानिव प्राप्तान्स कश्मीरांश्चक्रिणो भयात् ॥ ४०७
काचचक्रेशमल्लेके हिन्दुवाटे गते दिवम् ।
काश्मीरिकाणां बाह्यानामभूत्कलुषितं मनः ॥ ४०८ ॥
तदाकर्ण्याथ मीरेजहैदरोचीकरन्महान् ।
कुलागतमिवास्वस्थं तदा कश्मीरमण्डलम् ॥ ४०९ ॥
चक्रेशेन्तर्हिते भूमौ मुगला दैत्यरूपिणः ।
विचेरुः शारदापीठे निःशङ्कमकुतोभयाः ॥ ४१० ॥
मीरेजमधुगोलस्य कश्मीरस्थस्य चान्तिकम् ।
आययुः परदेशेभ्यो मुगलाः सरघा इव ॥ ४११ ॥
बलेषु वर्धमानेषु तेषु यातीतवार्षिका ।
लोत्रप्रतिग्रहोपात्ता भूर्हृता तैर्नियोगिभिः ॥ ४१२ ॥
दिवानैर्म्लेच्छसंख्येशैर्लिखिता मुसुलाक्षरैः ।
भूमिः समग्रराष्ट्राणां हृत्वाप्यायं प्रजास्वपि ॥ ४१३ ॥
इतीव भूर्नभोमासि साध्वीवाथ व्यकम्पत ।
द्वाविंशेब्दे जनान्नीचान्हताप्यायानवेक्ष्य सा ॥ ४१४ ॥
प्रनष्टमुगले देशे भूमीच्छुरखिलो जनः ।
काश्मीरिकाणां विजयाद्भूयोभूदर्थलिप्सया ॥ ४१५ ॥

तुरुष्कसाहचर्यात्ते काश्मीरा नात्यजंस्त्रयम्।
वेशो भूमिर्भोजनं च चिकित्सादण्डमद्भुतम्॥ ४१६॥

दृष्टाशुभोपि लोकोयं नामुञ्चद्धृदयाद्दृढाम्।
दुर्वासनां महावैद्याश्चिकित्सां शास्त्रगामिव॥ ४१७॥

दुराचारादियं भूमिर्वायुक्रान्तेव भूरिशः।
त्रिंशेब्दे चाश्वयुज्मासे कम्पिता स्वामिनो मुहुः॥ ४१८॥

आर्तत्राणान्महीदानान्मुक्तेर्लोत्रप्रतिग्रहे।
मोक्षाच्चातिथिसत्काराद्ग्रहो धर्मेण शाम्यति॥ ४१९॥

अदृष्टविग्रहेशेन स्वेच्छाक्रीडनका इव।
धात्रा विनिर्मितः स्रष्टुं जगद्भावादमाभिधः॥ ४२०॥

दृष्ट्वैनं स्त्रीयुतं चाग्रे प्रादुरासन्दशाष्ट च।
सहस्राण्यालयान्यस्य विभोर्दुर्घटलीलया॥ ४२१॥

अर्शकोर्शे दिवः सप्त भुवः षट्त्रिंशदावृतम्।
जगत्स्फारमवेक्ष्यार्षिरूपाः सृष्टाः पिगम्बराः॥ ४२२॥

विभुधामाश्रयी श्रीमान्त्रसूलोद्य पिगम्बरः।
दिगम्बरेच्छया लोकक्रुपालो मानवो जयेत्॥ ४२३॥

खदैवसृष्टिभूमध्ये हिमवान्गिरिरुत्तमः।
तत्रास्ति देशः कास्कारो हारो भूमिवरस्त्रियः॥ ४२४॥

सतां सुकृतसंभारोगारः सर्वधनुष्मताम्।
नानाद्रुमलताकारो विहारः सर्वसंपदाम्॥ ४२५॥

मेधावी रेवतीशप्रथितभुजबलः सद्धयः श्रीधरश्च
भूपालेन्द्रः प्रतापोर्जितनिजयशसा भूषितो नामवर्णैः।
जीयात्तद्देशजन्मार्जितबहुवसुधाप्रोद्गतो भानुमूर्तिः
काश्मीरान्योजनायानयतिमिरहतान्योजनायेव नष्टम्॥४२६॥

मीरीजहैदरमहम्मदवाक्प्रमाणो
जीयाच्चिरं वसुमतीमवतीर्ण एव ।
कर्तुं सतीसरसि नौशरवानतुल्यं
पूर्वोर्वरीशचरितं चिरकालनष्टम् ॥ ४२७ ॥
सर्वैः पैगम्बरवरैर्मिलितैः खदैव-
स्यादेशतस्त्विह पिगम्बरवाटिकां ताम् ।
एतां कुकृत्यचरिताख्यदवाग्निदग्धां
सत्कर्मवृष्टिनिवहैः परिपोषणाय ॥ ४२८ ॥
श्रीमत्काञ्चनचक्रपे च विधिनान्वर्थीकृताख्याक्षरा
राजिः काञ्चनदानतस्तव सदा सत्यं समीक्षामहे ।
भ्राजिष्णौ करपद्मकर्णनिचयेभिज्ञानमेतादृशं
सव्यः सोस्तु करः परोपकृतयेजस्रं सहस्रं समाः ॥ ४२९ ॥
श्रीमन्मार्गपतीश तावकयशः शुभ्रं विलोक्याबहि-
श्चक्राधीश समागतो ऋतुपतिस्त्वां सेवितुं सर्वतः ।
कुन्दैः कञ्जलकर्णिकारकुटजैः स्रग्भिस्तथा मञ्जरी-
पुष्पैः षट्पदकोकिलास्वनभरैः कुर्वञ्जयोद्घोषणाम् ॥४३०॥
सन्तः प्रमुदिताः केन न केन तव कर्मणा ।
वसन्तो भवतामस्तु वसन्तः शुभकृत्सदा ॥ ४३१ ॥
(एषुश्लोकेषु कवेरेव ग्रामीणतां निरूप्य लेखके दोषो नोपचार्यः ।)
जिष्णुः संतापितारातिः कालखड्गधरो रणे ।
प्रणेता जगतां प्राणः शंकरो विनतात्मनाम् ॥ ४३२ ॥
कलावान्राज्यराड्गास्वान्गुरुकाव्यज्ञमङ्गलः ।
जीयाद्भूभूषणो नित्यं गाजशाहो महारथः ॥ ४३३ ॥
मुन्यग्निसंख्ये वर्षे च शुचौ मास्यसितेतरे ।
अष्टम्यां राजहोमाय पुत्रस्याकबरभूभुजः ॥ ४३४ ॥

मुगलेशस्य सेनानीकरबाहुधरान्वितः।
नाजुकशाहः पाषण्डदेशं प्राप्तो जिगीषया ॥ ४३५ ॥
संमन्त्र्य गाजशाहोथ श्रुत्वा तद्बाह्यचेष्टितम्।
मल्लेकहोसचक्रेशं बाह्यदेशं व्यसर्जयत् ॥ ४३६ ॥
लौलमल्लेकचक्रेशपेजाहैबतखानकैः।
खुजाफतिहमीरालकाद्यैर्मन्त्रिवरैर्युतः ॥ ४३७ ॥
वीरायुतैः पत्तिभिश्च निःसंख्यैः पटमण्डपैः।
महात्मा होसमल्लेको निविष्टः सुबलान्तरे ॥ ४३८ ॥
तावन्मुगलसैन्येन महता बाह्यभूर्वृता।
विमला सज्जनस्येव चित्तभूः कलुषैर्मलैः ॥ ४३९ ॥
ततो राजपुरीदेशमशेषमावृणोद्बलैः।
मुगलेशस्य प्राक्सैन्याः पाषाण्डैरकृतादरैः ॥ ४४० ॥
क्रुद्धः काश्मीरिको राजाकर्ण्य शूरपुराद्बहिः।
सबलो हिन्दुवाटं स प्रयातस्तज्जिगीषया ॥ ४४१ ॥
ऊर्जितां गाजशाहस्य चमूं दृष्ट्वा महीयसीम्।
मार्दवं म्लेच्छसेनागाद्धिमानीवार्करश्मिभिः ॥ ४४२ ॥
दृष्ट्वोर्जितं गाजशाहबलमाजग्मतुर्द्रुतम्।
फत्तेमल्लेकलुहरमल्लेकावस्य चान्तिकम्।
रुद्धेषु दुर्गमार्गेषु प्रभूतं मौगलं बलम् ॥ ४४३ ॥
वीरैः फतिहखानाद्यैर्गर्जद्भिराकुलीकृतम्।
खुजहाजकयोसूफचक्राद्या मुगलान्विताः ॥ ४४४ ॥
साम राजपुरीराज्ञा गाजीशाहभयात्कृतम्।
नौशाहारस्थिते शाहनाजुके मुगलास्तथा ॥ ४४५ ॥
उवाह संधिबन्धेन कालं दुर्गादिकर्मभिः।
विसृष्टो गाजभूमर्त्रा दूतेशो मुखवाचिकम् ॥ ४४६ ॥

करबाहुधरादीनां प्राह गत्वा सभान्तरम् ।
भोभो म्लेच्छपते कस्मादकस्मात्प्रबलैर्बलैः ॥ ४४७ ॥
आयाताः केन विश्वस्ता अज्ञातनृपविक्रमाः ।
अथवा प्राक्तनी शैली शाहियुद्धं नु विस्मृतम् ॥ ४४८ ॥
बलद्वयवधात्पापं युष्माकं परिणंस्यति ।
यदि शक्तिः किमेतैः स्याद्दुर्गग्रन्थ्यादिकर्मभिः ॥ ४४९ ॥
विधिर्ददाति यद्यस्य स तत्फलमथाश्नुते ।
चक्रिराजानकाद्या वा स्थिता अंशहरा इतः ॥ ४५० ॥
देशत्के मुगलाः को वा खुजहाजी भविष्यति ।
इत्युक्तो लेखहारेण खुजहाज्यब्रवीदिदम् ॥ ४५१ ॥
शासनमक्भराख्यानं मुगलेशस्य वच्म्यहम् ।
चक्रेशभूपं दातारं गुणज्ञं धन्विनां वरम् ॥ ४५२ ॥
विचारे नौशिरोवानं कया स्तुत्या स्तुवीमहे ।
काश्मीरिकाणां देशांशो म्लेच्छानां पारितोषकम् ॥ ४५३ ॥
दत्त्वा मुगलराजस्य चेतःशुद्धिर्विधीयताम् ।
अथवा देशधाटीभिः किं स्यात्प्राकृतमेतया ॥ ४५४ ॥
युद्धेन वीरहानिः स्याज्ज्ञाता सर्वस्य भूमिपः ।
दृष्टाः श्रुताः स्मृता नैव गाजिशाहस्य संनिभाः ॥ ४५५ ॥
योद्धुं दिगन्तरं को नु यात एतत्परः समः ।
दूतात्प्रत्यागताच्छ्रुत्वा क्रोधविस्मयवान्नृपः ॥ ४५६ ॥
अवरूढोद्रितुङ्गात्स समारूढो महद्यशः ।
श्रीमच्छृङ्गारमल्लेक आलीमल्लेक इत्यपि ॥ ४५७ ॥
खना अह्मदयोसूफइबशाहादयः सुताः ।
खानः स शाहिभाजोपि वृतश्चान्यैश्च मन्त्रिभिः ॥ ४५८ ॥

स्वस्वसैन्यसमुन्नद्धैः कश्मीरेन्द्रो विभूषितः।
सहस्रैरश्ववाराणां वाजिभिर्वेगराजिभिः॥ ४५९॥
शार्ङ्गत्सरुगदाप्रासशक्तितोमरभूषितैः।
नागरन्ध्रगतोफाकनामाश्मरन्ध्रगायुधैः।
पदातिलक्षैः संनद्धैः शत्रुसेनान्तिकेवसत्॥ ४६०॥
अन्तिकादन्तिकं व्यूहैर्निविष्टे सैन्ययोर्द्वये।
पारावारगता योधा रणरङ्गमभूषयन्॥ ४६१॥
हासदुन्दुभिनादेन कर्णतालैश्च हेषकैः।
गजाश्वानामश्मरन्ध्रगर्जनैस्तर्जयन्निव॥ ४६२॥
अथ पत्तिसहस्रेण पुरोगेन प्रभूषितः।
प्रवीरो गाजिशाहोत्र समरारम्भमग्रहीत्॥ ४६३॥
दृष्ट्वा वीरं तमायान्तं केचिन्मुगलपुङ्गवाः।
मनःशैथिल्यमादाय शनैर्युद्धाय निर्ययुः॥ ४६४॥
नृपाग्रे म्लेच्छवीराणां स्वामिभक्त्या पुरो गताः।
मुण्डानि चिच्छिदुर्युद्धे शरावाणीव चक्रतः॥ ४६५॥
रणे हैवतखानेन प्राणदानेन तत्क्षणम्।
विवाहोजनि स्वःस्त्रीणां पञ्चबाणेन योषिताम्॥ ४६६॥
वीरव्रतं पुरोगानामद्भुतं च तपः प्रभोः।
विचिन्त्य मुगलाश्चेलुर्हतशेषा यथागतम्॥ ४६७॥
स्वप्राणवेतनैर्युद्ध्वा परोस्त्रव्यवहारिणः।
विजित्य कीर्त्युपचयं स्वर्यातस्तद्बलद्वयात्॥ ४६८॥
पत्तीनामद्भुतं वीर्यं वीक्ष्य म्लेच्छबलान्तरात्।
धाट्यास्तं रूप्यकुप्यादि तद्राज्ञानुग्रहीकृतम्॥ ४६९॥
स्वसैन्यापचयं शत्रुसेनोपचयमेव च।
विचिन्त्य मुगला याता वाणिजा इव वेतने॥ ४७०॥

स रराज पुरीराजः पाषण्डान्करदायिनः ।
कृत्वा प्रत्याययौ गाजशाहः स विक्रमोर्जितः ॥ ४७१ ॥
नित्यं जेता चिरं स्थेया राजन्साम्राज्यदीक्षितः ।
इत्याशिषो जनाच्छृण्वन्काश्मीरान्तर्नृपोविशत् ॥ ४७२ ॥
वेदैः षट्स्वरसैः पदक्रमयुतैर्वेदान्तसिद्धान्तकै-
स्तर्कव्याकरणैः पुराणपठनैर्मन्त्रैः षडङ्गागमैः ।
शैवैर्वैष्णवसौरबौद्धसहितैश्चित्रैर्विहारैर्मठै-
र्द्राक्षाकुङ्कुमसस्यशालिनिवहैः पुष्पैः सुगन्धैरपि ॥ ४७३ ॥
पौराणश्रुतितर्कशास्त्रनिचयैः किं चाग्निहोत्राङ्कितै-
र्विप्रैर्ध्यानतपोजपादिनिरतैः स्नानार्चनाद्युत्सुकैः ।
नागैः कोटियुतैस्तथा हरिहरैर्गन्धर्वविद्याधरैः
स्वर्गस्थामृतखण्डशीतलजला काश्मीरभूरुत्तमा ॥ ४७४ ॥
चत्वारिंशदथापि पञ्च गिरिशाः षष्टिश्च चक्रायुधा
ब्रह्माणस्त्रय इत्यनादिनिधना द्वाविंशतिः शक्तयः ।
नीलादीनि शतानि सप्त फणिनां तीर्थौकसां कोटयो
विख्याताश्च चतुर्दशोत्तमतराः काश्मीरभूमण्डले ॥ ४७५ ॥
अष्टादशचमूभर्ता योभवद्धस्तिनापुरे ।
वीरो युधिष्ठिरभ्राता भ्राता धुर्य इवार्जुनः ॥ ४७६ ॥
स दिग्विजयरागेण भुवं जित्वाखिलामिमाम् ।
पातालमविशद्वीरव्रतखण्डनशङ्कितः ॥ ४७७ ॥
तत्र नागपुराण्याशु जित्वानभिमुखो रणे ।
प्राप्य नागसुतां वीरो वर्षं तत्राभजत्सुखम् ॥ ४७८ ॥
आगतोथ गते काले बहले पुनरप्यसौ ।
दिग्जयाय जगामाशु स्वपुत्रेण हतो रणे ॥ ४७९ ॥

जीवायितस्ततस्तूर्णं परिज्ञाय स्वभार्यया।
हृष्टश्च सुतवीर्येण तेनैव समुपाययौ ॥ ४८० ॥
अथ कालेन नीतेस्मिन्नर्जुने तत्सुतौ भुवम्।
विभज्य दधतुः सर्वां परीक्षिद्भ्रुवाहनौ ॥ ४८१ ॥
आभीरदेशे निवसन्सार्द्धं शतमसौ समाः
षोडशोनं शतं यज्ञे सुतानां वीर्यशालिनाम् ॥ ४८२ ॥
तेषामपि सुतांस्तद्वत्तत्सुतांश्च सहस्रशः।
आसंत्यज्य पुनर्योगी मातामहपुरं ययौ ॥ ४८३ ॥
ततस्तेतिबलोन्मत्ताः परस्परविरोधिनः।
प्रजानां विदधुः पीडां मर्यादां च न्यवारयन् ॥ ४८४ ॥
आज्ञातिक्रमणात्पित्रा शप्तास्ते बलदर्पिताः।
स्वनाशायाखिलान्देशान्धाटीभिः समपीडयन् ॥ ४८५ ॥
दृष्ट्वाकाशं गतः कश्चित्सिद्धस्तज्जनपीडनम्।
विज्ञप्तिमकरोच्चूर्णं दयावानीश्वरं प्रति ॥ ४८६ ॥
अथोच्चचार नभसो वागेवमशरीरिणी।
सृष्टः सागरमध्येस्ति सासिरेव यमोपमः ॥ ४८७ ॥
स गृहीतस्ततस्तेन रोमदेशे च वर्धितः।
तेनासिना हयारूढः कण्टकोद्धरणं व्यधात् ॥ ४८८ ॥
लोत्रीकश्चक्रवर्त्ती स सर्वभूतालिजित्वरः।
म्रियमाणो न केनापि दृष्टोभून्मित्रबन्धुभिः ॥ ४८९ ॥
ये लोकोत्तरकर्म कर्तुमतुलं सृष्टाः परं वेधसा
तेषां तादृशमेव सोथ कृतवाञ्जन्मावसानं तथा।
दृष्टान्तस्तु सहस्ररश्मिरिह यस्त्रैलोक्यदीप्तिप्रदो
ज्ञातः केन कुतोभ्युदेति यदि वा कुत्रास्तमभ्येति च ॥४९०॥

तद्वंशजन्मा पार्थोभूद्दूरं गत्वा रुषा पितुः ।
पञ्चगह्वरभूमध्ये यो गह्वरपुरं व्यधात् ॥ ४९१ ॥
तद्वंश्यः कुरुशाहोभूद्यः सर्वां दिशमुत्तराम् ।
जित्वा सपश्चिमां चक्रे धनुर्देवालयं निजम् ॥ ४९२ ॥
ताहिरालसुतस्तस्य लोचनत्रयभूषितः ।
यथेच्छालाभमाहात्म्ययुक्तो लोभविवर्जितः ॥ ४९३ ॥
त्रिकालदर्शी चाद्दष्टपालितोतिबलान्वितः ।
दयालुः सततं योगी वदान्यः सर्वशास्त्रवित् ॥ ४९४ ॥
तस्य प्रभावतो राज्यं कश्मीरेषूपभुञ्जते ।
कश्मीरभूमिपालानां यः स्यादशुभचिन्तकः ॥ ४९५ ॥
दिगन्तरीयभूपालस्ताहिरालो निहन्ति तम् ।
काश्मीराः पार्वती तत्र राजा ज्ञेयो हरांशजः ॥ ४९६ ॥
इत्येतत्प्रत्ययायैव यस्यासील्लोचनत्रयी ।
नास्य शत्रुरभूत्कश्चिन्न चासौ कस्य चिद्रिपुः ॥ ४९७ ॥
दैवीमप्यापदं लोके तपसैव न्यवारयत् ।
ताहिरालकुलोत्थानां न हि गृह्णाति यो नृपः ।
सोवश्यं संपदः स्वस्या ददात्येव जलाञ्जलिम् ॥ ४९८ ॥
द्विस्त्रिराकर्णयामास गिरं खादुदितामसौ ।
गृहाण राज्यं कश्मीरेष्विति नैवान्वमन्यत ॥ ४९९ ॥
शाहमीरः सुतो योस्ति तवात्यन्तनयज्ञधीः ।
स विसृज्यस्त्वया यस्मादात्मा पुत्र इति श्रुतिः ॥ ५०० ॥

॥ इति ताहिरालवंशवर्णनम् ॥

राज्यं नाजुकखानाय दत्त्वा दौलतचक्कुकः ।
स्वयं न बुभुजे देशं निर्देशेन ह्यशेषतः ॥ ५०१ ॥

कम्पितो म्लेच्छलोकेन नवे तस्मिन्नराधिपे।
रज्यते स्म जनो नित्यं शिशिरेण मधाविव ॥ ५०२ ॥

नाजूकशाहे तद्राज्यं गृहीते निर्वबुर्जनाः।
उदयाद्रिं गते सूर्ये प्रातः पद्माकरा इव ॥ ५०३ ॥

मिलितेष्वथ सर्वेषु परस्परविरोधिषु।
पुनर्ग्रामविभागेन शनैर्वैरमजायत ॥ ५०४ ॥

एदेराणादयो लोका मिर्जाहैदरसेवकाः।
चक्कजातिविरोधेन सदाशिवपुरेवसन् ॥ ५०५ ॥

वितस्तातीरमाश्रित्य समुद्रामठवासिनः।
युयुधुर्दहनास्त्रेण चक्कदौलतकादयः ॥ ५०६ ॥

मासमेकं कृते युद्धे दहनास्त्रशरादिभिः।
दौलतचक्कलोकेन विजयो विहितस्तदा ॥ ५०७ ॥

अत्रान्तरे स होमायः पातिशाहोभवद्भुवि।
नमत्समस्तभूपालमौलिघृष्टपदाम्बुजः ॥ ५०८ ॥

तेन निर्वापितो राज्ञा मिथो वैरमहानलः।
प्रजानां हृदयोन्माथी न दारिद्र्यदवानलः ॥ ५०९ ॥

अजहोमायनामासीद्वैरी तस्य महीभृतः।
स देशं दुर्गमं श्रित्वा स्थातव्यमित्यचिन्तयत् ॥ ५१० ॥

किंतु नेष्यामि कश्मीरदेशं पर्वतदुर्गमम्।
तत्र स्थितं न बाधेत मां होमायमहीपतिः ॥ ५११ ॥

इत्युक्त्वा चलिते तस्मिन्नजहोमायभूपतौ।
काश्मीरैः सह सङ्ग्रामो बभूव नगमस्तके ॥ ५१२ ॥

ततः काश्मीरलोकेन पर्वतोपरिवासिना।
अजहोमायभूपस्य निहतं सर्वसैनिकम् ॥ ५१३ ॥

अयं तु नृपतिः शश्वत्पाति कश्मीरमण्डलम् ।
नाजूकनृपतौ साक्षाद्दिग्दाहः सर्वतोभवत् ॥ ५१४ ॥
द्वितीये प्रहरे रात्रेः प्रसुप्ते सकले जने ।
बभूव धरणीकम्पो मथितानेकमानवः ॥ ५१५ ॥
भूमिरन्ध्रेषु जातेषु भूकम्पेन पदेपदे ।
पथि संचरतां मार्गः पान्थानां विस्मृतोभवत् ॥ ५१६ ॥
भूमिरन्ध्रगते गेहे रात्रौ निर्गमनोत्सुकाः ।
उपर्याच्छादनं भित्त्वा जनाः प्रातर्विनिर्ययुः ॥ ५१७ ॥
वितस्तातोयपतिताद्गृहात्काष्ठमयात्तदा ।
सप्तक्रोशेष्वतीतेषु प्रबुद्धा निर्ययुर्जनाः ॥ ५१८ ॥
हसैनपुरहोसैनपुरयोर्दूरवर्तिनोः ।
नदीमुल्लङ्घ्य भूकम्पे व्युत्क्रमोद्यापि दृश्यते ॥ ५१९ ॥
क्वचिद्धा तातेति क्वचिदपि च हा मातरिति वा
क्वचिद्धा मित्रेति क्वचिदपि च हा भ्रातरिति वा ।
तदा तत्रत्यानां करुणरुदितं दुर्व्यसनिनां
निशम्याभूद्वज्रप्रतिहतमिवातीव हृदयम् ॥ ५२० ॥
निर्घातध्वानभीमे नभसि हतगतौ तारकाणां समूहे
कल्लोलालोलतुम्बीफलवदविरतं चञ्चले भूमिखण्डे ।
पुत्रे मित्रे कलत्रे सुजनसहृदये द्रव्यजाते जनानां
भूकम्पातङ्कशङ्का प्रचलिनमनसां स्नेह आसीन्न तेषाम् ॥५२१॥
विजयेश्वरमार्तण्डवराहक्षेत्रवासिनाम् ।
पुण्यतीर्थप्रभावेन भूकम्पान्नाभवद्भयम् ॥ ५२२ ॥
पुनःपुनः प्रतिदिनं भूमिकम्पे प्रवर्तिते ।
उवास सकलो लोकः पटमण्डपपङ्क्तिषु ॥ ५२३ ॥

याते बहुविधे काले निवृते सकले जने।
ररक्ष सकलं देशं सम्यग्दौलतचक्रकः ॥ ५२४ ॥

निरुद्ध्य जलसंचारं वेतालाङ्गणभूमिषु।
विदधे निजमास्थानं सस्यक्षेत्रचिकीर्षया ॥ ५२५ ॥

एतादृशे कृते कार्ये क्रुद्धवेतालचोदिताः।
गृहे दौलतचक्रस्य पतान्तिस्म शिला निशि ॥ ५२६ ॥

अदृष्टदेवताक्षिप्तशिलावर्षणसंकुलम्।
राजद्वारं निशीथिन्यामभवद्विस्मयावहम् ॥ ५२७ ॥

ईदृशं प्रत्यहं केन कृतं पाषाणवर्षणम्।
इत्थं परस्परं लोकः कथयामास विस्मितः ॥ ५२८ ॥

तूलमूलाभिधे ग्रामे सम्यग्ज्ञानपरायणः।
अभिमन्युरिति ख्यातः साधुरासीन्महातपाः ॥ ५२९ ॥

एकदा तद्गृहं गत्वा साधुं दौलतचक्रकः।
उवाच निर्भयं प्राज्यं कथं राज्यं भविष्यति ॥ ५३० ॥

इत्युक्ते तेन सोवादीन्निवारय मदाज्ञया।
वार्षिकं ब्राह्मणकरं तेन सिद्धिर्भविष्यति ॥ ५३१ ॥

इत्थं निवेदिते तेन साधुना म्लेच्छसत्तमः।
उवाच वचनं सम्यक्शृणु वच्मि महामुने ॥ ५३२ ॥

तूलमूलाभिधं ग्राममर्पयिष्यामि तेधुना।
विप्रदण्डं कथं म्लेच्छो वारयामि त्वदाज्ञया ॥ ५३३ ॥

इत्थं दौलतचक्रेन वचने कथिते सति।
अभिमन्युर्बभूवासौ रोषव्याकुलमानसः ॥ ५३४ ॥

तेनाशु ब्राह्मणकरो यदा नैव निवारितः।
साधुर्दौलतचक्रं तं शशाप रोषसंयुतः ॥ ५३५ ॥

समुद्रमध्यमासाद्य चन्द्रार्कौ ते पतिष्यतः ।
इति शापप्रनष्टश्रीर्ययौ दौलतचक्कः ॥ ५३६ ॥
वर्षमेकं कृते राज्ये हबीबाभिधभूभृता ।
जग्राह तत्पदं लोभाद्गाजीखानस्ततः स्वयम् ॥ ५३७ ॥
तत्प्रतापाग्निदग्धेषु सिक्ताः स्त्रीनयनाश्रुभिः ।
गृहेषु वैरिणां नित्यमुत्पद्यन्ते तृणाङ्कुराः ॥ ५३८ ॥
रुदच्छात्रवनारीणामश्रुवर्षाकुलेष्वपि ।
ज्वलत्यपूर्वो गेहेषु यत्प्रतापदवानलः ॥ ५३९ ॥
अथ दिग्दाहभूकम्पान्समीक्ष्य पृथिवीभृता ।
पृष्टा वाक्यमिदं प्राहुर्गणका गणनापराः ॥ ५४० ॥
देशेऽस्मिंस्तव संभविष्यति महद्युद्धं समृद्धं प्रभो
सङ्गामेष्वपि निःसरिष्यति महावेगा च रक्तापगा ।
लोकानां प्रचरिष्यति प्रतिपदं दुर्भिक्षपीडाथवा
तस्माच्चारुविचारणेन धरणीं भूपाल भोः पालय ॥ ५४१ ॥
अथाययौ स्वसेनाभिर्मिर्जाहैदरसेवकः ।
करबद्दुरनामासौ भूयो देशजिगीषया ॥ ५४२ ॥
निशम्यैतादृशीं वार्तां गाजशाहिर्विनिर्ययौ ।
तुरङ्गमखुरोद्धृष्टचूर्णीकृतमहीधरः ॥ ५४३ ॥
स समाश्रित्य भूपालो देशं राजविराभिधम् ।
पदातिमार्गलोकानां समराय समादिशत् ॥ ५४४ ॥
राजवीराभिधे देशे मिलिते राजकद्वये ।
भीतिर्बभूव लोकानां द्विराजनामशङ्किनाम् ॥ ५४५ ॥
रणे विलोक्य सर्वासां पत्तीनां गतिचातुरीम् ।
बभूव वायुवत्कम्पो भीतिचञ्चलमानसः ॥ ५४६ ॥

करवह्दुरो दृष्ट्वाथ काश्मीरशरवर्षणम् ।
स क्रुद्धः करवह्दुरः पत्तिलोकविलोकनात् ॥ ५४७ ॥
अन्धकार इव प्रातः साक्षादरुणदर्शनात् ।
तस्मिन्पलायिते देशान्निर्ववौ सकलो जनः ॥ ५४८ ॥
सर्पे विनिर्गते गेहात्कुटुम्बमिव तत्क्षणम् ।
तदास्य ववृधे तेजः करैर्जज्वाल मेदिनी ।
विससार प्रतापश्च ग्रीष्मकाले रवेरिव ॥ ५४९ ॥
अत्रान्तरे महारोषजर्जरीकृतमानसाः ।
हवीचक्कादयो लोकाश्चस्कन्दुर्नगरान्तरम् ॥ ५५० ॥
सदाशिवपुरे दुर्गं कृत्वा तिष्ठत्सु वैरिषु ।
दिद्दामठान्तिके तस्थौ भूपो युद्धचिकीर्षया ॥ ५५१ ॥
युद्धेस्मिन्हाटके स्वामिसदाशिवपुरस्थयोः ।
वितस्ता सेनयोर्मध्ये वारयन्तीव सा बभौ ॥ ५५२ ॥
नदीमुल्लङ्घ्य भुपालो युद्धं कृत्वा महत्तरम् ।
सितानदीप्रवाहेषु हवीचक्कममारयत् ॥ ५५३ ॥
गते बहुविधे काले नोस्सीचक्कप्रचोदितः ।
आययौ मुगलस्वामी श्रीकश्मीरजिगीषया ॥ ५५४ ॥
शाह अब्दुलमालीति नाम यस्याभवद्भुवि ।
स काश्मीरान्तरं प्राप बहुलोकसमन्वितः ॥ ५५५ ॥
तत्तदागमनं श्रुत्वा सैन्येन महता वृतः ।
आससाद स भूपालः परिहासपुरान्तिकम् ॥ ५५६ ॥
कृते बहुविधे युद्धे सकले सैनिके मृते ।
शाह अब्दुलमाली स चलाल निजवर्त्मना ॥ ५५७ ॥
बभूवुः समरे तत्र यवना विगतासवः ।
यमस्तुतोष रक्तौघव्याजेनाधिगतासवः ॥ ५५८ ॥

आनीतैः समरस्थानाद्भूपालो नगरान्तरे ।
गृहमुट्टङ्कयामास मृतमानवमस्तकैः ॥ ५५९ ॥
एकदा सप्तवर्षस्य बालस्योन्मुष्णतः फलम् ।
कृपां विहाय भूपालः करं चिच्छेद तत्क्षणम् ॥ ५६० ॥
चौरे मुष्णति कस्मिंश्चिन्मीनान्ग्रामनिवासिनाम् ।
बलाज्जहार भूपालः स्वर्णमुद्राशतद्वयम् ॥ ५६१ ॥
मातुलं स्वं जिघांसन्तं यौवनस्थं प्रतापिनम् ।
क्षणाज्जघान भूपालः स्वसुतं हैदराभिधम् ॥ ५६२ ॥
निहते स्वसुते तेन यौवनस्थे दुरात्मना ।
हतः पुत्रोप्यनेनेति हाहाकारो महानभूत् ॥ ५६३ ॥
अष्टादशाभवंस्तस्य युवराजस्य मन्त्रिणः ।
स ताञ्जघान भूपाल उन्मत्त इव राक्षसः ॥ ५६४ ॥
एकदा कुष्ठरोगेण बहुलेन महीपतिः ।
बभूव विगतच्छायो ग्रहणेनेव चन्द्रमाः ॥ ५६५ ॥
कण्डूः कीटकृता देहे पूयशोणितनिर्गमः ।
नरके यानि चिह्नानि तान्यासंस्तस्य जीवतः ॥ ५६६ ॥
कीटो जघास मांसानि पीत्वा तत्पूयशोणिते ।
नरकादधिका पीडा बभूवैतस्य जीवतः ॥ ५६७ ॥
हा तात मित्र हा पुत्र मम कष्टमुपस्थितम् ।
इति क्रन्दितमाकर्ण्य को नाभूद्दीनमानसः ॥ ५६८ ॥
इति स्पष्टमहाकुष्ठनिपीडितकलेवरः ।
सह संसारलोभेन प्राणांस्तत्याज भूपतिः ॥ ५६९ ॥
मृतस्य तस्य भूपस्य भ्राता होसेनखानकः ।
निखन्य भूतले सम्यङ्निर्ममे मृतसंस्कृतिम् ॥ ५७० ॥

अकस्माद्भूतलं तत्र जज्वाल नरकाग्निना।
धूमेनोत्पतता कुर्वद्विस्मितां जनसंततिम् ॥ ५७१ ॥
निःश्वास इव कालेन पीड्यमानस्य भूभृतः।
उत्तस्थौ सर्वतो धूमः सर्वलोकविलोकितः ॥ ५७२ ॥
रात्रौ तद्भूतलं गत्वा पीड्यमानस्य भूभृतः।
शुश्राव सकलो लोको यमकिङ्करताडनम् ॥ ५७३ ॥
तेनोप्तं यादृशं बीजं तादृशं लभ्यते फलम्।
इत्थं परस्परं लोको वदति स्म सविस्मयः ॥ ५७४ ॥
वर्षद्वयान्तरे कृत्वा राज्यं पापमलीमसम्।
कुष्ठरोगविशीर्णाङ्गो गाजिशाहिर्ममार सः ॥ ५७५ ॥
हा कथं तेन भूपेन कृत्वा पापमहर्निशम्।
अल्पकालप्रसङ्गेन नाशिता बहुवत्सराः ॥ ५७६ ॥
स्वर्याते नृपतौ भ्राता राज्यं होसेनखानकः।
जग्राहास्तं गते चन्द्रे पूर्वाद्रिमिव भास्करः ॥ ५७७ ॥
राज्यमाश्रित्य भूपालो दुर्विचारदवानलात्।
प्रजा निर्वापयामास ग्रीष्मर्त्ताविव तोयदः ॥ ५७८ ॥
सदा प्रत्यर्थिदानेन लक्ष्मीस्तेन वशीकृता।
तदा प्रत्यर्थिदानेन कीर्तिर्दूरतरं गता ॥ ५७९ ॥
चिक्रीडं सह कान्ताभिर्भूपः पीतनवासवः।
सुखं तत्सदृशं स्वर्गे स चकार न वासवः ॥ ५८० ॥
तद्गृहे गुणबद्धेव लक्ष्मीरासीदनन्यगा।
तां विलोक्य तथाभूतां कीर्तिर्भीत्येव साचलत् ॥ ५८१ ॥
तदीयगृहमाश्रित्य प्राप्तसर्वमनोरथः।
याचको नाभवत्प्रीतो दानेन दयया च कः ॥ ५८२ ॥

सततं यस्य पादाब्जसमस्तन्यस्तमस्तकः ।
अवाप परमां लक्ष्मीं लोकः शोकविवर्जितः ॥ ५८३ ॥
तस्मिन्रक्षति कश्मीरदेशं नित्यं विशेषतः ।
अभूत्पुष्पफलोत्पत्तिपरिपूर्णा वसुन्धरा ॥ ५८४ ॥
दुर्भिक्षचोरराजभ्यो भये तेन निवारिते ।
अमंस्त स्वर्गसदृशं लोकः कश्मीरमण्डलम् ॥ ५८५ ॥
यदा यदा तेन कृतो विचार आसीन्न चौरस्य तदा प्रचारः ।
अभून्न दानावसरे विकारस्ततोभवत्तस्य यशःप्रकारः ॥५८६॥
खानेजमाननामाभून्मन्त्री तस्य महीभृतः ।
स निर्गते महीपाले चस्कन्द नगरं क्षणात् ॥ ५८७ ॥

[येनापराधः कृतस्तत्प्रातिवेश्मिकान्राजा मुमोष । प्रत्यहं शतशो लोकाञ्जघान । स्वल्पापराधेधिकं दण्डं कृतवान् । एकस्य ग्रामस्यापराधे सति बहूत्तमान्मुमोष । सुपात्रे किमपि न ददौ कुपात्रेषु समार्पयत् । स्वसेवकं जैतानामानमादिदेश । मत्पुत्रो हन्यताम् । स स्नेहवशाद्राजपुत्रं न जघान । ततो राजपुत्रं देलावरखानो जघान । लोकास्तत्रसुः । हा पाप राजन्परलोके का गतिस्तव भविष्यति । स्वसुतस्यापि कृपा न जाता । तत्सेवकानपराधरहितान्किमवधीः]

तदीयसैन्यमागत्य नाशयामास तत्क्षणम् ।
होसेननृपतिः प्रातरन्धकारमिवांशुमान् ॥ ५८८ ॥
सुखं बहुविधं तेन कृतं नित्यं महीभृता ।
संरक्षिता विधानेन प्रजाः संजातविस्मयाः ॥ ५८९ ॥
विरोधे कृतबुद्धीनां वैरसंसक्तचेतसाम् ।
मह्मदखानकादीनां चकर्ष नयनानि सः ॥ ५९० ॥

निर्गतानां महीं जेतुं भूपः संप्राप पर्वते।
एकदा शारिकास्थाने मिलिते सकले जने।
वसन्तदिवसे राजा स चकार महोत्सवम् ॥ ५९१ ॥
कुङ्कुमागुरुकर्पूरचन्दनाद्यनुलेपनैः।
रराज सकलो लोको वसन्तदिवसे तदा ॥ ५९२ ॥
विहितोन्नततुर्लक्ष्यलक्ष्यभेदाय भूपतिः।
निजसेवकलोकाय गजवाजिधनं ददौ ॥ ५९३ ॥
भूयः श्रीपञ्चमी तत्र दिवसे पृथिवीपतिः।
ददर्श मिलितं लोकं ज्येष्ठरुद्राख्यपर्वते ॥ ५९४ ॥
कश्चित्कान्तां प्रति कृतरुचिर्मञ्जरीं जिघ्रति स्म
क्षीबोन्यस्त्रीहसितसमये व्याकुलः कश्चिदासीत्।
पीत्वा कश्चिन्मधु समभवत्पुष्पसंभूषिताङ्गः
श्रीपञ्चम्यामिति कृतसुखो निर्बभौ सर्वलोकः ॥ ५९५ ॥
वराङ्गनानां नवसुन्दरीणां विलोक्य साक्षाद्बहु नृत्यगीतम्।
ददौ समासाद्य नवीननावं सुवर्णदुर्वर्णवसांसि राजा ॥ ५९६ ॥
अथापस्मारदोषोस्य प्रबभूव महीभृतः।
कलङ्क इव चन्द्रस्य निर्मलस्य शनैःशनैः ॥ ५९७ ॥
होसेनशाहिशीतांशौ ग्रस्तेपस्मारराहुणा।
दुर्विचारान्धकारेभ्यो जनो भीत्याकुलोभवत् ॥ ५९८ ॥
होसेनपृथिवीपालो राज्यं संस्थाप्य सोदरे।
कुतूहलादिव स्वर्गं ययौ दानसमर्जितम् ॥ ५९९ ॥
सप्तवर्षेष्वतीतेषु नित्यं सुखमयेषु सः।
कीदृशं स्वर्गमस्तीति दर्शनार्थं ययाविव ॥ ६०० ॥
विमानितापि द्रविणव्ययेन सहैव याता क्षितिपस्य लक्ष्मीः।
आराधितापि प्रसभं धनेन कीर्तिः कथं तिष्ठति लोकमध्ये॥६०१॥

आलिखानाश्रिते राज्ये तुतुषुः सकलाः प्रजाः ।
उदयाद्रिं गते सूर्ये प्रातः कमलिनीर्यथा ॥ ६०२ ॥

कश्मीरदेशमालोक्य सम्यग्भूपालपालितम् ।
निनिन्द सुखितो लोकः स्वर्गं दैत्येन्द्रनाशितम् ॥ ६०३ ॥

विचारे विहिते तेन दुर्जना विलयं ययुः ।
उलूका इव पूर्वाद्रिं प्रयाते दिवसेश्वरे ॥ ६०४ ॥

तस्मिन्नवसरे चौरा गुप्ता आसन्भयाकुलाः ।
मध्याह्नकाले संप्राप्ते बिलमग्ना इवाखवः ॥ ६०५ ॥

प्रत्यर्थिभ्यो ददौ दानं महासमितिसंयुतः ।
चकार सफलान्नित्यं मार्गणान्निर्गतांस्तदा ॥ ६०६ ॥

यत्सर्वेषां दयांचक्रे भीतानां धरणीपतिः ।
अतः संह्लादयांचक्रे प्रजाः संजातकौतुकाः ॥ ६०७ ॥

अकस्मादरुणीभूतं बभूवाथ दिशां मुखम् ।
भाविदुर्भिक्षसंहाररौद्रकालानलोपमम् ॥ ६०८ ॥

उत्पातलक्षणोपेता चकम्पे च वसुन्धरा ।
दुर्भिक्षभारोद्वहनादसमर्थेव साभवत् ॥ ६०९ ॥

मार्गेमार्गे तदा तस्थुरुच्छ्वनाः शवपङ्क्तयः ।
दुर्भिक्षकालमासाद्य यमस्य पटहा इव ॥ ६१० ॥

सुवर्णरजतादीनां नाभूत्तत्र प्रयोजनम् ।
किण्वमात्रं सुदुष्प्रापं चिन्तारत्नमिवाभवत् ॥ ६११ ॥

काचिच्च खिन्ना भर्त्तारं गृहिणी स्नेहवर्जिता ।
जघास भोजनं गूढं पुत्रे दूरे निवारिते ॥ ६१२ ॥

बुभुक्षासहिते पुत्रे कन्ययापि कृतार्थना ।
चकार भोजनं नारी प्राणांस्त्यजति भर्त्तरि ॥ ६१३ ॥

एकदा बहुभिर्लोकै राजद्वारि मृते गजे।
अहंपूर्विकया लोभान्मांसं नीतं पृथक्पृथक् ॥ ६१४ ॥

एकदा कन्दुकारेण हत्वा नापितबालकम्।
पक्त्वा भक्ष्यप्रसङ्गेन विक्रीतं मानुषामिषम् ॥ ६१५ ॥

विहाय स्वगृहं लोकाः पुत्रदारसमन्वितम्।
देशान्तरं तदा जग्मुः प्राणत्राणसमुत्सुकाः ॥ ६१६ ॥

तस्मिन्नवसरे वायुर्बभूवोत्पाटितद्रुमः।
कल्पान्तकालसंहारभीतलोकविचारितः ॥ ६१७ ॥

वायुनोत्थापिते धूलिराशौ वलितभास्करे।
मध्याह्नसमयः साक्षादर्धरात्र इवाभवत् ॥ ६१८ ॥

वायौ चलति चाकस्मात्सदाशववनोत्थितः।
अग्निर्जज्वाल संमूर्च्छन्निव मित्रदिदृक्षया ॥ ६१९ ॥

वितस्तातीरमुलङ्घ्य समुद्रामठसंयुतम्।
ददाह नगरं सर्वं वायुवेगानुगोनलः ॥ ६२० ॥

ज्वलन्ती नगरी रेजे वितस्ताजलबिम्बिता।
जलान्तर्दत्तझम्पेव दाहनिर्वाणहेतवे ॥ ६२१ ॥

धूमेनोत्पातिता व्योम्नि तारका पिहिता अपि।
अनेकाङ्काररूपेण बभूवुर्द्विगुणा इव ॥ ६२२ ॥

धूमेन पिहितास्तारास्तत्र व्योमनि ता बभुः।
ज्वलन्तं वह्निमालोक्य भयेनेव पलायिताः ॥ ६२३ ॥

नववर्षार्जितान्भोगान्भुक्त्वा स धरणीपतिः।
दुर्भिक्षपीडाविश्रान्तिं कर्तुमिव ययौ दिवम् ॥ ६२४ ॥

तस्मिन्प्रयाते त्रिदिवं नरेन्द्रे राज्यं गृहीते च तदीयपुत्रे।
अब्दालखानोपि चकार कोपं पितृव्य एतस्य महीभृतोपि॥६२५॥

यदापि म्रियते भ्राता भ्राता गृह्णाति तत्पदम् ।
इत्थं कुलक्रमोस्माकं कथं राज्यं स इच्छति ॥ ६२६ ॥
इत्युक्त्वा प्रहिते दूते तेनाब्दालाभिधेन तत् ।
युद्धं युसूबशाहस्य सिकन्दरपुरेभवत् ॥ ६२७ ॥
अब्दालखानको युद्धं कृत्वा हत्वारिसैनिकम् ।
कुतूहलेनेव दिवं ययौ भ्रातृदिदक्षया ॥ ६२८ ॥
युसूबभूपती राज्ये गृहीते प्रददौ धनम् ।
प्राक्तनान्कर्णमान्धातृमुखान्विस्मारयन्निव ॥ ६२९ ॥
अथ सर्वमहायोधदुर्विवेकेन चोदितः ।
तस्य मूमारखानोगाद्दूरं युद्धचिकीर्षया ॥ ६३० ॥
मह्मदखाननामाभूद्युसूबक्ष्मापसेवकः ।
युयुधे सह तेनैष तदा दिद्दामठान्तिके ॥ ६३१ ॥
महानीलरजोराशिमेघान्तरविमूर्च्छिताः ।
जगर्जुर्दहनास्त्रस्य ज्वाला विद्युल्लता इव ॥ ६३२ ॥
निःशोभा अभवंल्लोका मृते मह्मदखानके ।
अस्तं दिनकरे याते सायं पद्माकरा इव ॥ ६३३ ॥
चलन्तः सादिनोप्यासन्वितस्ताजलबिम्बिताः ।
विशन्त इव पातालं तत्पराभवशङ्कया ॥ ६३४ ॥
मासद्वयस्य सार्धस्य भोगान्भुक्त्वा स भूपतिः ।
जगाम खशलोकानां मार्गं पर्वतदुर्गमम् ॥ ६३५ ॥
राज्यं मूमारखानेन श्रिते यूसुबभूपतिः ।
चचालोदयति प्रातः सूर्ये चन्द्र इवाशुभः ॥ ६३६ ॥
समस्तपृथिवीपालजलालदीनभूपतेः ।
चरणं शरणीकर्तुं ययौ यूसुबभूपतिः ॥ ६३७ ॥

मूमारखानलोकस्य शनैर्वैरमजायत।
परस्परविरोधेन वनस्येव दवानलः॥ ६३८॥

सपादस्यैव मासस्य सुखं कृत्वा स भूपतिः।
उवास देवतागारे शत्रुलोकाभिरक्षितः॥ ६३९॥

मूमारखानं निर्जित्य चक्कहैदरकादयः।
राज्ये निवेशयामासुः श्रीमल्लह्वरचक्ककम्॥ ६४०॥

तस्मिँल्लह्वरभूपाले भूमिं शासति सर्वतः।
बभूवोपद्रवो नित्यं सिंहेभ्यो ग्रामवासिनाम्॥ ६४१॥

रात्रौ यो यः प्रतिग्रामं गृहद्वाराद्विनिर्गतः।
निहतः स स सिंहेन पिशाचेनेव भक्षता॥ ६४२॥

जलालदीनभूपालपाददर्शनहर्षितः।
आययौ वत्सरे याते श्रीमान्यूसुबभूपतिः॥ ६४३॥

श्रीमत्सुय्यपुरग्रामं वितस्ताजलदुर्गमम्।
शिश्रिये स महीपाल उदयाद्रिमिवांशुमान्॥ ६४४॥

तदा लह्वरभूपालो निर्ययौ नगरान्तरात्।
अनेकलोकसंयुक्तः सिंहो नगमुखादिव॥ ६४५॥

ज्ञात्वा सुय्यपुरग्रामं वितस्ताजलदुर्गमम्।
ययौ हैदरचक्कोसावन्यमार्गेण सत्वरम्॥ ६४६॥

ज्ञात्वा यूसुबभूपालस्तत्तद्रिपुविचेष्टितम्।
वितस्ताजलमुल्लङ्घ्य युयुधे लह्वरेण सः॥ ६४७॥

विधाय तुमुलं युद्धं सर्वप्राणिभयावहम्।
मन्त्री लह्वरखानस्य ममाराब्दालमीरकः॥ ६४८॥

नष्टे लह्वरभूपाले मिलितैर्निजसैनिकैः।
अवर्धत स भूपालो नदैरिव महार्णवः॥ ६४९॥

लह्वरखानो यूसुबखानपादमशिश्रियत् ।
सभ्रातरमुं सोपि निर्नेत्रमकरोत्क्षणात् ॥ ६५० ॥

ज्ञात्वा हैदरचक्कोसौ यूसुबनृपचेष्टितम् ।
शिश्रिये जाङ्गलं देशं पुनर्युद्धचिकीर्षया ॥ ६५१ ॥

युद्धं यूसुबभूपालचक्कहैदरयोरभूत् ।
वनेषु शोणितासारदूरीकृतदवानलम् ॥ ६५२ ॥

जल्लालदीनभूपस्य ययौ हैदरचक्ककः ।
सकाशं वसुभिर्हीनो भास्करस्येव चन्द्रमाः ॥ ६५३ ॥

शशास चलिते तस्मिन्देशं यूसुबभूपतिः ।
अन्धकारे गते दूरं पद्माकरमिवोष्णगुः ॥ ६५४ ॥

ववर्ष वासवः सम्यग्ववौ वायुः सुखावहः ।
तताप तपनः साक्षात्तस्मिन्रक्षति मेदिनीम् ॥ ६५५ ॥

कीर्तिर्दूरीकृता तेन चचाल वसुधामिमाम् ।
यद्गेहे गुणबद्धेव लक्ष्मीरासीदनन्यगा ॥ ६५६ ॥

गुणेष्वनन्तेष्वपि तस्य राज्ञः
स एष दोषः प्रकटस्तदाभूत् ।
यच्चञ्चलागृह्यत तेन लक्ष्मीः
स्थिरापि कीर्तिर्विहिता सुदूरम् ॥ ६५७ ॥

चन्द्रमा गुणिवैरीति प्रसिद्धिं परमां गतः ।
साम्ययोगः कथं तस्य नृपेण गुणिबन्धुना ॥ ६५८ ॥

हबीबखानप्रमुखेषु तेषु
रुद्धेषु यूसूबमहीधरेण ।
निष्कृष्य चक्षूंषि विशेषरोषा-
त्कश्मीरदेशे विहितो विचारः ॥ ६५९ ॥

जल्लालदीनभूपालसेवनार्थं कृतोद्यमः।
याकूबराजपुत्रोपि प्रहितस्तेन भूभृता ॥ ६६० ॥
उपायनेषु दृष्टेषु याकूबनिहितेष्वपि।
कश्मीरविजयोत्कण्ठा संबभूव महीभृतः ॥ ६६१ ॥
जल्लालदीनभूपेन कश्मीरविजयार्थिना।
कृताज्ञा भगवद्दासप्रमुखानां महीभृताम् ॥ ६६२ ॥
तद्विज्ञाय स याकूबस्त्यक्त्वा भूपालसेवनम्।
प्रत्याययौ स्वकश्मीरदेशं मार्गादलक्षितः॥ ६६३॥
पितरं स्वं समागत्य याकूबोवददव्यथः।
भगवन्भगवद्दासः प्रहितस्तेन भूभृता ॥ ६६४ ॥
महतोप्यसमर्थस्य महत्त्वं याति निष्फलम्।
पर्वतसदृशाकारं कुञ्जरं हन्ति केसरी ॥ ६६५ ॥
इति निश्चित्य सर्वे ते निर्गमाय जयार्थिनः।
आज्ञां विदधिरे सर्वपर्वतीयदरार्पणात् ॥ ६६६ ॥
विनिर्गते महीपाले सज्जीभूतेथ सैनिके।
वैजयन्त्यस्तदा रेजुर्वामनीकृतभूरुहः ॥ ६६७ ॥
वराहतीर्थमाश्रित्य तस्थौ यूसुबभूपतिः।
तदीयमन्त्रिणोप्यग्रे ययुर्युद्धचिकीर्षया ॥ ६६८ ॥
उवाच सचिवान्भूपो न युद्धं कर्तुमर्हथ।
जल्लालदीनपादाब्जं सेवनायाश्रयामहे ॥ ६६९ ॥
कथं महत्तरं जेतुं शक्तिर्नीचस्य जायते।
न समीरस्य वेगोस्ति पर्वतोन्मूलने क्षमः ॥ ६७० ॥
श्रुत्वेति सचिवाः सर्वे तमूचुः पृथिवीपतिम्।
कथमेतादृशी बुद्धिर्भवतामपि जायते ॥ ६७१ ॥

अकृतगुरुसद्वाक्यः सिद्धिं न गच्छति साधको
व्रजति न सुखं रोगी वैद्यप्रयोगवियोगतः ।
अगणितमहायन्ता दन्ती न विन्दति चातुरीं
सचिववचनद्वेषी राजा न याति सुवैभवम् ॥ ६७२ ॥
निशम्येति स भूपालः सचिवांस्तानवोचत ।
दृष्टं सैन्यं न युष्माभिर्जल्लालदीनभूपतेः ॥ ६७३ ॥
प्राचीमेव शचीपतिः स भजते श्रीदक्षिणाशां यमः
पानीयाधिपतिश्च पश्चिमदिशं वित्तेश एवोत्तराम् ।
एते केवलदिक्पतित्वविभवस्पर्धीं कथं कुर्वते
जीयात्सर्वदिगीश्वरो नरपतिर्जल्लालदीनाभिधः ॥ ६७४ ॥
नाकवरसमः कश्चिद्दाताभून्न भविष्यति ।
दानं समर्पितं येन पण्डितेष्वपि वैरिषु ।
कर्णः सुवर्णदानेन यशः प्राप्नोति भूपतिः ॥ ६७५ ॥
वित्ती चेन्नरवाहनो भवति तत्कार्पण्यमुच्चावचं
चन्द्रश्चेत्खलु निर्मलः प्रतिदिनं दोषः कलङ्काभिधः ।
तेजस्वी यदि वह्निरुद्धततमोधूमः सदा दूषको
राज्ञा दानयशःप्रतापनिकरैरेतेमुनाधःकृताः ॥ ६७६ ॥
इत्थं जल्लालदीनस्य सेवाहेवाकतत्परे ।
यूसुवनृपतौ सम्यक्सचिवा इदमब्रुवन् ॥ ६७७ ॥
शत्रुपादस्पृहा यस्य जीवितं तस्य निष्फलम् ।
स एव पुरुषो धन्यो यो द्वेष्टि रिपुणा सह ॥ ६७८ ॥
भवन्तः सन्तु दूरस्थाः कुर्मस्त्वत्कार्यानिर्णयम् ।
जाङ्गलं देशमाश्रित्य योत्स्यामः प्रत्यहं वयम् ॥ ६७९ ॥
सहस्रकिरणो रविर्जगति सत्प्रतापोज्ज्वलो
गुहान्तरगतं तमो हरति नो यथा जातुचित् ।

तथा नरपतिः क्षमो भवति चक्रवर्ती कथं
विनाशयितुमुद्यतो विहितजाङ्गलासादनम् ॥ ६८० ॥

इत्थं निशम्य भूपालः सचिवोदीरितं वचः।
निर्वापयन्निवोवाच वचनामृतशीकरैः ॥ ६८१ ॥

भयं त्यजत मद्वाक्यमनुपालयताधुना।
अहं जल्लालदीनस्य ग्रहीष्यामि पदाम्बुजम् ॥ ६८२ ॥

अलंकारभूतोस्ति यो भूपतीना-
मलं कामदेवेन रूपे यदीये।
अहं कामतः स्तौमि जल्लालदीन-
महंकार एषोस्ति चित्ते मदीये ॥ ६८३ ॥

करिष्यामः कथं वैरं श्रीचक्रवर्तिना समम्।
मयैव सेवा कर्तव्या सुखं देशे भविष्यति ॥ ६८४ ॥

न भूतो न भावी न वा वर्तमानः
कदाचिच्च कश्चिन्महीभृत्समानः।
इति प्रायशो नित्यशो वर्धमानः
सदा जल्पतो वर्तते मेभिमानः ॥ ६८५ ॥

पातिशाहिगुणाञ्श्रोतुं कर्णोयं चपलायते।
एतद्दातृत्वमाकर्ण्य कर्णोयं च पलायते ॥ ६८६ ॥

विधात्रा लिखितां भाले लिपिं दारिद्र्यदूषिताम्।
पतन्ति चरणे तस्य जनाः कर्तुमिवान्यथा ॥ ६८७ ॥

मस्तके भूषणं राज्ञां लक्ष्मीप्राप्तिमहौषधम्।
अस्ति पादरजस्तस्य दुर्लभं महतामपि ॥ ६८८ ॥

प्रत्यक्षदेवमादित्यं ध्यायतश्चक्रवर्तिनः।
साक्षाद्भक्तिप्रभावेन दूरं यान्ति विपत्तयः ॥ ६८९ ॥

वेदान्निर्णीतभेदानसुरवरकराक्रान्तदेशान्सुरेशा-
न्गन्धर्वान्मन्ददर्पान्प्रतिदिवसभयव्याकुलाँल्लोकपालान् ।
वेधोगोविन्दशर्वांस्तदभिमुखकृतप्राञ्जलींश्चापि मत्वा
सूर्यं प्रत्यक्षदेवं प्रणमति मतिमाञ्शाहिजल्लालदीनः ॥६९०॥

अकबरनृपतेर्यदैति सैन्यं
कथमिव शक्यमनेन मद्बलेन ।
प्रसरति जलधेर्यदा तरङ्गो
भवति हि शूर्पनिवारणं निरर्थम् ॥ ६९१ ॥

प्रत्यक्षदेवमादित्यमुलूको यदि निन्दति ।
का हानिस्तस्य देवस्य जगतामुपकारिणः ॥ ६९२ ॥

इति निश्चित्य भूपालो जल्लालदीनभूपतेः ।
चरणं शरणीकर्तुं भगवद्दासमाश्रयत् ॥ ६९३ ॥

पञ्चवर्षाश्रितान्भोगान्भुक्त्वा यूसुबभूपतिः
जल्लालदीनभूपालसेवनार्थमथागमत् ॥ ६९४ ॥

गते तस्मिन्महीपाले भगवद्दाससैनिकम् ।
याकूबो नाम तत्पुत्रः प्राज्यं राज्यमथाग्रहीत् ॥ ६९५ ॥

संग्रामे पितृसर्वस्वमर्जितं कोशसंचितम् ।
दत्त्वा याकूबभूपालः सर्वाँल्लोकानरञ्जयत् ॥ ६९६ ॥

चलिते भगवद्दासे यूसुबनृपसंयुते ।
बभौ याकूबभूपालो मेघमुक्त इवांशुमान् ॥ ६९७ ॥

म्लेच्छशास्त्रविनिर्दिष्टमास्ते मतचतुष्टयम् ।
अन्योन्यमतवैरेण बभूव कलहागमः ॥ ६९८ ॥

शंशचक्कादयस्तस्य नृपस्य धृतमत्सराः ।
सदाशिवपुरे दुर्गं चक्रुर्युद्धचिकीर्षया ॥ ६९९ ॥

अथ याकूबभूपस्य दिद्दामठसमीपतः।
बभूव तुमुलं युद्धं शंशचक्केन तेन तत् ॥ ७०० ॥
अलंमाशिरमल्लेकआलकादिपुरस्कृतः।
युयोध शंशचक्कोसौ याकूबप्रभुणा सह ॥ ७०१ ॥
शंशचक्कस्ततो गत्वा मल्लेकबलचोदितः।
जग्राह जलमध्यस्थं ग्रामं सुय्यपुराभिधम् ॥ ७०२ ॥
उद्यन्यथा दिनकरः किरणोत्करेण
राज्यन्धकारनिकरं हरति क्षणेन।
सैन्यं तथैव यमसादकरोत्करेण
याकूब एव कृतसायकमोक्षणेन ॥ ७०३ ॥
अलंमाशिरखानोसौ युद्धं कृत्वापलायत।
नगराच्छंशचक्कं तं स रुरोध महीपतिः ॥ ७०४ ॥
विजये विहिते तेन याकूबेन तदन्तरे।
मध्यदेशमहीपालाद्भयं नित्यमजायत ॥ ७०५ ॥
मध्यदेशमहीपालजल्लालदीनभूपतेः।
कश्मीरविजयोत्कण्ठा भूयः सम्यगजायत ॥ ७०६ ॥
कासिमखाननामानं चक्कहैदरसेवितम्।
प्रेरयामास भूपालः कश्मीरविजयेच्छया ॥ ७०७ ॥
द्वाविंशानां तदा सेनापतीनां निर्गमाय सः।
चकाराज्ञां महीपालः कश्मीरविजयोत्सुकः ॥ ७०८ ॥
ते सेनापतयस्तस्य भूपतेराज्ञया क्षणात्।
लाहोरनगरात्तस्मान्निर्जग्मुरूर्जितश्रियः ॥ ७०९ ॥
कूपा निरुदका आसन्पङ्कशेषास्तदा ह्रदाः।
मरुच्च समतां यातस्तदा सेनाप्रचारतः ॥ ७१० ॥

तत्र रेजुः पताकाभिः पट्टमण्डपपङ्क्तयः ।
काश्मीरपर्वतालोकसमुत्क्षिप्तमुखा इव ॥ ७११ ॥

उद्ययौ स रजोराशिस्तथा सेनाप्रचारतः ।
येन नभसि सूर्यस्य राहुभीतिर्यथाभवत् ॥ ७१२ ॥

मार्गस्थानां हि धूलीनां यथा संख्या न विद्यते ।
तथा संख्या न सेनायाः पदातिगजसादिनाम् ॥ ७१३ ॥

दिनैः कतिपयैः सेना दूराध्वमलिनीकृता ।
चन्द्रभागां नदीं प्राप चकोरीन्दुकलामिव ॥ ७१४ ॥

वस्त्राण्यनेनिजुस्तत्र पपुस्तोयं च निर्मलम् ।
तडागदूषिता लोकाः सुखं चक्रुर्यथेप्सितम् ॥ ७१५ ॥

स्नानत्रस्तचलद्वाजिभीतिचञ्चलमानवे ।
चन्द्रभागातटे दूरादुपहासः कृतोभवत् ॥ ७१६ ॥

स्नानमुक्ताद्गजाद्यत्राप्यग्रे दत्तकरेणुकात् ।
अन्यदन्तिकृतत्रासाज्जनो भीत्याकुलोभवत् ॥ ७१७ ॥

चन्द्रभागां समुल्लङ्घ्य दिनैः स्वल्पतरैरपि ।
पर्वतस्यान्तिकं प्राप सेना काश्मीरदेशगा ॥ ७१८ ॥

पर्वतेषु पदातीनामारोहणावरोहणैः ।
जानुगुल्फपदादीनामवसादो महानभूत् ॥ ७१९ ॥

क्वचित्तोये धारा क्वचिदपि जलं दुर्लभतरं
क्वचित्पङ्के म्लानिः क्वचिदपि शिलाताडनभयम् ।
क्वचिच्छीतं नित्यं क्वचिदपि सदोष्णांशुपतनं
नगस्थाने पन्था भवति यममार्गोपर इव ॥ ७२० ॥

सुवृष्टिकोमलीभूतं तासु पर्वतभूमिषु ।
नवघासाङ्कुरं जक्षुर्वृषवारणवाजिनः ॥ ७२१ ॥

मध्यदेशीयलोकानां पश्यतां पर्वतस्थितिम् ।
पृच्छतां नाम वृक्षाणां चमत्कारो महानभूत् ॥ ७२२ ॥

तास्ताः सङ्कटभूमयः सुगमतां नीताः शिलापट्टकै-
स्ते ते कुञ्जरकुञ्जराः किल भटैर्भीतिं तदा प्रापिताः ।
लोकः कुञ्जमतिप्रकाशमकरोत्सानुं सतोयोद्गमं
सेना पर्वतमस्तके समभवत्कल्पान्तकालोपमा ॥ ७२३ ॥

चक्रवर्त्तिप्रभावेन तत्सेनादर्शनेन च ।
पर्वतीयजना आसन्भयाच्चकितमानसाः ॥ ७२४ ॥

छागानुपायनीकृत्य मातुलुङ्गफलानि च ।
पर्वतीयजनास्तत्र कासीमखानमाययुः ॥ ७२५ ॥

यद्वद्व्योमचरोपि मांसशकलैः संरुध्यते खेचरो
यद्वत्तोयतलस्थितोपि बडिशैर्मत्स्योपि चाबाध्यते ।
यद्वच्छष्पसमर्पणेन कृतिभिर्दूरान्मृगो गृह्यते
तद्वत्तेन वशीकृता जनपदाः कासीमनाम्ना धनैः ॥ ७२६ ॥

हैदरचक्कनामाभूद्याकूबो वैरतत्परः ।
मार्गसंदर्शनार्थं तत्खानकासिमसैनिके ॥ ७२७ ॥

अत्रान्तरे स काश्मीरमार्गरक्षणतत्परः ।
बन्हामनायकोप्यासीद्याकूबभयविह्वलः ॥ ७२८ ॥

बन्हामनायको लोकं स्थापयित्वा बहिः स्वयम् ।
जगाम केवलतया खानकासिमसैनिकम् ॥ ७२९ ॥

तस्य कासिमखानोपि सर्वकार्यविचक्षणः ।
चकार बहुसंमानं वस्त्रैराभरणैर्धनैः ॥ ७३० ॥

अथान्यैरपि याकूबमवगण्य समर्पितम् ।
राज्यं होसनखानस्य पञ्चानिलगिरिस्थितैः ॥ ७३१ ॥

कासिमखानमायान्तं देशान्तरव्यवस्थितम् ।
मध्ये होसनखानस्य राज्यं श्रुत्वा चुकोप सः ॥ ७३२ ॥

अथ याकूबभूपालः प्रस्थानं कृतवान्क्षणात् ।
होसनखानं निर्भर्त्स्य पञ्चानिलगिरिं प्रति ॥ ७३३ ॥

याकूबप्रहितं सैन्यं प्रभुसेवापराङ्मुखम् ।
साकं होसनखानेन संधिं चक्रे यदृच्छया ॥ ७३४ ॥

श्रुत्वा याकूबभूपालो मिलितं निजसैनिकम् ।
निन्दां चपलचित्तानां सेवकानां चकार सः ॥ ७३५ ॥

हरन्ति संपत्तौ वित्तं विपत्तौ विद्विषन्ति च ।
सेवकाः सन्ति दुर्ग्राह्यास्तत्समा न तु तस्कराः ॥ ७३६ ॥

शंशचक्राभिधं बन्धान्मीरमह्मदसंयुतम् ।
मोचयित्वा स याकूबः काष्ठवाटान्तरं ययौ ॥ ७३७ ॥

याकूबभूपमधिगम्य निरस्तवीर्यं
ते सेवका न विदधुर्बहुमानसेवाम् ।
चिन्तामणिं लुठितहस्ततलाभिघातैः
खेलन्ति वानरगणा गुलिकाक्रमेण ॥ ७३८ ॥

याकूबे चलिते सैन्यं विससार पृथक्पृथक् ।
हारसूत्रे स्वयं छिन्ने मौक्तिकं विद्रुतं यथा ॥ ७३९ ॥

काष्ठवाटान्तरे केचित्केचिन्नगरवासिनः ।
आसन्केचिद्विदेशस्थाः केचिन्मुगलसंगरे ॥ ७४० ॥

होसनखानादाहृत्य राज्यं पर्वतमस्तके ।
जग्रहे शंशचक्रेन कासिमाभिधशङ्कया ॥ ७४१ ॥

कासिमखानमायान्तं निशम्य कृतनिश्चयः ।
जग्राह शंशचक्रोसौ पर्वतं जनदुर्गमम् ॥ ७४२ ॥

स्वल्पलोकसमायुक्तः शंशचक्कोभवत्तदा ।
कासिमखानकोप्यासीद्बहुलोकसमावृतः ॥ ७४३ ॥

पुरस्कृत्य स कासिमखानो हैदरचक्रकम् ।
चकार तुमुलं युद्धं सुग्रीवमिव राघवः ॥ ७४४ ॥

काश्मीरसैनिकं सर्वं चक्रहैदरदर्शनात् ।
चचाल रात्रितामिस्रं प्रातरिवारुणोदयात् ॥ ७४५ ॥

यथा महाव्रजोराशिर्वायुमात्रेण नश्यति
तथा मुगलसैन्येन नष्टं काश्मीरसैनिकम् ॥ ७४६ ॥

काश्मीरसैनिके नष्टे मुगलैर्विजयः कृतः ।
इति श्रुत्वा पुरन्ध्रीणां हाहाकारो महानभूत् ॥ ७४७ ॥

भयधूतकराम्भोजा विलोलनयनोत्पलाः ।
कुन्तलालियुतास्तस्थुः पद्मिन्य इव योषितः ॥ ७४८ ॥

शोकान्धकारे संप्राप्ते रराज नयनोत्पलम् ।
स्त्रीणां किंतु मुखाम्भोजं संकोचमगमत्तदा ॥ ७४९ ॥

रुदन्तीनां कुचे स्त्रीणां निपेतुर्बाष्पबिन्दवः ।
ज्वलन्तं हृदि शोकाग्निं दूरीकर्तुमिवोदिताः ॥ ७५० ॥

द्राक्षाक्षोटफलव्याप्तं पुष्पकुङ्कुमशोभितम् ।
प्रविश्य नगरं मेने स्वर्गवद्यवनो भृशम् ॥ ७५१ ॥

शाके प्रयातेष्टखपञ्चचन्द्र-
संख्ये द्वितीयादिषु कार्तिकस्य ।
शुक्लेथ पक्षे रविवासरे च
सैन्यप्रवेशो नगरे बभूव ॥ ७५२ ॥

द्राक्षाफलमथास्वाद्य कार्षिकोपायनीकृतम् ।
निनिन्दुर्मुगलाः सर्वे निजकान्ताधरामृतम् ॥ ७५३ ॥

कुङ्कुमपुष्पमालाभिर्भूषिताशेषमस्तकः ।
मुगलो मद्यपानेषु निजं वीर्यं व्यकत्थत ॥ ७५४ ॥

कासिमखाननेतारं दृष्ट्वा हैदरचक्रकम् ।
अथ काश्मीरलोकोपि तत्सेवनमशिश्रियत् ॥ ७५५ ॥

अनेकलोकसंयुक्तं दृष्ट्वा हैदरचक्रकम् ।
भीत्या कासिमखानोपि कारागृहे न्यवेशयत् ॥ ७५६ ॥

अथ कासिमखानेन रुद्धे हैदरचक्रके ।
काश्मीरलोकाः सर्वे ते दूरं जग्मुर्वनान्तरम् ॥ ७५७ ॥

एकत्र मिलिताः सर्वे ते निन्दां चक्रुरात्मनः ।
परस्परं च संमन्त्र्य मतिं युद्धाय चक्रिरे ॥ ७५८ ॥

योषित्पत्या विहीनेव चन्द्रहीनेव शर्वरी ।
लोकपूर्णा तथा सेना राजहीना न शोभते ॥ ७५९ ॥

इति निश्चित्य सर्वे ते लोका यवनभर्त्सिताः ।
क्षणादानाययामासुर्याकूबं कृतनिश्चयाः ॥ ७६० ॥

याकूबमागतं श्रुत्वा साक्षात्कासिमखानकः ।
मुमारखाननामानं प्राहिणोत्तज्जिगीषया ॥ ७६१ ॥

मुमारखानमायान्तं श्रुत्वा याकूबभूपतिः ।
बभूव बद्धसन्नाहः सम्यग्युद्धचिकीर्षया ॥ ७६२ ॥

कोयं मुमारखानाख्यो युष्मत्सेवकसेवकः ।
एतेन सह योद्धव्यमित्यूचुस्तस्य मन्त्रिणः ॥ ७६३ ॥

त्यक्त्वा मुमारखानं तं विजयेश्वरसंस्थितम् ।
प्रस्थानमन्यमार्गेण चकार नगरं प्रति ॥ ७६४ ॥

तस्मिन्नवसरे सूर्यः साक्षाद्वेदत्रयीमयः ।
भाविसङ्ग्रामसंहारघृणयेवास्तमाययौ ॥ ७६५ ॥

शनैः शनैर्दिने याते केवलत्वभियेव सा।
तत्संगमार्थिनी संध्या ययौ स्थित्वा क्षणान्तरम् ॥ ७६६ ॥
याकूबमायान्तमवेक्ष्य चन्द्रो हस्तस्थखड्गद्वयदुर्निरीक्ष्यम्।
राजेति नामद्वयमाकलय्य भीत्येव यातोस्तनगप्रदेशम् ॥७६७॥
अत्रान्तरे स याकूबो दुराध्वखिन्नसैनिकः।
सदाशिवपुरस्थाने चस्कन्द नगरं क्षणात् ॥ ७६८ ॥
कृतवति सति कान्ते चुम्बनालिङ्गनानि
क्षिपति च निशि बाणान्निर्दयं कामदेवे।
सुरतनिरतनारीसंगमे संनिकृष्टे
समरभुवि नराणां सिंहनादो बभूव ॥ ७६९ ॥
मार्गे गृहान्तरे वापि हत्वा यवनसैनिकम्।
सैन्येन महता युक्तो राजद्वारं ददाह सः ॥ ७७० ॥
अलिः सूर्योदयार्थीव रात्रिबद्धोम्बुजान्तरे।
कासिमखानकोप्यासीद्बहिः निजगृहान्तरे ॥७७१ ॥
फतिहखाननामाभून्मुगलो धृतसैनिकः।
सम्यङ्नद्धतनुत्राणः सिकन्दरपुरेभवत् ॥ ७७२ ॥
जज्वाल नगरं सर्वं यवनत्रासकारकम्।
अपि ज्वालाप्रकाशेन काश्मीरैर्युयुधे रणे ॥ ७७३ ॥
ततः कासिमखानेन दृष्ट्वा काश्मीरसैनिकम्।
कारागृहस्थितो रोषाद्धतो हैदरचक्कः ॥ ७७४ ॥
लोठं कृत्वा गते सैन्ये वाजिवारणवाससाम्।
प्रभाते स च याकूबो रात्रियुद्धान्यवर्तत ॥ ७७५ ॥
रात्रौ दुर्जनचक्रताडनमलं राशिं स्वयं कुर्वति
तारारत्नसमूहमम्बरवणिग्व्यस्तारयत्सर्वतः।

प्रातश्चण्डकरे प्रभौ कमलकोशोत्पाटनं तन्वति
प्रालेयश्रमवारिणाकुलतरं सोगोपयत्तं क्षणात् ॥ ७७६ ॥
जाते प्रभातसमये शशिनि प्रयाते
चास्तं क्षणाद्दिनकरेण तमो निरस्तम् ।
याकूबभूपतिरतीव बभूव भीतः
सोभूच्च मुद्गलजनः सकलः समेतः ॥ ७७७ ॥
प्रातश्चलति याकूबे यवना नगरान्तरम् ।
मुमुषू रात्रियुद्धेन रोषसंतप्तमानसाः ॥ ७७८ ॥
याकूबं चलितं ज्ञात्वा दृष्ट्वा भग्नं स्वसैनिकम् ।
स्वयं कासिमखानोपि निर्जगाम जयोत्सुकः ॥ ७७९ ॥
येन येन स याकूबो मार्गेण चलितोभवत् ।
तेन तेन हि कासिमखानको निर्ययौ स्वयम् ॥ ७८० ॥
तस्य कासिमखानस्य बहुलोकसमावृतः ।
अलंमाशिरखानाख्यो बभूव चरणानतः ॥ ७८१ ॥
अलंमाशिरखानस्य तैलग्रामनिवासिनः ।
मित्रेण शंशचक्रेन युद्धमासीत्परस्परम् ॥ ७८२ ॥
फतेहखाननामाभून्मुद्गलो बहुसैनिकः ।
नगरान्तररक्षार्थं सिकन्दरपुरस्थितः ॥ ७८३ ॥
युद्धं याकूबभूपालखानकासिमयोरभूत् ।
काश्मीरक्षिप्तपाषाणशरतोमरदारुणम् ॥ ७८४ ॥
अथ काश्मीरलोकानां विरोध उदभूत्पुनः ।
राजाहमेव राजाहमिति कोलाहलान्वितः ॥ ७८५ ॥
विरोधमुत्थितं ज्ञात्वा सहायभ्रातृचोदितः ।
ययौ याकूबभूपालः काष्ठवाटान्तरं पुनः ॥ ७८६ ॥

ततो यूसुबखानेन मीरमह्मदकेन च ।
संधिः कासिमखानस्य विहितो शरणार्थिना ॥ ७८७ ॥
तेन कासिमखानेन जल्लादीनभूभृतः ।
यूसुबखानप्रमुखाः प्रहिताश्चरणान्तिकम् ॥ ७८८ ॥
ज्यल्लालदीनभूपेन समस्ताश्चरणानताः ।
संमानिताः सदा वित्तैः खानयूसुबकादयः ॥ ७८९ ॥
कश्मीरेषु महाशीतव्यथितानेकमानवः ।
आययावथ हेमन्तो द्वितीय इव मुद्गलः ॥ ७९० ॥
ततो यवनगेहेषु पपात हिमसंततिः ।
विजये विहिते सद्यः पुष्पवृष्टिरिवाम्बरात् ॥ ७९१ ॥
याकूबभूपस्य कृतश्रमस्य
रणाय कुर्वाण इवोपकारम् ।
पुष्पोत्करैः संस्कृतसर्वमार्गो
वसन्तकालः प्रकटीबभूव ॥ ७९२ ॥
अथ याकूबभूपालः काष्ठवाटप्रदेशतः ।
आययौ मुद्गलाञ्जेतुं बहुलोकसमावृतः ॥ ७९३ ॥
तस्य कासिमखानोपि वार्तां श्रुत्वा जिगीषया ।
निर्ययावथ हस्त्यश्वव्याकुलीकृतभूभृतः ॥ ७९४ ॥
तयोर्याकूबभूपालखानकासिमयोरभूत् ।
क्षेत्रदेशे महायुद्धं शरपाषाणदुर्दिनम् ॥ ७९५ ॥
अथ याकूबभूपालः प्रस्थानं नगरं प्रति ।
चकारालक्षितो भूत्वा मुद्गलैरनुयायिभिः ॥ ७९६
धान्यराशिसमीपस्थं नगमाश्रित्य दुर्गमम् ।
याकूबभूपः सहसा युयुधे सह मुद्गलैः ॥ ७९७ ॥

निर्मलासितनुत्राणबिम्बितार्कमरीचिभिः ।
प्रकाशमन्धकारेपि बभूव वनगह्वरम् ॥ ७९८ ॥
अनेकविगललोकशोणितासवपूरिताः ।
बभुस्तत्र शिरस्त्राणा यमस्य चषका इव ॥ ७९९ ॥
अनेकक्षिप्तपाषाणच्चूर्णीकृतमहीरुहाः ।
पर्वतस्यापि काश्मीरा उन्नतत्वं न सेहिरे ॥ ८०० ॥
मृतशोणितसंलिप्तनिर्झराम्बुच्छलेन किम् ।
अभवद्यमराजस्य क्रीडतः कुङ्कुमद्रवः ॥ ८०१ ॥
इत्थं याकूबभूपालखानकासिमयोरभूत् ।
युद्धं तन्मासमात्रेण न जयो न पराजयः ॥ ८०२ ॥
अदूलखाननामापि खानकासिमचोदितः ।
जगाम सबलो योद्धुं काश्मीरान्पर्वतस्थितान् ॥ ८०३ ॥
युद्धे संनिहिते तेषां मेघैराच्छादितो गिरिः ।
म्लेच्छानामिव कुर्वद्भिः कालरात्रिसमानताम् ॥ ८०४ ॥
रराज ध्वनिते मेघे विद्युन्मालातिचञ्चला ।
जिह्वेव यमराजस्य स्वादुचर्वणताडिता ॥ ८०५ ॥
धारासारजले मेघे चलिते निजसैनिके ।
अदूलखाननामायं स्वर्गमार्गमथारुहत् ॥ ८०६ ॥
श्रीरङ्गो नाम राजाभूज्जल्लालदीनसेवकः ।
सोपि तत्समरं प्राप्य स्वर्गमार्गमशिश्रियत् ॥ ८०७ ॥
सदाशिवपुरे दुर्गं कृत्वा तिष्ठति मुद्गले ।
ज्येष्ठरुद्रसमीपस्थः काश्मीरैराश्रितो गिरिः ॥ ८०८ ॥
तत्र संनिहिते युद्धे निर्ययुः शोणितापगाः ।
बभूव संगमो यासां सह नद्या वितस्तया ॥ ८०९ ॥

[मेर्जाआदूलनामा पातिशाहिसेवको युद्धार्थं जगाम। तस्मिन्नवसरे काश्मीरालंशिरखानकलोकैर्याकूबलोकस्य युद्धं बभूव। तयोर्युद्धे संनिकृष्टे आदूलखानोपि जगाम। आदूलखानमायातं दृष्ट्वा याकूबलोको वदति स्म। इह मुगला आगताः। ते चालंशिरखानसैनिकं त्यक्त्वा आदूलखानं जगृहुः। तेन सह युद्धमभूत्। अलंशिरखानलोकोपि आदूलखानसहायतां चकार। याकूबेन सह युद्धं चकार। आदूलखानोप्यलंशिरखानस्य संतुष्टो बभूव। पातिशाहिकार्यं त्वया कृतमिति वचनमुवाच। श्रीरङ्गोपि रायसिंहबद्धसंबन्धो बभूव तस्य निकटे चत्वारिंशद्राजपुत्रा आसन्वर्षे पतिते। श्रीरङ्गो राजपुत्रानवदत्। भो राजपुत्रा यूयं चलत। अहं पङ्गुरस्मि चलितुं समर्थो नास्मि। ते चावदन् मैवं राजपुत्रजातौ चलनं न वर्तते पातिशाहो राजपुत्रेषु संमानं करोति। अत एव अस्माभिर्लङ्का रक्षणीयेति। ते राजपुत्रा न चेलुः]

इत्थं विधाय समरं निहते च लोके
कासीमखानयवनस्य बभूव भीतिः।
भग्नानवेक्ष्य यवनान्परिभूयमानाः
काश्मीरलोकनिकराः सहसा ववल्गुः ॥ ८१० ॥
वार्तामेतादृशीं श्रुत्वा जल्लालदीनभूपतिः।
सैदयूसुबखानस्य चकाराज्ञां जिगीषया ॥ ८११ ॥
वार्तां यूसुबखानस्य श्रुत्वा याकूबभूपतिः।
चचाल गर्जितं ज्ञात्वा मृगेशस्येव जम्बुकः ॥ ८१२ ॥
श्रीकश्मीरसरोजमध्यनिरतं लोभाशया संगतं
याकूबाभिधरात्रिबद्धवपुषं नोद्यद्बहिर्निर्गमम्।
कासिम्खानकषट्पदं भययुतं कुर्वन्क्षणान्निर्भयं
सूर्योयं जयति प्रकाशसहितो यूसूबखानाभिधः ॥ ८१३ ॥

शंशचक्कादयो लोका मिर्जायूसुबवार्तया ।
चेलुरुड्डयनत्रस्ताः श्येनस्येव कपोतकाः ॥ ८१४ ॥

यूसुबखान आयाते भयात्कासीमखानकः ।
निर्ययावुदिते सूर्ये चक्राह्वो विरहादिव ॥ ८१५ ॥

मिर्जायूसुबखानस्य कश्मीरजनसंयुतः ।
मह्मदमीरनामाभूत्सदासेवनतत्परः ॥ ८१६ ॥

मिर्जायूसुबखानेन जल्लालदीनभूपतेः ।
काश्मीरा बहवो लोकाः प्रहिताश्चरणान्तिकम् ॥ ८१७ ॥

अथ याकूबभूपाल आययौ काष्ठवाटतः ।
तथैव मुद्गलाञ्जेतुं पतङ्गोग्निं यथा मदात् ॥ ८१८ ॥

मिर्जायूसुबखानेन मह्मदाभिधसंयुतः ।
हाजीमीरकनामापि प्रहितस्तज्जिगीषया ॥ ८१९ ॥

तस्याचलेभवत्सेना मुगलानां च भूतले ।
ते उभे तुलया धृत्वा विधिर्बलमिवैक्षत ॥ ८२० ॥

यवनैर्नैर्ऋते भूमौ काश्मीरैश्च नगोपरि ।
अन्योन्यसंनिकर्षे तु गन्तुं शक्ता न तेभवन् ॥ ८२१ ॥

सिंहनादोभवन्मध्ये सेनयोरुभयोस्तयोः ।
लोकजिघत्सया शब्दो यमदंष्ट्रोद्भवो यथा ॥ ८२२ ॥

ततोभूत्तुमुलं युद्धं देवदानवभीषणम् ।
महायोधगुणग्रामनिकषोपलसंनिभम् ॥ ८२३ ॥

काश्मीरक्षिप्तपाषाणकम्पितानन्तपल्लवाः ।
आसन्युद्धं द्रुमा दृष्ट्वा भयाद्भूतकरा इव ॥ ८२४ ॥

महायोधकृतानन्तसिंहनादापदेशतः ।
क्रन्दन्निवाभवत्तत्र पर्वतोपि भयाकुलः ॥ ८२५ ॥

योधक्षिप्तशरव्रातच्छन्नस्कन्धा महाद्रुमाः।
तद्दृष्ट्वा तुमुलं युद्धमासन्नोमाञ्चिता इव॥ ८२६॥
युद्धं बहुविधं कृत्वा तुष्टं मुद्गलसैनिकम्।
स्वबलं भग्नमालोक्य याकूबोभूद्भयाकुलः॥ ८२७॥
मद्योधचन्द्रमा मन्ये ग्रस्तो यवनराहुणा।
केवलोहं कथं शक्तो म्लेच्छसङ्ग्रामसागरे॥ ८२८॥
इत्युक्त्वा स च याकूबः केवलोप्यचलत्ततः।
काष्ठवाटान्तरं प्राप लज्जमानो दिने दिने॥ ८२९॥
जल्लालदीनसेवार्थं गते यूसुबखानके।
भ्राताभून्मिर्जबद्धाकः कश्मीरेष्वधिकारवान्॥ ८३०॥
विचारे विहिते तेन निर्ववौ सकलो जनः।
चकोर इव शीतांशावुदयं प्रति गच्छति॥ ८३१॥
कुर्वन्तमेकदा हिंसां वणिजं निजवेश्मनि।
कण्ठे निबद्ध्य तन्मांसं नगरं प्रत्यवलगयत्॥ ८३२॥
यः कश्चित्पुरुषो मोहात्प्राणिहिंसां करिष्यति।
एतादृशं महत्कष्टमवाप्स्यति न संशयः॥ ८३३॥
एकदा यवनः कश्चिदपराधविनाकृतम्।
कञ्चिज्जघान काश्मीरं पुरुषं मदविह्वलः॥ ८३४॥
निहतं पुरुषं सम्यगन्तर्धाय जलान्तरे।
न मया निहतः कश्चिदित्यूचे स मृषा वचः॥ ८३५॥
विज्ञप्तस्तत्कुटुम्बेन तत्क्षणं मिर्जबद्धकः।
उवाच हेतुना केन काश्मीरो निहतस्त्वया॥ ८३६॥
उवाच यवनस्तं च नैव कश्चिन्मया हतः।
यद्ययं निहतस्तस्य कबन्धः कुत्र तिष्ठति॥ ८३७॥

इत्थं कृतप्रतिज्ञेस्मिन्यवने मिर्जबद्धकः ।
लोकानाज्ञापयामास सरस्यन्तर्विलोक्यताम् ॥ ८३८ ॥
सरस्यालोडिते सम्यक्कबन्धे निर्गतेपि च ।
यवनस्यापराधोभूत्पुरुषं निघ्नतस्तदा ॥ ८३९ ॥
अपराधिनमालोक्य यवनं मिर्जबद्धकः ।
शास्त्रोक्तेन विधानेन दण्डं तस्य समादिशत् ॥ ८४० ॥
ततो जल्लालदीनेन पृष्टो यूसुबखानकः ।
उवाचानन्तकाश्मीरगुणानानतमस्तकः ॥ ८४१ ॥
कश्मीरदेशो विहितो विधात्रा
स्वर्गस्य निर्माण इव द्वितीयः ।
शेषः समर्थो रसनासहस्र-
द्वयेन वक्तुं न गुणांस्तदीयान् ॥ ८४२ ॥
द्राक्षाफलानि क्षणमात्रनश्यन्माधुर्यपूराणि विहाय यस्मिन् ।
शृङ्गारिलोका अमृतं स्रवन्ति पिबन्ति कान्ताधरपल्लवानि॥८४३॥
यत्राङ्गनानां सततं मुखानि विलासलोलाक्षिपरम्पराणि ।
चकासति क्षिप्रचलद्भिरेफमालाश्रितानीव सरोरुहाणि ॥८४४॥
हाहा तुषारं व्यथयत्यजस्रमिति च्छलाद्धस्तयुगं विधूय ।
यस्मिन्नभीष्टं पतिलोकमध्ये नारी विलासं प्रकटीकरोति॥८४५॥
अन्येपि मन्त्रिणस्तस्य जगदुर्जगतीश्वरम् ।
चक्रवर्तिन्नसंख्याता गुणाः कश्मीरसंभवाः ॥ ८४६ ॥
यस्मिन्भगवती संध्या संध्यानां त्रितये सदा ।
ददाति दर्शनं ग्रीष्मे सलिलागमनिर्गमैः ॥ ८४७ ॥
यत्रामरेश्वरः साक्षाद्धिममूर्तिधरो विभुः ।
वर्धते शुक्लपक्षेसौ कृष्णपक्षे च हीयते ॥ ८४८ ॥

भगवान्स्वयमग्निः स यत्र जाज्वल्यते सदा।
नेन्धनं विद्यते यस्य नाङ्गारो यस्य दृश्यते ॥ ८४९ ॥

अथ जल्लालदीनोसौ श्रुत्वा कश्मीरजान्गुणान्।
निर्ययौ दर्शनार्थाय लाहोरनगरान्तरात् ॥ ८५० ॥

जल्लालदीनभूपालः कश्मीरनगरान्तरम्।
आषाढशुक्लपञ्चम्यामाससाद ससैनिकः ॥ ८५१ ॥

आषाढशुक्लसप्तम्यामाशीर्वादपरायणान्।
पुपोष स्वर्णदानेन भूपो ब्राह्मणबालकान् ॥ ८५२ ॥

ततो मार्तण्डमाश्रित्य गोप्रदानानि भूपतिः।
मुक्तासुवर्णयुक्तानि ब्राह्मणेभ्यः समार्पयत् ॥ ८५३ ॥

द्राक्षाटङ्कफलाक्षोटभव्यतालीवनान्वितम्।
कश्मीरदेशमालोक्य तुतोष धरणीपतिः ॥ ८५४ ॥

वितस्तातीरमाश्रित्य पश्यतो नगरस्थितिम्।
जल्लालदीनभूपस्य बभूवातीव कौतुकम् ॥ ८५५ ॥

ज्येष्ठरुद्रसमीपस्थं नानापुष्पोपशोभितम्।
सरः संपश्यतस्तस्य चमत्कारो महानभूत् ॥ ८५६ ॥

जल्लालदीनपादत्रपवित्रीकृतमस्तकः।
चरणं शरणीकर्तुं याकूबोपि समाययौ ॥ ८५७ ॥

शरणार्थिनमायातं याकूबं चरणानतम्।
मानसिंहमहीपालसेवकं कृतवान्नृपः ॥ ८५८ ॥

देशान्तरं समासाद्य चक्रवर्तिसमर्पितम्।
सुखं चकार याकूबो मानसिंहपदानतः ॥ ८५९ ॥

जल्लालदीनभूपालो दृष्ट्वा कश्मीरमण्डलम्।
देशं यूसुबखानाय दत्त्वा देशान्तरं ययौ ॥ ८६० ॥

मिर्जायूसुबखानोसौ नृपसेवाविचक्षणः ।
देशं ररक्ष निःशेषमादेशेन विशेषतः ॥ ८६१ ॥

श्रीमज्जल्लालदीनेन मिर्जायूसुबरोषतः ।
विहितः काजिआलाख्यः कश्मीरेष्वधिकारवान् ॥ ८६२ ॥

वार्षिके ढौकिते तेन मिर्जायूसुबसेवकाः ।
अधिकारविहीनास्ते गृहे प्राघुर्णिका इव ।
न दत्तं तेन कस्मैचिन्न भुक्तं स्वयमेव वा ॥ ८६३ ॥

किंतु राशीकृतं धान्यं हृत्वा स्वर्णमिवाखुना ।
लोका यूसुबखानस्य काजिआलेन भर्त्सिताः ॥ ८६४ ॥

बभूवुः क्षुधयाक्रान्ता निदाघेनेव चातकाः ।
धान्यं राशीकृतं दृष्ट्वा काजिआलेन वर्धितम् ॥ ८६५ ॥

आययावथ काश्मीरलोकस्तद्धरणेच्छया ।
दुष्टेन काजिआलेन द्रविणेन व्ययीकृते ॥ ८६६ ॥

अथ मुद्गललोकस्य विरोधोभूत्परस्परम् ।
भ्राता यूसुबखानस्य मिर्जायाद्वारकोकरोत् ॥ ८६७ ॥

संधिं कश्मीरलोकेन काजिआलजिघांसया ।
विधाय विविधं युद्धं काजिआलोचलत्तदा ॥ ८६८ ॥

पर्वतारोहणादश्वे मृते स्वर्गं च सोगमत् ।
हसैनबेगनामाभूज्जल्लालदीनसेवकः ।
विधाय समरं सम्यग्जीवन्प्रत्याययौ च सः ॥ ८६९ ॥

चित्तं विधाय कुटिलं यदनेन वित्तं
संरक्षितं तु रिपुभिः खलु भक्षितं तत् ।
हा संहृतं कथमिति प्रकटप्रहास-
मस्तोकशोकरहितं वदति स्म लोकः ॥ ८७० ॥

येन यत्संचितं वित्तं वञ्चयित्वा कृषीवलान्।
तत्सर्वं निजलोकेभ्यो मिर्जायाद्वारको ददौ ॥ ८७१ ॥

जल्लालदीनभूपालपादसेवापराङ्मुखः।
जग्राह मिर्जायाद्वारो राज्यं कश्मीरमण्डले ॥ ८७२ ॥

तद्दृष्ट्वा भाविसङ्ग्रामभीतिचञ्चलमानसाः।
ततः समस्तकाश्मीरा हाहेति जगदुर्जनाः ॥ ८७३ ॥

इत्थं निशम्य चरितं यवनस्य तस्य
जल्लालदीननृपतिः सहसा जगाम।
रोषेण रुद्धकटकं कटकं विसार्य
चूर्णीचकार च स पर्वतदुर्गमार्गम् ॥ ८७४ ॥

ततो जल्लालदीनेन बहुलोकसमन्वितः।
श्रीमच्छेखफरीदाख्यः प्रहितस्तज्जिगीषया ॥ ८७५ ॥

स रुरोह ततो हस्तिगंजपर्वतमस्तकम्।
उदयाद्रिमिव प्राप्तः साक्षाद्भास्करसारथिः ॥ ८७६ ॥

तस्मिन्नवसरे मिर्जायाद्वारो निजसेवकैः।
प्राप्य शूरपुरग्रामं निहतो द्रोहकर्मणा ॥ ८७७ ॥

हतं तं पतितं दृष्ट्वा जम्बूकश्चाशितामिषम्।
स्वामिद्रोहीति थूत्कृत्य सहसा जगदुर्जनाः ॥ ८७८ ॥

आयात एष भगवानिह चक्रवर्ती
पूजाद्यनेकविधिना च मया विधेया।
इत्याकलय्य स उपायनभक्तियुक्ति
याद्वारको रचितवान्निजजीवितेन ॥ ८७९ ॥

मिर्जायाद्वारके तस्मिन्निहते निजसेवकैः।
ततः शेखफरीदाख्यः स प्राप नगरान्तरम् ॥ ८८० ॥

साक्षाच्छेखफरीदेन रक्षिते नगरान्तरे।
चौराणां नाभवन्मार्ग उलूकानामिवोषसि ॥ ८८१ ॥

ततो जल्लालदीनोसौ द्रष्टुं कश्मीरमण्डलम्।
आययौ कुङ्कुमाक्षोटफलपुष्पोपशोभितम् ॥ ८८२ ॥

काचिद्दर्शनकाङ्क्षिणीं प्रियसखीं संदर्शयन्ती नृपं
व्यग्राभूदपरा चमूपतिरयं दृष्टो मयेत्यब्रवीत्।
काचिद्रुद्धपयोधरं समचलत्संतर्जयन्ती शिशु-
मित्थं भूपविलोकने समभवत्पौराङ्गनानां त्वरा ॥ ८८३ ॥

ततः काश्मीरलोकेन कृते भूपतिदर्शने।
सद्यः प्रतिगृहं नित्यं प्रावर्तत महोत्सवः ॥ ८८४ ॥

पुरा चक्रकुलोत्पन्नैर्भूपैर्जातिविरोधतः।
ब्राह्मणेभ्यस्तदा दण्डो गृहीतः किल वार्षिकः ॥ ८८५ ॥

यो ररक्ष निजां जातिं कुलशीलसमन्वितः।
स ददौ वार्षिकं राज्ञे करं प्रतिगृहं द्विजः ॥ ८८६ ॥

ब्रह्मयज्ञोपवीतस्य रक्षणाय समर्पितः।
प्रत्यब्दं ब्राह्मणै राज्ञां चत्वारिंशत्पणाः कराः ॥ ८८७ ॥

उत्तमो ब्राह्मणो देशं तत्याज म्लेच्छदूषितम्।
तत्याज मध्यमो लज्जां जातिं तत्याज चाधमः ॥ ८८८ ॥

म्लेच्छमेघे स्थिते तस्मिन्नन्धकारितदिङ्मुखे।
विप्रा देशान्तरं जग्मुर्मराला इव मानसम् ॥ ८८९ ॥

तादृशान्ब्राह्मणाञ्ज्ञात्वा जल्लालदीनभूपतिः।
चक्रवंशक्रमायातं विप्रदण्डं न्यवारयत् ॥ ८९० ॥

कश्मीरदेशे विप्राणां यो यः पूजां करिष्यति।
तस्मै तस्मै प्रदास्यामि तत्क्षणं पारितोषिकम् ॥ ८९१ ॥

कश्मीरदेशे विप्रेभ्यो वार्षिकं यो ग्रहीष्यति।
अचिरात्तस्य भूपालो गृहमुत्पाटयिष्यति ॥ ८९२ ॥
इत्यादेशेन भूपस्य हतवार्षिकसाध्वसाः।
आशीर्वादपरा आसन्ब्राह्मणा ब्रह्मवादिनः ॥ ८९३ ॥
साक्षाज्जल्लालदीनोयं जीयाद्वर्षशतार्बुदः।
योस्माकं वार्षिकं दण्डं वारयामास भूपतिः ॥ ८९४ ॥
चक्रवंशप्रभूणां हि भूपतीनां मदाज्ञया।
नित्यं धेनुसहस्रस्य मृत्युरासीदवारितः ॥ ८९५ ॥
म्लेच्छान्धकारविध्वस्ता मित्रदर्शनवर्जिताः।
ब्राह्मणा अन्वतप्यन्त रात्रौ पद्माकरा इव ॥ ८९६ ॥
देशेस्मिन्म्लेच्छदावाग्निशोषिताशेषवृत्तयः।
नाबभुर्ब्राह्मणाः सर्वे दग्धारण्ये मृगा इव ॥ ८९७ ॥
क्वचिद्धासः क्वचित्रासः क्वचिच्चैव निभर्त्सनम्।
जम्बुकस्येव विप्रस्य पथि संचरतोभवत् ॥ ८९८ ॥
जल्लालदीनभूपालनित्यसेवनतत्परः।
बभूव रामदासाख्यो विप्राणामुपकारकः ॥ ८९९ ॥
तादृशान्ब्राह्मणान्दृष्ट्वा रामदासो महायशाः।
वितीर्णस्वर्णदुर्वर्णो बभौ कर्ण इवापरः ॥ ९०० ॥
यद्वर्षणैरमृतमेष ददाति मेघ-
स्तद्वर्जितेन स विकथ्यत एतदेव।
दानं सदैव ददतो न बभूव तस्य
श्रीरामदासनृपतेर्हृदयेभिमानः ॥ ९०१ ॥
मान्धातर्मन्ददाता भवसि गुणगणैः कर्ण कर्णं पिधेहि
व्रीडा जीमूतवाह त्वयि भवति न वा किं बले त्वं बलीयान्।

सत्यं त्वावेद्मि नित्यं किमु तव यशसा विक्रमादित्य कृत्यं
दानं सम्यग्विधानं वितरति चतुरं रामदासः सदा सः॥९०२॥

[अकबरसेवकेन रामदासेन ब्राह्मणगृहं प्रति रजतमुद्राशतं सुवर्ण-मुद्रासहितं समर्पितम् । रजतमुद्रापञ्चाशत्सहस्राणि रामदासेन ब्राह्मणानां दारिद्र्यदूषितानां परिकल्पितानि ।

यावदन्तरमदानदानयो रामदास जगतीसुरद्रुम ।
अन्यदीयभवदीयदानयोस्तावदन्तरमिति प्रतीयते ।]

निवेद्याशीर्वचस्तस्मै ब्राह्मणा ब्रह्मवादिनः ।
गृहं प्रत्याययुः सर्वे पण्डिता निर्मलाशयः ॥ ९०३ ॥
अन्येद्युरपि सर्वे ते प्रह्लादा निर्मलाशयः ।
संमानिता नरेन्द्रेण वचसामृतवर्षिणा ॥ ९०४ ॥
श्रीमज्जल्लालदीनोपि रामदासनिवेदितान् ।
विप्रान्निर्वापयामास चकोरानिव चन्द्रमाः ॥ ९०५ ॥
ग्रामेषु तेन दत्तेषु बभौ पण्डितमण्डलम् ।
मेघे वर्षति दावाग्निसंतप्तमिव काननम् ॥ ९०६ ॥
जल्लालदीनभूपालसदासेवनतत्परः ।
अभूद्राजानकादित्यो भूमिदाने विवेचने ॥ ९०७ ॥
विपक्षं गुणिनं हित्वा स्वपक्षं गुणवर्जितम् ।
पुपोष भूमिदानेन स ज्ञातिस्नेहमोहितः ॥ ९०८ ॥
कश्मीरेष्वथ रामदासवचनक्षुब्धाचलस्फारितं
भूदानामृतमुत्थितं सुविमलं श्रीराजगेहाम्बुधेः ।
आदित्याभिधराहुणा सविबुधान्हा वञ्चयित्वा कथं
नीतं दुर्जनबन्धुदैत्यसुमहत्संतृप्तये तत्क्षणम् ॥ ९०९ ॥
साक्षाज्जल्लालदीनोसौ करुणामृतसागरः ।
स्वर्णदुर्वर्णदानेन भिक्षुलोकमपूपुरत् ॥ ९१० ॥

[ततः पातिशाहिः शिखाफैजं समादिशत् । भवता भाण्डागारे रौप्यमुद्रासहस्राणि गृहीत्वा ग्रामे चाटव्यां च सर्वेषु स्थानेषु ब्राह्मणानां भिक्षुकाणां च द्रविणं समर्पणीयमिति तेनापि तथैव कृतम्]

देशं यूसूबखानाय समर्प्य पुनरेव सः ।
जल्लालदीनभूपालो देशान्तरमथागमत् ॥ ९११ ॥
देशे यूसुबखानेनाश्रिते ते निर्वृतिं जनाः ।
उदयाद्रिं गते सूर्ये प्रातः पद्माकरा इव ॥ ९१२ ॥
समर्पिताः प्रतिग्रामं कार्षिकाः कृतवार्षिकाः ।
धानुष्काश्च पुनर्युद्धशङ्कया तेन वारिताः ॥ ९१३ ॥
प्रवर्तते यथा हंसः क्षीरनीरविवेचने ।
तथाभूत्सोपि धानुष्ककृषीवलविचारणे ॥ ९१४ ॥
जल्लालदीनसेवार्थं गते यूसुबखानके ।
मिर्जालश्करनामाभूत्तत्पुत्रोत्राधिकारवान् ॥ ९१५ ॥
कलङ्करहितः साक्षात्सदा सर्वशिरोमणिः ।
सुधामयवपुः सोयं बालचन्द्र इवाबभौ ॥ ९१६ ॥
सेवको यवनो लोकं वितस्तातीरमाश्रितः ।
उह्यतां काष्ठभारोयमित्यादिश्य व्यमर्दयत् ॥ ९१७ ॥
तादृशं यवनं दृष्ट्वा मिर्जालश्करकः स्वयम् ।
उवाच सचिवाञ्शीघ्रं पश्यायं हन्ति मानवान् ॥ ९१८ ॥
अहो मत्सेवका लोकान्काश्मीरान्व्यथयन्ति किम् ।
जल्लालदीनभूपालान्न भयं वर्तते कथम् ॥ ९१९ ॥
मार्गे नास्ति विलुण्ठनं न च भयं चौरान्न वा दुर्जनाद्
ग्रामे वा नगरे प्रयच्छति वणिग्लोको न शुल्कं क्वचित् ।
मेघे वर्षति मेदिनी फलयुता सद्वार्षिकाः कार्षिका
देशं रक्षति न क्षितेः क्षतिरहो जल्लालदीनाभिधे ॥ ९२० ॥

अधुना भवता शीघ्रं यवनोयं निरुध्यताम् ।
इत्याज्ञप्तो निरोद्धुं तमधावत्सचिवः क्षणात् ॥ ९२१ ॥
चलिते यवने तस्मिन्भयात्तं सचिवोब्रवीत् ।
भगवन्यवनः सोयं त्वद्भयेन पलायितः ॥ ९२२ ॥
इत्युक्ते तेन भूयः स मिर्जालश्करकोवदत् ।
अधुना चलिते तस्मिन्मदुक्तं वचनं कुरु ॥ ९२३ ॥
मध्येवितस्तमानीय नावं काष्टसमन्विताम् ।
तथा दहन्तु लोकानां यथा भीतिर्भविष्यति ॥ ९२४ ॥
तथाविधे कृते तेन मन्त्रिणा यवनास्तदा ।
ज्वलन्तीं नावमालोक्य भयेनासन्मृता इव ॥ ९२५ ॥
यः कश्चिद्यवनो मोहात्काश्मीरान्पीडयिष्यति ।
स निजस्यापराधस्य सत्वरं फलमाप्स्यति ॥ ९२६ ॥
भूतलान्निर्गता रेजे कुङ्कुमाङ्कुरसन्ततिः ।
शरद्दिदृक्षया शेषशिरःपङ्क्तिरिवोत्थिता ॥ ९२७ ॥
प्रादुरासीत्ततो हित्वा निर्मलाङ्कुरचोलकम् ।
शिखा कुङ्कुमपुष्पाणां लज्जयेव शनैःशनैः ॥ ९२८ ॥
कुङ्कुमपुष्पशोभाढ्यं द्राक्षाक्षोटसमन्वितम् ।
दृष्ट्वा पद्मपुरग्रामं निनिन्द त्रिदिवं जनः ॥ ९२९ ॥
खारीके वापिते बीजे श्रावणे भुवि कार्षिकैः ।
अर्धखारीप्रमाणानि पुष्पाण्यवचितानि तैः ॥ ९३० ॥
प्रातर्यावन्ति पुष्पाणि चितानि धरणीतलात् ।
आसञ्चितानि तावन्ति सायं मध्याह्नयोरपि ॥ ९३१ ॥
यदाप्रभृति नागेन तक्षकेण प्रदर्शितम् ।
तदाप्रभृति तादृक्षं कुङ्कुमं नाभवद्भुवि ॥ ९३२ ॥

कश्चित्पुष्पावचयनिरतो ढौकयानोपि कश्चि-
त्कश्चिद्भारप्रमथितशिरा नौशयानोपि कश्चित्।
कश्चिन्नित्यं तुलननिरतो रक्षणे कोपि सक्त-
स्तस्मिन्काले बहुलघुसृणव्याकुलो लोक आसीत् ॥ ९३३ ॥

॥ इति कुङ्कुमोत्पत्तिवर्णनम् ॥

अष्टवर्षेष्वतीतेषु जल्लालदीनभूभृता।
यूसुबखानादाहृत्य देशोन्येषु समर्पितः ॥ ९३४ ॥
असाफखान आयाते मिर्जायूसुबसैनिकम्।
पृथक्पृथग्ययौ याते वायाविव रजोभरः ॥ ९३५ ॥
श्रीमज्जल्लालदीनेन प्रहितौ निजसेवकौ।
अह्मदखानसुल्तानमह्मदकुलखानकौ ॥ ९३६ ॥
असाफखानस्तौ ज्ञात्वा जल्लालदीनसेवकौ।
देशाधिपतितां दत्त्वा प्रभुपादान्तिकं ययौ ॥ ९३७ ॥
कश्मीरेष्वपि तौ सम्यग्दुर्विचारं विचेरतुः।
अन्धकारं सदा पृथ्व्यां सूर्याचन्द्रमसाविव ॥ ९३८ ॥
अकबरनृपतेरथाज्ञया तौ प्रवरपुरान्तिकशारिकासमीपे।
विदधतुरगमाकलय्य दुर्गं नगनगरीति निरुद्धनामधेयम् ॥ ९३९ ॥
बहुविधतपसा विधूय देहं
त्रिदिवनतिः खलु जन्मनि द्वितीये।
इह नगनगरीं विलोक्य लोक-
स्त्रिदिवमिदं न समीहतेधिगन्तुम् ॥ ९४० ॥
तस्मिन्नवसरे गेहे रुद्धे भूपालसेनया।
दुःखं बभूव लोकानां नगरान्तरवासिनाम् ॥ ९४१ ॥
तादृशं दुःखमालोक्य वणिग्लोकनिवेदितम्।
लोकान्निर्वापयामास निदेशेनेति भूपतिः ॥ ९४२ ॥

नवीननगरीमध्ये मामकाः सन्तु सेवकाः ।
यः पीडयति काश्मीरान्सोपराधी भविष्यति ॥ ९४३ ॥
आदेशे विहिते तेन जल्लालदीनभूभृता ।
अथ मुद्गललोकोयं शिश्रिये नगरीं नवाम् ॥ ९४४ ॥
शारिकापर्वते रेजे नगरी सा सुधासिता ।
राजधानीं समीपस्थां हसन्तीव पुरातनीम् ॥ ९४५ ॥
निर्गते यवने लोकस्तुतोष विहितोत्सवः ।
जल्लालदीनभूपालसदाशीर्वादतत्परः ॥ ९४६ ॥
द्विसहस्रगृहोपेतमलाबदीननिर्मितम् ।
अकस्मादथ मध्याह्ने जज्वाल नगरं क्षणात् ॥ ९४७ ॥
मुद्गलान्निर्गतान्दृष्ट्वा नवीननगरीस्थितान् ।
विरहादिव जज्वाल नगरी सा पुरातनी ॥ ९४८ ॥
गृहशालादिविस्तीर्णं नानाचित्रोपशोभितम् ।
वह्निना क्षणमात्रेण भस्मशेषमभूत्पुरम् ॥ ९४९ ॥
पुराणनगरीदाहे सा बभौ नगरी नवा ।
सपत्नीविरहे जाते नूतनोढेव वल्लभा ॥ ९५० ॥

॥ इति पातिशाहिअकबरजल्लालदीनस्य कश्मीरप्राप्तिवर्णनम् ॥

॥ इति श्रीप्राज्यभट्टकृता चतुर्थी राजतङ्गिणी ॥

BOMBAY SANSKRIT SERIES.

Edited under the superintendence of Dr. P. Peterson and Dr. R. G. Bhândârkar.

		Rs.	a.	p.
No. I.	—Pañchatantra, Books IV. and V. Edited, with Notes, by Dr. Bühler	0	4	0
No. II.	—Nâgojibhaṭṭa's Paribhâshendus'ekhara. Edited and explained by Dr. Kielhorn. The Sanskrit Text and various Readings, Part I.	0	8	0
No. III.	—Pañchatantra, Books II. and III. Edited, with Notes, by Dr. Bühler...	0	4	0
No. IV.	—Pañchatantra, Book I. Edited, with Notes, by Dr. F. Kielhorn ... (*In the press*)			
No. V.	—The Raghuvaṁs'a of Kâlidâsa, with the Commentary of Mallinâtha. Edited, with Notes, by S. P. Pandit, M. A. Part I., Cantos I.—VI.(*In the press*)			
No. VI.	—Mâlavikâgnimitra : a Sanskrit Play by Kâlidâsa. Edited, with Notes, by Shankar P. Pandit, M. A.	2	2	0
No. VII.	—Nâgojibhaṭṭa's Paribhâshendus'ekhara. Edited and explained by Dr. Kielhorn. Part II. (Translation and Notes), Paribhâshâs I.—XXXVII.	0	8	0
No. VIII.	—The Raghuvaṁs'a of Kâlidâsa, with the Commentary of Mallinâtha. Edited, with Notes, by S. P. Pandit, M. A., Part II., Cantos VII.—XIII	0	12	0
No. IX.	—Nâgojibhaṭṭa's Paribhâshendus'ekhara. Edited and explained by Dr. Kielhorn. Part II. (Translation and Notes), Paribhâshâs XXXVIII. —LXIX.	0	8	0
No. X.	—The Das'akumâracharita of Daṇḍin. Part I. Edited, with Critical and Explanatory Notes, by Dr. Bühler	0	8	0
No. XI.	—The Nîtis'ataka and Vairâgyas'ataka of Bhartṛihari, with extracts from two Sanskrit Commentaries. Edited, with Notes, by Kâshinâth Trimbak Telang, M. A. (copies not available.) ...			
No. XII.	—Nâgojibhaṭṭa's Paribhâshendus'ekhara. Edited and explained by Dr. Kielhorn. Part II. (Translation and Notes), Paribhâshâs LXX.—CXXII. ...	0	8	0
No. XIII.	—The Raghuvaṁs'a of Kâlidâsa, with the Commentary of Mallinâtha. Edited, with Notes,			

		Rs.	a.	p.
	by S. P. Pandit, M. A., Part III., Cantos XIV.—XIX	0	8	0
No.	XIV.—Vikramâṅkadeva-Charita. Life of king Vikramâditya Tribhuvanamalla of Kalyâṇa, composed by his Vidyâpati Bilhaṇa. Edited, with an Introduction, by Dr. G. Bühler (copies not available.)			
No.	XV.—Mâlatî-Mâdhava: a Drama by Bhavabhûti. Edited, with Critical and Explanatory Notes, by Dr. R. G. Bhândârkar, M. A. (second Ed. in the Press.)			
No.	XVI.—Vikramorvas'î: a Drama by Kâlidâsa. Edited with Notes, by Shankar P. Pandit, M. A. ...	1	4	0
No.	XVII.—Hemachandra's Des'înâmamâlâ. Edited, with Critical Notes, a Glossary and a Historical Introduction, by Professor R. Pischel and Dr. G. Bühler, Part I. Text and Critical Notes, by Professor Pischel.	1	0	0
No.	XVIII.—Vyâkaraṇa-Mahâbhâshya of Patañjali. Edited by Dr. F. Kielhorn. Vol. I., complete. Parts I, II & III.	9	0	0
No.	XIX. Ditto ditto by ditto. Vol. I. Part. II.	1	0	0
No.	XX. Ditto ditto by ditto. Vol. I. Part. III.	1	0	0
No.	XXI. Ditto ditto by ditto. Vol. II. Part. I.	1	0	0
No.	XXII. Ditto ditto by ditto. Vol. II. Part. II.	1	0	0
No.	XXIII. Vâsishṭhadharmas'âstram. Edited, with Notes, by Dr. A. A. Führer	0	8	0
No.	XXIV.—Kâdambari by Bâṇa and his son. Vol. I. Sanskrit Text, complete. Edited by Dr. P. Peterson. (copies not available.)			
	Do. Vol II. Introduction and Notes, by do. ...	2	0	0
No.	XXV.—Kîrti-Kaumudî. Edited, with Notes, by Prof. A. V. Kâthavaté. (copies not available.) ...			
No.	XXVI.—Vyâkaraṇa-Mahâbhâshya of Patañjali. Edited by Dr. F. Kielhorn. Vol. II. Part III. ...	1	0	0
No.	XXVII.—Mudrârâkshasa, by Vis'âkhadatta, with the Commentary of Dhuṇḍirâja. Edited, with Notes, by K. T. Telang. (Copies not available.)			
No.	XXVIII.—Vyâkaraṇa-Mahâbhâshya of Patañjali. Edited by Dr. F. Kielhorn. Vol. III. Part I. ...	1	0	0
No.	XXIX.—Do. Do. of Do. by Do. Vol. III. Part II.	1	0	0
No.	XXX.—Ditto do. of do. by do. Vol. III. Part III.	1	0	0
No.	XXXI.—Subhâshitâvalî of Vallabhadeva. Edited by Dr. P. Peterson and Pandit Durgâprasâd ...	2	8	0
No.	XXXII.—Tarka-Kaumudî of Laugakshi Bhâskara. Edited by Professor M. N. Dvivedi (copies not available)	0	12	0

	Rs.	a.	p.
No. XXXIII.—Hitopades'a of Nârâyaṇa. Edited by Dr. P. Peterson.	0	14	0
No. XXXIV.—The Gaudavaho, by Vâkpati. Edited by Shankar P. Pandit.	3	0	0
No. XXXV.—Mahânârâyaṇa Upanishad. Edited by Colonel G. A. Jacob.	0	7	0
No. XXXVI.—University Selections of Hymns from the Rigveda. Edited by Dr. P. Peterson. ...	4	0	0
No. XXXVII.—S'ârañgadharapaddhati. Edited by Dr. P. Peterson. Vol. I.	3	0	0
No. XXXVIII.—Naishakarmyasiddhi. Edited by Col. G. A. Jacob	2	0	0
No. XXXIX.—A Concordance to the principal Upanishads and Bhagavadgîtâ, by the same author.	8	0	0
No. XL.—Eleven Atharvaṇa Upanishads, with Dîpikâs, by the same author	2	8	0
No. XLI.—Handbook to the study of the Rigveda, by Dr. P. Peterson. Part I.	3	0	0
No. XLII.—The Das'akumâracharita of Daṇḍin, Part II. (completing Dr. Bühler's Edition). Edited with Critical and Explanatory Notes by Dr. P. Peterson.	0	8	0
No. XLIII.—Handbook to the study of the Rigveda, by Dr. P. Peterson. Part II. comprising the Seventh Maṇḍala with the commentary of Sâyana...	5	0	0
No. XLIV.—Aphorisms of the Sacred Law of the Hindus, an Index of the Sûtras and the various Readings of the Hiraṇyakeshî-Dharmasûtra, by Dr. G. Bühler, Part I.	2	12	0
No. XLV.—Râjataraṅginî. Edited by Pandit Durgâprasâd, Part I. containing the first 7 (seven) Taraṇgas	3	0	0
No. XLVI.—Patañjali's Yogasûtras. Edited with the Scholium of Vyâsa and the Commentary of Vâchaspati, by Mahâmahopâdhyâya Râjârâm Shâstrî Bodas.	3	4	0
No. XLVII.—Pârâs'ara Dharma Saṁhitâ with the Commentary of Sâyana Mâdhavâchârya, Vol. I. Part I. Edited by Pandit Vâman Shâstrî Islâmpurkar ...	4	4	0
No. XLVIII.—Ditto do. of do. by do. Vol. I Part II.	4	0	0
No. XLIX.—Nyâyakos'a, 2nd Edition. Edited by Mahâmahopâdhyâya Bhîmâchârya Zalkîkar	12	0	0
No. L.—Apastamba Dharmasûtra, Part II. Edited by Dr. G. Bühler	2	4	0
No. LI. Râjataraṅgiṇî, Edited by Pandit Durgâprasâd, Part II containing the 8th Taraṅga	2	8	0